श्रीः

उभयवेदन्तग्रन्थमाला

संस्कृतचतुर्थसरः

(४)

छान्दोग्योपनिषत्

षष्टिप्रबन्धनिर्माणालङ्कर्मीण—दशोपनिषद्भाष्यकार-

श्रीरङ्गरामानुजमुनिवरविरचितभाष्यभूषिता

संपादकेन संशो[illegible]ष्कारादयनेकोपयुक्तांशेन सह

तिरुमलै-तिरु[illegible]देवस्थानमुद्राशालायां मुद्रिता।

सरोऽयं श्रीविशिष्टाद्वैतभाष्यप्रचारसमितिप्रार्थित-
श्रीवेङ्कटेश्वरदेवस्थानवितीर्णद्रावणसंपन्मुद्रणः

उभयवेदान्तग्रन्थमालायाः संपादकः—

शिरोमणि तर्कार्णव पण्डितरत्न श्रीदेशिकदर्शनधुरन्धर पूर्वोत्तरमीमांसाप्रदीप-

उभयमीमांसावल्लभः

उत्तमूर् ति. वीरराघवाचार्यः

मूल्यम्] 1952 [Rs. 8.

UNIVERSAL
LIBRARY
OU_184033
UNIVERSAL
LIBRARY

OUP—902—26-3-70—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.592 U65C Accession No. P.G. S2242

Author

Title ઉપનિષત્ ઉપનિષદ્ 1952.

This book should be returned on or before the date last marked below.

श्रीः

उभयवेदन्तग्रन्थमाला

संस्कृतचतुर्थसरः

(४)

छान्दोग्योपनिषत्

षष्टिप्रबन्धनिर्माणालङ्कर्मीण—दशोपनिषद्भाष्यकार-

श्रीरङ्गरामानुजमुनिवरविरचितभाष्यभूषिता

संपादकेन संशोध्य स्वकृतपरिष्काराद्यनेकोपयुक्तांशेन सह

तिरुमलै-तिरुपति श्रीवेङ्कटेश्वरदेवस्थानमुद्राशालायां मुद्रिता।

सरोऽयं श्रीविशिष्टाद्वैतभाष्यप्रचारसमितिप्रार्थित-
श्रीवेङ्कटेश्वरदेवस्थानवितीर्णद्रविणसंपन्नमुद्रणः

उभयवेदान्तग्रन्थमालायाः संपादकः—

शिरोमणि तर्कार्णव पण्डितरत्न श्रीदेशिकदर्शनधुरन्धर पूर्वोत्तरमीमांसाप्रदीप-

उभयमीमांसावल्लभः

उत्तमूर् ति. वीरराघवाचार्यः

मूल्यम्] 1952 [Rs. 8.

LIST OF BOOKS PUBLISHED.

१. ईशावास्योपनिषत् श्रीमन्निगमान्तमहादेशिक श्रीकूर-नारायणस्वामिभाष्याभ्यां भूषिता केनोपनिषत् श्रीरङ्गरामानुजस्वामिभाष्यभूषिता कठोपनिषत् ,, ,,	५	०	०
२. प्रश्न मुण्डक-माण्डूक्याथर्वशिखोपनिषदः श्रीरङ्गरामानुजस्वामिभाष्यभूषिताः	४	०	०
३. तैत्तिरीयैतरेयोपनिषदौ तथा	६	०	०
४. छान्दोग्योपनिषत् तथा	८	०	०
5. பெரியாழ்வார் திருமொழியில் முதல் ஸம்புடம் உரையுடன்	2	8	0
6. ,, ,, 2-வது ,,	2	0	0
7. ,, ,, 3-வது ,,	2	0	0

१. सिद्धित्रयम् गूढार्थप्रकाशसहितम्	२	०	०
२. परमार्थप्रकाशिका (अद्वैतामोदविमर्शः)	२	०	०
३. ईशावास्योपनिषद्भाष्यम् (आचार्यभाष्य तात्पर्यसहितम्)	१	८	०
४. न्यायकुसुमाञ्जलिः सरलविशदसर्वार्थगर्भविस्ताराख्यव्याख्या सहितः	६	०	०
५. न्यायप्रकाशः (मीमांसा) सुधास्वादसमेतः	४	०	०
६. वैशेषिकदर्शनविमर्शः सानुबन्धः	०	१२	०
७. तर्कसंग्रहः सुखप्रवेशिनीसमेतः	१	०	०
८. श्रीवेङ्कटेशकल्याणचरितकाव्यम् (தமிழ் தாத்பர்யத்துடன்)	०	१२	०
9. ந்யாஸாதிகாரஸர்வஸ்வம் (மணிப்ரவாளம்)	1	0	0

Addresses :—

(1) Sri Uttamur T. Viraraghavacharya,
Ubhaya Vedanta Granthamala Office,
TIRUPATI.

(2) Rao Bahadur G. Rangaswami Aiyangar,
Secretary, Sri Visishtadvaita Bhashya Publishing Committee,
Veda Vilas, No. 3. Hindi Pracharak Road,
Tyagarayanagar, MADRAS.

श्रीः

समर्पणम्

" श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा "

" अतसीगुच्छसच्छायमश्वितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥ "

एकतो द्रमिडसूक्तिसत्सरैरन्यतःसुरवचोमयैरपि ।
साधु संग्रथितया स भूष्यते श्रीपतिः श्रुतिकिरीटमालया ॥

यैषाऽऽमोदवहा सुवर्णशतपत्राढ्यैर्विशुद्धैः सरैः
श्लाघ्यश्रीगुरुकल्पवृक्षसुमनस्संदोहगुम्भैः कृता ।
एनां प्राज्ञमतल्लिकाः ! मधुमयीं वेदान्तमालां करैः
गृह्णीत श्रितवेङ्कटं निजपतिं श्रीशं वरीतुं वरम् ॥

गोपिकाभिरिव गोदयेव वा दिव्यसूरिभिरिवापि भुज्यताम् ।
श्रीपतिः स्वहृदि तेन दत्तया स्त्रीमयैरिह समैः स मालया ॥

PUBLISHERS' NOTE

—:o:—

We are happy to announce to the public that by the generous help of the Tirumalai Tirupati Devasthanams Committee, now called the Board of Trustees, we have been enabled to bring out this 4th volume, comprising the Chandogya Upanishad Bhashyam by Sri Rangaramanuja Muni. At our request, the said Board of Trustees have also been pleased to sanction the printing of the Brihadaranyakopanishad with the Bhashyam of the same Sri Rangaramanuja Muni. It is under press.

Sri Venkateswara Oriental Institute, Tirupati, under whose auspices the printing is done, prefer the Demi Octovo instead of the Royal size in which the first three volumes containing the first eight of the Dasopanishads were issued to the public. So, both Chandogya and Brihadaranyakopanishads are coming out in this Octovo size. It is requested that the donors and subscribers will excuse us for this difference in size.

The Board of Trustees, Tirumalai Tirupati Devasthanams have, as said above, placed the Sri Ramanuja Siddhanta-Bhashya Publication Committee (Madras) under deep debt of gratitude to them, and the public is as much beholden to them for this great help to bring out these classical editions in Devanagari characters.

ஸ்ரீ ஃ

ஸ்ரீ பத்மாவதீ ஸமேத ஸ்ரீநிவாஸ பரப்ரஹ்மணே நம ஃ

உபய வேதாந்த க்ரந்த மாலை

உபநிஷத்ஸாரம்

சாந்தோக்யோபநிஷத்து

அடைவாகச் சாந்தோக்யோபநிஷத்தில் ஓதப்பட்டுள்ளவற்றைச் சுருக்கி வரைகின்றோம். ப்ரஸித்தங்களான பத்து உபநிஷத்துக்களில் இரண்டாவதான கேநோபநிஷத்து போலே ஒன்பதாவதான இந்தச் சாந்தோக்யோபநிஷத்தும் ஸாமவேதத்தைச் சேர்ந்தது. நான்கு வேதங்களுக்குள் ஸாமவேதத்திற்கே சாகைகள் அதிகம். 'ஸஹஸ்ரம் ஸாமசாகா ஃ' என ப்ரஸித்தியன்றே. ஒவ்வொரு சாகைக்கும் கடைசியில் உபநிஷத்துண்டாம். கேநோபநிஷத்து என்பது தலவகார ப்ராம்மணத்தைச் சேர்ந்ததெனக் கீழே கூறப்பட்டுள்ளது. இச்சாந்தோக்யோபநிஷத்தானது தாண்டிசாகையின் கடைசிப் பாகமான உபநிஷத்து. வேதவ்யாஸரென்னும் பாதராயண மாமுனிவர் ப்ரம்மஸூத்ரத்திற் கையாண்ட உபநிஷத்துக்களிலே இதுவே முதலிலிருந்து கடை வரைக்கும் அதிகமாக வெடுத்தாளப் பெற்ற உபநிஷத்து என இதற்கொரு பெருமையைக் கூறலாம்.

எம்பெருமானைப் பெறப் பல துறைகள் இதில் ஓதப்பெற்றுள்ளன. பக்தி மார்க்கங்களான உபாஸநா முறைகளை விதிக்கப் புறப்பட்ட இவ் உபநிஷத்தானது முதன்முதல் தான் ஸாமவேதத்தைச் சேர்ந்த சாகையாலே ஸாமகானத்தின் ஓர் அம்சமான உத்கீதமென்பதை முதலில் எடுத்து, அதிலும் ஏனைய உபநிஷத்துக்கள் போலவே தானும் ப்ரணவ மந்த்ரத்தை ப்ரதானமாக வாதரித்து ஸாமத்தின் சேர்க்கைக்குத் தக்கவாறு உத்கீதத்திற் குட்பட்டுள்ள ப்ரணவத்தை முன்னமெடுத்து அதில் அநேகம் உபாஸநங்களை ஓதி, பிறகு உத்கீத பதம், ஸாம பதம், ஸாமப் பொது, அதன் அம்சங்கள், அதன் உட்பிரிவுகள் இவைகளை யெடுத்துக்கொண்டு ஆங்காங்கு உபாஸந வகை

கள் சில வருமவற்றைக் காண்பித்து, இப்படி ஐஹிகம் ஆமுஷ்மிகம் என்ற பல பலன்களுக்கான உபாஸநங்களை முடித்து மோக்ஷத்திற் காக வாம் பக்தியோகங்களை மேலே வோதுகின்றது.

இவ் வுபநிஷத்து எட்டு ப்ரபாடகங்களாகப் பிரிக்கப்பட்டிருக்கி றது. ப்ரபாடகமாவது அத்யாயம். ஒவ்வொரு அத்யாயத்திற்கும் அநேகம் கண்டங்கள் உள.

முதலிரண்டு ப்ரபாடகங்களில் ஸாமவிஷயமாகப் பல த்ருஷ்டியுபா ஸநங்கள் விதிக்கப்படுகின்றன. த்ருஷ்டியாவது ஒன்றை மற்றொன் றுகப் பார்ப்பது. உலகில் உயர்ந்ததைத் தாழ்ந்ததாகவும், தாழ்ந்ததை உயர்ந்ததாகவும் பார்ப்பதுண்டு. ஒரு வஸ்து நமக்கு வேண்டாமெனத் தோன்றினல் அதை ஒரு உபயோகமற்ற வஸ்துவாக, அதாவது தாழ்ந்ததாகப் பார்ப்பதும், எந்த வஸ்துவைக் கொண்டு நாம் ஒரு பலனைப் பெற விரும்புகிறோமோ, எதில் நமக்குக் கொஞ்சமாவது ஆதரம் இருக்கிறதோ, அதில் நமக்குக் கௌரவ புத்தியும், அதை நாம் அபேக்ஷிக்கும் பலனுக்குத் தக்கபடி உயர்ந்ததாகப் பார்ப்பதும் அனுபவத்திலுள்ளவையாம். ஓர் அரசனைக் கொண்டு ஏதேனும் த்ரவ்யம் கிடைக்குமென்று நினைக்கிறபோது, அவன் குபேரனென நமக்குத் தோன்றுகிறது. அவனைக் கொண்டு நமக்கு விரோதிகளா யிருப்பாரை கலிய நினைக்கிறபோது அவன் காலாந்தகன் என்கிறோம். காமினிகளான ஸ்த்ரீகள் அவனையே மன்மதனென்கிறார். தர்ம ஸ்தாபனையில் லீடுபட்டிருந்தால் ஸாக்ஷாத் ராமனென்பர். இப்படி யுள்ள பழக்க வழக்கத்தை யநுஸரித்தே சிற்சில விடங்களில் சிற்சில த்ருஷ்டிகளையும், அவ்வித பாவனையோடு உபாஸநம் செய்தால் அதனல் தகுந்தாற் போல் பலன்கள் ஸித்திக்கிற வகையையும் எல்லா உப நிஷத்துக்களும் கூறும். அவ்வண்ணமே இவ்வுபநிஷத்தும் ஸாம வேதத்தைச் சேர்ந்ததானபடியாலே ஸாமகாந விஷயமாகப் பல த்ருஷ்டிகளை யுபதேசித்துத் தக்க பலனையும் கூறுகிறது.

ஸாம என்னப்படும் வேதகாநமானது ருக்குகளில் கானம் பண் ணப்படும். ஒவ்வொரு ருக்கிலும் கானம் பண்ணப்படும்போது அந்த கானத்தை ஐந்து பாகங்களாகப் பிரிப்பர்கள். தொடக்கத்தில் ஹிங் காரம்; பிறகு ப்ரஸ்தாவம், பிறகு முக்யமாயுள்ள உத்கீதம், பிறகு ப்ரதிஹாரம், முடிவில் நிதநமென வாம். ஏழு பிரிவுகளைக் கொள்வது முண்டு. அப்போது ஹிங்காரம், ப்ரஸ்தாவம், ஆதி, உத்கீதம், ப்ரதி

ஹாரம், உபத்ரவம், நிதனமெனச் சொல்வர். உத்கீதத்திலுள் முதன் முதலுள்ள ப்ரணவத்தை ஆதி யென்றும், நிதனத்தை முன்பாகம் பின்பாகமாகப் பிரித்து உபத்ரவம், நிதனம் எனவும் சொல்வதாகக் கொள்க.

இப் பிரிவுகளில் ஏதேனுமொன்றை யெடுத்து அதனைப் பலனுக் குத் தகுந்ததொரு வகையிலே ஓர் உயர்ந்த வஸ்துவாகப் பார்ப்பதை முதல் ப்ரபாடகம் போதிக்கிறது. ஒன்றை ஒன்றாக நம் இஷ்டப்படி நினைத்தாலே பலன் கிடைத்துவிடாது. அதுவும் வேத சோதன வகையிலேயே யாகவேண்டும். முக்யமான பக்திமார்க்கங்கள் மூன் றும் ப்ரபாடகத்தினின்றே பெரும்பாலும் அறியப்படும்.

1, 1. முதற்கண்டம் உத்கீத பாகமான ப்ரணவத்தை யொரு விதம் உபாஸிக்கச் சொல்லுகிறது. அதற்காக உத்கீதம் தான் உலகில் ஸாரமான தென்கிறது. சராசரங்களான ப்ராணிகள் எல்லாம் ஜீவிக்கத் தங்குமிடமாகையாலே பூமியை ஸாரமென்பர். அதற்கும், அதனால் விளையும் பலன்களுக்கும் மூலமாயிருப்பதாலே அதிலும் ஸாரம் ஜலம். அதனாலுண்டான ஓஷதிகள் அதற்கு மேல் ஸாரம். அவற்றைப் புசித் துண்டு பண்ணப்பெறும் மானிட வுருவம் அவற்றினும் ஸாரம். இவ் வுருவத்தில் வாக்கு ஸாரம். வாக்குக்களில் (ऋक्) ருக்கு என்பது ஸாரம். அதற்குமேல் சிறப்பாயிருப்பது ஸாமகானம். அதிற் சிறந்தது உத்கீத மென்கிறது. இதனால் பூமியிற் பிறவியென்றால் மனிதப் பிற வியே சிறந்ததென்றும், அதில் கற்க வேண்டியவற்றில் உத்கீதத்தைக் கற்பதே யுயர்ந்ததென்றும் குறித்த படியாம். இப்படி யுத்கீதம் உத் க்ருஷ்டமான பதவியைப் பெற்றிருப்பதையும், அது, வாக்கு ப்ராணன் என்றதொரு மிதுனத்தின் சேர்க்கையானபடியாலே காம பூர்த்தி யளிப்பதென்றும், ப்ரணவமானபடியாலே, ப்ரணவம் ஸம்மதியைக் குறிக்கும் எழுத்தானதாலே, உலகில் ஸம்ருத்தியுள்ளவரே ஏதேனும் அபேக்ஷித்தால் ஸம்ம தியளிப்பவராகையாலே, ஸம்ருத்தி யென்ற குணமும் இங்கே பாவிக்கப்பட வேண்டுமென்றும் சொல்லிற்று. உபாஸகமிராமற் கர்மங்களைச் செய்தால் அவையும் பயனளிப்பவை யானாலும் உபாஸனத்தோடு செய்தபோதுள்ள வீர்யம் அப்போது கிடையாது. ஆக உபாஸகமென்பது கர்மங்களால் வரும் பலன் களுக்கு ஏதேனுமொரு காரணத்தால் இடையூறுண்டாகுமாகில் அதை விலக்கி விரைவில் அவற்றைப் பெறும்படி செய்கிறதென

உபாஸனத்திற்குள்ள பெருமையைப் பொதுவிலே கூறிற்று. இங்ஙனம் முதல் ப்ரபாடகத்திலுள்ள முதற் கண்டத்தின் சுருக்கமாகும்.

2. இவ் வுத்கீதத்தை வேறு இந்திரியங்களைப் போலப் பார்க்காமல் அவற்றிற்கு மேலான முக்ய ப்ராண வாயுவாகப் பார்த்து உபாஸிப்போர்க்கு விரோதிகள் அழிவது பலன். உத்கீதத்தைப் பல ரிஷிகளின் பெயரிட்டழைப்பதும் காண்க.

3. இதனையே சூர்யனுகவும் ப்ராணனுகவும் பாவிப்பதையும், வ்யாநவாயுவாகப் பார்ப்பதையும் சொல்லி, உத் - கீ - த - என்ற அக்ஷரங்களைப் பிரித்து அவற்றில் சில த்ருஷ்டிகளையும் பலனையும் கூறி, எந்த ஸாமகானம் செய்கிறோமோ, அந்த ஸாமம், ருக்கு, ருஷி, தேவதை, சந்தஸ்ஸு முதலானவற்றையும், ஆத்மாவையும் த்யானம் செய்துகொண்டு ஸ்தோத்ரம் (ருக்கிலே கானம்) செய்தால் சீக்ரம் சிறந்த பலன் உண்டு என்கிறது.

4. உத்கீத ப்ரணவத்தை அம்ருதம் அபயமென்னப்படும் ப்ரம்மமாக வுபாஸிக்கச் சொல்லுகிறது நான்காம் கண்டம். தேவதைகள் ம்ருத்யுவினிடமிருந்து பயந்து வேத வித்யையினுட் புகுந்து வைதிக மந்த்ரங்களாலே தங்களை மறைத்துக் கொண்டார்கள். அப்போதும் ம்ருத்யுவானவன் நீரில் மீன்களைக் காணுமா போலே வேதத்தில் மறைந்த தேவர்களை எளிதிற் கண்டுவிட்டான். பிறகு அவர்கள் அங்குநின்று அம்ருதமும், அபயமுமான ப்ரணவத்திலே புகுந்து நின்று ம்ருத்யுவினிடமிருந்து தங்களைக் காத்துக் கொண்டனர். ஆகவே இதை இங்ஙனம் உபாஸிப்பவனுக்கு ம்ருத்யுவுமில்லை, பயமுமில்லை யென்கிறது.

5. உத்கீதமும் ப்ரணவமு மொன்றென நினைத்து அதைப் பல காரணங்கள் நிறைந்த சூர்யனுகவும் பல ப்ராணன்களுக்கு (இந்திரியங்களுக்கு) ஆதாரமான ப்ராண வாயுவாகவும் த்ருஷ்டி செய்பவனுக்கும் பிள்ளைகள் பல பிறப்பர் என்று சொல்லி உத்கீத ப்ரணவங்களை ஒன்றுக நினைத்தற் குரியதொரு விசேஷத்தையும் குறித்தது.

6, 7. அங்கங்கள் பலவற்றைக் கூறி,—ஆதித்ய மண்டலத்தினுள்ளிருக்கும் ஹிரண்மய திவ்யமங்களவிக்ரஹனை புண்டரீகாக்ஷனுகவோ, நம் கண்ணைத் தனக்கிருப்பிடமாகவுமுள்ள அந்த எம் பெருமானுகவோ உத்கீதத்தை உபாஸிக்கலாம். அப்போது ருக்கு

களும் ஸாமங்களுமாகிற வைதிக கானங்களுக்கும் உலகில் வீணாதி களைக் கொண்டு செய்யுமெல்லா கானங்களுக்கும், ஸர்வாந்தராத்மா வாய், கோசரமாய், பாபங்களுக்கெல்லாம் புறம்பேயுள்ள அந்த ஸர்வேச்வரனுடைய அனுக்ரஹத்தாலே ஆதித்ய மண்டலத்திற்கு மேலுள்ள உலகுகளும் தேவபோகங்களும், மண்ணுலகுக்குக் கீழுள்ள உலகும் மனுஷ்ய போகங்களும், அந்தந்த உபாஸனத்தின் பலனைக் கிடைக்குமென்றது. (கப்யாஸம் புண்டரீகம் என்ற வாக்யம் இங்கே யுள்ளது).

8, 9. இந்த உத்கீதத்திலே ஆகாசதிருஷ்டியைச் சொல்லுகிறதிங்கு. சிலகன், தால்ப்யன் ப்ராஹ்மணன் என உத்கீதத்திலே தேற்சி பெற்ற மூவரும் சேர்ந்து வாதம் செய்யத்தொடங்க, அவர்களில் ப்ராஹ்மணன் என்ற அரசன் மற்ற இருவருடைய வாதங்களைக் கேட்க விரும்ப, அப்போது ஸாமத்திற்கு எது ஆதாரமென்று சிலகன் வினவ, தால்ப்யன், ஸ்வரம் ப்ராணன் அன்னம் ஸ்வர்க்கம் என்றவற்றை மேன்மேல் ஆதாரமாகக் கூறி ஸ்வர்க்கத்திற்கு மேற்பட ஆதாரமில்லை யென, அதற்கும் ஆதாரம் பூலோகம் என சிலகன் சொன்னன். இதைக் கேட்ட ப்ராஹ்மணன் இவ் வாதாரங்கள் எல்லாம் அழிவுறுவன வாகையாலே, இங்ஙனம் கொள்ளில் ஸாமம் அழிவுறுமாகையாலே அழிவற்றதாய் ஸர்வபூதங்களின் பிறப்புக்கும் அழிவுக்குமிடமாய் உயர்ந்ததான ஆகாசமே (பரமாத்மாவே) ஆதாரம் என முடிவாகக் கூறினன். இவ் வாகாசமாக உத்கீதத்தைப் பார்ப்பவனுக்கு உயர்ந்த ஜீவனமும் உயர்ந்த உலகங்களு முண்டென்றது.

10, 11. கல்மழையினலடிபட்ட குருதேசத்திலே யானையேறிகள் இருந்த வொரு க்ராமத்திலே உஷஸ்தி யென்ற முனிவர் தம் மோடுகூடவே திரிந்துவரும் தம் சிறு பிராய மனைவியோடு ஆஹார மற்று வருந்தி வஸித்துவந்தார். அவர் குல்மாஷம் என்ற தானியத்தை உண்டுகொண்டிருந்த ஒரு யானையேறியை யண்டி கேட்க, அவனும், நான் உண்பதற்கு வைத்து உண்டுவருமிதல்லது வேறில்லை யென, அவரும் அதிலே கொஞ்சம் கேட்க, அவனும் அதையும் அத்துடன் அருந்தும் தண்ணீரையும் கொடுக்க, அவர் தண்ணீரை, 'எச்சில் இது; வேண்டா' மென்றார். இதுவும் எச்சில் தானே யென்றனவன். இதையுண்ணவிடில் எனக்கு இப்போது ப்ராணன் நிற்காது; பிழைத்த பிறகுத் தண்ணீர் அருந்துவது காமசாரமாகையாலே சாஸ்த்ரத்தை மீறினதாம் என அவனுக்கு மறுமொழி கூறி, வாங்கின குல்மாஷத்தில்

கொஞ்சம் உண்டு கொஞ்சம் மனைவிக்கும் கொடுத்தார். அவள் ஏற்கனவே உண்டிருந்தபடியாலே அதை வாங்கி வைத்திருந்தாள். இரவில் நித்திரை செய்து எழுந்து அவ் வுஷஸ்தி முனிவர் 'ஏதேனும் கொஞ்சம் ஆஹாரமிருந்தால் பார்த்துக்கொண்டு பணத்திற்கு வழி தேடலாம். அருகில் அரசன் ஒருவன் யாகம் செய்யப் போகிறான். அவன் அங்கே செய்யும் எல்லாத் தொழில்களுக்கும் நம்மை முக்கியமாய் வரிப்பான்' என்று மனைவியிடம் சொன்னார். அவளும் முதலுள் வைத்திருந்த குல்மாஷத்தைக் கொடுக்க அவர் அதை உண்டு யாகத்திற்குச் சென்றார். அங்கு, ப்ரஸ்தாவம், உத்கீதம் ப்ரதிஹாரம் என்ற ஸாமாம்சங்களுக்காக ஏற்பட்டுள்ள ரித்விக்குகளிடம் சென்று அதற்குள்ள தேவதையை யறிந்து கானம் செய்ய வேணுமென்றார். பிறகு அரசன் இவரை இன்னரென்று தெரிந்துகொண்டு, இவரை விசேஷமாக ஸத்கரித்து இவரையே அவர்களின் ஸ்தானத்தில் நிறுத்தி நடத்த நினைக்க, இவர் அவர்களுக்கே தத்துவோபதேசம் செய்து யாகத்தை நடத்தி வைத்தார். இவர் உபதேசித்த முறையாவது—" ப்ரஸ்தாவம் என்ற ஸாமகானத்திலே ஸர்வ பூதங்களுக்கும் பிறவி யழிவுகளுக்குக் காரணமாயுள்ள ப்ராண (பரமாத்ம) தேவதையையும், உத்கீதத்திலே, உயரத்திலிருப்பவனும் புகழப்படுபவனுமான ஆதித்யனையும், ப்ரதிஹாரத்தில் அன்னத்தையும் பாவிக்க வேண்டு" மென்றபடியாம்.

12. அன்னத்திற்கு அலைந்த உஷஸ்தியின் உபதேசம் முடிந்தவுடன் அன்னத்தைப் பெறச் செய்யக்கூடும் சௌவோத்கீத மென வோர் உத்கீதத்தைச் சொல்லுகிறது. (ஈக) பகனென்ற ரிஷிக்கு இந்த உத்கீதத்தை யுணர்த்துவதற்காகப் பலர் நாய்களாக உருவெடுத்து இதைக் கானம் செய்து காண்பித்தனர் என விங்கே விளங்கும்.

13. ருக்குகளில் ஸாமகானம் செய்யும்போது சிற்சில விடங்களில் சிற்சில புதிய அக்ஷரங்கள் இசையின் பொருத்தத்திற்காகப் புகுத்தப்படும். அவை ஸ்தோபா (ஈ)க்ஷரங்க ளெனப்படும் "ஹாஉ, ஹாஇ" முதலானவை. இவைகள் பதின்மூன்றைச்சொல்லி இவற்றை ப்ருதிவி முதலிய சிலவாகப் பாவித்தற்குப் பலன் வாக்கும் அன்னமும் என்றது.

2. 1—10. இப்படித் தனித் தனியே உத்கீதம் முதலிய ஸாம பக்திகளில் உபாஸனங்கள் சொல்லப் பெற்றன. இனி இரண்டாம் ப்ரபாடகத்திலே மொத்தமாக எடுத்துச் சில உபாஸனங்கள் போதிக்

கப்படுகின்றன. ஸாமமே ஸாதுவானது என வோர் உபாஸனத்தை முன்பு சொல்லிப் பிறகு ஸாமத்தின் பக்திகளாகக் கீழே குறிக்கப் பெற்ற ஹிங்காராதிகள் ஐந்து, எழு வென்ற இரு வகைகளில் ஐந்து பக்திகளிற் பல உபாஸநங்களும், எழு பக்திகளைச் சேர்ந்த ஆதித்யோ பாஸநமும் அதற்கு மேலான அதிம்ருத்யூபாஸநமும் சொல்லப்பட் டன. கீழ் உலகம் மேலுலகம் எனப் பலவுலகங்கள் ஒன்றுக்கொன்று உபகாரமாயிருக்க அமைக்கப்பட் டிருப்பதாலே மழை பெய்து எங்கும் நீர் நிரம்பி வஸந்தம் முதலிய ருதுக்கள் அவ்வவ காலத்திற் பலித்துப் பசு முதலிய ப்ராணிகள் ஸுகித்து இருக்க, இங்ஙனம் எல்லா ஸௌகர்யங்களும் பெற்ற முமுக்ஷுவானவன் உபாஸித்துச் சிறந்த பலன்களைப் பெறுகிறானென்பது இப் பாகத்தின் உட்கருத் தாம்.

11—20. பிறகு தனித் தனியே சில ஸாமங்களை யெடுத்து ஆயுள், ஆரோக்யம், ப்ரஜை, பசு, யசஸ்ஸு இவைகளுக்காக ஏதேனு மொரு ஸாமத்தில் ஐந்து உட்பிரிவுகளில் சிற்சில த்ருஷ்டிகளை விதித்தது.

21, 22. இங்ஙனம் ஸாமத்தின் உட் பிரிவுகளிலே சொன்ன வுபாஸனங்களுக்கெல்லாம் மேற்பட்டதாய் மூவுலகும் அவற்றின் தேவதைகளும், அவர்களிடம் வெளியான வேதங்களும், மற்றும் எல்லாமிது என்றதொரு த்ருஷ்டியைச் செய்யும் வண்ணமுரைத்து இதை யுபாஸிப்பவனை உலகெல்லாம் ஆதரிக்கும் என்றது. பிறகு ஸாமஸ்வரங்களில் எவை ஏற்கக் கூடியவை, வர்ணங்களை எங்ஙனம் உச்சரிப்பது, அவற்றின் தேவதைகள் யாவரென்பதை விளக்கிற்று.

23, 24. இனி ப்ரணவத்தின் பெருமையைப் பேசப் புகுந்து எல்லா ஆச்ரமங்களையும், எந்த வாச்ரமத்திலும் பரப்ரம்ம த்யான முள்ளபோது மோக்ஷ முண்டென்பதையும், மூவுலகையும் படைத்து அவற்றினின்று பிறந்த வேதங்களிலிருந்து வந்த வ்யாஹ்ருதிகள் மூன்றினின்று ப்ரணவம் வந்ததாகையாலே இலைகளில் ரஸம்புகள் போல எல்லா வாக்குகளிலும் ப்ரணவம் பாவி யிருக்கிறதென்றது. பிறகு மூவுலகும் யாகம் செய்பவனுக்குக் கிடைப்பது ஸோமயாகத்தி லுள்ள மூன்று ஸவநங்களுக்கும் அதிபதிகளான வஸு ருத்ர ஆதித்யர் களைப் பற்றின ஸாமங்களைச் சொல்லி அவர்களைப் புரஸ்கரிப்பதாலே யென்றது. இங்ஙனம் இரண்டு அத்யாய (ப்ரபாடக)ங்கள் போயின

3. 1—11. மூன்றும் அத்யாயம் முதலாக, மோக்ஷத்திற்காக நோக்கவிருக்கும் வித்யைகள் பல ஓதப்படுகின்றன. முதன் முதல் மதுவித்யை சூர்ய மண்டலத்தைத் தேவதைகளுட்கொள்ளும் தேனு கவும் மரத்தில் தேனடை யிருக்குமா போலே மேலுலகில் அந்தரிக்ஷ மெனப்படும்தேனடை யிருப்பதாகவும், வண்டுகள் புஷ்பங்களிலிருந்து தேன்களை யெடுத்துச் சேர்த்துமாபோலே அந்தந்த வேத மந்த்ரங்கள் தங்களைச் சொல்லிச் செய்யப்படும் யாகம் முதலியவற்றிலிருந்து யசஸ்ஸு, தேஜஸ்ஸு, இந்திரியம், வீர்யம் போன்ற பலன்களை யெடுத்து ஸூர்ய மண்டலத்தில் ஒவ்வொரு பக்கத்திலும் ஒருவாறு சேர்த்து வைத்திருப்பதாகவும் வஸு-ருத்ர-ஆதித்ய-மருத்-ஸாத்ய கணங்கள்என்ற ஐந்து கணங்களும் நான்கு திக்குகளிலும் மேற்புற மும் நின்று அதனைக் கண்டுகந்து வருகிறார்களென்றவாறும் தெளிந்து இத்தகைய தேனுக ஸூர்யனை த்யானம் செய்வதோடு அவனுக்கு அந்தர்யாமியான பரப்ரம்மத்தையும் உபாஸனம் செய்பவருக்கு முத லில் வஸுருத்ராதி போகமும் பிறகு மோக்ஷமும் ஸித்திக்குமென விதிலே ஓதிற்று.

12, 13. காயத்ரீ ப்ரஹ்ம வித்யை—நான்கும் ஆறும் கொண்ட காயத்ரியைப் போலே யுள்ளதாக ப்ரம்மத்தைப் பாவிக்க வேண்டும். காயத்ரீ சந்தஸ்ஸுக்கு மூன்று பாதங்களும் 24 அக்ஷரங்களும் பெரும்பான்மை யிருக்கும். 24 அக்ஷரங்களையும் அவ்வாறு அக்ஷரங்க ளாகப் பிரித்து நான்கு பாதங்களாகவும் சில காயத்ரிக்கு அமைப்ப துண்டு. அதனால் காயத்ரியை நான்கும் ஆறும் கொண்டதென் கிறது. ப்ரம்மத்திற்கு நான்கு பாதங்களாவன—பூதம், ப்ருதிவி, சரீரம், ஹ்ருதயம் என்பவை யென்றதிங்கே. வாக்கானது ஸர்வ பூதங் களையும் குறிப்பதும் காப்பதுமாயிருப்பதாலே ஸர்வ பூதமயமான ப்ரம் மத்திற்கும் வாக்கினால் குறிக்கப்படுவதும் காக்கப்படுவது முண்டாம். ப்ரிதிவியைப் பாதமாக வுடைய விதற்கு ஸர்வ பூதங்களுக்கும் ஆதாரமாயிருக்கை, அவைகளால் மீளமுடியாமை யென இரு குணங் கள் உண்டு. சரீரமாயும் ஹ்ருதயமாயுமுள்ள விந்த ப்ரம்மத்திற்கு ப்ராணன்களுக்கு ஆதாரமாயிருத்தலும் அவைகளால் மீளமுடியா மையு முண்டு. ஆக ஆறு அம்சங்களும் நான்கு பாதங்களு மிங்ங னம் ப்ரம்மத்திற்குச் சொல்லப் பெற்றன. புருஷ ஸூக்தத்திற் சொன்னபடி ப்ரக்ருதி, வைதுண்ட மென்ற உபய விபூதிகளில் பாவி யுள்ள விதற்கு இத்தகைய பாதங்களை வைத்து உபாஸனம் செய்

தால் அழிவறக் குறைவற விருக்கும் (மோக்ஷ) பலன் கிடைக்கு மென்கிறது. இதற்கு அங்கமாக, ஹ்ருதயத்தில் நான்கு பக்கங் களிலும் மேலுமாக ஐந்து குழிகள் இருப்பதாகவும் அவற்றில் ஐந்து ப்ராணன்கள் ஸஞ்சரிப்பதாகவும் அவ்வைந்து குழிகளிலும் ஐந்து த்வார பாலகர்கள் ஆதித்யன், சந்திரன், அக்னி, பர்ஜந்யன், ஆகாசம் எனப்பட்ட தேவதைகளிருப்பதாகவும் பாவிக்கச் சொல்லிற்று.

எல்லா வுலகுக்கும் மேலான உத்தம லோகத்திலே இருக்கும் பரப்ரம்மமே உடலில் உண்பதை ஜரிப்பிக்க விருக்கும் வைச்வாநர னென்னும் அக்நிக்கு அந்தர்யாமி யெனக் கூறி அவனைப் பார்த்ததாக வும் கேட்டதாகவு முபாஸிப்பவன், எல்லோரும் பார்க்கும்படியும் கேட்கும்படியும் அழகும் கீர்த்தியும் பொருந்தி யிருப்பான் என்றது. அதனைப் பார்ப்பதும் கேட்பதும் எங்ஙனே யென்னில், உடலைத் தொட்டால் உஷ்ணம் தெரிகிறதே அதே அதைப் பார்த்தபடியாம்; காதுகளைக் கைகளால் மூடிக்கொண்டபோது உள்ளிருந்து ஒரு சப்தம் கேட்கப்படுகின்றதே, அதே அந்த ப்ரம்மத்தைக் கேட்டபடியாம்.

14. சாண்டில்யவித்யை. உலகெல்லாம் பிறப்பதும் பிழைப் பதும் அழிவதும் எதனாலோ, அந்த ப்ரம்மமே இவ்வுலகெல்லா மாம் என வறிந்து அதனாலே காம க்ரோதங்கள் நீங்கி சாந்தியுடன் உபாஸிக்க வேண்டும். ஏனெனில் உபாஸித்துப் பலன்பெற வேண்டி யது புருஷனுக்குரியது. எங்ஙனம் இங்கு உபாஸிக்கிறானே அங்ங னம் பிறகு இவன் ஆவான். ஆகவே மநோமயன் ப்ராணசரீரன் என்றாற் போலுள்ள மஹா குணங்களோடு ப்ரம்மத்தை யுபாஸித்து யான் அதனைப் பெறுவன் என்ற உறுதியுடன் உபாஸிப்பவனுக்குக் கையிலிருப்பது அவ்வித ப்ரம்மத்தைப் பெறுவதாகிய மோக்ஷம் என்றனர் சாண்டில்யர்,

15. புத்திரன் தீர்க்காயுஸ்ஸாயிருக்க விரும்புவோன் செய்வ தோர் உபாஸநம் மேலே கூறப்படுகிறது. இது கோச விஜ்ஞான மெனப்படும். இதில் வாயுவைத் திக்குகளின் மகனாக நினைக்க வேண் டும். சில மந்த்ரங்களும் இதற்குக் கூறப் பெற்றன.

16, 17. நூற்றிப் பதினாறு வருஷ காலம் நீடித்து வாழ விரும்பு வோன் தன்னை ஒரு யஜ்ஞமாகப் பாவித்துத் தன் ஆயுஷ்காலத்தை மூன்றாகப் பாகம்செய்து அவ்வப்போது தன் ப்ராணன்களை அடைவே வஸுருத்ர ஆதித்யர்களாக நினைத்து முறைப்படி உபாஸநம் நடத்

திலல் நோவற்று நீடித்து வாழ்வானென்றேதி அந்திய காலத்தில் இவன் ஜபிக்க வேண்டிய மந்த்ரங்கள் உண்டென்றும் அதனல் இவன் பிறகு மோக்ஷம் பெறுகிறனென்று மோதிற்று.

18, 19. பிறகு மனது ப்ரம்மம், ஆதித்யன் ப்ரம்மமென த்ருஷ்டி யுபாஸனங்கள் ஓதப்பெற்றன.

4. 1–3. ஜாநச்ருதி யென்பவன் க்ராமம், நகரம், வழி, வநங்கள் முதலாக வெல்லா விடங்களிலும் எல்லோருக்கும் வீடுகளும் சத்ரங் களும் பலவகை அன்னபானங்களும் ஏற்படுத்தி எல்லா தானங்களை யும் ச்ரத்தையோடு நடத்திக் கொண்டு ஜநங்கள் எல்லோரும் கொண் டாடும்படி மஹா தர்மிஷ்டனையிருந்தான். ஒரு நாள் இரவில் அவன் படுத்திருக்குமிடத்திற்கு மேலே வானத்தில் அன்னங்கள் பல பறந்து கொண்டிருக்க அவற்றின் முன்னே போகும் ஓர் அன்னத் தைப் பின்னே செல்லு மன்னம் பின் கண்டவாறு கூறிற்று. 'ஏனப்பா! உனக்குக் கண் இல்லையா. இவ் விரவையும் பகலாக்கும்படி யிருக்கும் ஜாநச்ருதியின் தேஜஸ்ஸின் மேல் துணிந்து செல்லுகி றாயே. உன்னை யது எரித்துவிடப் போகிறதே.'

முன்னே போகு மன்னம், 'என்ன வண்டியோடு திரிந்திருக் கும் சைக்வரைப் போல் இவனைப் புகழ்கிறாயே' என மறுமொழி கூறினது.

'யாரவர் வண்டியோடிருக்கும் சைக்வர்?'

'சூதாட்டங்களிலே பலவகை யாட்டங்களுண்டே. அவற்றில் க்ருதம் (தூர்) என்கிறதிலே மற்றவை யெல்லாம் அடங்கிவிடுமாற் போலே அந்த சைக்வர் அறிந்ததை ஒருவன் அறிந்தானகில் அவனிடம் உலகத் திலுள்ளார் செய்யும் நற்செயல்களெல்லாம் அடங்கிவிடும். (அதை யறியாத இந்த ஜாநச்ருதிக்கு சைக்வரைப் போன்ற பெருமை கூட வுண்டோ) அப்படி செய்யத் தகுந்த மஹான் அந்த சைக்வனைத் தெளிக'.

இங்ஙனம் அன்னங்களின் பேச்சை அருகிலே படுத்திருந்து கேட்ட ஜாநச்ருதியானவன் படுக்கையிலிருந்து எழுந்தவுடனே தன் அந்தப்புரக் காவற்காரனை யழைத்து அன்னங்கள் சொன்னதைச் சொல்லி சைக்வரைத் தேடி வா என்றனுப்ப அவனும், 'எங்கும் காண கில்லேன்' என்று வந்து விண்ணப்பிக்க, 'ப்ராம்மணர்கள் இருக்கு மிடம் போய் பார்த்து வா' என அவன் ஆஜ்ஞாபிக்க, ஓரிடத்தில்

வண்டியின் கீழே சிறங்கு சொறிந்து கொண்டிருக்கும் ஒருவர் அருகிற் போய் உட்கார்ந்து, 'தாங்கள் சைக்வரோ' என்று அவ் வேலைக் காரன் வினவ, ஆமப்பா நான் தான் என்று அவர் மறுமொழி கூற, ஜாநச்ருதியிடம் வந்து, அறிந்து வந்தேன் என்றான். உடனே ஜாந சருதியும் ஆறுநூறு பசுக்களும் கரையும் குதிரைவண்டியும் உபஹார மாகக் கொண்டு ஸமர்ப்பித்துத் தனக்கு தேவதா ஜ்ஞானம் பிறப்பிக்க ப்ரார்த்திக்க, அந்த சைக்வரும், ஓ சூத்ரனே! உனக்கே இவையெல்லா மிருக்கட்டும் என்ன, ஜாநச்ருதியும், ஏன் இங்ஙனம் கூறினர் என வாராய்ந்து தெளிந்து மறுபடி ஆயிரம் பசுக்கள் முதலானவையோடு தன் பெண்ணையும் அவருக்கு மனைவியாகக் கொடுக்க வழைந்துக் கொண்டு வந்து ஸமர்ப்பித்து அவர் இருக்கும் க்ராமத்தையும் அவ ருக்கு அளிக்க, அவன்குணத்தைக் கண்டு களித்து, 'கொண்டுவா' என்று ஸ்வீகரித்து அப்பொழுதே உபதேசித்தருளினர். அந்த வித்யை யாவது ஸம்வர்கவித்யை.

அக்னி ஸூர்ய சந்த்ர ஜலங்களுக்கும் லயஸ்தானமாயிருப்பது வாயுவென்றும், உடலில் வாக்கு, கண், காது, மனது என்றவை களுக்கு லயஸ்தானமா யிருப்பது ப்ராணன் என்றும் ஆகவே இவை இரண்டும் ஸம்வர்கங்கள் என்று முரைத்தார். இங்குரைக்கப்பட்ட தேவதை யாதென்பதை யுணர்த்த இதன் மேல் ஓர் உபாக்யானமும் ஓதப்பட்டது. காபேயன் அபிப்ரதாரி என்ற விருவர் போஜனத் திற்கு வீற்றிருக்கும் தருணத்திலே ஒரு ப்ரம்மசாரி பிக்ஷை கேட்க யாரும் பிக்ஷை கொடாமலிருக்க, அவன் அங்கே, 'உலகத்தைக் காக்கும் தேவனொருவன் நான்கு மஹாத்மாக்களை விழுங்கி விளங்கு கிறான். பல உருவாக வளித்துவரும் அத் தேவதையைக் காபேயரே! மனிதர்கள் அறிகிறார்களல்லர். இவ் வன்னம் எவனுக்காகவோ, அவ னுக்கு இதை அளிக்கவில்லை' என்று சொன்னான். இதற்குக் காபே யன், 'தேவதைகளுக்கு ஆத்மாவும் ப்ராணனை ஸ்ருஷ்டிப்பவனும் அழகிய பற்களுள்ளவனும் அதிகமாகப் புசிப்பவனுமான இந்த ஸர் வஜ்ஞனுடைய மஹிமையை மிகப் பெரிதாகச் சொல்வர். இவன் ஒருவனாலும் புசிக்கப்படாமலிருந்து போஜனமாகாததையும் புசிக்கிற வன். இப்படி நாங்கள் உபாஸிக்கிறோம். அங்ஙனமன்று உபாஸிப் பது' என்றவாறு மறுமொழி கூறி பிக்ஷை யளிக்க ஆஜ்ஞாபித்தான் என்றது. இப்படிச் சொன்ன ஸம்வர்க்கங்களைத் தெரிந்துகொண்டு ஐக்யம் ஐக்யமான பத்தையும் ஒரு க்ருதமென்றும் அன்னமென்றும்

விராட் என்றும் உபாஸிப்பவன் ஸர்வஜ்ஞனுய் அந்நத்தைப் புஜிப்பான் (அதாவது ஸர்வ போக்யமான அன்னமாகப் பல விடங்களிலே யோதப் பெற்ற பரப்ரம்மத்தை யனுபவிப்பான்). இது இதன் பலனும்.

4–9. ஷோடசகலப்ரஹ்ம வித்யை. ஸத்யகாம னென்ப வன் ஜபாலை யென்னும் தன் அன்னையிடம், 'நான் வெளியிலே ப்ரம்ம சர்யத்திற்காகப் போகப் போகிறேன். கோத்ரம் தெரிய வேண்டும்' என்றான். 'நான் பெரியோர்களுக்குப் பரிசர்யை செய்து வெகு வாக உழைத்த வண்ணமே யிருந்து யௌவனத்திலே உன்னைப் பெற்றேன். இந்த நிலையிலே கோத்ர மறியாமலே இருந்துவிட்டே னுகையாலே நான் என்ன செய்வது? நான் ஜபாலை; நீ ஸத்யகாமன் இவ்வளவுதான் எனக்குத் தெரிந்தது. நீ ஆசார்யனிடத்திலும் இதையே சொல்' என்றனள் அன்னை. ஸத்யகாமனும் கௌதம-ஹரி த்ருமதரிடம் சென்று இதனை விண்ணப்பிக்க, 'இப்படி யுண்மை யுரைத்துக் கொண்டு வந்ததாலே நீ ப்ராம்மணனே' என்று அவர் புகழ்ந்து அவனை அனுக்ரஹித்துத் தன்னிட மிருந்த பசுத்தொழுவிலே வலி வற்றிளைத்திருந்த நானூறு பசுக்களைப் பிரித்துச் சேர்த்து இவைகளை வளர்த்து வா என்று ஆஜ்ஞையிட்டார். ஸத்யகாமனும் ஸந்தோஷத் துடன் இவை ஆயிரமாக ஆவதற்கு முன் திரும்புவதில்லை யென்று விண்ணப்பித்து ஓட்டிச் சென்றான். இப்படி அவன் வெகு வர்ஷங் கள் வெளியிலே மேய்த்திருக்க அவைகளும் ஆயிரம் ஆக, அவற்றிலே ஒரு காளையானது அவனைப் பார்த்து, 'ஸத்யகாமனே! நாங்கள் ஆயிரமாய்விட்டோம். ஆசார்யன் இல்லத்திலே எங்களைச் சேர்த்து விடு. உனக்கிங்கே ப்ரம்மத்தின் பாதமொன்றைச் சொல்லுகிறேன்' என்றது. அவனும் இசைய ப்ரகாசவானென்ற ஒரு பாதத்தை யுப தேசித்து அதற்கு நான்கு அவயவங்களையும் கூறி, இனி அக்னி உனக்கு மற்றொரு பாதம் சொல்லுமென்றது. மறுநாள் மாடுகளை யோட்டிக் கொண்டே போய் வழிநடுவில் மாலையிலே மடக்கிவிட்டு ஸமிதாதானம் செய்திருந்த தருணத்திலே அக்னி அனந்தவான் என்னுமொரு பாதத்தையும் அதன் நான்கு பாகங்களையு முபதே சித்து, ஹம்ஸத்தினிடமிருந்து மூன்றும் பாத மறிவாயாக வென்றது. முன்போலவே மறு நாள் மாலையில் அன்னத்தினிடம் ஜ்யோதிஷ் மான் என்ற பாதத்தை அதன் நாலு அவயவங்களோடு அறிந்தான். அது சொன்னபடியே அதற்கு மறுநாள் மாலையில் மத்ஸு என்னும்

நீர்ப் பறவையினிடமிருந்து ஆயதநவாந் என்ற பாதத்தை அவயவங்களோடு கற்றறிந்து ஆசார்யனகம் புகுந்தான். பார்த்த மாத்திரத்திலே ஆசார்யனும், ஸத்யகாமா! நீ ப்ரம்மத்தை யறிந்தவனைவே காண்கிறாய். யார் உபதேசம் செய்தனரோ என வினவினர். சொன்னவர் மனிதரல்லரென்றுள்ளபடி விண்ணப்பித்து, ஆசார்யமூலமாக அறியப்பட்டால் தான் வித்யையால் பெறும் பலனுண்டு. ஆகவே ஸ்வாமியே உபதேசிக்கவேணு' மென்று வேண்டிக்கொண்டான். அந்த வேண்டுதற்கிணங்கி ஆசார்யனும் அதனை அங்ஙனமே முழுமையும் ஒருமுகமாக உபதேசித்தார். அவைகள் உபதேசித்ததும் அவர் உபதேசித்ததும் எல்லா மொன்றே. கொஞ்சமும் குறைபாடெங்குமில்லை.

10–15. மேற் சொன்ன ஸத்யகாமனிடத்தில் ப்ரம்மசர்யம் பெற்றிருந்தவன் உபகோஸலன். பன்னிரண்டு வருஷ காலம் இவன் அவருடைய வைதிகாக்நிகளைப் பாதுகாத்துப் பரிசர்யை செய்து வந்தான். அணுகிய சீடர்களை யெல்லாம் உபதேசத்தை முடித்து அனுப்பிவருமவர் இவனுக்கு மாத்திரம் பூர்த்தி செய்யாமலே இருந்தார். ஆசார்யரின் மனைவியானவள், 'பாவம்! ப்ரம்மசாரி மிகவும் கிலேசப்பட்டு அக்னி சுச்ரூஷை செய்தானே. உபதேசியாவிடில் தங்களை அக்னிகள் என்ன நினைக்கும்படியாமோ. உபதேசிக்கலாமே' என்று புருஷகாரமாகவும் நின்றாள். ஆகிலும் அவர் உபதேசியாமலே வெளியூர் சென்று விட்டார். ப்ரம்மசாரி மனைவ்யாதியினால் நொந்து கிடந்தான். ஆசார்யன் மனைவி அவனை ஆஹாரம் உட்கொள்ளும்படி வேண்டியும் அவன் மறுத்துவிட்டான். 'எத்தனையோ விஷயங்கள் பாதித்துவரக் கூடியவைகள் இருப்பதால் வெகு விதமான வ்யாதிகளாலே வயிறு நிரம்பி யிருக்கிறது. உண்ணகில்லேன்' என்றான். அக்னிகளுக்கு அவனிடம் தயை முதிர்ந்து விட்டது. அவனுக்கு, 'ப்ராணன் ப்ரம்மம். கம் க்ஹம் (க் ஹ்) ப்ரம்மம்' என உபதேசம் செய்தன. க் ஹ என்பதற்கு அளவில்லா வானந்த ரூபனென்கிற பொருளையும் கேட்டுணர்ந்தான். பிறகு ஐஹிகமாகவோ ஆமுஷ்மிகமாகவோ ஒரு குறையு மில்லாமலிருக்க அக்னி வித்யை யென்பதையு முபதேசித்தன. 'இதற்கு மேலுள்ளவற்றை ஆசார்யன் உபதேசிப்பர்' எனவும் கூறின. வெளியூரிலிருந்து ஆசார்யன் வந்து அவன்முகத்தைக் கண்டதும், 'என்ன உன் முகம் ப்ரம்மஜ்ஞானியினுடைய முகம் போல் ஒரு வெளிச்சிறப்பு கொண்டிருக்கிறதே. யார் உபதேசித்தனர்' என்று கேட்டார். உண்

மையில் அவன் பூர்ண ப்ரம்மஜ்ஞானம் பெறுமலிருந்ததால் கொஞ்சம் பெற்று மிருந்ததால் ப்ரம்மஜ்ஞானம் பெறவில்லை யென்றே, பெற்றேன் என்றே சொல்ல முடியாத வண்ணமாயிருந்து, இவ்வக்னிகள் இப்போது காணும் வண்ண மிராமே வேற்றுருவங் கொண்டு உபதேசித்தனர் எனவும் விண்ணப்பித்து, நியமனப்படி அறிந்ததையும் இன்னதென்றறிவித்தான். 'ஏதோ அற்ப பலன்களை உனக்குபதேசம் செய்து நின்றன அவை. நான் உனக்கு நற்கதி காணவைக்கிறேன். நான் சொல்வதை யறிந்தாயாகில் தாமரையிலையில் தண்ணீர் தட்டாதது போல் பாபம் ஆத்மாவில் ஒட்டா தொழியும், ஆத்மாவென்பது கண்ணுள்ளே காணக் கூடியது. இதற்கு அழிவு கிடையாது. பயத்திற் கிடமேயில்லை. இது தான் ப்ரம்மம். கண்ணிலே நெய்யை அல்லது நீரை வார்த்தால் அதில் அது தட்டாமே போய் விடுகிறதன்றே? ப்ரம்மத்தின் ஸ்தானத்திற்கே இம் மஹிமை யென்றால் ப்ரம்மத்தின் மஹிமையைச் சொல்ல வியலுமோ' என்றெல்லாம் சொல்லி அனேகம் கல்யாண குணங்களையு முபதேசித்து, 'இவ்வுபாஸனம் செய்தவன் முமுக்ஷு வாகையாலே மரணம் நேர்ந்த பிறகு இவனுக்குச் செய்யவேண்டும் சடங்குகள் நடந்தேறி விட்டாலும் இவன் உடனே (அர்ச்சிராதி மார்க மென்கிற தேவயாந மார்கத்தாலே) அக்னி, பகல், சுக்லபக்ஷம், உத்தராயணம், ஸம்வத்ஸரம், சூரியன், சந்திரன், மின்னல் அதைச் சார்ந்த அமாநவன் என வுள்ள வழி நடத்தும் மஹான்களாலே வழி நடத்தப்பட்டு அவ் வமாநவனாலே ப்ரம்மத்தினிடம் சேர்க்கப் படுகிறான். பின்பு ஒருகாலும் இவ் வுலக க்லேசத்திற்குட்படுவதில்லை' யென்றுபதேசித்தார் ஆசார்யன்.

இது உபகோஸலவித்யை. முடிவில் அக்நிகள் உபதேசித்தது அக்நிவித்யை

16, 17. யஜ்ஞத்தைப் புகழ்ந்து, அதில் நான்கு ருத்விக்குகளும் மனஸ்ஸு, வாக்கு என்னும் இரு சக்கிரங்களைக் கொண்டு அந்த வண்டியையோட்டி வைப்பதையும், ஒரு சக்கிரம் கெட்டாலும் வண்டி விழுந்துவிடு மாகையாலே எல்லாம் சரியானபடி இருக்க வேண்டும் ஏதேனும் செய்யும் அங்கங்களிலே ஏற்றத்தாழ்வு ஏற்படுமாகில் ப்ராயச்சித்த ஹோமம் செய்ய வேண்டு மென்றும், அதற்கு மூன்று வ்யாஹ்ருதிகள் முக்கிய மென்றும், அவை மூன்று வேதங்களினின்று தோன்றினவை என்றும், இதை யறிந்த ப்ரம்மாவைக்

கொண்டுதான் ருத்விக்குகளையும் யஜமானனையும் யாகத்தையும் காக்க வேண்டும் என்றும் சொல்லிற்று.

5. 1–2. இனி ப்ராணவித்தை-ஜ்யேஷ்டனும் ச்ரேஷ்டனுமாம் ப்ராணன் என்றுபாஸிக்க வேண்டும்.

கர்ப்பம் தரிக்கப் பட்டது முதலே அதன் வளர்ச்சிக்கு ப்ராணன் காரணமாகிறது. கண், காது முதலான உருவங்கள் உண்டான பிறகுக் கருவிகளான இந்திரியங்கள் இடம் பெறுகின்றன. ஆகவே ப்ராணன் மூத்தவனுய் ஜ்யேஷ்ட னென்னப் படுகிறான். ச்ரேஷ்டனுமவனே. எனெனில், இதை உபாக்யானத்தைக் கொண்டு விளக்குவோம். ப்ராணனும் இந்திரியங்களும் யார் உயர்ந்தவனென்று கலஹம் செய்து கொண்டு ஸ்ருஷ்டித்த ப்ரஜாபதியினிடம் போய் வ்யவ ஹாரத்தைத் தீர்க்க வேண்டிக்கொண்டன. அப்போது அவர் சொன்னதாவது, 'உங்களுக்குள் யார் சரீரத்தை விட்டு வெளிப்பட்டால் சரீரம் நிலைகுலைந்தழியுமோ, அவரே ச்ரேஷ்ட ரென்றதாம். வாக்கு ஒரு வருஷ காலம் வெளியில் இருந்து பார்த்தது. ஊமை போலவே யிருந்து சரீரம் ஜீவித்திருந்தது. இப்படி குருடும், செவிடும், தெளிந்த மனமற்றவனும் ஜீவித்திருக்குமா போலே பிழைத்திருப்பதை மற்ற இந்திரியங்களும் கண்டன. ப்ராணன் வெளிக் கிளம்பப் பார்த்தது. கட்டிலிருக்கும் கொழுத்த குதிரை கட்டுத்தறியில் முளைகளையெல்லாம் பிடுங்கிக் கொண்டு புறப்படுமாபோலே அது புறப்பட, வாக்கு முதலான புலன்கள் சரீரம் போலே வதைக்கப்பட்டு, 'வேண்டாம் வேண்டாம்' என்று கதறித்து எங்களுக்குள்ள பெருமைகள் யாவும் உன்னுடையனவே என ப்ராணனைத் துதித்தன. வாக்கு விசேஷமாகப் பணம் பெறுவிப்பதும், கண் எவ்வுலகிலும் ப்ரதானமாய் மேடு பள்ளம் தெரிவித்து நிலைக்கச் செய்வதும், காது ஐஹிகமும் ஆமுஷ்மிகமுமான எல்லாப் பலன்களையும் பெறச் செய்வதும், மனது ஆத்மாவிற்கு எல்லாக் குணங்களையு முண்டாக்குவது மெல்லாம் ப்ராணனுடையவையே யென்று தம் பெருமைகளை யெல்லாம் ப்ராணனுக்கே அர்ப்பணம் செய்தன. பிறகு உலகம் புகிக்கு மன்ன மெல்லாம் ப்ராணனுக்கே யென்றும் புகிப்பதற்கு முன்னும் பின்னும் அருந்தும் ஆசமந தீர்த்தம் அதற்கு உடை யென்றும் சொல்லி ஊணும் உடையும் அவை யளித்தன. ஆக ப்ராணனே இங்ஙனம் உபாஸிப்பதென உணர்த்தினபடி.

பிறகு பெருமையைப் பெற விரும்புவோன் ப்ராண விஷயமாகச் சில ஹோமம் முதலானவற்றைச் செய்யும் வகையான மந்த்ரகர்ம வென்றதொரு க்ரியையை யுபதேசித்து இங்ஙனம் ஹோமம் செய்த வனே இதைப் போல ஏதேனும் ஒரு காம்ய கர்மத்தைச் செய் பவனே ஸ்வப்நத்திலே சுந்தரியான ஸ்த்ரீயைக் கண்டானுகில் தனக் குப் பலன் கை கூடிற்றெனத் தெளியலா மென்றது.

3–10. பஞ்சாக்னி வித்யை. அருண மஹர்ஷியின் பேரனன் ச்வேதகேது என்பவன் பஞ்சால தேசத்திலே ஸதஸ்ஸுக்குச் சென்றான். அங்கே ப்ரவாஹண னென்ற ராஜர்ஷியிடம் நெருங்கி னன். ராஜர்ஷியும், பிள்ளாய்! தமப்பனர் உமக்கு உபதேசங்களைச் செய்தருளினரா?' என்று கேட்டான். இவனும் 'ஆம்' என, ப்ரவாஹணன் மேல்வருமாறு வினவினன்.—

க. 'ப்ரஜைகள் மரண மடைந்த பிறகு போகுமிட மெது தெரியுமா?'

'பூஜ்யரே! எனக்குத் தெரியாது.'

உ. திரும்பிவரும் போதுள்ள வழி தெரியுமா?

'தெரியாது.'

ங. 'தேவயாந மார்க்கம், பித்ருயாண மார்க்கம் என்றவையின் வேறுபாடு தெரியுமா?'

'தெரியாது.'

ச. மேலுலகம் போய்ச் சேர்ந்த ப்ராணிகள் யார். தெரியுமா?

'தெரியாது.'

ஞ. ஐந்தாவது ஆஹுதியில் மனிதனைப் பிறப்பது தெரியுமா?

'ஒன்றும் தெரியாது.'

'ஆகில் நீர் உபதேசம் பெற்றதென்? இவைகளை யறியவில்லை யாகில் உபதேசம் பெற்றதாக எங்ஙனம் கூறுவது?'

இங்ஙனம் கேட்டதும் ச்வேதகேது மிக்க ஆயாஸமுற்று தமப் பனர் இருக்குமிடம் ஓடிவந்து தனக்கு நேர்ந்த மாநபங்கத்தைச் சொல்லி வருத்தப்பட, தமப்பனரான கௌதம உத்தாலகரும், 'குமா ரனே! எனக்குத் தெரிந்திருந்தால் சொல்லாமலிருப்பேனே' என்று

சொல்லி, தாமே அதை அரசனிட மறிந்துவர வந்து சேர்ந்தார். ப்ர வாஹணனும் வான் அளித்திருந்தும் வேறு ஏதாவது கொடுத்தனுப்பி விட முயன்று அது வீணாக, அவ்வித்யையின் அருமையைச் சொல்லி, ராஜகுலத்தில் மாத்திரம் இருந்த அவ்வித்யையை அவருக்கு உபதே சித்தான்.

ஐந்து அக்னிகளாவன :—ஸ்வர்க்கம், மேகம், ப்ருதிவி, புரு ஷன், ஸ்திரீ என்றவை. ச்ரத்தையோடு புண்ய கர்மம் செய்தவன் மரண மடைந்ததும் உடலினின்று கிளம்பிய பூதஸூக்ஷ்மம் முதலில் ஸ்வர்க்கம் என்கிற அக்னியில் ஹோமம் செய்யப்படுகிறது. அங்கு வெகு போக்யமான சரீரம் எடுத்து இருந்த பிறகு அவன் பூதஸூக்ஷ் மம் மேகத்திலே சேர்க்கப்படுகிறது. பிறகு பூமியிலே பல தானியம் முதலான ஆஹாரத்திலுட்புகுந்து நிற்கிறது. பிறகு புருஷனின் உட லிற் சேர்ந்து ஸ்திரீ யென்னப்படும் ஐந்தாவது அக்னியிலே ஹோமம் செய்யப் பெற்று புருஷ வடிவம் கொள்கிறது. அங்கே பத்து அல் லது ஏறக்குறைய சில மாதங்கள் தங்கி பிறந்து ஆயுள் வரைக்கு மிருந்து மறுபடி மரித்து முன் போல் போய் வருகிறது.

இங்ஙனம் ஸம்ஸரிக்கும் ஆத்மாவின் உள் நிலையை (ஆத்மாவை உடல் புலன்களெல்லாவற்றினும் வேறான தென்றவாறாக) அறிந்தவ ரும், மற்றும் வெகு ச்ரத்தையுடன் வநாந்தரங்களிலே ப்ரம்மத்தை யுபாஸிப்பவரும் அர்ச்சிராதி மார்க்கத்தாலே ப்ரம்மத்தைப் பெறுகிறார் கள். இந்த மார்க்கம் தேவயாந மார்க்கம்.

இதுவின்றி ஊரில் ஒன்று சேர்ந்து பலவித யஜ்ஞங்களையும், குளம் வெட்டுவது, ஆலயம் கட்டுவது முதலானவற்றையும், தாந தர்மங்களையும் பலன்களைக் கோலிச் செய்பவர் பித்ருயாண மார்க்கம் வாயிலாக ஸ்வர்க்கம் சென்று அங்குள்ளாருக்குப் போக்யமாகச் சந் திரனைப் போன்ற சரீரம் பெறுவர். அம் மார்க்கமாவது—புகை, இரவு, க்ருஷ்ணபக்ஷம், தக்ஷிணயனம், பித்ருலோகம், ஆகாசம், சந்திரன் என்ற முறையிலமைந்தது.

திரும்பின பிறகு வரும் மார்க்கமாவது :—ஆகாசம், வாயு, புகை, மேகம், மழை, ஓஷதிகள் எனவாம். ஓஷதிகளிலிருந்து சரி யானபடி புருஷனிடம் போய்ச் சேருவது வெகுவாகத் தாமதிக்கும். பிறகு அவனவனது முன் கர்மத்திற்குத் தகுந்தபடி உச்ச நீச ஜன்மங்கள் ஏற்படுகின்றன.

கீழ்ச் சொன்ன மார்க்கங்களிலே ஸம்பந்தம் பெறுமே அடிக்கடி பிறப்பதும் மரிப்பதுமாய் ஈ, கொசு, புழு, பூச்சிகளைப் போலாம் ப்ராணிகளுமுண்டு. இவற்றிற்கு மேலுலகத்திற்குச் செல்வதென்பது இல்லை.

பஞ்சமஹா பாதகிகளாவார், பொன் வெள்ளி திருடுகிறவனும், கள் குடிப்பவனும், குருதாரகமனம் செய்பவனும், ப்ரம்மஹத்தியை செய்பவனும், இந்நால்வரில் ஒருவரோடு ஸஹவாஸம் செய்பவனும். பஞ்சாக்நிவித்தையையில் இழிந்தவனுக்கு மஹா பாதகிகளோடு சேர்ந்த தாலேற்படும் பாவம் கிடையாது. (இது இவ் வித்தையைக்குள்ள தொரு சிறப்பு.)

11–24. வைச்வாநரவித்தை. ப்ராசீநசாலர், ஸத்ய யஜ்ஞர், இந்த்ரத்யும்நர், ஜநர், புடிலர் (बुडिल) என்ற, அத்யயநமும் அநுஷ்டான மும் நிரம்பின மஹர்ஷிகள், 'நம் ஆத்மா யாது 'ப்ரம்மமென்' எனச் சேர்ந்து ஆராயலாயினர். கடைசியாக, 'அருணரின் புதல்வரான உத்தாலகர் இது விஷயத்திலே நல்லறிவுள்ளவர். அவரிடம் சென்று தெளிவோம்' என்று அவரை யணுகினர். அவரும், 'இவர்களின் கேள்விகளுக்கு யான் மறுமொழி கூற வியலேன். ஆக வேறொரு வரையே குறிக்க வேண்டும்' என்று நிர்மானித்து, 'இது விஷயத் திலே நன்கு தெரிந்தவர் கேகய தேசத்தரசன் அச்வபதி. அவனிடம் செல்வோம்' என்றார். அறுவரும் அங்கே சென்றனர். அவ் வரச னும் இவர்களைத் தனித் தனியே செவ்வனே ஸத்கரித்து, காலையில் எழுந்தவுடன் இவர்களிடம் சென்று, 'எனது தேசத்திலே திருடன், க்ருபணன், குடியன், ஆஹிதாக்நியல்லாதவன், ஜ்ஞாநமிராதவன், பா தாரத்தினிடம் செல்பவன், பரபுருஷ சம்பந்தமுள்ள ஸ்திரீ என் னப்படுபவர் கிடையார். ஆக இங்குள்ள தனம் சுத்தமானது. இப் போது யாகம் செய்யப் போகிறேன். அதிலே ருத்விக்குகளுக்கு அளிப்பது போல் தங்களுக்கும் த்ரவ்யம் அளிக்கிறேன். இருக்க வேண்டு மென்றான். இவர்களும், 'எவர்களுக்கு எது வேண்டுமோ அதுதான் அவர்களுக்கு தனம். நாங்கள், வைச்வாநராத்மாவைக் கற்க வந்தவர்கள். எங்களுக்கு அதை யளிக்க வேண்டு'மென்றனர். ஆகில் நாளைத் தினம் காலையில் அங்ஙனம் ஆகக்கடவதென்றான் ராஜர்ஷி. அவர்கள் ப்ராம்மணரான படியாலே அவர்களிடமிருந்து சுச்ரூஷையை யபேக்ஷியாமலே உபதேசிக்கத் தொடங்கினான். அவர்களுக்கு

விவாதம் இருப்பதைத் தெரிந்து அவரவர் உபாஸிக்கும் வண்ண மறிந்து தத்துவத்தைப் பிறகு உபதேசிப்பது நலமென நினைத்து தனித் தனியே ஒவ்வொருவரையும், அவரவர் வைச்வாநராத்மோ பாஸனம் எவ்வண்ணம் செய்கின்றனர் என்பதைத் தெரிவிக்கச் சொன்னன்.

கீழ்க் குறித்த ஆறு பேரும் முறையே, த்யுலோகம், ஆதித்யன், வாயு, ஆகாசம், ஜலம், ப்ருதிவி என்பவற்றில் ஒவ்வொன்றை வைச் வாநராத்மாவாக உபாஸிப்பதாகச் சொன்னார்கள. அரசனும், 'இவை யெல்லாம் வைச்வாநராத்மாவின் அவயவங்கள். இவை அடைவாக, தலை, கண், ப்ராணன், உடல், சீர்ப்பை, பாதங்கள் என்ற அவய வங்களாம். . உண்மையில் இவை வைச்வாநராம்சங்களாக இருப் பதாலே உபாஸிப்பவருக்குப் பலவிதமான இம்மைப் பலன்கள் காண்கின்றன. நீடித்து இதனையே உண்மையாகப் பற்றினால் உபா ஸிப்பவனின் தலை முதலிய அங்கங்கள் அழியும்படியாம். இவற்றை யெல்லாம் கீழ்ச்சொன்ன அங்கங்களாக அததன் பெயருடன் அறிந்து எலலாம் ஒன்று சேர்த்து விச்வரூப வைச்வாநரோபாஸனம் செய்யவேண்டும். பலன் அந்த பரப்ரம்மமாகிற பரமான்னமே யாம். இங்ஙனமுள்ள ப்ரம்மத்தினுடைய அவயவங்களைத் தன் உடலின் அவயவங்களிலேறிட்டு அந்த ப்ரம்மத்தை இதிலே வைத்துத் தன் உடலிலுள்ள பாகங்களை அக்நிஹோத்ரத்தின் கருவிகளாகக் கருதி வயிற்றிலிருக்கும் வைச்வாநராக்நியிலே (ப்ராணாக்நி ஹோத்ரத்தை) தனக்கு முதன் முதல்கிடைக்கு மன்னத்தைக்கொண்டு ஐந்து ப்ராண ஹோதிகளை அவற்றிற்குள்ள முறைப்படி செய்தால் பஞ்ச ப்ராணன் களும், அவற்றின் வாயிலாக இந்திரியங்களும், அவற்றை நியமிக்கும் தேவர்களும், அவர்களைச் சார்ந்த உலகும் திருப்தி பெறும். இங் ஙனம் உபாஸிப்பவனுக்குப் பெருந் தீயில் அகப்பட்ட பஞ்சுபோல் பாபங்களெல்லாம் எரிந்துபோம். பசியுடன் தவிக்கும் பிள்ளைகள் தாயை அண்டியிருக்கிற வகையிலே இவ்வக்நிஹோத்ரத்தை யன்றே உலகம் ஆச்ரயித்திருக்கிறது' என்றுபதேசித்தான்.

6. ஸத்வித்யை. ' அருண மஹர்ஷியின் பௌன் ச்வேதகேது என்பவன் இருந்தான். அவன் தந்தை அவனைக் கூப்பிட்டு, 'ஓ ச்வேதகேதுவே! ப்ரம்மசர்யம் பெற்றுக் கொள். நம் குலத்திலே அத்யயனம் செய்யாமே இங்ஙனம் வ்ராத்ய ப்ராம்மணனு யிருப்பு

தில்லையே யென்றார். பன்னிரண்டு வயதான ச்வேதகேதுவுக்கு உணர்ச்சி ஏற்பட்டது. வெளியே போய் குருகுல வாஸம் செய்து எல்லா வேதங்களையும் ஸாங்கோபாங்கமாகச் செவ்வனே கற்று, இனி கற்க வேண்டிய தொன்றில்லை யென்ற இறுமாப்புடன் இருபத்தினான் காம் வயதானதுமே திரும்பித் தன்னில்லம் வந்து புகுந்தான். அவனைப் பார்த்துத் தந்தையானவர், 'என்ன ச்வேதகேதுவே! இனி அறியவேண்டிய தொன்றில்லையென நினைத்தவன் போலே காண்கிறாய், எதைக் கேட்டுச் சிந்தனை செய்து த்யானித்தால் உலகில் எல்லாம் கேட்டுச் சிந்தித்து த்யானிக்கப் பெற்றதாமோ, ஸர்வத்தையும் நியமிக்கு மதனை உபதேசிக்கும்படி ஆசார்யனிடம் கேட்டாயோ?' என்று வினவினர். குமரன் ஆலோசித்தான், இதென்ன இப்புடியும் ஒரு வஸ்து இருக்கலாகுமோ? அது ஒன்றை யறிந்தால் உலகெல்லாம் அறிந்ததா மென்கிறாரே. இங்ஙன மொன்றுண்டாகிலன்றோ, நாம் இதனைக் கேட்டுத் தெரிந்து கொள்ளாததொரு குற்றமாம் என்ற வாறு. ஆகவே, 'அங்ஙன மாவதொன்றுண்டோ' எனறான். தந்தையும் அதற்கு என்னத் தடை? உலகிற் பார். ஒரு மண்கட்டியைப் பார்த்திருந்தால் அதிலிருந்துண்டாம் குடம், மடக்கு முதலானவையெல்லாம் பார்த்தவை யாய்விடுகின்றன. ஒரு பொன்னுருவைக் கண்டால் அதனால் செய்தவை யெல்லாம் கண்டவையாகின்றன. ஒரு இரும்பைக் கண்டு விட்டால் அதனாலாய கருவிகளனைத்தும் காணப் பெற்றன வாகின்றன. ஏன்? ஒன்றே பல உருவங்களைப் பெற்று அவ்வுருவங்களுக்குத் தக்க பெயரும் பெறுகின்றதால். ஆகக் காரணம் வேறு, அதிலிருந்து வரும் காரியங்கள் வேறென்ற கொள்கை இங்ஙனம் உண்மை யாகாது. ஆக உலகெல்லாம் ஒரு வஸ்துவினிடமிருந்து பிறந்ததாகில் அதை யறிந்தால் இதெல்லாம் அறிந்ததாகத் தட்டில்லையே யென்றார். குமாரன் விழித்துக் கொண்டான். நம்மிடத்திலே அளவில்லாக் கருணை பொருந்திய நம் ஆசார்யன் இதனையேன் நமக்கு உபதேசிக்கவே யில்லை? நாம் கேட்காவிட்டாலும் கிருபையினால் கற்பிப்பவரல்லரோ அவர். இது ஒருக்கால் அவரும் அறியாத தொன்றோ யிருக்கலாம் என ஊஹித்துத் தந்தையினிடம் விண்ணப்பித்து இவரிடமே இதைக் கற்க விரும்பி ப்ரார்த்தித்தனன். தந்தையுமிசைந்து இவ்வாறு உபதேசித்தனர்.

பலவகை வஸ்துக்கள் நிறைந்துள்ள இவ்வுலகெல்லாம் ஸ்ருஷ்டிக்கு முன்பு ஓரே வஸ்துவாய் ஸ்ருஷ்டி கர்த்தாவாகக் கூட இரண்

டாவது வஸ்து இன்றி இருந்தது. இந்த ப்ரபஞ்சமே காரணகார மாய் இருந்த தென்னுமே, இது ஒரு விதமாகவு மில்லாமலே இருந்த தென்றும், த்ரவ்யம் முன் இல்லாமலே பின் உண்டாகிறதென்றும் சிலர் சொல்லுவர். இந்தத் தர்க்க வாதம் வெறுக்கத் தக்கதாம். உலகில் ஒன்று ஒன்றுக மாறுவதைப் பார்த்திருக்கிறோமே யல்லது ஒரு விதமாகவு மிராமற் புதியதொரு த்ரவ்யத்தைக் கண்டதில்லை. மண்கட்டி முன்னே குடமாக விராமல் மண்ணுக விருந்து, பிறகு குடமாயிற்றென்றால் இசைய வியலும். மண் வேறு; குடம் வேறு. மண்ணுகக் கூட முன் இராமல் குடமென்ப துண்டாகிறதென்றால் அநுபவத்திற்கும் யுக்திக்கு மிது பொருந்தாது. வீண் கற்பனை யதிக மாகும். ஆக ஸருஷ்டிக்கு முன் இருந்ததொன்றே பலவாக வாயிற் றென்று கொள்க. ஆகக் கார்யமும் உண்டாவதற்கு முன்னும் ஒருவித மாக இருந்ததென்றும், அதனால் ஸத்து எனப்படுமென்றும் கொள்க. இதனை விவரிக்கிறோம். அவ்வஸ்து, நான் வெகுவாக ஆகக் கடவேன் என்று ஸங்கற்பம் செய்துகொண்டு தேஜஸ்ஸை ஸ்ருஷ்டித்தது. தேஜஸ்ஸா யிருந்து ஜலத்தை ஸ்ருஷ்டித்தது. ஜலமாயிருந்து ப்ருதி வியை ஸ்ருஷ்டித்தது. இந்தப் பூதங்களும் உலகில் ப்ராணிகள் என் னும் பூதங்களாயின. அந்த ப்ராணிகள் அண்டஜம், ஜீவஜம், உத்பிஜ் ஜம் என்று மூன்று வகையாம். அவையாவன—முட்டையினின்றுண் டாவது, மாடு மனிதரைப்போல் ப்ராணியினிடமிருந்தே பிறப்பது, பூமியைப் பிளந்து மரம், செடி இவற்றைப் போல் உண்டாவதென் றவை. இம்மூன்றும் வகுப்பிலே ஸ்வேதஜமும் (வியர்வையி லிருந்துண் டாம் ஜந்துவும்) சேரும். ஆக நான்காகக் கூறுமே மூன்றென்றது. இவை யுண்டாம் வகையாவது—'மூன் சொல்லப்பட்ட மூன்று மஹா பூதங்களிலும் ஜீவாத்மாவோடுஸத்து ப்ரவேசித்து நாமரூபங்களைச் செய்யக்கடவேன் (உருவுண்டாக்கிப் பெயரும் தனித் தனியே வைக் கக் கடவேன் என்று ஸங்கற்பித்து, அதற்காக மூன்று மஹா பூதங்களையும் த்ரிவிருத்காரணம் செய்து ஸங்கற்பித்த படியே யாயிற்று. த்ரிவிருத் காரணமாவது ஒவ்வொன்றையும் மூன்றும் கலந் ததாக்குகை. ஆகவே இப்போது நமக்குக் காணப்படும் நீர், நிலம் முதலியன சுத்தமான நீர் நிலம் முதலியன வாகா. இப்போதுள்ள நீரில் சுத்த நீர்ப்பாகம் பாதி, மற்ற பாதி மற்ற பூதங்கள். இப்படி நிலத் திலும் தேஜஸ்ஸிலும் காண்க. [இதைப் பஞ்ச பூதங்கள் என்று எடுத்துச் சொல்லும்போது பஞ்சீகரணமென்றும் சொல்வதுண்டு.]

இப்படி அந்தந்த பூதம் பாதி மற்றவை பாதியாகச் சேர்த்து வரு வாக்கி அவற்றிலிருந்து (சரீரம்) உடலை ஸ்ருஷ்டித்து ஜீவாத்மாவுடன் உட்புகுந்து ஒவ்வொரு வஸ்துவாகவும் பரப்ரம்மம் நிற்கிறது. இங்ஙனம் ஒன்று வெகு வாயிற்றென்க.

த்ருவிருத் காரணம் செய்யப்பெற்ற வஸ்துக்களே நமக்கிங்கே காணப்படுமவையெல்லாம் என்பதைப் பல உதாரணங்களிலிருந்து காணலாம். தேஜஸ்ஸுக்கு இயற்கை நிறம் சிவப்பு, ஜலத்திற்கு வெண்மை, ப்ருதிவிக்குக் கருமை. இங்ஙனமிருக்க நெருப்பு முதலான வற்றில் மூன்று நிறங்களையும் பார்க்கிறோம். இது த்ருவ்ருத்காணப் படி எல்லாம் சேர்ந்ததால் ஏற்பட்டதென்க. பிறவும் காண்க.

இங்ஙனம் மூன்று மஹா பூதங்களினின்று பிறந்த உடல் வளர்த்தலுக்கு உபயோகிக்கும் அன்னம் மூன்று பரிணமங்களைப் பெறுகிறது. அஸாரபாகம் மலமாய் விடுகிறது. ஸாராம்சம் மாம்ஸ மாம். மிகவும் ஸாரமான நுண்ணிய பாகம் மனதைப் போஷிக் கும். அருந்தும் ஜலமும் நீர், இரத்தம், ப்ராணனைப் போஷிக்குமது என மூன்றாக மாறுகிறது. தேஜோமயமான ஆஹாரம் எலும்பு, அதற்கு வேண்டும் ஸ்நேஹம், வாக்கை வளர்க்கும் பாகமென மாறு கிறது. தயிரைக் கடைந்தால் வெண்ணெய் வெளிக் கிளம்புமா போலே உட்கொள்ளும் ஆகாரத்திலிருந்து மனது, ப்ராணன், வாக்கு இவை களுக்கு வேண்டும் ஸூக்ஷ்மாம்சம் வயிற்றிலுள்ள அக்நியில் பக்வம் செய்யப் பெறப்படும்.

அப்பா! நீ பதினைந்து நாள் சாப்பிடாமலிரு. நீரை நன்கு அருந்தி வா. ப்ராணனுக்கு அழிவு வாராது என்றார். அங்ஙனமே ச்வேதகேது நடந்து கொண்டான். பிறகுத் தந்தையினிடம் வந்து, என்ன சொல்வது என்றான். நீ ஓதின வேதங்களைச் சொல் என்றார். ஒன்றுமே மனதிற் தோன்றவில்லை யென்றான். எரிந்த தணலில் ஒரு சிறுதுளி மாத்திரம் நின்றிருந்தால் அது ஒன்றும் எரிக்க மாட்டாது. அதே உணர்ந்த புல்லும் சிறு சுள்ளிகளும் சேர்த்து ஊதி ஜ்வலிப்பிக் கப்பட்டால் எதையும் எரிக்கக்கூடும். அங்ஙனமே உண்ணுமலிருந்த தால் உனது பதினாறு அம்சங்களில் இப்போது பதினைந்து அம்சங் கள் போயின. இப்போது உண்டு வந்தாயானால் எல்லா அம்சங்களும் சேரும். உடனே நீ எதையும் சொல்லக்கூடு மென்றார். அவ் வண்ணமே உண்டு சொல்லத் திறம் பெற்றான். இப்படி மனதிற்கு

அன்னத்தின் தூண்ணிய அம்சங்களால் புஷ்டி ஏற்படுகிற தென்றது முதலானவற்றை விளக்கினர். இவ்வளவால் உலகுக்கெல்லாம் காரண மாமொரு வஸ்து உள்ளே புகுந்து நியமிக்கும் சக்தியோடு இப்போது உரைக்கப்பட்டது. அவனும் தெளிந்தான்.

மறுபடியும் பிள்ளைக்கு உபதேசிக்கத் தொடங்கினர். நித்ரையில் ஆத்மாவின் நிலையைச் சொல்லுகிறேன் என வாரம்பித்து, ப்ருதிவி ஜலத்திலும், ஜலம் தேஜஸ்ஸிலும், தேஜஸ்ஸு ஸத்து என்னப் படும் பரதேவதையிலும் லயிப்பதை நித்ரை, மரணம் இரண்டையு மெடுத்து ஒரு விதமாக நிரூபித்து மேலே சொல்லுகிறார். தேனீக்கள் பலவகை மரங்களிலிருந்து ரஸமானதைக் கொஞ்சம் கொஞ்சமாக எடுத்து ஒன்று சேர்க்கிறன. அங்ஙனம் சேர்ந்த ரஸம், 'நான் இந்த மரத்தினின்று வந்தேன். நான் இந்த மரத்தியதாவேன்' எனத் தனித் தனியே தெரிந்து கொள்ள முடியுமா? அவ்வண்ணமே ஸத்து எனப் படும் பரமாத்மாவினிடம் ஒன்றின ஆத்மாக்கள் தங்களைத் தாங்கள் தெரிந்து கொள்ள மாட்டா. மாரி காலத்தில் கிழக்கும் மேற்குமாகப் பல ஆறுகள் ஓடிக் கடலில் வீழ்கின்றன. இவை கடலினின்றே மேகங்களாலுட் கொள்ளப்படுப் போய் மறுபடி வந்தவை. ஆகிலும் அவற்றிற்கு அது தெரியாது. அங்ஙனமாகுக. பெரிய மரத்தை ஓரி டத்திலே கத்தியால் வெட்டினால் பால் பெருகுகிறது. இப்படி ஜீவித் திருக்கும் மரத்திலே ஒரு கிளையை ஜீவன் விட்டால் அது உலர்ந்து விடுகிறது, பிறகு மற்றொன்றை விடுகிறது, அதுவும் காய்ந்து போகிறது. இப்படியே மொத்தமும்விட மொத்தமும் உலர்ந்து போய் விடுகிறது. இதனால்—தேஹத்தைக் காட்டிலும் ஜீவன் வேறு. அவ னால் விடப்பட்டால் இது மரித்து விடும், ஜீவன் மரிப்பதில்லை யென் றதாம். அருகிலிருக்குமந்த ஆலம் பழத்தைக் கொண்டுவா. விண்டு பார். எத்தனையோ விதைகளிருக்கின்றன. அவற்றி லொன்றை விண்டு பார். ஒன்றும் தெரியவில்லை. வெகு நுட்பமா யிருக்கிறது. ஆயினும் இந்த நுட்பத்திலிருந்தே இவ்வளவு பெரிய ஆல மரம் கிளம்பி யிருக் கிறது. இவ்வளவையும் உண்டுபண்ணும் சக்திகள் அவ்விதையி னுள்ளே பொதிந்து கிடக்கின்றன. இப்படியே யாம் நாம் சொன்ன ஸத்து என்ற பரதேவதையு மென்று கொள்வாயாக. உப்புக் கட்டி யொன்றை ஒரு பாத்திரத்தில் நீரில், படுக்கும் போது, போட்டுவிடு. காலையில் எழுந்தவுடன் எடுத்து வந்து அது நீரிலே இருக்கிறதா பார். கையால் தடவிப் பார்த்தாலும் இல்லை. ஆகில் அந்தத் தீர்த்த (ஜல)த்

திலே கொஞ்சம் உட்கொள். என்ன வறிகிறாய். உப்பு கரைந்துவிட்டது. இருந்தும் தெரியவில்லை. ஆகக் காரண வஸ்துவும் இங்ஙனம் கான்தெங்கும் பரந்துள்ளது, தெரியாதெனத் தேறும். ஒரு தேசத்தினின்று ஒருவனைக் கண்களைக் கட்டி வெகு தூரம் கொண்டுபோய் ஜனங்களில்லாத விடத்திலே விட்டுவிடுவோம். அவன் கீழ் மேல் திக்குகள் தெரியாமே பெருங் கூச்சலிடுவான். ஒருவன் இவனது கட்டை அவிழ்த்து இது உனது தேசம்போம் வழியென்று காண்பித்தால் க்ராமத்தின்மேல் க்ராமமாக நடந்தறிந்து தன் இடம் வந்து சேருவான். அதுபோல் ஆசார்யன் மூலமாகவே தன் தன்மை யறிய முடியும். அறிந்தவன், 'இந்த ஸம்ஸாரபந்தம் விட்டால் போதும்; உடனே நான் என்னிடம் சேர்வன்' என்று கதறிக் கொண்டிருப்பான். ஒருவன் மாணமடையும் தருவாயிலிருந்தால் சேர்ந்தவர்கள் அண்டையில் வந்துட்கார்ந்து, 'நான் யார் தெரியுமா, நான் யார் தெரியுமா' என்று கேட்கிறார்கள். சில ஸமயம் அவன் அறிவதில்லை. ஏன்? அவனது வாக்கு மனதிலும், மனது ப்ராணனிலும், அது தேஜஸ்ஸு என்னப்படும் சரீர பூதஸூக்ஷ்மத்திலும், அது காரணவஸ்துவான பரதேவதையிலும் லயித்துவிட்டதால். திருடனென்றொருவனைக் கையும் பிடியுமாகப் பிடித்துவந்து, 'இவன் திருடனன். தீயிற் காய்ப்புண்ட கோடரியை அவன் கையில் வைத்துப் பரீக்ஷியுங்கோள்' என்பர். அவன் உண்மையில் திருடியிருந்தால் அதனல் அவன் உடல் எரிக்கப்படும். இல்லையேல் அவனுக்கு ஒரு தீங்குமில்லை. விடுபெறுகிறன். இவ் வுதாரணங்கள் பல கூறினேம். எல்லா முணர்ந்து, உலகெல்லாம் இந்தக் காரண வஸ்துவே என்றும், அது அழிவற்றது தோஷமற்றதென்றும், அது இதற்கெல்லாம் ஆத்மாவென்றும், உனக்குள்ளும் அந்த ஆத்மவஸ்து இருக்கிறதென்றும் தெளிந்து கொள் என உபதேசித்தார். ச்வேதகேதுவும் (தமப்பனர் உலகிலுள்ள உதாரணங்களைக் காட்டி இவ்வளவு அழகாக எடுத்துக் கூற) எளிதில் செவ்வனே தத்துவ ஜ்ஞானம் பெற்றன். உத்தாலகர் உபதேசம் உலகில் லௌகிகர் மனதிற் படியும்படி அழகாய் அமைந்துள்ளது.

7. பூமவித்யை. உபதேசித்தருளவேணும் என்றிவ்வளவே ஸநத்குமாரரை நாரதமஹர்ஷி சோகம் தாங்காமே தெண்டனிட்டு ப்ரார்த்தித்தார். இந்த நாரத மஹர்ஷியோ எல்லாம் தெரிந்தவர். ஆகவே ஸநத்குமாரர், 'உமக்குத் தெரிந்தவை யாவை, அவற்றைச்

சொல்லும்; பிறகு வேண்டியதைத் தெரிந்து கொள்ளலாம்' என்றார். அவர் தமக்குள்ள வித்யைகளை யெல்லாம் அடுக்கடுக்காகக் கூறி, 'எல்லா சப்தங்களையும் கற்றிருக்கிறேன். ஆத்மா இன்ன தென்று தெரியாது. அதைத் தெரிந்தால்தான் சோகம் தீருமென்று தங்களைப் போன்றவர் சொல்லக் கேட்டிருக்கிறேன். ஆக ஆத்மோபதேசம் செய்ய வேண்டு' மென்று தம் கருத்திலுள்ளதை விளக்கினர். அது கேட்டு ஸனத்குமாரரும், நீர் ஓதியுள்ள சப்தங்களை ப்ரம்மமாக வைத்து உபாஸனம் செய்தால் அந்த சப்தங்கள் விளங்குமிட மெல்லாம் யதேஷ்டமாக ஸஞ்சரித்து ஆனந்திக்கலாமென்றார். இதற்கு மேல் ஏதேனு முண்டா என்று மேன் மேல் நாரதர் கேட்க மேன்மேல் ஒவ்வொன்றைக் கூறி ப்ரம்மமாக உபாஸனம் செய்யலாமென்றார். இப்படியவர் நாமம் (சப்தாதி), வாக்கு, மனது, ஸங்கல்ப்பம், சித்தம், த்யானம், விஜ்ஞானம், பலம் அன்னம், தண்ணீர், தேஜஸ்ஸு, ஆகாயம், நினைவு, ஆசை எனப் பதினொன்றை அடைவாகச் சொன்ன பிறகும் அதற்கு மேலானதெதென்று அவர் கேட்க, ப்ராணனே மேலானதாக உபதேசித்தார்.

இங்கே ப்ராணன் என்னப்படுவது ஜீவாத்மா வென்று அவர் தெரிந்து கொள்ளுமாறு அதை மேலே விவரித்தார். அதாவது— உலகில் கொடுக்கிறவன், வாங்குகிறவன், தந்தை, தாய், உடன் பிறந்தான், உடன்பிறந்தாள், ஆசார்யன் என்றாற் போலுள்ளவ ரெல்லோரும் ப்ராண னென்னப்படுகிறவர். உடலில் இதுள்ள வரையில் யாராவது நிக்காரமாகப் பேசினால்கூட இவன் பித்ருஹத்தி பண்ணுகிறவன், மாத்ருஹத்தி பண்ணுகிறவன் என்றவாறு உலகம் நிந்திக்கும். சீவன் உடலை விட்டு நீங்கினால் பிறகு அந்த வுடலை எவ்வளவு புறட்டி நெருப்பில் எரித்தால் கூட ஹத்தியைப் பண்ணுகிறதாகச் சொல்லுகிறதில்லை யென்றார். பிறகு, இந்த ப்ராணனை உபாஸிப்பவன் தன்னை அதிவாதியாக, அதாவது உயர்ந்த புருஷார்த்தமாய் போக்யமான வஸ்துவை உபாஸிப்பவனைச் சொல்லிக் கொள்வான். அங்ஙனம் சொல்லிக் கொள்ளலாம். ஆனாலும் இந்த ப்ராணனைக் கொண்டு அதிவாதியாவதை விட ஸத்யம் எனப்படும் ப்ரம்மத்தை (பரமாத்மாவைக்) கொண்டு அதிவாதியாவதுதான் தகுந்தது. அப்படி யதிவாதியாவதற்கு அதன் உபாஸனம், அதற்காக மனனம், அதில் சிரத்தை, அதிலேயே நிலையான பற்றுதல், அதற்குத் தகுந்த செய்கை, இது உண்டாம்

படி அந்த ஸத்யமான வஸ்துவை ஸுகஸ்வரூபமாக அறிவது, அதிலும் வேறொன்று கேட்கவும் கருதவும் வேண்டாதபடி பெரும் ஸுகமாய் பூமா என்னப் படுவதென வறிவது அவசியம். இதற்கு மேற்பட்ட தொன்று கிடையாது. இதுவே கீழும் மேலும் எல்லாத் திக்குகளிலு மிருப்பது. 'இதே நான்' என்று நினைக்கவேண்டும். ஏனெனில் இது எதற்கும் ஆத்மா. இதிலிருந்தே முன் ப்ராணன் வரையிலாகச் சொன்னவையும் மற்று மெல்லா மூண்டாகின்றன. இவ்வாத்மோபாஸனம் பெற்றவன் கர்மங்களிலிருந்து விடுபட்டு எங்கும் இஷ்டப்படி ஸஞ்சரிக்கும் சக்தி பெறுகிறான். இவனுக்கு மரணம், சோகம், துக்க மென்பவை கிடையா. எல்லாம் இவனுக்குப் போக்யமே யாம். இவன் எதையு மறிவான். ஆயிரக்கணக்கான உருவங்கள் எடுத்து ஆனந்திப்பான். இப்படிக் கொத்த பலனைப் பெறும் உபாஸனமானது மனது சுத்தமானால்தானுண்டாம். மனது சுத்தமாவது சுத்தமான ஆஹாரத்தை உட்கொண்டால்தான்' என்றிவ்வாறு நிர்மல மனமுள்ள நாரத மஹர்ஷிக்கு ஸம்ஸாரத்தின் அக்கரையைக் காண வைத்தார் ஸநத்குமாரர். இவரை ஸ்கந்த சென்றும் சொல்வதுண்டு.

8. 1–6. தஹராவித்யை. (दहरविद्या). ப்ரம்மபுர மெனப்படும் இந்த சரீரத்திலிருக்கும் புண்டரீகம் (தாமரைப்பூ) போன்ற சிறிய ஹ்ருதயத்திலே சிறிய வாகாச மிருக்கிறது. அதனுள்ளிருப்பதை யறிந்து உபாஸிக்க வேண்டும். இவ்வளவு சிறிய ஆகாசத்திற்கு முள்ளே என்ன விருக்கு மெனவேண்டா. வெளியிலுள்ள ஆகாசத்தைப் போலே அந்த ஆகாசமும் பரிதானதே. கீழ் மேலுலகங்கள், அக்னி, வாயு, ஸூர்ய சந்த்ராதிகள் எல்லாம் இதிலிருக்கின்றன. உபாஸகனுக்கு இங்கே கிடைப்பதும் கிடைக்காததும் எதுவும் இதனையே ஆதாரமாக வுடையதாம். ஆனாலும் எல்லாம் அதிலிருந்தாலும், இந்த உடல் உரு குலைந்தும் அழிந்தும் போனால் ஹ்ருதய புண்டரீகம் போய் விடுமே. அப்போது அதை யாதாரமாக வுடைய இவ்வாகாசமும் அழிய வேண்டியதாயிருக்க என்ன அதற்கு மேலுண்டு என வேண்டா. உடலழிவதால் அது அழிவதில்லை. அது நிர்விகார ப்ரம்மம். அதற்கு உடல் புரமென்பது தத்துவமன்று. அதுதான் புரம். அதிலல்லவோ எல்லாம் குடிகொண்டிருக்கின்றன. இப்படிப்பட்ட ஆகாசத்தில் உள்ளே இருப்பன எவை என்னில் காமங்கள்: கல்யாண குணங்கள். அவை எட்டு. அதனால் அவனை அபஹதபாப்மா,

விஜர:, விம்ருத்யு:, விசோக:, விஜிகத்ஸ:, அபிபாஸ:, ஸத்யகாம:, ஸத்ய ஸங்கல்ப: என்கிறது. உலகில் ஓர் அரசனை அண்டி சில கார் யங்களைச் செய்து இஷ்டமான பலன் பெறுவது போல் வேதத்தில் ஓதப்பட்ட சில கர்மங்களைச் செய்து புண்யபலன்களைப் பெறுகிறார் கள். அவை யெல்லாம் அழிந்துவிடும். ஆத்மாவையும் அதன் குணங் களையும் அறியாது இங்ஙனம் செய்வதால் யதேஷ்டமாய் இருக்க முடியாது. ஆத்மாவையும் அதன் குணங்களையும் உபாஸித்தவனுக்கு எல்லாப் பலன்களு முண்டு. மோக்ஷம் பெற்றுவிடில் நினைத்தபடி யிருக்கலாம். தாய், தந்தை, ஸஹோதரன், ஸஹோதரி, தோழர்கள், ஸ்திரீகள், ஸுகவஸ்துக்கள் எல்லாத்துடன் இருக்க வேண்டும் என்று அவன் ஸங்கற்பித்துக் கொண்டால் அங்ஙனமே கூட அவன் இருக்க லாம். பரமாத்மாவினுடைய கல்யாண குணங்களை நாம் அறியாதது நமக்குள்ள அநாதி பாபத்தாலே, பூமிக்குள்ளே ஒவ்வோரிடத்தில் புதையலிருக்கிறது. அதன் மேலே எப்போதும் நடமாடி வந்தாலும் ஜனங்களுக்கு அது காண்கிறதில்லை. அது போல் ப்ரம்மமே நமக்குத் தெரியாம லிருக்கிறது. அவ்வாத்மா ஹ்ருதயத்திலிருக்கிறது. அது இருப்பதால் தான் இதற்கு ஹ்ருதய மெனப்பெயர். இந்த உபாஸகன் உடலினின்று பிரிந்த பிறகு பரஞ் சோதியை அடைந்து சுய ரூபத்தைப் பெறுகிறா னென்கிறார்களே, அந்த பரஞ்சோதி இந்த ஆத்மாதான். இது அழிவும் பயமுமில்லாத ப்ரம்மம். இதற்கு ஸத்யம் எனப் பெயர். சேதநங்கள், அசேதநங்கள் எல்லாவற்றையும் ஆள்கிறதென ஸத்யபதத்தின் உட்பொருள். இது எல்லா உலகங்களையும் ஒன்றோ டொன்று கலந்தழியாதபடி ஆங்காங்கு நிறுத்திக் காக்கிறது. ஆகவே ஸேது. இதனிடம் ஒரு தோஷமுமண்டாது. இதை யடைந்தவன் தாபத்ரயமும் நீங்கி ஸுகப்படுவான். கிடைத்த பிறகு இதற்கு அழிவு கிடையாது. ஒரு பகலாய் உணர்த்தியே யாம்.

இதைப் பெற ப்ரம்மசர்யம் வேண்டும். ப்ரம்ம சர்யத்தாலே ப்ரம்ம லோகத்திலுள்ள, அரமென்றும், ண்யம் என்றும் சொல்லப் படும் இரு சமுத்ரங்களையும், ஐரம்மதீயம் என்ற தடாகத்தையும், ஸோமஸவந மென்னும் அலச மரத்தையும் கடந்து, அபராஜிதை யென்னும் ப்ரம்மத்தின் ராஜதானியிலே புகுந்து ப்ரபுவிமித மென் னும் அவன் எழுந்தருளி யிருக்கும் அழகிய ஸ்தானத்திலே சென்று ப்ரம்மானுபவம் பெறுகிறான். ஹ்ருதயத்தில் எத்தனையோ நாடிகள் இருக்கின்றன. அவற்றிற்கும் ஸூர்ய கிரணங்களுக்கும் ஸம்பந்தமுண்டு.

ஹ்ருதயத்திலுள்ள நூற்றொரு நாடிகளில் தலைப்பக்கம் சேர்ந்த தொரு நாடியின் வாயிலாகத் தலையைப் பிளந்துகொண்டு ஸூர்ய ரச்மி வழியாக ஸூர்ய மண்டலம் போய் மனோவேகமாக வைகுண்டம் போய்ச் சேர்ந்தால் முன் சொன்ன பலனெல்லாமுண்டு.

7–12. இனி இந்தப் பரவித்யைக்கு அங்கமாம் ப்ரஜாபதிவித்யை. ப்ரஜாபதி யென்பவர் தன் பிள்ளைகளான தேவாஸுரர்கள் க்ஷேமப்பட வேண்டுமென வாவல் கொண்டு கிருபையினால் வாக்ய மொன்றை உலகமெல்லாம் பரவவிட்டார். ஆத்மாவை அதன் எட்டு குணங்களோடு அறிந்தவனுக்கு ஸர்வ ஸுகமும் உண்டு என்பது அதினின்று விளங்கும்.

தேவர்களும் அஸுரர்களும் அதைக் கேட்டு அதன் பொருளை விரிவாக அறிய வாவல் கொள்ள, அத்தேவாஸுரர்களில் ப்ரதானரான இந்திரனும் விரோசனனும் ப்ரஜாபதியினிடமிருந்து அதன் பொருளைக் கற்க வந்து 32 - வருஷ காலம் ப்ரம்மசர்யத்துடனிருந்தார்கள். ப்ரஜாபதியும் இந்த ஆத்மா கண்ணில் தெரிகிறதென உபதேசித்தார். அப்போது ப்ரதிபிம்பம் தான் ஆத்மாவென்று அவர்கள் நினைத்துக் கொண்டு, கண்ணைவிட கண்ணாடியிலும் தண்ணீரிலும் நன்றாகத் தெரிகிறதே, அது தானே என்று கேட்டனர். அப்போது மடக்கில் ஜலம் வார்த்து நன்றாகப் பாருங்கள். நல்ல அலங்காரங்களையும் செய்துகொண்டும் பாருங்கள். ஏதேனும் தெரியாமலிருந்தால் கேளுங்கள் என்றார். பார்த்த பிறகு விரோசனன் இதுதான் ஆத்மாவென்று தீர்மானித்து அஸுரர்களுக்கு அதனையே உபதேசித்தான். அதனால் தேஹாத்ம வாதிகளானார்கள் அஸுரர்கள். இந்திரனுக்கு இதில் திருப்தி பிறக்கவில்லை. 'ப்ரதிபிம்பம் பிம்பத்தைப் போலாகிறது. பிம்பத்திற்குக் கோலம் செய்யாது குருபமாக்கினால் ப்ரதிபிம்பமும் அங்ஙனமாம். இது ஆத்மாவாகுமா' என ஆலோசித்து மறுபடியும் வந்தான். படிப் படியாக ஸ்வப்நாவஸ்தையிலுள்ள ஆத்ம ஸ்வரூபம், தூக்கத்திலுள்ள ஆத்ம ஸ்வரூபம் இவற்றை உபதேசித்தார். அங்கங்கு கஷ்டமும் அஜ்ஞானமுமிருப்பதாலே இந்திரன் திருப்தியடையவில்லை.

கடைசியாக மொத்தம் 101 - வருஷ ப்ரம்மசர்யமான பிறகு, தஹராவித்யையில் எம்பெருமானுக்குச் சொன்ன எட்டு குணங்களும் இவனுக்குண்டு. உடலினின்று கிளம்பி உத்தம புருஷனைச் சேர்ந்து

சுயரூபம் பெற்று சுகப்படுகிறான். ஸங்கல்பிக்கிறபடி இவனுக்கெல்லாம் கைகூடும்' என்று இந்திரன் ப்ரஜாபதியினிடமிருந்து உபதேசம் பெற்று தேவதைகளுக்கு உபதேசித்தான். இதை அறிந்தவர் இங்ஙனம் பலன் பெறுகிறார்கள். (இந்த ப்ராஜாபதி வித்யையினால் ஜீவாத்ம ஸ்வரூபம் தெளிவாகும். அபஹத பாப்மத்வம் முதலான எட்டு குணங்கள் ஜீவாத்மாவுக்கு இயற்கையாயுள்ளன. இப்படியே ஜ்ஞான னந்த ஸ்வரூபமாயும் பரமாத்ம சேஷமாயுமிருப்பது இது. ஆக ஆத்ம ஸ்வரூபத்தை இந்த வித்யையாலே ஜ்ஞான யோக பலத்தாலே கண்டு அதன் பிறகு பக்தி யோகத்திலிழிந்து பெறும் பலனே மோக்ஷமாம். அப்பலனை இவ் வித்யையிலே சொல்லியிருப்பதும் இவ் வித்யையை அப்யஸிக்காமல் அப்பலனைப்பெற முடியாதாகையாலே யெனத் தெளிக).

13–14. இதற்குச் சான்றாக மேலே சில மந்த்ரங்களை யோதுகிறது. அவற்றின் பொருளாவது பகவானைக் குறிய திருமேனி யுடையவனாகவும் சேதநாசேதநாந்தர்யாமியாகவும் இருவகையாக உபாஸிக்கிறேன் (இது ப்ரபத்திமந்த்ரமுமாம்.) குதிரை மயிரைச் சிலிர்த்து உதறுமாபோலே பாபங்களை உதறித் தள்ளி ராகுவினின்று விடுபட்ட சந்திரன் போலே சரீரத்தினின்று விடுபட்டு கருதார்த்தனுய் அழிவற்ற ப்ரம்மலோகம் போய்ச் சேருகிறேன். உலகில் காம ரூபங்களைச் செய்து, தான் அவற்றிற்குட்படாமே ஆகாசமாய் நிர்மல ப்ரகாசமாய் அழிவற்ற ப்ரம்மாயிருப்பது ஆத்மா. அந்த ஸர்வ ப்ரஜேச்வரனைப் பெறுகிறேன். இனி ஸத்துவ குணத்தை யழித்து சுக்லதாதுவை உட்கொள்ளும் யோநியிற் ப்ரவேசம் பெறேன்; புநர்ஜன்மமில்லை என்றதாம்.

15. இந்தச் சாந்தோக்யோபநிஷத்திலே ஓதப் பெற்ற வித்யை யெல்லாம் ப்ரமன் ப்ரஜாபதிக்கும் ப்ரஜாபதி மனுவுக்கும் மனுவானர் ப்ரஜைகளுக்கு முபதேசிக்க விளங்கி வருமவை. ஆசார்யன் கிருஹத்திற்குச் சென்று குருசுச்ரூஷை செய்து வேதத்தை யோதி ஆசார்யனை ஸத்கரித்து ஸமாவர்த்தனம் பெற்று குடும்பம் சேர்ந்து பரிசுத்தமான இடத்திலே வஸித்து அத்யயநாதிகளை யநுஷ்டித்துத் தன்னைச் சேர்ந்தவர்களையும் தார்மிகராகச் செய்து கொண்டு ஆத்மாவினிடம் இந்திரியங்களைச் செலுத்தி வைதிக தர்மங்களை மட்டும் செய்து கொண்டு வேறு ஒரு ப்ராணியையும் ஹிம்ஸிக்காமல்

இங்ஙனமே ஆயுள்காலம் வரையில் நடத்தி வருகிறவன் ப்ரம்மலோகம் பெறுகிறான். திரும்ப இந்த ஸம்ஸாரத்திற் புகுந்து தவிப்பதில்லை.

எனது அங்கங்களும் ஆங்காங்குள்ள இந்திரியங்களும் புஷ்டி பெற்று விளங்கட்டும். ப்ரம்மத்தை யறிவது உபநிஷத்துகளைக் கொண்டு. அந்த ப்ரம்மத்தை நான் நிராகரிக்காமல் ஆதரிக்கக்கட வேன். அதுவு மென்னை நிராகரிக்காமல் ஆதரிக்க வேண்டும். இங் ஙனம் ஆத்ம விஷயத்தில் ஈடுபட்டுள்ள எனக்கு உபநிஷத்திற் சொன்ன தர்மங்க ளெல்லாம் ஸித்திக்க வேண்டும் என்று சாந்தி பாடமும் ஓதப் பெற்றது.

இப்படிச் சாந்தோக்யோபநிஷத்தின் ஸாரமாம். பாஷ்யத்தி லும், பரிஷ்காரத்திலுமுள்ள விசேஷங்களை விரும்புமவர் அங்கே கண்டுகொள்க.

ஸ்ரீமதே ரங்கராமாநுஜ மஹா தேசிகாய நம:

சுபமஸ்து.

श्रीः

श्रीपद्मावतीसमेतश्रीनिवासपरब्रह्मणे नमः

भूमिका

अर्चासु वेङ्कटेशो विशिष्यते वैद्युतश्च दीपेषु ।
औपनिषदेषु भाष्येष्वेवमिदं रङ्गलक्ष्मणयतीन्दोः ॥

अथेदमस्माकं प्राप्तावसरम्, यत् **उभयवेदान्तग्रन्थमालायामस्यां** परिष्कृत्य संमुद्य प्रकाशितेषु ईशाद्यैतरेयान्तोपनिषद्भाष्येषु छान्दोग्यभाष्यस्य तथा प्रकाशनं नाम । तत्र किञ्चित भूमिकामारचयन्तः प्रथममिदं वाचकमहाभागेभ्यो विज्ञाप्य तन्मुखेन कृतज्ञतामाविष्कृत्य ततःपश्चादेवान्यत्र पदं निधित्सामः, यत् एवं **विशिष्टाद्वैतभाष्यप्रकाशकसमित्या** मत्प्रोत्साहनार्थमाविर्भूतया मुद्रणकार्यभरणव्यग्रया तत्र तैत्तिरीयैतरेयभाष्यात्मकं तृतीयं सरं स्वयं संप्रकाशितवत्या समुचितमभ्यर्थिता **श्री वेङ्कटेशदेवस्थानसमितिः** एतद्देवस्थानसर्वनिर्वाहधुरन्धरमहोदयअत्रत्यप्राच्यविमर्शालयाध्यक्षमहाशयोभयमुखेन प्रेमोत्साहभरितां प्रेरणामादृत्य समग्रद्रविणव्ययं संविधाय स्वकीये मुद्रणालये छान्दोग्यभाष्यमिदं मुद्रयितुमादिश्य **उभयवेदान्तग्रन्थमाला**मुद्रणाधिकृतमन्मुखेन कार्यमपि यथावत् निरवीवृतदिति । एवं कृतज्ञेन मया संप्रति करिष्यमाणज्ञेनापि भूयते, यदियं तयैव समित्या प्रोत्साहिता देवस्थानसमितिरितःपरं बृहदारण्यकोपनिद्भाष्यमुद्रणमप्येवं कर्तुमादेशमाज्ञप्तवत् अकार्षीत् । तत् तदपि भाष्यमभिज्ञलोकसंप्रीणनाय समर्थकारुणिकः स एष श्रीनिवासः सत्वरं संमुद्य पकाशयितुमनुगृह्णात्विति च आर्याणां सविधे साञ्जलिबन्धमावेद्यते ।

अधि. सन्ति सहस्रं सामशाखा इति प्रसिद्धिः । तत्र ताण्डिनां शाखायामन्ते या उपनिषत, सा छान्दोग्यशब्देन व्यवह्रियते । छन्दोगानामिदं छान्दोग्यम् । 'ऋच्यध्यूढं साम गायति', 'यद् योन्यां गायति, तदुत्तरयोर्गायति' इत्यादिवचनबलात् ऋक्षान्त्रेषु सामगानं भवति । ऋचश्च गायत्र्याद्यनेकविधच्छन्दोबद्धा भवन्तीति

छन्दोगा इत्यस्य छन्दोबद्धमन्त्रेषु सामगानकर्तार इत्यर्थः । छन्दश्शब्दो वेदेऽपि प्रसिद्धयति । प्राक्तनव्यवहारनियत्या च च्छान्दोग्यं सामवेदोपनिषद्विशेष इति सिद्धयति ।

उपनिषत्पदस्य च शाङ्करदर्शितमर्थम्, ततः प्राक्तनैर्वाक्यकारादिभिरुपनिबद्धं उपनिपूर्वकषद्लृधातोः लोकप्रसिद्धयनुसारिणं श्रुतप्रकाशिकादिप्रकाशितमर्थञ्च प्रागेव प्रथमसरभूमिकायामावेदयाम ।

यद्यप्ययं वाक्यग्रन्थो नाद्यत्वे कुत्राप्यध्यक्षपदमध्यास्ते, अथापि भगवद्भाष्यकारैर्बहुत्रैतद्ग्रन्थाद् वाक्यान्युद्धृत्य प्राचीनमतप्रक्रिया तत्र तत्र शाङ्करस्यार्वाचीनस्यान्यथात्वविवेदयिषया प्रादर्शीति तदात्वे तदुपलम्भस्थितिरभ्यूह्यते । न केवलमिदं वाक्यं नाम ग्रन्थरत्नम्, अस्य व्याख्यानरूपं द्रमिडभाष्यमपि तत्र तत्रोदाहारि भगवता श्रीभाष्यकृता । तस्य भाष्यस्य व्याख्यापि काचित् वामनटीकेति श्रुतप्रकाशिकातोऽवसीयते । वाक्यमिदं छान्दोग्यव्याख्यानरूपं ब्रह्मनन्दिकृतमिति प्रसिद्धिः । "निर्वचनञ्च स्मार्तमुदाहृतं भाष्यकारेणे"ति श्रीभाष्यव्याख्यावसरे चोक्तं तत्त्वटीकायाम्, "अत्र भाष्यकारो ब्रह्मनन्दिवाक्यव्याख्याता द्रमिडाचार्यः" इति । शाङ्करछान्दोग्योपनिषद्भाष्यम्, आनन्दगिरीयञ्च तद्व्याख्यानमनुरुध्य, द्रमिडाचार्यभाष्यं छान्दोग्यार्थविवरणरूपमिति व्यक्तमवसीयते । वाक्यव्याख्यानरूपता च द्रमिडभाष्यस्य भगवद्भाष्यकारदर्शितैवेति वाक्यं छान्दोग्यव्याख्यानमित्यन्वीक्षितुं पार्यत एव । आदौ शाङ्करच्छान्दोग्यभाष्ये, 'अल्पग्रन्था वृत्तिरारभ्यते' इति कथनं बहुग्रन्थरूपस्य द्रमिडव्याख्यानस्य विस्तृततया संक्षिप्तः स्वग्रन्थः प्रेक्षावतामीक्षणार्हो भवतीति ज्ञापनायेत्यानन्दगिरिरभिप्रैति । मधुविद्यायाञ्च दक्षिणोत्तरादिदिगवच्छिन्नादित्योदयास्तमयोत्तरोत्तरद्विगुणकालभोगरूपफलप्रतिपादकप्रघट्टव्याख्यानावसरे शाङ्करे, 'आचार्यै' रिति द्रमिडाचार्यनिर्देशपूर्वं तद्भाष्यशकलोदाहरणपूर्वं तदर्थो विवक्षे । तत्र श्रुतेर्वास्तवार्थः क इति च वयमत्र टिप्पण्यां यथामति विचारितवन्तः स्मः । एवं रैकविद्यायां शूद्रेति जानश्रुतेः संबोधनं द्रमिडभाष्ये येन प्रकारेण निरूढम्, तं प्रकारमुपन्यस्य शाङ्करे स्वयमन्योऽपि प्रकार उत्प्रेक्षि । तत्र द्रमिडभाष्यदर्शिता पद्धतिः अपशूद्राधिकरणब्रह्मसूत्रदर्शितभगवद्बादरायणाशयानुरोधिनी तत्रोपनिषदि द्विःप्रयुक्तशूद्रपदानुगामित्वप्रदर्शनपूर्वं श्रीभाष्यसमादृतेति च टिप्पणे प्रादर्शयाम। श्रीशङ्कराचार्याश्च

द्रमिडाचार्यान् क्वचिदाचार्यपदेन, क्वचित् सामान्यतश्च निर्दिशन्तः स्वाभिमतविपरीतत्वे तंदुक्तमर्थमपक्षिपन्तीति वाचका वेदितुं पारयन्त्येव। भगवद्रामानुजोदाहृतानि च वाक्यद्रमिडभाष्यादिवचनानि यथावदावर्तयतां तदादृता सिद्धान्तसरणिः सुगमा भवितुमर्हति। तदत्र तानि वचनान्यनुवाचयामः—तथाहि **वेदार्थसंग्रहे**—

वाक्यगतं वाक्यम्, 'युक्तं तद्गुणकोपासनात्' इति ([1]पु. १४६.)। तत्र **द्रमिडाचार्यव्याख्या**, 'यद्यपि सञ्चिंतो न निर्भुग्नदैवतं गुणगणं मनसाऽनुधावेत्—तथाप्यन्तर्गुणामेव देवतां भजत इति तत्रापि सगुणैव देवता प्राप्यते' इति।

वाक्यम्, 'तस्मिन् यदन्तरिति कामव्यदेशः' इति (१८२. पु.)।

वाक्यम्, 'आत्मेत्येव तु गृह्णीयात् सर्वस्य तन्निष्पत्तेः' (१८७. पु.) इति।

अन्यत्र **द्रमिडाचार्यभाष्यम्**, 'फलसंबिभन्त्सया हि कर्मभिरात्मानं पिप्रीषन्ति। स प्रीतोऽलं फलायेति शास्त्रमर्यादा' इति (२२३. पु.)।

अन्यत्र च (द्र. भा.) 'तस्याज्ञया धावति वायुः, नद्यः स्रवन्ति, तेन च कृतसीमानो जलाशयाः समदा इव मेघविसर्पितं कुर्वन्ति।' **(मेघविसर्पितम्**= उज्जृम्भणम्) (२२९. पु.)

वाक्यम्, 'आदित्यक्षिसं वा श्रीमत्त्वात्' इति। (२४६)

वाक्यम्, 'हिरण्मयः पुरुषो दृश्यत इति प्राज्ञः सर्वान्तरः स्यात् लोककामेशोपदेशात्, तथोदयात् पाप्मनाम्' इति (२४९)।

वाक्यम्, 'स्याद् रूपं कृतकमनुग्रहार्थं तच्चेतसाम्, ऐश्वर्यात्। रूपं वाऽतीन्द्रियमन्तःकरणप्रत्यक्षं तन्निर्देशात्' इति (२५० पु.)।

तत्र **द्रमिडभाष्यम्**, "अज्ञसैव विश्वसृजो रूपम्। तत्तु न चक्षुषा ग्राह्यम्। मनसा तु अकलुषेण साधनान्तरवता गृह्यते। 'न चक्षुषा गृह्यते, नापि वाचा। मनसा तु विशुद्धेने'ति श्रुतेः। न ह्यरूपाया देवताया रूपमुपदिश्यते। यथाभूतवादि हि शास्त्रम्। 'माहारजनं वासः', वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्' इति प्रकरणान्तरनिर्देशश्च साक्षिणः" इति।

---

1. पुटसंख्यानिर्देशः पुष्करस्वामिमुद्रितकोशानुसारात्।

अत्रैव वेदार्थसंग्रहे, " भगवद्बोधायन – टङ्क – द्रमिड–गुहदेव- कपर्दि — भारुचिप्रभृत्यविगीतशिष्टपरिगृहीत – पुरातनवेदवेदान्तव्याख्यानसुव्यक्तश्रुतिनिकरनिदर्शितोऽयं पन्थाः " इति भगवता भाष्यकृता समग्राहि । तत्र तात्पर्यदीपिकायां वेदव्यासापरनामधेयैः सर्वपूर्व व्याख्यातिशायि–श्रीभाष्यव्याख्यारूप–श्रुतप्रकाशिकानिर्माणनिरूढ श्रुतप्रकाशिकाचार्यनामधेयैः श्रीसुदर्शनसूरिभिः, " टङ्को ब्रह्मनन्दी "इति व्याख्यायि । तेन ब्रह्मनन्दिन एव टङ्क इति नामधेयान्तरमिति निर्ज्ञायते । आत्मसिद्धौ च भगवद्यामुनमुनिभिः, " आचार्यटङ्क " इति आचार्योपपदनिवेशपूर्वकं टङ्को निरदेशि । अत्र वेदार्थसंग्रहनिर्दिष्टाः सर्वे, संप्रति 'विशिष्टाद्वैतसिद्धान्त' इति संप्रतिपन्नव्यवहारं प्राक्तनं त्रय्यन्तसिद्धान्तमनुरुध्य प्रबन्धानां प्रबन्धार इति भगवद्भाष्यकारा आशेरते ; यतः प्राहुः **अविगीतशिष्टेति** । श्रीभगवद्रामानुजसिद्धान्तनिर्धारकसार्वभौमाः सर्वतन्त्रस्वतन्त्राः कवितार्किकसिंहाः श्रीवेङ्कटेशावताराः श्रीमद्वेदान्तदेशिकाश्च संप्रदायपरिशुद्धौ, "*வ்யாஸ போதாயநாதிகளாலே பதாதிகாரம் ப்ரவர்த்திதமான வேதாந்த ஸம்ப்ரதாயத்திற்கு இந்த யுகாரம்பத்திலே ப்ரம்மநந்த்யாதிகளுக்குப் பின்பு நம்மாழ்வார் ப்ரவர்த்தகரானர்.*' इति ब्रह्मनन्दिनः सदाचार्यत्वं समुदैरयन् । त एव यतिराजसप्ततौ वेदार्थसंग्रहं मनसिकृत्यैवमजीगणन्,

" निशाम्यन्तां यद्वा निजमतितिरस्कारविगमात्
निरातङ्काः टङ्कद्रमिडगुहदेवप्रभृतयः " इति ।

अथ श्रीभाष्यसमुद्धृतानि वाक्यादिवाक्यान्यप्यत्र प्रदर्शयिष्यामः ॥ उक्तवाक्यादिग्रन्थानपेक्ष्यापि प्राक्तनं तत्रापि वेदार्थसंग्रहनिर्दिष्टभगवद्बोधायनकृतत्वादार्षमेव ब्रह्मसूत्रव्याख्यानं वृत्त्याख्यं विशिष्टाद्वैतसिद्धान्तस्थापकमवर्तिष्टेति भगवद्भाष्यकारोपक्रममाष्यमास्तिकान् प्रतिबोधयति । यथा, " भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते " इति । [सेयं विस्तीर्णा वृत्तिरेव बोधायनकृतकोटिग्रन्थः, यः कोटिग्रन्थो दण्डिना स्वग्रन्थे अवन्तिसुन्दर्यां श्लिष्टप्रयोगेण समदर्शि इति केचित् आशेरते ।] इयं वृत्तिरन्या ; वाक्यं पुनरन्यत् ब्रह्मनन्दिकृतं छान्दोग्यविवरणरूपम् । अतः श्रीभाष्ये यत्र वृत्तिकार इति

निर्देशः, तत्र बोधायनस्य ग्रहणम्, यत्र वाक्यकार इति निर्देशः तत्र ब्रह्मनन्दिन इतीदं न मुक्तकण्ठं गदितव्यम्; अथापि वैशद्यायेह वेदितम्। अत्र श्रीभाष्यसूत्रौ पूर्वाचार्यपदविवक्षिताश्च के इति विचारे क्रियमाणे प्राकाश्येवेदं श्रुतप्रकाशिकायाम्, "द्रमिडभाष्यकारादयो हि परपक्षप्रतिक्षेपाद्यनादरेणातिसंक्षिप्तान् ग्रन्थान् अरचयन्" इति। तेन बोधायनो महर्षिः द्वैतादिसंभावितसर्वमतालोडनेन संप्रतितनविशिष्टाद्वैति-संप्रकाशितया सरण्यैव भगवद्बादरायणसिद्धान्तं स्थापितवानासेति, तथा द्रमिडाचार्यः छान्दोग्यविवरणभूतं भाष्यमिव ब्रह्मसूत्रार्थसंक्षेपाय किञ्चिद् भाष्यमपि भाषितवानासेति च विज्ञायते।

न हि द्वैतमद्वैतञ्च आनन्दतीर्थाचार्याभिधानैः श्रीमध्वाचार्यैः, श्रीशङ्कराचार्यैश्च स्वयं सूत्रभाष्यादिविरचनेन व्यक्तीचक्रे इत्येतावता प्रागीदृशं मतं कस्यापि बुद्धौ न प्रतिभातमासीदिति अनादिसंसारपारमार्थ्यवेदी कश्चित् प्रतिजानीत। द्वैतमतं हि नाम सांख्यतार्किकादिसंदर्शितमेव। तत्रतत्र तत्तदाचार्यसमादृतेषु प्रतितन्त्रविशेषेषु वस्तुतः स्थितेष्वपि सामान्यतो द्वैतमद्वैतं वा न प्राक् अत्यन्ताय नासीत्। भगवान् बादरायण एव बहूनि मतानि सूत्रेषु निबबन्ध, 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः', 'उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः', अवस्थितेरिति काशकृत्स्नः', 'चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः', 'ब्राह्मेण जैमिनिरुपन्यासादिभ्यः,' 'कार्यं बादरिरस्य गत्युपपत्तेः,' 'परं जैमिनिर्मुख्यत्वात्,' अभावं बादरिराह ह्येवम्,' 'भावं जैमिनिर्विकल्पामननात्' इत्येवं बहुलम्। सर्वस्यापि च मतस्य वैदिकैः प्रवर्तितस्य वेदवचनशकलान्येव मूलभूतानि, यदिदम्परास्ते पराणि वचनानि परधा निर्वोढुं प्रारेभिरे। अवैदिकप्रवर्तितानि च मतानि वैदिकसगोत्रकलहसमाकर्णनेन संक्षुब्धमतिभिः वेदवाक्यार्थवस्तुतत्त्वनिर्धारणोपयिकपरिकरविकलैः बुद्धिकौशलमात्मीयमन्यात्मनीने पथि स्वातन्त्र्येणोपयोज्य प्रख्यातिलिप्सापरीतमानसैर्महाकारुणिकैरिव मद्यामाविश्चक्रिर इति सर्वमिदमिदम्प्रथमतया निर्देष्टुमशक्यात् कस्मादपि कालादङ्कुरितं दैववशापतित-कालक्रमोद्भववावदूकवारिवाहकृतविविधमतिवर्षविरचितशस्योपशाखाभिवृद्धि न जातु निरन्वयविनाशाय कल्पत इति नात्र कस्यापि मतस्य कश्चिदर्वाचीन एव निदानं भवितुमर्हतीति तत्त्वस्थितिं विवेचका विदन्त्येवेति कृतमति विस्तरेण।

एवं द्रमिडाचार्यैर्ब्रह्मसूत्रस्यापि भाष्यमभाषीति श्रुतप्रकाशिकोक्तस्यार्थस्य भगवद्यामुनमुनिविरचितात्मसिद्धिग्रन्थगता सूक्तिरपि मूलं भवति, या खल्वेवम्, "भगवता बादरायणेन इदमर्थान्येव सूत्राणि प्रणीतानि। विवृतानि च तानि परिमित-गम्भीरभाषिणा द्रमिडभाष्यकृता। विस्तृतानि च तानि गम्भीरन्यायसागरभाषिणा भगवता श्रीवत्साङ्कमिश्रेणापि। तथाप्याचार्यटङ्कभर्तृप्रपञ्चभर्तृमित्रभर्तृहरिब्रह्मदत्तशङ्कर-भास्करादिविरचितसितासितविविधनिबन्धनश्रद्धाविप्रलब्धबुद्धयः, न यथावत्, अन्यथा च प्रतिपद्यन्ते" इति। अत्र सूत्रविषयोपक्रमात् शाङ्करभास्करसाहचर्याच्च आचार्य-टङ्कादयोपि ब्रह्मसूत्रव्याख्यातार इति प्रतीयते। भर्तृप्रपञ्चो बृहदारण्यकव्याख्यातेति तदीयशाङ्करभाष्यतोऽवगमात् काममिमे ग्रन्थान्तराणामपि ग्रथितार एव। टङ्को ब्रह्मनन्दीति प्राक् तात्पर्यदीपिकादर्शितानुसरणे द्रमिडाचार्यादप्ययं प्राचीन इति, अत एवौचित्यात् द्रमिडभाष्यव्याख्येयग्रन्थकर्तेति च संमन्तव्यम्। तत्त्वटीकायाञ्च, "पूर्वाचार्याः सञ्चिक्षिपुः" इति भाष्यव्याख्यानावसरे, "अत्र पूर्वाचार्याः ब्रह्मनन्द्यादयः' इत्युक्तम्। तेन द्रमिडाचार्यवत् ब्रह्मनन्द्यपि सूत्रं व्याचकारेति ज्ञायते। एवंतर्हि आत्मसिद्ध्यादौ द्रमिडभाष्यमात्रग्रहणम्, छान्दोग्यशाङ्करभाष्य-टीकादौ वाक्यं विहाय द्रमिडभाष्यमात्रग्रहणवत् स्वयं साक्षात् तददर्शनादिति इति भाव्यम्। अत्र आचार्यटङ्केति निर्देशात् परिग्राह्यवचनोऽपि ब्रह्मनन्दी छान्दोग्यतत्त्वार्थ-दर्शी न परमतपरिहारानुकूलमव्याकुलं सूत्रव्याख्यानमकरोदिति सोऽयमत्र विषये सितासितनिबन्धकर्तैवेति भगवद्यामुनाचार्यसूक्तयाशयो वक्तव्यः। वेदार्थसंग्रहादौ टङ्कस्य सम्यक् परिग्रहमाकलयद्भिश्च, गौतमसूत्रस्वीकारबहिष्कारपक्षवत् टङ्कग्रन्थ-स्वीकारबहिष्कारयोः सत्यपि विवादे यथावस्थितार्थदर्शि संप्रतिपन्न द्रमिडाचार्यसमा-हृतच्छान्दोग्यव्याख्यारूपवाक्यग्रन्थनिर्मातुर्ब्रह्मनन्दिनः टङ्कस्य कार्त्स्न्येन परिग्राह्यवचनत्व-मेवाहृत्य, शङ्कितार्थान्तराणि सन्ति चेत्, तस्य वाक्यशकलानि, द्रमिडाचार्यानुसारेण परिकल्पनीयसमुचितभावान्तराणीति भगवद्भाष्यकाराशयोऽभ्यूह्यः। अभ्यूहोऽय-माचार्यपदं प्रयुक्तवद्भिर्भगवद्यामुनमुनिभिरपि व्यञ्जित इति वर्णनीयम्। 'आत्मेत्येव तु गृह्णीयात् सर्वस्य तन्निष्पतेः' इति वाक्यग्रन्थः श्रीभाष्ये अद्वैतिमतानुकूलतया महापूर्वपक्षे प्रादर्शि। यस्य स्वाभिमतस्तत्त्वार्थो वेदार्थसंग्रहे विवव्रे। सर्वमिदं

टङ्कब्रह्मनन्दिनोरैक्यम्, आदर्तव्यत्वञ्च संप्रतिपन्नमनुरुध्याभ्यधायि। तथाचोपरि श्रीभाष्यादिगततया प्रदर्श्यमानानि वचनानि यथायथं छान्दोग्यस्य वा ब्रह्मसूत्रस्य वा व्याख्यारूपवाक्यग्रन्थभाष्यग्रन्थगतानि। यत्र यथा ग्रहणे स्वारस्यं लक्ष्यते, तत् तथा ग्राह्यमिति विभाव्यम्। अस्तु वा ब्रह्मनन्दिना बृहदारण्यकं व्याकुर्वता स्वोच्यमानार्थसांप्रदायिकत्वाय बोधायनकृतविस्तीर्ण ब्रह्मसूत्रवृत्तिगमनिकासंक्षेपोऽपि तत्र चक्रे इत्येवम्। वचनानि तावत्—

द्रमिडभाष्यं टीकायाम्, "नमः प्रवरगुणैकास्पदाय स्थिरत्नसकुलबीजकुम्भभूताय भुवनकोशस्य गोप्त्रे ब्रह्मणे। नमो जैमिनये वेदरहस्यसम्पुटनिगूढविष्फारयित्रे न्यायप्रज्वलितचेतसे। नमोऽस्त्वाचार्येभ्यः" इति।

वाक्यं टीकायाम्, "उपनिषण्णत्वाद्वा उपनिषत्"।
तत्र **द्रमिडभाष्यम्**, "गहने हीयं विद्या संनिविष्टा"।
तस्य च **वामनटीका**, "**गहने** ब्रह्मणि उपनिषण्णा"।

वाक्यं लघुसिद्धान्ते, "वेदनमुपासनं स्यात् तद्विषये श्रवणात्"। "सकृत् प्रत्ययं कुर्यात् शब्दार्थस्य कृतत्वात् प्रयाजादिवत्। सिद्धं तूपासनशब्दात्"। "उपासनं स्याद् ध्रुवानुस्मृतिः संभवान्निर्वचनाच्च"। "तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः संभवान्निर्वचनाच्च"। "जात्याश्रयनिमित्तादुष्टादन्नात् कायशुद्धिर्विवेकः"। "विमोकः कामानभिष्वङ्गः"। "आरम्भणसंशीलनं पुनःपुनरभ्यासः"। "पञ्चमहायज्ञाद्यनुष्ठानं शक्तितः क्रिया"। "सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानि"। "देशकालवैगुण्यात् शोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यमभास्वरत्वं मनसोऽवसादः"। "तद्विपर्ययजा तुष्टिरुद्धर्षः" इति।

अत्र निर्वचनशब्दविवक्षितानि वचनानि द्रमिडाचार्यदर्शितानि चात्र श्रीभाष्येऽन्ववादिषत।

महापूर्वपक्षे अद्वैतिमतसाधकतयापि वाक्यग्रन्थोऽन्वभाषि—"आत्मेत्येव तु गृह्णीयात् सर्वस्य तन्निष्पत्तेः" इति। पुराणघट्टे च सूत्रप्रदर्शनावसरे श्रीभाष्ये **द्रमिडभाष्यम्**—, "देवतासायुज्यादशरीरस्यापि देवतावत् सर्वार्थसिद्धिः स्यात्"। ततो वाक्यभाष्यग्रन्थौ वेदार्थसंग्रहदर्शितावुद्धृतौ।

२–१–५. भोक्त्रापत्त्यधिकरणे द्रमिडभाष्यम्, "यथा लोके राजा प्रचुरदन्दशूके घोरेऽनर्थसंकटेऽपि प्रदेशे वर्तमानो व्यजनाद्यवधूतदेहो दोषैर्न स्पृश्यते, अभिप्रेतांश्च लोकान् परिपालयिष्यति; भोगांश्च गन्धादीन् अविश्वजनोपभोग्यान् धारयति—तथाऽसौ लोकेश्वरो भ्रमत्त्वसामर्थ्यचामरो दोषैर्न स्पृश्यते; रक्षति च लोकान् ब्रह्मलोकादीन्; भोगांश्चाविश्वजनोपभोग्यान् धारयति" इति। एवमुपर्यपि द्रष्टव्यम्।

तदेषां वाक्यभाष्यग्रन्थानां परिशीलने प्रस्पष्टमवगम्यत एव–सर्वत्र सगुणमेव ब्रह्मोपास्यम्, यतो दहरविद्येव सद्विद्यापि सगुणमेव परं गोचरयति। इयांस्तु विशेषः–यद् दहरविद्यायां "तस्मिन् यदन्तस्तदन्वेष्टव्यम्", "तस्मिन् कामाः समाहिताः" इति परमात्मवत् तद्गुणा अपि पृथगेव निर्दिष्टाः, सद्विद्यावाक्ये च परमात्मवाचकं पदम् सदात्मसत्यतदेतदात्मकं सत्त्वादिविशेषणपुरस्कारेणैव विशिष्टं प्रत्याययतीति। अतो न निर्विशेषं कचिल्लक्ष्यत इति। एवं हि अन्तर्गुणदेवताभूततत्त्वोपासनमेव सद्विद्याविहितं कण्ठरवेण कथयन् वाक्यकारः तद्व्याख्याता द्रमिडाचार्यश्च तत्त्वमसीत्यस्याखण्डपरत्वप्रत्याशामञ्जसैव क्षिपतीति सुविशदम्। तदस्मिन् महावाक्य एव प्राचीनसंप्रदायानुसारेण जीवब्रह्मैक्यसमर्थनसामर्थ्यविकले संपन्ने किमस्त्यन्यदिह वाक्यं छान्दोग्ये, यत् अद्वैतिमतस्यावकाशं दास्यतीत्याशयेन वेदार्थसंग्रहे सद्विद्यासांप्रदायिकार्थः समदर्शि। सम्यगीक्ष्यमाणे श्रीशङ्कराचार्या अपि निर्गुणपरतां निरूपयितुमपारितवन्तः सगुणपरतयैव प्रायः सर्वां छान्दोग्यश्रुतिमभाषिषतेति सुवचम्। तदिह संक्षिप्य सारभूतकतिपयविद्याभाष्यगतिप्रदर्शनेन प्रकाशयामः।

आदितोऽध्यायद्वयं तावदुद्गीथविद्याप्रधानम्। अथ तृतीये मधुविद्या प्रारभ्यते, यस्यां वस्वादिगताधिपत्यस्वाराज्यप्राप्तिरेव फलं श्रूयते। यत् पुनस्तत्र क्रममुक्तिपरं किमपि वाक्यम्, तत्रापि 'ऊर्ध्व उदेत्ये' त्यादिना ऊर्ध्वदेशोद्गमवचनान्न निर्गुणब्रह्मविद्याफलं तादृग् भवितुमर्हति। भाष्ये च ब्रह्मलोकादागतपुरुषप्रतिवचनप्रस्तावात् सगुणब्रह्मस्थानमेव किञ्चिद्विवक्षितमाकलनीयम्। सर्वथा मानवानामिह निर्गुणब्रह्मलब्ध्यर्था परिस्थितिः काचिन्न तत्र प्रादर्शीति संप्रतिपन्नमेतत्। अथ क्रमेण शाण्डिल्यविद्याभाष्ये शील्यमाने तत्र, "विशिष्टगुणशक्तिमत्त्वेनोपासनं

विधित्सन्नाह" इति सगुणोपासनमेव समदर्शयत्, तद्विद्यान्ते च महता प्रयत्नेन निर्गुणविषयत्वं स्वयमेव भाष्ये निराकरोत्येति किं ततो विचार्यमस्ति। संवर्गविद्या चान्नादत्वफला। षोडशकलब्रह्मविद्या तु न निष्कलब्रह्मविद्या भवितुमर्हति। अथोपकोसलविद्यायामर्चिरादिमार्गानुवर्णनात् निर्गुणविद्याफलस्य च 'अत्र ब्रह्म समश्नुत' इति मार्गनिरपेक्षतास्वीकारात् न सापि निर्गुणविद्या भवितुमलम्। एवं पञ्चाग्निविद्यापि। वैश्वानरविद्या च द्युमूर्धादिकल्पनया विश्वरूपब्रह्मोपासनं कथं नु निर्गुणविषयं संभाव्यते। अथ सद्विद्या, यत्र 'तत् त्वमसी' ति प्रधानवाक्यं श्रूयते। सैषापि सगुणविषयिणीति प्राचीनव्याख्योदाहरणेन प्रादर्शयाम। अत्रापि तु, 'आचार्यवान् पुरुषो वेद। तस्य तावदेव चिरम् यावन्न विमोक्ष्ये अथ संपत्स्ये' इति ब्रह्म साक्षात्कृतवतोऽपि देहविमोक्षात् प्राङ् न ब्रह्मसंपत्तिरिति श्रुतम्। तदेतत् जगन्मिथ्यात्ववादिनां मते न घटते। सिद्धे ब्रह्मात्मैक्यसाक्षात्कारे सर्वस्यापि मिथ्याभूतस्य बाधध्रौव्येण कालप्रतीक्षा हि नावसरं लभते। न हि ज्ञानाग्निः तत्त्वज्ञानकृतमिथ्याज्ञानादिनिवृत्तिनयेन सर्वं भस्मसात्कुर्वन् मिथ्याभूतमपि किञ्चित् परिशेषयेत्। आरब्धवेगमुक्तेषुदृष्टान्तादिवर्णनञ्च जगत्सत्यत्वमातिष्ठमानानां गोष्ठ्यां बहुमतिमर्हति। एवमत्र संपत्स्य इति कथितसंपत्तिप्रकारशोधनमपि प्राप्तकालम्। विदुषामपि, 'वाङ् मनसि संपद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायां' मिति संपत्तिक्रमः परमस्ति; मूर्धन्यया नाड्या निष्क्रम्यार्चिरादिगतिस्तु नापेक्ष्यत इति भाष्यादौ नियमयन्ति। यथा गतिविशेषो नापेक्ष्यते, तथा वागादिसंपत्तिरपि नापेक्षणीया। देशविशेषस्येव कालविशेषस्याप्यपेक्षा यतो न वक्तुं शक्यते। अन्यथा हि ज्ञानी वाङ्मनसादिसंपत्तौ सकृत् सुषुप्तो न पुनः प्रबुध्येत, लब्धैक्यभावादिति कुतस्तस्य बहुकालं देहानुवृत्तिरित्यप्यस्ति विमृश्यम्। अभिनहनान्मुक्ताक्षस्यानेकग्राममार्गेण गन्धारोपसंपत्तेर्दृष्टान्तीकरणाच्च देहान्मुक्तस्य संपत्तिरियमर्चिरादिमार्गक्रमेणेति स्वरसोऽधिगमः।

अपिचेमां संपत्तिमनन्तरा भूमब्रह्मविद्या विवृणोति, 'आत्मानन्दः स स्वराड् भवति, तस्य सर्वेषु लोकेषु कामचारो भवति—न पश्यो मृत्युं पश्यति—सर्वमाप्नोति सर्वशः। स एकधा भवति—सहस्राणि च विंशतिः' इति। एवं ब्रह्म संपन्नस्य सर्वमासिसहस्राधिकशरीरपरिग्रह सर्वलोककामचारादिषु फलत्वेन श्राव्यमाणेषु कथं

नाम संपत्तिर्निर्गुणब्रह्मभावेनावस्थानमात्रमिति प्रकृतात् वेदवाक्यात् कश्चिन्निश्चिनुयात। कथञ्च भूमविद्यामीदृशफलविशेषार्थमुपदिष्टां निर्गुणपरविद्यां कश्चिदाशंसेत ?

एवं भूमविद्यावर्णितं मोक्षफलमितोप्यधिकमनन्तरायां दहरविद्यायामादरेण श्रुतिर्दर्शयति। तत्र हि, 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ती' त्यादि बहु प्रदर्श्य, तृतीयस्यामितो दिवि तस्मिन् ब्रह्मलोके अरश्वप्यश्वार्णवौ, अश्वत्थः सोमसवनः, अपराजिता पूः, हिरण्मयं प्रभोः सदनम्, आदित्यमण्डलद्वारा, 'शतञ्चैका चे' त्युक्तया मूर्धन्यया नाड्या तत्प्राप्तिरित्युपदिश्य, ततस्तत्र परंज्योतिरुपसंपद्येति सद्विद्योक्तां संपत्तिमभिधाय स्वेन रूपेण सत्यकामत्व सत्यसंकल्पत्वपर्यन्तेनाभिनिष्पन्नस्य, 'स उत्तमः पुरुषः स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वे' ति निरङ्कुशाः नाथानुमोदिता नानाविधा विहाराः न्यरूपिषत। एवम्भूतं फलं साधयन्ती विशिष्य च आत्मानमिव तद्गुणानपि विषयीकुर्वती दहरविद्यापि पूर्वविद्या इव सगुणविषयिण्येवेति नेदमधिकं निरूपणमपेक्षते। अन्ते च यन्मूलाः यदायतनाः यत्प्रतिष्ठा इमाः सर्वाः प्रजाः तस्य, प्रजापतेः सभावेश्मप्राप्तिरूपाकृतब्रह्मलोकसंपत्तिरपुनरावृत्तिश्च सम्यगगायि।

तदेवं कृत्स्नं छान्दोग्यमप्रसक्ताद्वैतकथमतिप्राचीनैरनेकैरधिगमितपरमार्थमपि कालक्रमेण श्रीशङ्कराचार्यादिग्रन्थप्रचारे प्राचीनव्याख्यानलोपे च पदमाहितवति अन्यथैव अर्वागृद्दृभिर्गृहीतमासीदिति तत्त्वमसिघटितसद्विद्यार्थतत्त्वप्रतिबोधनपूर्वं भगवद्रामानुजदर्शितया सरण्या तदनुयायिनां ग्रन्थांश्च परिशील्य उपनिषदन्तराणीवेदमपि आचार्यवर्योऽयमक्षरशो व्याख्याय विशिष्टाद्वैतपथं यथावदिह प्राचीकशत्। स्वयं शास्त्रान्तरेष्विव पूर्वमीमांसायामप्यप्रतिहतसर्वतोमुखप्रज्ञतया, अप्पय्यदीक्षितादिविचारसरणिमपि यत्रानुपपत्तिः तत्र सुखमेव परिहृत्य परमार्थं प्रदर्श्य, तत्र तत्र ब्रह्मसूत्राधिकरणविषयवाक्यव्याख्यानावसरे तत्तदधिकरणान्यपि, वेदभाष्यकर्ता विद्यारण्यः तत्र तत्र वेदवाक्यव्याख्यानावसरे तत्संबन्धिमीमांसाधिकरणं यथा सर्वथा संक्षिप्यारचयामास, तथा व्यर्थप्रायां संग्रहरचनामनादृत्य पूर्वापरसर्वविषयवाक्यविमर्शमूलसंभावितसर्वप्रकारपूर्वपक्षोपवर्णन—सिद्धान्तपरिष्करणव्युत्पादितविशेषार्थं एव विशदमारचयन् अल्पज्ञान्

अधिकज्ञान् सर्वानप्यनसूयून् सहृदयान् रञ्जयन् सर्वानपि व्याख्यातॄन् अतिशेत इति विद्वज्जनपरिश्रमवेदिनां निर्णयः।

इतः प्राङ् मुद्रिताः या ईशाद्या उपनिषदः तत्र कठोपनिषदं विहायान्यत्र भाष्यकृतामतिविस्तृतं भाष्यं न लक्ष्यते। अत्र तु छान्दोग्ये भाष्यस्य विस्तर एव। तत्र कारणं पुनः उपनिषदिमुपाख्यानान्युपनिबध्नन्त्यपि वृथाविस्तरवर्जनेन आदित आन्तमनेकप्रकारशास्त्रचोदनीयविद्याविधान एव विस्पष्टं व्याप्रियमाणा बहूनि हितान्युपदिश्यास्मान् अनुगृह्णातीति। परावरविद्यापरिगणनादिकं बृहदारण्यकभूमिकायां चिकीर्षामः।

एवमुपनिषत्सु निःशेषवेदशाखाविभजनप्रचारणविख्यातव्यासनामधेय—मुनिगणाग्रगण्य—भगवद्बादरायणसमादरणभाजनभूतासु भूम्ना बृहदारण्यकं ब्रह्मसूत्रेषु परिशीलितमिति तस्योपनिषदन्तरेभ्य उत्कर्षः समस्ति। उत्कर्षं तमतिशेते पुनरस्य छान्दोग्यस्य तत्र विषये उत्कर्ष इति युक्तं वक्तुम्, यत् एष महर्षिः चतुस्सूत्रीमुपोद्घातरूपामुपनिबध्य, 'ईक्षतेर्नाशब्दम्' इत्यादिना छान्दोग्यगतसद्विद्यावाक्येन शास्त्रं प्रारभमाणः, मध्ये च पदेपदे छान्दोग्यमेव निबध्नन्, 'अनावृत्तिः शब्दात्' इति चान्ते सूत्रणेन 'न च पुनरावर्तते' इति छान्दोग्यावसानवाक्येनैव शास्त्रमवसाययन् अत्र निर्भरमात्मन आविष्करोति। शुभाशी (५४५) स्संख्यातेषु च ब्रह्मसूत्रेषु माकीं सार्धशतद्वयमितानि सूत्राणि मन्ये छान्दोग्यमेव गोचरीकृत्य प्रावर्तिषतेति पश्यत कियती महर्षेरिहाभिरुचिरिति। येषु विशिष्य च्छान्दोग्यस्थमेव विषयवाक्यं भाष्यकृतो विस्पष्टमुद्धरन्ति, ततोऽन्येष्यपि सूत्रेषु प्रदर्शितोपनिषदन्तरवाक्येषु अविशेषात् छान्दोग्यमपि तत्र तत्र विषयभावमर्हति बहुषु। एवञ्च प्रथमसूत्रेऽपि शक्यं छान्दोग्यवाक्यमुदाहर्तुम्। तत्र हि, 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति मुण्डकोपनिषद्वाक्यं विषयमभ्यवस्यन्ति। छान्दोग्येप्येवं कर्मणामन्तवत्फलमात्र प्रापकता, आत्मज्ञानादनन्तफलप्राप्तिश्च श्राव्यत एव। यथा, 'तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते। .... यस्तमात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामान्, तेषां सर्वेषु लोकेष्वकामचारो भवति ..... यस्तमात्मानमनुविद्य व्रजन्ति ..... इत्येवम्। रैक्वजानश्रुत्युपाख्यानं पठन्तश्च प्रस्फुटं

प्रतिपद्यामहे यत्, बहुपाकी बहुनिवासनिर्मायी बहुयज्ञयाजी च बहुशालो जानश्रुतिः कर्मकाण्डगोचरसकलकर्मसमाचरणसंप्राप्तकीर्तिसन्तान एव सन्, शकटस्याधस्तात् पामानं कषमाणस्य दारिद्र्यादिव धर्मपत्नीराहित्यादपि कतिपयं कर्माप्यकुर्वाणस्यैव स्थितस्य परन्तु सर्वलोकसमार्जितसर्वप्रकारकर्मज्ञानगोष्पदीकरणविचक्षणविशिष्टज्ञान वारिधेः विशुद्धयशोविस्तारविभाकरस्य पुरःस्थितः खद्योतक इव कियन्मात्रमिति; स एव रैक्को जानश्रुतिना सभक्तिश्रद्धमुपहृतां कन्यां परिगृह्य परिपक्वज्ञानपरिवाहभूतानि कर्माण्याचरन् अल्पफलानन्तकर्मव्यग्रान् जानश्रुतिप्रभृतीन् भूमिष्ठानिव शैलस्थो ह्यज्ञान् प्राज्ञः प्रपश्यतीति कियदन्तरं कर्मिणां ज्ञानिनाञ्चेति च। तदेवमेवमादीनि छान्दोग्यवाक्यानि काम्यकर्मणामतिशयित पुरुषार्थप्रदोहनप्रगल्भतावैकल्यं वेदयन्त्येव। तथा द्वितीयाधिकरणविषयभावमर्हति, 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति वाक्यम्। द्वादशवत्सरपर्यन्तं विहरणपरेणापि श्वेतकेतुना पितृवचनामर्षप्राप्तोपनयनेन द्वादशस्वेव वत्सरेषु सर्वान् वेदान् साङ्गोपाङ्गान् समधीत्य प्रतिनिवृत्तेन महामनसाऽप्यनुमाय विज्ञातुमशक्यं तद् ब्रह्माभूत्, यत्, 'अप्राक्ष्यो येनाश्रुतं श्रुतं भवती'त्युपदेशैकगम्यमुपक्षिप्तं तस्य पित्रेति पश्यतां सुज्ञानमेव परमात्मनोऽभिन्ननिमित्तोपादानभूतस्य शास्त्रयोनित्वम्। 'सुखं त्वेव विजिज्ञासितव्यम्', 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा' इति श्रुण्वताञ्च निरतिशयपुरुषार्थतया ब्रह्मणः समन्वयश्छान्दोग्ये स्थितो नापह्नवमर्हति। तदेवं शास्त्रारम्भात् प्राक् स्थिता चतुस्सूत्र्यपि छान्दोग्यं विषयीकुर्यात्। सत्यं भाष्यकारैस्तदभिप्रायवेदिभिश्च व्याख्यातृभिरौचित्यातिशयपरिकलनयैव तत्रतत्रोपनिषदन्तरवाक्यानि विषयवाक्यतया निरदिश्यन्त। अथापि अत्रत्या अपि अंशास्तत्र सह निवेशमर्हन्तीति सुदूरमिदं छान्दोग्यं ब्रह्मसूत्राणि व्याप्नोतीत्येतदुपपादनैदम्पर्येण वयमेतावदवोचाम।

तदिदं स्थाने, यत् उपनिषदोऽस्याः भाष्यमीषद् विस्तृतं भवतीति।

ईदृशेनानेन भाष्येण सहेदं छान्दोग्यम्, उपनिषदन्तराणि यथा तथैव बहुलालादिकोशनिरीक्षणपूर्वकं यथावस्थितं पाठं परिशील्य यथामति उपनिषदं भाष्यञ्च परिष्कृतवता मया कालदेशमुद्रणश्रमादि विचिन्त्य शब्दसंक्षेपदत्तदृष्टिनैव यत् पूर्वोपनिषत्परिष्कारापेक्षया किञ्चिद्विस्तृत एवात्र परिष्कारग्रन्थः कृत इव- -तत्र नूनमवर्जे-

नीयापतितानामनेकेषां विचार्याणामर्थानां विचारमार्गे कस्मिंश्चित् स्फुरति तदुपेक्षया तदर्थशोधनमन्तरेण मुद्रणनिर्वर्तने सर्वथैवातृप्यता मनसा अमुख्यांशानादरेण यथाशक्ति किञ्चित्कारविधित्सैव मूलम। विचारक्रमाश्चाल्परूपाः क्वचित् अन्यत्र महान्तश्चेति पदेपदे स्थिताः सूक्ष्मधियां शोधकानां समाराधनाय यदि कल्पेरन्, नूनमाचार्याणामनुग्रहः फलेग्रहिरिति तत्त्वं विज्ञाय तत्कौशलं तत्रैवार्पये। अनौचित्ये च भ्रान्तेः पुरुषधर्मतया मदीयं धनमिदमित्यनुचिन्त्य समये यथावस्थितार्थविवेचनेऽपि यतिष्ये।

काव्येषु यद्वदितिहासकथासु चैवं
वेदेषु वेदशिखरेषु च सम्यगस्ति।
आस्वादनीयरसभावगतिः समन्तात्
कालोऽनलं तदिह यत्परता तदर्थ्यम्॥

इति

उत्तमूर् ति. वीरराघवाचार्यः

उभयवेदान्तग्रन्थमालासंपादकः

छान्दोग्यश्रुतानामुपनिषदन्तरसंवादः

छा. १—१—९ प्रणवस्य सर्वान्वयः तै. उ. शिक्षा. ८.

१—२ इन्द्रियरूपप्राणान्तरनिराकरणेन मुख्यप्राणदृष्टिविधानम् (परन्तु उद्गातरि, नोद्गीथे) बृ. ३-३

,, (पु. १७) प्राणे अनेकर्षिनामनिर्देशः बृ. ३-३; ऐत. आ. २. २.

१—४ देवानां प्रणवनिष्ठता तै. शीक्षा ८.

१-७; ४-१५ अक्षिण पुरुषोपासनम् बृ. ६-२; ७-५.

३—१२ गायत्रीब्रह्मोपास्तिः बृ. ७-१४.

३—१३ वैश्वानराग्नेर्ब्रह्मता बृ. ७-९.

३—१४ तत्कतुन्यायः शतपथे १०-५-२; मुद्गलोपनिषदि च; अग्निरहस्ये च १०-५-१.

३—१४ शाण्डिल्यविद्यांशः बृ. ७-६; अग्निरहस्येऽपि.

३—१६ पुरुषविद्याशैली तै. उ. २ अन्ते

३—१७ अन्तवेलाजप्यमन्त्रकथनम् ऐत. आ. ३-२-४

३-१८; ७-३ मनसि ब्रह्मदृष्टिः तै. आन. ४.

४—३ कापेय ब्रह्मचारिसंवादः जैमिनीयोपनिषद्ब्राह्मणे।

४—१० खं ब्रह्म बृ. ६-६-७

४—१५ अर्चिरादिगतिः बृ. ७-११; ८-२; कौषीतक्यामपि.

५—१ प्राणविद्या (प्राणसंवादः) बृ. ८-१; कौ. ,,

५—२ मन्थकर्म बृ. ८-३.

५—३ पञ्चाग्निविद्या बृ. ८-२.

५—१० पुनर्जन्म बृ. ५-२; ६-४

५—११ वैश्वानरविद्या अग्निरहस्येऽपि।

६—१ दहरविद्या बृ. ६-४. तै. ना. अनु. १०

६—३ अनुप्रवेशव्याकरणे बृ. ३-४- तै. आन. ५.

६—७ षोडशकलः बृ. ३-५-१५; प्रश्न ६.

६—१३ लवणोदकदृष्टान्तः बृ. ४-४-१२

८—३ हृदयशब्दनिर्वचनम् बृ. ७-३.

„ सत्यशब्दनिर्वचनम् बृ. ७-५.

८—६ नाड्यादित्यगतवर्णः बृ. ६-२-३; ६-३-२०; ६-४-९.

८—११ घ्नन्तीत्यादि बृ. ६-३-२०.

८-५, ८-१२, ८—१४ ब्रह्मलोकगताः विशेषाः कौषीतक्यामपि । तल्लवकारसाग्नि च (शारी ४-३५ श्रुत. प्र.)

छान्दोग्योपनिषद्गताः श्लोकाः

यानि पञ्चधा	पु. ८७	यदा कर्मसु	पु. २१५
न वै तत्र	१०८	स्तेनो हिरण्यस्य	२४४
तावानस्य	१२३	न मे स्तेनः	*२५६
अन्तरिक्षोदरः	१३९	यथेह	२७०
आदित् प्रत्नस्य	१४३	न पश्यः	४०१
उद्वयं तमसस्परि	„	स एकधा	४०२
महात्मनश्चतुरः	१६७	शतञ्च दश	„
आत्मा देवानां	१६८	शतञ्चैका च	४३४
यतो यतः	२०२	अश्व इव रोमाणि	४५८
तत् सवितुः	२१४		

---

* न मे स्तेन इत्ययं तावत् वस्तुतः श्लोकः । पूर्वं सर्वैरपि तथाऽविज्ञाय वाक्यमध्ये निवेश्य मुद्रितत्वात् अत्राप्यनवधानेन तथैव मुद्रणमापतितम् । २०२ पुटे यतोयत इति गाथायाः श्लोकरूपेणावधाय मुद्रणवत् अत्रापि तथा मुद्रणं कार्यम् । तथाचैवमिह पूर्वोत्तरार्धविभागः—

"न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः ॥" इति ।

टिप्पणकृतः श्लोकाः १, ७५, २२२, २४३, ३०९, ३६०, ३६३, ३९६, ४६५, ४६६ पुटेषु द्रष्टव्याः ।

देशादिनाम

रैकपर्णाः	पु. १६४	ऐरम्मदीयम्	पुः ४३०
महावृषाः	,,	सोमसवनः	,,
अरः *	४२९	अपराजिता	,,
ण्यः	,,	प्रभुविमिताम्	,,

* एतदादयः षट् मुक्तिस्थाने परमपदे स्थिता विशेषाः ।

शोधनम्

३४८, पुटे. उपनिषदि 'समुद्र एव भवन्ति' इति मुद्रणं ग्रन्थाक्षरकोशानुरोधात् भाष्यस्वारस्याच्च कृतम् । "स समुद्र एव भवति" इति बहुसंमतं पाठान्तरमत्रेति द्रष्टव्यम् ।

३५३ पुटे परिष्कारे आदौ पङ्क्तिद्वयं मुद्रणाद् भ्रष्टम् । तच्चैवम्—

अत्रैवकिलेत्यत्र उपलप्स्यस इति शेषपूरणं कृतं शाङ्करे । तदा इतिशब्दः उपपादनसमाप्तिद्योतकः । अत्र भाष्ये तु निभालनाकारसमर्पकः । अत्रेत्यत्र अस्तीति क्रिया इति । एवञ्च स्वरससिद्धेतिभाव इति उपरितनमन्वितम् ।

अवश्यप्रदर्श्यप्रमाणाकरः

जातिव्यक्ती	पु. १०	श्लो. वा. वाक्याधि ३४८	
संहिताकार	११७	शि. म. दी. देवताधिकरण	
इदंब्रह्मायाति	१३७	बृ. ६-३-३७	
तस्माच्चेतरथीनां	१७३	ताण्ड्य म. ब्रा. २०-१२-५	

श्रीः

छान्दोग्यभागशारीरकसूत्रसूची

छा०	१. १.	शारी०	३. ३. ७, ४१, ५८, ५९–६३; ३. ४. १०, २१, २२, ४४, ४५, ५०; ४. १. १८.
,,	१. २.	,,	३. ३. ६—९; ४. १. ६.
,,	१. ३.	,,	४. १. ६.
,,	१. ५.	,,	३. ३. ६१.
,,	१. ६; १. ७.	,,	१. १. २१; ३. ३. ७.
,,	१. ८, ९.	,,	१. १. २३; ३. ३. ७.
,,	१. १०	,,	३. ४. २८,
,,	१. ११.	,,	१. १. २४.
,,	२. २३.	,,	३. ४. १८—२०.
,,	३. १—११.	,,	१. ३. ३०—३२; ३. १. ४—१०.
,,	३. १२, १३.	,,	१. १. २५—२८.
,,	३. १४.	,,	१. २. १—८; ३. ३. ५२.
,,	३. १६, १७.	,,	३. ३. २४.
,,	३. १८, १९.	,,	४. १. १, ४, ५.
,,	४. १—३.	,,	१. ३. ३३—३४; ३. २. ३२.
,,	४. ४.	,,	१. ३. ३७.
,,	४. १०—१५.	,,	१. २. १३—१८
,,	४. १४.	,,	४. १. १३.
,,	४. १५.	,,	३. ३. ३२; ४. ३—१४.

छा०	४. १६, १७.	शारी०	३. ३. ६४.
,,	५. १.	,,	२.१—५; ३. ३. १०.
,,	५. २.	,,	३. २. ६; ३.३.१८; ३. ४. २८.
,,	५. ३—९.	,,	३. १. १—७.
,,	५. १०.	,,	३. १. ८—२७; ३. ३. ३२; ४. ३. १—१४
,,	५. ११—२४.	,,	१.२.२५—३३; ३. ३. ५५.
,,	५. २४.	,,	४. १. १३.
,,	६.	,,	१. १. ५—१२; १. ४. २३—२७; २.१.१५; २. १, २१, २६; ३. २. ९; ३. ३. ३७; ४. १. १५, १९; ४. २. १—८, १४, १५.
,,	७.	,,	१. ३. ७, ८; ४. १. ९; ४. ३. १५. ४. ४. ११.
,,	८.	,,	१. ३. १३—२०; ३. २. ३०, ३१, ३. ३. ३८—४०, ४२.
,,	८. ६.	,,	४. २. १७.
,,	८. ७—१२.	,,	४. ४. १—१६.
,,	८. १३.	,,	३. ३. २७.
,,	८. १४.	,,	१. ३. ४२.
,,	८. १५.	,,	३. ४. ४७; ४. ४. २२.

श्रीः

छान्दोग्योपनिषदर्थसङ्ग्रहकारिकाः

१. छान्दोग्यं ताण्डिशाखान्तो भवत्यष्टप्रपाठकः ।
तत्रादौ सामभक्त्यंशे उद्गीथप्रणवे श्रुताः ॥

२. दृष्टयोऽथ द्वितीये तु सामभक्तिषु दृष्टयः ।
तृतीयादिषु नानोक्ताः विद्याः प्रायो विमुक्तिदाः ॥

I ३. आदौ रसतमत्वादिदृष्टिं शिष्ट्वाऽभिधीयते ।
कर्माङ्गाश्रितविद्यायाः वीर्यवत्तरता फलम् ॥

४. ततो मुख्यप्राणदृष्टेर्द्वेषिविध्वंसनं फलम् ।
तथाऽऽदित्यप्राणदृष्टिर्व्यानदृष्टिश्च ; दृष्टयः ॥

५. उद्गीथनामाक्षरेषु ; तथोपसरणान्यथ ।
अमृताभयतोद्गीथे उद्गीथप्रणवैक्यता ॥

६. आदित्यप्राणदृष्टिभ्यां भाव्या बहुसुतार्थिनाम् ।
आदित्ये चाक्षिण च ख्यातपुरुषत्वेन तद्दृशी ॥

७. शिलकादिकथासिद्धा तत्राकाशात्मभावना ।
उषस्त्युपाख्यानसिद्धं प्रस्तावे प्राणचिन्तनम् ॥

८. आदित्यचिन्तनोद्गीथे प्रतिहारेऽन्नचिन्तना ।
अथ शौवन उद्गीथस्ततः स्तोभेषु दृष्टयः ॥

II ९. साम्नि साधुत्वदृष्टिस्तद्भक्तिपूक्तास्तु पञ्चसु ।
षड्विधा दृष्टयः पश्चात् सप्तसु त्रिविधा अपि ॥

१०. गायत्रादिविशेषेषु दृष्टयो भक्तिपञ्चके ।
व्रतशिष्टाः दशस्विष्टाः सर्वदृष्टिश्च सामनि ॥

११. सामस्वराश्च वर्णोक्तिविधाश्च ब्रह्मसंस्थता ।
तारप्रभावः सवनदेवतासाध्यलोकता ॥

III १२. एवं प्रापाठकद्वन्द्वमतीतमथ कथ्यते ।
मधुविद्याऽथ गायत्रीविद्या द्वारपधीयुता ॥

१३. कौक्षेयज्योतिषि ब्रह्मतनौ काम्यमुपासनम् ।
शाण्डिल्यविद्या मुक्त्यर्था ; कोशदिभक्त्सदर्शनम् ॥

१४. पुत्रायुषेऽथ पुरुषविद्या स्वायुःफलाऽत्र च ।
मुक्त्यै मन्त्रोऽन्ततो ब्रह्मदृष्टी मनसि खेऽपि च ।

IV ५. अथादित्ये ब्रह्मदृष्टिः अथ जानश्रुतिं प्रति ।
संवर्गविद्या रैक्वोक्ता कापेयोक्त्यादितः स्फुटा ॥

१६. सा षोडशकलब्रह्मविद्या जाबालगामिनी ।
उपकोसलविद्या चाप्यग्निविद्याङ्गिका ततः ॥

१७. अथ यज्ञो वायुरस्य यजमानस्य चर्त्विजाम् ।
प्रायश्चित्तव्याहृतिज्ञब्रह्मर्त्विग्रक्ष्यतोदिता ॥

V १८. ज्येष्ठश्रेष्ठप्राणविद्या मन्थाख्यं कर्म चोदितम् ।
पञ्चाग्निविद्या यां श्वेतकेतोः पित्रे प्रवाहणः ॥

१९. प्राह यत्रोच्चनीचानां गतीनां भविनां गतिः ।
वैश्वानरात्मविद्या यां कैकयोऽश्वपतिर्जगौ ॥

२०. प्राचीनशालमुख्येभ्यो येषु षष्ठश्च गौतमः ।
VI सद्विद्या गौतमेनोक्ता पुत्राय श्वेतकेतवे ॥

VII २१. सनत्कुमाराद् भूमश्च विद्या नारदभाविता ।
मुक्त्यर्थायां यत्र चान्याः काम्या नामादिदृष्टयः ॥

VIII २२. अथो दहरविद्योक्ता ब्रह्मतत्स्थगुणाश्रया ।
सा प्रजापतिविद्या या साङ्गं शुद्धात्मगोचरा ॥

२३. अथ प्रपत्तिमन्त्राश्च ब्रह्माकाशव्यपाश्रयाः ।
अकृतब्रह्मलोकाप्त्यै पुनर्जन्मनिवृत्तये ॥

२४. सन्संप्रदायलब्धेऽर्थे यथाशास्त्रानुवर्तनात् ।
अनावृत्तिर्ब्रह्मलोकसंपत्तिः शान्तिरुच्यते ॥

२५. एवमुक्तविषयनामनिर्देशनं कृतम् ।
त्रयोदश चतुर्विंशत्याद्याश्चैकोनविंशतिः ॥

२६. सप्ताधिका दश चतुर्विंशतिश्चापि षोडश ।
षड्विंशतिः पञ्चदश खण्डा अष्टस्विह क्रमात् ॥

सटिप्पणभाष्य विषयसूची

I

उद्गीथविद्या = उद्गीथ प्रणवे दृष्टिविधयः

रसतमत्व कामादि समृद्धिगुणविशिष्टोद्गीथोपासनम्		....	१–७
विद्याफलं वीर्यवत्तरत्वम्		....	६
स्तुतिमात्राधिकरणम्	❀	....	८
अङ्गावबद्धाधिकरणम्	❀	....	१०
तन्निर्धारणानियमाधिकरणम्	❀	....	११
ऐहिकाधिकरणम्	❀	....	१२
मुक्तिफलाधिकरणम्	❀	....	१२
अस्यायिकापूर्वं उद्गीथे मुख्यप्राणदृष्टिः	आखणशब्दार्थश्च	....	१३–१६
प्राणस्याङ्गिरस्त्वादि		....	१७–१९
स्वाम्यधिकरणम्	❀	....	२०
अन्यथात्वाधिकरणम्	❀	....	२१
उद्गीथे आदित्यदृष्टिः		....	२३–२४
,, व्यानदृष्टिः		....	२४
उद्गीथाक्षरेषु प्राणादिदृष्टयः		....	२५
अशीस्तमृध्यर्थोपसरणानि		....	२७
प्रणवत्वेनोद्गीथग्रहणेनामृताभयरूपेण तदुपासनम्		....	२८
प्रणवोद्गीथैक्यज्ञानपूर्वकादित्यप्राणदृष्टिः		....	३०
तत्र दुरुद्गीथानुसमाहरणम् तद्वाक्यार्थविवेचनञ्च		....	३२
अन्नेषुयथाश्रयभावाधिकरणम्	❀	....	३३
उद्गीथविद्यायाः कर्त्वङ्गत्वसद्भावासद्भावविचारः		....	३५

उद्गीथे आदित्यहिरण्मयपुरुषदृष्ट्युपयुक्तकथनपूर्वक तद्दृष्टिविधानम्	....	३६–३७
आदित्यहिरण्मयपुरुषतत्त्वम्	....	३८
कप्यासवाक्यार्थः प्राचीन व्याख्यारूढः	....	३९
पुण्डरीकपदार्थः	....	४१
तदुन्नामकत्वप्रयुक्तोद्गीथत्वादि	....	४२
उद्गीथे अक्षिपुरुषदृष्ट्युपयुक्तकथनपूर्वक तद्दृष्टिविधानम्	....	४४
उभयविधदृष्ट्युपयुक्तं सर्वविधगेयत्वानुसंधानम् उभयविधदृष्टिफलञ्च	....	४५
अन्तरधिकरणम् ❁	....	४६
सामगतिकथापूर्वकमुद्गीथे परोवरीयस्त्वादिविशिष्टाकाशदृष्टिः	....	४८–५३
आकाशाधिकरणम् ❁	....	५४
उषस्त्युपाख्यानम्	....	५५–६०
तदुपदिष्टा प्रस्तावे प्राणदृष्टिः	....	६१
,, उद्गीथे आदित्यदृष्टिः, प्रतिहारे अन्नदृष्टिश्च	....	६२
अत्र प्राणादित्यान्नेषु प्राणस्य परमात्मत्वगमकोक्तिः प्राणाधिकरणञ्च	.... ❁	६३
अन्नफलकः शौव उद्गीथः	....	६४

II

सामान्यतः साम्नः साधुत्वेनोपासनम्	....	६८
पञ्चविधे साम्नि लोकादिदृष्टिप्रकाराः	....	७०–७४
सप्तविधे साम्नि शब्दविशेषदृष्टिः	....	७४
,, आदित्यदृष्टिः	....	७६
,, आत्मसंमितत्वातिमृत्युत्वोपासनम्	....	७९
गायत्रादिसामविशेषभक्तिषु प्राणादिदृष्टयः	....	८१–८६
सामान्यतः साम्भक्तिषु सर्वदृष्टिः	....	८६

अथ सामगानप्रभेदोपदेशः ८६
स्वरादिवर्णविशेषेषु इन्द्रादिदेवताविशेषीयत्वानुसंधानपूर्वकस्तोत्रगानम् ८९
आश्रमत्रयम् । तत्र ब्रह्मोपासनम् ९१
तदर्थप्रणवप्रशंसा ९२
प्रातस्सवनादिदेवताभूतवस्वादिसंबन्धिगानविशेषादि पृथिवीलोकादि
प्राप्तिफलकम् ९३–९६

III

मधुविद्या—आदित्ये वस्वादिदेवभोग्यमधुदृष्टिः ९६
तदर्थं तदीयप्राग्रस्यादिषु मधुनाड्यादिदृष्टिः ९७–१००
ऋग्यजुस्सामाथर्वगुह्यादेशनिष्पादितानाममृतानां वसुरुद्रादित्य-
मरुत्साध्योपजीव्यत्वम् १००–१०५
वसुरुद्रादिभावफलश्रुत्यर्थ विशेषविचारः १०३
ऊर्ध्व उदेत्येति वाक्यार्थविचारः १०६
असात् कार्याकार्यावस्थादित्यावस्थब्रह्मोपासनात् क्रममुक्तिः १०६–१०९
मध्वधिकरणम् ❀ ११०
अस्यां विद्यायां आदित्यवत् वस्वादीनामप्युपास्यत्वम् १११
वस्वादिभावापतिरूपफलस्वरूपशोधनम् ११२
वस्वादीनां विग्रहाभावशङ्का ११३
पूर्वमीमांसारेवत्यधिकरणम् ❀ ११४
तत्तोत्तरमीमांसादेवताधिकरणम् ❀ ११५
मध्वधिकरणदेवताधिकरण प्रयोजनम् ११९
गायत्रीविद्या—चतुष्पात्त्वषड्विध्याभ्यां ब्रह्मणि गायत्रीसादृश्यम् १२०
पूर्णत्वाप्रवर्तित्वगुणकमोक्षार्थतदुपासनम् १२५
तदद्वारोपासनम् .... ,,

ब्रह्मणि कौक्षेयज्योतिश्शरीरकत्वानुसंधानपूर्वकतद्दृष्टत्वश्रुतत्वोपासनम्.... १२८

ज्योतिरधिकरणम् १२९

शाण्डिल्यविद्या—मुक्त्यर्था १३०

सार्वात्म्यस्योपास्यत्वविध्यविधिविचारः १३१

तत्क्रतुन्यायवाक्यार्थः १३२

मनोमयत्वादिगुणविधानम् १३३

अनेकगुणविधानेऽप्यत्र वाक्यभेदाप्रसङ्गोपपादनप्रकाराः १३५–१३६

सर्वत्रप्रसिद्ध्यधिकरणम् १३७

कोशदिग्वत्सविद्या—पुत्रदीर्घायुष्यफलिका त्रैलोक्यात्मककोशविज्ञानम् १३९

पुरुषविद्या दीर्घायुष्ट्वफलिका पुरुषस्य यज्ञत्वम्, तदायुषः षोडशाधिक वर्षशतस्य सवनत्ररूपेण विभागः १४१–१४४

अशनायादौ दीक्षाद्यङ्गभावना १४४–१४५

एतद्विद्यानिष्ठेनान्तवेलायां प्रतिपत्तव्यम् १४६–१४९

पुरुषविद्याधिकरणम् १४९

अध्यात्मं मनसि, अधिदैवतमाकाशे च चतुष्पाद्ब्रह्मदृष्टिः १५०–१५१

आदित्ये ब्रह्मदृष्टिः १५२–१५४

IV

संवर्गब्रह्मविद्या—मुक्त्यर्था। जानश्रुत्युपाख्यानम् १५४

यस्तद्वेदेतिवाक्यार्थविचारः १५७–१६०

जानश्रुतिना रैकोपसर्पणम् १६१–१६४

वायुप्राणयोः संवर्गत्वम् १६५

भिक्षमाणस्य ब्रह्मचारिणो वचनम् १६७

तदर्थविचारः शौनकप्रतिवचनञ्च १६८

संवर्गद्वये कृतायत्वाद्यनुसंधानम् १६९

अपशूद्राधिकरणम् ❀ १७१–१७४

षोडशकलब्रह्मविद्या—जाबालसत्यकामोपाख्यानम् १७५

गुरुणा गौतमेन हारिद्रुमतेन चतुश्शतगवीनिराकरणम् १७७

ऋषभेण ब्रह्मणश्चतुष्कलैकपादोपदेशः १७९

तथा अग्निहंसमद्गुभिः पादत्रयोपदेशः १८०–१८१

गुरुणा उक्तषोडशकलब्रह्मविद्यायास्तथैवोक्तिः १८२

उपकोसलविद्या १८३

अनाशुषे उपकोसलाय अग्निभिः ब्रह्मोपदेशः १८५

गार्हपत्यादिभिः ब्रह्मविद्याङ्गभूत स्वस्वविद्यारूपाग्निविद्योपदेशः १८७

आचार्येण सत्यकामेनावशिष्टमुख्यांशोपदेशः १९१–१९२

अर्चिरादिगतिः १९३

अनियमाधिकरणम् ❀ १९४

अन्तराधिकरणम् ❀ १९५

वायोर्यज्ञत्वम् १९७

ऋत्विभिः मनोवाग्रूपवर्तनीसंस्करणम् १९८

लोकतो देवतावेदक्रमेण विरिष्टसंधानव्याहृतिहोममन्त्ररूपरसाविर्भावः २००

ब्रह्मर्त्विजः सर्वाभिरक्षकत्वम् २०२

V

प्राणविद्या—जैष्ठ्यश्रैष्ठ्यगुणकमुख्यप्राणोपासनम् २०४

मुख्यप्राणस्य श्रैष्ठ्योपपादिका आख्यायिका २०५

वागादिभिः स्वगतवसिष्ठत्वादेः मुख्यप्राणेऽर्पणम् २०८

सर्वाभेदाधिकरणम् ❀ २०९–२१०

प्राणस्य सर्वान्नेनान्नवत्त्वं अद्भिर्वासस्वित्वञ्च २११–२१२

महत्त्वप्रोप्सोर्मन्थाख्यं कर्म २१३

होमपूर्वकमन्थभक्षणप्रकारः २१४

सर्वान्नानुमत्यधिकरणम् ❁ २१६

सर्वान्नीनत्ववचनस्य वामदेव्योपासककर्तृकयोषिदपरिहारवचनवैषम्यम् ....२१६—२१७

श्रुतप्रकाशिकैकरस्यम् २१७

कार्यारव्यानाधिकरणम् ❁ २१८

नविलक्षत्वाधिकरणम् ❁ २१९

पञ्चाग्निविद्या—श्वेतकेतुप्रवाहणसंगमः २२०

प्रवाहणकृताः पञ्च प्रश्नाः २२१

श्वेतकेतुना पित्रे गौतमाय तदुक्तिः २२३

आगताय गौतमाय प्रवाहणेन प्रश्नोत्तरबोधनम्; पञ्चाग्न्युपदेशः २२५

अपां पञ्चमाहुतौ पुरुषवचस्त्वनिगमनम् २३०

देवयानम् । श्रद्धातप इत्युपासत इत्येतदर्थः ....२३१—२३२

तद्य इत्थंविदुरितिवाक्यार्थः ....२३१—२३३

पितृयाणमार्गः २३४

सोमराजभूतस्य प्रतिनिवृत्तिः २३५

दुर्निष्पपतर शब्दार्थविचारः २३८

तृतीयस्थाननिरूपणम् २४०

जायस्वम्रियस्वेतिवाक्यार्थविचारः २४१

अत्र क्रियासमभिहारविषये व्याकरणविमर्शः ....२४२—२४३

पञ्चाग्निविदः पातकिसंसर्गोऽप्यदोषः २४४

कार्माधिकरणम् ❁ २४५

आतिवाहिकाधिकरणम् ❁ २४७

तदन्तरप्रतिपत्त्यधिकरणम् ❁ .... ,,

दुष्कृत्याधिकरणम् ❁ २५०

तत्त्वाभाव्यापत्त्यधिकरणम् ❀ २५१
नातिचिराधिकरणम् ❀ .... "
अन्याधिष्ठिताधिकरणम् ❀ .... "
पराक्षेपपरिहारेण हिंसाशब्दार्थतत्त्वम् २५२
वैश्वानरविद्या २५३
कोनआत्माकिंब्रह्मेत्यर्थविवेकः २५४
कैकयाश्वपत्युपसर्पणम् २५६
प्राचीनशालादिविदितानां वैश्वानरसंबन्धैकैकावयवत्वम् २५८
प्रादेशमात्र पूर्णवैश्वानरात्मोपदेशः ; मुक्तिरूपफलञ्च २६३
प्रादेशमात्रशब्दार्थशोधनम् २६४
उपासकमूर्धादौ वैश्वानरमूर्धादित्वभावना २६५
जाठराग्नौ गार्हपत्यादिकल्पनया प्राणाद्याहुत्युपदेशक्रमः तज्जनित सर्वतृप्तिश्च २६७-२६८
सर्वपाप्मप्रदाहरूपं फलम् २६९
वैश्वानराधिकरणम् ❀ २७०
भूमज्यायस्त्वाधिकरणम् ❀ २७२
सद्विद्या—श्वेतकेतूपाख्यानम् २७४

VI

आदेशशब्दार्थविचारः श्रीवरदाचार्य व्यासार्यकृतः २७६
तदधिकविचारः २७९
६-७-१३, ४-१-१४, १२-२-१४, १०-२-४, २-२-७,
१०-५-४ मीमांसाधिकरणानि ❀ २८१-२९२
स्वयं प्रकारद्वयेन आदेशशब्द निर्वहणम् २८३
मृदाद्युदाहरणैः जगत्तत्कारणैक्यसंभवस्थापनम् २८५
वाचारम्भणवाक्ये परव्याख्यानिरासः २९३

सदेवसोम्येदमितिवाक्यार्थः २८९
असतः सज्जायत इत्यस्य निरासः २९१
तेजआदिसृष्टिः २९४
वियदधिकरणम् २९५
सर्वभूतसृष्टिः २९६
नामरूपव्याकरणं सत्तिवृत्करणम् २९७
अनेनजीवेनात्मनेति तृतीयान्तार्थविचारः २९९
अनुप्रवेशो नाम कः ? कस्य चेति ....३०३—३०५
उक्तत्रिवृत्करणस्य अग्न्यादिव्यष्टिनिदर्शनेन सत्यापनम् ....३०५—३०७
अन्नादेः त्रेधा परिणामः ३०८
दधिसर्पिर्न्यायेन सूक्ष्मस्थितिरन्नादौ ३०९
उपवासविधानेन मनसोऽन्नाप्यायितत्वशिक्षणम् .... ३१०—३१२
संज्ञामूर्तिक्लृप्त्यधिकरणम् ३१३
आरम्भणाधिकरणम् ३१५
प्रकृत्यधिकरणम् ३१८
उद्दालकेन श्वेतकेतुं प्रत्येव स्वप्नान्ताद्युपदेशः ३२०
पुरुषःस्वपितिनामेत्यत्र पुरुषशब्दार्थो विशिष्टोऽविशिष्टोवेति विचारः.... ३२१
मध्ये सन्मूलाइतिवाक्ये भाष्यटीकादिग्रहणेन अर्थशोधनम् ३२३
ऐतदात्म्यशब्दार्थः ३२६
पुरुषशब्दार्थविचारनिगमनम् ३३०
मनसः प्राणबन्धनत्वम् ३३१
अशनायापिपासाविशोधनेन तेजोबन्नानां मूलमूलिभावः ३३२
सुषुप्तावेवान्तेऽपि सत्संपत्त्या पुरुषस्य सन्मूलकत्वम् ३३५
सयएषोऽणिमाऐतदात्म्यमित्येतदर्थविशेषः ३३५

तत्त्वमसीतिप्रयोग तदर्थशोधनम् ३३६

सांप्रदायिकतत्त्वंपदविशिष्टपरत्वसमर्थनप्रपञ्चः ३३८

वागधिकरणम् ❁ ३४३

मनोधिकरणमध्यक्षाधिकरणञ्च ❁ ३४४

भूताधिकरणम्, परसंपत्त्यधिकरणञ्च ❁ ३४५

मधुरसन्यायेन सत्संपत्तावविवेकवचनम् ३४६

नदीसमुद्रन्यायेन अविवेकवचनम् ३४८

कर्मानुस्मृतिशब्दविध्यधिकरणम् ❁ ३४९

शास्त्रादिमात्रशोषणनिदर्शनेन जीवस्यामरत्वनिरूपणम् ३५०

न्यग्रोधबीजनिदर्शनेनाणोर्महदारम्भकत्वनिरूपणम् ३५१

उदकलीनलवणन्यायेन अन्तरात्मनोऽदृश्यत्वम् ३५२

अतिजनविसृष्टाभिनद्धाक्षवत् बन्धोन्मोचनसमर्थपुरुषोपदेश्यगन्तव्यदेशगतित्वम् ३५४

यावन्नविमोक्ष्य इत्येतद्वाक्यार्थः ३५४

अनारब्धकार्याधिकरणम् ❁ ३५६

इतरक्षपणाधिकरणम् ❁ .... ,,

देहाभिमानात्यन्तनिवृत्तेर्मरणदृष्टान्तेनोपपादनम् ३५७

अचोरस्यादाक्षता ३५८

सद्विद्यासर्वखण्डार्थसारकारिकाः ३६०

ईक्षत्यधिकरणम् ❁ ३६१

VII

भूमविद्या—नारदस्यानात्मवित्तया सनत्कुमारोपसदनम् ३६३

अर्वाचीनोपास्यपञ्चदशकपरिगणनम् ३६३

नारदाभीत ऋगादिनामनि ब्रह्मदृष्टिः ३६५

उपर्युपरि भूयःप्रश्ने तदस्तित्वकथनपूर्वं तत्र क्रमेण ब्रह्मदृष्टिविधिः....३६६—३७२

आसीनाधिकरणम् ❁ ३७३

प्राणाख्यस्य जीवात्मन उपदेशः ३८२

हन्तृव्यवहारत एव देहातिरिक्तात्मप्रसिद्धिसंभवोपपादनम् ३८३

प्राणोपासकस्यातिवादिता ३८५

सत्याख्यब्रह्मवेदिन एव वस्तुतोऽतिवादित्वम् ३८६

अत्र सत्यवदनरूपाज्ञविध्यसंभवनिरूपणपूर्वं सत्यशब्दस्य ब्रह्मपरत्व समर्थनम् ३८६–३८७

प्राणवित्कर्तृकातिवादपरवाक्यार्थविचारः ३८८

विज्ञानमननश्रद्धानिष्ठाकृतीनामावश्यकत्वम् ३८८–३९२

कृत्यर्थं सुखविवेकः । भूम्न एव सुखत्वम् ३९२–३९३

यत्ननान्यदिति भूमनिरूपकवाक्यार्थः ३९४

समानेषु पूर्वत्वादिति पूर्वमीमांसाधिकरणम् ❁ ३९५

प्रघट्टार्थवर्णनम् ३९६

भूमब्रह्मणो निराधारता ३९७

भूम्नः सार्वात्म्यम्, अहङ्ग्रहश्च ३९८-३९९

सर्वलोककामचाररूपमुक्तिफलकत्वम् ४००

आत्मतः सर्वोत्पत्तिः ४०१

मुक्तिविवेचनम् ४०२–४०३

अभावाधिकरणम् ❁ ४०३

भूमाधिकरणम् ❁ ४०५

VIII

दहरविद्या .... ,,

तत्स्थ तच्छब्दार्थविचारः ४०६

दहराकाशस्य वैपुल्योपपादनम् ४०८-४०९

दहरोपासकस्य सर्वभोग्यकत्वम्	....	४१०
दहराकाशस्य सत्यत्वम्, कामाधारत्वञ्च	....	४१२
सत्यकामशब्दार्थः	....	४१३
अनात्मज्ञस्याकामचारः	....	४१५
दहराधिकरणम् ❁	....	४१६
प्रदानाधिकरणम् ❁	....	४१७
संकर्षगतनानाप्रदानाधिकरणम् ❁	....	४१७
सत्यसंकल्पत्वविवरणम्	....	४१८
हृदयशब्दनिरुक्तिः	....	४२२
मुक्तपरिस्थितिः एष आत्मेति वाक्यार्थशोधनञ्च	....	४२३
सत्यशब्दार्थः	....	४२५
सेतुत्वादि	....	४२६
ब्रह्मलोकस्य ब्रह्मचर्यैकसाध्यत्वविवरण वैचित्री	....	४२८
ब्रह्मलोकगत—अर्णवसरोवृक्षपुरीस्थानादि	....	४३०
हृदयनाडीविशेषरश्मिद्वारा मुक्तस्यादित्यगतिः	....	४३२
प्रजापतिविद्या—प्रजापतिप्रचारितवाक्यम्	....	४३५
प्रजापतिविद्यायाः जीवविद्यात्वस्थापनम्	....	४३६
इन्द्रविरोचनयोः प्रजापत्युपसर्पणम्	....	४३७
ताभ्यां प्रजापत्युपदेशस्य प्रतिबिम्बात्मपरत्वग्रहः	....	४३८
उदशरावे द्वेधा तदवेक्षणप्रेरणम्	....	४४०
विरोचनस्य देहात्मग्रहणेनैव तृप्तता	....	४४२
अतृप्तेनेन्द्रेण पुनरुपसदनम्	....	४४३
ब्रह्मचर्यपूर्वं स्वप्नावस्थात्मग्रहणम्। तत्रापि दोषदर्शनम्	....	४४४
तथा सुषुप्तमवस्थाग्रहणदोषदर्शनादि	....	४४६

आदित एकशतवर्षब्रह्मचर्यानन्तरं कृत्स्नवाक्यतत्त्वोपदेशः	....	४४७
संपद्याविर्भावाधिकरणम् ❀	....	४४९
ब्राह्माधिकरणम् ❀	....	४५०
पुरुषोत्तमपरिचरणम्	....	४५१
आत्मन इन्द्रियव्यतिरिक्तस्य तन्निरपेक्षदिव्यचक्षुःसंपत्तिः	....४५२-४५३	
आत्मोपासन पार्यन्तिकफलम्	....	४५४
प्रजापतिविद्यायाः सर्वपरविद्याशेषत्वोपपादनम्	....	४५५
शरीरेभावाधिकरणम् ❀	....	,,
दहराधिकरणकतिपयसूत्रार्थः ❀	....	४५६
प्रजापतिविद्यायाः परविद्यात्वासंभवसमर्थनम्	....	४५७
विद्याङ्गमन्त्राः	....४५८—४६२	
अर्थान्तरत्वव्यपदेशाधिकरणम् ❀	...	४६०
ब्रह्मविज्ञानसंप्रदायः	....	४६२
कृत्स्नानुष्ठानसंग्रहेण गृहिणोपसंहारः	....४६३—४६४	
आप्रयाणाधिकरणम् ❀	....	४६४
कृत्स्नभावादितिसूत्रार्थः ❀	....	,,
अनावृत्तिसूत्रार्थः ❀	....	,,
शान्तिपाठः	....	४६५

ऋष्यादीनां नामानि

देवासुराः प्राजापत्याः १-२; ८-७
अङ्गिराः १-२-१०
बृहस्पतिः १-२-११
अथास्यः १-२-१२
बको दाल्भ्यः १-२-१३; १-१२-१
नैमिषीयाः १-२-१३
देवाः — मृत्युः १-४
कौषीतकिः १-५-२
शिलकः शालावत्यः १-८
चैकितायनो दाल्भ्यः ,,
प्रवाहणो जैबलिः १-८; ५-३
अतिधन्वा शौनकः १-९-३
उदरशाण्डिल्यः ,,
उषस्तिः चाक्रायणः १-१०
श्लावो मैत्रेयः १-१२
उद्दालक आरुणिः, गौतमः
३-११-४; ५-३-६; ५-११; ५-१७-६
शाण्डिल्यः ३-१४-४
महिदास ऐतरेयः ३-१६-७
घोर आङ्गिरसः ३-१७-६
कृष्णो देवकीपुत्रः ,,
जानश्रुतिः पौत्रायणः ४-१
रैकः ,,
शौनकः कापेयः ४-३
अभिप्रतारी काक्षसेनिः ,,
सत्यकामो जाबालः ४-४; ४-१०; ५-२
जबाला ४-४
हारिद्रुमतो गौतमः ,,
उपकोसलः कामलायनः ४-१०
गोश्रुतिर्वैयाघ्रपद्यः ५-२
श्वेतकेतुरारुणेयः ५-३; ६-१
पञ्चालाः ५-३
अमानवः ५-१०
प्राचीनशाल औपमन्यवः ५-११
सत्ययज्ञः पौलुषिः } ५-११
प्राचीनयोग्यः } ५-१३
इन्द्रद्युम्नो भाल्लवेयो } ५-११
वैयाघ्रपद्यः } ५-१४
जनः शार्कराक्ष्यः ५-११
बुडिल आश्वितराश्विर्वैयाघ्रपद्यः
५-११; ५-१६
अश्वपतिः कैकयः ५-११
गन्धाराः ६-१४
सनत्कुमारः स्कन्दः ७-१; ७-२६
नारदः ७-१
प्रजापतिः ३-११-४; ८-७; ८-१५
इन्द्रः ८-७
विरोचनः ,,
ब्रह्मा ३-११-४, ८-१५
मनुः ८-१५

श्रीः

छान्दोग्योपनिषत्

(सामवेदीयताण्डिशाखान्तर्गता)

ओं आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि, सर्वं ब्रह्मौपनिषदम्, माऽहं ब्रह्म निराकुर्याम्, मा मा ब्रह्म निराकरोत्, अनिराकरणमस्तु, अनिराकरणं मेऽस्तु, तदात्मनि निरते य उपनिषत्सु धर्माः ते मयि सन्तु, ते मयि सन्तु। ओं शान्तिः शान्तिः शान्तिः।

हरिः ओम्—ओमित्येतदक्षरमुद्गीथमुपासीत; ओमिति ह्युद्गायति।

श्रीः

श्रीश्रीनिवासपरब्रह्मणे नमः

येनोपनिषदां भाष्यं रामानुजमतानुगम्। रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम्॥

श्रीरङ्गरामानुजमुनिविरचितं प्रकाशिकाभिधानं भाष्यम्

अतसीगुच्छसच्छायमश्चितोरःस्थलं श्रिया। अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम्॥ १
श्रीशैलपूर्णवंशाब्धिकौस्तुभस्य जगद्गुरोः। श्रीमतस्तातपार्थस्य चरणौ शरणं वृणे[व्रजे] २
श्रीतातगुरुसेवाप्तवेदान्तयुगलाशयः। वात्स्यानन्तगुरुः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥ ३
यत्सेवावैभवाल्लब्धा मया परमहंसता। तमहं शिरसा वन्दे परकालमुनीश्वरम्॥ ४
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि।
छन्दोगोपनिषद्व्याख्यां करवाणि यथामति॥ ५

ब्रह्मविद्योपयिकं कर्माङ्गविषयम् आदौ उपासनमुपदिश्यते—**ओमित्येतत्**—

श्रीः

श्री श्रीनिवासपरब्रह्मणे नमः। श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः।

उपनिषद्भाष्यपरिष्कारः

अयमिह वृषशैले निस्तुलं वर्धमानः कलिकलुषमपोह्य प्रीणयन् प्राणिजातम्।
अपि गुरुपरिषन्मय्यञ्जसाऽस्मिन् सदुक्त्या प्रयतितुमनसि स्तां भूरिभव्यप्रसत्ती॥

ब्रह्मविद्याङ्गमन्त्रेषु प्रधानभूतं प्रणवमादौ प्रशंसितुं प्रवृत्तेयमुपनिषत् स्वयं सामोपनि-

---

श्रीवेंकटेश्वरप्राच्यविद्याकोशागारस्थ आन्ध्रतालकोशः **क.** ग्रन्थाक्षरादिमुद्रितकोशः **ख.** पूनामुद्रितः. **ग.** उक्तकोशागारस्थं ग्रन्थाक्षरकोशान्तरम्. **घ.**

तस्योपव्याख्यानम् ॥ १ ॥

उपासीत । **उद्गीथम्** उद्गीथभक्त्यवयवभूतम् ओमित्येतदक्षरमुपासीतेत्यर्थः । ओमित्यक्षरस्य उद्गीथत्वासंभवेन सामानाधिकरण्यार्थमुद्गीथपदस्य वा अक्षरपदस्य वा मुख्यार्थत्यागेन लक्षणायां समाश्रयणीयायाम्, 'एतस्यैवाक्षरस्योपव्याख्यानम्' इत्युपसंहारानुगुण्यात्, उद्गीथशब्दस्य जघन्यतया च तस्यैवोद्गीथावयवलक्षकत्वं युक्तम्, न तु मुख्यस्य ओमित्येतदक्षरमित्यस्य ओङ्कारावयवयुक्तोद्गीथलक्षकत्वं युक्तमिति द्रष्टव्यम् । स्वयमेव श्रुतिरोङ्कारस्योद्गीथशब्दप्रतिपाद्यत्वे हेतुमाह **ओमिति ह्युद्गायति** । लोक ओमिति ह्यारभ्यैवोद्गायति । अत उद्गीथावयवत्वादुद्गीथशब्दप्रतिपाद्यत्वं युक्तमित्यर्थः । **तस्योपव्याख्यानम्** । **तस्य** ओमित्यक्षरस्य। **उपव्याख्यानम्** एव [1]मुपासनम्, एवं विभूतिः, एवं फलमित्यादिकथनम् । क्रियत इति शेषः ।

1. इदं ख.

त्वात् उद्गीथरूपं प्रणवं प्रस्तुत्य तदनुबन्ध्युपासनान्युपदिश्य तन्महिमानं दर्शयति । तत्राष्टप्रपाठके छान्दोग्ये आदिमं प्रपाठकद्वयं सामाश्रितनानोपासनप्रधानम् । अनन्तरेषु तु प्रपाठकेषु अनेकाः ब्रह्मविद्याः विधास्यन्ते । तदौपयिकत्वादादौ एतदुपदेश इत्याशयेनाह **ब्रह्मविद्यौपयिकमिति** । **कर्माङ्गविषयमिति** । कर्मकाण्डात् ज्ञानकाण्डे पुरुषमाकर्षन्ती उपनिषत् कर्मप्रवणं तमादौ कर्माङ्गानुबन्ध्युपासनोपदेशेन आवर्ज्य अथ स्वतन्त्रब्रह्मोपसनान्यादेष्टुमिच्छतीति च भावः । **उद्गीथभक्त्यवयवेति** । एकैकस्यापि साम्नः पञ्च भक्तयः = भागाः—हिङ्कारः, प्रस्तावः, उद्गीथः, प्रतिहारः, निधनमिति । वक्ष्यते चोपरि, 'पञ्चविधं सामोपासीत' इति; 'सप्तविधम्' इति च । तत्रोद्गीथभक्तिर्मध्यमा । सा च नियमेन प्रणवप्रक्रमेणैव गीयत इति अष्टाक्षरमन्त्रस्येव उद्गीथस्य प्रणवः प्रथमावयव इति । **जघन्यतयेति** । असञ्जातविरोधित्वेन उपक्रमप्राबल्यस्योपक्रमाधिकरण(पू. मी.) सिद्धत्वादिति भावः । इदमुपलक्षणम्—प्रणवयुक्तपूर्णोद्गीथोपासनविधित्वे उद्गीथे प्रणवनैयत्येन 'ओमित्येतदक्षरम्' इत्यस्य वैयर्थ्याच्चेति ध्येयम् । अत एव उद्गीथे प्रणवदृष्टिर्न विधातुं शक्या । प्रणवस्य तद्युक्तपूर्णोद्गीथापेक्षया निकृष्टत्वात्; उत्कृष्टे निकृष्टदृष्टेरयोगात् । नापि प्रणवे उद्गीथदृष्टिः; उद्गीथ इत्युपासीतेति इतिशब्दाभावेन उद्गीथशब्दस्योद्गीथत्वपर्याप्त्यधिकरणपर्यन्तार्थाविवक्षया उद्गीथत्वाश्रयमात्रविवक्षया संभवतः सामानाधिकरण्यस्य त्यागायोगात् । कर्माङ्गे अनङ्गभूतकिञ्चिद्दृष्टेरेव, औद्गात्रेऽत्र उद्गीथेऽन्यदृष्टेरेव च बहुलमुपरिवर्णनेन तद्दृष्टित्यागायोगाच्च ॥ एतावता उपास्य उद्गीथांशो निर्दिष्टः । उपास्यगुणाः, तत्प्रशंसा, उपासनफलमितीदं सर्वं वक्ष्यते प्रथमे खण्डे । तदुच्यते **तस्योपव्याख्यानमिति** । **क्रियत इति शेष इति** । 'अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ति' इत्यनुशासनबलात्, **भवतीत्युपसंहारानुरोधाच्चान्यथाऽध्याहारेऽपि** अत्रैवार्थेतात्पर्यादेवम् ॥

एषां भूतानां पृथिवी रसः, पृथिव्या आपो रसः, अपामोषधयो रसः, ओषधीनां पुरुषो रसः, पुरुषस्य वाग् रसः, वाच ऋग् रसः, ऋचः साम रसः, साम्न उद्गीथो रसः ॥ २ ॥[1]

स एष रसानाँ रसतमः परमः परार्ध्योऽष्टमो [2]यदुद्गीथः ॥ ३ ॥

कतमाकतमर्क्, कतमत्कतमत् साम, कतमःकतम उद्गीथ

1. इयं २ संख्या माध्वे 'य उद्गी थ' इत्युपरितन वाक्यानन्तरम्। एवमुपरि वाक्यगणनायां भेदो दृश्यते। वस्तुत इयं संख्या न वाक्यभेदादिनिर्धारणोपयोगिनीति सर्वत्र अश्रद्धेयैव। 2. य उद्गीथः। मा.

एषां —। एषां स्थावरजङ्गमात्मकभूतानां पृथिवी **रसः** परायणम्। भूतानां पृथिव्याधारकत्वादिति भावः। **पृथिव्या आपो रसः**। तस्याः जलप्रकृतिकत्वादिति भावः। **अपामोषधयो रसः**। तत्परिणामत्वादिति भावः। **ओषधीनां पुरुषो रसः**। अन्नपरिणामत्वात् शरीरस्येति भावः। **पुरुषस्य वाक् रसः**। वाचोऽत्युपकारकत्वादिति भावः। **वाचः ऋक् रसः**। ऋचां गम्भीरार्थकत्वादिति भावः। **ऋचः साम रसः**। गीतिसारत्वात् साम्नामिति भावः। **साम्न उद्गीथो रसः**। श्राव्यत्वात् सार इत्यर्थः। अत्रोद्गीथशब्देन उद्गीथावयव ओङ्कार उच्यते।

स एषः—। **स एषः** ओङ्कारः। **रसतमः परमः** भूतादीनामुत्तरोत्तररसानामतिशयितो **रसः**। इतोऽधिको रसो नास्तीत्यर्थः। **परार्ध्यः परस्य** ब्रह्मणः **अर्धं** स्थानमर्हतीति परार्ध्यः। 'छन्दसि च' इति यत्। ब्रह्मवत् ओङ्कारस्याप्युपास्यत्वादिति भावः। **अष्टमः**। अयमुद्गीथः, **पृथिवी रसः पृथिव्या आपो रस** इति परिगणनायामष्टम इत्यर्थः। **यदुद्गीथः**। य उद्गीथ इत्यर्थः।

वाच ऋग्रसः, ऋचः साम रसः, साम्न उद्गीथो रसः इति ऋक्सामोद्गीथानां प्रस्तुतत्वात् तानि विमृशति **कतमा** — । कतमाकतमेति वीप्सा आदरार्था। का ऋगित्यर्थः। एवमुत्तरत्रापि **कतमत्कतमत् सामेत्यादौ**

परायणमिति। परत्वं यज्ञादिसत्कर्मान्वयापादकत्वादिनोत्कृष्टत्वात्। अर्थात् **एषां भूतानां**त्यादिना जन्तोः भूलोके पुरुषरूपेण जनित्वा उद्गीथगानमुपादेयतममित्युक्तं भवति।

तानि विमृशतीति। उद्गीथविमर्श एव प्रकृतः। अथापि तत्र ऋचः साम्नश्च निविष्टत्वस्य वक्ष्यमाणत्वात् तद्विमर्शोऽपि कृतः। तथाच ऋचां साम्नां तदवयवभूतोद्गीथव्यक्तीनाञ्चानन्तत्वात्, उद्गीथस्य शाखाभेदेन स्वरभेदादप्यनेकत्वात् कीदृगृगाख्यकीदृशसामाख्यवर्किरूपोद्गीथ-

इति विमृष्टं भवति ॥ ४ ॥

वागेवर्क् प्राणः साम, ओमित्येतदक्षरमुद्गीथः ॥ ५ ॥

तद्वा एतन्मिथुनम्, यद् वाक् च प्राणश्च, ऋक् च साम च।
तदेतन्मिथुनम् ओमित्येतस्मिन्नक्षरे सँसृज्यते ।

द्रष्टव्यम् । **इति विमृष्टं भवति** । [1]विमर्शः कृतो भवतीत्यर्थः । विमर्शनिष्पन्नमर्थमाह **वागेव — उद्गीथः** । ऋचो वागिन्द्रियोच्चारणसाध्यत्वात् वागेव ऋक्; सामगानस्य प्राणनरूपश्वासधारणसाध्यत्वात् प्राण एव साम; उद्गीथभक्त्यवयववत्वात् ओमित्यक्षरमेवोद्गीथ इत्यर्थः ।

तद्वा — प्राणश्च । स्त्रीलिङ्गशब्दवाच्यतया वाचः स्त्रीत्वम्, प्राणस्य पुल्लिङ्गशब्दवाच्यतया पुंस्त्वमिति भावः । **ऋक् च साम च** । अत्रापि तदेतन्मिथुनमित्यनुषज्यते । उक्तरीत्या वाक्प्राणयोर्मिथुनत्वेन तदभिन्नत्वेन ऋक्सामयोरपि मिथुनत्वं द्रष्टव्यम् । **तदे – संसृज्यते** । ऋक्सामात्मकं तदेतन्मिथुनं ओमित्येतस्मिन्नक्षरे उद्गीथावयवभूते संसृज्यते । उद्गीथस्य ऋगारूढसामभक्तिरूपत्वेन ऋक्सामरूपतया उद्गीथावयवप्रणवस्य ऋक्सामाभ्यां संसृष्टत्वात् तदात्मकमिथुनेन संसृष्टत्वमित्यर्थः । वाक्प्राणात्मकमिथुनाध्यासविशिष्टर्क्सामसंसृष्टतया उद्गीथावयवप्रणवोपासनं कर्तव्यमित्यर्थः ।

1. प्राचीनैर्विमर्शः. क.

विषयकमुपासनमत्र विवक्षितमिति विमर्श क्रियत इति । **विमृष्टं भवती**त्यत्र भावे क्तप्रत्ययाश्रयणे विमर्शो भवतीत्यर्थः सिध्येत् । तात्पर्यातिशयादरेण तु विमर्शः कृतो भवतीत्युक्तम् । अयमर्थः—रसतमत्ववर्णनावसरे, 'वाचः ऋग्रसः ऋचस्साम रसः साम्न उद्गीथो रस' इति निर्देशस्वारस्यात् वाक्कार्येषु शब्देषु ऋचो रसत्वोक्तौ ऋक्सामान्यं रस इत्येव सिध्यति । अतः तत्सामान्यारूढसामसामान्यं तदवयवभूतोद्गीथसामान्यञ्च तत्रैव दर्शितं भवतीति सर्वविषयकत्वमुपासनस्य तत एव विमृष्टं भवतीति । तस्मात् कतम उद्गीथ उपास्य इत्यनुक्त्वा तत्र रसतमत्वगुणविधानारम्भः कथमिति न शङ्क्यम्; अत्रैव एकहेलया सर्वज्ञापनादिति । क्वचित् कोशे, 'प्राचीनैर्विमर्शः कृतो भवति' इति पाठः । **वागेव ऋगि**ति । सर्वापि हि ऋक् वाक्कार्या । सर्वं साम प्राणव्यापारसाध्यम् । यादृशतादृशस्वरकं ओमित्यक्षरत्वाक्रान्तं सर्वं सामावयवभूतमुद्गीथ इति भावः ।

अथात्र सर्वोद्गीथावयवप्रणवे कामादिगुणविधानमारभ्यते **तद्वा** इत्यादिना । कामादिर्मिथुन-

यदा वै मिथुनौ समागच्छतः, आपयतो वै तावन्योन्यस्य कामम्॥ ६॥

आपयिता ह वै कामानां भवति, य एतदेवंविद्वानक्षरमुद्गीथमुपास्ते॥ ७॥

तद्वा एतदनुज्ञाक्षरम्; यद्धि किञ्चानुजानाति, ओमित्येव तदाह। एषो एव समृद्धिः, यदनुज्ञा।

समर्द्धयिता ह वै कामानां भवति, य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥ ८॥

यदा — कामम्। यदा दम्पती मिथुनीभूतौ ग्राम्यधर्माय संसृज्येयाताम्, तदा अन्योन्यकामप्रापकत्वं प्रसिद्धमित्यर्थः। **मिथुनाविति** पुंस्त्वद्विवचने छान्दसे। ततश्च ओङ्कारोऽपि स्वसंसृष्टमिथुनेन कामप्रापक इति भावः। तदुपासकोऽप्युद्गाता स्वोपास्यौङ्कारवत् यजमानकामप्रापक इत्याह **आपयिता — मुपास्ते।** कामाप्त्यादिविशिष्टोद्गीथावयवोपासनस्य यजमानगतकामाप्तिरेव फलमित्यर्थः।

तद्वा एतदनुज्ञाक्षरम्। ओङ्कारोऽनुज्ञाक्षरमित्यर्थः। तदेवोपपादयति **यद्धि — तदाह।** लोके हि अनुज्ञां प्रयच्छन् पुरुषः ओमित्यनुजानातीत्यर्थः।

एषो — ज्ञा। उशब्दः प्रसिद्धौ। लोके समृद्धिमान् हि ओमित्यनुज्ञां प्रयच्छति। अतोऽनुज्ञारूपस्य ओङ्कारस्य समृद्धिमूलत्वात् अनुज्ञारूप ओङ्कार एव समृद्धिरित्यर्थः। एवं समृद्धिगुणविशिष्टौङ्कारोपासनस्य फलमाह **समर्द्धयिता — मुपास्ते।** यजमानस्य कामसमृद्धिं करोतीत्यर्थः।

संसर्गाधीना। साम्नि ततो मिथुनसंसर्गो भाव्यः। तत्र च ऋक्सामसंसर्ग एवास्ति। तत्र साम्नः पुंस्त्वाभावान्मिथुनं दुरुपपादम्। अतस्तत्कारणवाक्प्राणयोर्मिथुनत्वं ऋक्सामयोस्तदध्यासञ्च प्रतिपाद्य ईदृशमिथुनसंसृष्टत्वाद् भवति कामाप्तिरिति ज्ञापयितुं वाक्प्राणादिप्रस्तावः।

यजमानेति। मूले **आप्नेत्यनुक्त्वा आपयिता** इति निर्देशः, 'आर्त्विज्यमित्यौडुलोमिः' इति सूत्रार्थं दर्शयतीति ध्येयम्।

समृद्धिमान् हीति। समृद्धिः विद्याधनादिसंपत्तिः, यद्वा कार्यनिर्वाहसामर्थ्यपौष्कल्यम्। तादृशो हि प्रार्थितश्चेत्, ओमित्यनुजानातीति। एवमनुज्ञाया अभावे कार्यानिष्पत्त्या समृध्यभावात् अनुज्ञा समृद्धिः इत्यापि भाव्यम्। **काममसमृद्धिमिति।** पूर्वमपेक्षितकामप्राप्तिरुक्ता। इदानीमुपायान्तरलभ्यस्य फलस्य समृद्धिरुक्तेति भेदः।

तेनेयं त्रयी विद्या वर्तते, ओमित्याश्रावयति ओमिति शँसति ओमित्युद्गायति एतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥

तेनोभौ कुरुतो यश्चैतदेवं वेद, यश्च न वेद; नाना तु विद्या चाविद्या च; यदेव विद्यया करोति श्रद्धयोपनिषदा, तदेव वीर्यवत्तरं भवति ।

उपास्यमोङ्कारं प्ररोचनार्थं स्तौति — **तेनेयं** — । **तेन** प्रकृतेन उपास्येन ओङ्कारेण **त्रयी विद्या** त्रयीविहितं कर्म प्रवर्तत इत्यर्थः । तदेवोपपादयति **ओमिति** — **गायति** । ओङ्कारपूर्वकत्वादाश्रवणशंसनोद्गानानामित्यर्थः । किमिति ओङ्कारपूर्वकमेवाऽऽश्रवणादिकं क्रियत इत्यत्राह—**एतस्यैव** — **रसेन** । **रसेन** सारभूतेन **महिम्ना** माहात्म्येन युक्तस्यैतस्य ओङ्कारलक्षणस्य अक्षरस्य **अपचित्यै** पूजार्थमित्यर्थः ।

'ननु अनेवंविद्भिरपि कर्मणोऽनुष्ठीयमानत्वदर्शनात् विद्यावैयर्थ्यम्' इत्याशङ्क्य, 'सत्यं विद्वद्भिरविद्वद्भिरपि लोके ओङ्कारेण कर्मानुष्ठीयते — तथापि विद्याविद्ये विलक्षणफले; विद्यया क्रियमाणं हि कर्म वीर्यवत्तरं भवति; अतादृशं तु न तथा' इत्याह **तेन** — **भवति** । **नाना तु** विलक्षणफले इत्यर्थः । **यदेव** । कर्मेत्यर्थः । **विद्या** उपासनम् । **श्रद्धा** आस्तिक्यबुद्धिः । उपनिषच्छब्देन

उपास्यमिति । उपासनस्य विधीयमानत्वात् प्ररोचना युक्तेति दर्शयितुमिदं पदम् । **तेनेय**मित्यत्र **तेने**तिपदं सोपासनप्रणवपरामर्शीति, 'समाहाराद्' इति पूर्वपक्षसूत्रं उक्तम् । सिद्धान्ते तु तत्र न निर्भरः; उद्गीथावयवभूतप्रणवस्यैवोपासनसंस्पर्शात् स्ववाक्योक्ताश्रवणाद्यन्वयिशुद्धप्रणव एव तदलाभात् । **तद्वा एतदनुज्ञाक्षर**मिति पूर्ववाक्ये तच्छब्दस्य केवलप्रणवपरत्वात् । **तेनोभौकुरुत**इत्युत्तरवाक्येऽप्युपासनविशिष्टस्यापरामर्शाच्च । तत्र हि **तच्छब्द**: विद्वदविद्वदुभयान्वयिप्रणवमात्रपरः । **त्रयी**ति । आश्रवणे शंसने उद्गीथे चाध्वर्योर्होतुरुद्गातुश्च क्रमेण कर्तृत्वात् तत्तद्वेदरूपत्रय्याः प्रणवाधीना वृत्तिरिति ।

इत्याशङ्क्येति । अत्र मूले **तेनोभौ** इत्यादिराशङ्कामन्थः । **नानात्व**त्यादि. परिहारमन्थ इति शाङ्करे प्रतीयते । **तु**शब्दोऽपि तदा स्वरसः । एवं वाऽस्तु । उद्गन्था शङ्का ; तत्परिहर्तुर्वाक्यमेव **तेने**त्यादिकं सर्वमिति वाऽस्तु इति गूढोऽभिसंधिरिह भाव्यः ।

विलक्षणफले इति । विद्याकर्मणोः स्वरूपभेदस्य स्पष्टत्वात् **नाने**ति पदं न तत्परम् । किंतु फलद्वारा पृथक्त्वपरमिति भावः । एष एव तु नानापदार्थः, 'पृथग्व्यप्रतिबन्धः फलम्' इति सूत्रे दर्शितः । इदमेव विव्रियते **यदेव विद्ययेति** वाक्येन । अत्र विद्यया श्रद्धयोपनिषदा

इति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥ १० ॥

[1]इति प्रथमाध्याये प्रथमः खण्डः ।

---

1. एतदनन्तरं माध्वे—, 'अथ ह य एवायं मुख्य प्राणः तमुद्गीथमुपासीत; तस्यैतरैः प्राणैरुपव्याख्यानं भवति' इत्यधिकम् ।

उपनिषज्जन्यं ब्रह्मात्मकत्वज्ञानमुच्यते । कर्मणो वीर्यवत्तरत्वं नाम प्रबलकर्मान्तराप्रतिबद्धफलकत्वम् ॥

इति—भवति । रसतमत्वकामासिसमृद्धिगुणकत्वादिभिरुक्तप्रकारैर्विशिष्टमभिहितमुपासनं सर्वमेतदक्षरविषयकमेवेत्यर्थः । ततश्चोपास्यभेदशङ्का न कार्येति भावः॥

करोतीत्यनुक्त्वा विद्यामात्रस्य प्राह निर्देशः तस्या एव मुख्यत्वम्, श्रद्धोपनिषदोस्तु तदुपयोगित्वमिति ज्ञापनाय । केचित् कर्मकाण्डश्रद्धालवः उपनिषदामूषरप्रायतां मन्यन्ते । अतथाभूय, अस्ति कश्चिदौपनिषदः परमपुरुष इति च विश्रस्य, तदर्थभक्तियोगाङ्गकर्माणि कर्मकाण्डकथितप्रकारेण प्रागनुष्ठितैरन्यादृशैः कर्मभिरवरदेवतार्थैः कथमपि प्रतिबद्धफलानि मा भूवन्निति श्रद्धया यद्येतादृग्विद्यया कर्म करोति, तदा तद् वीर्यवत्तरं भवतीति विशिष्टार्थः । ब्रह्मात्मकत्वज्ञानार्थकोपनिषत्पदेन 'ब्रह्मार्पण' मितिरीत्या कर्म कुर्वतां विषये ईदृशविद्यानामुपयोग इति दर्श्यते ।

अत्र विद्ययेतितृतीया कस्मिन्नर्थे इति चेत्—विद्यापदस्य कर्मानुष्ठानोपयोग्यर्थज्ञानपरत्वाभावात् उद्गीथादिविद्यापरत्वात्, कर्मणश्च क्रतोरुद्गीथादिनिर्वर्त्यत्वेऽपि तद्विद्यानिर्वर्त्यत्वाभावात् इत्थंभूतलक्षणे तृतीया । **यश्च वेदे**ति प्रागुक्तरीत्या यत् विद्योपलक्षितः करोतीति विद्या पुरुषविशेषणम् । विद्यया सह करोतीति सहार्थे वा । अथवा उपपदविभक्तेः कारकविभक्तिर्बलीयसीति करण एव । करणत्वञ्चेदं फलकरणतारूपमिति यथाश्रयभावाधिकरणसिद्धान्त**भाष्यानुसारिसारावल्यादि**सिद्धम् । यद्यपि विद्यया करोतीति कर्मनिरूपितं करणत्वमेव बुध्यते, अथाप्यस्याः कर्मनिर्वर्तकत्वाभावात् कर्मगतशक्तगतिशयाधायकत्वरूपानुग्राहकत्वात्मकं तदिति फलकरणत्वमेव तद्भवति । वीर्यं हि नाम कार्यानुकूला शक्तिः । तस्याः प्रतिबन्धकनाश्यत्वं प्रसिद्धम् । वीर्येऽतिशयश्च सत्यपि प्रतिबन्धके कार्योपधायकत्वम् । स एव वीर्यातिरेको विद्याफलमिति ॥ अत्र यदेव विद्ययेति वाक्यं स्यात् कर्माङ्गाश्रितसर्वविद्यानां वीर्यातिरेकफलविधानार्थम् । 'आश्रवणशंसनवत् उद्गानस्यापि विद्यां विनैव कर्मोपकारकत्वात्, सर्वयजमानकामसमृद्धेः अन्यतोऽपि सिद्धेश्च कर्मकाण्डोक्ताधिकं न किमपि वक्तव्यमस्ती'त्याशङ्कायाम्, उपनिषदुक्ता विद्या वीर्यातिरेकहेतुरिति सामान्येन तत्परिहारार्थत्वादस्य वाक्यस्य । अतो यत्र विशिष्य फलान्तरमुक्तम, तत्र तद्वा एतद्वा फलम्; अन्यत्रैतदेवेति ।

उक्तप्रकारैर्विशिष्टमिति रसतमत्वादिसर्वगुणविशिष्टोद्गीथोपासनमेकमिदमित्युक्तमत्र शाङ्करेऽपि ।

एतत्खण्डान्तर्गतवाक्यविषयाणि अधिकरणानि उपन्यस्यन्ते—

(१) अङ्गपादे—'स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः' इत्येवञ्जातीयकानां वाक्यानाम्, 'इयमेव जुहूः, स्वर्गो लोक अहवनीयः' इत्यादिवाक्यवत् स्तावकत्वमेव, न तु रसतमत्वादिलक्षणोपास्यगुणसमर्पकत्वम्। 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति नोपासनं विधीयते। उद्गीथविधिसिद्धानुष्ठानौपयिकज्ञानसामान्यवाची हि उपासनशब्दः। अतोऽनुवाद एव। ततश्च रसतमादिवाक्ये समभिव्याहृतविध्यभावेन तदेकवाक्यतया स्तावकत्वाभावेन उद्गीथपदोपस्थापितक्रतुप्रकरणगतोद्गीथविध्येकवाक्यतयैव रसतमादिवाक्यानां स्तावकत्वम्। न च स्तावकवाक्यानां स्तुत्यविधिसमभिव्याहारनियमोऽस्ति। 'एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानीतराणि' इत्यतिदिष्टार्थवादेषु व्यभिचारात्॥ अस्तु वा उद्गीथमुपासीतेत्युपासनविधिः; तदेकवाक्यता च रसतमादिवाक्यानाम्— तथापि रसतमादिवाक्यानां नोपासनविषयसमर्पकत्वेनैकवाक्यत्वम्, 'ओमित्येतदक्षरम्' इत्यनेनैव

एतत्खण्डेति। उपासनस्वरूपसत्ता, तद्विषयभूतोपास्यस्वरूपम्, उपासनफलम्, फलोत्पत्तिकालः इतीमानि क्रमेण व्युत्पादयितुमर्हाणीति विमृश्य अधिकरणानामुपन्यसने व्यत्यासादरः। एतदधिकरणचतुष्टयवत्, "यदेव विद्ययेति हि" इति सूत्रमपि भाव्यम्। उद्गीथविद्यासंबन्धीनि अधिकरणान्तराणि तु अनन्तरखण्डादौ उपन्यसिष्यन्ते।

अत्र स्तुतिमात्राधिकरणश्रीभाष्ये, उपासनविधिरेव नेति पूर्वपक्षः, उपासनविधिसत्त्वात् रसतमत्वादिः उपास्याक्षर इति सिद्धान्तश्च स्फुटः। एवञ्च सूत्रादिगतिपरामर्शे अत्र चतुर्थपादे, 'विद्यैव तावदुपनिषदि विधीयमाना काचिन्नास्ति, यद्विषये विशेषविचारस्तृतीयपादे' इति आपातजैमिनीयानुयाय्याशङ्कायां परमपुरुषार्थहेतुभूताः भक्तिविद्याः, "पुरुषार्थोऽतः" इत्यधिकरणेन स्थापयित्वा अथोद्गीथविद्यादिकर्माश्रितोपासनापलापिनां मतिमपाकर्तुं स्तुतिमात्राधिकरणप्रवर्तनमिति ज्ञायते। एवमुपासनविध्यभावशङ्कापरिहारार्थमेव च, 'भावशब्दाच्च' इति सूत्रमप्यत्र— अथापि अत्राधिकरणे श्रीभाष्यादौ उद्गीथमुपासीतेति उपासनविधिवाक्यमधिकृत्य न विचारः, किन्तु रसतमादिवाक्यमेवेति हेतोः, उपासनविधिसद्भावेऽपि रसतमत्वादि न विधेयमित्यपि पूर्वपक्षः, विधेयमिति च सिद्धान्त इति भावप्रकाशिकायां पक्षद्वयमवलम्ब्याधिकरणरचना दर्शिता। तदनुसारेणात्रापि, 'नोपासनं विधीयते,' 'अस्तु वा—उपासनविधिः' इति पक्षद्वयमुपन्यस्तमिति ध्येयम्।

एतद्ब्राह्मणान्येवेति। सन्ति चातुर्मास्यानि। तत्र चत्वारि पर्वाणि वैश्वदेववरुणप्रघास साकमेधशुनासीरीयाख्यानि। तत्र प्रथमे वैश्वदेवपर्वणि अष्टौ हवींषि विहितानि। तत्रार्थवादः,

उपास्य[1]लाभात्। अपितु उपास्योद्गीथस्तावकत्वेनैव; उपास्योद्गीथमादाय स्तुतिमात्रस्योपलम्भात् इति 'स्तुतिमात्रमुपादानादिति चेत्' इति सूत्रखण्डेन पूर्वपक्षं कृत्वा, 'नापूर्वत्वात्' इति सूत्रखण्डेन च, 'भावशब्दाच्च' इति सूत्रेण च सिद्धान्तः कृतः।

अयमर्थः — उद्गीथे रसतमत्वादीनां मानान्तरप्राप्तत्वेन अनुवादमुखेन स्तुत्यसंभवात्; 'इयमेव जुहूः' इत्यादौ जुहूविधेः संनिहिततया तदेकवाक्यत्वेन तत्स्तावकत्वसंभवेऽपि क्रतुप्रकरणगतोद्गीथविधेरसंनिहिततया तदेकवाक्यत्वाभावात्; 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इत्यादिवत् तदेकवाक्यताकल्पकवचनान्तराभावात्। 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति संनिहिते विस्पष्टविधिप्रत्ययप्रयुक्ते क्रियावाचिनि भावशब्दे विद्यमाने तदेकवाक्यतामनादृत्य क्रतुप्रकरणगतोद्गीथविध्येकवाक्यताकल्पनस्यान्याय्यत्वात्।

ननु संनिहितोपासनविध्येकवाक्यत्वेऽपि उपास्योद्गीथस्तावकत्वेनैव रसतमादिवाक्यानामेकवाक्यताऽस्तु; न तु उपास्यसमर्पकत्वेनेति चेन्न — उपासनविषयसमर्पकतया प्रवृत्तिविशेषक [र] त्वे संभवति व्यर्थप्रायस्तुतित्वकल्पनाया [2]अन्याय्यत्वात्।

अतो रसतमत्वादिकमप्युपास्यमेव। ततश्च रसतमत्वादिविशिष्टतयैवोद्गीथोपासनं कर्तव्यं [3]तत्तत्फलार्थिभिरिति स्थितम्॥

(२) तथा [गुणोपसंहारपादे?] — 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यादौ निर्विशेषसामान्येन व्यवहारासंभवात् विशेषाकाङ्क्षायां तत्तच्छाखागतानामेवोद्गीथव्य-

1. उपास्यस्य ख.। 2. अयुक्तत्वात् ख. 3. तत्फलार्थि. ख.

,वार्त्रघ्नानि वा एतानि हवींषि' इति। तत्राऽऽग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं पौष्णं चरुम्' इत्यादियुक्तानि पञ्च हवींषि वरुणप्रघासेऽपि विहितानि पञ्चसङ्ख्याः। तत्रेदं वाक्यं श्रूयते, एतद्ब्राह्मणानीति। वैश्वदेवपर्वगतानि हवींषि यादृशब्राह्मणवाक्ययुक्तानि, वरुणप्रघासगतानि इमान्यपि तद्ब्राह्मणकान्येवेति तदर्थः। तत्र ब्राह्मणशब्देन अर्थवादस्याङ्गविधीनाञ्च ग्रहणमिति (पू. मी. ७-१-४.) सिद्धान्तितम्। सर्वथा अर्थवादस्य वैश्वदेवगतस्य वरुणप्रघासविधिभिरेकवाक्यतयाऽन्वयस्य तत्र पूर्वपक्षिसिद्धान्त्युभयेऽङ्गीकृतत्वात् तद्वदेव क्रतुप्रकरणगतोद्गीथविधिसमभिव्याहारस्य रसतमादिवाक्येऽभावेऽपि तदेकवाक्यता भवितुमर्हतीति भावः। तत्र एतद्ब्राह्मणानीति विशेषवचनबलात् व्यवहितयोरेकवाक्यत्वं युक्तम्; न त्वत्र, गमकाभावादिति सिद्धान्ताशय उपरि दर्शयिष्यते।

क्तीनां संनिहितत्वात् तन्मात्रविषयत्वमेवोद्गीथश्रुतेः युक्तम्। ततश्च ताण्डिशाखागत-रसतमत्व – कामादि – हिरण्मयपुरुष – आकाशादिदृष्टिविशिष्टोपासने ताण्डि-शाखागतोद्गीथव्यक्तेरेव क्रतुमध्यप्रयुक्ताया उपास्यत्वम्, न तु शाखान्तरगतोद्गीथ-व्यक्तेः। न च सर्वशाखागतोद्गीथानामैक्यं शङ्क्यम् – स्वरादिभेदेनोद्गीथव्यक्तीनां भिन्नत्वात्। न चोद्गीथश्रुतेः संकोचलक्षणबाधप्रसङ्ग इति वाच्यम् — शुक्लं पट-मानयेत्यादौ पटशब्दस्य व्यक्तिविशेषार्थकत्वेऽपि,

" जातिव्यक्ती गृहीत्वेह त्रयं तु श्रुतलक्षिते।
कृष्णादि यदि मुञ्चामः का श्रुतिस्तत्र पीड्यते "॥

इति [1]न्यायेन — श्रुत्यर्थभूतायाः पटत्वजातेः, लक्ष्यायाः व्यक्तेश्चापरित्या-गेन पटश्रुत्यबाध इत्युक्तरीत्या — उद्गीथश्रुतेरप्यबाधात् तत्तच्छाखागतोद्गीथमात्र-विषयत्वमेव — इति पूर्वपक्षे प्राप्ते,

उच्यते — 'अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्'। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। उद्गीथाद्यङ्गावबद्धा उपासनाः तत्तच्छाखागतोद्गीथव्यक्तिष्वेव न व्यवतिष्ठेरन्। अपितु प्रतिशाखं संबध्येरन्। शुक्लं पटमानयेत्यादौ शुक्लपदसमभि-व्याहारान्यथानुपपत्त्या विशिष्टैकार्थप्रत्यायनाय अविशेषप्रवृत्तश्रुतेः पीडनेऽपि प्रकृते तादृशबाधकाभावेन अविशेषप्रवृत्तोद्गीथश्रुतेः सन्निधिमात्रेण संकोचा[2]संभवात् शाखा-न्तरगतः क्रतुमध्ये प्रयुज्यमानः उद्गीथः शाखान्तरोक्तोपासनप्रकारेणाप्युपास्य इत्यर्थः।

'मन्त्रादिवद्वाऽविरोधः'। शाखान्तराम्नातानां मन्त्रादीनां शाखान्तरा-म्नातक्रतुसंबन्धवत् शाखान्तरगतोपासनानामपि शाखान्तरगतोद्गीथसंबन्धे विरोधा-भावात् — इति स्थितम्॥

1. इत्युक्तन्यायेन. ग.　2. संकोचाभावात्. ख.

ताण्डिशाखागतेति छान्दोग्यगतेत्यर्थः। श्रुतलक्षिते इति। जातेः श्रुतत्वं व्यक्ते-र्लक्षितत्वमात्रोक्तम्। मीमांसावाक्यमिदमिति तन्मते तद् युक्तम्। अस्मन्मते तु जातिवत् व्यक्तेरपि श्रुतत्वमेव। अथापि सर्वत्र सामान्यं पदार्थः, विशेषो वाक्यार्थ इति न्यायेन शब्दस्य सर्व यक्तिवाचित्वेऽपि संनिहितकतिपयव्यक्तिग्रहणेन वाक्यार्थवर्णनमेव गामानयेत्यादौ दृष्टमिति संनिहितोद्गीथव्यक्तिरेव ग्राह्येति पूर्वपक्षी मन्यते। यावति विशेषे संकोचाभावे समभिव्याहृत-पदान्वयभङ्गः, तावत्संकोच इष्टः सर्वत्र। न चात्रोद्गीथपदस्य स्वरसस्थितसर्वोद्गीथग्राहकत्वे क्वचि-दनुपपत्तिरिति सिद्धान्ती।

(३) तथा गुणोपसंहारपादे— 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यादिना विहितानामङ्गावबद्धोपासनानाम् अव्यभिचरितक्रतुसंबन्धिजुह्वादिस्थापितक्रतुफलनिराकाङ्क्षपर्णतादिवत् अव्यभिचरितक्रतुसंबन्ध्युद्गीथोपस्थापितक्रतुफलेनैव नैराकाङ्क्ष्यात्, 'तदेव वीर्यवत्तरं भवति' इति वीर्यवत्तरत्वादिश्रवणानामर्थवादत्वात् व्रीहिप्रोक्षण-पर्णतादिवत् अङ्गत्वात उपासनानि क्रतौ नियमेनोपादेयानीति पूर्वपक्षे प्राप्ते —उच्यते। 'तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्'। **निर्धारणं** निश्चयेन मनसोऽवस्थापनम्; ध्यानमित्यर्थः। **तस्योपासनस्य अनियमः** नियमेनाननुष्ठानम्, 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' इत्यनियमदर्शनात्; तस्योपासनस्य **प्रबलकर्माप्रतिबन्धरूपवीर्यवत्तरत्वलक्षणफलान्तरवत्त्वेन** कर्माङ्गत्वाभावादित्यर्थः। अयं भावः— पर्णतोदुम्बरता[1]दिस्थले विधिविभक्त्यश्रवणादर्थवादेनैव विधिशक्तिमुपजनय्य पुनस्तेनैव फलसमर्पणे विरम्यव्यापारात् वाक्यं भिद्येत। उपासनायां तु विस्पष्टविधिश्रवणान्न फलविधित्वे[2] वाक्यभेदशङ्का। अतः पर्णतोदुम्बरतादिविध्यपेक्षया उपासनविधेर्वैषम्यात् फलविधित्व संभवति इति स्थितम्।

(४) तथा अङ्गपादे—मुक्तिव्यतिरिक्तफलकोपासनानामुद्गीथविद्यारहितयज्ञादि-

1. त्वा. ख. 2. त्वेऽपि. क. ग.

अव्यभिचरितक्रतुसंबन्धीति। पर्णतावाक्यस्य क्रतुप्रकरणेऽभावेऽपि जुह्वाः क्रतोरन्यत्रोपयोगाभावात् क्रतुसंबन्धस्तस्या अव्यभिचरित इति क्रत्वन्वयनियम इति। संबन्धीत्येव सर्वग्रन्थपाठः; न संबन्धेति। अव्यभिचरितं यथा तथा क्रतुसंबन्धीति विग्रहः। **प्रबलेति**। प्रबलकर्मोप्रतिबन्धरूपं (फलान्तरं.) **वीर्यवत्तरत्वलक्षणं** क्रतुफलस्य अप्रतिबद्धफलकत्वरूपस्य वीर्यवत्तरत्वस्य लक्षणं निरूपकं यत् **फलान्तरं** क्रतुफलादन्यत् फलम्, तद्वत्त्वेनेत्यर्थः। **विधिविभक्तिः लिङादिः। अर्थवादेनैवेति**। विध्यभावादविहितस्य स्तवनासंभवात् अर्थवादलब्धस्तुतिबलाद् विधिकल्पनेति प्रथमं स्तुतिबोधनव्यापारोऽर्थवादस्य; तदनन्तरं विहितस्य फलाकाङ्क्षायां पुनस्तस्यैव फलबोधनव्यापार इति विरम्यव्यापारः। अत एव वाक्यद्वयेऽभ्युपेयव्यापारद्वयस्यैकत्र स्वीकारात् वाक्यभेददोषश्च।

'विविदिषन्ति यज्ञेने'त्यादि विहितानि कर्माणि वीर्यवत्तरत्वाय विद्यासहितमनुष्ठीयन्ते। वेदनञ्च, 'चतुर्विधा भजन्ते माम्' इत्यादिप्रामाण्यात् सर्वफलार्थम्। तदिदं मुक्तिव्यतिरिक्तफलकं मुक्तिफलकञ्च वेदनमुद्दिश्य कर्माण्यनुष्ठीयमानानि प्रकृतोद्गीथविद्यादिप्रबलोत्तेजकाभावे प्रबलकर्मप्रतिबद्धफलानि भवेयुरिति, अङ्गपादे विद्याङ्गकर्मनिरूपणानन्तरमन्ते तत्कार्यनिष्पत्तिप्रकारः सूत्रितः। तमपि प्रकृतविद्यासंबन्धित्वाद् दर्शयति **तथेत्यादिना**। **इहैवेति**। **ननु ऐहि-**

कर्मनिष्पाद्यानामपि यज्ञादिरूपसाधननिष्पत्तौ सत्यां विलम्बे हेत्वभावादिह जन्मन्येव निष्पत्तिरिति पूर्वपक्षे प्राप्ते—उच्यते। 'ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्'। मुक्तिव्यतिरिक्तफलकमुपासनं **अप्रस्तुतप्रतिबन्धे** प्रतिबन्धाभावे **ऐहिकं** इहैव जन्मनि भवति[1]। सति प्रतिबन्धे जन्मान्तरे। न च प्रतिबन्धा[2]संभवः शङ्कनीयः; 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इत्युद्गीथविद्यायाः प्रबलकर्मान्तराप्रतिबद्ध (न्ध?) फलकत्वावेदनेन प्रबलकर्मान्तरप्रतिबन्धस्यानुज्ञातत्वात्। न च, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति यज्ञादेर्वेदनसाधनत्वश्रवणात् कारीर्यभिचारादिवत् नियतैहिकत्वमेव किं न स्यादिति वाच्यम् — शुष्यच्छालिसंपत्तिवैरिविशेषविपत्तिफलकत्वेन विहितानां तेषां नियतैहिकत्वेऽपि विद्यासाधनयज्ञादिकर्मणां तज्जन्मनि विद्योद्देशेनाविहिततया पशवादिफलकचित्रेष्ट्यादिवत् नियतैहिकत्वाभावात्। पूर्वतन्त्रे चतुर्थाध्याये योगसिद्ध्यधिकरणे तथा निर्णीतत्वात् इति स्थितम्॥

(५) तथा तदुत्तराधिकरणे—यक्षानुरूपो बलिरिति न्यायेन बलवत्कर्मसाध्यानां मुक्तिफलकब्रह्मोपासनानां प्रबलकर्मान्तरप्रतिबन्धासंभवात् नियतैहिकत्वमेवेति पूर्वपक्षे प्राप्ते — उच्यते, 'एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः'। मुक्ति-

1. संभवति. **ख.** इहैव जन्मनि भवम् इहैव जन्मनि भवति **ग.** 2. प्रतिबन्धाभावः **क.**

कमित्यस्य इहैव जन्मनि भवमित्यर्थस्वीकारे मुक्तिव्यतिरिक्तफलकस्येव मुक्तिफलकस्याप्युपासनस्याप्रतिबन्धे ऐहिकत्वमेतदधिकरणसिद्धमिति उत्तराधिकरणं व्यर्थं स्यात्। अतः ऐहिकपदमैहिकफलकोपासनरूपपक्षसमर्पकं वाच्यम्। न तु साध्यपरम्। उपरि सूत्रे मुक्तिफलेति तत्फलकोपासननिर्देशवत् इति चेन्न—ऐश्वर्यफलकोपासनमात्रपरत्वेऽपि तुल्यन्यायेन मुक्तिफलकेऽपि सिध्या तदधिकरणवैयर्थ्यात्। अधिकाशङ्कया तत्प्रवृत्तिरिति चेत्, अस्याधिकरणस्य सर्वपरत्वेऽपि तत्र विशिष्याधिकाशङ्कया आक्षेपे तत्प्रवृत्तिरिति सुवचम्। तथाच कर्मणि अप्रस्तुतप्रतिबन्धे सति कर्मफलमैहिकमिति सूत्रार्थः। वस्तुतः ऐहिकपदं पक्षपरं साध्यपरं वेति विमर्शो **भावप्रकाशिकायां** द्रष्टव्यः।

ननु चित्रेष्ट्यादिदृष्टान्तेऽप्यनियतैहिकत्वमसिद्धमित्यत्र तत् पूर्वं**मीमांसा**सिद्धमित्याह **पूर्वे**ति। **योगसिध्दीति**। 'योगसिद्धिर्वाऽर्थस्योत्पत्त्यसंयोगित्वात्' इति तत्र सिद्धान्तसूत्रम्। तत्राधिकरणे वर्णकद्वयम्। प्रथमवर्णके सर्वे कामाः एकप्रयोग एवेति पूर्वः पक्षः। यत्र कामनायोगः तस्यैकस्यैवैकस्मिन् प्रयोगे सिद्धिरिति सिद्धान्तः। द्वितीयवर्णके पश्वादेरैहिकामुष्मिकत्वं

१—२

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्याः। तद्ध देवा उद्गीथमाजहुः, 'अनेनैनान् अभिभविष्याम' इति ॥ १ ॥

ते ह नासिक्यं प्राणमुद्गीथमुपासाञ्चक्रिरे; तँ हासुराः पाप्मना

फलकविद्यानामप्यैहिकत्वनियमो नास्ति, अ(?)प्रस्तुतप्रतिबन्धत्वरूपावस्थायाः विशेषेण तत्राप्यवधृतवात् । तत्रापि प्रबलानां ब्रह्मविदपचारादिप्रतिबन्धकानां संभवात् । द्विरुक्तिरध्यायपरिसमाप्त्यर्था । प्रकृतमनुसरामः । १-१.

उद्गीथावयवे ओङ्कारे मुख्यप्राणदृष्टिं विधातुमाख्यायिकां प्रस्तौति — **देवासुराः — प्राजपत्याः** । द्विविधाः प्रजापतिसुताः देवासुराः **यत्र** यस्मिन् काले परस्परं **संयेतिरे** युद्धं कृतवन्त इत्यर्थः । **प्राजापत्या** इति अपत्यार्थे, 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति ण्यः । **तद्ध — इति** । **तत्** तदा [ह प्रसिद्धं यथा तथा] देवाः **अनेनैव** उद्गीथावयवेन ओङ्कारेणोपासितेन **एनान्** असुरान् **अभिभविष्यामः** जेष्यामः इत्यभिसंधाय उद्गीथ[1]प्रणवमुपायत्वेन स्वीकृतवन्त इत्यर्थः ।

ते — चक्रिरे । ते देवाः घ्राणेन्द्रियत्वेनोद्गीथमुपासितवन्त इत्यर्थः । नासिकायां भवं **नासिक्यम्** । 'शरीरावयवाच्च' इति यत् । **तं — विविधुः** । तं

1. अयं - क पाठः । अन्यत्र 'उद्गीथं प्राणमुपायत्वेन' इति ।

सिद्धान्तितम् । अधर्मेणाप्रतिबन्धे इह जन्मनि, अन्यदा अमुत्रेति । ननु तर्हि तदधिकरणन्यायेनैवोपासनविषयेऽपि सिद्धौ इदं शारीरकाधिकरणं व्यर्थमिति चेन्न—विचारवैषम्यात् । तत्र हि विहितकर्मजन्याः कामाः सर्वेऽपि स्वर्गाद्यविशेषादमुत्रैव भवेयुरिति पूर्वपक्षे, अर्थ्यमानस्य फलस्य देहान्तरोत्पत्त्येकलभ्यत्वाभावात् यथायोगं सिद्धिः, योग्यतानुसारेणात्रापि सिद्धिः, प्रतिबन्धवशादनुभवयोग्यताया अभावे तु तत्रेति सिद्धान्तितम् । नियतैहिकमपि किञ्चित् कर्मास्तीति च प्रदर्श्य नियतामुष्मिकत्वं निराकृतं तत्र । अत्र तु शारीरके तत्रोक्तनियतैहिकाभिचारादिवत् नियतैहिकत्वं पूर्वपक्षीष्टम् । प्रतिबन्धं प्रदर्श्य तन्निराकृतमिति ।

नासिक्यं प्राणमिति । घ्राणमित्यनुक्त्वा एवमुक्तिः, 'उद्गीथे प्राणदृष्टिः शास्त्रोक्ता । प्राणश्च वायुविशेषवत् इन्द्रियमपीति मुख्यामुख्यानवबोधेन घ्राणरूपप्राणे प्रवृत्तिर्देवानामासीदिति

विविधुः; तस्मात् तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च; पाप्मना ह्येष विद्धः ॥ २ ॥

अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे; तां हासुराः पाप्मना विविधुः; तस्मात् तयोभयं वदति सत्यञ्चानृतञ्च; पाप्मना ह्येषा विद्धा ॥ ३ ॥

अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे; तद्धासुराः पाप्मना विविधुः। तस्मात् तेनोभयं पश्यति दर्शनीयञ्चादर्शनीयञ्च; पाप्मना ह्येतद् विद्धम् ॥ ४ ॥

अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे; तद्धासुराः पाप्मना विविधुः—। तस्मात् तेनोभयँ शृणोति श्रवणीयञ्चाश्रवणीयञ्च; पाप्मना ह्येतद् विद्धम् ॥ ५ ॥

नासिक्यं प्राणमसुराः स्वकीयेन पाप्मना संयोजितवन्तः । पापहेतुभूतवृत्त्या संयोजितवन्त इति यावत् । **तस्मात् — विद्धः** । **तस्मात्** पापसंसर्गाद्धेतोः पुरुषो घ्राणेन सुरभि च दुर्गन्धि चोभयं जिघ्रति । तस्मान्नासिक्यः प्राणः पापविद्ध एवेत्यर्थः । **अथ — विद्धा** । पूर्ववत् । **अथ — विद्धम्** । **अदर्शनीयम्** अमेध्यादिकमित्यर्थः । **अथ ह श्रोत्रं — विद्धम्** । **अश्रवणीयं** पापवचनमित्यर्थः ।

ज्ञापयितुम् । उपरि **चक्षुरि**त्यादावपि प्राणमिति पदस्यानुषङ्गः । **सुरभि च दुर्गन्धि चे**ति । वागादौ वक्ष्यमाणानुसारात् घ्रातुमर्हमनर्हञ्चेत्यर्थः । अत एव पापहेतुभूतवृत्त्येति भाषितम् । वृत्तिरिन्द्रियव्यापारः । तस्याः पापहेतुत्वं निषिद्धत्वात् । दुर्गन्ध्याघ्राणं निषिद्धमेवेति । **तस्मान्नासिक्य** इति । पूर्ववाक्ये **तस्मा**दिति हेतोर्निर्दिष्टत्वात् अत्र **पाप्मना** ह्येति **हि**शब्दो न हेताविति भावः । ननु बृहदारण्यके, 'घ्राणेन्द्रियमुद्गातृ भूत्वा यजमानेषु भोगविशेषं स्वात्मने कल्याणघ्राणञ्च फलमकामयत । तदा असुराः तत्कार्यभङ्गकामाः पाप्मवेधेन घ्राणे दुर्गन्धाघ्राणं कल्पयामासुः' इत्युक्तम् । तत् युज्यते । अत्र तु घ्राणादेरुद्गातृत्वकल्याणघ्राणकामित्वाद्यनुक्त्या देवानामेवोद्गीथे घ्राणादिदृष्टिकर्तृत्वात् घ्राणादिदूषणमसुरकृतं किमर्थमिति चेत्—निकृष्टे उत्कृष्टदृष्टेरेव कर्तव्यत्वात् उद्गीथे घ्राणदृष्टिं क्रियमाणां दूषयितुं घ्राणे निकर्षकल्पनाय तद् दूषयामासुरित्येवं योयुज्यते ।

अथ ह मन उद्गीथमुपासाञ्चक्रिरे ; तद्वासुराः पाप्मना विविधुः ; तस्मात् तेनोभयँ संकल्पयते[1] संकल्पनीयश्चासंकल्पनीयश्च ; पाप्मना ह्येतद् विद्धम् ॥ ६ ॥

अथ ह, य एवायं मुख्यः प्राणः, तमुद्गीथमुपासाञ्चक्रिरे ; तँ हासुरा ऋत्वा विदध्वँसुः; यथाऽश्मानमाखणमृत्वा विध्वँसेत, एवम् ॥ ७ ॥

यथाऽश्मानमाखणमृत्वा विध्वँसते, एतँ ह्रैव स विध्वँसते, य एवंविदि पापं कामयते, यश्चैनमभिदासति ; स एषोऽश्माखणः ॥ ८ ॥

1. संकल्पते शां - क्वचित् ।

अथ ह मनः — विद्धम् । **असंकल्पनीयं** पापमित्यर्थः ।

अथ — चक्रिरे । उद्गीथावयवमोङ्कारं मुख्यप्राणत्वेनोपासितवन्त इत्यर्थः । **तं — विदध्वंसुः** । तं मुख्यप्राणं पाप्मना वेद्धुं प्रवृत्ता असुराः **तं ऋत्वा** प्राप्य स्वयमेव **विदध्वंसुः** । विध्वस्ता अभवन्नित्यर्थः । तत्र दृष्टान्तमाह—**यथाऽश्मानं— एवम्** । ' आखन्यत इति **आखणं** मृत्पिण्डः । यथा मृत्पिण्डोऽश्मानं प्राप्य विध्वस्तो भवति, एवम् ' इति व्यासार्यैर्व्याख्यातम् । **आखणमिति** च्छान्दसं णत्वम् ; नपुंसकत्वञ्च ।

एतद्विद्यायाः फलमाह — **यथा — दासति** । **एवंविदि** एतद्विद्यानिष्ठे यः पापं कर्तुं कामयते, यश्चैनं **अभिदासति** हिनस्ति, सः अश्मप्रासलोष्टवत् ध्वस्तो भवतीत्यर्थः । दा प्लवन इत्यतः, दो अवखण्डने इत्यतो वा लेटि, ' सिब्बहुलं लेटि ' इति सिपि दासतीति रूपम् ।

स एषोऽश्माखणः । **स एषः** एतद्विद्यानिष्ठे पापकामः **अश्माखणः**

मुख्यः प्राण इति । मुखे अग्रे भवः मुख्यः, नासिक्य इतिवत् । ' आसन्यं प्राणमूचुः ' इति च श्रुत्यन्तरम् । आस्यमुखवदनादिशब्दाः संस्कृते व्याहाराभ्यवहारसाधनाक्यवसंस्थान एव मुख्याः, न तु ललाटादौ । इन्द्रियाणां प्राणशब्दगौणार्थत्वात् तद्वारकं प्राणपदमुख्यार्थत्वरूपं मुख्यत्वमप्यस्ति प्राणवायोः । तत्तु प्राणापानव्यानादिसर्वसाधारणम् । सामान्यतः प्राणवायुत्वदृष्टिरेवामिमता चेत्, कामं तदप्यस्तु ।

नैवैतेन सुरभि न दुर्गन्धि विजानाति; अपहतपाप्मा ह्येषः; तेन

अश्मप्राप्ताखण इत्यर्थः। एतेन — 'खनो घ च' इति घप्रत्ययस्य, 'करणाधिकरणयोः' इत्यनुवृत्त्या कर्मण्यभावात्, करणार्थ एव घप्रत्ययो वक्तव्यः। अतः आखणशब्दस्याश्मविशेषणत्वमेव वक्तव्यम्। 'खननसाधनतया दृढमश्मानं प्राप्य यथा लोष्टादिकं ध्वंसते' इति हि तस्यार्थः। अत एव **स एषोऽश्माखण** इति वाक्यशेषे अश्मविशेषणत्वमेव आखणस्य श्रूयते—इति शङ्काऽपास्ता। वाजसनेयके समानप्रकरणे, 'यथाऽश्मानमृत्वा लोष्टो विध्वंसते' इति श्रवणेन तत्समानार्थत्वस्य वक्तव्यतया आखणशब्दस्य लोष्टवाचित्वस्यैवोचितत्वात्। बहुलग्रहणेन कर्मण्यपि घप्रत्ययस्योपपत्तेः। इतरथा कर्तृवाचिपदाध्याहारप्रसङ्गात्। 'स एषोऽश्माखण' इत्यत्र अश्माखणशब्दस्य समस्तस्य अश्मप्राप्ताखणवाचित्वेन, अश्मशब्दसामानाधिकरण्येनाखणशब्दस्याश्मविशेषणत्वाभावात्। पूर्ववाक्ये नपुंसकलिङ्गनिर्दिष्टस्यापि स एष इति पुल्लिङ्गसामानाधिकरण्येन आखणशब्दस्य पुल्लिङ्गत्वोपपत्तेश्चेति द्रष्टव्यम्।

इतरप्राणाद्यपेक्षया तस्य वैषम्यमाह **नैव — विजानाति**। **एतेन** मुख्यप्राणेनेत्यर्थः। पुरुष इति शेषः। तत्र हेतुमाह **अपहतपाप्मा ह्येषः**। स्पष्टोऽर्थः। **तेन**

नयमयूखमालिकोक्तं पक्षमपास्यति **एतेने**ति। **अश्मविशेषणत्वमेवे**ति। **आखण** इति पृथक्पदमश्मविशेषणम्। आखणपदद्वयमपि यथानुशासनं पुल्लिङ्गम्। **स एष** इति प्रकृत उपासक उच्यते। तस्य आखणाश्मत्वं ध्वंसकतया तत्तुल्यत्वादिति भावः। आखन्यते अनेनेत्याखनः इति **माधवी धातुवृत्तिः**। नेयं शङ्का शाङ्करानुसारिणः। शाङ्करभाष्येऽप्याखणशब्दस्य कर्मण्युत्पत्तेरेव गृहीतत्वात्। परंतु **अखनः** खनितुमशक्यः। अखण एव आखण इत्यश्मविशेषणं कृतम्। तदा कर्तुरध्याहारे आखणशब्दव्युत्पादने च क्लेशः। तत्रापि **अश्माखण** इत्यैकपद्यमेवादृतम्। तदपि चिन्त्यम्—आखणस्याश्मविशेषणत्वे आखणाश्मेति समासापत्तेः। सिद्धान्ते तु अश्मप्राप्ताखणरूपार्थविवक्षया अश्माखण इति समासोपपत्तिः। एवञ्च तदनुसारेण **स एष** इति नोपासकपरम्; किन्तु द्वेषिपरम्। **स एष** इत्यस्य पूर्ववाक्यार्थे यत् प्रधानम्, तत्परामर्शित्वस्यैव युक्तत्वाच्च। तत्र च ध्वंसमानः प्रधानम्, न तु **एवंवित्**।

नैवेतेन सुरभीति। नन्वयमप्रसक्तप्रतिषेधः। मुख्यप्राणस्य आघ्राणसामर्थ्याभावात्। उच्यते। घ्राणादीनां मुख्यप्राणाधीनप्रवृत्तिकत्वात् मुख्यप्राणगतपाप्मवशादेव घ्राणादीनां दुर्गन्धादिग्राहकत्वमिति किं न स्यादिति शङ्कापरिहारार्थमयं ग्रन्थ इति। घ्राणादेर्दुर्गन्धादिग्राहकत्ववत् न मुख्यप्राणस्य किञ्चिदनिष्टापादकत्वमित्यत्र तात्पर्यम्। प्रत्युतास्य घ्राणाद्युपकारकत्वमतिशयित-

यदश्नाति यत् पिबति तेनेतरान् प्राणानवतिः एतमु एवान्ततोऽविच्चोत्क्रामति; व्याददात्येवान्तत इति ॥ ९ ॥

तँ हाङ्गिरा उद्गीथमुपासाञ्चक्रे; एतमु एवाङ्गिरसं मन्यन्ते, अङ्गानां यद् रसः ॥ १० ॥

यत् — अवति । [1] तस्यापहतपाप्मत्वेनैव प्राणान्तरवत् आत्मम्भरित्वाभावात् स्वाशितपीतादिना इतरान् प्राणान् रक्षतीत्यर्थः । **एतमु — क्रामति** । यत एव घ्राणादिप्राणसमुदायो मुख्यप्राणाशितपीतलब्धसत्ताकः, अत एव **अन्ततः** मरणकाले मुख्यप्राणाशितादेरभावेन **एतमविच्चा** अलब्ध्वा उत्क्रामतीत्यर्थः । विदॢ [2] लाभे इति हि धातुः । **व्याददात्येवान्ततः** । **अन्ततः** मरणकाले सर्वप्राणानामुत्क्रमणादेव [3] आस्यव्यादानं करोतीत्यर्थः ।

तं — चक्रे । **तम्** अध्यस्तप्राणभावम् **उद्गीथम्** उद्गीथावयवमोङ्कारमङ्गिराः ऋषिरुपासाञ्चक्रे इत्यर्थः । केचित्तु अङ्गिरसोपास्यमेव मुख्यप्राणमङ्गिरसं वदन्तीत्याह — **एतमु — रसः** । अङ्गानां प्राणाधीनस्थितित्वेन प्राणस्याङ्ग [4] रसत्वमिति भावः । अङ्गरसमङ्गिरसं वदन्ति परोक्षप्रियत्वाद् देवानामिति भावः । **तेन —**

1. तेनैव हेतुना तस्यापहतपाप्मत्वादेव **ख.** ग. 2. विदिर्ल **ख.** 3. अस्य **ख.** । 4. अङ्गि. **ख. ग.** ।

मित्याह **तेन यदश्नाती**ति । बृहदारण्यके एतदर्थविस्तरः । **व्याददात्येवे**ति । अशिताद्युपयोजनेन धातूनां शरीरे यथावत् स्थापनेन वयव्यूहनकारी हा निष्क्रान्त इति सूचनायेव जातं व्यादानम् अशितनिक्षेपेऽपि न निवर्तत इति **एव**काराशयः । मुखे स्थितं प्राणमत्र स्थापयितुकामा इव अन्ते उपसर्पन्तः तमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति । एतद्व्यदनिष्क्रमणार्थमिवेदं व्यादानम् । परस्मैपदम्, " आङो दोऽनास्यविहरणे " इति पर्युदासात् ।

एतदेवोपासनमुद्गीथप्राणोपासककतिपयर्षिनामविवक्षितगुणविशेषविषयकं कर्तव्यम् । न तु नाम्नः ऋषिरूपमुख्यार्थो ग्राह्यः । तत्तदृषिणाऽप्येवमेतस्योपासितत्वादित्युपदिशति **तं हे**त्यादिना । अस्य अयास्याऽऽङ्गिरसत्वबृहस्पतित्व ब्रह्मणस्पतित्वानि बृहदारण्यकोक्तानि । अत्र तु अङ्गिरस्त्वबृहस्पतित्वायास्यत्वान्युक्तानि । अङ्गिर आङ्गिरसयो निर्वचनम्, अङ्गानां रस ' इति; बृहस्पतिनिर्वचनं **बृहत्या**: वाचः पतिरिति; अयास्यनिर्वचनं तत्र, — ' अयमास्येऽन्तः ' इति अत्र तु, ' आस्यात् अयत ' इति । **एतमु एवाङ्गिरस**मित्यत्र अङ्गिरःपदानुसारात् अङ्गिरसमिति

तेन[1] तँ ह बृहस्पतिरुद्गीथमुपासाञ्चक्रे; एतमु एव बृहस्पतिं मन्यन्ते, वाग्घि बृहती, तस्या एष पतिः ॥ ११ ॥

तेन[1] तँ हायास्य उद्गीथमुपासाञ्चक्रे; एतमु एवायास्यं मन्यन्ते, आस्याद् यदयते ॥ १२ ॥

तेन[1] तँ ह बको दाल्भ्यो विदाञ्चकार; स ह नैमिषीयाणामुद्गाता बभूव, स ह स्मैभ्यः कामानागायति ॥ १३ ॥

1. तेनेतिपदानि पूर्वपूर्ववाक्यान्तस्थितान्येव माध्वे ।

चक्रे । **तेन**[1] अङ्गिरस्त्वेन गुणेन बृहस्पतिरुपासितवानित्यर्थः । **एतमु—पतिः** । वागिन्द्रियस्य सर्वार्थप्रकाशकत्वादिना **बृहत्त्वम्**[2] । तस्य च[3] मुख्यप्राणाधीनत्वात् प्राणस्य वाक्पतित्वम् । अत उपास्यस्यैव बृहस्पतित्वं मन्यन्त इत्यर्थः । **तेन तं हायास्यः — चक्रे** । तेन बृहस्पतित्वेन अयास्यः ऋषिरुपासितवानित्यर्थः । **एतमु — यदयते** । आस्यात् मुखात् अयते निर्गच्छतीत्यर्थः ।

तेन तं ह बको—चकार । तेन पूर्वोक्ताङ्गिरस्त्वबृहस्पतित्वायास्यत्वादिगुणविशिष्टतया दल्भसुतो बकनामा ऋषिरुपासितवानित्यर्थः । **स ह—बभूव** । स्पष्टोऽर्थः ।

1. अङ्गिरसत्वेन. **ख.** आङ्गिरसत्वेन. **ग.** 2. त्वात. **ख.** । 3. 'च' इति न **ख.** कोशे ।

च्छेदो युक्तः । शाङ्करभाष्ये अङ्गिरसमितिपरकृतच्छेदस्यानुवादोऽस्ति । स्वयं तु 'तेनासावाङ्गिरस' इत्युक्तम् । अत्र, अङ्गिरा उपासाञ्चक्रे, अयास्य उपासाञ्चक्रे इति पृथक्पृथक् कथनात् अयास्यो नाङ्गिरा इति ज्ञायते । स एव त्वयास्यः अङ्गिरोवंश्यः स्यात्, आङ्गिरस इति तत्रोक्तेः । प्राणे एवमनेकर्ष्यादिनामनिर्वचनमैतरेयारण्यके(२.२)

तेन अङ्गिरस्त्वेनेति । अध्ययनार्थकल्पितविरामस्य वाक्यमध्येऽपि दर्शनात्, तेन तं ह' इति वाक्यत्रयगतमपि पदं पूर्वपूर्ववाक्यान्वयि कृत्वा, 'यस्माद्धेतोरङ्गानां रसः तेन हेतुना अङ्गिरसं मन्यन्ते' इत्येवंरीत्याऽर्थवर्णनं सुकरम् । तेन कारणेन तेन निरुक्ताङ्गिरस्त्वधर्मेण अङ्गिरा अप्युपासाञ्चक्र इति वा— अथापि तेनेतिपदं विनैव तदर्थसिध्या, उत्तरत्रैवमन्वयसंभवेन च यथाश्रुतवाक्यभेदस्वीकारेणैव व्याख्यानमकारि । माध्वे तु तेनेतिपदं पूर्ववाक्य एव पठितम् । नन्वङ्गिरा अपि उक्तयोगार्थेनाङ्गिरस्त्वेनोद्गीथोपासनं कर्तव्यं त्यक्तुं नार्हति । तत् बृहस्पतौ तद्गुणेने को विशेष इति चेत् — अङ्गिराः कदाचित् स्वनामाभिमानात् तथोपासितवान् स्यात्, न त्वन्य इति मा भ्रमः । योगार्थगौरवादेवं चान्येऽप्युपासते इति ज्ञाप्यत इति ।

विदाञ्चकारेति । नन्वत्र उपासाञ्चक्र इत्यप्रयोगात् उद्गीथमिति पदाभावाच्च उक्ताङ्गिरस्त्वादिविशिष्टतया प्राणं बको बुबुध इत्येव वाक्यार्थोऽस्त्विति चेत् — एवं तर्हि **आगायति स्मे**

आगाता ह वै कामानां भवति, य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते—इत्यध्यात्मम् ॥ १४ ॥

इति प्रथमाध्याये द्वितीयः खण्डः ।

स ह — आगायति । सः दाल्भ्यो बकः एभ्यो नैमिषीयेभ्यो यजमानेभ्यः शत्रुपराभवादीन् कामान् गानेन विद्यामाहात्म्यात् संपादितवानित्यर्थः । **आगायति स्म** । ' लट् स्मे ' इति [1]भूते लट् ।

आगाता—उपास्ते । एवमुपासको यजमानकामानां गानेन संपादयिता भवतीत्यर्थः । **इत्यध्यात्मम्** । अध्यात्ममुद्गीथोपासनं समाप्तमित्यर्थः । आत्मशब्देन इन्द्रियमनःप्राणादिसंघात उच्यते । **अध्यात्मम्** आत्मनीत्यर्थः । आत्मविषयमिति यावत् ।

(१) एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणं लिख्यते । —अङ्गपादे—'ऋत्विक्परिक्रयस्याङ्गानुष्ठानमात्रार्थत्वात्, अङ्गावबद्धोपासनानाञ्च, 'तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्' इति सूत्रोक्तन्यायेनानङ्गत्वात्, 'शास्त्रफलं प्रयोक्तरि' इति न्यायेन यजमानगामिफलसाधनभूतोपासनस्य यजमानेनैव कर्तव्यत्वात्, 'गोदोहनेन पशुकामस्य प्रणयेत्' इति श्रुतपश्वर्थगोदोहनादेरनङ्गत्वेऽपि ऋत्विक्कर्तृ-

1. लट् भूतेऽपि. **ख. ग.**

त्यत्रोपासनं विवक्षणीयम् । आदितः प्रभृति विद्युपास्यैकार्थ एव प्रयोगदर्शनादत्रैव तद् विवक्षितम् । 'आगाता भवति । य उपास्ते' इति तदुत्तरवाक्ये आगानोपासनयोर्भिन्नत्वप्रतीतेश्च ।

अङ्गपाद इति । एतत्खण्डान्तिमवाक्यव्याख्यानावसरे तद्विषयकाधिकरणस्योपस्थितत्वात् सूचीकटाहन्यायाच्च प्रथममेतदधिकरणोपन्यासः । **शास्त्रफलं प्रयोक्तरीति** । (पू मी. ३–७) इदं पूर्वपक्षसूत्रम् । अत्राधिकरण एव फलस्य यजमानगामित्वेऽपि परिक्रयविधिबलात्, यत् ऋत्विजा कर्तुं शक्यम्, तत् तेनैव कार्यमिति निर्णीतम् । अतोऽत्र **इतिन्यायेने**त्यस्य इत्यधिकरणन्यायेनेति नार्थः, विरोधात् । किंतु एतत्सूत्रोक्तयुक्त्येत्यर्थः । शास्त्रीयकर्मफलमनुष्ठातृगतं यजेत स्वर्गकाम इत्यादावात्मनेपदबलात् प्रतीयते । आत्मनेपदस्य कर्तृगामि क्रियाफलपरत्वात् । अत्राप्युद्गीथमुपासीतेत्यात्मनेपदमस्तीति युक्तिः । स्वार्थे स्वयं प्रवृत्तिरेव लोके औत्सर्गिकीति च । अङ्गावबद्धोपासनं फलस्वामिकर्तृकम् उपासनत्वात् भक्तिविद्यावदिति श्रीभाष्यदर्शितमप्यनुसंधेयम् । ननु पूर्वमीमांसाधिकरणेनैव परिक्रीतकर्तृकत्वं सिध्यतीति शारीरकाधिकरणं व्यर्थमिति चेत् — उच्यते । नियमेन कर्तव्यस्य ऋत्विग्वरणस्य, नियमेन यत् कर्तव्यम्, तदर्थत्वमेव युक्तम् । एवंभूतमेव ऋत्विजा क्रियते । यद्यपि गोदोहनादिद्रव्यं फलार्थत्वात् अनियतम् — तथापि प्रणयनादिक्रियायाः द्रव्यादिकमन्तरेणानिष्पत्तेः अपेक्षितद्रव्यत्वाद्याकारेण

का[1]प्पणयननिर्वर्तकस्य गोदोहनस्य यजमानेनोपादातुमशक्यतया ऋत्विक्कर्तृकत्वेऽपि उद्गातृकर्तृके उद्गीथे यजमानस्योपासनसंभवात् उपासनं याजमान[2] मेव। औद्गात्रसमाख्यानं तु, 'शास्त्रफलं प्रयोक्तरि' इति न्याय[3] विरोधादुपेक्षणीयम्। अतः फलस्य स्वामिगतत्वात् फलस्वामियजमानकर्तृकमेवोपासनमित्यात्रेयमतमिति, 'स्वामिनः फलश्रुतेरित्यात्रेयः' इति सूत्रेण पूर्वपक्षं कृत्वा — उपासनान्यपि ऋत्विक्कर्माण्येव[4] स्युः। प्रयोगाङ्गस्य ऋत्विजः प्रयोगान्तःपात्युद्गीथाद्युपासनेऽपि कर्तृत्वसंभवात्। 'तं ह बको दाल्भ्यो विदाञ्चकार। स ह नैमिषीयाणामुद्गाता बभूव। स ह स्मैभ्यः कामानागायति' इति उद्गातृदाल्भ्यगतविद्यायाः यजमानकामसंपादकत्वदर्शनलिङ्गाच्च ऋत्विक्कर्तृकमेवोपासनम्। न च ऋत्विक्कर्तृकोपासनस्य फलं ऋत्विग्गतमेव स्यादिति[5] शक्यशङ्कम् — ऋत्विजां परार्थतया तेषां वचनमन्तरेण फलसंबन्धानुपपत्तेः। 'यां वै काञ्चन यज्ञे ऋत्विज आशिषमाशासते, यजमानायैवैतामाशिषमाशासते' इति श्रुतेश्च। 'तस्मादु हैवंविदुद्गाता ब्रूयात् क ते काममागायानि' इति ऋत्विग्गतविज्ञानस्य यजमानगामिफलकत्वावेदनलिङ्गाच्च न, 'शास्त्रफलं प्रयोक्तरि' इति न्यायावतारः। ततश्च परिक्रयविधिबलादुत्सृष्टस्य ऋत्विक्कर्तृकत्व[6]स्य याजमान समाख्याद्यपवादकाभावात्, लिङ्गानुग्रहात्, औद्गात्रसमाख्यानाच्च आर्त्विज्यमेवोपासनमिति, 'आर्त्विज्यमित्यौडुलोमिः, तस्मै हि परिक्रीयते' इति सूत्रेण सिद्धान्तितम्। सूत्रस्य चायमर्थः — उपासनमार्त्विज्यम् ऋत्वि-

1 कर्तृकप्रणयन ख. ग. 2. यजमानकर्तृक. ग. 3. न्यायेन. ख. 4. 'एव' इति क. नास्ति। 5. शङ्क्यम् क. 6. ऋत्विक्कर्तृकस्य याजमानसमाख्यापादकाभावात् ख.

नियतत्वमस्त्येव। उद्गीथाद्युपासनं तु सर्वथैवानियतम्, कर्मानुपकारकत्वादिति नेदमनियतं तदातदा यजमानेनाद्रियमाणं नियतकर्मप्रवृत्तः ऋत्विगनुष्ठास्यति। किञ्चानियतमपि गोदोहनादि न यजमानशक्यप्रयोगम्। तथात्वे ऋत्विक्कर्तृकप्रणयनायनिष्पत्तेरिति तत्र कामं तथा, न त्वत्रेत्यधिकाशङ्का। कर्तृणां प्रयोगाङ्गत्वात् प्रयोगमध्यपातिसर्वार्थमेव वरणमिति सिद्धान्त्याशय इति।

न्यायविरोधादिति। न केवलं न्यायः, अत्रोपरि, 'एतमु एवाहमभ्यगासिषम्। तस्मान्ममत्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच' इत्यादौ उपासकस्योद्गातुरेव फलवर्णनाद् वचनमप्यनुकूलमिति शङ्कितुराशयः। सिद्धान्ते 'अभ्यगासिष' मित्यत्र उद्गातृद्वारा यजमानोऽहमगासिषमिति विवक्षा स्यात्। **उत्सृष्टस्य** उत्सर्गसिद्धस्य।

कर्म। तस्मै क्रतुप्रयोगाय[1] हि ऋत्विक् परिक्रीयते। अतोऽनङ्गभूतमप्युपासनं क्रतुप्रयोगान्तःपातित्वात् ऋत्विजैवानुष्ठेयमिति स्थितम्॥

(२) तथा गुणोपसंहारपादे [च] चिन्तितम् – तत्र हि –

वाजिनां तावत्, 'द्वया ह वै प्राजापत्या देवाश्चासुराश्च' इत्यारभ्य, 'ते ह देवा ऊचुः, हन्तासुरान् उद्गीथेनात्ययाम' इत्युद्गीथेनासुरविध्वंसनं प्रतिज्ञाय उद्गीथे वागादिमनःपर्यन्तदृष्टौ असुरैरभिभवमुक्त्वा, 'अथ हेममासन्यं प्राणमूचुः' इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपरिभवमुक्त्वा, 'भवत्यात्मना, पराऽस्य द्विषन् भ्रातृव्यो भवति, य एवं वेद' इति शत्रुपराजयफलाय उद्गीथे प्राणदृष्टिर्विहिता।

एवं छन्दोगानामपि — 'देवासुरा ह वै यत्र संयेतिरे' इत्यारभ्य, 'तद्ध देवा उद्गीथमाजह्रुः। अनेनैनान् अभिभविष्याम इति' इत्युद्गीथेनासुरपराभवं प्रतिज्ञाय तद्वदेव उद्गीथे वागादिदृष्टौ दोषमभिधाय, 'अथ ह य एवायं मुख्यः प्राणः, तमुद्गीथमुपासाञ्चक्रिरे' इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा, 'यथाऽश्मानमाखणमृत्वा विध्वंसते, एवं हैव स विध्वंसते य एवंविदि पापं कामयते' इति शत्रुपराभवायोद्गीथे प्राणदृष्टिर्विहिता।

तत्र उभयत्रा[2] प्यध्यस्तप्राणभावस्योद्गीथस्यैवोपास्यत्वश्रवणेन रूपाभेदात्, शत्रुपराभवरूपफलसंयोगाविशेषात्, उद्गीथविद्येति समाख्यैक्याच्च तयोरैक्यमिति पूर्वः पक्षः। तत्र राद्धान्तच्छायया परिचोद्य परिहरति – 'अन्यथात्वं शब्दादिति चेन्नाविशेषात्'। वाजसनेयके, 'ते हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति। तथेति तेभ्य एष प्राण उदगायत्' इति उद्गानकर्तरि प्राणदृष्टिविधानात्, छान्दोग्ये, 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे' इति उद्गानकर्मणि प्राणदृष्टिविधानात शब्दादुपास्यरूपान्यथात्वप्रतीतेः भेद इति चेत् – न, देवासुरसंग्रामोपक्रमादिबहुसारूप्यात्। वाजसनेयकेऽपि, 'हन्तासुरान् यज्ञे उद्गीथेनात्ययाम' इत्युद्गीथेनोपक्रमात् तदविरोधाय, 'तेभ्य एष प्राण उदगायत्' इति उद्गानकर्मरूप एवोद्गीथे– पाकादिषु सौकर्यातिशयविवक्षया, 'पच्यते ओदनः स्वयमेव' इति ओदने कर्तृत्वोपचारवत्—उद्गानकर्मण्येव कर्तृत्वोपचारोपपत्तेरुद्गीथ एवोभयत्राप्युपास्यः। अतो विद्यैक्यम् – इति प्राप्ते –

1. प्रयोजनाय· ग. 2. अपिः क. कोशे।

प्रचक्ष्महे –, 'न वा प्रकरणभेदात् परोवरीयस्त्वादिवत्'। **न वे**ति पूर्वपक्षं व्यावर्तयति। **प्रकरणभेदात्** — छान्दोग्ये, ओमित्येतदक्षरमुद्गीथमुपासीत' इति प्रकृतोद्गीथावयवप्रणवविषयकमुपासनम्। वाजसनेयके प्रणवस्याप्रकृतत्वात्, 'उद्गीथेनात्ययाम' इति कृत्स्नोद्गीथस्यैव प्रस्तुतत्वात् कृत्स्नोद्गीथविषयकमेवोपासनम्। अतो रूपभेदाद्विद्याभेदः। किञ्च छान्दोग्ये उद्गीथस्याध्यस्तप्राणभावस्योपास्यत्वम्, वाजिनां तु, अथ हेममासन्यं प्राणमूचुः त्वं न उद्गायेति, तथेति तेभ्य एष प्राण उदगायत्' इति अध्यस्तप्राणभावस्योद्गातुरुपास्यत्वम्। न च वाजसनेयके उद्गातुरुपास्यत्वे, 'उद्गीथेनात्ययाम' इत्युपक्रमविरोधः शङ्कनीयः। उद्गातुरुपासने उद्गीथस्यानुप्रविष्टतया उपक्रमावगतस्योद्गीथस्यापरित्यागात्। अत्र च वक्तव्यं **बृहदारण्यकप्रकाशिकायामुक्तं** तत्रैवानुसंधेयम्।

'संज्ञातश्चेत्तदुक्तम्, अस्ति तु तदपि'। ननु उद्गीथविद्येति संज्ञैक्यात् विद्यैक्यमुक्तमिति चेन्न – **तत्** संज्ञैक्यं विधेयभेदेऽप्यस्त्येव; यथा अग्निहोत्रसंज्ञा नित्याग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे च। छान्दोग्यगतप्रथमप्रपाठकोदितासु बह्वीषु विद्यासु उद्गीथविद्येति संज्ञैक्यस्य दर्शनाच्च तदप्रयोजकमिति भावः। 'व्याप्तेश्च समञ्जसम्'। छान्दोग्ये प्रथमप्रपाठके उत्तरास्वपि विद्यासु, 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यादिषु उद्गीथावयवस्य प्रणवस्य व्याप्तत्वेन तन्मध्यपातित्वादस्या अपि विद्याया उद्गीथावयवप्रणवविषयत्वमेव। ततश्च छान्दोग्यवाजसनेयकयोर्बह्वर्थवादसा-

---

उद्गीथस्यानुप्रविष्टतयेति। उद्गातरि प्राणदृष्टिर्नाम नोद्गातारं चैत्रत्वादिना गृहीत्वा तत्र प्राणदृष्टिः; किन्तु उद्गातृशब्दप्रवृत्तिनिमित्तभूतोद्गीथकर्मैकगानकर्तृत्वाकारेण गृहीत्वा। अत उद्गीथस्योपासनावच्छेदकत्वात् फलप्रयोजकत्वमिति। **अत्र च वक्तव्य**मिति। बृहदारण्यके, 'उद्गीथेनात्ययामे' त्यत्र उद्गीथपदं उपरितनबहुवाक्यानुरोधादुद्गातृलक्षकम्' यद्वा भाष्यतट्टीकानुरोधादुक्तरीत्यैव लक्षणां विना निर्वाह इति पक्षद्वयमित्यर्थः। **परोवरीयस्त्वादिवत्** इति सौत्रपदस्य हिरण्मयत्वविशिष्टपुरुषदृष्टेरैक्यं यथा परोवरीयस्त्वविशिष्टतदृष्टौ न, तद्वदित्यर्थः।

संज्ञात इति। संज्ञातश्चेत्तदुक्तमित्येकं वाक्यम्; शङ्कानुवादरूपम्, 'तत् विद्यैक्यं संज्ञैक्यप्रयुक्तमुक्तं चे'दिति।

तन्मध्यपातित्वादिति। यद्यप्यत्रैव, 'य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते' इति अक्षरपदं कृत्स्नोद्गीथव्यावर्तकं स्पष्टमुपसंहारे श्रूयते – अथापि प्रथमखण्डे उपक्रमेऽप्यक्षरपदश्रवणात् तस्य खण्डस्य प्रणवमात्रविषयकत्वेऽपि द्वितीयखण्डे सामान्यत उद्गीथशब्दस्यैव श्रवणात् तस्य कृत्स्न एव मुख्यत्वात् उपक्रमानुसारेणोपसंहारो नेय इति शङ्कायां तृतीयेऽपि अक्षरस्यैवा-

१—३

अथाधिदैवतम् — य एवासौ तपति, तमुद्गीथमुपासीत।

उद्यन् वा एष प्रजाभ्य उद्गायति; उद्यँस्तमोभयमपहन्ति; अपहन्ता ह वै भयस्य तमसो भवति, य एवं वेद ॥ १ ॥

रूप्येऽपि छान्दोग्यगतविद्याया अध्यस्तप्राणभावोद्गीथावयवप्रणवविषयत्वात्, वाजसनेयकोद्गीथविद्यायाश्चाध्यस्तप्राणभावोद्गानकर्तृविषयत्वात् प्रधानभूतोपास्यभेदे बह्वर्थवादसारूप्यस्याप्रयोजकत्वात् विद्याभेद इति स्थितम्। प्रकृतमनुसरामः।—१-२.

अथाधिदैवतम्। उद्गीथस्योपासनमुच्यत इति शेषः। **अधिदैवतम्** देवतायामित्यर्थः। देवताविषय[1]कमिति यावत्। **य—मुपासीत**। आदित्यदृष्ट्या उद्गीथमुपासीतेत्यर्थः। कर्माङ्गभूतोद्गीथापेक्षया कर्माराध्यस्याऽऽदित्यस्योत्कृष्टत्वात्, अपकृष्टे उत्कृष्टदृष्टेरेव न्याय्यत्वादादित्यदृष्ट्योद्गीथस्योपास्यत्वं द्रष्टव्यम्। अयमर्थः, "आदित्यादिमतयश्चाङ्गे उपपत्तेः" इत्यधिकरणसिद्धः। तच्चाधिकरणं **बृहदारण्यकप्रकाशिका**यामुपन्यस्तं तत्रैवानुसंधेयम्।

उद्गीथेऽध्यस्यमानस्यादित्यस्योद्गीथसाम्यमाह—**उद्यन्—गायति**। वैशब्दोऽवधारणे। **एषः** आदित्यः **उद्यन्** उद्गच्छन्नेव प्रजानामर्थप्रकाशनं कुर्वन् उद्गायतीव भवति। उद्गीथोऽपि प्रजानामुद्गायतीव भवतीत्यर्थः। **उद्यन्—हन्ति**। उद्यन्नेवादित्यः तमोजनितं प्राणिनां भयमपहन्तीत्यर्थः। तमोभयापहन्तृत्वगुणविशिष्टतया उद्गीथे आदित्योपासनस्य फलमाह—**अपहन्ता—वेद**। अन्धकारादिप्रयुक्तभया[2]पहन्ता भवतीत्यर्थः।

1. विषयं ख. ग. 2. भयहन्ता. ख.

धिकारात् मध्येऽपि तद्विषयकत्वमेव स्थाप्यत इति ध्येयम्। अत्राधिकरणे द्वितीयसूत्रं उद्गातृविद्यात्वे बृहदारण्यके उद्गीथविधेति कथं संज्ञेति शङ्कापरिहारपर्यवसायि; तृतीयसूत्रं छान्दोग्यस्यापि कृत्स्नोद्गीथविषयत्वमिति शङ्काद्वारकमिति, 'गाता गेयश्च गेये सकलमसकलश्च' इति प्रधानार्थद्वयस्थापनप्रधानं सूत्रद्वयमिति विमृश्यम्।

उद्गायतीव भवतीति। ननु उद्गायन्निव भवतीति युक्तं प्रयोक्तुम्। न तु तिङन्तोपरि तिङन्तमिति चेन्न — पचति भवति, पक्ष्यति भवतीत्यादिप्रयोगस्य महाभाष्ये दर्शितत्वात् तथैवैतत्समर्थनसंभवात्।

समान उ एवायश्चासौ च; उष्णोऽयम्, उष्णोसौ; स्वर इती-ममाचक्षते, [1]स्वर इति प्रत्यास्वर इत्यमुम्; तस्माद्वा एतमिमममु[2]श्चो-द्गीथमुपासीत ॥ २ ॥

अथ खलु व्यानमेवोद्गीथमुपासीत; यद्वै प्राणिति स प्राणः, यदपानिति सोऽपानः; अथ यः प्राणापानयोः संधिः स व्यानः।

यो व्यानः सा वाक्; तस्मादप्राणन् अनपानन् वाचमभिव्याह-रति॥ ३ ॥ या वाक् सर्क्; तस्मादप्राणन् अनपानन् ऋचमभिव्याहरति;

1. 'स्वरइति' इतीदं न माध्वे। 2. वाकारपाठः ख. कोशे.

समान—चासौ च। [1]**अयम्** अध्यात्मप्रकरणे उक्तः प्राणश्च, **असौ** अधिदैवतप्रकरणे उच्यमान आदित्यश्च समान एवेत्यर्थः। तदेव दर्शयति—**उ-ष्णो—ऽसौ।** **अयं** प्राण उष्णः। उच्छ्वासस्योष्णतयोपलभ्यमानत्वात्। **उष्णोऽ-सौ।** सवितुश्चोष्णत्वं स्पष्टमेवेति भावः। **स्वर—इत्यमुम्।** **इमं** प्राणं स्वर इत्याचक्षते। **स्वरः** गन्तेत्यर्थः। स्वृ शब्दोपतापयोः इत्यस्मात्, धातूनामनेकार्थ-त्वात्, कर्तरि अचि रूपम्। **अमुं** आदित्यं स्वर इति प्रत्यास्वर इति च आचक्षते, उदयास्तमययोः गमनप्रत्यागमन[2]सत्त्वात्। प्राणस्य वायुरूपतया सदागतित्वेन प्रत्या-गमनाभावान्न प्रत्यास्वरसंज्ञेति भावः। अतः स्वरसंज्ञावत्त्वात् औष्ण्याच्च प्राणादित्यौ परस्परसमानावित्यर्थः। **तस्मात्—मुपासीत।** **तस्मात्** उभयोरपि समत्वात् **इमं** प्राणं वा **अमुमादित्यं** वा **एतम्** एतादृशगुणकमुद्गीथमुपासीत। उद्गीथेऽध्यस्त-मुपासीतेत्यर्थः।

प्रकारान्तरेणोद्गीथोपासनमाह—**अथ—मुपासीत।** उद्गीथं व्यानत्वेनोपा-

1. ख. ग. कोशयोः अयंपदं प्राणपदात् पूर्वं असौपदं आदित्यपदात् पूर्वञ्च पठितम्। 2. वत्त्वात्. ग.

इमं प्राणं वेति। अत्राध्यात्ममुपासनमधिदैवतमुपासनञ्च पृथक्फलसाधनतया पृथक्पृथ-गनुष्ठेयमिति प्राणादित्ययोरुपासने कथमपि समुच्चयप्रसक्त्यभावात् इममसुञ्चेति मूले चकारश्रवणे-ऽपि वाकारार्थ उक्तः।

मुख्यमासन्नं प्राणमुद्गीथमुपासीतेत्युक्तम्। अथ व्यानदृष्टिर्विधीयते। अत्र फलानिर्देशात्

यर्क् तत् साम; तस्मादप्राणन् अनपानन् साम गायति; यत् साम स उद्गीथः; तस्मादप्राणन् अनपानन् उद्गायति ॥ ४ ॥

अतो यान्यन्यानि वीर्यवन्ति कर्माणि, यथा—अग्नेर्मन्थ[1]नम्, आजेः सरणम्, दृढस्य धनुष आयमनम्—, अप्राणन् अनपानँस्तानि करोति; एतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ५ ॥

अथ खलूद्गीथाक्षराण्युपासीत, उत् गी थ इति। प्राण एव उत्;

1. मथनं. मा.

सीतेत्यर्थः। को व्यान इत्यत्राह—**यद्वै—व्यानः**। पुरुषो मुखनासिकेन [1]यत् यं वायुं **प्राणिति** बहिर्निःसारयति, सः प्राणाख्यो वायोर्वृत्तिविशेषः। मुखनासिकेन यं वायुमन्तराकर्षति, सोऽपानाख्यवृत्तिविशेषः। तयोरन्त[2]रालवृत्तिविशेषरूपः संधिः व्यान इत्यर्थः।

उद्गीथे व्याना[3]ध्यासहेतुमाह—**यो व्यानः सा वाक्**। वाचो व्याननिर्वर्त्यत्वात् वाक् व्यान एवेत्यर्थः। वाचो व्याननिर्वर्त्यत्वे युक्तिमाह—**तस्मात्—व्याहरति**॥ **तस्मात्** वाचो व्याननिर्वर्त्यत्वादेव हेतोः **अप्राणन् अनपानन्** श्वासमोक्षाकर्षणलक्षणप्राणापानौ विनैव [[4]तत्संधिरूपया व्यानवृत्त्या] वाचमभिव्याहरतीत्यर्थः। **या—उद्गायति**। अप्राणता अनपानता पुंसा क्रियमाणत्वादेव व्यानस्य वागुक्सामोद्गीथानाञ्चैक्यमित्यर्थः।

अतो—मुपासीत। लोके अग्निमथनमर्यादाधावन-दृढधनुरारोपणादि-वीर्यवत्कर्माणि[5] व्यानसाध्यान्येव। अतो हेतोः उद्गीथाख्यवीर्यवत्कर्मणोऽपि व्यानसाध्यत्वात् व्यानमेवाद्गीथमुपासीतेत्यर्थः॥

अथ—थ इति। उत् गी थ इति त्रीणि उद्गीथनामानुप्रविष्टाक्षराण्येवोपासीतेत्यर्थः। **प्राण एव उत्**। उदित्यक्षरे प्राणबुद्धिः कार्येत्यर्थः। तत्र हेतु[6]माह

1. प्राणितिपदं यमित्यतः पूर्वं **ख. ग.** कोशयोः। 2. 'तयोरन्तरा आन्तरवृत्ति' इति **क.** 'तयोरन्तर्वृत्ति' इति—**ग.** तयोरान्तर्वृत्ति. **घ.** 3. अध्यासे इति सप्तमी **क.** कोशे। 4. नेदं **क** कोशे। 5. वीर्यवत्तराणि कर्माणि. **ग.** 6. तत्र हेतुः **ग.**

फलं कर्मवीर्यवत्तरत्वमित्युक्तं शाङ्करे। **अतो यान्यन्यानीति**। अतोऽन्यानीत्यन्वयः। एतद्भिन्नानीत्यर्थः। अभिव्याहरति, उद्गायतीति संप्रत्युक्तवागिन्द्रियकार्यभिन्नानीति यावत्। **मर्यादाधावनेति**। 'आजिर्मर्यादा। **सरणं** धावनम्' इति शाङ्करम्।

प्राणेन ह्युत्तिष्ठति ; वाग् गीः ; वाचो ह गिर इत्याचक्षते ; अन्नं थम् ; अन्ने हीदँ सर्वँ स्थितम् ॥ ६ ॥

द्यौरेव उत्, अन्तरिक्षं गीः, पृथिवी थम् ; आदित्य एव उत्, वायुर्गीः, अग्निः थम् ; सामवेद एव उत्, यजुर्वेदो गीः, ऋग्वेदः थम् ; दुग्धेऽस्मै वाग् दोहम्, यो वाचो दोहः, अन्नवान् अन्नादो भवति, य एतान्येवं विद्वान् उद्गीथाक्षराण्युपास्त उद् गी थ इति ॥ ७ ॥

प्राणेन ह्युत्तिष्ठति । स्पष्टम् । **वाग् गीः** । गी [1]इत्यक्षरे वाग्बुद्धिः कार्या । [2]तत्र हेतुः **वाचो—चक्षते** । वाचो गीश्शब्दवाच्यत्वात् गी इत्यस्य वागध्यासाधिष्ठानत्वमुपपद्यत इति भावः । **अन्नं थम्** । थमि (थ इ?) त्यक्षरे अन्नबुद्धिः कर्तव्येत्यर्थः । तत्र हेतुः[3] **अन्ने—स्थितम्** । अन्नस्य सर्वस्थानत्वेन थकारवत्त्वसाम्यात् थशब्दे अन्नबुद्धिर्युज्यत इति भावः ॥ प्रकारान्तरेणोद्गीथाक्षरोपासनमाह **द्यौरेव—ऋग्वेदः थम्** । [[4]उदक्षरे द्युलोकादित्यसामवेददृष्टिः, गीर (गी अ?) क्षरे अन्तरिक्षवायुयजुर्वेददृष्टिः, थम (?) क्षरे पृथिव्यग्निऋग्वेददृष्टिश्च कार्येत्यर्थः । उक्तस्य चतुर्विधस्योद्गीथनामाक्षरोपासनस्य फलमाह] **दुग्धेऽस्मै वाग् दोहम्** । वाक् अस्मै उपासकाय दोहं दोग्धि[5] । कं दोहमित्यत्राऽऽह **यो वाचो दोहः** । वाक्साध्यं फलमित्यर्थः । फलान्तरमप्याह **अन्नवान् अन्नादो भवति** । प्रभूतान्नो दीप्तामिश्च भवतीत्यर्थः । **य—इति** । स्पष्टोऽर्थः ॥

1. **घ.** कोशेऽयं पाठः । अन्यत्र सर्वत्र **गीरित्यक्षरे** इति. 2. **ख. ग.** कोशयोरिदं वाक्यं न । 3. हेतुमाह **ख.** 4. इदं कुण्डलितं न **क. घ.** कोशयोः । **क** कोशे उदित्यादि थमित्यन्तं स्पष्टमिति, **घ** कोशे स्पष्टोऽर्थ इति चास्ति । अत्र गीर्, थम्, इति रेफमकारान्तानुकरणञ्च चिन्त्यम् । 5. दोग्धीत्यर्थः **ख.**

एवं अर्थे काश्चित् दृष्ट्य उक्ताः; वक्ष्यन्ते च । मध्ये वाचकशब्दे दृष्टिरुच्यते । तत्रोद्गीथरूपे वाचकशब्दे वर्णत्रयपृथक्कारेण चतुर्धा दृष्टिरुच्यते वागन्नादिसिद्धिफला । बृहदारण्यके तु वाग्विशिष्टप्राणं प्रस्तुत्य, प्राणः उत्, वाक् गीथा इति द्वेधा विभागमात्रं कृतम् (३–३–२३) । ननु किमिति मध्ये वाचकशब्दे दृष्टिविचार इति चेत् — उच्यते । विशिष्योद्गीथमात्रे वक्तव्या दृष्टिरुक्ता । अथ तु प्रणवत्वेन सामत्वेन वा सामान्याकारेण, तथा सामशब्दघटकाक्षरविभागपूर्वं सामान्यतः सामविचारपूर्वं चोद्गीथचिन्तनानि वक्ष्यन्ते । अतो विशेषभूतार्थदृष्टेरवसितत्वात् विशेषनामदृष्टिः प्रस्तूयत इति युक्तमिति ।

अथ खल्वाशीःसमृद्धिरुपसरणानीत्युपासीत — येन साम्ना स्तोष्यन् स्यात्, तत् सामोपधावेत् ॥ ८ ॥

यस्यामृचि, तामृचम्; यदार्षेयम्, तमृषिम्; यां देवतामभिष्टोष्यन् स्यात्, तां देवतामुपधावेत् ॥ ९ ॥

येनच्छन्दसा स्तोष्यन् स्यात्, तच्छन्द उपधावेत्; येन स्तोमेन स्तोष्यमाणः स्यात्, तँ स्तोममुपधावेत् ॥ १० ॥

यां दिशमभिष्टोष्यन् स्यात्, तां दिशमुपधावेत् ॥ ११ ॥

आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन् अप्रमत्तः। अभ्याशो

अथ—त्युपासीत। आशीस्समृद्धिहेतुभूतानि **उपसरणानि** उपासनानीति मत्वोपासनं कुर्यादित्यर्थः। केषामुपासनं कार्यमित्यत्राह—**येन—धावेत्।** **उपधावेत्** चिन्तयेत्। उपासीतेत्यर्थः[1]। **यस्यामृचि तामृचम्।** यस्यां ऋचि साम्ना स्तोष्यन् स्यात्, तामृचं चिन्तयेदित्यर्थः। **यदार्षेयम्, तमृषिम्।** ऋषिसंबन्धि आर्षेयम्। [2]ऋषिदृष्टमित्यर्थः। यस्यार्षेयं **यदार्षेयम्।** शिवभागवतवत् समासः। साम यदृषिकम्, तमृषिं चिन्तयेदित्यर्थः। **यां—धावेत्।** स्पष्टम्। **येन—धावेत्।** **छन्दः** गायत्र्यादिकमित्यर्थः। **येन स्तोमेन—धावेत्। स्तोमः** त्रिवृत्पञ्चदशादिलक्षणः ऋक्संख्याविशेषः। **यां—धावेत्।** यद्दिगभिमुखतया स्तोष्यन् स्यात्, तां दिशञ्च ध्यायेदित्यर्थः। **आत्मानं—अप्रमत्तः।** उक्तं सर्वं ध्यात्वा **अन्ततः** अन्ते **आत्मानमपि [च] उपसृत्य** ब्रह्मात्मकं ध्यात्वा **कामं** आत्मन इष्टं ध्यायन् **अप्रमत्तः** अवहितः = स्वरवर्णाद्यभ्रेषानुकूलमनोवधानयुक्तस्सन्

1. एतदनन्तरं 'शिष्टं स्पष्टम् इति **ख.** कोशे। 2. इदमर्थवर्णनं **ख.** कोशे न।

आशीस्समृद्धिः अशिषः समृद्धिः। 'अन्नं वै प्राणा' इतिवत् उपचारात् **समृद्धिहेतु**भूतानीत्यर्थलाभः। **इति** इत्यस्य इति मत्वेत्यर्थः। शाङ्करे तु **आशीस्समृद्धिरित्येतदनन्तरं** 'उच्यत' इति शेषपूरणं कृतम्। **उपसरणानि** उपसर्तव्यानि ध्येयानि, **इति** वक्ष्यमाणप्रकारेण इति च व्याख्यातम्। **उपसरणपदं** वक्ष्यमाणोपधावनोपसरणोभयपरम्। सामादीनां बहिःस्थिता विप्रकर्षात् उपधावनमुक्तम्। स्वात्मनस्तु अतथात्वात् **उपसृत्येति** उपसरणमेवोक्तम्। **ब्रह्मात्मकं** ध्यात्वेति। नन्वत्र ब्रह्मात्मकत्वं कुतो लभ्यते। यावता शाङ्करे, **'आत्मानं स्वं रूपं गोत्रनामादिभिः' इत्येव** व्याख्यातमिति चेत् — स्वफलार्थं केवलस्वात्मध्यानं न स्वरसमिति एव-

ह यदस्मै स कामः समृध्येत, यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ १२ ॥

इति प्रथमाध्याये तृतीयः खण्डः ।

१—४.

ओमित्येतदक्षरमुद्गीथमुपासीत ; ओमिति ह्युद्गायति । तस्योपव्याख्यानम् ॥ १ ॥

देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन् ; ते छन्दोभिरच्छाद-

---

बहिष्पवमानादिस्तोत्रमारभेतेत्यर्थः । **अभ्याशो—स्तुवीतेति** । यत्कामनया [एवंवित्] स्तोत्रं करोति, स कामः यस्मात् कारणात् **अभ्याशः** क्षिप्रं **समृध्येत** समृद्धिं प्राप्नोतीत्यर्थः । अभिआङ्पूर्वात् अश्नोते:[1] असुनि अभ्याश इति रूपम् । क्षिप्रफलसिद्धिरुपसरणफलमित्यर्थः । द्विरुक्तिर्विद्यासमाप्त्यर्था ॥ १-३.

ओमित्येतत्—व्याख्यानम् । पूर्ववदर्थः । अत्रोक्तस्यैवोद्गीथोपासनस्य पुनःपरामर्शो मध्ये उद्गीथनामाक्षराद्युपासना[2]न्तरितत्वादिति द्रष्टव्यम् । **देवाः—प्राविशन्** । देवाः मरणभीताः [सन्तः] वैदिकं कर्म प्रारब्धवन्त इत्यर्थः । **ते छन्दो-**

1. अश्नातेः **क**. 2. अयं **क** पाठः । नामाक्षराद्युपासनया **ग** नामाक्षरोपासनया **ख**.

मुक्तमिति । यद्वा **सर्वं ध्यात्वा अन्ते आत्मानमप्युपसृत्येत्युक्त्वा** तत्र 'आत्मानमुपसृत्ये' त्यस्य ब्रह्मात्मकं ध्यात्वेति तात्पर्यार्थ उक्तः । तेन उक्तं सर्वं **ब्रह्मात्मकं ध्यात्वेत्युक्तं** भवति । **तथा च आत्मानमित्यस्य** सर्वनामरूपपर्यवसन्नभूमिं परमात्मानमित्यर्थः । **अन्ततः** द्वारभूतानां चिन्तनानन्तरम् । **उपसृत्य** । पूर्वं यत्र यत्रोपधावितम् तत्रतत्रैवास्यान्तःस्थित्या पुनर्धावनप्रसक्त्यभावादुपसरणमेवोक्तम् ॥ पूर्वोक्तदृष्टीनां आशिषः प्रबलकर्मप्रतिबन्धादि फलम् । एषां तु उपसरणानामाशिषः क्षिप्रसमृद्धिः फलम् । **समृद्धिः** पौष्कल्यम् । आत्मानमिति ब्रह्मात्मकत्वध्यानस्याप्युक्तत्वाद्धि न किञ्चिद्वैकल्यप्रसक्तिः । उक्तं हि श्रीमति **रहस्यत्रयसारे** परदेवतापारमार्थ्याधिकारे, 'यथावदविज्ञाय करणे फलानि विकलानि; भगवच्छरीरत्वादिविज्ञानपूर्वं करणे च पूर्णानि' इति । एवमेकैकोपधावनस्यापि अन्तरात्मभूतपरमात्मोपसरणावसानत्वात् **उपसरणानि** इत्येवादौ उपनिषदि श्रुतम् ॥ इमानि चोपसरणानि सर्वविद्याशेषभूतानि, उक्तरीत्या विशिष्योद्गीथविद्याविधानस्यात्रावसितत्वात् इहापि तदावश्यकत्वज्ञापनाय संप्रत्युक्तानि ॥ **देवा वै** इति । लोके कुतश्चिद्भीताः जनाः क्वचिद् गह्वरे प्रविश्य लीना भवन्ति ।

यन्; यदेभिरच्छादयन्, तत् छन्दसां छन्दस्त्वम् ॥ २ ॥

तानु तत्र मृत्युः, यथा मत्स्यमुदके परिपश्येत्, एवं पर्यपश्यदृचि साम्नि यजुषि। ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥ ३ ॥

यदा वा ऋचमाप्नोति, ओमित्येवातिस्वरति; एवँ साम; एवं यजुः; एष उ स्वरः; यदेतदक्षरमेतदमृतमभयं तत् प्रविश्य देवा अमृता

भिरच्छादयन्। छन्दोभिः कर्मविनियुक्तैर्वैदिकैर्मन्त्रैः मृत्युभीताः सन्त आत्मानं छादितवन्त इत्यर्थः। वैदिकमन्त्रकञ्चुकच्छन्ना इति यावत्। यत्—छन्दस्त्वम्। छादकत्वादेव [1]छन्दसां छन्दस्त्वमित्यर्थः। तानु—यजुषि। उशब्दो निरर्थकः। तान् देवान् कर्मपरान्, यथा मत्स्यग्राही उदके मत्स्यं परिपश्यति, एवं मृत्युः त्रयीविहित[2]कर्मानुप्रविष्टान् कर्मभ्रेष[3]समयं प्रतीक्ष्य ग्रहीतुमैच्छदित्यर्थः। ते नु—प्राविशन्। ते देवाः मृत्योश्चिकीर्षितं ज्ञात्वा [ऋक्सामयजूरूप] त्रयीविहित-यज्ञादिकर्मभ्यः [4]उद्गताः कर्मनिर्मलीकृतान्तःकरणास्सन्तः स्वरशब्दितमोंकारमुपासितुं प्रवृत्ता इत्यर्थः। [नुशब्दः खल्वर्थः]। कथं पुनः स्वरशब्दवाच्यत्वमोंकारस्येत्यत्राह—यदा—यजुः। यदा वै ऋगादिकं आप्नोति आरभते, तदा ओमिति अतिस्वरति शब्दं करोतीत्यर्थः। एष उ स्वरः। तस्मात् एष ओङ्कार[5] एव स्वर इत्यर्थः।

1. वैदिकमन्त्राणां ख. ग. 2. विहितं ख. ग. 3. भ्रंश. ग. 4. अयं ग. घ. पाठः। ऊर्ध्वा अधिकाः इति ख. उद्गातारः इति क. 5. एवकारः क कोशे।

तत्र दृष्ट्वेत्, ततोऽपि निष्क्रम्य दुर्गे प्रविश्यात्मानं रक्षन्ति इति दृष्टम्। तथा कृतं देवैरिति अत्रोक्तम्। तत्र विद्यायाः छन्दसाञ्चामूर्ततया वस्तुतः प्रवेशे छादने च कर्मत्वकरणत्वायोगात् तात्पर्यान्तरं दर्शितं वैदिककर्मेत्यादिना। यदा वा ऋचमिति। इदमेव तैत्तिरीयेऽप्युक्तम्—'यो वेदादौ स्वरः प्रोक्तः' इति। तत्र, 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इत्युक्तमेव 'देवा वै' इत्यादिना मुखान्तरेणात्र दर्शितम्। तत्रोक्तस्त्यागश्च आत्मार्पणरूपं प्रपदनं स्वरस्य प्रणवस्यार्थ इति। 'स्वरमेव प्राविशन्' इति च तदेवोच्यते। 'ओमित्यात्मानं युञ्जीत' 'एतद्वै महोपनिषदं देवानां गुह्यम्' इति च न्यासघट्टे तत्र। अमृताभयरूपेणोद्गीथाक्षरोपासनफलं तत्र प्रवेशः। तदर्थज्ञानपूर्वकभक्तिप्रपत्तिनिष्पत्तिरिति याक्त्। प्रवेशफलममृतत्वमिति ध्येयम्।

अ[1]भया अभवन् ॥ ४ ॥

स य एतदेवं विद्वानक्षरं प्रणौति, एतदेवाक्षरँ स्वरममृतमभयं प्रविशति; तत् प्रविश्य, यदमृता देवाः, तदमृतो भवति ॥ ५ ॥

इति प्रथमाध्याये चतुर्थः खण्डः ।

१—५.

अथ खलु य उद्गीथः स प्रणवः; यः प्रणवः स उद्गीथ इति असौ वा आदित्य उद्गीथ एष प्रणवः; ओमिति ह्येष स्वरन्नेति ॥ १ ॥

1. अभया इति न माध्वे ।

यत्—अभयं । [[1]ओंकार एव मरणभयादिनिवर्तक इत्यर्थः ।] तत्—अभवन् । मरणभयादिनिवर्तकमोंकारं[2] प्रविश्य देवा अमृता अभयाश्चाभवन्नित्यर्थः ।

स य—भवति । य एतदेवाक्षरं स्वरममृतमभयं **प्रणौति** [3]स्तौति – णु स्तुताविति [हि] धातुः । उपास्त इति यावत्—, तादृशामृतत्वादिगुणकं प्रणवं प्रविश्य, देवाः यादृशामृतत्व[4]युक्ताः, [5]स तादृशो भवतीत्यर्थः । १. ४.

प्रणवोद्गीथयोरेकत्वविज्ञानमनेकपुत्रफलकमुपदिश्यते—अथ—इति । उद्गात्रा प्रयुज्यमानो य **उद्गीथः** उद्गीथावयव ओंकारः, स एव होत्रा प्रयुज्यमानः प्रणवः । यश्च होत्रा प्रयुज्यमानः प्रणवः, स एवोद्गात्रा प्रयुज्यमान उद्गीथावयव ओंकार इतीतरेतरैक्याध्यासः कर्तव्य इत्यर्थः ।

एवं तयोरैक्यं कृत्वा तत्रादित्यदृष्टिमुपदिशति **असौ—प्रणवः** । कथमादित्यस्य प्रणवत्वमित्यत्राह—ओं—एति । **एषः** आदित्यः **ओमिति स्वरन्** कर्तव्यकर्मणां ओमित्यनुज्ञां कुर्वन्निवोदेतीत्यर्थः । स्वृ शब्दोपतापयोरिति हि

1. कुण्डलितं ख. कोशे । 2. यदेतदोंकारम् क. 3. प्रणौति उपास्त इति यावत् इत्येव ख. कोशे । 4. त्वादियुक्ताः ख. 5. 'स' इति क. कोशे ।

प्रणवोद्गीथयोरेकत्वविज्ञानमिति । होतृषदनवाक्ये एतावन्मात्रोक्त्या तदनुसारादेतावदुक्तम् । आदित्यमुख्यप्राणदृष्टिकरम्बितमेव तद् विवक्षितम् । तथाविधस्यैव पुत्रफलकत्वोक्तेः ।

अथ खल्विति । उद्गीथे आदित्यत्वं तृतीयखण्डारम्भेऽप्युक्तम् । अत्रोद्गीथप्रणवैक्यमुपपाद्य प्रणवभूतोद्गीथे रश्मिविशिष्टादित्यदृष्टिर्विधीयते । उद्गीथप्रणवैक्योपदेशः, 'आदित्यस्य

'एतमु एवाहमभ्यगासिषम्; तस्मान्मम त्वमेकोऽसि' इति ह कौषीतकिः पुत्रमुवाच—, 'रश्मी[1]स्त्वं पर्यावर्तयात्', बहवो वै ते भविष्यन्ति'; इत्यधिदैवतम् ॥ २ ॥

अथाध्यात्मम् — य एवायं मुख्यः प्राणः, तमुद्गीथमुपासीत; ओमिति ह्येष स्वरन्नेति ॥ ३ ॥

'एतमु एवाहमभ्यगासिषम्; तस्मान्मम त्वमेकोऽसि' इति ह कौषीतकिः पुत्रमुवाच—, 'प्राणाँस्त्वं भूमानमभिगायतात्, बहवो[2]मे भविष्यन्ती'ति ॥ ४ ॥

1. पर्यावर्तयतात् मा. 2. बहवोवैमे शां. बहुवोवैते मा.

धातुः । अतः सविता प्रणवः, अत एवोद्गीथश्चेति भावः । **एतमु—उवाच** । एतमादित्यमेवोद्गीथमहं गीतवानस्मि । न तु बहुरश्मिगुणविशिष्टतयोपासितवानस्मि । तेन दोषेण मम त्वमेक एव पुत्रोऽभूरिति कौषीतकिः स्वपुत्रमुवाचेत्यर्थः । **रश्मीन्—भविष्यन्ति** । तस्मात् त्वं बहुरश्मिविशिष्टादित्यविज्ञानावृत्तिं कुरु । तव रश्मिबहुत्वविज्ञानमहिम्ना बहवः पुत्रा भविष्यन्तीत्यप्युवाचेति पूर्वेण संबन्धः । **पर्यावर्तया**दिति पुरुषव्यत्ययः छान्दसः । लेटि, "लेटोऽडाटौ" इत्याडागमः । **इत्यधिदैवतम्** । उपदिष्टमिति शेषः ।

अथाध्यात्मम् । उपदिश्यत इति शेषः । **य—उपासीत** । स्पष्टोऽर्थः । **ओं—एति** । **एष** प्राणो वागादिप्राण[1]प्रवृत्त्यथ ओमित्यनुज्ञां कुर्वन्निव संचरति । तस्मात् प्राण एव प्रणवः, उद्गीथश्चेत्यर्थः । **एतमु—उवाच** । पूर्ववदर्थः । **प्राणान्—भविष्यन्तीति** । **मे** (मम?) बहवः पुत्रा भविष्यन्तीत्यभिसंधाय मुख्यं प्राणमुपासीनस्त्वं **भूमानं** बहुत्वमाश्रितान् वागादीन् प्राणांश्च मुख्यप्राणेन सहाभिसंधाय **अभिगायतात्** उद्गानं कुरु इत्यर्थः ।

1. प्राणवृत्त्यर्थ ख.

रश्मित इवोद्गीथस्यानेकवेदव्यापिप्रणवरूपतया भूमाऽस्तीति ज्ञापनार्थः । **बहवो वै ते,' 'बहवो मे'** इत्युभयं समानार्थम् । परंतु प्रथमं वाक्यं वक्तृभिप्रायानुवादरूपम्, द्वितीयमनुसंधात्रभिप्रायाकारात्मकम् । अतः ते, मे इति निर्देशभेदः । **भूमानमिति** । भूमपदस्य बहुत्वमेव मुख्यार्थः । अथापि महिमादिपदवत् प्राणानिति धर्मिवाचिपदसामानाधिकरण्यमिष्टम् ।

अथ खलु — य उद्गीथः स प्रणवः, यः प्रणवः स उद्गीथ इति — होतृषदनाद्वैवापि दुरुद्गीथ[1] **(त) मनुसमाहरतीति अनुसमाहरतीति ॥ ५ ॥** इति प्रथमाध्याये पञ्चमः खण्डः ।

1. दुरुद्गीतं । मा. शां.

उक्तप्रणवोद्गीथैकत्वविज्ञानफलमाह—**अथ**—**समाहरतीति** । **अपि दुरुद्गीथं** वेदनहीनमप्युद्गीथमित्यर्थः । **होतृषदनात्** होतृकर्तृकोद्गीथप्रणवैक्यज्ञानादित्यर्थः । **होतृषदनादित्यत्र**, 'पूर्वपदात् — ' इति षत्वम् । अयं भावः—उद्गीथप्रणवैकत्व-

---

दुरुद्गीथमित्यस्य, वेदनविहीनमुद्गीथमित्यर्थस्य श्रीभाष्ये भाषितत्वात् **होतृषदनपदमपि** ज्ञानविशेषपरमिति ज्ञापयितुं होतृषदनपदं पश्चाद् व्याख्यातम् । अत्र शाङ्करे, 'होतुः सदनं स्थानम् । हौत्रात् कर्मण इति फलितार्थः' इति व्याख्यातम् । होतृस्थानसकाशात् दुरुद्गीथसमाधानमायातीत्युक्तौ हौत्रकर्मवशाद्भवतीत्यर्थसिद्धेः । दुरुद्गीतमिति पठित्वा, 'उद्गीतमुद्गानम्; तस्य दुष्टत्वं स्वरादिविपर्यय' इति तत्रोक्तम् । हौत्रं कर्म च शंसनाख्यम् । तत्र प्रणवप्रयोगोऽस्ति । तथाचायमत्र **भामतीकल्पतरुदर्शितनिष्कर्षः**— उद्गीथप्रणवैक्यविज्ञाने उद्गातृकर्तृके सति, यथात्प्रयुक्तप्रणवघटितहोतृशंसनात् उद्गीथस्य स्वरादिविपर्ययकृतदोषोऽपि परिहृतो भवतीति । अत्र वेदनविधिप्रकरणे वेदनहानिप्रयुक्तदुष्टत्वं तत्परिहारश्च प्राप्तं परित्यज्य स्वरादिविपर्ययपरिहारोपदेशो न सङ्गतः । किञ्चैतादृशार्थादरणेन 'समाहारात्' इति सूत्रे वेदननियमपूर्वपक्षो दुरुपपादः । स्वरादिविपर्ययदोषस्य औद्गात्रज्ञानविशिष्टहोतृशंसनपरिहार्यत्वकथने स्वराद्यावश्यकत्वैव सिध्येत् । न ज्ञाननियमः, दोषपरिहारकमात्रत्वात् । प्रायश्चित्तवत् । अतो वेदनहीनमुद्गीथमित्यर्थोऽस्मद्भाष्यादृतः । दुरुद्गीथमिति पाठः तद्भाष्यादावपि लक्ष्यते । **इति होतृषदनादित्यस्य**, इत्यस्मिन् उद्गातुर्ज्ञाने सति हौत्रशंसनादित्यर्थोऽपि क्लिष्ट. । षदॢ विशरणगत्यवसादनेषु । गत्यर्था बुध्यर्थाः । तथाच **इति होतृषदनात्** इत्याकारकहोतृकर्तृकवेदनादित्यर्थः । एवञ्चोद्गातृकर्तृकोद्गीथप्रणवैक्यवेदनविहीनमुद्गीथं होतृकर्तृकतादृशवेदनात् समादधातीति विशिष्टार्थः । **दुरुद्गीतमिति** पाठेऽपि कर्मणि क्त इति प्रकृतोद्गीथग्रहणं सुकरम् । दुरित्यनेन वेदनस्यात्यावश्यकत्वं व्यज्यत इति पूर्वपक्षी । **अत्र नयमयूखमालिका** मतद्वयार्थमिश्रणेन संकुला ।

अत्र श्रुतौ उद्गीथप्रणवैक्यवेदनपूर्वकं उद्गीथे आदित्यादिदृष्टिरूपं वेदनं प्रकृतम् । तत्र होतृकर्तृकैक्यवेदनकृतं समाधानं तत्तुल्याकारकान्यकर्तृकवेदनहानावेव युज्यत इति, वेदनविहीनोद्गीथरूपदुरुद्गीथे वेदनस्यैवमाकारकत्वमर्थसिद्धम् । यदि तु पुत्रफलार्थप्रकृतपूर्णवेदनहीनत्वमेव दुष्टत्वं विवक्षितम्, तर्हि, **अथ खलु—स उद्गीथ इति** इत्यस्य पूर्वोक्तार्थप्रतीकग्रहणरूपतां स्वीकृत्य **इति होतृषदनादित्यस्य** इत्यारभ्योक्तकृत्स्नविषयकहोतृकर्तृकवेदनादित्यर्थवर्णनमनुरूपम् । होतृकर्तृकोद्गीथप्रणवैक्यज्ञानादित्येवार्थेऽपि प्रयोज्यत्वार्थिका पञ्चमीति तन्मूलकहोतृकर्तृकपूर्णवेदनं लभ्येत । तथाचोद्गात्रा संकल्पितस्य वेदनस्य तेनाननुष्ठानेऽपि होत्रानुष्ठानं प्रणवोद्गीथै-

विज्ञानं होत्राऽपि कर्तव्यम्; उद्गात्रापि कर्तव्यम्। प्रणवे होतुः, उद्गीथे उद्गातुश्च कर्तृत्वात्। तत्रोद्गातुरेतादृशैकत्वविज्ञानाभावेन दोषयुक्तमप्युद्गात्रा प्रयुज्यमानमुद्गीथं होता स्वीयोद्गीथप्रणवैकत्वविज्ञानमाहात्म्यादनुसमाहरति समादधाति = अदुष्टं करोतीति। अनुसमाहरतीति द्विरुक्तिर्विद्यासमाप्त्यर्था।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते। गुणोपसंहारपादे — 'अङ्गेषु यथाश्रयभावः'। अङ्गेष्वाश्रितानामुपासनानां क्रतोर्बहिःप्रयोगासंभवेन आश्रयतन्त्रत्वस्य वक्तव्यतया प्रयोगवचनेनाश्रयाणामुद्गीथादीनां समुच्चयनियमेन आश्रितानामपि समुच्चयनियमो युक्तः; इतरथा तदाश्रितत्वानुपपत्तेरित्यर्थः। 'शिष्टेश्च'। 'गोदोहनेन पशुकामस्य प्रणयेत्' इतिवत् अधिकारान्तराश्रवणेन 'उद्गीथमुपासीत' इति उद्गीथाङ्गतयोपासनविधानाच्च नियमेनोपासना उपादेया। न च वीर्यवत्तरत्वरूपफलार्थत्वस्य, 'तन्निर्धारणानियमः — ' इत्यत्रोक्तत्वात् कथं तस्योद्गीथाङ्गत्वमिति वाच्यम् — 'उद्गीथमुपासीत' इति वाक्येन उपासनस्योद्गीथरूपाश्रयसंबन्धे वीर्यवत्तरत्वरूपफलसंबन्धे च बोध्यमाने वाक्यभेदप्रसङ्गात्। न च वाक्यभेदभीत्या तस्य फलविधित्वासंभवेऽपि तस्य फलाकाङ्क्षायां रात्रिसत्रन्यायेन वीर्यवत्तरत्वस्यैवाऽऽर्थवादिकस्य फलत्वकल्पनं संभवतीति वाच्यम् — पर्णतादावपि तथा प्रसङ्गात्। 'समाहारात्'। 'होतृषदनाद्वैवापि दुरुद्गीथमनुसमाहरति' इति उपासनस्य समाहारनियमो दृश्यते। उद्गातृकृतवेदनहानिप्रयुक्तोद्गीथवैगुण्यस्य होतृकर्तृकप्रणवोद्गीथैकत्व-

---

क्याद् भवितुमर्हतीति होतृकर्तृकवेदनं तत्स्थाने उपदिश्यते। एवञ्च **इति होतृषदनादित्यत्र इति**शब्दः ऐक्यस्य हेतुत्वपरोऽपि स्यात्। ननु, 'वेदनहानौ अन्येन समाधानं ब्रुवत्'इति समाहारसूत्रभाष्ये वेदनहानौ वेदनादन्येन समाधानभाषणात् होतृशंसनपरमेव **सदनपदमिति** चेन्न—शुद्धशंसनस्यैव वेदनफलपुत्रादिहेतुत्वे शंसनस्य नियताङ्गतया वेदनस्याननुष्ठानापत्तेः। अतः उद्गातृकर्तृकोद्गीथाश्रितप्रकृतवेदनाभावे **अन्येन** होतृकर्तृकप्रणवाश्रितवेदनेनेत्येव तदर्थः। अस्तु वा **इतिहोतृषदनादित्यत्र इतिशब्दस्य** हेतुपरत्वे **होतृषदनात्** होतृस्थानादिति। एवञ्च **अन्यत्र** इत्यस्य होतृस्थानादित्यर्थः। होतृकर्तृकवेदनादिति तु फलितार्थः संदर्भबलसिद्धः।

कर्तव्यमिति। कर्तुं योग्यमित्यर्थः। भावप्रकाशिकानुरोधात्। न तूभाभ्यामपि युगपदनुष्ठेयमिति। नापि होत्रा प्रथमं तत्करणं संकल्पनीयम्। उद्गीथे हि प्रकृतदृष्टौ स्वरसतः कर्तृत्वमुद्गातुः। औद्गात्रसमाख्यानुरोधाच्च। तेन यथासंकल्पमकरणे उद्गीथप्रणवैक्यरूपमौचित्यं प्रदर्श्य होतुस्तदधिकारोऽनुमन्यतेऽत्रेति। **अधिकारान्तरेति**। विधिवाक्ये फलसंयोगेत्यर्थः।

विज्ञानेन समाधानोक्त्या उपासनस्याऽऽवश्यकत्वप्रतीतेरित्यर्थः । 'गुणसाधारण्यश्रुतेश्च' । उपासनगुणस्य उपास्यस्य प्रणवस्य, 'तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयति ओमिति शंसति ओमित्युद्गायति' इति साधारण्यश्रुतेश्चोपासनावश्यकता गम्यते । प्रकृतपरामर्शिना **तेने**तिशब्देन उपास्यस्य प्रणवस्यैव प्रतीतेः । अत उपासननियमोऽस्तीति प्राप्ते —

उच्यते । 'न वा तत्सहभावाश्रुतेः' । न वा क्रतुषूपादाननियमः उद्गीथोपासनादेः । कुतः ? **तत्सहभावाश्रुतेः** उद्गीथाङ्गभावाश्रुतेरित्यर्थः । वीर्यवत्तरत्वरूपफलार्थतया गोदोहनतुल्यत्वेन क्रत्वर्थत्वाभावादिति भावः । न च पर्णतादेरपि पुरुषार्थत्वप्रसङ्गः । पर्णतायाः जुहूसंबन्धेऽप्यव्यापाररूपतया फलनिष्पादकत्वाभावेन फलाकाङ्क्षाया एवाभावात् फलकल्पनाया अप्रसक्तेः । [1]अतः फलाकाङ्क्षासिध्यर्थं क्रतुपरागेण[2] व्यापाररूपतां संपादयितुं जुहूलिङ्गेन क्रतुमुपस्थाप्य तत्संबन्धबोधकशब्दो वा कल्प्यः; जुहूशब्दस्य [3]वा जुहूसंबन्धिक्रतुलक्षकत्वं कल्प्यम् । ततश्च क्रतुफलेनैव नैराकाङ्क्ष्यात् रात्रिसत्रन्यायेनाऽऽर्थवादिकफलकल्पना न समुन्मिषति । इह उपासनायाः स्वयं व्यापाररूपायाः क्रतूपरागमन्तरेणैव फलाकाङ्क्षा संभवति । सत्याञ्च फलाकाङ्क्षायां वाक्यशेषस्यैव फलसमर्पकतया परिणामसंभवे फलवत्कर्मान्तरबोधकवाक्यकल्पनाद्यनपेक्षणात् । तस्माद् वाक्यशेषश्रुताय तस्मैतस्मै फलायोद्गीथाद्याश्रयविशिष्टोपासनविधिरित्येव युक्तम् । न च उपासनानामाश्रयतन्त्रत्वात् सति आश्रये

1. अत इति क. कोशे । 2. क्रतूपकारेण. क. । 3. वाशब्दः लक्षकत्वमिति पादानन्तरं ख. कोशे ।

उपास्यस्य प्रणवस्य सोपासनप्रणवस्य ।

जुहूसंबधेऽपीति । जुह्वसंबन्ध इव केवलजुहूसंबन्धेऽपं त्यर्थः । **फलायोद्गीथाद्याश्रयविशिष्टेति** । प्रथमतः फलाकांक्षायामार्थवादिकफलस्योद्देश्यत्वेनान्वये सिद्धे उद्गीथस्य नोद्देश्यत्वम्, केवलमाश्रयत्वमेवेत्यर्थ । न चाश्रयत्वस्यापि कर्मत्वरूपत्वात् फलोद्गीथोभयकर्मकत्वे वाक्यभेद एवेति वाच्यम्—उपासनस्य ज्ञानरूपतया विषयाकाङ्क्षायां, 'सविषयकधातुयोगे विषयित्वं द्वितीयार्थः' इति न्यायेन उद्गीथस्य विषयत्वेनैवान्वयात्। तदुक्तं **सारावल्यौ**, "आश्रयालम्बमात्रात्" इति । **आलम्बो** विषयभावः । एवञ्च सति, 'मनो ब्रह्मेत्युपासीत,' आत्मानमुपासीत' इत्यादाविव उद्गीथस्योपासनाङ्गत्वं तु न भवति । उद्गीथस्य क्रत्वङ्गतया,

तत्तन्त्राणामुपासनानामप्यावश्यकत्वमिति वाच्यम्। इदमेव ह्युपासनाना[1]मप्याश्रयतन्त्रत्वम्, यत् आश्रये सत्येव वृत्तिः, नान्यदाऽस्तीति; न तु यावदाश्रयसत्त्वं वृत्तिरिति। ततश्च कामोपबद्धत्वादुपासनानाम्, कामनानाञ्चानित्यत्वात् तदवबद्धानामप्युपासनानामनित्यत्वमेव। 'दर्शनाच्च'। 'एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वाश्चर्त्विजोऽभिरक्षति' इति ब्रह्मणो वेदनेनैव सर्वेषां रक्षणं ब्रुवती श्रुतिरुद्गातृप्रभृतीनां वेदनस्यानियमं दर्शयतीति स्थितम्।

केचित्तु — उद्गीथविद्यायाः क्रत्वर्थत्वाभावे, 'अन्यथात्वं शब्दादिति चेत्' इत्यधिकरणे, 'उद्गीथविद्यायाः क्रत्वर्थत्वेन क्रतुसाद्गुण्यफलकत्वेऽप्यार्थवादिकमपि फलं तदविरुद्धं ग्राह्यमिति देवताधिकरणे प्रतिपादितम्' इति भाष्यं विरुध्येत। तथा पुरुषार्थाधिकरणे, 'यदेव विद्यया करोति' इति विद्यायास्तृतीयाश्रुत्या कर्माङ्गत्वप्रतिपादनात् न विद्यातः पुरुषार्थ इति, 'तच्छ्रुतेः' इति सूत्रेण पूर्वपक्षे कृते, तत्र विद्याशब्दस्य प्रकृतोद्गीथविद्याविषयत्वेन उद्गीथविद्यामात्रस्य कर्माङ्गत्वेऽपि न ब्रह्मविद्यायाः कर्माङ्गत्वमस्तीत्येतदर्थप्रतिपादकयोः, 'असार्वत्रिकी' इति सूत्र तद्भाष्ययोर्विरोधश्च स्यात्। अतश्चास्त्येव क्रत्वर्थत्वम्। न च, 'तन्निर्धारणानियमः', 'अङ्गेषु यथाश्रयभावः' इत्यधिकरणद्वयविरोधः; तयोर्नियतक्रत्वर्थत्वप्रतिक्षेपमात्र-

1. अपिः क कोशे।

निर्णीतस्य क्रतुफलेनैव प्राकरणिकेन फलवत्तया उपासनाङ्गत्वायोगात्। तथाचोद्गीथस्याश्रयत्वं पर्यवसितमिति न दोषः। ततश्चोद्गीथः उपासनस्यालम्बनतयोपकारकमात्रम्; नाङ्गम्। 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादौ तु गोदोहनस्य व्यापारानाविष्टस्य फलकरणत्वायोगात् प्रणयनं तदुपकारकम्; प्रणयनस्य च व्यापारस्य द्रव्यमन्तरा निष्पत्त्यभावात् तस्य गोदोहनमप्युपकारकमिति भेदः।

केचित्तु इति। अत्रास्वरसोऽभिमतः। नान्यथात्वाधिकरणभाष्यविरोधः। उद्गीथविद्यायाः क्रत्वनङ्गत्वस्योपर्येव वक्ष्यमाणतया तस्यांशस्य सिद्धावसिद्धावपि तदधिकरणरचना संभवतीति प्रदर्शनार्थत्वात् तत्रत्यभाष्यस्य। तदुक्तं सारावलौ। नापि 'असार्वत्रिकी' इति सूत्रभाष्यविरोधः। तत्र विद्याशब्दो न सर्वविद्यापरः, किंतूद्गीथविद्यापर इति नात्येवावसरः पूर्वपक्षस्येत्येतावदेवोच्यते, नोद्गीथविद्याया अङ्गत्वमपि। 'अङ्गेषु—' इत्यधिकरणे च विद्ययेति तृतीया फलकरणत्वपरेति स्पष्टमभाषि। अतो न कर्माङ्गत्वम्। नापि मन्त्रार्थवादोक्तफलार्थत्वं क्रत्वर्थत्वधात्र भाष्यकृद्दिष्टम्, तथासति प्रस्तरप्रहरणादे. यथा क्रतुरेव प्रयोजकः, न मन्त्रार्थवादफलम्,

१ —६.

इयमेवर्क्, अग्निस्साम, तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; इयमेव सा, अग्निरमः, तत् साम ॥ १ ॥

परत्वात्। न च क्रत्वर्थत्वेऽप्यार्थवादिकफलस्वीकारे पर्णताया अपि अपापश्लोकश्रवणफलकत्वप्रसङ्ग इति शङ्क्यम्—प्रस्तरप्रहरणस्य क्रत्वर्थस्यापि सूक्तवाकमन्त्रप्रतिपाद्यफलार्थत्ववत्, उपकोसलविद्याङ्गभूताया अग्निविद्यायाः, 'नास्यावरपुरुषाः क्षीयन्ते' इतिप्रतिपन्नब्रह्मविद्याऽविरोधितदुपयोगिफलार्थत्ववच्च क्रत्वर्थाया अपि पर्णताया अर्थवादप्रतिपन्नक्रत्वविरुद्धफलार्थत्वे न दोष इति भाष्यकाराशय इति वदन्ति। अन्येतु, 'अन्यथात्वं शब्दात्' इत्यत्र भाष्यस्यान्वारुह्योक्तित्वात् क्रत्वर्थत्वं न भाष्यकृदभिमतमिति वदन्ति ॥ प्रकृतमनुसरामः। १-५.

प्रकारान्तरेणोद्गीथोपासनं प्रस्तूयते—**इयमेव—साम**। ऋचि [इयमित्युक्त] पृथिवीदृष्टिः, साग्नि अग्निदृष्टिश्च कर्तव्येत्यर्थः। **तद्—साम**। **तदेतत्** अग्न्याख्यं साम **एतस्यां** पृथिवीरूपायामृचि **अध्यूढम्** उपरिस्थितमित्यर्थः। अत एवाद्यापि ऋगारूढमेव साम गीयत इत्याह **तस्मात्—गीयते**। एवं ऋक्सामयोः पृथिव्यग्निदृष्टिं विधाय सामनामावयवभूतयोः **साशब्द—अमशब्दयोः** पृथिव्यग्निदृष्टिः **कर्तव्येत्याह — इयमेव—अमः**। उक्तोऽर्थः। **तत् साम**। **तत्** तत एव परस्परसंसृ (स्पृ) ष्टपृथिव्यग्निरूप साशब्दामशब्दमेलनेन सामव्यवहारो लोके प्रवर्तत इत्यर्थः।

1. क. क.

तथेह वीर्यवत्तरत्वादिकमप्रयोजकम्; उद्गीथ एव प्रयोजक इति स्यात्। तथाचानियमसिद्धान्तभङ्गः स्यात्। व्यक्तमिदमस्मत्कृत श्रीभाष्यविषयविमर्शमालायामित्यलमत्र।

अथ षष्ठे सप्तमे च खण्डे क्रमात् उद्गीथाश्रिता अन्तरादित्यविद्या, अन्तरक्षिविद्या च पृथक्फलार्था प्रस्तूयते। तत्रोभयत्र उपास्यस्य हिरण्मयपुरुषस्य ऋक्सामगेष्णत्वं वक्ष्यते। तत्र ऋक्सामयोर्विशेषणभूताः काश्चिद् दृष्टय आदौ विधीयन्ते **इयमेवेत्यादिना**।

अन्तरिक्षमेवर्क्, वायुस्साम; तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; अन्तरिक्षमेव सा, वायुरमः, तत् साम ॥ २ ॥

द्यौरेवर्क्, आदित्यस्साम; तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; द्यौरेव सा, आदित्योऽमः, तत् साम ॥ ३ ॥

नक्षत्राण्येवर्क्, चन्द्रमास्साम; तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; नक्षत्राण्येव सा, चन्द्रमा अमः, तत् साम ॥ ४ ॥

अथ यदेतदादित्यस्य शुक्लं भाः सैवर्क्, अथ यन्नीलं परःकृष्णम् तत् साम; तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; अथ यदेवैतदादित्यस्य शुक्लं भाः सैव सा, अथ यन्नीलं परःकृष्णम् तदमः, तत् साम ॥ ५ ॥

अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हि-

---

अन्तरिक्ष—साम। (२, ३, ४)। पूर्ववदर्थः।

अथ—ऋक्। **शुक्लं भाः** शुक्ला दीप्तिरित्यर्थः। शुक्लमिति लिङ्गव्यत्ययश्छान्दसः। **अथ—साम।** **परःकृष्णम्** अतिशयेन कार्ष्ण्यरूपम्। परःकृष्णमिति प्रसिद्धं यत् नीलम्, तत् सामेत्यर्थः। आदित्ये कार्ष्ण्यस्य समाहितदृष्टिभिरीक्ष्यमाणत्वात् तदस्तीति द्रष्टव्यम्। अत्र परशब्दः सान्तो द्रष्टव्यः। **तत्—साम।** स्पष्टार्थम्।

एवमृचि पृथिव्यन्तरिक्षद्युनक्षत्र — आदित्यगतशुक्लभारूपत्वदृष्टिम्, साग्नि अग्निवाय्वादित्यचन्द्र — आदित्यगतनीलभारूपत्वदृष्टिञ्च विधायाऽऽह — **अथ — दृश्यते। अन्तरादित्ये** आदित्यमण्डलस्यान्तः **हिरण्मयो** रमणीयो [यो] योगिभिर्दृश्यत इत्यर्थः। 'दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इति श्रुत्यै-

---

य एष इति। परविद्यानिष्ठैर्दृश्यमानतया प्रसिद्धः परमात्मैव संप्रति दृष्ट्यर्थं गृह्यत इत्यभिसंधिः।

आदित्यमण्डलस्यान्तरिति। नन्वयं परमात्मा हिरण्मयपुरुषः किमादित्यमण्डलान्तर्वर्ती, उत तदन्तर्वर्तिरविशरीरान्तर्वर्ती? नाद्यः, 'य एष एतस्मिन् मण्डले पुरुषः' इति

कार्य्यात् । "**हिरण्मय** इति रूपसामान्यात्, चन्द्रमुखवत्" इति [हि] **वाक्यकारः** । ततश्च **हिरण्मय**शब्दस्य न मुख्यार्थो ग्राह्य इति वाक्यकाराभिप्रायः । ततश्च **हिरण्मय**त्वमुज्ज्वलत्वमित्यर्थः । ततश्च नीलतोयदाभस्यापि हिरण्मयत्वे नानुपपत्तिः । यद्वा, "कच्चिन्न तत् हेमसमानवर्णं तस्याननम्" इति श्रीरामायणप्रयोगात्, 'पश्यते रुक्मवर्णम्' इति श्रुतेश्च नीलतोयदाभस्यापि रुक्मवर्णत्वं संभवति । तत्र हेतुश्च संप्रदायगम्यः । एतत् सर्वं **वेदार्थसंग्रह**श्रुतप्रकाशिकायां स्पष्टं तत एवावगन्तव्यम् ।

बृहदारण्यके श्रवणेऽपि, श्रीविष्णुपुराणे (२-११.), 'ऋग्यजुस्सामभूतोऽन्तः सवितुर्द्विज तिष्ठति,' 'आत्मसप्तगणस्थं तं भास्वन्तमधितिष्ठति' इति मण्डलान्तर्वर्तिसप्तगणमध्ये सवितुरन्तरेव स्थितेर्विशिष्योक्तत्वात् । नान्त्य, तथासति **अन्तरादित्ये** इत्यस्य आदित्यपुरुषस्यान्तरित्येव व्याख्यानसंभवात् शिरोवेष्टनायोगात्—उच्यते । मण्डलान्तर्वर्तित्वेऽपि तत्पुराणोक्तरीत्यैव द्वादशस्वादित्येषु मध्ये एकैकस्मिन् मासि एकैकस्यान्तःस्थितेरिष्टत्वेन, मण्डलाद्बहिस्तत्र तदवृत्त्या च अव्यवस्थितादित्यतच्छरीराणामुपास्यकोटिनिवेशमकृत्वा प्रणाल्या मण्डलान्तर्वर्तित्वेनैव स उपास्य इति ज्ञापनार्थं **मण्डलस्यान्त**रिति व्याख्यानम् । अत एव श्रुतिस्मृतिश्रीभाष्यटीकादौ मण्डलग्रहणम् । तथाच सिद्धान्तनिगमनेऽपि श्रीभाष्यम् —, 'अत आदित्यमण्डलाक्ष्यधिकरणः आदित्यादिजीवव्यतिरिक्तः परमात्मैव' इति । न खलु गृहान्तर्वर्तिपेटिकाघटिकाद्यन्तर्वर्तिनो गृहान्तर्वर्तित्वमनुपपन्नम् । तथेह भाव्यम् । गीताभाष्येऽपि, ज्योतिषां रविरंशुमान्' इत्यत्र **रवि**रादित्यगण इति भाषितम् । तेष्वादित्येषु विष्णुः साक्षात्परमात्मा साक्षादादित्यमण्डलान्तर्वर्त्यपि । तथाच, 'रामः शस्त्रभृतामहम्' इत्यत्र **तात्पर्यचन्द्रिका**, 'आदित्यान्तर्गतो विष्णुस्तु रामतुल्यः' इति । वस्तुतस्तु तत्रैव, 'स्तम्भस्थदर्पणस्थेति योय आसन्नतां नरः । छायाऽदर्शनसंयोगं सस प्राप्नोत्यथात्मनः (२-११-१९) एवं सा वैष्णवी शक्तिः' इति आदित्यमण्डले आविर्भूय स्थित एव परमात्मा रविशरीरे प्रतिसंगतः पितृदेवमनुष्यादिसर्वोपेक्षितनिर्वाहक इति निरूपणात् मण्डलान्तर्वर्तित्वमेव संप्रतिपत्तव्यम् ।

वाक्यकारः ब्रह्मनन्दी । **वाक्यम्** एतदुपनिषद्व्याख्या । **मुख्यार्थः** हिरण्यविकारत्वम् । **हिरण्मयत्वे** हिरण्मयशब्दवाच्यत्वे । 'दाण्डिनायने' त्यादिना हिरण्मयशब्दो निपातितः । **यद्वे**ति । अत्र पक्षेऽपि वाक्यं सुयोजम्—हिरण्मय इति प्रयोगः न हिरण्यलोहविकारत्वात्, किंतु **रूपसामान्यात्** तद्वर्णसमानवर्णत्वात् तत्सदृशरूपार्थे तत्पदप्रयोगश्च चन्द्रमुखशब्दे दृष्ट इति । हिरण्यशब्दो रूपसामान्यात् परवासुदेवविग्रहपरः । तद्विकारत्वरूपं हिरण्मयत्वञ्चादित्यान्तर्वर्तिपुरुषे इति वाऽस्तु । **रुक्मवर्णत्वं संभवति** इति । अत्र, 'मयूरकण्ठच्छवि शुद्धहेम' इति प्रकृतविषये **तात्पर्यचन्द्रिका**—(४-६.) गृहीतं शिल्पशास्त्रवचनम्, 'नित्यश्रीर्ब्रह्मबिम्बे श्रुतः' इति **सारावल्यादि** चानुसंधेयम् । **वेदार्थे**ति । वेदार्थसंग्रहे गुरुमुखात् यत् श्रुतम् तस्य प्रकाशिकायां तात्पर्यदीपिकाख्यतद्व्याख्यायामित्यर्थः ।

अत्र केचित्—'कप्यासं पुण्डरीकमिति वाक्ये कप्यासशब्देनाऽऽदित्यमण्डलमुच्यते। पुण्डरीकमित्यनेन हृदयपुण्डरीकमुच्यते। अतश्च यथा सूर्यमण्डलं हृदयपुण्डरीकञ्चोपासनस्थानम्, एवमुपासकस्याक्षिणी अपि परमात्मन उपासनस्थानम्' इति परोक्तव्याख्यानदूषणावसरे **व्यासार्यैः**, 'आदित्यमण्डलरूपस्थानावरुद्धे अक्ष्णोः स्थानतया विधानं न संभवति' इत्युक्तेः आदित्यमण्डलस्थानमुत्पत्तिशिष्टमिति प्रतीयते। ततश्च **य एषोन्तरादित्य** इति वाक्यमुपासनोत्पत्तिपरम। ततश्च **पुरुषो दृश्यत** इत्यत्र 'द्रष्टव्यः' इत्यर्थ इति व्यासार्याभिप्रायः। न च आदित्यमण्डलस्योत्पत्तिशिष्टत्वे उत्पत्तिशिष्टस्थानावरुद्धे भाष्यकृदभिमतपुण्डरीकदलामलायताक्षत्वादेः कथं विधानमिति वाच्यम् — पुण्डरीकाक्षत्वादेरुत्पत्तिशिष्टादित्यमण्डलस्थानाविरुद्धत्वात् उत्पत्तिशिष्टाविरुद्धगुणानां विधानसंभवात्। नन्वेवं, 'सर्वत्र प्रसिद्धोपदेशात्' इत्यत्र, 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्युत्पत्तिशिष्टसार्वात्म्यावरुद्धे मनोमयत्वादीनां विधानं न संभवती'त्याक्षिप्य, 'सर्वं खलु' इति वाक्यस्य उपासीतेत्यनेन एकवाक्यत्वाभावेन सार्वात्म्यस्य नोत्पत्तिशिष्टत्वम्' इति **व्यासार्यैः** समर्थनमयुक्तं स्यात्। 'मनोमयत्वादीनामुत्पत्तिशिष्टसार्वात्म्याविरोधात्' इत्येव परिहारसंभवेन वाक्यभेदमाश्रित्य सार्वात्म्यस्योत्पत्तिशिष्टत्वाभावसमर्थनं मुधा इति चेत् — उपायान्तरस्योपायान्तरादूषकत्वात् — इति वदन्ति।

अन्ये तु—'आदित्यमण्डलस्थानावरुद्धे' इति[1] नोत्पत्तिशिष्टस्थानावरुद्धत्व [पर्यन्त] मभिप्रेतम्। अपितु युगपदनुपसंहरणीयादित्यमण्डलरूपाक्षिरूपस्थानद्वयविधाने अष्टदोषदुष्टविकल्पप्रसङ्गात् इत्येव तात्पर्यम् — [2]इत्याहुः।

'यदा पश्यः पश्यते रुक्मवर्णम्' इति प्रकरणे, 'मनसा तु विशुद्धेन' इति रुक्मवर्णविग्रहविशिष्टस्य विशुद्धमनोग्राह्यतोक्तेः, आरोपिताकारस्य विशुद्धमनोग्राह्यत्वाभावात्, अनारोपितत्वं सिद्धम्। 'ईक्षतिकर्मव्यपदेशात् सः' इत्यत्र ईक्षणस्य परमात्म (र्थ?) विषयत्वं वक्तव्यम्' इति परैरप्यङ्गीकृतत्वाच्च। 'आदित्यवर्णं तमसः परस्तात्' इति तमःपारवर्तिन आदित्यवर्णविग्रहविशिष्टत्वाभिधानेन कल्पितत्वाप्रसक्तेः। न हि कल्पितस्य तमःपारवर्तित्वं संभवति।

1. इत्यस्य ख. 2. इत्यन्ये क. तत्र पूर्वं अन्ये तु इति नास्ति।

रण्यकेश आ प्रणखात् सर्व एव सुवर्णः ॥ ६ ॥ तस्य यथा कप्यासं पुण्डरीकम्, एवमक्षिणी ;

हिरण्यश्मश्रुर्हिरण्यकेशः रमणीयश्मश्रुकेशः, **आ प्रणखात् सर्व एव सुवर्णः** रमणीयसर्वावयव इत्यर्थः । **तस्य—अक्षिणी** । कं पिबतीति **कपिः** आदित्यः । तेन अस्यते क्षिप्यते, विकास्यत इति **कप्यासम्** । तथाऽऽह **वाक्यकारः**, " आदित्यक्षिप्तं वा श्रीमत्त्वात् " इति । यद्वा कं पिबतीति **कपिः** नालम् । तस्मिन् आस्त इति **कप्यासम्** । अपचितादपि पङ्कजात् नालस्थस्य पुण्डरीकस्य शोभातिशयशालित्वात् तादृशमिह विवक्षितम् । यद्वा **कं** जलम् । आस उपवेशन इति धातुः अपिपूर्वकः । ' वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ' इति वचनात् अकारलोपः । के जलेऽप्यास्त इति **कप्यासं** सलिलस्थमित्यर्थः । एवमस्यार्थत्रयस्योपपन्नतया वाक्यकारेण सिद्धान्तितत्वमभिप्रेत्य **भगवता भाष्यकारेण वेदार्थसंग्रहे**, 'गम्भीराम्भस्समुद्भूत-सुमृष्टनाल-रविकरविकसित-पुण्डरीकदलामलायतेक्षण' इत्यभिहितम् । मर्कटजघनसदृशपुण्डरीकसादृश्यादि अर्थान्तरं तु अश्लीलत्वादिदोषदुष्टतया वाक्यकृदनादृतत्वाद् भाष्यकारेणाप्यनादृतम् ।

यद्यपि **अमरकोशे** ' पुण्डरीकं सिताम्भोजम् ' इत्यनुशिष्टम् — तथापि शबरस्वामिना नवमाध्याये, 'मौद्गं चरुं निर्वपेच्छ्रैष्ठ्यै श्रीकामः' इति विहितायामिष्टौ, 'पौण्डरीकाणि बर्हींषि भवन्ति ' इति स्तरणार्थत्वेन विहितेषु पुण्डरीकेष्वतिदेशप्राप्तस्य, ' दर्भैः स्तृणीत हरितैः ' इति मन्त्रस्य दर्भपदस्थाने पुण्डरीकपदं हरितपदस्थाने

प्रणखात् नखाग्रात् । **क्षिप्तं वेति** । **वाशब्दः** पूर्वोक्तार्थव्यावृत्त्यर्थः । अत्र पूर्वपक्षभूतार्थत्रयं तावत्—**कपिः** मर्कटः । **आसं** जघनम् । कप्यासपदं कपिजघनसदृशरूपार्थे लाक्षणिकमिति, **कप्यासम्** ईषद्विकसितमिति, **कप्यासं** सूर्यमण्डलम्—यथा सूर्यमण्डलं हृदयपुण्डरीकध्योपासनस्थानम्, तथा अक्षिणो अपि उपासनस्थानमित्येवम् । अत्र ईषद्विकसितमित्यर्थः तदनुगुणयोगव्युत्पत्त्यलाभात् नेष्टः । तृतीयोऽर्थः कप्यासपुण्डरीकपदयोः प्रतीतसामानाधिकरण्यभङ्गाद्यनेकदोषदूषितः । सर्वमिदं श्रीभाष्यकारैः शिष्येभ्य उपदिष्टं गाम्भीर्यात्, ' गम्भीराम्भ ' इत्यादिसूक्तमेव ध्वनितम् । विस्तरोऽन्तरधिकरणटीकादौ ।

पौण्डरीकाणीति । पुण्डरीकमेव पौण्डरीकम्; यद्वा पुण्डरीकदलम् । **बर्हिःकार्याणि** स्तरणादीनि पुण्डरीकसाध्यानि भवन्तीति च श्रुत्यर्थमाहुः । **पुण्डरीकपदमिति** । दर्भपदस्थाने

तस्योदिति नाम; स एष सर्वेभ्यः पाप्मभ्य उदितः;

रक्तपदमूहितव्यम् — इत्युक्तत्वात् रक्ताम्भोजमेव पुण्डरीकमिति द्रष्टव्यम्।

तस्य उत् इति नाम। स्पष्टोऽर्थः। तस्योन्नामकत्वे हेतुमाह — **स एष सर्वेभ्यः पाप्मभ्य उदितः।** सर्वपापोद्गतत्वात् उन्नामक [त्वम्] इत्यर्थः। नीडात् शकुन्तस्योद्गमनवत् पापपञ्जरादुद्गमनरूपमुख्यार्थस्य कुत्राप्यभावात् उद्गमनेन तत्संबन्धराहित्यं लक्ष्यते। 'नैनं सेतुमहोरात्रे तरतः, न जरा न मृत्युः न शोको न सुकृतं न दुष्कृतम्' इति परमात्मनः सुकृत[1]दुष्कृत संबन्धाभावो हि प्रतिपाद्यते। तरतेः प्राप्तिवाचित्वात्। पापशब्दश्च पुण्यपापरूपोभयविधकर्मपरः। परमात्मप्रकर-

1. दुष्कृत पदं ख. कोशे न।

प्रकृतजातिवाचकपदोहमात्रस्य शबरस्वाम्युक्तत्वात् पद्मपदमेवोहितव्यं खण्डदेव आह। पुण्डरीकपदोहमेव पार्थसारथिमिश्रः। अस्रेदं बोध्यम्—कल्हारहल्लकयोः रक्तत्वभेद इव अम्भोजेऽपि ईषत्सितत्वं पूर्णसितत्वमिति भेदोऽस्ति। पुण्डरीकपदस्य सितत्वविशिष्टपद्मवाचित्वेऽपि तावता कोकनदव्यावृत्तिमात्रं चिकीर्षितम्। न तु सामान्यपद्मव्यावृत्तिरपि। अमरकोशेऽपि अथशब्दादिकमप्रयुज्य, 'पुण्डरीकं सिताम्भोजम्' इत्युक्तिरेवमभिप्रायाऽपि स्यात्। पद्मादिपदार्थाघटकं सितत्वं पुण्डरीकपदशक्यकोटिप्रविष्टमित्येतावदेव कोशात् सिध्येत्। अतः श्रुति प्राचीनप्रयोगाद्यनुसारेण कोशार्थो निर्धार्यः। पुण्डरीकपदञ्च शुद्धधवले ईषत्सिते च यथायथं ग्राह्यम्। तत्र सितरक्ते पद्मसामान्ये श्रुतौ पुण्डरीकपदप्रयोगात् शुद्धसितरूपविशेषपर्यवसाने मानाभावात् पुण्डरीकपदेन जातिवाचिना सितत्वांशस्याप्युक्तावपि, तदूतरक्तत्वांशस्यानुक्तस्य कथनार्थं रक्तपदमूहितव्यमितीहाभिमतं स्यादिति। (अत एव पर्यन्तरक्ते सिते त्वाचरोगविशेषे पुण्डरीकपदं वाचस्पत्यादौ दर्शितमित्यन्यदेतत्।) पर्यन्तरक्तत्वं अंशे सितत्वं मध्ये समुन्नतत्वममलत्वायतत्वादि च पुण्डरीकदलसाम्यमक्ष्णः।

उदितः उत् ऊर्ध्वं **इतः** गत। उत्क्रान्तः। **उदेति** उत्क्रामति। **कुत्रापीति।** विभुत्वात् परमात्मनि उद्गमनं यथा न संभावितम्, तथा अणौ जीवेऽप्यसंभावितमेव, पाप्मनामामूर्तत्वादिति भावः। संबन्धराहित्यञ्चेदं न संबन्धध्वंसरूपम्, श्रुत्यन्तरविरोधात्। अतः परमात्मविषये अत्यन्ताभावरूपम् इत्याह **नैनमिति।** कर्मसामान्यात्यन्ताभावरूपं फलितार्थं दर्शयितुं पाप्मशब्दविवक्षितमाह **पापशब्दश्चेति।** तत्र श्रुतिस्मृतियुक्तीः क्रमेण दर्शयति **परमात्मेति।**

उदेति ह वै सर्वेभ्यः पाप्मभ्यः, य एवं वेद ॥ ७ ॥ तस्य ऋक् च साम च गेष्णौ; तस्मादुद्गीथः; तस्मात्त्वेवोद्गाता, एतस्य हि गाता ॥

णेषु, 'नैनं सेतुं — — न सुकृतं—पाप्मानोऽतो निवर्तन्ते' इति सुकृतेऽपि पापशब्दप्रयोगात्, 'पाप्मानः कालजरामृत्युशोकादयः संख्यातत्वात्' इति **वाक्यकारवचनात्**, अलौकिकत्वे सति अनिष्टफलसाधनत्वरूपप्रवृत्तिनिमित्तयोगात् पुण्यस्यापि पापशब्दाभिधेयत्वोपपत्तेः। मुमुक्षवपेक्षया स्वर्गादीनामप्यनिष्टत्वात्।

'एते वै निरयास्तात स्थानस्य परमात्मनः।'
'क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम्।
क्व जपो 'वासुदेवे' ति मुक्तिबीजमनुत्तमम्॥'

इति स्मरणात्। सर्वपापोदितत्वं नाम कर्मवश्यतागन्धराहित्यमिति फलितोऽर्थः। कृतानामपि कर्मणां फलजननशक्तिप्रतिभट[1]त्वलक्षणः कश्चिदैश्वरस्वभावविशेषोऽपहतपाप्मत्वास्यः सर्वपापोदितशब्दार्थ इति द्रष्टव्यम्। एवं नाम[2]विशिष्टज्ञानफलमाह — **उदेति — वेद**। स्पष्टोऽर्थः।

तस्यर्क् च साम च गेष्णौ। पृथिव्यग्न्यादि[3]दृष्टिविशिष्टतया प्राक् प्रस्तुते ऋक्सामे एतस्य **गेष्णौ** गानरूपे। यद्यपि ऋचो गानाश्रयत्वेऽपि न गानरूपत्वम् — तथाप्यभेदोपचारेण गेष्णत्वोक्तिर्द्रष्टव्या। अव्युत्पन्नो **गेष्ण**शब्दः। व्यत्ययेन पुंस्त्वम्। अग्नीन्द्रादिप्रतिपादकर्क्सामगेयत्वोक्त्या सर्वात्मकत्वमुक्तं भवति। **तस्मादुद्गीथः — गाता**। यस्मादुन्नामकत्वं परमात्मनः, अत एव तद्गानरूपत्वात् द्वितीयभक्तेः **उद्गीथसंज्ञत्वम्**, तद्गातुरुद्गातृसंज्ञाकत्व (वत्त्व) श्चेत्यर्थः।

1. प्रतिभटलक्षणः क. 2. एवं नामशिष्ट ख. एवं नाम शिष्ट ग. २. पृथिव्यग्न्यादित्य. ख. ग.

अन्तरादित्यविद्याफलस्योपरि वक्ष्यमाणत्वात् मध्ये, 'उदेति ह वै सर्वेभ्यः' इति फलान्तराभिधानं उपासकपापहतिकरणौपयिकं यत् निरुपाधिकं स्वतस्सिद्धं नित्यमुक्तव्यावृत्तं पाप्मोदितत्वम्, तस्य स्वभावविशेषस्य पापप्रतिभटत्वरूपस्यात्र विवक्षेति ज्ञापनार्थमित्याशयेनाऽऽह **कृतानामपीति**। न हि नित्यादिनिष्ठेदृशधर्मवेदनात् कश्चित् पाप्मभ्य उदेति।

स एष ये चामुष्मात् पराञ्चो लोकाः तेषाञ्च ईष्टे देवकामानाञ्च — इत्यधिदैवतम् ॥ ८ ॥

इति प्रथमाध्याये षष्ठः खण्डः

१—७.

अथाध्यात्मम् — वागेवर्क्, प्राणस्साम; तदेतदेतस्यामृच्यध्यूढं साम; तस्मादृच्यध्यूढं साम गीयते; वागेव सा, प्राणोऽमः, तत् साम ॥ १ ॥

यद्वा परमात्मन उन्नामकत्वात् ऋक्सामगेष्णत्वाच्च उद्गेष्णस्य (?) परमात्मनः उद्गीथत्वमुपपद्यते । तत उद्गीथे परमात्मदृष्टिर्युक्तेत्यर्थः ।

स — कामानाञ्च । **स एषः** हिरण्मयः पुरुषः आदित्यमण्डलोर्ध्ववर्तिलोकानां देवभोग्यभोगोपकरणभोगस्थानानाञ्च नियन्तेत्यर्थः । **इत्यधिदैवतम्** । [उपासनम्] उपदिष्टमिति शेषः ।

अथाध्यात्मम् । उपदिश्यत इति शेषः ।

यद्वेति । अत्र कल्पे उद्गीथे परमात्मदृष्टि । पूर्वकल्पे तु कर्माङ्गोद्गीथगानकाले पूर्वोक्तपरमात्मचिन्तनपूर्वकं ऋक्सामयोस्तद्गेष्णतया उद्गीथे उन्नामकपरमात्मगानरूपत्वचिन्तनमात्रमिति भेदः । दृष्टिपक्ष शाङ्करदर्शितः । 'परोवरीयस्त्वादिवत्' इत्यत्र श्रीभाष्यटीकयोरप्येवम् । इममेव पक्षं 'सोऽमुनैवे'ति वाक्यार्थवर्णनात् प्रागपि दर्शयिष्यति । तथाच **तस्मादुद्गीथ** इत्यस्य तस्मात् परमात्मा उद्गीथः, उन्नामकत्वात् गीयमानत्वाच्चेत्यर्थः । एवञ्चोद्गीथशब्दप्रतिपाद्यत्वस्योद्गीथ इव परमात्मन्यपि सत्त्वात् उद्गीथे परमात्मदृष्टिर्युज्यत इति सिध्यति । **उद्गेष्णस्य परमात्मन** इत्यत्र पाठो निरीक्ष्यः; परमात्मनो गेष्णत्वस्य गानरूपत्वस्याभावात् । ऋक्सामगेष्णकत्वस्यैव शाङ्करेऽप्युक्तेः । यद्वा गेष्णशब्दस्याव्युत्पन्नत्वात् गानमात्रपरत्वे अनिर्भरस्य **यद्यपी**त्यनेन पूर्वं सूचितत्वात् गानतया साम्नो गेष्णत्वस्य, गानसाधनतया ऋचोऽपि तत्त्वस्य चेव गेयतया परमात्मनोऽपि गेष्णत्वं भवितुमर्हति । तथाचोद्गीथस्य उद्गानत्वात् उन्नामकपरमात्मगानत्वाच्चोद्गेष्णत्वम्, परमात्मनः उत्त्वे सति गेष्णत्वादुद्गेष्णत्वम् । एवमुद्गेष्णत्वादुद्गीथत्वमिति । '**वाक् गीथा**' इति बृहदारण्यकात् ऋक्सामरूपवाग्विषयतया गीथावत्त्वात् गीथत्वं च परमात्मनः ।

चक्षुरेवर्क्, आत्मा साम, तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; चक्षुरेव सा, आत्माऽमः, तत् साम ॥ २ ॥

श्रोत्रमेवर्क्, मनस्साम; तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; श्रोत्रमेव सा, मनोऽमः, तत् साम ॥ ३ ॥

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्क्, अथ यन्नीलं परःकृष्णम् तत् साम; तदेतदेतस्यामृच्यध्यूढँ साम; तस्मादृच्यध्यूढँ साम गीयते; अथ यदेवैतदक्ष्णः शुक्लं भाः सैव सा, अथ यन्नीलं परःकृष्णम् तदमः, तत् साम ॥ ४ ॥

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते, सैवर्क्; तत् साम; तदुक्थम्; तद् यजुः; तद् ब्रह्म ।

तस्यैतस्य तदेव रूपम्, यदमुष्य रूपम्; यावमुष्य गेष्णौ तौ गेष्णौ; यन्नाम, तन्नाम ॥ ५ ॥

स एष ये चैतस्मादर्वाञ्चो लोकाः तेषाञ्च ईष्टे, मनुष्यकामानाञ्चेति ।

वागेवर्क् — तत् साम । (१, २, ३, ४.)। सर्वं पूर्ववत् ।

एवमृचि वाक्चक्षुःश्रोत्र — अक्षिगतशुक्लभारूपत्वदृष्टिम्, साम्नि प्राणच्छायात्म मनो — ऽक्षिगतपरःकृष्णरूपत्वदृष्टिञ्च विधायाह — **अथ यः — ब्रह्म ।** चक्षुषिः यः पुरुषो योगिभिर्दृश्यते, स एव ऋग्यजुस्सामात्मा, उक्थादिशस्त्रात्मा, ब्रह्म चेत्यर्थः । अत्रोक्थस्य तत्र्यपेक्षया पृथक्परिगणनं गोबलीवर्दन्यायेन द्रष्टव्यम् । **तस्य — नाम ।** **तस्यैतस्य** अक्ष्यन्तर्वर्तिनः परमपुरुषस्य, आदित्यान्तर्वर्तिनो यत् हिरण्मयत्वादिरूपम्, उदिति नाम, ऋक्सामरूपगेष्णौ च, तानि सर्वाणि भवन्तीत्यर्थः ।

स एष — कामानाञ्चेति । एतस्मात् अक्षिस्थानात् अधोवर्तिनां लोकानां मनुष्यभोग्यादीनाञ्च एष नियन्तेत्यर्थः ।

चक्षुरेवर्क् आत्मा साम । अत्र आत्मशब्दः चक्षुर्निष्ठच्छायात्मपर इति उपरितनावतरणवाक्याद् ज्ञायते । **सैवर्गित्यादि ।** अक्षिविद्यायां ऋगाद्यात्मत्वमधिक उपदिष्टकारः, **तदेव रूपमित्यादित्रयमतिदिष्टकारः ।**

तद् य इमे वीणायां गायन्ति, एतं ते गायन्ति; तस्मात्ते धनसनयः ॥ ६ ॥ अथ य एतदेवं विद्वान् साम गायति, उभौ स गायति ॥

सोमुनैव, स एष ये चामुष्मात् पराञ्चो लोकाः, ताँश्चाप्नोति देवकामाँश्च ॥ ७ ॥ अथानेनैव, ये चैतस्मादर्वाञ्चो लोकाः, ताँश्चाप्नोति मनुष्यकामाँश्च ॥

तत् — **गायन्ति** । यस्मादयमीश्वरः, तस्मात् हेतोः वीणागायकाः सर्वेऽपि इममेव गायन्तीत्यर्थः । तस्य सर्वात्मकत्वेन देवमनुष्यादिकर्मकगानस्यापि परमात्मविषयत्वादिति भावः । **तस्मात्ते धनसनयः** । **सनिः** लाभः । धनानां सनिर्येषां ते **धनसनयः** । ईश्वरगायकत्वादेव वीणागायकानां धनलाभवत्त्वम् । न ह्यनीश्वरगातृत्वे धनप्रसक्तिरस्तीति भावः । **अथ य — गायति** । अध्यात्माधिदैवतभिन्नविद्यायुक्तः सन् उद्गीथं यो गायति, स चाक्षुषमादित्यस्थञ्च गायतीत्यर्थः । उद्गीथस्य चाक्षुषेण परमात्मना आदित्यान्तर्वर्तिना च परमात्मना ऐक्याध्यासविशिष्टतया तादृशोद्गीथगायकस्यैव परमात्मगायकत्वादिति भावः ।

तस्यैवं विदः फलमुच्यते — **सोऽमुनैव — [1] मनुष्यकामांश्च** । सः विद्वान् **अमुनैव** आदित्यान्तर्वर्तिना उपासितेन **स एषः** तदुपासनाविशिष्ट एष[2] तदूर्ध्वलोकान् देवकामांश्चाप्नोति[3]; अनेनाक्ष्यन्तर्वर्तिना उपासितेन मनुष्यलोकाद्धस्तनलोकान् मनुष्यकामांश्चाप्नोति[5] । चक्षुरादित्यस्थानवर्तिपरमात्मोपासनया सर्वलोकावासिर्भवतीत्यर्थः ।

1 ख. कोशे देवकामांश्चेत्यन्तं पृथक्, तदुपरि च पृथक् पृथक् धृत्वा व्याख्या निवेशिता। 2. विशिष्ट एतस्माद्. ख. 3. आप्नोतीत्यर्थः. ख. 4. लोकादिति पृथक्पाठो ग. कोशे। अन्यत्र 'लोकाधस्तने' ति समस्तम्। 5. आप्नोतीत्यर्थः ख.

कामानाप्नोति इति **इति**शब्देन अध्यात्मविषयसमाप्तिज्ञापनाच्च **तद् य इम** इत्यादि उपासनद्वयशेषभूतम् । लौकिकेऽपि गाने गायकानामज्ञत्वेऽपि **सर्वकर्मसमाराध्यः** स एव सर्वत्र वस्तुतो गेयः फलप्रदश्च । एवं विदित्वा साममगाने कृते गानाराध्यत्वं तस्य तत्तदुपासनेऽनुसंहितं भवतीति विशिष्टार्थः । **उभौ स गायती**ति । तस्य वा अस्य वा उभयस्य गानेऽपि एवं विद्वान् स्यादित्यर्थः । अथ फलवाक्ये **स** इति पदयोः पदं प्रथमं गानाराध्यत्वविदित्यर्थकम् । द्वितीयं उक्तोपासनाविशिष्टार्थकम् ।

तस्मादु हैवंविदुद्गाता ब्रूयात् ॥ ८ ॥ 'कं ते काममागायानी'ति। एष ह्येव कामागानस्येष्टे, य एत[1]देवं विद्वान् साम गायति, साम गायति ॥

इति प्रथमाध्याये सप्तमः खण्डः

---

1. य एवं. शा. मा.

तस्मादु—आगायानीति। एवंवित् एतादृशविद्यायुक्त उद्गाता यजमानं प्रति[1]–, 'हे यजमान! ते कं देवकामं मनुष्यकामं वा **आगायानि** गानेन संपादयानीति–ब्रूयादित्यर्थः। नन्वेतादृशोक्तौ उद्गातुः कथं सामर्थ्यमित्यत्राह–**एष–गायति** एवंविदुषः **साम**गस्य कामसंपादकगानसामर्थ्यमस्तीत्यर्थः। द्विरुक्तिर्विद्यासमाप्त्यर्था।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते —

समन्वयाध्याये प्रथमपादे — अन्तरादित्ये अन्तरक्षिणि च वर्तमानत्वेन श्रुतः पुरुषो जीव एव। 'हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णः' इति शरीरसंबन्धश्रवणात्। शरीरत्वस्यैव कर्मजन्यतावच्छेदकत्वेन कर्माजन्यशरीरासंभवात् प्रक्रमश्रुतेन शरीरित्वलिङ्गेन जीवत्वे निश्चिते औपसंहारिकं सर्वपापोदितत्वमापेक्षिकं नेतव्यमिति पूर्वपक्षे प्राप्ते —

उच्यते। 'अन्तस्तद्धर्मोपदेशात्'। आदित्याक्ष्यन्तर्वर्ती पुरुषः परमात्मैव; परमात्मधर्मोपदेशात्। कर्मवश्यतागन्धराहित्यलक्षणं नित्याविर्भूतं सर्वपापोदितत्वं न परमात्मनोऽन्यत्र संभवति। तच्च चरमश्रुतमपि, 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद' इति फलरूपतात्पर्यलिङ्गात् प्रबलम्। तथा ऋक्सामगेयत्वाक्षिसं, 'सैवर्क् तत्साम' इति वाक्यश्रुतश्च सार्वात्म्यं परमात्मधर्मः। तथा अक्ष्यादित्यवर्त्येकपुरुषगतोर्ध्वाधोवर्तिलोककामेश्वरत्वरूपं निरङ्कुशं सर्वकामेश्वरत्वमपि, 'सोऽमुनैव स एष ये चाष्मात् पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्च, अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्च' इति वाक्यशेषप्रतिपन्नफलरूपतात्पर्यलिङ्गानुगृहीतत्वात् प्रबलम्।

1. प्रतिब्रूयात्। किमितीत्यत्राह कं ते—इति ख. कोशे। 2. प्रब्रूयादित्यर्थः ख.

पूर्ववाक्यादुपतितं, वेदनं फलस्वामिगतमिति भ्रमं व्यावर्तयति तस्मादिति।

अतः प्रबलैः परमात्मलिङ्गैः परमात्मत्वे निर्णीते,

'अजायमनो बहुधा विजायते',

'अजोऽपि सन् अव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया॥'

'[परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय] संभवामि युगे युगे॥'

'इच्छागृहीताभिमतोरुदेहः'

इति श्रुतिस्मृत्यनुसारेण अजहत्स्वस्वभावस्यैव परमात्मनो मायाशब्दितसंकल्पमात्रेणोपासकपरित्राणायाप्राकृतदिव्यविग्रहपरिग्रहोपपत्तेः—

— एतेन नित्यसर्वज्ञस्य सर्वशक्तेर्ज्ञानार्थं प्रवृत्त्यर्थं वा करणानपेक्षणात् आत्मानन्दतृप्तस्य विग्रहे स्पृहाऽसंभवाच्च विग्रहो न संभवतीति शङ्का प्रत्युक्ता। करणानपेक्षज्ञानक्रियस्यापि परमात्मन उपासकानुग्रहार्थं भोगार्थञ्च विग्रहस्वीकारोपपत्तेः। प्रभूतानन्दानामप्यानन्दान्तरापेक्षादर्शनेन निरतिशयानन्दस्वरूपस्यापि ब्रह्मणः प्रीतिविशेषापेक्षायाः संभवात्। न च विग्रहस्य भोग्यत्वे स्वरूपभोग्यत्ववैकल्यं शङ्क्यम्—स्वसंबन्धिभोग्यत्वस्य स्वभोग्यत्वातिशयावहत्वेन तद्वैकल्यावहत्वाभावात्। तत्र च,

'समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः।
तद् विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥
समस्तशक्ति रूपाणि तत् करोति जनेश्वर।
देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया॥'

'नित्याऽलिङ्गा(ङ्ग्या) स्वभावसंसिद्धिरिन्द्रियाकाराङ्गप्रत्यङ्गव्यञ्जनवती'

परिग्रहोपपत्तेरित्यस्य, न हिरण्मयविग्रहसंबन्धानुपपत्तिः परमात्मनः इत्युत्तरान्वयः। मध्येऽवान्तरशङ्कापरिहारः।

नित्यालिङ्ग्येत्यादि। नित्या। परवासुदेवमूर्तेर्नित्यत्वात्। अलिङ्ग्या अप्रतर्क्या। स्वभावसंसिद्धिः सत्तयैव भासमाना; स्वप्रकाशा। इन्द्रियेति। नयनगोलकादिहस्तपादादितदवयवाङ्गुल्यादिपुंस्त्वव्यञ्जकश्मश्रुवादिमतीत्यर्थः। इन्द्रियाकारेति पृथक्पदं वा।

१ – ८.

त्रयो होद्गीथे कुशुला बभूवुः शिलकः शालावत्यः, चैकितायनो दाल्भ्यः, प्रवाहणो जैबलिरिति ; ते होचुः—उद्गीथे वै कुशलाः स्मः,

---

'उज्जहारात्मनः केशौ सितकृष्णौ'

'अंशांशेनावतीर्योर्व्याम्'

इत्यादिप्रमाणात् नित्यस्य विग्रहस्य अशिथिलसंस्थानस्यैव अप्राकृतानन्तावतारहेतुत्वमुपपद्यते। चतुर्मुखदेहस्य संस्थानाशैथिल्येऽपि अनेकदेहोत्पादकत्वदर्शनात्। ततश्चोपासकानुग्रहार्थं स्वेच्छासृष्टाप्राकृतशरीरसंबन्धस्य प्रमाणसिद्धस्य परमात्मनि सत्त्वात्—

— न हिरण्मयविग्रहसंबन्धानुपपत्तिः परमात्मनः। अतः अक्ष्यादित्यान्तर्वर्ती परमात्मा।

नन्वादित्यपुरुषादन्यः परमात्मैव नास्तीत्यत्राऽऽह — 'भेदव्यपदेशाच्चान्यः'। 'य आदित्ये तिष्ठन् आदित्यादन्तरो यमादित्यो न वेद' इत्यादित्यपुरुषावेद्यस्य तन्नियन्तुः परमात्मनः अन्यस्य प्रमाणसिद्धत्वात् तद्व्यतिरिक्तो नास्तीति न शङ्क्यम्। न च नित्यमुक्तव्यतिरिक्तः परमात्मा नास्तीत्यपि शक्यं वक्तुम्; 'य आत्मनि तिष्ठन्' इति पर्याये परिशुद्धमुक्तात्मभ्योपि भेदप्रतिपादनात्।

अतः अन्तरादित्ये अन्तरक्षिणि च वर्तमानः परमात्मा — इति स्थितम्। प्रकृतमनुसरामः।

प्रकारान्तरेणोपासनं विधातुमाख्यायिकामाह – **त्रयो — जैबलिरिति**। शालावत्सुतः शिलकनामा, दल्भगोत्रश्चैकितायनसुतः, जीबलसुतः प्रवाहणनामा त्रयस्ते[1] उद्गीथविज्ञाने निपुणा बभूवुरित्यर्थः। **शालावत्यः**। शालावच्छब्दादपत्यार्थे अणि तदन्तात्, स्वार्थे, 'अभिजिद्विदभृच्छालावत्' इत्यादिना यञ् प्रत्ययः। **दाल्भ्यः**। दल्भ[2]शब्दात् गोत्रापत्येऽर्थे गर्गादित्वात् यञ्। चिकितायनशब्दाद-

1. त्रय एते ख. त्रय एव. ग. 2. दल्भ्यशब्दात् ख.

नवमखण्डे परोवरीयस्त्वादिविशिष्टकाशाख्यपरमात्मदृष्टिरुद्गीथे विधास्यते। तदर्था आख्यायिका अष्टमे।

हन्तोद्गीथे कथां वदाम इति । ॥ १ ॥ तथेति ह समुपविविशुः ।

स ह प्रवाहणो जैबलि[1]रुवाच—भगवन्तावग्रे वदताम्; ब्राह्मणयोर्वदतोर्वाचँ श्रोष्यामीति ॥ २ ॥

स ह शिलकश्शालावत्यश्चैकितायनं दाल्भ्यमुवाच—हन्त त्वा पृच्छानीति । पृच्छेति होवाच ॥ ३ ॥

का साम्नो गतिरिति । स्वर इति होवाच । स्वरस्य का गतिरिति

1. जैबिलिः मा.

पत्यर्थे[1] ऋषित्वादणि चैकितायनः । जीबलशब्दात् अत इञि जैबलिः । ते — वदाम इति । वयमुद्गीथविज्ञाने[2] कुशला भवामः । अतो विद्यावैशद्याय वादकथां परस्परं प्रवर्तयाम इत्यूचुरित्यर्थः । तथेति ह समुपविविशुः । तथा कुर्म इत्यन्योन्यमुक्त्वा एकत्रोपविष्टवन्त इत्यर्थः ।

स — उवाच । प्रवाहणः क्षत्रियः तौ ब्राह्मणौ प्रागल्भ्यादुवाचेत्यर्थः । [[3]उक्तिमेवाह] भगवन्तौ — श्रोष्यामीति । भगवन्तौ पूजावन्तौ = ब्राह्मणौ अग्रे वदतां वादकथां कुरुताम् । तत्प्रकारं श्रोष्यामीति ।

स — पृच्छानीति । स्पष्टोऽर्थः । [तत्र दाल्भ्यस्य प्रत्युक्तिमाह — पृच्छेति होवाच । स्पष्टम् ।]

[शिलकः पृच्छति] का साम्नो गतिरिति । गतिः अयनं प्राप्यमित्यर्थः । [स दाल्भ्यः] स्वर इति ह उवाच [प्रत्युवाच ।] स्वरात्मकत्वात् साम्नः इति भावः । [शिलकः पृच्छति] स्वरस्य — इति । [दाल्भ्य उत्तरमाह]

1. अर्थे इति क. कोशे । 2. विधाने ग. 3. एतदादि ग. कोशे एतत्खण्डे अवतारिकाभागः सर्वोऽपि न ।

गोत्रापत्येति ॥ अपत्यार्थत्वे हि व्यामुष्यायणत्वकल्पनाक्लेशः । वादकथामिति । तिस्रः कथा भवन्ति वादो जल्पो वितण्डा च । तत्त्वनिर्णिनीषुकथा वादः । अन्ये विजिगीषुकथे । कथा विचारः । एकत्रेति । समित्येकीकारे । संभूयोपविविशुः । तेन एकत्रेति लब्धम् । का साम्नो गतिरिति । प्रश्नवाक्यानन्तरं पप्रच्छेत्येवं पृथक्क्रियापदाप्रयोगात् उत्तरवाक्ये परं प्रयोगात् एकवाक्यत्वं गुरुमिलाषायेन, इति पृष्टो दाल्भ्य इत्येवमध्याहरिष्यति । इयं रीतिः सर्वत्र, उपरितनखण्डादावपि भाव्या ।

प्राण इति होवाच। प्राणस्य का गतिरिति। अन्नमिति होवाच। अन्नस्य का गतिरिति। आप इति होवाच ॥ ४ ॥

अपां का गतिरिति। असौ लोक इति होवाच।

अमुष्य लोकस्य का गतिरिति। 'न स्वर्गं लोकमतिनये' दिति होवाच—'स्वर्गं वयं लोकँ सामाभिसँस्थापयामः; स्वर्गसँस्तावँ हि साम' ति ॥ ५ ॥

तँ ह शिलकशालावत्यश्चैकितायनं दाल्भ्यमुवाच—अप्रतिष्ठितं वै किल ते दाल्भ्य! साम; यस्त्वेतर्हि ब्रूयात्, 'मूर्धा ते विपतिष्यती'ति, मूर्धा ते विपतेदिति ॥ ६ ॥

प्राण —। प्राणनिर्वर्त्यत्वात् स्वरस्येति भावः। एवमुत्तरत्राप्यौचित्यमनुसंधेयम्। [अपां का गति' रिति पृष्टो दाल्भ्यः] असौ लोक इति होवाच। द्युलोकादेव वृष्टिप्रभवादिति भावः।

[अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्यः आह] न स्वर्गं —। स्वर्गं लोकमतीत्य[1]परमाश्रयान्तरं साम न नयेत्। स्वर्गलोकव्यतिरिक्तमाश्रयान्तरं साम न प्रापयेदित्यर्थः। न वदेदिति यावत्। स्वर्गं—सामेति। अतो वयमपि साम अभि साम प्रति आश्रयत्वेन स्वर्गं लोकं सम्यक् स्थापयामः। [हि[2] यस्मात् साम स्वर्गसंस्तावम् 'स्वर्गो वै लोकः सामवेदः' इति श्रुत्या स्वर्गत्वेन साम्नः स्तूयमानत्वादित्यर्थः।

तं ह शिलकः — विपतेदिति। "हे दाल्भ्य। अप्रतिष्ठितं स्वर्गलोकं सामगतिपरम्पराविश्रान्तिभूमिं वदतस्तव मते साम अप्रतिष्ठितमेव स्यात्। एतस्मिन् समये यः कश्चिदागत्य, 'वादकथायामयुक्तमर्थं प्रतिजानानस्य ते मूर्धा विपतिष्यती'ति यदि ब्रूयात्—तदा विपतेदेव ते [3]मूर्धा। न संशयः। मया तु सौहार्दात् तथा नोक्तम्। अतो जीवसि" इति शिलक उक्तवानित्यर्थः।

1. अतीत्यापरं क. 2. एवं कुण्डलितं सर्वं ग. कोशे न।

यःकश्चिदित्यादि। य इत्यस्य प्रतिसंबन्धि तेनेतिपदं मूर्धेतिवाक्येऽध्याहार्यमेवमर्थ. विवक्षया।

हन्ताहमेतद् भगव[1]त्तो वेदानीति । विद्धीति होवाच । अमुष्य लोकस्य का गतिरिति । अयं लोक इति होवाच ।

अस्य लोकस्य का गतिरिति । न प्रतिष्ठां लोकमतिनयेदिति होवाच ; प्रतिष्ठां वयं लोकँ सामाभिसँस्थापयामः ; प्रतिष्ठासँस्तावँ हि सामेति ॥ ७ ॥

तँ ह प्रवाहणो जैबलिरुवाच–अन्तवद्वै किल ते शालावत्य ! साम ; यस्त्वेतर्हि ब्रूयात्, 'मूर्धा ते विपतिष्यती'ति, मूर्धा ते विपतेदिति ॥

हन्ताहमेतद् भगव[1]त्तो वेदानीति । विद्धीति होवाच ॥ ८ ॥

इति प्रथमाध्याये अष्टमः खण्डः

---

1. भगवतः शां. मा.

हन्त — विद्धीति होवाच । तर्हि अहं सामगतिपरम्पराविश्रान्तिभूमिं त्वत्तो जानीयामिति [दालभ्येन] प्रार्थितः [शिलकः] तथेत्युक्तवानित्यर्थः । [अनुमतो दालभ्यः पृच्छति] **अमुष्य — इति** । [शिलक उत्तरमाह] **अयं लोक–**। यागदानहोमादिभिर्भूलोकस्य स्वर्गोपजीव्यत्वादिति भावः ।

अस्य — सामेति । पृथिवीलोकस्य का गतिरिति दालभ्येन पृष्टः शिलकः **प्रतिष्ठां** पृथिवीलोकमतिक्रम्य सामगतिपरम्पराविश्रान्तिभूमिमन्यः कश्चिदपि न वदेत् (अन्यन्न कश्चिदपि वदेत्) । अतो वयमपि तथैव वदामः । 'इयं वै रथन्तरम्' इति श्रुत्या साम्नः प्रतिष्ठालोकत्वेन स्तूयमानत्वात् । स्वर्गस्य ज्योतिश्चक्रभ्रमतया बम्भ्रम्यमाणत्वेन प्रतिष्ठात्वाभावेऽपि पृथिव्यास्तु स्थिरत्वात् प्रतिष्ठात्वम् इत्युक्तवानित्यर्थः ।

तँ ह प्रवाहणः — साम । अन्तवतीं पृथिवीं सामगतिपरम्पराविश्रान्तिभूमितया प्रतिजानानस्य ते मते साम अन्तवदेव स्यादित्यर्थः । **यस्त्वेतर्हि–होवाच** । पूर्ववदर्थः ।

[हन्ताहमेतदित्यादि शिलक आह । **विद्धीति** राजोवाचेत्यर्थः] ।

भगवत्त इति । अज्ञातार्थोपदेष्टृत्वात् क्षत्रियेऽपि प्रवाहणे आचार्यत्वाभिसंधिः । दालभ्यात् शिलकोऽधिकः ; ततः प्रवाहणः ।

१—९

अस्य लोकस्य का गतिरिति । "आकाश" इति होवाच—"सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते; आकाशं प्रत्यस्तं यन्ति; आकाशो ह्येवैभ्यो ज्यायान्; आकाशः परायणम् ॥ १ ॥

स एष परोवरीयान् उद्गीथः; स एषोऽनन्तः ।

[एवमनुमतः शिलको राजानं पृच्छति] **अस्य—होवाच** । अस्य पृथिवीलोकस्य का गति[1]रिति शालावत्येन पृष्टः प्रवाहणः, आकाश इत्युक्तवानित्यर्थः । अत्र आकाशते=प्रकाशते, आकाशयतीति वा व्युत्पत्त्या आकाशशब्दो ब्रह्मपरः; 'आकाशो ह वै नामरूपयोर्निर्वहिते'त्यादौ आकाशशब्दस्य ब्रह्मण्यपि प्रसिद्धत्वात्; न तु भूताकाशपर इति द्रष्टव्यम् । तदेव गतित्वं प्रपञ्चयति **सर्वाणि ह—यन्ति** । चिदचिदात्मकप्रपञ्चः आकाशादेवोत्पद्यते; तत्रैव लीयत इत्यर्थः । **आकाशो—ज्यायान्** । ज्यायस्त्वं नाम सर्वैः कल्याणगुणैः सर्वेभ्यो निरतिशयनिरुपाधिकोत्कर्षः । **आकाशः परायणम्** । **परायणत्वं** परमगतित्वम् । परमप्राप्यत्वमिति यावत् ।

स एष परोवरीयानुद्गीथः । [2]**वरः** उत्कृष्टः । **वरीयान्** उत्कृष्टतरः । वरीयसामपि वर(पर) इत्यर्थः । अत्र परःशब्दः सकारान्तो द्रष्टव्यः । एवंरूप **आकाश उद्गीथः** । परमात्मदृष्टिविशिष्ट उद्गीथ इत्यर्थः । उद्गीथे एतादृशाकाशदृष्टिः कर्तव्येति यावत् । **स एषोऽनन्तः** । उद्गीथेऽध्यस्यमानोऽयमाकाशः **अनन्तः** अपरिच्छिन्न इत्यर्थः । ततश्चानन्तस्य आकाशशब्दितस्य परमात्मन एव सामगतिपरम्पराविश्रान्तिभूमित्वात् मत्पक्षे, 'अन्तवद्वै किल ते साम' इत्युक्तः अन्तवत्त्वदोषो न प्रसरतीति भावः ।

1. प्रश्नोत्तरवाक्ये पृथक् धृत्वा, 'का गतिरितीत्यर्थः', 'इति शालावत्येन — आकाश इत्युक्तवानित्यर्थः' इति पृथग्व्याख्यानमुद्रणं ख. कोशे । 2. अयं क. पाठः । 'पर उत्कृष्टः । वरीयसामपि पर इत्यर्थः' ख. पर उत्कृष्टो वरीयान् वरीयसामपि परः ग. परमोत्कृष्टो वरीयान् वरीयसामपि वरः घ.

परोवरीयानिति । दाल्भ्येन सामगतिकाष्ठात्वेनोक्तात् स्वर्गात् वरीयान् अयं लोकः; ततोऽपि परः प्रवाहणोक्त आकाशः परोवरीयान् ।

परोवरीयो हास्य भवति; परोवरीयसो ह लोकान् जयति; य एतदेवं विद्वान् परोवरीयाँसमुद्गीथमुपास्ते ॥ २ ॥

तँ हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच, 'यावत्ते[1] (न्त) एनं प्रजायामुद्गीथं वेदिष्यन्ते, परोवरीयो हैभ्यस्तावदस्मिन् लोके जीवनं भविष्यति ॥ ३ ॥ तथाऽमुष्मिन् लोके लोक' इति। स य एतमेवं विद्वान् उपास्ते, परोवरीय एव हास्यास्मिन् लोके जीवनं भवति, तथाऽमुष्मिन् लोके लोक" इति, लोके लोक इति।

इति प्रथमाध्याये नवमः खण्डः

1. यावत्ते. शां. मा.

परोवरीयो—मुपास्ते। यः परोवरीयांसमेतमाकाशशब्दितं परमात्मानं विद्वान् आकाशत्वेनोद्गीथमुपास्ते, तस्य परोवरीयस्त्वगुणकं जीवनं भवति। परोवरीयस्त्वगुणकसकललोकवासिश्च भवति।

प्रवाहणः स्वो[1]क्तार्थं संवादयति तं—**उवाच**। अतिधन्वनामा शुनकसुतः उदरशाण्डिल्याय ऋषये—उदरशब्देन संततिर्लक्ष्यते। संततिशाली शाण्डिल्य इत्यर्थः। तस्मै—एनमुद्गीथमुक्त्वा अन्यदप्युवाचेत्यर्थः। किं तदित्यत्राह—**यावन्त—भविष्यति**। **वेदिष्यन्त** इत्येतद् व्यत्ययेनात्मनेपदम्। **प्रजायां** त्वत्संततौ यावन्तः पुरुषा एनमुद्गीथमुपासिष्यन्ते, तेषामुत्कृष्टमिह लोके जीवनं भविष्यतीत्यर्थः। **तथाऽमुष्मिन् लोकेलोक इति**। तथा सर्वस्मि (अमुष्मि)न्नपि परलोके भविष्यतीत्यर्थः। **परोवरीयो जीवनमित्यनुषङ्गः**। लोकेलोक इति वीप्सायां द्विर्वचनम्। **इति अतिधन्वा उवाचेति** पूर्वेणान्वयः। अत इदानीन्तनानामपि तद्विदां तत् फलमस्तीत्याह—**स य—लोकेलोक इति** [2]स्पष्टोऽर्थः। **लोकेलोक इति। लोकेलोकइतीति** द्विरुक्तिर्विद्यासमाप्त्यर्था।

1. स्वेति क कोशे न। 2. इदं न ग. कोशे।

परोवरीय इत्यस्य **जीवनमिति** विशेष्यमुत्तरवाक्यलभ्यम्। **अमुष्मिन् लोके लोके** इति वीप्सा उपरितनसर्वप्राकृतलोकग्रहणार्था।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते—समन्वयाध्याये प्रथमपादे—उद्गीथे अध्यस्योपास्यमानाकाशो भूताकाश एव । आकाशशब्दस्य भूताकाशे रूढत्वेन रूढाकाशशब्दाभ्यासादिति पूर्वपक्षे प्राप्ते—उच्यते — 'आकाशस्तल्लिङ्गात्' । आकाशशब्दाभिधेयः परमात्मा । निखिलजगदेककारणत्व सर्वज्यायस्त्व परायणत्वा[1]दीनां परमात्मलिङ्गानां भूताकाशे असंभवात् । भूताकाशस्याचेतनवर्गं प्रति कारणत्वसंभवेऽपि चिदचिद्वर्गकारणत्वासंभवात् । सर्वैः कल्याणगुणैः सर्वोत्कृष्टत्वलक्षणज्यायस्त्वस्याप्यसंभवात् अचेतनस्य । स्वरूपभिन्नत्वेन मोक्षविरोधितया च[2] हेयस्य शब्दादिनिषिद्धविषयप्रावण्यजनकतया सकलपुरुषार्थविरोधिनः अचेतनस्य परायणत्वलक्षणप्राप्यत्वस्य[3] चासंभवात् । तस्य 'च, 'का साम्नो गतिः', 'अस्य लोकस्य का गतिः' इत्युपक्रमलक्षणतात्पर्यलिङ्गेन प्रतिपिपादयिषितत्वावगमात् । [5]तथा, 'अन्तवद्वै किल ते दाल्भ्य साम' इति पृथिवीलोकस्यान्तवत्त्वोक्तिदूषणपूर्वकमुपक्षिप्तस्य, 'स एषोऽनन्तः' इत्यनन्तत्वलिङ्गे च प्रतिपिपादयिषितत्वावगमात् । प्रतिपिपादयिषितपरायणत्वानन्तत्वपरोवरीयस्त्वादिलिङ्गविरोधे अभ्यस्ताया अपि श्रुतेर्दुर्बलत्वात्[6] आकाशशब्दः[7] आकाशते आकाशयतीति वा योगवशेन परमात्मपर एव ।

ननु, 'सर्वाणि ह वा इमानि भूतानी'ति श्रुत्यैवाऽऽकाशस्य जगत्कारणत्वाऽऽवेदनात्[8] यथाश्रुताकाशस्यैव जगत्कारणत्वमभ्युपेतव्यमिति चेन्न — 'सदेव सोम्येदमग्र आसीत्', 'आत्मा वा इदमेक एवाग्र आसीत्', 'एको ह वै नारायण आसीत्' इत्यादियोग्यार्थाननुवादरूपबहुवाक्यविरोधे एकस्यानुवादरूपस्यायोग्यार्थस्यास्य वाक्यस्य [9]दुर्बलत्वेन स्वार्थप्रतिपादनसामर्थ्याभावात् । अत आकाशशब्दो यौगिक्या वृत्त्या ब्रह्मपर एव ।

1. आदिपदं न ख. कोशे । 2. अयं चकारः जनकतयेत्येतदनन्तरम् ; हेयशब्दादीति च समस्तम् ख. कोशे । ग. कोशे चकारोऽत्रैव हेयशब्देति तु पाठः । 3. प्राप्यत्वासंभवात् । परायणत्वलक्षणप्राप्यत्वस्य च क. 4. चकारो न ख. कोशे । 5. तथेत्यादि—गमादित्यन्तं क. कोशे । 6. दुर्बलत्वाच्च ख. 7. आकाशशब्दश्च क. ख. 8. त्वावगमात् क. 9. अस्य वाक्यस्येति क. कोशे न ।

हेयेति पाठे तत् निषिद्धविषयेऽन्वेति । योग्यार्थेति वाक्यविशेषणम् ।

यत्त्वत्र व्यासार्यैः, 'अर्थाविरोध एव रूढिप्राबल्यमित्यपशूद्राधिकरणनयोपजीवनेनावयवशक्त्या निर्वाहो भाष्ये उक्तः। रूढ्यपरित्यागेन अपर्यवसानवृत्त्या आकाशशब्दस्याकाशशरीरकपरमात्मपरतया निर्वाहोऽप्यभिमतः' इत्युक्तम् — तत् उपायान्तरसंभवप्रदर्शनमात्रपरम्; न तु प्रकृताभिप्रायम्। अनन्यथासिद्धभूताकाशलिङ्गसत्त्व एव, 'जीवमुख्यप्राणलिङ्गात्' इति सूत्रोक्तन्यायावतारात्।

'परविद्यासु जीवोक्तिर्निरुक्त्यादेः पराश्रया।
तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी॥'

इत्याचार्योक्तेः। [1]भूताकाशशरीरकाद् ब्रह्मणः सकलचेतनाचेतनवर्गोत्पत्त्यभावेन 'सर्वाणि ह वा इमानि 'भूतान्याकाशादेव समुत्पद्यन्ते' इत्यत्राकाशशब्दस्य भूताकाशशरीरकब्रह्मप्रतिपादकत्वासंभवात्। न चाकाशावस्थस्य ब्रह्मणो निखिलकारणत्वासंभवेऽपि आकाशावस्थोपलक्षितस्य तत् संभवतीति वाच्यम् — तथा सति आकाशशब्दस्यात्यन्तामुख्यत्वप्रसङ्गादिति द्रष्टव्यमिति स्थितम्। प्रकृतमनुसरामः। १—९.

1. भूताकाशेत्यादिसर्वस्थाने 'भूताकाशशरीरकब्रह्मप्रतिपादकत्वासंभवाच्चेति द्रष्टव्यमित्येतावदेव ख. कोशे। ग. कोशे न चेत्यादि न।

अर्थाविरोध एवेति। रूढ्यर्थविरोधे तु शूद्रपदस्य शोचितृत्वरूपयोगार्थवत् प्रकृतोपयुक्तो योगार्थो गृह्यते इति भावः। **आचार्योक्तेरिति**। न्यायसिद्धाञ्जन इति शेषः। न केवलमिदम्। व्यासार्यैरपि, 'साक्षादप्यविरोधम्' इत्यत्र एवमेवोक्तेः। नन्वेवं सति पाञ्चरात्राधिकरणसिद्धान्तसूत्रभाष्यविरोधः, तत्र, "यथा आकाशप्राणादिशब्दाः" इति अपर्यवसानवृत्तिप्रदर्शनात्। अत आचार्यकारिकायामपि, 'निरुक्त्यादेः' इति आदिपदेनापर्यवसानवृत्तिरपि गृह्यते। तल्लिङ्गानन्यथासिद्धौ अपर्यवसानवृत्तिमात्रम्, अन्यत्र तूभयमपीति भेद इति चेत्—उच्यते। योगशक्तेरपर्यवसानवृत्तेश्चाविशेषेण स्वीकारे उपास्याकारभेदेनाष्टदोषदुष्टविकल्पापत्तेः केनापि विनिगमकेन कश्चिदेवार्थो विवक्षणीयः। सकृत्प्रयुक्तशब्दनयाच्च। तत्र यद्यपि अपर्यवसानवृत्तौ प्रथमप्रतीतार्थापरित्यागाल्लाघवम्—तथापि भूताकाशान्तर्यामित्वेन रूपेण सर्वकारणत्वाभावादर्थस्वारस्यभङ्गः। न हि अनन्यथासिद्धं लिङ्गं किमप्यस्ति, येन असारस्येऽपि तद्विवक्षा कर्तव्या स्यात्। अतोऽसारस्याभावाद् योगव्युत्पत्तिः। अत एव सूत्रकृता इन्द्रप्राणाधिकरण एव अन्तर्यामिपर्यन्तविवक्षायै शास्त्रदृष्टः प्रदर्शिता। न तु पूर्वम्। पाञ्चरात्राधिकरणभाष्यं तु यत्रापर्यवसानवृत्तिराकाशादिपदे भवितुमर्हति, तत्स्थलाभिप्रायं नेयमिति।

१—१०

मटचीहतेषु कुरुषु आट[1](टि)क्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ १ ॥

स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे। तँ होवाच—, 'नेतोऽन्ये विद्यन्ते, यच्चये[2] मे इमे उपनिहिता' इति ॥ २ ॥

1. आटक्या. **मा.** आटिक्या. शां. 2. यच्चये इत्यत्र यच्च ये इति **मा.** (चशब्दोऽवधारणे यत् यस्मात्) । शांकरे तु चये इत्येव पदम्। मुद्रणे तु सर्वत्र प्रमादः।

प्रस्तावोद्गीथप्रतिहारभक्तित्रयविषयकोपासनानि विधातुमाख्यायिकामाह — **मटची — उवास** । चक्रस्य सुतः उषस्तिनामा कश्चन ऋषिः **मटचीहतेषु** अश्मवृष्टिकृतदुर्भिक्षदूषितेषु कुरुदेशेषु **आट(टि)क्या** अनुपजातपयोधरादिव्यञ्जनया भार्यया सह **इभ्यानां** गजारोहाणां ग्रामे अनशनेन[1] **प्रद्राणकः** कुत्सितां गतिमापन्नः ब्रह्मविद्याया निष्पत्तये प्राणानामनवसादं काङ्क्षन्नुवास । द्रा कुत्सायां गतौ इति हि धातुः । चक्रस्य गोत्रापत्यमित्यर्थे "अश्वादि"त्वात् फञि[2] चाक्रायण इति रूपम् ।

स — बिभिक्षे । सोऽन्नार्थी अटन् **कुल्माषान्** कुत्सितान् माषान् खादन्तमिभ्यं याचितवान्। 'कुल्माषादञि[3]' इति निर्देशात् कुत्सितमाषार्थे कुल्माषशब्दस्य साधुत्वम् । **तं—निहिता इति** । **इतः** मया भक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यन्ते । **यत्** यस्माद्धेतोः **इमे** कुल्माषाः **मे चये** मे मया भक्ष्यमाणे **चये** उच्छिष्टराशौ **उपनिहिताः** प्रक्षिप्ताः । अतः किं करोमीत्युषस्तिमिभ्य उवाचेत्यर्थः ।

1. प्रद्राणकः अनशनेन. **ख. ग.** 2. फञि **ख.** 3. अञि"ति. **ख.**

मटच्यः अशनय इति शाङ्करम्। अटनमर्हतीति **आटिकी**। बहिरधिकं पर्यटनार्हत्वाद्यानुपजातस्तन्यत्वमेव। अन्यादृशीनां गृह एव स्थितेः। **चये** इति। 'समुदायश्चयो गणः' इत्यमरः। शाङ्करेऽपि चये इत्येव पदच्छेदः।

'एतेषां मे देही' ति होवाच। तानस्मै प्रददौ। 'हन्तानुपानम्' इति। 'उच्छिष्टं वै मे पीतँ स्या' दिति होवाच ॥ ३ ॥ 'न स्विदेतेऽप्युच्छिष्टा' इति। न वा अजीविष्यमिमानखादन्' इति होवाच, 'कामो म उदपान' मिति ॥ ४ ॥

स ह खादित्वाऽतिशेषान् जायाया आजहार। साऽग्र एव सुभिक्षा बभूव; तान् प्रतिगृह्य निदधौ ॥ ५ ॥

स ह प्रातः संजिहान उवाच, 'यद् बतान्नस्य लभेमहि, लभेमहि

एतेषां–होवाच। उच्छिष्टानामपि मध्ये मे मह्यमपि किञ्चिद् देहीति इभ्यमृषिः प्रार्थितवानित्यर्थः। **तानस्मै प्रददौ। तान्** कुल्माषान् उषस्तये इभ्यो दत्तवानित्यर्थः। **हन्त–होवाच।** अथ समीपस्थमुदकं गृहीत्वा [1]हन्त! गृहाणानुपानमिति इभ्येनोक्तः [2]स ऋषिः तदुदकपाने[3] उच्छिष्टोदकपानं मे स्यादिति प्रत्युवाचेत्यर्थः। **न स्वित्–पानमिति।** 'किमेते इदानीं त्वया मत्तो गृहीताः कुल्माषा अनुच्छिष्टा' इति इभ्येन पर्यनुयुक्तः ऋषिः[4], 'कुल्माषाखादने स्वस्य जीवनहानिर्भवति। तावन्मात्रखादनेन धृतप्राणस्य स्वस्योच्छिष्टोदकपानं **कामः** कामकारितं निषिद्धं स्या'दित्युवाचेत्यर्थः।

स–आजहार। सः उषस्तिः [5]स्वयं किञ्चिद् भक्षयित्वा **अतिशिष्टान्** अवशिष्टान् जायायै दत्तवानित्यर्थः। **सा निदधौ।** सा जाया **अग्रे** प्रागेव **सुभिक्षा** लब्धान्ना बभूव। तथापि स्त्रीस्वभावात् अनवज्ञाय तान् कुल्माषान् पत्युर्हस्तात् प्रतिगृह्य निक्षिप्तवती।

स — धनमात्राम्। स होषस्तिः प्रातः **संजिहानः** शयनं परित्यजन्नेव पत्न्यां शृण्वत्यामिदमुवाच। किं तत्? [6]यदि अन्नस्य स्तोकमपि लभेमहि,

1. हन्तेति क. कोशे। 2. स ऋषिरिति ग. कोशे न। 3. पानेन ख. ग. 4. ऋषिरिति ग. कोशे न। 5. स्वयं किञ्चिदित्येतत्स्थाने 'तान्' इति ग. कोशे. 6. यत् ग.

एतेषामिति षष्ठीप्रयोगात् अंशमात्रभिक्षणमुषस्तिकृतम्। **इभ्यस्तु** महानयं ब्राह्मणः सत्स्वपि कुल्माषत्वमदीयत्वोच्छिष्टत्वेषु प्रार्थयत इति प्रीत्या सर्वानपि कुल्माषान् प्रकर्षेण ददौ। अत एव 'अतिशेषान्' इति वक्ष्यति। अनुपानश्चात एव तदेव ग्राहयितुं प्रायतत। तदाह **तानस्मै प्रददौ। हन्तानुपानम्** इति।

स ह खादित्वेति उपरि कथनात् खादनं ततो निष्क्रम्य गत्वा मध्येमार्गमिति ज्ञायते। **सुभिक्षा** = बालत्वाद्वा स्वयं प्राणात्ययापत्तिदशाप्राप्तेर्वा साधुभिक्षितशमितक्षुत। **इदमुषस्ति-**

धनमात्राम्; राजाऽसौ यक्ष्यते; स मा सर्वैरार्त्विज्यैर्वृणीते 'ति ॥ ६ ॥ तं जायोवाच, 'हन्त पते! इम एव कुल्माषा' इति। तान् खादित्वाऽमुं यज्ञं विततमेयाय ॥ ७ ॥ तत्रोद्गातॄन् आस्तावे स्तोष्यमाणानुपोपविवेश।

स ह प्रस्तोतारमुवाच, ॥ ८ ॥ 'प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता, ताश्चेदविद्वान् प्रस्तोष्यसि, मूर्धा ते विपतिष्यती' ति ॥ ९ ॥

तेन प्राणान् धृत्वा **धनमात्राम्** अल्पधनं लभेमहीत्यर्थः। कथं धनमात्रा लभ्यत इत्यत्राह -- **राजाऽसौ** --- **वृणीतेति**। राजाऽसौ नातिदूरे यजते, स मां दृष्ट्वा सर्वाणि आर्त्विज्यानि त्वया कारयितव्यानीति [मां] प्रार्थयेतेत्युवाचेत्यर्थः। **तं — कुल्माषा इति**। 'हे पते! ये मद्धस्ते[1] निक्षिप्ताः त्वया कुल्माषाः, त इम एव। एतान् गृहाणे 'ति जाया प्रत्युक्तवतीत्यर्थः। **तान् — एयाय**। तानेव पर्युषितोच्छिष्टान् कुल्माषान् भक्षयित्वा **विततं** विस्तीर्णं यज्ञं गतवानित्यर्थः।

तत्र — उपविवेश। आस्तुवन्त्यस्मिन् इति **आस्तावः** स्तोत्रस्थानम्। सदसि स्तोतुं प्रवृत्तानां उद्गातृप्रस्तोतृप्रतिहर्तॄणां **उप** समीपे उपविष्टवानित्यर्थः।

स — विपतिष्यतीति। [सः उषस्तिः प्रस्तोतारं प्रति इत्थमुवाचेत्यर्थः। उक्तिमेवाह **प्रस्तोतः**—।] हे प्रस्तोतः! **प्रस्तावमन्वायत्ता** प्रस्तावभक्तौ अध्यस्य या देवता उपास्या, तामविदित्वा यदि विदुषो मम समीपे प्रस्तोष्यसि, मूर्धा ते विपतिष्यतीत्यर्थः। यद्यपि, 'तेनोभौ कुरुतो यश्चैतदेवं वेद, यश्च न वेद'

1. मद्धस्त ख.

वृत्तम्, 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्' इति सूत्रे दर्शितम्। वक्ष्यते च तदर्थं इह भाष्ये प्राणविद्यायाम्। (5.1.)

उद्गातॄनिति। इदं बहुवचनान्तत्वान्नोद्गातृमात्रपरम्' किंतूच्चगानकर्तृत्रितयपरम्। एतत्सूचनाय भाष्ये 'प्रस्तोत्रुद्गातृ' इत्यनुक्त्वा **उद्गातृप्रस्तोत्रित्युक्तम्**। अत्र उद्गातॄनिति द्वितीयाया अन्वयाय आगत्येत्यध्याहृतं शाङ्करे।

प्रस्तावभक्तावध्यस्येति। ननु **अन्वायत्ता** देवतेत्यस्य अधिष्ठातृदेवतेत्यर्थस्यैव पर्याप्तत्वात् किमिति अध्यस्योपास्येत्यर्थः?। अत एव, 'प्रस्तावप्रतिहारविषयमप्युपासनं वक्तव्यम्' इति शाङ्करमपि विमृश्यम्। पूर्वं, 'स एष परोवरीयानुद्गीथ'इति उद्गीथे आकाशादिदृष्टिर्यथा समानाधिकरणनिर्देशादवसीयते, न तथाऽत्र किञ्चित्। किञ्चात्र प्रस्तावादौ प्राणादिदृष्टिश्चेत्, किं तत्फलम्? अनुक्तेः। कर्मवीर्यवत्तरत्वमेव सामान्यश्रुतिसिद्धमिति चेत्—तर्हि एकत्र कृतस्य

एवमेवोद्गातारमुवाच, 'उद्गातर्या देवतोद्गीथमन्वायत्ता, ताश्चेदविद्वानुद्गास्यसि, मूर्धा ते विपतिष्यती' ति ॥ १० ॥

एवमेव प्रतिहर्तारमुवाच, 'प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता, ताश्चेदविद्वान् प्रतिहरिष्यसि, मूर्धा ते विपतिष्यती' ति ।

ते ह समारतास्तूष्णीमासाञ्चक्रिरे ॥ ११ ॥

इति प्रथमाध्याये दशमः खण्डः

इति अविदुषोऽप्यार्त्विज्याधिकारोऽस्ति — तथापि विद्वत्संनिधौ अविदुषः कर्माधिकारो नास्तीति भावः । **एवमेव — विपतिष्यतीति** । पूर्ववदर्थः । **एवमेव** — । स्पष्टोऽर्थः । **ते — आसाञ्चक्रिरे**, ते ह प्रस्तोत्रादयः **समारताः** उपरताः सन्तः मूर्धपातभयात् तूष्णीमेव स्थिता इत्यर्थः ।

दृष्ट्यैव तत्सिद्धौ अन्यदृष्टिद्वयविधानं व्यर्थम् । एकस्मिन् प्रयोगे त्रीन् पुरुषानुद्दिश्य तिसृणां दृष्टीनामुपदेश, तदनुष्ठानञ्च न एकं फलमुद्दिश्य भवितुमर्हति । **एत एव समतिसृष्टाः स्तुवतामिति** च दर्शितमेव त्रिभिरप्युपदिष्टोपयोजनम् । अतः, पूर्वम्, 'आशीस्समृद्धिरुपसरणानि' इत्युक्तरीत्या अपेक्षितफलसमृद्धिकरमधिष्ठातृदेवताचिन्तनमेवात्र प्रतीयते । प्राणाधिकरणश्रुतप्रकाशिकायामपि, 'उद्गीथप्रतिहारयोर्देवतात्वेन अन्नादित्यावुक्तौ' इत्येतावदेव प्रकाशितम्—इति चेत्—सत्यम् । अथापि उद्गीथदेवतायां आदित्यस्य कथनावसरे, **उच्चैस्सन्तं गायन्ती**ति उद्गीथपदार्थसंक्रमणेन तदुपवर्णनानन्तरादित्यविद्यायामिव तत्र तद्दृष्टिं द्योतयति । तथा प्रतिहारदेवताया अन्नस्य, 'प्रतिहरमाणानि' इति प्रतिहारशब्दार्थान्वयेन वर्णनमपि । एवञ्च प्रस्तावघट्टेऽप्येवं द्रष्टव्यम । प्रस्तावो हि अप्रकाशस्याभिनवः प्रकाशः । **अभिसंभवन्ति, उज्जिहत** इति च स एवोच्यते । **अन्वायत्ते**ति पदमपि नाधिष्ठातृत्वाय । प्रत्युत देवतायत्तमधिष्ठेयम् । अत एवान्यत्र (१-९-२) अन्वायत्तानीत्यस्य उपजीवन्तीत्यर्थ उक्तः । सादृश्यार्थे च **अनु**शब्दोऽनुशिष्टः, 'पश्चात्सादृश्ययोरनु' इति । श्रुतप्रकाशिकायामपि देवतात्वेनेत्यस्य अध्यस्योपास्यदेवतात्वेनेत्यर्थो न क्लिष्टः । शाङ्करार्थानुवादरूपत्वात् तदभिमत एव तदर्थः । अतः प्रकृते एवमुचितम् । किमिति दृष्टित्रयमिति चेत्—विनिगमनाविरहात् । त्रयोऽपि चादौ भर्त्सिताः । त्रीनप्युपसन्नान् प्रति तिस्रो दृष्टयश्चोपदिष्टाः । तथा तदैव गृहीत्वाऽनुष्ठीयमानासु या कासुचित् सम्यङ्निष्पन्ना वीर्यवत्तरत्वं फलिष्यति । अन्यथा आशीस्समृद्धिप्रकरण एव सर्वमिदं श्रुत्योक्तं स्यात्, सङ्गच्छति-सप्तादित्यन्यायः ।

१–११.

अथ हैनं यजमान उवाच, 'भगवन्तं वा अहं विविदिषाणी'ति। 'उषस्तिरस्मि चाक्रायण' इति होवाच ॥ १ ॥ स होवाच, 'भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषम्; भगवतो वा अहमविद्या[1]ऽन्यानवृषि ॥ २ ॥ भगवाँस्त्वेव मे सर्वैरार्त्विज्यैः' इति। 'तथे'ति; 'अथ तर्हि एत एव समतिसृष्टाः स्तुवताम्; यावत्त्वेभ्यो[2] धनं दद्याः, तावन्मम दद्या' इति। 'तथे'ति ह यजमान उवाच ॥ ३ ॥

1. अविद्या. शां. मा. 2. यावत्तेभ्यः मा.

अथ—विविदिषाणीति। को भवानिति भवन्तं ज्ञातुमिच्छामीति उषस्ति यजमान उक्तवानित्यर्थः। **उषस्तिरस्मि—उवाच**। स ऋषिरिति शेषः। स्पष्टोऽर्थः।

स — अवृषि। तमृषिं यजमान उवाच। किमिति। भगवन्तं सर्वगुणोपेतं श्रुत्वा सर्वाण्यार्त्विज्यानि भगवदधीनानि कर्तुं **पर्यैषिषम्** भगवतोऽन्वेषणं कृतवानस्मि। भगवतः **अविद्या** — [1] **विदिः** लाभः। 'इक् कृष्यादिभ्यः' इति इक्। सा न भवतीत्यविदिः। तया अविद्या — अलाभेन[2] इमान् ऋत्विजः **अवृषि** वृतवानस्मीत्यर्थः। **भगवांस्तु—आर्त्विज्यैरिति**। इतःपरमपि भगवानेव **सर्वैः आर्त्विज्यैः** ऋत्विक्कर्मभिर्वृत इत्युवाचेत्यर्थः। सर्वार्त्विज्यार्थं वृत इति यावत्।

तथेति — दद्या इति। अत (थ?) उषस्तिः तथेत्यभ्युपगम्य अनन्तरं, 'त्वया पूर्वं वृता एत एव मया **समतिसृष्टाः** सम्यक् प्रसन्नेनानुज्ञाताः उपदिष्टदेवतास्सन्तः **स्तुवतां** स्तुवन्तु। किन्तु एभ्यो यावद् धनं प्रयच्छसि, तावत् मम दद्याः इत्युक्तवानित्यर्थः। **तथेति ह यजमान उवाच**। स्पष्टोऽर्थः।

1. विदिर्लाभः। न विदिरविदिः। इक् कृष्यादिभ्य इति इक्। अविद्या अलाभेन. ख. 2. अलाभेनेत्यर्थः क.

एभिः सर्वैरार्त्विज्यैरिति। **एभिः** सामवेदसंबन्धिभिः। **आर्त्विज्यं** ऋत्विक्कर्म। 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति कर्मणि ष्यञ्। **अविद्येति**। अत्र 'अविद्या' इति शाङ्करादिपाठः। **अविदिरलाभः**। **भगवांस्त्वेवेति**। अत्र राज्ञा क्रियापदाप्रयोगः अनेकार्थं व्यनक्ति। **राज्ञो वैयाकुलीभ्यं दर्शयति**। 'पूर्वमेभिरार्त्विज्यैरुद्दिष्टः वरणार्थमन्वेषितश्च भगवान्। पश्चादिमे वृता आसन्। पुनर्वरीतुमिष्टश्च। वृतानां निरासो युज्येत किम्? भगवतः सर्वार्त्विज्यसंबन्धे संप्रत्युपायं भगवानेव ब्रवीतु' इत्येवम्। **समतिसृष्टाः**। **अतिसर्गः** कामचार इति 'प्रैषातिसर्गे'त्यत्र प्रसिद्धम्। स चानुज्ञैव। **ममेति**। मह्यमिति वक्तव्ये ममेत्युक्तया मुमुक्षोरुपास्तेः तत्र स्वार्थत्वाभिसंध्याभावः सूच्यते।

अथ हैनं प्रस्तोतोपससाद, "प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता, ताश्चेदविद्वान् प्रस्तोष्यसि मूर्धा ते विपतिष्यती"ति मा भगवानवोचत्; कतमा सा देवते" ति ॥ ४ ॥

"प्राण" इति होवाच, "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति; प्राणमभ्युज्जिहते; सैषा देवता प्रस्तावमन्वायत्ता; ताश्चेदविद्वान् [1]प्रास्तोष्यो मूर्धा ते व्यपतिष्यत् तथोक्तस्य मये"ति ॥ ५ ॥

1. प्रस्तोष्यः मा.

अथ हैनं प्रस्तोतोपससाद। उषस्तिवचनं श्रुत्वा प्रस्तोता विनयेन तत्समीपं [1]गतवानित्यर्थः। **प्रस्तोतर्या — देवतेति।** भगवान् मां प्रति, प्रस्तोतर्या देवतेत्यादिना यां देवतामवोचत् उक्तवान्, सा देवता केति प्रस्तोता तमृषिं पप्रच्छेत्यर्थः।

प्राणः—। प्राण एव प्रस्तावमन्वायत्ता देवतेत्युषस्तिरुवाचेत्यर्थः। अत्र प्राणयितृत्वगुणयोगात् प्राणशब्देन परमात्मोच्यते। [अत एव] प्राणशब्दस्य मुख्यप्राणपरत्वं व्यावर्तयति **सर्वाणि—अन्वायत्ता।** [2]**प्राणमेवाभि** प्राणमभिलक्ष्य। प्राणे इति यावत्। **संविशन्ति। सम्**इत्येकीकारे। ऐक्येन विशन्ति। लीयन्त इत्यर्थः। **प्राणमभ्युज्जिहते** प्राणादेवोद्गच्छन्तीत्यर्थः। **सैषा**[3] सर्वभूतलयोत्पत्तिस्थानत्वेन वेदान्तेषु प्रसिद्धा प्राणरूपा देवता प्रस्तावभक्ति[4]**मन्वायत्ता** अनुगता=प्रस्तावभक्तौ अध्यस्योपास्येत्यर्थः। **तां—मयेति।** 'तां चेदविद्वान् प्रस्तोष्यसि, मूर्धा ते विपतिष्यती'ति मदुक्त्यनन्तरमपि मदुक्तिमनादृत्य तद्देवतामनभिज्ञाय यदि प्रास्तोष्यः, तदा मूर्धा ते व्यपतिष्यदेव। अतः साधु कृतं त्वया मत्समीपमागत्य विनयेन पृच्छतेति भावः। अत्र **मूर्धा ते व्यपतिष्यत् तथोक्तस्य मये**त्युक्त्या विदुषैवमुक्तस्याविदुषः तदनादरेण कर्मकरणे प्रत्यवायः, न तु विदुषाऽनु[5]क्तस्याप्यविदुष इति भावः। [6]व्यासार्यैस्तु **मूर्धा ते व्यपतिष्यदित्यस्य**, आत्मसत्ता न लभ्येतेत्यर्थ इति आत्मसत्ताहानिपर्यन्तः प्रत्यवायो वर्णितः।

---

1. समीपमागतवान्. 2. अन्वायत्ता प्राणमभिलक्ष्य संविशन्ति. ख. 3. सैषेति ख. कोशे न। 4. भक्त्यनुगता ख. 5. अनुमतस्य. ख. 6. व्यासार्यैरित्यादिवाक्यं क कोशे न।

अथ हैनमुद्गातोपससाद, "उद्गातर्या देवतोद्गीथमन्वायत्ता ताञ्चेद-विद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्; कतमा सा देवते" ति ॥ ६ ॥

"आदित्य" इति होवाच, "सर्वाणि ह वा इमानि भूतान्यादित्य-मुच्चैःसन्तं गायन्ति। सैषा देवतोद्गीथमन्वायत्ता। तां चेदविद्वानु[1]दगास्यो मूर्धा ते व्यपतिष्यत् तथोक्तस्य मये" ति ॥ ७ ॥

अथ हैनं प्रतिहर्तोपससाद, "प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता ताञ्चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्; कतमा सा देवते"ति ॥ ८ ॥

"अन्न" मिति होवाच, "सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रति-हरमाणानि जीवन्ति। सैषा देवता प्रतिहारमन्वायत्ता। तां चेदविद्वान् प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत् तथोक्तस्य मये" ति। तथोक्तस्य मयेति ॥ ९ ॥

इति प्रथमाध्याये एकादशः खण्डः

---

1. उद्गास्यः मा.

अथ हैनमुद्गाता — देवतेति। पूर्ववदर्थः। [1]आदित्यः। उद्गीथे-ऽध्यस्योपास्य आदित्य इत्यर्थः। सर्वाणि—गायन्ति। उच्चैस्सन्तं उच्चैः स्थित-मधःस्थितानि सर्वाणीमानि भूतानि गायन्तीत्यर्थः। प्रस्तावप्राणयोः प्रशब्दवत्त्वेन साम्यवत् उद्गीथोच्चैस्स्थितादित्ययोः उच्छब्दवत्त्वेन साम्यमिति भावः। शिष्टं पूर्ववत्।

अथ हैन प्रतिहर्ता—देवतेति पूर्ववत्। [2]अन्नमिति—प्रतिहारभक्तौ अन्नमध्यस्योपास्यमित्यर्थः। सर्वाणि — । प्रतिहरमाणानि। भक्षयन्तीत्यर्थः। सन्तीति शेषः। अत्र प्रतिहरमाणानीति प्रतिशब्दवत्त्वेन अन्नप्रतिहारयोः साम्यात् प्रतिहारे अन्नाभिमानिदेवताध्यासः। ततश्च प्रस्तावोद्गीथप्रतिहारभक्तिषु क्रमेण प्राणादित्यान्नदृष्टिः कर्तव्येत्यर्थः। तथोक्तस्य मयेति तथोक्तस्य मयेति इति द्वि-रुक्तिर्विद्यासमाप्त्यर्था। शिष्टं पूर्ववत्।

1. 2. इदमिदम् वाक्यं न क. कोशे।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते—: समन्वयाध्याये प्रथमपादे —'प्राणस्य निखिल[1]भूतजातप्रवृत्तिहेतुत्वसंभवात् प्राणशब्देन मुख्यप्राण एवाभिधीयता' मिति पूर्वपक्षे प्राप्ते, शिलाकाष्ठाद्यचेतनस्वरूपस्य, शुद्धस्य जीवस्वरूपस्य च मुख्यप्राणाधीनस्थितिकत्वाभावात् प्रसिद्धवन्निर्दिष्टसकलचेतनो (चेतनाचेतनो?) त्पत्तिलयहेतुत्वस्य परमात्मव्यतिरिक्ते असंभवात्, चेतनवाचिदेवताशब्दस्याप्यचेतने मुख्यप्राणे असंभवाच्च परमात्मैव प्राणयितृत्वादियोगवशेनाभिधीयते' इति "अत एव प्राणः" इति सूत्रेण सिद्धान्तितम्।

ननु प्रस्तावोद्गीथप्रतिहारभक्त्यनुगतत्वेन देवतात्वेन च निर्दिष्टेषु प्राणादित्यान्नेषु प्राणस्यैव परमात्मत्वम्, आदित्यान्नयोस्तु न तथात्वमित्यत्र किं विनिगमकम्? चेतनवाचिदेवताशब्दः त्रिष्वपि समानः। प्राणवाक्यशेषे प्रसिद्धप्राणासंभावितासंकुचितसर्वभूतसंवेशनोद्गमनाधारत्वश्रवणवत्, आदित्यान्नवाक्यशेषयोरपि असंकुचितसर्वभूतगेयत्व - सर्वभूतोपजीव्यत्वयोः प्रसिद्धादित्यान्नासंभावितयोः श्रवणाविशेषात्। यदि च आदित्यवाक्ये सर्वभूतशब्दः आदित्यगानयोग्यचेतनविशेषपरतया, अन्नवाक्यशेषेऽपि[2] अन्नोपजीवनयोग्यचेतनविशेषपरतया संकोच्यते, देवताशब्दश्च, "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" इति सूत्रोक्तन्यायेनाभिमानिदेवतापरतया योज्यते —तर्हि प्राणेऽपि तथाऽस्तु; विशेषाभावादिति चेत् —

उच्यते। प्राणशब्दस्य, 'प्राणस्य प्राणम्', 'यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम्' इत्यादिषु परमात्मन्यपि निरूढत्वात्, 'सर्वाणि ह वा इमानि भूतानि' इत्यादिवाक्यशेषस्वारस्याच्च परमात्मपरत्वमाश्रितम्। अन्नादित्यशब्दयोरतथात्वात् चेतनवाचिदेवताशब्दस्य केवलादित्यमण्डलान्नयोरभावात् तदभिमानिदेवतापरत्वम्। अन्नाभिमानिदेवतायाश्च भूतभक्ष्यत्वं तदधिष्ठेयान्नाभेदारोपेणोपपद्यते। 'सर्वाणि ह वा इमानि भूतानि आदित्यमुच्चैस्सन्तं गायन्ती' ति प्रतिपादितं सर्वभूतगेयत्वं परमात्मनोऽपि न संभवति। भूतशब्दो हि प्राणिनिकाये महा-

1. निखिलपदं ख. कोशे न। 2. ख. कोशे नात्र अपिशब्दः; किन्तु उपरि 'परतया च' इति चकारः।

'सर्वाणि ह वा इमानि भूतानी' ति सर्वभूतग्रहणेन स्तवनस्यात्र तिसृष्वपि देवतास्वविशेषात् प्राणमात्रस्य ब्रह्मत्वं सूत्रकृदभिमतं कथं युज्यत इत्याशङ्कते नन्विति।

१—१२

अथातः शौव उद्गीथः। तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज ॥ १ ॥

तस्मै श्वा श्वेतः प्रादुर्बभूव। तमन्ये श्वान उपसमेत्योचुः, 'अन्नं नो

भूतेषु च रूढः। महाभूतस्य गातृत्वप्रसक्तेरेवाभावात् प्राणिनिकायपरत्वं वक्तव्यम्। तदपि न संभवति। न हि सर्वेऽपि प्राणिनः परमात्मानं गायन्ति; स्थावरेषु पश्वादिषु चाभावात्। तस्माद् गानयोग्यप्राणिविशेषपरत्वेन संकोचः परमात्मपरत्वेऽप्याकाश्यक इति आदित्यशब्दस्य लोकव्युत्पत्तिविरुद्धं[1] परमात्मपरत्वं नाश्रयणीयम्। एवमन्नवाक्यशेषेऽपि 'प्रतिहरमाणानि' इति भक्ष्यमाणत्वं न परमात्मनि मुख्यम्। अत आदित्यान्नशब्दयोः ब्रह्मपरत्वाभावेऽपि प्राणशब्दस्य ब्रह्मपरत्वं सिद्धमिति द्रष्टव्यम्॥ प्रकृतमनुसरामः। १—११.

अतीतखण्डे अन्नाप्राप्तिनिमित्ता उच्छिष्टपर्युषितभक्षणलक्षणा कष्टावस्थोक्ता। अनन्तरमन्नलाभाय श्वदृष्टः उद्गीथः प्रस्तूयते। **अथातश्शौव उद्गीथः**। **शौवः** श्वदृष्टः उद्गीथः। प्रस्तूयत इति शेषः। **शौव** इति टिलोपश्छान्दसः। **तद्ध — वव्राज**। अत्र वाशब्दश्चार्थे। बकग्लावनामद्वययुक्तो दल्भसुतो मित्रासुतश्च स्वाध्यायं कर्तुमुद्वव्राज ग्रामान्निर्गतवानित्यर्थः।

तस्मै — बभूव। तत्स्वाध्यायेन तोषितः कश्चन ऋषिः श्वेतशुनकरूपतया तस्मै प्रादुर्बभूवेत्यर्थः। **तं — ऊचुः**। **तं** श्वेतं श्वानं क्षुल्लकाः श्वानः

1. विरुद्धपरत्वं **ग**.

उच्छिष्टपर्युषितेति। तथाच श्रीभाष्यम्—'इभ्योच्छिष्टभूतान् स्वोच्छिष्टभूतान् पर्युषितांश्चखाद' इति। **छान्दस इति**। शौवन इति वास्तवं रूपम्। **वाशब्दः चार्थे इति**। एकनाम्नाऽऽह्वानादिकाले नामान्तराप्रयोगात् एककालाप्रयोगरूपविरोधसूचनाय वाकारः प्रयुक्तः। तावता न नाम्नोर्भिन्ननिष्ठत्वम्। किन्तु एकस्मिन्नेव पुरुषे समुच्चय इति भावः। बकग्लावयोर्भिन्नत्वे तु चकार एव श्रुतौ प्रयुक्तः स्यात्। न च प्रकृतोद्गज्यादिकर्तृत्वं बकस्य ग्लावस्य वेति वेदपुरुषेणानवधारितम्; येन वाकारोऽन्यथोपपद्येत। अत एव—'एकस्यैव नामद्वयं चेत्, बको ग्लावो वा दाल्भ्य इति निर्दिश्येत। अतो दल्भसुतो बकः, अन्यस्तु मैत्रेयो ग्लावः' इति न शङ्क्यम्। ग्लाव इति मित्राकृतं नाम, बक इति दल्भकृतमिति सूचनाय तथोक्तिः। ननु दाल्भ्यो दल्भगोत्रापत्यमिति प्रागुक्तम्, न तु दल्भसुत इति। सत्यम्। स चिकितायनसुतः। अयं तु

भगवानागायतु; अशनायाम वै' इति ॥ २ ॥

तान् होवाच, 'इहैव मा प्रातरुपसमीयाते' ति। तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ॥ ३ ॥

ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पन्तीत्येवमाससृपुः। ते ह समुपविश्य हिंचक्रुः ॥ ४ ॥

उपसमेत्य उक्तवन्तः। उक्तिमेवाह — **अन्नं — वा इति**। वैशब्दोऽवधारणे। 'वयं **अन्नायाम** बुभुक्षिताः स्मः। अस्माकं, गानेनान्नं भगवान् संपादयतु' इत्यूचुरित्यर्थः।

तान् — समीयातेति। श्वः प्रातःकाले अस्मिन्नेव देशे **मा** मामुपगच्छतेति **तान्** क्षुल्लकान् शुनः श्वेतः श्वा उवाचेत्यर्थः। **तद्ध — चकार**। बकग्लावनामा ऋषिः तत्संवादं श्रुत्वा श्वेतश्वाद्यागमनं प्रतीक्ष्य स्थितवानित्यर्थः।

ते — आससृपुः। **ते** श्वेतश्वादयः तत्रैव प्रातरागत्य, बहिष्पवमानेन स्तोत्रेण स्तोष्यमाणा उद्गातृपुरुषाः अन्योन्यस्पृष्टा गच्छन्तीत्येतद् यथा, [1]तथैव अन्योन्यस्य पुच्छं मुखेन गृहीत्वा **आससृपुः** उपसर्पणं कृतवन्तः। **ते ह समुपविश्य हिंचक्रुः**। अथ ते उपविश्य **हिंचक्रुः** हिङ्कारं कृतवन्त इत्यर्थः।

1. यथा — एवं क.

साक्षाद् दल्भसुतः, पित्रन्तरानिर्देशात्। अस्तु वा दल्भस्य गोत्रापत्यं पौत्रादिरूप एवायम्; किं तेनेत्यलमलब्धप्रमाणानामर्थविशेषाग्रहेण। **श्वान** इति। इमेऽपि **ऋषय** इति मन्तव्यम; अन्यथा व्यवहारहिंकरणाद्ययोगात्। उपसमीयतेति पाठोऽशुद्धः। **उपसमीयाते**ति निर्विवादपाठात्। इणो विधिलिङि समियातेति, आशीर्लिङि, 'एतेर्लिङि' इति सूत्रात् समियास्तेति च रूपमिति 'ई' इति दैर्घ्यं परं छान्दसम्। ईधातुर्वाऽस्त्विह प्रश्लेषलब्धः।

उद्गातृपुरुषाः उद्गाता प्रस्तोता प्रतिहर्ता च। यद्यपि बहिष्पवमानस्तोत्रार्थं हविर्धानात् बहिष्पवमानदेशं प्रति प्रसर्पणे एतावतामन्वारम्भः श्रुतः, 'अध्वर्युं प्रस्तोता संतनुयात्, प्रस्तोतारमुद्गाता, उद्गातारं प्रतिहर्ता, प्रतिहर्तारं ब्रह्मा, ब्रह्माणं यजमानः, यजमानं प्रशास्ता' इति — अथापि **स्तोष्यमाणा** इति पदेन एषामेव ग्रहणमिति एवमुक्तम्। अत एव एषामपच्छेद एव प्रायश्चित्तानम्। तत् अपच्छेदाधिकरणे (पू. मी. ६–५.) द्रष्टव्यम्। रलयोरभेदात् **संरम्भः** संलम्भः (आलम्भः) स्पर्शविशेषः।

ओ३ मदा३ मो३पिबा३ मो३ देवो वरुणः प्रजापतिः सविता३ ऽन्नमिहा२ हरदन्नपते२ ऽन्नमिहाहरा२ हरो३ मिति ॥ ५ ॥

इति प्रथमाध्याये द्वादशः खण्डः

अयं वाव लोको हाउ[1]कारो वायुर्हाइ[2]कारश्चन्द्रमाअथकार आत्मेह-

1. हावु. 2 हायि.

[हि[1]ङ्कारमेवाह –] **ओमदामो—आहरत्** । [**ओ**[2]मिति गानोपक्रमे । **अदाम** भक्षयेम, **पिबाम** च] द्योतमानत्वाद् **देवः** । म्रियमाणत्वात् (**वरणात्**) **वरुणः** । प्रजानां पालनात् **प्रजापतिः** । एवम्भूतः सविता अन्नमाहरतु इत्यर्थः । **अन्नपते** — **ओमिति** । **अन्नपते** इति आदित्यस्य संबोधनम् [[3]**आहराहरे**ति द्विरुक्तिः प्रार्थनायाम्] इति गीतवन्त इत्यर्थः । [**'अन्नपत'** इतिमन्त्रकरणकादित्याध्यासविशिष्टोद्गीथोपासनमन्नफलकमिति भावः[4]] ॥ १–१२.

सामावयवान्तर्गत (न्तर[5]) स्तोभाक्षरविषयाणि उपासनान्तराणि उपदिश्यन्ते— **अयं** — **हाउकारः** । हाउ इत्येवंलक्षणो यः सामसु स्तोभः, सः **अयं लोकः** एतल्लोकत्वेनोपास्य इत्यर्थः । एवमुत्तरत्रापि स्तोभशब्दोऽध्याहर्तव्यः । अयं स्तोभो[6]

1, 2, 3, 4. इमानि कुण्डलितानि न क. कोशे । 2. एतत्स्थाने पिबाम पानेन हृष्टा भवेमेत्यर्थ इति क. घ. कोशे ऽशुद्धम् । 5 अन्तर क. घ. शाङ्करानुसारि । 6. अयं स्तोभ इत्यत्र स इति क.

अन्नपत इतिमन्त्रकरणकेत्यादि वाक्यं केषुचित् कोशेषु नास्ति । अत्र श्रुतिसारस्यात् आनन्दगिरीयाच्च **ओमदामे**त्यारभ्य कृत्स्नमिदं हिङ्काररूपं प्रतीयते । शाङ्करे, 'एवं हिं कृत्वा पुनरप्यूचु' रिति **अन्नपत** इत्यादिभागस्यावतारणात् भागोऽयं न हिङ्कार इति लक्ष्यत इव । सर्वथा पूर्वमसंबोधनेन उक्तम् । इह संबोधनपूर्वमिति वैलक्षण्यं किञ्चिदस्ति । तदयं पृथङ् मन्त्र इति स्यादाशयः । एवमत्र प्रकरणे पूर्वं सामभक्तिषूद्गीथादिषु अन्यदृष्टिविधेरेवोपदिष्टत्वात्, पश्चादपि सामभक्त्यन्तर्गतस्तोभाक्षरेषु, ततः समस्ते च साम्नि नानादृष्टीनामेवोपदेशात् अयमपि खण्डः कर्माङ्गभूतसामांशे दृष्टिविधितत्परो युक्तः, न तु स्वतन्त्रशौवनोद्गानपरः । तत्र च **शौव उद्गीथ** इत्युपक्रमात् उद्गीथे शौवनदृष्टिः । तत्रापि निकृष्टे उत्कृष्टदृष्टेरेव युक्तत्वात् प्रकृतगीतिमन्त्रप्रकाशितादित्यरूपदेवतादृष्टिः कर्माङ्गभूतोद्गीथे विवक्षितुमुचितेत्याशयः पाठसत्त्वपक्षे उन्नीयते ।

स्तोभेति । स्तोभो नाम निरर्थकः ऋगनन्तर्गतः तत्तत्सामगानकाले तत्रतत्र निर्दिष्टः

कारोऽग्निरीकारः ॥ १ ॥ आदित्य ऊकारो निहव एकारो विश्वे देवा औ-होइ[1]कारः प्रजापतिर्हिङ्कारः प्राणःस्वरोऽन्नं [2]या (याया) वाग्विराट् ॥ २ ॥ अनिरुक्तस्त्रयोदशः स्तोभः सञ्चरो [3]हुङ्कारः ॥ ३ ॥

दुग्धेऽस्मै वाग् दोहं यो वाचो दोहः; अन्नवानन्नादो भवति, य एतामेवँ साम्नामुपनिषदं वेद उपनिषदं वेदेति ॥ ४ ॥

इति प्रथमाध्याये त्रयोदशः खण्डः

इति छान्दोग्योपनिषदि प्रथमोऽध्यायः

1. औहोयि. 2. याया. **मा.** 3. हुप्कारः **मा.**

रथन्तरसाम्नि प्रसिद्धः । **वायुर्हाइकारः** । हाइ इति स्तोभो वामदेव्यसाम्नि प्रसिद्धः । एवमग्रेऽपि । शिष्टं स्पष्टम् । **निहवः** आह्वानमित्यर्थः । 'ह्वः संप्रसारणञ्च न्यभ्युपविषु' इति भावे ह्वेङः अप्संप्रसारणयोः निहव इति रूपम् । **प्राणः स्वरः** । स्वर इति स्तोभः प्राण इत्यर्थः । **अन्नं या (याया)**[1] । या (याया) इति स्तोभोऽन्नमित्यर्थः । **वाग् विराट्** । वागिति स्तोभो **विराट्** अन्नमित्यर्थः । विराट्पुरुषो वा । **अनिरुक्तस्त्रयोदशः स्तोभः सञ्चरो हुङ्कारः** । हाउकारादिभ्यो द्वादशभ्यः पूर्वोक्तेभ्योऽधिकः हुमिति त्रयोदशो यः स्तोभः, स इदमितिनिर्वक्तुमशक्यतया अनिरुक्तत्वात् **सञ्चरः** डोलायितः=संदेहरूप इत्यर्थः । ततश्च तत्र सञ्चरत्वदृष्टिः कार्येत्यर्थः । ततश्च हाउकारादिषु त्रयोदशसु उक्तपृथिवीलोकादिदृष्टिः कर्तव्येति स्थितम् ।

तस्य फलमाह—**दुग्धे**—**भवति** । उक्तोऽर्थः । **यः**—**वेद** । सामावयवस्तोभाक्षरोपासनां यो वेदेत्यर्थः । द्विरुक्तिरध्यायसमाप्त्यर्था ॥ १–१३.

इति प्रथमोऽध्यायः (प्रथमः प्रपाठकः)

1. याया इति **क. घ.**

शब्दः । **अनिरुक्त** इति । अव्यक्ताक्षरगानमनिरुक्तगानमित्युच्यते । तथा गानात् हुमः **अनिरुक्तत्वम्** । शाखाभेदेन हुम् हुप् इत्यव्यवस्थादर्शनाच्चास्माभिः किञ्चिद्रूपेणानध्यवसितत्वात् **सञ्चरत्वम्** ।

द्विरुक्तिरध्यायसमाप्त्यर्थेत्येव सर्वत्र । अतः प्रपाठकस्याध्यायत्वेनैव शाङ्कर इवात्रापि उपर्यपि व्यवहारः । प्रपाठकव्यवहारोऽपि प्राचीनः अधिकरणरचनासंदर्भेऽधस्तादुक्तरि ।

अथ द्वितीयोऽध्यायः २–१.

ओम् । समस्तस्य खलु साम्न उपासनम् , साधु । यत् खलु साधु, तत् सामेत्याचक्षते । यदसाधु, तदसामेति ॥ १ ॥

तदुताप्याहुः, 'साम्नैनमुपागादिति, साधुनैनमुपागादित्येव तदाहुः । असाम्नैनमुपागादिति, असाधुनैनमुपागादित्येव तदाहुः' ॥ २ ॥

अथोताप्याहुः, साम नो बतेति, यत् साधु भवति । साधु बतेत्येव तदाहुः । असाम नो बतेति, यदसाधु भवति । असाधु बतेत्येव तदाहुः ॥ ३ ॥

सामावयवोपासनं प्राङ् निर्दिश्य समस्तस्य साम्न उपासनं प्रस्तौति **समस्तस्य — साधु** । समस्तस्य पाञ्चविध्ययुक्तस्य सप्तविध्ययुक्तस्य वा समस्तस्य साम्नः साधुत्वेनोपासनं कार्यमित्यर्थः । तत्रोपपत्तिमाह — **यत् — असामेति** । साध्वसाधुकर्मणी सामासामत्वेन व्यवहरन्तीत्यर्थः । **तदुताप्याहुः** । **तत्** तस्मिन् विषये अन्यदप्याहुः । किं तदित्यत्राह **साम्ना — तदाहुः** । सामासामोपायाभ्यामागतं प्रत्यर्थिनं साध्वसाधुभ्यामागतं व्यवहरन्तीत्यर्थः । **अथोताप्याहुः** । [[1]अस्मिन्नेवार्थे जना अन्यदप्याहुरित्यर्थः ।] **साम नो बतेति यत् साधु भवति** । यत् कर्म साधु भवति, तत् **नः** अस्माकं साम बतेति सानुमोदाः प्रवदन्ति लोकाः । **साधु—तदाहुः** । साम नो बतेत्युक्त एव विषये, साधु बतेति लोकाः प्रवदन्ति । ततः सामसाधुशब्दौ एकत्र प्रयुज्यमानौ दृश्येते इत्यर्थः । एवमुत्तरत्रापि । अतः सामसाधुशब्दयोरेकार्थे (र्थ) प्रयोगात् समस्तस्य साम्नः साधुत्वेनोपासनं कर्तव्यमित्यर्थः ।

1. इदं वाक्यं न क. ग. कोशयोः

समस्तस्य । न पूर्ववत् उद्गीथादेः सामैकदेशस्य, नापि उत्तरवत् कृत्स्नसाम्नोपि अवान्तरसर्वविधारूपेण गृहीतस्य ; किन्तु सामान्यतस्सामपदेन गृहीतस्येत्यर्थः । **समस्तस्य साम्न उपासनं यत् उपदिश्यमानम्, तस्याऽऽकारमाह साध्विति** । इदं 'साधु सामेत्युपास्ते' इति निगमने स्पष्टम् । साधुत्वमुपासनविशेषणं चेत्, अव्यावर्तकं व्यर्थं स्यात् । सान्त्ववचनादिगतसाधुत्वस्य गीतिरूपसाम्न्यारोपेणोपासनमिदम् । **तदुतेत्यादिवाक्ये, साम्नैनमुपागादिति यत्, तत् साधुनैनमुपागादिति वाक्येनाहुरित्युक्तया यत् साम तत् साधु इति ज्ञापितम्** । अथ यत् साधु तत् सामेति प्रथमवाक्योदितमपि संप्रतिपन्नमिति दर्शयितुम् **अथोतेति वाक्यम्** । यत्

स य एतदेवं विद्वान् साधु सामेत्युपास्ते, अभ्याशो ह यदेनँ साधवो धर्मा आगच्छेयुः, उप च नमेयुः ॥ ४ ॥

इति द्वितीयाध्याये प्रथमः खण्डः

२–२.

लोकेषु पञ्चविधँ सामोपासीत

स य—**नमेयुः** । एवं साधुत्वेन समस्तसामोपासकं[1] ह प्रसिद्धं **अभ्याशः** क्षिप्रं साधुधर्माः सर्वे आगच्छेयुश्च, भोग्यत्वेनोपनताश्च भवेयुरित्यर्थः । 'रमणीयचरणा अभ्याशो ह' इत्यत्र **अभ्याशः** अभ्यागन्तार इति व्यासार्यैर्व्याख्यातत्वात् इहापि **अभ्याशः** आगन्तारः साधवो धर्माः = अभ्यागमनयोग्याः साधवो धर्माः अभ्यागच्छेयुरिति वाऽर्थः । **उपनमेयुश्च** । भोग्यतां भजेयुरित्यर्थः । २–१.

लोकेषु पञ्चविधं सामोपासीत । हिङ्कारप्रस्तावोद्गीथप्रतिहारनिधनलक्षणपाञ्चविध्य[2]युक्तं क्रत्वङ्गभूतं साम **उपासीत** । पञ्चविधसामकर्मकमुपासनं **लोकेषु**

1. समस्तं सामोपासीनस्य क. 2. पञ्चविधा क. (उपरि सप्तविधेति प्रयोक्ष्यते ।)

साधु भवति तत् खलु 'साम नो बते'ति वाक्येनाहुः । तेन 'साधु नो बते'त्येवोक्तं भवति । साम नो बतेत्युक्तमेव साधु नो बतेति कदाचिद् विवृण्वते च । तस्मात् साधुसाम्नोरैक्यमिति भावः । समभित्यर्थे सामेतिव्यवहार आदित्यदृष्टौ दर्शयिष्यते । शीक्षाध्याये च, 'साम संतान' इत्यत्र सामेत्यस्य समेत्यर्थं वर्णयन्ति । यत् समं कर्म स्वात्मनः परेषाञ्च, तत् साध्वेव भवति । अतः साधुसामैक्यम् । **बते**ति पूर्वत्रानुमोदे; परत्र खेदे । **अभ्यागन्तार** इति । प्रथमतृतीयखण्डे, 'अभ्याशो ह यदस्मै स काम' इत्यत्र एतद्वहुवचनान्तव्याख्यानरीत्यसंभवात् तत्रेदं न दर्शितम् ।

इतः परं सामान्यत एव साम्नि पञ्चविधाग्रहणेन षड् दृष्टिप्रकाराः, सप्तविधाग्रहणेन च त्रयो दृष्टिप्रकाराः । ततः गायत्रादिसामविशेषेषु पञ्चविधाग्रहणेन एकादश दृष्टिप्रकाराश्चोपदिश्यन्ते । अथ गानस्वरे हेयोपादेयविवेकः । अथ ओमित्येतदक्षरमित्युपक्रान्तस्य प्रणवस्य ब्रह्मोपासने विनियोगरूपः प्रधानार्थः । अथ यजमानविशेषस्य कर्मणि प्रतिसवनं गेयसाममेदोपदेशश्चेह द्वितीयप्रपाठके ।

उक्तस्य साधुत्वोपासनस्य लोकादिवक्ष्यमाणसर्वोपासनैः समुच्चय इष्टः शाङ्करे । अत्र तु पृथक्फलश्रवणादिवशात् स नाद्रत इति प्रतीयते । ननु **लोकेषि**ति सप्तमीबलात् उपासनस्य

पृथिवी हिङ्कारोऽग्निःप्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥ १ ॥ अथाऽऽवृत्तेषु—द्यौर्हिङ्कार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ॥ २ ॥

कल्पन्ते हास्मै लोका ऊर्ध्वाश्चाऽऽवृत्ताश्च, य एतदेवं विद्वान् लोकेषु पञ्चविधं सामोपास्ते ॥ ३ ॥ इति द्वितीयाध्याये द्वितीयः खण्डः

लोकविषयं कुर्यादित्यर्थः । 'आदित्यादिमतयश्चाङ्गे उपपत्तेः' इत्यधिकरणे अङ्गानङ्गसमभिव्याहार[1]युक्तेषूपासनेषु अनङ्गदृष्टिरूपत्वस्य समर्थितत्वात् अङ्गभूते साम्नि अनङ्गभूत[2]लोकदृष्टिः कर्तव्येत्यर्थः । तत्प्रकारमेव दर्शयति **पृथिवी—इत्यूर्ध्वेषु** । हिङ्कारप्रस्तावोद्गीथप्रतिहारनिधनेषु क्रमेण पृथिव्यग्न्यन्तरिक्षादित्यद्युलोकदृष्टिः ऊर्ध्वक्रमेण कर्तव्येत्यर्थः । तथा, **अथावृत्तेषु—निधनम्** । आवृत्तक्रमेण तेष्वेव द्युलोकादित्यान्तरिक्षाग्निपृथिवीदृष्टिः कर्तव्येत्यर्थः ।

तत्फलमाह **कल्पन्ते—उपास्ते** । **अस्मै** अस्य **लोकाः कल्पन्ते** । उपासकभोगनिष्पादनसमर्था भवन्तीत्यर्थः । २—२.

---

1. युक्तोपासनेषु **ख.** 2. भूतपदं **क.** कोशे ।

लोकविशेष्यकत्वं तत्र सामदृष्टिश्च प्रतीयते । तत् कथमन्यथा व्याख्यायते । तत्राऽऽह **आदित्यादी**ति । तर्हि कथं सप्तमी ? अत्र शाङ्करम्—सप्तम्याः प्रथमात्वेन विपरिणामः । इतिशब्दश्चाध्याहार्यः । 'लोकाः पञ्चविधं साम'इत्युपासीतेति । व्यत्ययो वा—सप्तम्याः सामपदे, तत्रत्यद्वितीयायाश्च लोकपदे इति । श्रुतिहृदयं तु, 'नात्र सामान्यतः साम्नो लोकत्वेनोपासनं किञ्चिदस्ति । किन्तु लोकेष्वेकैकलोकदृष्ट्या पञ्चविधसामान्तर्गतैकैकविधां परमुपासीतेति । एतत्सूचनायैव सप्तमी । एवमुपरि सर्वत्र, 'वाचि सप्तविधं सामे'तिवाक्यं यावत् । यत्र तु विशेषे विशेषदृष्टिवत् सामान्ये सामान्यदृष्टिरपि विधित्सिता, तत्र सप्तमीं त्यजति श्रुतिः । यथा तदनन्तरमेव, 'अथ खल्वमुमादित्यं सप्तविधं सामोपासीते'ति । तत्र प्रथमोदितादिविशेषदृष्टिवत् आदित्यत्वाकारेण तद्दृष्टेः सामत्वेन साम्नि विवक्षेति । एवं लोकादिषु कतिपयलोकादिमात्रदृष्टिरेवोच्यत इति ज्ञापनार्थश्च सप्तमी । अस्तु वा सप्तम्याः पञ्चविधमित्यत्रान्वयः । पञ्चविधं साम लोकगतपञ्चविधायुक्ततयोपासीत । एतद्विधासु तद्विधात्वारोपे तद्विधायुक्तत्वमेतस्य साम्नो भवतीति ।

ऊर्ध्वेषु, आवृत्तेषु इत्युभयत्र लोकेषु पञ्चविधं सामोपासीतेत्यनुकृष्यते । **आवृत्तत्वं** यथागतमागतत्वम् ।

२—३.

वृष्टौ पञ्चविधँ सामोपासीत —पुरोवातो हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनम् ॥ १ ॥

वर्षति हास्मै, वर्षयति ह, य एतदेवं विद्वान् वृष्टौ पञ्चविधँ सामोपास्ते । इति द्वितीयध्याये तृतीयः खण्डः

वृष्टौ—उपासीत । पूर्ववदेव अत्र पञ्चविधे साम्नि वृष्टिदृष्टिः कर्तव्येत्यर्थः । **पुरोवातः—उद्गृह्णाति तन्निधनम्** । **उद्ग्रहणं** जलस्योद्ग्रहणं वर्षसमाप्तिः । शिष्टं स्पष्टम् ।

वर्षति हास्मै । इच्छत इति शेषः । अस्येच्छायां सत्यां वर्षतीति याक्त् । **वर्षयति—उपास्ते** । अद्यापि य एवमुपास्ते, स इच्छायां सत्यां [[1]यजमानाय] **वर्षयति** वर्षं कारयतीत्यर्थः । २—३.

1. यजमानायेति क.

पुरोवातादीनां क्रमभावित्वात् हिङ्कारादिषु क्रमेण तद्दृष्टिः । एवं पूर्वोत्तरपर्यायेष्वपि यथार्हं भाव्यम् । अधिकक्लेशेन तत्रतत्र तत्तद्दृष्टौ नियामकस्य लौकिकस्यान्वेषणमनावश्यकम् । अव्यवस्थितत्वाच्च ।

विद्योतत इति । घनीभूतात् मेघात् वर्षे भूरिनिवृत्ते वायुना वेगेन मिथःसंघर्षं प्रापितयोर्मेघयोर्विद्युत्स्तयित्नुसमुद्भव इति वर्षानन्तरं तत्कथनम् । एवं **प्रतिहरणमभिमुख्येन हरणम्** - एको मेघो मेघान्तराभिमुख्येन ह्रियते । स प्रतिहन्यते, तदा विद्युदादि । अतः प्रतिहारो विद्युदादिरिति । **इच्छत इति शेष** इति । ननु सर्वत्र फलं तत्कामनयाऽनुष्ठान एवेति किमर्थमिहैवंशेषपूरणम् । न च, उपासनात् पूर्वं फलकामनापूर्वकसंकल्पाभावेऽपि एतदुपासको यदा कदापीच्छति चेत् - तदापि वर्षतीत्यत्र किञ्चिन्मानमास्ति । अत एव वर्षोत्पादनशक्तिसंपत्तिरेव एतद्विद्याफलमित्यत्र मानाभावात् शेषपूरणमयुक्तमिति चेत्—उच्यते । ' **वर्षति हास्मै, य एतदेव** ' मित्येतावति अनुपरम्य, ' **वर्षयति ह** ' इत्यधिकवचनात्, पश्चात् इच्छन्नपि जनयतीति स्वीकार्यम् । तत्र वर्षयति चेति चकाराश्रवणात् **वर्षति हास्मै** इत्यस्य विवरणरूपमेव **वर्षयति ह** इति । यथा उपरि, ' एकविंशत्या आदित्य ' मित्यस्यैव विवरणम ' आप्नोति हादित्यस्ये ' तीति शाङ्करोक्तम् ; तद्वदित्याशयः । शाङ्करे अत्र 'इच्छत' इति पूरितम् । अत्र इच्छत इत्येव पाठात् चतुर्थ्यन्तमिदम् ।

२-४.

सर्वास्वप्सु पञ्चविधँ सामोपासीत—मेघो यत् संप्लवते स हिङ्कारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥ १ ॥

न हाप्सु प्रैति । अप्सुमान् भवति, य एतदेवं विद्वान् सर्वास्वप्सु पञ्चविधँ सामोपास्ते ॥ २ ॥ इति द्वितीयाध्याये चतुर्थः खण्डः

२-५.

ऋतुषु पञ्चविधँ सामोपासीत—वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम् ॥ १ ॥

कल्पन्ते हास्मा ऋतवः; ऋतुमान् भवति, य एतदेवं विद्वान् ऋतुषु पञ्चविधँ सामोपास्ते ॥ २ ॥ इति द्वितीयाध्याये पञ्चमः खण्डः

सर्वासु—उपासीत । पूर्ववदर्थः । **मेघो—हिङ्कारः** । **संप्लवनं** संचारः । **याः प्राच्यः [स्यन्दन्ते स उद्गीथः** । स्यन्दन्ते] । आप इति शेषः । **[याः प्रतीच्यः स प्रतिहारः** । प्रतीच्यः स्यन्दन्ते । आप इति शेषः । शिष्टं स्पष्टम्] **न हाप्सु प्रैति** । **न प्रैति** = न म्रियत इत्यर्थः । **अप्सुमान् भवति** । [प्रभूतोदकसंपन्नो भवतीत्यर्थः] ' अपोयोनियन्मतुषु[4] ' इति अलुक् । शिष्टं स्पष्टम् । २-४.

ऋतुषु— । स्पष्टम् । **कल्पन्ते—** । उपासकस्य भोग्यनिष्पादनसमर्था भवन्तीत्यर्थः । **ऋतुमान् भवति** । वसन्ताद्यृतुफलभोगशाली भवतीत्यर्थः । शिष्टं स्पष्टम् । २-५.

1, 2. कुण्डलितं क. ग. कोशयोः न. 3. कुण्डलितं क. कोशे न. 4. यन्मयेषु. ख.

सर्वास्वति । पूर्वोक्तवृष्टितदन्योभयरूपास्वित्यर्थः । प्रतीच्यो नद्यो नर्मदाद्याः प्रतिहारः प्रतिशब्दवत्पदबोध्यत्वसामान्यात् । एवञ्च प्राच्यो गङ्गाद्याः उद्गीथः । आसामुद्गीथवत् प्रकृष्टत्वाच्च । एवं वर्षर्तुपर्यन्तं प्रतीचीतो वर्षवातप्रसरात् प्राच्यो नद्यः पूर्वं स्यन्दन्ते । अथ शीतकाले प्राचीतो वातागम इति तदातनवर्षात् प्रतीच्यः इति क्रमोऽप्यस्ति ।

हेमन्त इति हेमन्तशिशिरयोरेकीकरणम् । अस्तु वा हेमन्तमात्रम् । **ऋतुमान् भवति** । अतिशायने मतुप् । एतदुपासकविषये ऋतुफलस्य प्रतिबन्धो न्यूनता वा न भवति; किन्तु अतिशय इति ।

२–६.

पशुषु पञ्चविधँ सामोपासीत—अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥ १ ॥

भवन्ति हास्य पशवः, पशुमान् भवति, य एतदेवं विद्वान् पशुषु पञ्चविधँ सामोपास्ते ॥ २ ॥ इति द्वितीयाध्याये षष्ठः खण्डः

२–७.

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत—प्राणो हिङ्कारो वाक्

पशुषु—। स्पष्टम्। [**भवन्ति हास्य पशवः**। अस्योपासकस्य भोगसंपादनक्षमा भवन्तीत्यर्थः।] **पशुमान् भवति**। प्रभूतपशुमान् भवतीत्यर्थः। अयमुपासक इति शेषः। [शिष्टं स्पष्टम्] २–६.

प्राणेषु—। **वरीयस्त्वं** ज्येष्ठत्वम्; **परस्त्वम्** श्रेष्ठत्वम्। परस्त्वे सति वरीयस्त्वं **परोवरीयस्त्वम्**। [परश्शब्दः सान्तः।] परोवरीयस्त्वगुणकप्राणदृष्ट्या पञ्चविधसामोपासनं कर्तव्यमित्यर्थः। [तदेवाह] **प्राणो—एतानि। एतानि**

1. कुण्डलितं क. कोशादौ न।

अव्यादिपशूनामुपर्युपरि कथनं तेषामुपर्युपरि स्थितत्वात् उत्कृष्टत्वात्। अजापेक्षया अवीनामुत्कर्षः कम्बलायुपयोग्यूर्णाशालितयाऽतिशयात्। 'अपशवो वा अन्ये गोअश्वेभ्यः' इति तदपेक्षयोत्तरत्र प्राशस्त्यम्। तत्राश्वस्य बलवेगादिकृतोऽधिक उपयोगः। उत्तरोत्तरस्य उपर्युपरि मूल्यम्। **पुरुष** इति। अपशोरपि पुरुषस्यात्र घटनं 'पुरुषाश्रयत्वात् पशूना'मिति शाङ्करे। 'अवध्नन् पुरुषं पशु'मिति केचिदुदाहरन्ति। अत्र पुरुषपदं 'राजपुरुषः' 'चत्वार ऋत्विजश्चिपुरुषाः' इत्यादाविव पशुप्रायभृत्यादिपरं स्यात्। 'यथा वै पशव एवं स देवानाम्' इति च स्वर्गादिलोलं पुरुषं श्रुतिराह। अतो मुख्यगौणसाधारणमिह पशुत्वम्।

प्राणो घ्राणमिति शाङ्करम्। अत्र तथाऽनुक्तिः प्रसिद्धमुख्यप्राणोऽपि गृह्यतेत्याशयेन। एतदायत्तस्थितिप्रवृत्तिकत्वादन्येषामपि प्राणत्वम्। 'तद्वा एतान्मिथुनं यद् वाक् च प्राणश्च' इति वाक्प्राणौ संपृक्तौ। तत्र प्राणबलप्राप्त्यनन्तरं वाग् व्यवहर्तुं क्षमते। तथापि बोधकव्यवहारसाक्षान्निष्पादनात् प्राणस्योपरि वाक्। वाग्व्यवहारस्य दृष्टार्थविषयकत्वात् वाचोऽपि प्राक् अर्थबुद्धिकरं ग्राहकत्वशक्तिसंपन्नं चक्षुः। अदृष्टेऽप्यर्थे शब्दश्रवणेन बुद्धिकरं श्रोत्रं ततोऽधिकं वागुपजीव्यम्। न मनस उपरि किञ्चित् बुद्धिकरमस्ति। ततस्तत् निधनमिति। एषां मुख्यप्राणादीनां पञ्चानामेव सर्वत्रोपनिषदि श्रेष्ठतया परिगणनमिति केनोपनिषदारम्भेऽपि दर्शितम्। अत

प्रस्तावः चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाँसि वा एतानि ॥ १

परोवरीयो हास्य भवति ; परोवरीयसो ह लोकान् जयति, य एतदेवं विद्वान् प्राणेषु पञ्चविधं परोवरीयः सामोपास्ते ।

इति तु पञ्चविधस्य ॥ २ ॥ इति द्वितीयाध्याये सप्तमः खण्डः

२—८.

अथ सप्तविधस्य—

वाचि सप्तविधँ सामोपासीत— यत् किञ्च वाचो [1]हिमिति स हिङ्कारो यत् प्रेति स प्रस्तावो यदेति स आदिः ॥ १ ॥ यदुदिति स

1. हुमिति शां. मा.

प्राणादीनि **परोवरीयांसि** [परोवरीयस्त्वगुणकानीत्यर्थः] । **परो—भवति** । उपासकस्य[1] जीवनं श्रेष्ठं भवतीत्यर्थः ।

इति तु पञ्चविधस्य । [2]अनेन प्रकारेण पञ्चविधस्य साम्न उपासनमुक्तं भवतीत्यर्थः । [3] २—७.

अथ सप्तविधस्य । सप्तविधस्य उपासनं प्रस्तूयत इत्यर्थः ।

वाचि—हिङ्कारप्रस्तावोङ्कारोद्गीथप्रतिहारोपद्रवनिधनाख्यसप्तविधायुक्ते साम्नि वक्ष्यमाणप्रकारेण वाक्छब्दितशब्ददृष्टिः कर्तव्येत्यर्थः । **यत्किञ्च—हिङ्कारः** । लोके[4] **वाचः**

1. उपासकस्यास्य ख. 2. अनेन प्रकारेण पञ्चविधस्थे तीदं क. कोशे । 3. अत्र 'शिष्टं स्पष्टमिति ख. 4. लोके इति क.

एवात्र परोवरीयस्त्वमुक्तम् । परत्वे सति वरीयस्त्वमिति तत्पदव्याख्यानमत्र भाष्ये । इदमुक्तसर्वप्राणनिष्ठम् । परं परं वरीय इति उत्तरोत्तरवरीयस्त्वं शाङ्करोक्तम् । तत् प्रथमप्राणे दुर्वचम् । उत्तरत्वाभावात् ।

एवं लोकादिप्राणान्तदृष्टिषूपदिष्टासु उपदेशक्रमे नियामकमेवं पशुपर्यन्तं प्रत्यपादि शाङ्करे—'लोकस्थितेर्वृष्टिनिमित्तत्वात्, वृष्टिपूर्वकत्वात् अन्नस्य, तन्निमित्तत्वात् ऋतुव्यवस्थायाः, तस्यां सत्यामेव कालस्य पशव्यत्वा' दिति । एतावत्संपन्न एव मुमुक्षुः प्राणादिभिः पञ्चभिरुपदिष्टैः सर्वं लोकं जयेदिति प्राणस्तदनन्तरमुक्तः । पूर्वं लोकदृष्टावेव 'कल्पन्ते हास्मै लोकाः' इत्युक्तम् । प्राणदृष्टावत्र को विशेष इति चेत्—अस्त्वविशेष एव, ततः किम् ? उपासनानां पृथक्तेन समुच्चयाभावात् । अत्र लोकानां, 'परोवरीयस' इति विशेषणात् अत्र फलाति-

उद्गीथो यत् प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम्॥ २॥

दुग्धेऽस्मै वाग् दोहं यो वाचो दोहः, अन्नवानन्नादो भवति, य एतदेवं विद्वान् वाचि सप्तविधँ सामोपास्ते॥ ३॥

इति द्वितीयाध्याये अष्टमः खण्डः

शब्दस्य अवयवभूतो हिमिति यः शब्दः, स हिङ्कारः। हिङ्कारस्य हिंशब्दवत्त्वसादृश्यात्। ततश्च हिङ्कारे, लोके हिंशब्दा यावन्तः तद्बुद्धिः कर्तव्येत्यर्थः। एवमुत्तरत्रापि। **यत् प्रेति स प्रस्तावः**। प्रस्तावे सर्वप्रशब्दत्वबुद्धिः कर्तव्या। **यदेति स आदिः**। उद्गीथस्य[1] आद्यवयवभूते ओङ्कारे 'आ'[2] इति शब्दबुद्धिः कर्तव्येत्यर्थः। **यदुदिति—निधनम्**। स्पष्टम्।

[उपासनाफलमाह] **दुग्धे—भवति**। वाक्संबन्धी यो दोहोऽस्ति, वाक्साध्यं यत् फलम्[3] तत् फलमुपास्यमाना वाक् **अस्मै** उपासकाय **दुग्धे** प्रयच्छति[4]। २—८.

1. उद्गीथेऽपि. ग. 2. 'आ' इति घ. पाठः; अन्यत्र 'अ'। 3.4. इत्यर्थः. ख.

शयोऽपि लक्ष्यते। एवं **परोवरीयो ह्यस्य भवती**त्यत्र जीवनमित्यध्याहृतं शाङ्करानुसारेण। पूर्वं परोवरीय इति तद्गुणकप्राणकथनात् पशुमान् भवतीत्यादिवत् परोवरोयस्त्वगुणविशिष्टमुमुक्षूपयोगिपुष्कलपञ्चविधप्राणवान् भवतीत्यप्यभिमतं स्यादिति भवति लोकदृष्टिफलापेक्षयाऽत्र महान् विशेषः॥

(१—३; १—१३.) वाग्दोहाद्यर्थमुपासनद्वयं प्रागुक्तम्। पुनरत्राप्युपासनान्तरं तदर्थमुच्यते। 'युवा स्यात् साधु युवाध्यायकः, आशिष्ठो दृढिष्ठो बलिष्ठः' इतीदमेव हि मुख्यं युक्तमपेक्षितुम्।

पूर्वं पञ्चधा विभक्ते साम्नि उद्गीथभक्तौ निधनभक्तौ च अवान्तरांशद्वयकरणेन **सप्तविधत्वम्**।

हिङ्कारप्रस्तावोद्गीथप्रतिहारनिधनतः साम।
पञ्चविधं सप्तविधे तृतीय आदिर्ह्युपद्रव उपान्त्यः॥

उद्गीथस्य नियमेन ओङ्कारादित्वात् **आदि**रिति ओङ्कार उच्यते। तस्य सर्वादित्वाच्च शाङ्करोक्तात्। हिङ्कारादिपदवाच्याः याः सामभक्तयः तत्र तद्वाचकशब्दाद्यभागजातीयसकलहिमाद्यक्षरदृष्टिर्विधीयते। शाङ्करे तु 'हिमिति' इत्यत्र 'हुमिति' पाठ आदृतः हुकारसामान्यात् हिङ्कारे तद्दृष्टिरिति।

२—९.

अथ खल्वमुमादित्यँ सप्तविधँ सामोपासीत—सर्वदा समः, तेन साम; मां प्रति मां प्रतीति सर्वेण समः, तेन साम ॥ १ ॥

तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात् ।

तस्य यत् पुरोदयात्, स हिङ्कारः । तदस्य पशवोऽन्वायत्ताः । तस्मात्ते हिङ्कुर्वन्ति; हिङ्कारभाजिनो ह्येतस्य साम्नः ॥ २ ॥

अथ खलु— । सप्तविधे साम्नि आदित्यबुद्धिः कर्तव्येत्यर्थः । सामादित्ययोरैक्याध्यासहेतुमाह **सर्वदा समः तेन साम** । आदित्यस्य सर्वदा समपरिमाणत्वेन समत्वात् सामत्वमित्यर्थः । **मां-साम** । लोके हि, 'आदित्यो मां प्रति **समः** अभिमुखः, मां प्रति सम' इति प्रतीयते । पुरुषविशेषं प्रति आभिमुख्यस्य पुरुषविशेषं प्रति अनाभिमुख्यस्य [1]चाभावात् । अतः सर्वं प्रति समत्वादपि सामत्वमित्यर्थः ।

तस्मिन्—विद्यात् । तस्मिन् आदित्ये[2] । सर्वभूतोपजीव्यतया आदित्यमुपासीतेत्यर्थः । भूतानामुपजीवनप्रकारं कालभेदेन दर्शयति **तस्य—साम्नः** ।

तस्य आदित्यस्य उदयात् **पुरा** पूर्वं यद् रूपम्, स हिङ्कारः । हिङ्कारे तद्रूपदृष्टिः कर्तव्येत्यर्थः । एवमग्रेऽपि । अस्याऽऽदित्यस्य हिङ्काराख्यं तत् रूपं पशव **अन्वायत्ताः** उपजीवन्ति । **हि** यत एव ते **एतस्य साम्नः** सामरूपस्यादित्यस्य संबन्धिहिङ्कारलक्षणरूपोपजीविनः, [**तस्मात्ते हिङ्कुर्वन्ति**] अत एव पशवो हिमिति शब्दं कुर्वन्तीत्यर्थः ।

1. वाऽभावात्, **ख. ग.** 2. इदं **क.** कोशे ।

पूर्वमुद्गीथे आदित्यदृष्टाविवात्र सामसामान्ये आदित्यदृष्टौ प्रयोजकमैक्यं दर्शयति **सर्वदे**ति । सामशब्दो गीताविव समत्वेऽपि प्रसिद्धः । समत्वञ्चाऽऽदित्ये द्वेधाऽस्ति, सर्वदा समपरिमाणत्वात् सर्वं प्रति वक्ष्यमाणरीत्या समत्वाच्च । अतः सोऽपि सामेति । ननु हिङ्कारादिषु तत्तद्दृष्टौ ऐक्याध्यासहेतुर्न दर्शितः । अत्र परं कुतः ? अत्र शाङ्करम्, 'सुगमत्वात् तत्र नोक्तम्; दुर्गमत्वादत्रोच्यत' इति । एवमेतत् । परन्तु यत्र श्रुतिरैक्याध्यासहेतुमप्युपासनोपयोगितया चिन्तनीयं मन्यते, तत्रावश्यमाह; अन्यत्र पुनर्नाहेत्यपि भाव्यम् । **सर्वदे**ति । न हि चन्द्रवदस्य वृद्धिह्रासाविति । **मां प्रती**ति । विषयोऽयम् 'आदित्यवद् यौगपद्य'मिति **सूत्रे शाबरे** च गृहीतः । **प्रति**शब्द आभिमुख्यार्थः । **मां प्रति** मदभिमुख । **सर्वेण सम** इति । गृह्यते इति शेषः । **समः** आभिमुख्यात्मकैकरूपवान् सन् इत्यर्थः ।

अथ यत् प्रथमोदिते स प्रस्तावः। तदस्य मनुष्या अन्वायत्ताः। तस्मात् ते प्रस्तुतिकामाः प्रशँसाकामाः; प्रस्तावभाजिनो ह्येतस्य साम्नः॥ ३॥

अथ यत् सङ्गवेलायाँ स आदिः। तदस्य वयाँस्यन्वायत्तानि, तस्मात् तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परिपतन्ति; आदिभाजीनि ह्येतस्य साम्नः॥ ४॥

अथ यत् सम्प्रतिमध्यन्दिने स उद्गीथः। तदस्य देवा अन्वायत्ताः। तस्मात् ते सत्तमाः प्राजापत्यानाम्। उद्गीथभाजिनो ह्येतस्य साम्नः॥ ५॥

अथ यदूर्ध्वं मध्यन्दिनात् प्रागपराह्णात्, स प्रतिहारः। तदस्य

अथ यत् प्रथमोदिते—साम्नः। [1]**प्रथमोदिते** प्रथमोदयकाले। प्रथमोदयकालावच्छिन्न आदित्यः प्रस्तावः। अस्य तथाविधं रूपं मनुष्या उपजीवन्ति। यतस्ते प्रस्तावाख्यप्रथमोदितादित्यरूपोपजीविनः, अत एव मनुष्याः **प्रस्तुतिकामाः** भवन्ति। **प्रस्तुतिकामा** इत्यस्य विवरणं **प्रशंसाकामा** इति।

अथ यत् संगव---साम्नः। **तानि** वयांसि पक्षिणः **अनारम्बणानि** आलम्बनान्तर[2]शून्यान्येव आत्मानमेव आलम्बनत्वेनाऽऽदाय आकाशे परिपतन्ति। संगवकाल[3]वच्छिन्नादित्यसंबन्ध्यादिशब्दितोङ्काररूपोपजीवित्वादेव आदाय परिपतनं पक्षिणामित्यर्थः। **आदि**शब्दादाय**शब्दयो**राकारदकारवत्त्वसाम्यमिहाभिप्रेतम्।

अथ यत् संप्रति—साम्नः। **संप्रति मध्यन्दिने** ऋजुमध्यन्दिने इत्यर्थः। **प्राजापत्यानां** देवासुराणां[4] मध्ये ते सत्तमा [5]उत्तमा इत्यर्थः। उद्गीथसत्तमशब्दयोः संयुक्ततकारश्रुति[6]मत्त्वसाम्यात् उपजीव्योपजीवकभावोक्तिर्द्रष्टव्या।

अथ यदूर्ध्वं—साम्नः। सवितुः प्रतिहार[7]भक्तिरूपोपजीवित्वादेव[8] ऊर्ध्वं

1. इदं क.कोशे। 2. आलम्बनशू. क. 3. अवच्छिन्नपदं क कोशे। 4. इदं पदं क कोशे। 5. इदं विवरणं क कोशे। 6. श्रुतित्व क. 7. प्रतिहारात्मकभक्ति क. भक्तिरूपेण क. यथाशाङ्करम्।

ऋजुमध्यन्दिन इति। प्रतिशब्दस्याभिमुख्यार्थकत्वात् **संप्रतिशब्दस्य** सम्यगभिमुखमित्यर्थे सति, आभिमुख्यावस्थाने आर्जवावस्थानव्यवहारात् **संप्रति** साक्षादभिमुखम्, न तु वक्रम्, किंतु ऋजु इति सिध्यति। ऋजुमध्यन्दिनत्वं नाम भूरिप्रयोगानुसारेण मध्यन्दिनशब्दस्य ऋज्वर्थभूतसङ्गवापराह्णमध्यवर्तिकालविशेषत्वम्। तेनात्यन्तोच्चस्थसूर्यावच्छिन्नस्वल्पकाल-

गर्भा अन्वायत्ताः । तस्मात् ते प्रतिहृता नावपद्यन्ते ; प्रतिहारभाजिनो ह्येतस्य साम्नः ॥ ६ ॥

अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात्, स उपद्रवः । तदस्याऽऽरण्या अन्वायत्ताः । तस्मात् ते पुरुषं दृष्ट्वा कक्षँ श्वभ्रमित्युपद्रवन्ति ; उपद्रवभाजिनो ह्येतस्य साम्नः ॥ ७ ॥

अथ यत् प्रथमास्तमिते, तन्निधनम् । तदस्य पितरोऽन्वायत्ताः । तस्मात्तान् निदधति ; निधनभाजिनो ह्येतस्य साम्नः ।

एवं खल्वमुमादित्यं सप्तविधँ सामोपास्ते ॥ ८ ॥

इति द्वितीयाध्याये नवमः खण्डः ।

प्रतिहृतास्सन्तो गर्भा **नावपद्यन्ते** द्वारे सत्यपि नाधःपतन्तीत्यर्थः ।

अथ यदूर्ध्वमपराह्णात्—साम्नः । आदित्यसंबन्ध्युपद्रवभक्तयुपजीवित्वादेव पुरुषदर्शनभीतानां [1]कक्षश्वभ्रादिषु उपद्रवणमित्यर्थः[2] ।

अथ यत् प्रथमास्तमिते—साम्नः । तस्मात् तान् निदधति । श्राद्धकर्तारो हि दर्भेषु पितॄन् * निक्षिपन्ति, तदर्थान् पिण्डान् वेत्यर्थः । [3]**निधनभाजिनो हि**— । निधनोपजीवित्वात् पितॄणां दर्भेषु निधनं प्राप्तवन्तः ।

उक्तमुपासनमुपसंहरति **एवं—उपास्ते** ॥

1. श्वभ्रपदं **क. घ.**कोशे न । 2. द्रव **क. घ.** * निक्षपन्ति **घ.** 3. एतद्विवरणं **क.** कोशे ।

मात्ररूपमध्यन्दिनव्यावृत्तिः । प्रतिहृता इति । हरणम् अन्यत्र नयनम् । तत्प्रतिकूलक्रिया प्रतिहरणम् ; मोचनं प्रतिमोचनमितिवत् । **कक्षम्**अरण्यम् । **श्वभ्रं** गर्तगुहादि ।

एवं खल्विति । अत्र फलानिर्देशेऽपि औचित्यादस्याऽऽदित्योपासनस्य तदाप्तिः फलमिति शाङ्करे । सर्वभूतोपजीव्यादित्यदृष्टेर्विहितत्वात् सर्वभूतोपजीव्यत्वाद्यपि यथार्हं फलं स्यात् । अथवा उपरि आदित्योपासनांशे आदित्यप्राप्तिरूपफलकीर्तनादत्रापि तत् लभ्यत इति श्रुतिर्मन्यते । फलानुकौ कर्मवीर्यवत्तरत्वं फलमस्त्येवेति चाऽऽरम्भ एवाभ्यधायि ।

२—१०.

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधँ सामोपासीत — हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत् समम् ॥ १ ॥ आदिरिति द्व्यक्षरं

अथ—उपासीत । **अथ** अध्यस्तादित्यभावसप्तविधसामोपासनोपदेशानन्तरम् । अतिक्रान्तादित्यसप्तविधसामोपासनमुपदिश्यत इत्यर्थः । [1]अत्र **मृत्युशब्देन** आदित्योऽभिधीयते । आदित्यस्य अहोरात्रकालावर्तनेन जगन्नाशहेतुत्वात् मृत्युत्वम् । आत्मनां[2] स्वेषामे[3]षामेव परस्परसंमितत्वकथनादात्मसंमितत्वम् । द्वाविंशत्यक्षरात्मकस्य सप्तविधसामभक्तिविशेषस्य एकविंशतिलक्षणादित्यसंख्यातिरेकित्वात् **अतिमृत्युत्वम्** ।

आत्मसंमितत्वातिमृत्युत्वप्रकारमेव दर्शयति **हिङ्कार इति—समम्** । अतश्च [4]एतयोरुभयोः समत्वादेव आवापोद्वापौ न कर्तव्यावित्यर्थः । **आदिरिति—तत इहैकं तत् समम्** । **[ततः]** चतुरक्षरात् एकमक्षरं गृहीत्वा द्व्यक्षरे निवेशिते समं

1. अत्रेति न क. 2. आत्मना ख. ग. 3. एषामिति न क. घ. 4. एतयोरभयोरिति न. क. कोशे ।

अथातिशयितमुपासनमाह **अथ खल्वात्मे**ति । अस्योपासनस्य आदित्यप्राप्तिपूर्वकविशोकनाकजयरूपस्य फलस्य वक्ष्यमाणत्वात् तस्य परमात्मोपासनलभ्यस्य प्रकृतसामोपासनलभ्यतया प्रकृते साम्नि तेनाऽऽकारेण अतिमृत्युत्वाकारेण च परमात्मसाम्यमात्मसंमितपदविवक्षितमिति सुवचम् । उक्तश्चायमप्यर्थः शाङ्करे, 'परमात्मतुल्यतया वा' इति । अथापि विस्पष्टमुपर्युपपाद्यमानसाम्यपरत्वसंभवे किमित्यर्थान्तरमिति एकमेवार्थमाह **आत्मनामिति** । **आत्मानः** स्वरूपभूताः पञ्च विधाः **संमिताः** समसंख्याकनामाक्षरवत्त्वकल्पनया समतया मिताः यस्य तत् **आत्मसंमितम्** । नन्वतिमृत्युत्वोपासनमादित्यात् परस्य नाकस्य प्राप्तये उपयुज्यते । आत्मसमितत्वोपासनं तु किमर्थमिति चेत्—आदित्यप्राप्तेरपि फलत्वात्तदर्थं तत् । तथाहि—एकविंशस्यादित्यस्य तदधिकसंख्यावत्सामचिन्तनाज्जयो भवतीति विमृश्य, साम्नि तत्संख्योपपादने प्रवृत्य, तत्र सप्तविधे साम्नि तत्संख्यायाः स्वरूपे उपपादनासंभवात् वाचकवर्णद्वारा तत्संपत्तिः प्रदिदर्शयिषिता । एवमतिमृत्युत्वं सिद्धम् । एवमपि आदित्यप्राप्तिरूपफलांशस्य सिध्युपायं विमृशन्ती श्रुतिः एकविंशतिसंख्यावत्त्वे साम्नः सिद्धे स भवतीति तुल्ययुक्त्या निर्धार्य, तस्यापि वाचकवर्णद्वारं विना संपादनायोगात् तद्द्वारैव तत्संपादनमारभ्य, सामविधानां सप्तत्वात् सप्तसु संभूय एकविंशतिमत्त्वमपेक्षितमित्याकलय्य, तत्र प्रत्येकं त्र्यक्षरनामवत्त्वे तत् सुलभमिति मत्वा, तत्र सप्तसु चतुर्णां स्वत एव त्र्यक्षरनामकत्वात् भूयोनुसारादन्येषां त्रयाणामपि तथात्वलम्भनेन सर्वसमीकरणाय आवापोद्वापौ तत्र व्यदधात् । एवञ्च चतुष्टयानुरोधेन त्रयस्यापि त्र्यक्षरसंपादनेनात्मनां संमितत्वात् एकविंशतिसंख्यावत्त्वस्यापेक्षितस्य सिद्धिरिति ।

तत् समम्मिति । तदुभयं समामित्यर्थः । अत्र सामनामाक्षराणां त्रिकत्रिकरूपेण समतया सामत्वकल्पनम्, नामाक्षरेषु आदित्यदृष्ट्युपासनकथनञ्च शाङ्करारूढमनपेक्षितमित्युपेक्षितम् ।

प्रतिहार इति चतुरक्षरं तत इहैकं तत् समम् ॥ २ ॥ उद्गीथ इति त्र्यक्षरम् उपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवति, अक्षरमतिशिष्यते । त्र्यक्षरं तत् समम् ॥ ३ ॥ निधनमिति त्र्यक्षरं तत् सममेव भवति ।

तानि ह वा एतानि द्वाविँशतिरक्षराणि ॥ ४ ॥ एकविँशत्याऽऽदित्यमाप्नोति । एकविँशो वा इतोऽसावादित्यः । द्वाविँशेन परमादित्याज्जयति । तन्नाकं तद्विशोकम् ॥ ५ ॥ आप्नोतिहा[1](तीहा)दित्यस्य जयम् ;

1. आप्नोतीह **ख** पाठः । अत्र भाष्यपाठोऽपि तदनुसारी । माध्वपाठोऽप्येवम् ।

भवतीत्यर्थः । **उद्गीथ इति—समम्** । उपद्रव इति चतुरक्षरे एकस्मिन् अक्षरे पृथक्कृते सति अवशिष्टं त्र्यक्षरं सममेव भवतीत्यर्थः । **निधनमिति त्र्यक्षरम्, तत् सममेव भवति** । [उपसंहरति] **तानि ह—अक्षराणि** । स्पष्टोऽर्थः ।

एकविंशत्या—आदित्यः । 'द्वादश मासाः पञ्चर्तवः त्रय इमे लोकाः असावादित्य एकविंशः' इति श्रुतेः[1]यत आदित्यस्य एकविंशत्वम्, अतः सप्तविधभक्तिनामाक्षरगतैकविंशतिसंख्यया[2] एकविंशतिसंख्याकमादित्यं प्राप्नोति । आदित्यसालोक्यं प्राप्नोतीत्यर्थः । **द्वाविंशेन—आदित्यस्य जयम्** । अवशिष्टेन द्वाविंशेनाक्षरेण आदित्यात् परं दुःखासंभिन्नं लोकं [3]आदित्यजयञ्च प्राप्नोतीत्यर्थः । **परो ह —** । [4]अस्य आदित्यजयात् सर्वोत्कर्षो भवतीत्यर्थः ।

1 असावादित्य' इति आदित्यएकविंशतिर्दृश्यते. **क.** 2. एकविंशत्या आदित्यम्. **क.** 3. अयं **क. घ.** पाठः । **ख. ग.** कोशयोः 'लोकमित्येतदनन्तरं, प्राप्नोतीत्यर्थः । **आप्नोती(ति) हादित्यस्य जयम्** । इह लोके आदित्यजयं प्राप्नोतीत्यर्थः । **परोह—उपास्ते** । य एवमुपास्ते तस्य' इति । अस्येत्येतत्स्थाने **घ** कोशेऽपि 'य एवमुपास्ते तस्य' इति । 4. य एवमुपास्ते, तस्य. **ख.**

फलश्रुतौ **एकविंशत्येत्यादिनोक्तमेव आप्नोति हे**ति पुनर्निष्कृष्योच्यत इति शाङ्करे । अत्र तु **द्वाविंशेने**त्यस्यैव **आप्नोति हे**त्यत्राप्यन्वयोऽभिमतः । अयमाशयः—कथन्नु परमात्मोपासनलभ्या नाकप्राप्तिरनया दृष्ट्युपासनया भवतीति शङ्कापरिहारार्थम् **आप्नोति हे**त्यादि । य स्मादादित्यं प्राप्तो द्वाविंशबलेनादित्यं जेतुं स्ववशे कर्तुमलमासंत् , अतस्तद्बलात् तत्रैव स्थाने सर्वविधोऽप्युत्कर्षो विशोकनाकप्राप्त्युपायानुष्ठानलक्षणोऽस्य निष्पद्यत इति न दोष इति ।

नाकम् । न विद्यते अकं दुःखं यत्रेति **नाकं** नपुंसकम् । तत् पदं प्राप्तस्य, 'अहो बत बहलः कालो मुधैव मया प्रकृतिमण्डले व्ययितः' इति प्राचीनानुबन्धी शोकोऽपि नास्ति, गतस्याप्यंशस्य वर्तमानस्येव भगवदनुकूलतया स्वानुकूलतयैव भानादिति दर्शयितुं **तद्विशोकम**िति । **आप्नोति हे**त्यत्र आप्नोतीहेति पाठः तदनुसारेण इह लोक इत्यादिभाष्यपाठश्च क्वचि-

परो हास्यादित्यजयाज्जयो भवति । य एतदेवं विद्वान् आत्मसंमितमति-मृत्यु सप्तविधँ सामोपास्ते सामोपास्ते ।

इति द्वितीयाध्याये दशमः खण्डः ।

२—११

मनो हिङ्कारो वाक् प्रस्तावः चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनम् । एतद् गायत्रं प्राणेषु प्रोतम् ॥ १ ॥

स, य एवमेतद् गायत्रं प्राणेषु प्रोतं वेद, प्राणी भवति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या ।

अथ गायत्ररथन्तरादिसामोपासनं प्रस्तूयते **मनो—निधनम्** । गायत्राख्यस्य साम्नो हिङ्कारप्रस्तावोद्गीथप्रतिहारनिधनाख्यपञ्चविधभक्तिषु मनोवाक्चक्षुश्श्रोत्रप्राणदृष्टिः कर्तव्येत्यर्थः । **एतद् गायत्रं प्राणेषु प्रोतम्** । अनेनाऽऽकारेण गायत्राख्यस्य साम्नो मनआदिप्राणानाञ्चाध्यासाधिष्ठानभावलक्षणसंबन्धेन परस्परसंबन्ध[1]इत्यर्थः ।

त[2]त्फलमाह **स य—कीर्त्या । प्राणीभवति** अविकलेन्द्रियो भवतीत्यर्थः । **ज्योक्** उज्ज्वलः । व्याध्यादिभिरनुपहत इत्यर्थः ।

1. द्धमि. **का** दन्यत्र । 2. अयं **ख.** पाठः । अन्यत्र एतत्सर्वस्थाने **महामनस्त्वं वदान्यमनस्कत्वम्** । ज्योक् उज्ज्वलो व्याध्यादिभि**रनुपहतः** । शिष्टं स्पष्टम् इति ।

त्को विमृश्यः । पूर्वपर्यायेषु सर्वत्र हशब्दघटितमेव फलश्रवणम् । **सामोपास्त** इति द्विरुक्तिः व्रतविशेषानङ्गकसामसामान्योपासनसमाप्तिसूचनार्था । 'द्विरभ्यासः साप्तविध्यसमाप्त्यर्थः' इति तु शाङ्करे ।

अथ कतिपयसामविशेषपाञ्चविध्यविषयकदृष्ट्युपासनानि प्रतिनियतव्रतविशेषविशिष्टानि चोद्यन्ते **मन** इत्यादिना । अत्रापि सामसामान्यपाञ्चविध्य इव प्राणपञ्चकं तदेवोक्तं द्रष्टव्यम् । **शाङ्करे** अत्र परं, प्राणो मुख्यप्राण इत्युक्तम् । मन इव प्राणोऽपि अयमेव सः । प्राणमनसोः स्थानविनिमयस्तु विवक्षाभेदात् । **प्रोत**मित्यस्य 'मयि सर्वमिदं प्रोतम्' इत्यादाविव आश्रितमित्यर्थायोगाद्**ाह अनेने**ति । तथाच प्रोतं निविष्टं, अन्तर्गतं, गुणीभूतम् । अध्यासस्थले अधिष्ठानापेक्षया अध्यासस्यैव कार्यक्षमतया प्राधान्यात् ।

महामनाः स्यात्; तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये एकादशः खण्डः ।

२--१२

अभिमन्थति स हिङ्कारः, धूमो जायते स प्रस्तावः, ज्वलति स उद्गीथः, अङ्गारा भवन्ति स प्रतिहारः, उपशाम्यति तन्निधनँ सँशाम्यति तन्निधनम्। एतद् रथन्तरमग्नौ प्रोतम् ॥ १ ॥

स, य एतदेवं रथन्तरमग्नौ प्रोतं वेद, ब्रह्मवर्चस्य[1]न्नादो भवति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या।

न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्; तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये द्वादशः खण्डः ।

२—१३

उपमन्त्रयते स हिङ्कारः, ज्ञपयते स प्रस्तावः, स्त्रिया सह शेते स उद्गीथः, प्रतिस्त्रीं(स्त्रि) सह शेते स प्रतिहारः, कालं गच्छति तन्निधनम्, पारं गच्छति तन्निधनम्। एतद्वामदेव्यं मिथुने प्रोतम् ॥ १ ॥

1. वर्चस्व्यन्नादो **मा.**

महामनाः स्यात्। वदान्यमनस्को भवेदित्यर्थः। **तद् व्रतम्।** महामनस्कत्वमेतदुपासनाङ्गमित्यर्थः। एवमग्रेपि नेयम्। शिष्टं स्पष्टम्। २--११.

अभिमन्थति—। उपशमः सावशेषः शमः। निःशेषोपशमः **संशमः। एतद्रथन्तरं—व्रतम्।** अग्नेरभिमुखो **नाचामेत्** न भक्षयेत्। **न निष्ठीवेत्** श्लेष्मादिनिरसनञ्च न कुर्यादित्यर्थः ॥ २—१२.

उपमन्त्रयते—। उपमन्त्रणं संकेतकरणम्। **ज्ञपयते—। ज्ञपनं** तोषणम्। मारणतोषणनिशामनेषु मित्त्वात् ज्ञाधातो र्ह्रस्वः[1]। **स्त्रिया सह शेते—।** एकपर्यङ्कोपवेशनं सहशयनम्। **प्रतिस्त्रि सह—।** स्त्रिया आभिमुख्येन शयनमित्यर्थः। **कालं-पारं-तत्-।** मैथुननिर्वृत्ति[2]रित्यर्थः! **एतद् वामदेव्यम्—[3]।**

1. ह्रस्वत्वम्। **क.** 2. निवृत्तिः **ख.** 3. अत्र मध्ये फलमाह **स** इत्यवतारिका **ख. कोशे.**

स्त्रीं प्रति। अत्र **प्रति**शब्दार्थं आभिमुख्यम्। **कालं** क्रियाकालम्। **पारं** क्रियासमाप्तिम्।

स, य एवमेतद् वामदेव्यं मिथुने प्रोतं वेद, मिथुनीभवति, मिथुनान्मिथुनात् प्रजायते, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या ।

न काञ्चन परिहरेत्, तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये त्रयोदशः खण्डः ।

२—१४

उद्यन् हिङ्कारः, उदितः प्रस्तावः, मध्यन्दिन उद्गीथः, अपराह्णः प्रतिहारः, अस्तं यन् निधनम् । एतद् बृहदादित्ये प्रोतम् ॥ १ ॥

स, य एवमेतद् बृहदादित्ये प्रोतं वेद, तेजस्व्यन्नादो भवति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या।

तपन्तं न निन्देत्; तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये चतुर्दशः खण्डः ।

मिथुनीभवति सर्वदा स्त्रिया अवियुक्तो भवतीत्यर्थः । **मिथुनान्मिथुनात्प्रजायते** । अमोघरेता भवतीत्यर्थः । **न काञ्चन**— । **काञ्चन** । स्त्रियं[1] प्रार्थयमानामिति शेषः । प्रार्थयमानसर्वयोषिद्गमनस्य वामदेव्योपासनाङ्गत्वेन विधानात् परदारगमनप्रतिषेध[2]वचनानि तदतिरिक्तविषयाणि द्रष्टव्यानि ॥ २—१३.

उद्यन्— । आदित्य इति शेषः । **मध्यन्दिन उद्गीथः** । मध्यन्दिनकालावच्छिन्न आदित्य उद्गीथ इत्यर्थः । **अपराह्णः प्रतिहारः** । अपराह्णकालावच्छिन्न आदित्यः प्रतिहार इत्यर्थः । **अस्तं यन्निधनम्** । [3]यन् गच्छन्नित्यर्थः । **तपन्तं न निन्देत्** । तपन्तमादित्यं न निन्देदित्यर्थः ॥ २—१४.

1. स्त्रियमिति **ख.** कोशे । 2. प्रतिषेधक **घ.** 3. 'यन् निधनमितिच्छेद' इत्यधिकं, **क.**

न परिहरेदिति पदस्वारस्यात् **प्रार्थयमानामिति** लभ्यते ।

अभ्राणि संप्लवन्ते स हिङ्कारः, मेघो जायते स प्रस्तावः, वर्षति स उद्गीथः, विद्योतते स्तनयति स प्रतिहारः, उद्गृह्णाति स निधनम्। एतद् वैरूपं पर्जन्ये प्रोतम् ॥ १ ॥

स, य एवमेतद् वैरूपं पर्जन्ये प्रोतं वेद, विरूपाँश्च सुरूपाँश्च पशूनवरुन्धे, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या।

वर्षन्तं न निन्देत्; तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये पञ्चदशः खण्डः।

२—१६

वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्। एतद् वैराजमृतुषु प्रोतम् ॥ १ ॥

स, य एवमेतद् वैराजमृतुषु प्रोतं वेद, विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या। ऋतून् न निन्देत्; तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये षोडशः खण्डः।

अभ्राणि संप्लवन्ते। **अभ्राणि** [1]जलधारकत्वमात्रावस्थापन्नानि। **संप्लवः** सञ्चारः। **मेघो जायते**। **मेघः** सेचकत्वावस्थापन्नः। **उद्गृह्णाति**। [1]**उद्ग्रहणं** वर्षसमाप्तिः। **एतद् वैरूपं—**। **वैरूपं** वैरूपाख्यं सामेत्यर्थः। [2]**स य—रुन्धे**। **विरूपान्**[3] विरुद्धनानारूपान् **सुरूपान्**[4] शोभनरूपान्। **अवरुन्धे** प्राप्नोतीत्यर्थः। **वर्षन्तम्—**[5]वर्षन्तं पर्जन्यमित्यर्थः ॥ २—१५.

वसन्तः—। [6]**वैराजं** वैराजाख्यं सामेत्यर्थः ॥ २—१६.

1. एवमर्थवर्णनं न क. कोशे। 2. अत्र 'फलम्' इत्यधिकं. ख. 3. विविधरूपान् ख. शुद्धनानारूपान् घ. 4. शोभननानारूपान् क. 5. स्पष्टमित्यधिकं ख. 6. इदं ख. कोशे.

अभ्राणि। अपां भरणात्। यद्वा, 'न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः' (वि. पु. २-९.) इति दर्शिता व्युत्पत्तिः। **मेघः**। मिह सेचने।

२—१७.

पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनम्। एताः शक्वर्यो लोकेषु प्रोताः ॥ १ ॥

स, य एवमेताः शक्वर्यो लोकेषु प्रोता वेद, लोकी भवति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या। लोकान् न निन्देत्; तद् व्रतम्। इति द्वितीयाध्याये सप्तदशः खण्डः।

२—१८.

अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम्। एता रेवत्यः पशुषु प्रोताः ॥ १ ॥ स, य एवमेता रेवत्यः पशुषु प्रोता वेद, पशुमान् भवति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या। पशून् न निन्देत्; तद् व्रतम् ॥ २ ॥

इति द्वितीयाध्याये अष्टादशः खण्डः।

२-१९.

लोम हिङ्कारः त्वक् प्रस्तावो माँसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनम्; एतद् यज्ञायज्ञीयमङ्गेषु प्रोतम् ॥ १ ॥

स, य एवमेतद् यज्ञायज्ञीयमङ्गेषु प्रोतं वेद, अङ्गी भवति, नाङ्गेन विहूर्छति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति,

---

पृथिव्री—। **शक्वर्यः** शक्वर्याख्यं सामेत्यर्थः। नित्यबहुवचनम्। [**लोकी भवति** उत्तमलोकप्राप्तो भवतीत्यर्थः। शिष्टं स्पष्टम्।] ॥ २-१७.

अजा-। **रेवत्य** इत्यपि **शक्वर्य** इतिवत् नित्यबहुवचनं। [1]सामविशेषनाम ॥

लोम—। स्पष्टम्। **स य**—। [2]**अङ्गी भवति** समग्राङ्गयुक्तो भवतीत्यर्थः। **नाङ्गेन विहूर्च्छति**। अङ्गेन हस्तपादादिना **न विहूर्छति** कुटिलो न भवतीत्यर्थः। हुर्च्छा कौटिल्ये इति हि धातुः। **संवत्सरं मज्ञो नाश्नीयात्**

1. रेवत्याख्यं सामेत्यर्थः क 2. एतत्पूर्वं, **यज्ञायज्ञीयं** सामेति क.

शक्वर्य इति द्वितीयपदे प्रथमा द्वितीयार्थे। एवं **रेवत्यः**।

महान् कीर्त्या । संवत्सरं मज्ज्ञो[1] नाश्नीयात्; तद् व्रतम्; [2]मज्ज्ञो नाश्नीयादिति वा ॥ २ ॥ इति द्वितीयाध्याये एकोनविंशः खण्डः

२—२०.

अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहार-श्चन्द्रमा निधनम्, एतद् राजनं देवतासु प्रोतम् ॥ १ ॥

स, य एवमेतद् राजनं देवतासु प्रोतं वेद, एतासामेव देवतानाँ सलोकताँ सार्ष्टिताँ सायुज्यं गच्छति, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्या । ब्राह्मणान् न निन्देत्, तद् व्रतम् ॥ २ ॥ इति द्वितीयाध्याये विंशः खण्डः

२—२१.

त्रयी विद्या हिङ्कारस्त्रय इमे लोकास्स प्रस्तावोऽग्निर्वायुरादित्यस्स उद्गीथो नक्षत्राणि वयाँसि मरीचयस्स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्नि-धनम् । एतत् साम सर्वस्मिन् प्रोतम् ॥ १ ॥

स य एवमेतत् साम सर्वस्मिन् प्रोतं वेद, सर्वँ ह भवति ॥ २ ॥

1. मज्ञो **मा.** (मत्त इत्यर्थः) 2. मज्ञु **मा.** (मदकारि इत्यर्थः)

तद्व्रतम्—। **मज्ज्ञः** मज्जाख्यमांसविशेषानित्यर्थः । **मज्ज्ञो नाश्नीयादिति वा** [1]**व्रतम्** । सर्वदेति शेषः ॥ २-१०.

अग्निः— । स्पष्टम् । **राजनं** राजनाख्यं सामेत्यर्थः । **स य**— । **सा-र्ष्टिता** समानर्द्धित्वम् । **सायुज्यं** समानभोग्यत्वम् । **ब्राह्मणान्न निन्देत् तद्व्रतम्** । 'एते वै देवाः प्रत्यक्षं यद् ब्राह्मणाः' इति श्रुतेः ब्राह्मणनिन्दैव देवतानिन्देति भावः ॥ २—२०.

त्रयी— । स्पष्टम् । अत्र सामनामविशेषानिर्देशात् सामशब्दः सामसामान्य-परः । **स — सर्वं ह भवति** । काम्यमानं सर्वमाप्नोतीत्यर्थः । [2]भूः प्राप्त्यर्थः ।

1. व्रतमिति पदं न **ख.** कोशे. 2. अयं **क.** पाठः । भूर्व्याप्त्यर्थः, इति **घ.** कोशे । नेदं **ख.** कोशे । काम्यमानमित्यतः प्राक् 'तस्य सर्वं हि भवति' इत्यस्ति ।

एवं सामविशेषविषया दृष्टीर्विधाय पुनः सामसामान्यविषयकमेकमुत्कृष्टमन्यत्रप्रशंसितं व्रतविशेषाङ्गकं दृष्ट्युपासनमन्ते विदधाति — **त्रयी**ति । अग्न्यादीनामिव, ऋगादिवेदानामपि अग्न्यादिदेवताऽऽविर्भावततया पृथिव्यादिलोकैः संबन्धो बहुश्रुतिसिद्ध इति अत्र तद्घटनमुपपन्नम् ।

तदेष श्लोकः—

यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति। (३)
यस्तद् वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरन्ति ॥
सर्वमस्मीत्युपासीत, तद् व्रतम् तद् व्रतम् ॥ ४ ॥

इति द्वितीयाध्याये एकविंशः खण्डः

२–२२.

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्त-

---

तदेष श्लोकः। तत् उक्ते सर्वात्मकसामोपासने **एषः** वक्ष्यमाणो मन्त्रोऽप्यस्तीत्यर्थः। तमेवाह—**यानि — त्रीणि**। 'त्रयी विद्या हिङ्कारः, त्रय इमे लोका' इत्यादिनोक्तानि[1] [त्रयी विद्या, लोकत्रयम्, अग्निवाय्वादित्याः, नक्षत्रवयोमरीचयः, सर्पगन्धर्वपितरश्चेत्येतानि] यानि त्रीणि [2]त्रीणि हिङ्कारादिरूपेण **पञ्चधा** भवन्तीत्यर्थः[3]। **तेभ्यो—स्ति**। अतः **परमुत्कृष्टमन्यच्छ्रेयः** किमपि **नास्ती**त्यर्थः। **यस्तद् वेद स वेद सर्वम्**। [4]तदुपासकः सर्वज्ञो भवतीत्यर्थः। **सर्वा—हरन्ति**। सर्वदिग्वर्तिनोऽपि वशीकृता अस्मै उपासकायोपहारान् समर्पयन्तीत्यर्थः।

सर्वमस्मीत्युपासीत। सामसामान्ये उक्तरीत्या [5]सर्वत्वाश्रयत्वेन **स्वाभिन्नत्वेन** चोपासना कर्तव्येत्यर्थः। **तद् व्रतम्**। तस्य तदेव व्रतम्; नान्यद् व्रतमस्तीत्यर्थः। द्विरुक्तिः सामोपासनसमाप्त्यर्था ॥ २–२१.

एवं सामोपासनं समाप्य गानविशेषान् उद्गातुरुपदिशति—**विनर्दि—**।

1. 'इत्युक्तानि यानि' इत्येतावदेव. **क**. 2. 'त्रीणि' इति सकृत् **ख. घ**. 3. 'भवन्ति, अतः **पर**' मित्येकीकृतं **ख**. कोशे 4. एतदुपासकः **ख**. 5. सर्वाश्रयत्वेन **क**. सर्वत्राश्रयत्वेन **घ**.

आप्नोतीति। **सर्वं ह भवती**त्यस्य सर्वाभेदपरत्वं बाधितम्। अतः 'प्राणेषु प्रोतं वेद, प्राणी भवति' इत्यादाविव, सर्वी भवतीत्यत्र तात्पर्यमित्याशयः। श्लोके **स वेद सर्वमित्युक्तमपि** उक्तकाम्यमानसर्वान्तर्गतमेव। पूर्वं निषेधव्रतान्युक्तानि; अत्र विधिव्रतमुच्यते **सर्वमस्मीति**। **सामसामान्ये** इत्यादि। नन्वयमर्थ उदक्षरः, स्वस्य सर्वाभिन्नत्वेनोपासनस्यैव विधानावगमात्—उच्यते—पूर्वं साम्नि सर्वाभेददृष्टेर्विहिततया एवमुपासकः **सर्वमिति सर्वाभिन्नतया स्वोपास्यं** सामैव गृह्णीयात्। तथाच तदभिन्नत्वेन 'अस्मि' इति स्वानुसंधाने कृते **साम्नः सर्वाभिन्नत्वस्वाभिन्नत्वाभ्यामनुसंधानं** कृतं भवतीति।

एतावता सामोपासनविशेषाः प्रपञ्चिताः। अथास्मिन् द्वाविंशे खण्डे सामगानस्वरविशेष-

स्सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य । तान् सर्वानेवोपसेवेत, वारुणं त्वेव वर्जयेत् ॥ १ ॥

विशिष्टो **नर्दः** स्वरविशेषः ऋषभकूजितसमः । सोऽस्यास्तीति **विनर्दि** । गानमिति वाक्यशेषः । **साम्नः** सामसंबन्धि । **पशव्यं** पशुहितम् । "उगवादिभ्यो यत्" इति यत् । सामसंबन्धिविनर्दिगानं **वृणे** प्रार्थयेत । पुरुषव्यत्ययः छान्दसः । **अग्नेरुद्गीथोऽनिरुक्तः** । अग्निदेवत्य[2]मुद्गानमस्पष्टं भवति । अस्पष्टो गानविशेषोऽग्निप्रीतिहेतुर्भवतीत्यर्थः । **प्रजापतेर्निरुक्तः** । निरुक्तः स्पष्टो गानविशेषः प्रजापतिदेवत्यः प्रजापतिप्रीतिहेतुरित्यर्थः । **सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णम्** । स्पष्टम् । **बलवदिन्द्रस्य** । **बलवत्** बलवत्प्रयत्नोपेतमित्यर्थः । **क्रौञ्चं बृहस्पतेः** । क्रौञ्चपक्षिनादसमं बार्हस्पत्यं गानमित्यर्थः । **अपध्वान्तं वरुणस्य** । भिन्नकांस्यसमं वारुणगानमित्यर्थः । **तान्** —— । अपध्वान्तगानव्यतिरिक्तान् सर्वान् उद्गीथान् उपसेवेतेत्यर्थः ।

1. समानः क. 2. देवत्येत्यत्र सर्वत्र दैवत्येति ख.

प्रीयमाणदेवताविशेषोपदेशेन तत्र हेयोपादेयविवेकम्, गानकाले प्रमादं विना ध्यातव्यान् अथोन्, गेयवर्णविशेषसंबन्धिदेवताविशेषप्रदर्शनेन तत्तदनुकूलं तत्प्रयोगरीतिञ्च प्रतिपादयति । **पशव्यम्** । ऋषभस्य पशुत्वात् ऋषभकूजितसमस्य पशव्यता । **अनिरुक्तः** । किञ्चित्समत्वेनागृहीत इति शाङ्करे । 'उपहव्योऽनिरुक्तः' इत्यत्र (पू. मी. १०-३-१८) अस्पष्टमन्त्रगानयुक्तत्वादुपहव्यस्यानिरुक्तत्वमुक्तम् । नन्वेकस्यानिरुक्तत्वे अन्यः सर्वो निरुक्तो भवेत् । **एकस्य निरुक्तत्वे वा अन्यः सर्वोऽप्यनिरुक्तः** । तत् कथं निरुक्तानिरुक्तदन्यानेकगणनम् । उच्यते । कश्चित् कात्स्न्र्येन निरुक्तः; कश्चिच्च कात्स्न्र्येनानिरुक्तः; अन्ये चांशतो निरुक्ता अनिरुक्ताश्चेति स्यादिति । **अग्निदेवत्यमुद्गानमस्पष्टमिति** अग्न्युद्गीथस्यानिरुक्तत्वं विशेषणमत्रेष्टम् । शाङ्करे तु प्रजापतेरनिरुक्तत्वात् अनिरुक्तो गानविशेषः प्रजापतेरित्युक्तम् । श्रुतिशैलीपर्यालोचनेऽपि **श्लक्ष्णं बलवदिन्द्रस्ये**त्यारभ्य पूर्वं गानवाचिपदस्य, पश्चाद् देवताशब्दस्य च प्रयोगात् पूर्वमपि तथैव युक्तम्; यथा **अमृतत्वमि**त्यायुत्तरवाक्येऽपि । तत्र श्लक्ष्णे बलवत्त्वविशेषणदानात्, श्लक्ष्णान्तरे मृदुत्वविशेषणदानञ्च समुचितम् । एवञ्च वायोः मृदुश्लक्ष्णः, सोमस्य निरुक्तः, प्रजापतेरनिरुक्त इति संपद्यते । तर्हि अग्नेः क इति चेत्—**विनर्दिसाम्न इत्युक्तो देवतासाङ्गो यः**, स एव । एवञ्चाग्निपदात् पूर्वंप्रयुक्तपदगम्य एव तदीय इत्यैकरूप्यम् । तत्र, 'विनर्दिं गानं सामसंबन्धि पशव्यमग्निदेवत्यमुद्गानं अहं वृणे इति कश्चिन्मन्यत' इत्यध्याहारादिपूर्वकशाङ्करयोजनायाः क्लिष्टत्वेऽपि, 'विनर्दिं साम्नो वृणे पशव्य'मित्याद्रियमाण उद्गीथः उच्चगानमग्नेरिति भवितुमर्हति । तदाद्रता योजना विमृश्या, 'उत्तरेषु उद्गीथेषु

अमृतत्वं देवेभ्य आगायानीत्यागायेत्; स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः, स्वर्गं लोकं यजमानाय, अन्नमात्मन आगायानीति। एतानि मनसा ध्यायन् अप्रमत्तः स्तुवीत ॥ २ ॥

सर्वे स्वरा इन्द्रस्यात्मानः, सर्व ऊष्माणः प्रजापतेरात्मानः, सर्वे स्पर्शा मृत्योरात्मानः। तं यदि स्वरेषूपालभेत, 'इन्द्रं शरणं प्रपन्नोऽभूवम्। स त्वा प्रतिवक्ष्यती'त्येनं ब्रूयात् ॥ ३ ॥ अथ यद्येनमूष्मस्वपाल-

---

अमृतत्वं — आगायेत्। अमृतत्वप्राप्तिम् **आगायानि** गानेन साधयानीति **आगायेत्** गानं कुर्यादित्यर्थः। यथाप्रार्थनं फलं भवतीति भावः। **स्वधां पितृभ्यः। आगायानीति** सर्वत्र संबन्धः। [1]**आशां— अन्नमात्मने।** आगायानीत्यागायेदित्यर्थः। **एतानि—स्तुवीत।** एतानि देवामृतत्वादीनि फलानि मनसा ध्यायन् स्वरादिष्वप्रमत्तः सन् स्तोत्रं कुर्यादित्यर्थः।

सर्वे—आत्मानः। अचः **स्वराः।** आत्मानः अवयवसदृशा इत्यर्थः। शषसहा **ऊष्माणः।** कादयो मावसानाः **स्पर्शाः। तं यदि स्वरेषूपालभेत।** [2]एवंविध (द्) मुद्गातारं यदि कश्चिदागत्य, 'त्वया दुष्टः स्वरः प्रयुक्तः' इत्युपालम्भं कुर्यादित्यर्थः। **इन्द्रं—ब्रूयात्।** 'इन्द्रमहं शरणं गतः। तस्मादिन्द्र एव तव प्रत्युत्तरं दास्यती'ति[3] तदा तमाक्षेप्तारं प्रति ब्रूयदित्यर्थः। **अथ यदि—। स**

1. इदं वाक्यं ख. कोशे। 2. स्वरेषु अज्लक्षणस्वरेषु एवंविध इति क. 3. 'दास्यतीत्यर्थ' इत्येतावदेव ख. कोशादन्यत्र।

अग्न्यादिहितत्वस्येवात्र विनर्दिनः पशुहितत्वस्योक्तत्वात् विनर्दिगानमभेदेन भवति। उद्गीथ इति च सर्वोद्गातृगानसाधारणम्। अतः अनिरुक्त एवाग्नेरित्याशयेन वाऽन्यथा वेति। **सर्वानिति** पुंल्लिङ्गनिर्वाहाय **उद्गीथानिति** पूर्वोक्तपदेन पूरणम्।

आशाम् आशाविषयम्। **आगायानीति सर्वत्रेति। आगायानीति** इति वक्ष्यमाणस्य सर्वत्रेत्यर्थः। एवं पूर्वोक्तस्य **आगायेदित्यस्यापि** संबन्धं दर्शयति **आगायेदित्यर्थ इति।**

स्वरा इति। स्वरोष्मादिशब्दाः ईदृशश्रुतिमूलमेव व्याकरणे गृह्यन्ते।

भेत, 'प्रजापतिँ शरणं प्रपन्नोऽभूवँ स त्वा प्रतिपेक्ष्यती' त्येनं ब्रूयात् । अथ यद्येनँ स्पर्शेषूपालभेत, 'मृत्युँ शरणं प्रपन्नोऽभूवँ स त्वा प्रतिधक्ष्यती'त्येनं ब्रूयात् ॥ ४ ॥

सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्याः, 'इन्द्रे बलं दधानी' ति । सर्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता[1] वक्तव्याः, 'प्रजापतेमात्मानं परिददानीति । सर्वे स्पर्शा लेशेनानभि[2]निहिता वक्तव्याः, 'मृत्योरात्मानं परिहराणी' ति ॥ ५ ॥ इति द्वितीयाध्याये द्वाविंशः खण्डः

1. विवृत्ताः मा. क्वचित् । क्वचिदेवं शाङ्करास्मदीयपाठोऽपि । 2. अनमिहताः मा.

त्वा प्रतिपेक्ष्यति—। [1]त्वा प्रति त्वां प्रति पेक्ष्यति चूर्णयिष्यतीत्यर्थः। पिष्लृ संचूर्णने इति हि धातुः । धक्ष्यति भस्मीकरिष्यतीत्यर्थः । दह भस्मीकरण इति हि धातुः।

सर्वे—दधानीति । घोषवत्तया बलवत्तयोच्चारणमिन्द्रस्य बलाधायकमित्यर्थः । सर्वे ऊष्माणः अग्रस्ता अनिरस्ता विवृताः[2] —। अग्रस्ताः अन्तरप्रवेशिताः । अनिरस्ताः बहिरक्षिप्ताः । 'लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम्' इत्यमरः । विवृताः विवृतप्रयत्नोपेताः । प्रजापतेरात्मानं परिददानीति । ऊष्मणां प्रजापत्यात्मकत्वात् अग्रस्तत्वादियुक्तोष्मोच्चारणे प्रजापतेरात्मलाभो भवतीत्यर्थः । सर्वे स्पर्शाः —। लेशेन अल्पशः । अनभिनिहिताः अनभिक्षिप्ताः । अद्रुतोच्चारिता इति यावत् । मृत्योरात्मानं परिहराणीति। सर्वेषां स्पर्शानां मृत्यवात्मकत्वात् स्पर्शानां तेषां दोषेभ्यः परिहृत्योच्चारणे मृत्योरात्मैव दोषेभ्यः परिहृतो भवतीति भावः ॥ २—२२.

1. नेदं विवरणं घ. कोशे । 2. विवृता इत्यत्र विवृत्ता इति सर्वत्र ख. कोशे ।

प्रतिपेक्ष्यति प्रतिधक्ष्यतीति प्रतिशब्दः प्रतिकारार्थः । उपालम्भप्रतिकारभूतं पेषणं दाहश्च करिष्यतीति । प्रतिवक्ष्यतीत्यत्राप्येतदर्थ उचितः । वक्ष्यतीति च वहनं प्रापणं वा वचनमेव वाऽस्तु ।

अनभिनिहिताः । अनभिनिक्षिप्ता इति शाङ्करम् । तेनानतिद्रुतोच्चारणं विवक्षितमित्यानन्दगिर्युक्तत्वात् तल्लाभौचित्याय नीत्युपसर्गं परित्यज्य अननिक्षिप्ता इति व्याख्यातम् । लेशो लाघवमिति न्यायभाष्यम् । लेशेन वक्तव्या इत्यस्य विवरणम् अनभिनिक्षिप्ता इतीत्यङ्गीकारे ऊष्मोच्चारणकाले तत्स्थानोपमर्दं विना अनायासेन लाघवेन प्रयोगोऽभिमतः स्यात् ।

२—२३.

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमः, तप एव द्वितीयः, ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्। सर्व एते पुण्यलोका भवन्ति; ब्रह्मसँस्थोऽमृतत्वमेति ॥ १ ॥

ओङ्कारेण ब्रह्मोपासनं विधातुं प्रस्तौति–**त्रयो धर्मस्कन्धाः**। **धर्मस्कन्धाः** धर्मसाधकमार्गाः। आश्रमरूपमार्गाः त्रय इत्यर्थः। **यज्ञो—प्रथमः**। यज्ञाध्ययनदानशब्दैः गृहस्थाश्रमः [प्रथम] उच्यते। **अध्ययन**शब्दो वेदाभ्यासपरः। **तप एव द्वितीयः**। **तप**श्शब्देन वैखानसपारिव्राज्ययोर्ग्रहणम्। उभयोस्तपःप्रधानत्वात्। **तप**श्शब्दो हि कायक्लेशे रूढः। स च द्वयोरपि समानः। ब्रह्मचारी आचार्यकुलवासी, **तृतीयोऽत्यन्त—सादयन्**–अत्यन्तमाचार्यकुले नियमैर्देहं क्षपयन् तृतीय आश्रम[1] इत्यर्थः। **सर्व एते — एति**। एवं त्रित्वेन संगृहीतानां चतुर्णामाश्रमाणां मध्ये यो **ब्रह्मसंस्थः** ब्रह्मनिष्ठः, स मुक्तिभाग् भवति; ब्रह्मनिष्ठाविकलाः केवलाश्रमिणः पुण्यलोकभाजो भवन्तीत्यर्थः। एवमेव हि, "अनुष्ठेयं बादरायणः साम्यश्रुतेः" इत्यत्र भाषितम्। न चात्र ब्रह्मसंस्थशब्दात् संन्यासाश्रमप्रतिपत्तिरिति शक्यं[2] वक्तुम्–ब्रह्मसंस्थशब्दस्य प्रोक्षणीन्यायेन योगेनैव वृत्त्युपपत्तौ संन्यासे रूढेरनभ्युपगन्तव्यत्वात्। योगमात्रस्य चाश्रमान्तरसाधारण्यात् न[3] ब्रह्मसंस्थ-

1. तृतीयाश्रमः ख. 2. शङ्कयम् ख. 3. न हि क.

वेदाभ्यासः। **अध्ययनं** धारणाध्ययनम्। ग्रहणाध्ययनस्य प्रागेव निर्वृत्तत्वादिति अभ्यासपदेनाऽऽवृत्तिपरेण तद्विवरणम्। **ब्रह्मचारी**त्यादि। यावज्जीवाचार्यकुलवासादिविशिष्टब्रह्मचर्यमिति यावत्। उपक्रमस्थस्कन्धादिपदानां पुरुषपर्यन्तपरत्वस्यास्वरसत्वात्। **कुलं** गृहम्। **वासी**ति ताच्छील्ये णिनिः। कारणान्तरप्रयुक्तवासपरिहाराय, आचार्याभावेऽपि तत्संततिपरिचर्याज्ञप्तये च तद्विवरण**मत्यन्त**मित्यादि। अत्र प्रथमो द्वितीयस्तृतीय इति उक्तिक्रममनुरुध्य। न त्वाश्रमक्रमम्। पूर्वं गृहस्थकर्तव्ययज्ञान्तर्गतसामाश्रितोपासनानामेव प्रस्तुतत्वात् प्रथमं तदाश्रमकथनम्। ततस्तेनापि लभ्यस्य तदुत्तरस्य वानप्रस्थादेः; अथ शिष्टस्य। ननु उपकुर्वाणब्रह्मचर्यं कुतो नोक्तम्? यावज्जीवसंभाविताश्रममात्रकथनस्याभिमतत्वात्। अत्रेदं श्रुतिविवक्षितम्। उक्तनानोपासननिष्ठगृहस्थो वा तदुत्तराश्रमी वा नैष्ठिको वा यावज्जीवमेवं सन् पुण्यलोकमेव कमपि प्राप्नुयात्; नामृतत्वम्, यदि ब्रह्मसंस्थो न भवेदिति।

भाषितमिति। तदिदं प्राचीनवृत्तिकारवर्णितमेव। शाङ्करे तु यत् एतद्दूषणेनार्थान्तरवर्णनम्। तत्र मुख्यांशं दूषयति **न चे**त्यादिना।

प्रजापतिर्लोकानभ्यतपत्। तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्। तामभ्यतपत्। तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त, भूर्भुवस्सुवरिति। तान्यभ्यतपत्। तेभ्योऽभितप्तेभ्य ओङ्कारः संप्रास्रवत्। तद् यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि, एवमोङ्कारेण सर्वा वाक् संतृण्णा। ओङ्कार एवेदँ सर्वम् ओङ्कार एवेदँ सर्वम्॥ ३॥

इति द्वितीयाध्याये त्रयोविंशः खण्डः

शब्देन संन्यासाश्रमग्रहणे प्रमाणं पश्यामः। न च संपूर्वस्य तिष्ठतेः समाप्तिवाचकत्वात् अनन्यव्यापारत्वलक्षणाया[1] ब्रह्मणि समाप्तेः संन्यासिष्विवाग्निहोत्रादिकर्मान्तरव्याग्राश्रमान्तरेष्वसंभवात् ब्रह्मसंस्थशब्देन परिव्राडेवोच्यत इति वाच्यम्—स्वाश्रमोचितधर्मव्यग्रतायाः संन्यासिष्वप्यविशिष्टत्वात्। तदतिरिक्तव्यापारराहित्यस्य सर्वाश्रमेष्वपि संभवात् न[2] **ब्रह्मसंस्थशब्देन** चतुर्थाश्रमपरामर्शे[3] हेतुं पश्यामः।

एवं **ब्रह्मसंस्थोऽमृतत्वमेती**त्यमृतत्वसाधनं ब्रह्मोपासनमुक्त्वा तत् प्रणवाङ्गकमिति वक्तुं प्रणवं [4]स्तौति—**प्रजापतिर्लोकानाभ्यतपत्।** अभ्यतपत् सारनिष्कर्षाय लोकान् पर्यालोचयदित्यर्थः। [[5]तप आलोचने।] **तेभ्यो—प्रास्रवत्।** त्रयी विद्या **संप्रास्रवत्** सारत्वेन निष्पन्नाऽभवदित्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। **तां** त्रयीविद्यामित्यर्थः। **तद्यथा—सर्वम्।** यथा सर्वाणि पत्रजातानि शङ्कुना पर्णनालेन **संतृण्णानि** व्याप्तानि भवन्ति, एवम्, 'ओङ्कारो वै सर्वा वाक्' इति श्रुतेः ओङ्कारेण सर्वा वाग् व्याप्ता। अत ओङ्कार एव सर्वं वाङ्मयम्। अत ओङ्कारेण ब्रह्मोपासनं कर्तव्यमिति पर्यवसितोऽर्थः। द्विरुक्तिर्विद्यासमाप्त्यर्था॥ २—२३.

1 व्यापारलक्षणया क. 2. न च क. 3. परामर्शहेतुं ख. 4. प्रस्तौति क. 5. इदं क. कोशे।

ननु तर्हि ब्रह्मसंस्थितौ किमुपादेयम्। उच्यते, न किञ्चिदन्वेषणीयमस्ति। उक्तोपासनाश्रयतया प्रथमप्रस्तुतं ओमित्येतदक्षरमेवोपादेयं सर्वमित्याह **प्रजापतिरिति। तेभ्योऽभितप्तेभ्यस्त्रयी**ति। एतल्लोकाधिष्ठानदेवताभ्योऽग्निवाय्वादित्येभ्य एतदाविर्भावः 'अग्नेः ऋग्वेद' इत्यादौ, ४—१७. च श्रूयते। एवमत एव ऋगादेः पृथिव्यादिप्रापकत्वमपि। **वाङ्मयमिति।** ओङ्कारस्य परम्परया लोकसंप्रस्तुतत्वात् लोका अप्योङ्कार एव।

२—२४.

ब्रह्मवादिनो वदन्ति — , यद् वसूनां प्रातस्सवनँ रुद्राणां माध्यन्दिनँ सवनमादित्यानाञ्च[1] विश्वेषाञ्च देवानां तृतीयसवनम् ॥ १ ॥ ; क तर्हि यजमानस्य लोक इति ।

स — यस्तन्न विद्यात् — कथं कुर्यात्? अथ विद्वान् कुर्यात् ॥ २ ॥

पुरा प्रातरनुवाकस्योपाकरणात्, जघनेन गार्हपत्यस्योदङ्मुख उप-

1. आदित्यानां विश्वेषां देवानाञ्च **मा.**

प्रसङ्गात् कर्माङ्गानि कानिचिद् विधातुं प्रस्तौति — **ब्रह्मवादिनो — लोक इति ।**[1] प्रातस्सवनमाध्यन्दिनसवनतृतीयसवनैश्वरैः वसुरुद्रादित्यविश्व[2]देवैः [3]पृथिव्यन्तरिक्षस्वर्लोकानां वशीकृततया अवशिष्टस्य लोकस्याभावात् यजमानस्य लोकः कास्तीति वेदितव्यमित्यर्थः ।

स यस्तन्न विद्यात् कथं कुर्यात् । यस्य यजमानप्राप्यलोकस्थानज्ञानं नास्ति, सोऽज्ञः कथं कर्म[4] कुर्यात् । **अथ विद्वान् कुर्यात् ।** तस्मात् लोकस्वीकरणोपायभूतं वक्ष्यमाणं सामगान—होम—मन्त्रोत्थानलक्षणं ज्ञात्वैव कुर्यादित्यर्थः ।

तदेवाह — **पुरा प्रातः — । प्रातरनुवाकस्योपाकरणात् पुरा** प्रातरनुवाकारम्भात् प्राक् गार्हपत्यस्य **जघनेन** पश्चात् उदङ्मुख उपविश्य **वासवं वसुदे-**

1. अत्र मध्ये, '**ब्रह्मवादिनो** वेदवेत्तार इत्यर्थ । ते किं वदन्तीत्यत्राह यद्वसूनां प्रातस्सवनमित्यादि' इत्यधिकं **ख. कोशे** । एवं पाठे वेत्तारइत्यत्र वेदितारइति वा वक्तारइत्येवं वा स्यात् । 2. अयं **ग.** पाठः । अन्यत्र विश्वेदेवैरिति । 3. अत्र 'तत्सवनफलभूताः पृथिव्यन्तरिक्षस्वर्लोका वशीकृता इत्यर्थः । क तर्हि—। एवं त्रैलोकानां वशीकृततयाऽवशिष्टस्य लोकस्य यजमानप्राप्यस्याभावात्' इति **ख.** 4. कर्मेति **ख.** कोशे ।

प्रसङ्गादिति । पुण्यलोकप्रसङ्गात् लोकत्रयाविर्भूतप्रणवप्रसङ्गाच्च लोकत्रयरूपयजमानफलोपस्थितेरिति भावः । **तन्न विद्यादित्यत्र तमिति** विभज्य लोकस्वीकारोपायमिति व्याख्यातं शाङ्करे । **कर्मेति** जिज्ञासितस्थानपरत्वं युक्तमिति अत्राभिमतम् । तथाच **तदिति**च्छेदः । **अथ विद्वानिति** । सामगानं होमः मन्त्रपूर्वकमुत्थानमिति त्रयं वक्ष्यमाणं विदुषः स्थानवेदनमपि सम्यक् सिध्यतीति भावः । वक्ष्यते च **सवनं संप्रयच्छन्ती**ति स्थानमपि । **प्रातरनुवाकः** तन्नामकं शस्त्रम् । अप्रतीतमन्त्रसाध्यगुणि निष्ठगुणाभिधानं शस्त्रम् । सामगाने मन्त्रानुपूर्व्यास्ति-

विश्य स वासवँ सामाभिगायति (३)—:[1] **'लोकद्वारमपावार्णू २ ३ ३ पश्येम त्वा वयँ रा ३ ३ ३ ३ ऽ ३ हुं ३ आ २ ३ ३ जा ३ यो ३ आ १ २ ४ ५' इति ॥ ४ ॥ अथ जुहोति, 'नमोऽग्नये पृथिवीक्षिते लोकक्षिते। लोकं मे यजमानाय विन्द। एष वै यजमानस्य लोकः। एतास्मि ॥ ५ ॥ अत्र यजमानः परस्तादायुषः। स्वाहा'। 'अपजहि परिघम्' इत्युक्त्वोत्तिष्ठति। तस्मै वसवः प्रातस्सवनँ संप्रयच्छन्ति ॥ ६ ॥**

पुरा माध्यन्दिनस्य सवनस्योपाकरणात्, जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रं सामाभिगायति (७)—: 'लोकद्वारमपावार्णू २ ३ ३ पश्येम त्वा वयं विरा ३ ३ ३ ३ हुं आ ३ ३ जा (ज्या) यो आ ३

1. एषां साम्नां स्वरनिवेशरीतिः प्रतिकोशं भिन्ना दृश्यते।

वत्यं साम **सः** विद्वान् गायेदित्यर्थः। तदेव सामाह — **लोकद्वारमपावृणु पश्येम त्वा वयं राज्यायेति**। हे अग्ने! पृथिवीलोकप्राप्तये द्वारमपावृणु। तेनापावृतेन द्वारेण त्वां **राज्याय** [1]पृथिवीलोकप्राप्तिफलाय पश्येमेत्यर्थः। **अथ जुहोति**। अथ अनन्तरं अनेन [वक्ष्यमाणेन] मन्त्रेण जुहोतीत्यर्थः। होममन्त्रमेवाह **नमोऽग्नये-**। **पृथिवीक्षिते** पृथिवीनिवासाय, **लोकक्षिते** लोकनिवासाय अग्नये नमः। **मे** मह्यं यजमानाय लोकं **विन्द** लम्भय[2]। एष वै मम यजमानस्य लोकः। **यजमानोऽहमत्र** अस्मिन् लोके **आयुषः परस्तात्** मरणादूर्ध्वम् **एतास्मि** आगन्तास्मि। **स्वाहेति** जुहोतीत्यर्थः। **अपजहि — उत्तिष्ठति**। एवं हुत्वा अनन्तरं **परिघं** लोकद्वारार्गलम् **अपजहि** अपनय **इति** एतं मन्त्रम् उक्त्वोत्तिष्ठतीत्यर्थः। **तस्मै—यच्छन्ति**। एवं सामगान-होम-मन्त्रोत्थानकृते यजमानाय वसवः प्रातःसवनसंबन्धिलोकं पृथिवीलोकं प्रयच्छन्तीत्यर्थः। [3]एवमग्रेऽपि द्रष्टव्यम्।

आग्नीध्रीयस्य अग्नेरित्यर्थः। **रौद्रं** रुद्रदेवताकमित्यर्थः। **वैराज्याय** अन्तरिलोकफलप्राप्तय इत्यर्थः। **अथ** —। अथ 'नमो वायवे —' इति मन्त्रेण

1. फलायेति **क** पर्यालम्भायेति **घ**. 2. लम्भयस्व, **ख**. 3 नेदं **ख**. कोशादन्यत्र।

रोहितत्वात् आनुपूर्वीं दर्शयति **लोक—वृणु—राज्यायेति**। उत्तरसाममन्त्रत्रये **वैराज्याय, स्वाराज्याय, साम्राज्यायेति** भेदः। **एतास्मीत्यारभ्य आयुष** इत्यन्तमेकं वाक्यम्। **अत्रेति आयुष** इत्यनेनान्वेति। यद्वा **अत्र यजमानः** अत्र यागं कुर्वन्नहमित्यर्थः। **आग्नी-**

३ ३ ४ ५' इति ॥ ८ ॥ अथ जुहोति, 'नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते । लोकं मे यजमानाय विन्द । एष वै यजमानस्य लोकः । एतास्मि ॥ ९ ॥ अत्र यजमानः परस्तादायुषः । स्वाहा' । 'अपजहि परिघम्' इत्युक्त्वोत्तिष्ठति । तस्मै रुद्रा माध्यन्दिनँ सवनँ संप्रयच्छन्ति ॥ १० ॥

पुरा तृतीयसवनस्योपाकरणात्, जघनेनाहवनीयस्योदङ्मुख उपविश्य स आदित्यँ स वैश्वदेवँ सामाभिगायति (११)—: 'लोकद्वारमपावार्णू २ ३ ३ पश्येम त्वा वयँ स्वरा ३ ३ ३ ३ हुं आ २ ३ ३ जा ३ यो ३ आ ३ ४ ५' इत्यादित्यम् ॥ १२ ॥; अथ वैश्वदेवम् – 'लोकद्वारमपावार्णू २ ३ ३ पश्येम त्वा वयँ साम्रा ३ ३ ३ ३ हु ३ म् आ २ ३ ३ जा (ज्या) यो ३ आ ३ १ १ १' इति ॥ १३ ॥ अथ जुहोति, 'नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यः । लोकं मे यजमानाय विन्दत ॥ १४ ॥ एष वै यजमानस्य लोकः । एतास्मित्र यजमानः परस्तादायुषः । स्वाहा' । 'अपहत परिघम्' इत्युक्त्वोत्तिष्ठति ॥ १५ ॥ तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवनँ संप्रयच्छन्ति ॥

जुहोतीत्यर्थः । **अन्तरिक्षक्षिते** अन्तरिक्षनिवासायेत्यादि पूर्ववदुन्नेयम्[1] । **माध्यन्दिनं सवनं** माध्यन्दिनसवनसंबन्धिलोकम् ।

आहवनीयस्य अग्नेरित्यर्थः । **आदित्यमादित्यदेवत्यम्** । **वैश्वदेवं** विश्वदेवदेवत्यमित्यर्थः । तत्रादित्यं सामाह **लोकद्वार**—। **स्वाराज्याय** स्वर्गलोकायेत्यर्थः । **इत्यादित्यम्** । साम उक्तमिति शेषः । **अथ वैश्वदेवम्** । सामोच्यत इति शेषः । **साम्राज्याय** उत्तमस्वर्गफलायेत्यर्थः । **अथ जुहोति** —। सर्वं पूर्ववद् द्रष्टव्यम् । आदित्यानां विश्वदेवानाञ्च बहुत्वात् **विन्दत अपहत** इति बहुवचनम् । **तृतीयसवनं** तत्फलं स्वर्गमित्यर्थः ।

1. उन्नेयमिति ग. पाठः । नेयमिति ख.

एष ह वै यज्ञस्य मात्रां वेद, य एवं वेद य एवं वेद ॥ १६ ॥

इति द्वितीयाध्याये चतुर्विंशः खण्डः

इति छान्दोग्योपनिषदि द्वितीयोऽध्यायः (द्वितीयः प्रपाठकः) ।

अथ तृतीयोऽध्यायः ३-१.

असौ वा आदित्यो देवमधु । तस्य द्यौरेव तिरश्चीनवँशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥ १ ॥

एष ह वै यज्ञस्य मात्रां वेद । मात्रां = [1]परिमाणं याथात्म्यमित्यर्थः । **य एवं वेद** । य एवं कर्तुं वेदेत्यर्थः । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ २-२४.

इति छान्दोग्योपनिषत्प्रकाशिकायां द्वितीयोऽध्यायः (द्वितीयः प्रपाठकः) ।

मधुविद्या प्रस्तूयते--**असौ वा आदित्यो देवमधु** । असावादित्यो वस्वादीनां देवाना[2]मामोदहेतुत्वात् मधु । अत्र मधुत्वदृष्टिः कर्तव्येत्यर्थः । मधुत्वोपयोगीनि संपादयति—**तस्य द्यौरेव तिरश्चीनवंशः** । **तस्य** आदित्याख्यमधुनो द्युलोक एव आधारभूतस्तिर्यक्प्रस्तारितो[3] वंश इत्यर्थः । **अन्तरिक्षमपूपः** अन्तरिक्षं मध्वपूपः । मध्वाश्रयोऽपूपो हि तिरश्चीनवंशलग्नस्सन् लम्बते । एवमन्तरिक्षमपि द्युलोकलग्नं लम्बते इव [4]भातीत्यतो मध्वपूपत्वम् । **मरीचयः पुत्राः** । मरीचिशब्देन मरीचिस्थाः सवित्राकृष्टाः भौम्य आप उच्यन्ते । ताः पुत्रा इव पुत्राः भ्रमरबीजभूताः मध्वपूपच्छिद्रस्थाः [5]सूक्ष्मकीटा इत्यर्थः ।

1. परिमाणमित्यधिकं क. कोशे । 2. देवानां मोद ख. 3. प्रसारितोमश्चवंशः घ. 4. भाति । अतो क. 5. सूक्ष्माः कीटाः ख.

धीयोऽग्निः दक्षिणाग्निः । **य एवं वेदे**ति नोपासनविशेषविधिरिति ज्ञापयितुं **कर्तुं वेदे**ति व्याख्यानम् ॥

वसुरुद्रादित्यानुग्रहलभ्यलोकत्रयवर्णनं प्रस्तुत्य वसुरुद्रादित्यादिरूपतापत्तिपूर्वकानुभाव्यफलार्था मुक्तिविद्या समनन्तरमुपदिश्यते । आदित्यस्य मधुत्वं रसाश्रयत्वात् । मधुरसाश्च पुष्पेभ्यो भ्रमरैः समाह्रियन्ते । तथेह समाहारो वक्ष्यते । तत्र, 'असौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपति-

तस्य ये प्राञ्चो रश्मयः, ता एवास्य प्राच्यो मधुनाड्यः, ऋच एव मधुकृतः; ऋग्वेद एव पुष्पम्; ता अमृता आपः ॥ २ ॥

तस्य—। **तस्य** आदित्यस्य ये प्राञ्चो रश्मयः, ता एव प्राग्दिगवच्छिन्ना **मधुनाड्यः** मधुच्छिद्राणि । **ऋच एव मधुकृतः** । ऋङ्मन्त्रा एव भ्रमराः । **ऋग्वेद एव पुष्पम्** ऋग्वेदविहितं कर्म पुष्पस्थानीयम् । [[1]अस्मिन् पुष्पस्थानीये ऋग्वेदविहिते कर्मणि मधुकरस्थानीयैः ऋङ्मन्त्रैराकृष्य मधुत्वेन निर्वर्त्यमानो रसः क इत्यत्राह—] **ता अमृता आपः** । ताः कर्मणि प्रयुक्तसोमाज्यपयोरूपा आपः अग्नौ प्रक्षिप्ताः पाकाभिनिर्वृत्ता अमृता अत्यन्तरसवत्यो भवन्तीत्यर्थः ।

1. अयं कुण्डलितः ख. पाठः ।

ष्ठते' इत्युक्तरीत्या अनुष्ठाने सत्येव आदित्ये रसप्राप्तिः, रसवद्भ्यः कर्मभ्य एव रसानामादेयत्वात्, न तु रसप्रतिपादकत्वेऽपि रससंबन्धरहितात् वेदमात्रादिति ऋग्वेदादीनां पुष्पत्वोक्तिः तत्तद्वेदविहितकर्मणां पुष्पत्वाभिप्राया। व्यक्तमिदं श्रीभाष्ये, 'मधुविद्यायामृग्वेदादिप्रतिपाद्यकर्मनिष्पाद्यस्य रश्मिद्वारेण प्राप्तस्य रसस्याश्रयतया लब्धमधुव्यपदेशस्यादित्यस्य' इति । ऋगादिमन्त्रान् विहाय कर्मानुष्ठाने च न रसस्यादित्यप्राप्तिः । अत एव 'प्रास्ताहुतिः सम्यक्' इति **सम्यक्**पदप्रयोगः । अतो मन्त्रा भ्रमराः । तत्र ऋग्यजुस्साममन्त्रभ्रमरचूष्यमाणानि पुष्पाणि ऋग्यजुस्सामवेदाः । अथर्वाङ्गिरोदृष्टमन्त्ररूपभ्रमरविषये तु इतिहासपुराणं पुष्पमुक्तम् । तच्च प्रसिद्धेतिहासपुराणवत् इतिहासादिप्रधानकाथर्ववेदब्राह्मणमपीति ग्राह्यम् । पञ्चमास्तु गुह्यादेशाः । तत्रोक्तं ब्रह्माख्यं पुष्पञ्च किमिति विचारे ब्रह्म प्रणव इति शाङ्करम् । तत्र प्रणवपूर्वककर्मनिष्पाद्याः पूर्वोक्ताः सा अपीति विशेषाभावात् ब्रह्मशब्देन, परेण ब्रह्मणा व्यूढविभवावतारेषु स्वप्राप्यवस्थायाञ्च विशेषेणोपदिष्टपाञ्चरात्रादितन्मूलभूतैकायनाद्यनन्तवेदात्मकशब्दब्रह्मग्रहणं युक्तमिति तदुपदिष्टानि तदाराधनकर्माणि पुष्पाणि । तत्तदुपयुज्यमाना विशेषमन्त्रा वैदिकाः तान्त्रिकाश्च गुह्यादेशा इति युक्तम् । अस्तु वा ऋग्वेदाद्यन्तर्गतब्रह्मपरोपनिषद्भागानामपि ब्रह्मपदविवक्षितत्वम् । एवम्भूतपञ्चविधामृतरसाश्रयमधु असावादित्य इति भावयित्वा तत्रैकैकामृतं वस्वादितत्तदेकैकदेवगणभुज्यमानं भावयेत् । तत्रैकैकामृतविषयेऽपि, 'य एवमेतदमृतं वेदे'ति पृथक्पृथक् विदिविधिश्रवणात् वस्वाद्यैकैकदेवगणभुज्यमानैकैकामृतमात्रोपासनमेकैव फलोद्देशेन पृथक्पृथक् कर्तुं शक्यमिति वा मन्यताम्; सर्वोपासनसमाहारमेव स्वीकृत्य प्रत्येकविदिश्रवणं तत्कतुन्यायेन तस्य तस्य तत्तत् फलमिति ज्ञापनार्थमिति वा निरूप्यताम् । अवशिष्टमुपरिष्टात् ।

मरीचयः । जलाकर्षणकारित्वावस्थाभाजः किरणाः मरीचिपदव्यपदेश्याः । **अमृताः** । यज्ञोपयुक्तं हविरप्यमृतपदार्थः ।

ता वा एता ऋच एतमृग्वेदमभ्यनपन्; तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यँ रसोऽजायत ॥ ३ ॥

तद् व्यक्षरत् । तदादित्यमभितोऽश्रयत् । तद्वा एतत्, यदेतदादित्यस्य रोहितँ रूपम् ॥ ४ ॥ इति तृतीयाध्याये प्रथमः खण्डः

३—२.

अथ येऽस्य दक्षिणा रश्मयः, ता एवास्य दक्षिणा मधुनाड्यः; यजूँष्येव मधुकृतः; यजुर्वेद एव पुष्पम्; ता अमृता आपः ॥ १ ॥

तानि वा एतानि यजूँषि एतं यजुर्वेदमभ्यतपन्; तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यँ रसोऽजायत ॥ २ ॥

तद् व्यक्षरत् । तदादित्यमभितोऽश्रयत् । तद्वा एतद्, यदेतदादित्यस्य शुक्लँ रूपम् ॥ ३ ॥ इति तृतीयाध्याये द्वितीयः खण्डः

ता वा एता ऋच एतमृग्वेदमभ्यतपन्। ता वा एता ऋचः ऋङ्मन्त्राः भ्रमरस्थानीयाः, पुष्पेभ्यो रसमाददाना भ्रमरा इव, एतद्ऋग्वेदविहितं कर्म पुष्पस्थानीयमभ्यतपन् अभितापं कृतवत्य[1] इव। **तस्य---अजायत।** यशस्तेजइन्द्रियवीर्यान्नाद्यलक्षणो रसोऽजायतेत्यर्थः। ऋग्भिर्मन्त्रैः स्तोत्रशस्त्राद्यङ्गभावमुपगतैः क्रियमाणं कर्म मधुनिर्वर्तकं सोमाज्यादिरसं मुञ्चति, पुष्पमिव भ्रमरैराचूष्यमाणम्[2]। तेन च यशस्तेजइन्द्रियपाटववीर्यादिलक्षणं फलमुत्पन्नं भवतीत्यर्थः।

तद् व्यक्षरत्। तत् यशआदिलक्षणं फलं **व्यक्षरत्** विशेषेणागमत्। **तदादित्यमभितोऽश्रयत्।** गत्वा चादित्यमभितः आश्रितवदित्यर्थः। **तद्—रूपम्।** आदित्ये प्रत्यक्षतः परिदृश्यमानं यद् रोहितरूपम्, तत् कर्मनिर्वर्त्ययशस्तेजआदिलक्षणफलरूपमित्यर्थः। रोहितरूपे तद्बुद्धिः कर्तव्येति यावत्॥ ३—१.

1. कृतवन्तः क. 2. आचोष्यमाणम् ख. आचरिष्यमाणं घ

अभ्यतपन्। भ्रमरैराचूषणतापेन हि पुष्पं पारिपाच्य रसो निष्कास्यते। अत्राप्यग्नौ करणादितस्तापः। पुष्पगतद्रवांशस्य रसतापत्तिरिव कर्मोपयुक्तहविर्भागानां यशआदिरूपेण विवर्तः। **क्षरणं** स्यन्दनम्। **अभित** इति। अस्य सर्वत इत्यर्थे सत्यपि प्राग्रश्मिरूपमधुनाडीनिष्पन्नस्य मधुनः प्राग्भागवर्तित्वं युक्तम्, एवं मध्यन्तरस्य पार्श्वान्तरे इत्याकल्प्येव शाङ्करे **अभितः** पार्श्वतः, पूर्वभागं सवितुरिति व्याख्यातम्।

३—३.

अथ येऽस्य प्रत्यञ्चो रश्मयः, ता एवास्य प्रतीच्यो मधुनाड्यः; सामान्येव मधुकृतः; सामवेद एव पुष्पम्; ता अमृता आपः ॥ १ ॥

तानि वा एतानि सामानि एतँ सामवेदमभ्यतपन्; तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत ॥ २ ॥

तद् व्यक्षरत्; तदादित्यमभितोऽश्रयत्; तद्वा एतत्, यदेतदादित्यस्य कृष्णँ रूपम् ॥ ३ ॥

इति तृतीयाध्याये तृतीयः खण्डः

३—४.

अथ येऽस्योदञ्चो रश्मयः, ता एवास्योदीच्यो मधुनाड्यः; अथर्वाङ्गिरस एव मधुकृतः; इतिहासपुराणं पुष्पम्; ता अमृता आपः ॥ १ ॥

ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपन्; तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यँ रसोऽजायत ॥ २ ॥

तद् व्यक्षरत्; तदादित्यमभितोऽश्रयत्; तद् वा एतत्, यदेतदादित्यस्य परःकृष्णँ रूपम् ॥ ३ ॥

इति तृतीयाध्याये चतुर्थः खण्डः

अथ येऽस्य — [1]अथर्वाङ्गिरस एव मधुकृतः। अथर्वणा अङ्गिरसा च दृष्टा मन्त्राः अथर्वाङ्गिरसः। इतिहासपुराणं पुष्पम्। इतिहासपुराणविहितकर्मसु अथर्वाङ्गिरसां मन्त्राणां विनियोगात् ऋग्वेदादिवत् पुष्पत्वोक्ति[2]रिति द्रष्टव्यम्। तद्वा—परःकृष्णं रूपम्। परःकृष्णं रूपम् अतिशयित[3]कृष्णरूपमित्यर्थः[4]। ३-४.

1. अत्र ख. कोशे, 'अथ येऽस्य दक्षिणारश्मय इत्यादि। सर्वं पूर्ववन्नेयम्। अथ येस्य प्रत्यञ्चो रश्मय इत्यादि। पूर्ववदेव' इत्यधिकम्। 2. पुष्पत्वोक्तिस्तेषामिति ख. पुष्पत्वोक्तिश्चेति ग. 3. अतिशयितं ख. ग. 4. अत्र, 'अन्यत् सर्वं पूर्ववन्नेयम् इति ख.

३—५.

अथ येऽस्योर्ध्वा रश्मयः, ता एवास्योर्ध्वा मधुनाड्यः, गुह्या एवादेशा मधुकृतः, ब्रह्मैव पुष्पम्; ता अमृता आपः ॥ १ ॥

ते वा एते गुह्या आदेशा एतद् ब्रह्माभ्यतपन्; तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत ॥ २ ॥

तद् व्यक्षरत्; तदादित्यमभितोऽश्रयत्; तद्वा एतद्, यदेतदादित्यस्य मध्येक्षोभत इव ॥ ३ ॥

ते वा एते रसानाँ रसाः; वेदा हि रसाः; तेषामेते रसाः; तानि वा एतान्यमृतानाममृतानि; वेदा ह्यमृताः; तेषामेतान्यमृतानि ॥ ४ ॥

इति तृतीयाध्याये पञ्चमः खण्डः

अथ—गुह्या एवादेशाः—। ब्रह्मविषयकोपनिषद्रहस्योपदेशा इत्यर्थः। **—आदित्यस्य मध्ये क्षोभत इव।** समाहितदृष्टिभिर्वीक्ष्यमाणमादित्यमण्डलमध्ये चलतीव स्फुरतीत्यर्थः ॥

ते वा—अमृतानि। लोकसारभूतत्वेदादिप्रतिपाद्यकर्मनिष्पाद्यत्वात् रोहितादिरूपाणामतिरसत्वम्। तथा[1] इष्टतत्साधनप्रतिपादकतया अमृतेभ्यो वेदेभ्योऽपि रोहितादिरूपाणां तत्प्रतिपाद्यकर्मनिष्पाद्यानामतिभोग्यत्वात् अमृतादप्यमृतत्वमित्यर्थः।

अयमत्र निर्गलितार्थः—प्रागाद्यूर्ध्वदेशान्त[2]स्थितरश्मिनाडीतः तत्तद्वेदोक्तकर्मवसुमेभ्यः तत्तद्वैदिकमन्त्रमधुकरैरादित्यमण्डलमानीतानि सोमाज्यपयःप्रभृतिद्रव्यनिष्पन्नानि यशस्तेजो वीर्यमिन्द्रियमित्येवमात्मकानि रोहितं शुक्लं कृष्णं परःकृष्णं मध्येक्षोभत इवेत्युक्तानि रोहितादीनि पञ्चामृतानि आदित्य[3]मध्याश्रितानीति ॥ ३-५.

एषां पञ्चानाममृतानां वसुरुद्रादित्यमरुत्साध्यगणभोग्यत्वम्, [उक्तेन प्रकारेण] तदुपासीनानां वसुत्वादिप्राप्तिपूर्वकब्रह्मप्राप्तिञ्च प्रतिपादयति—

1. वेदेभ्योपीति पदमत्र ख. ग. 2. देशान्तर, ख. 3. त्यमध्या ख

३—६.

तद् यत् प्रथममृतम्, तद् वसव उपजीवन्त्यग्निना मुखेन; न वै देवा अश्नन्ति, न पिबन्ति; एतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥; त एतदेव रूपमभिसंविशन्ति; एतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद, वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति; स एतदेव रूपमभिसंविशति; एतस्माद्रूपादुदेति ॥ ३ ॥

तद् यत् प्रथममृतम्। तद् **वसव उपजीवन्त्यग्निना मुखेन।** अग्निमुखा[1] वसवो रोहितरूपलक्षणं प्रथममृतमुपजीवन्तीत्यर्थः। उपजीवनं भक्षणमिति शङ्कां प्रतिषेधति **न वै देवा अश्नन्ति, न पिबन्ति।** चन्द्रमिवेति भावः। पुनः कथमुपजीवनमित्यत्राह **एतदेवामृतं दृष्ट्वा तृप्यन्ति।** यशस्तेजआदिलक्षणं रोहितं रूपं सर्वैः करणैरुपलभ्य तृप्यन्तीत्यर्थः। **त—विशन्ति।** एतदेव रूपमभिलक्ष्य —अनुभूयेति यावत्—**संविशन्ति** भोगानन्तर[2]मुदासीना भवन्तीत्यर्थः। **एतस्माद् रूपादुद्यन्ति।** प्राप्ते भोगकाले इति शेषः। **एतस्माद्रूपादिति** ल्यब्लोपे पञ्चमी। एतद्रूपानुभवमुद्दिश्य **उद्यन्ति** सोत्साहा भवन्तीत्यर्थः।

स य एतदेवममृतं वेद। **एवम्** अनेन प्रकारेण = वसुतृप्त्याधायकदर्शनगोचरत्वलक्षणवसूपजीव्यत्वादिना रोहितामृतं यो वेदेत्यर्थः। **वसूनामेव—रूपादुदेति।** तत्कतुन्यायेन **सः** तदुपासीनोऽपि वसुत्वं प्राप्य तथैव भवतीत्यर्थः। कियन्तं कालमित्यत्राह—**स याव——पर्येता।** आदित्यस्य प्राच्यां दिश्युदयः प्रतीच्यामस्तमयश्च यावन्तं कालमनुवर्तते, तावन्तं कालं वसूनां यत् आधिपत्यं यत् अप्रतिहतसंकल्पत्वलक्षणं स्वाराज्यञ्च, तत् **पर्येता** परितो गन्तेत्यर्थः। ३-६.

1. अग्निं पुरस्कृत्य क. 2 तृप्ता आसीना भवन्ति क.

चन्द्रमिवेति। एष सोमोराजा (५—१०) इत्युक्तरीत्या चन्द्रभावं प्राप्तं जीवमिवेत्यर्थः। यद्वा देवानां चन्द्रकलापातृत्वमप्यौपचारिकमित्याशयेन एवमुक्तम्।

सर्वैः करणैरुपलभ्येति। गुणवत्ताप्रथारूपशब्दादिनानारूपयशआदिफलानां चक्षुर्मात्रदृश्यत्वायोगात् यथायथं करणग्रहणाय दृष्ट्वेत्यस्यैवं व्याख्यानम्। दृष्ट्वा तृप्त्यनन्तरमभिसंवेश औदासीन्यं पुनरनुभवोपयोगिसात्मीकरणाय। वक्ष्यमाणो वाऽत्र हेतुः।

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता, वसुनामेव तावदाधिपत्यँ स्वाराज्यं पर्येता ॥ ४ ॥ इति तृतीयाध्याये षष्ठः खण्डः

३—७.

अथ यद् द्वितीयममृतम्, तद् रुद्रा उपजीवन्तीन्द्रेण मुखेन। न वै देवा अश्नन्ति, न पिबन्ति; एतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥; त एतदेव रूपमभिसंविशन्ति; एतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद, रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति; स एतदेव रूपमभिसंविशति; एतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता, द्विस्तावत्, दक्षिणत उदेतोत्तरतोऽस्तमेता, रुद्राणामेव तावदाधिपत्यँ स्वाराज्यं पर्येता ॥ ४ ॥

इति तृतीयाध्याये सप्तमः खण्डः

---

[1]स यावदादित्यः पुरस्तात्– द्विस्तावत्–। पुरस्तादुदयपश्चादस्तमयापेक्षया द्विगुणकालं दक्षिणतउदयमुत्तरतोऽस्तमयञ्च कल्पयित्वा श्रुतिर्ब्रवीतीति नात्र कथन्ता कार्या[2]। ३-७.

1 अत्र ख. कोशे, 'अथ यद् द्वितीय— इत्यादि। सर्वं पूर्ववद् द्रष्टव्यम्' इति।
2. शिष्टं स्पष्टम् ख.

नात्र कथन्तेति। अनेन, अत्र विमर्शनीयं विस्तरभियोपेक्ष्यत इति सूच्यते। अत्र हि—आदित्यस्य पुरस्तादुदयः पश्चादस्तमयश्चैव प्रसिद्धः, न तु दक्षिणत उदयादिः। एवं पश्चादुदयादिकमपि वक्ष्यमाणमनुपपन्नम्। एवमादित्योदयास्तमयकालो यावान्, तावतोऽपि वसुभोगकालतया तदतिरिक्तादित्यकालस्यैवाभावेन द्विस्तावदिति रुद्रभोगकालस्य वसुभोगकालात् द्वैगुण्यवर्णनमप्यनुपपन्नम्। एवमुपर्युपरि द्वैगुण्यं वक्ष्यमाणमपि। किञ्च मेरुं परितः इन्द्रयमवरुणसोमपुरीः प्रकाश्य भ्रमतः आदित्यस्य सर्वत्र तुल्यरूपा गतिरिति दक्षिणोदयोत्तरास्तमयकाले प्रागुदयादिकालतो द्वैगुण्यमपि दुरुपपादमिति शङ्काः प्रादुर्भवन्ति। अत्र शाङ्करे, 'अत्रोक्तः परिहार आचार्यैः' इत्यारभ्य, 'अमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्वासः स्यात्' इत्यादिना प्रागुदयादिकालाद्यपेक्षया दक्षिणोदयादिकालेषु द्वैगुण्यमुपपादितम्। अत्र निर्दिश्याचार्याः द्रमिडाचार्या इति आनन्दगिरीयादवगम्यते। तैरनेकत्रोपेक्षितानामप्यस्माभिर्गीर-

तानामेषामाचार्याणां ग्रन्थस्य अद्यानुपलम्भात्, अस्फुटत्वाच्च पङ्क्तेः पूर्वापरसंदर्भस्य च, तेषां सिद्धान्त इह किंरूप इति दुर्गमम्। अमरावतीस्थितिकालात् द्विगुणकालं यमपुरीस्थितिरित्येवमुपरि द्वैगुण्यानीकारात् प्रागादिस्थितवस्वाद्यपेक्षया दक्षिणादिस्थितरुद्रादिभोगो द्विगुण इत्येतावत् ततः प्रतीयताम्। कथञ्चामरावत्यादेः शीघ्रमुद्वासनियमः। अतस्तत्तद्दूरूहांशकल्पनापेक्षया वरं दक्षिणोदयोत्तरास्तमयादिकं तद्द्वैगुण्यञ्च श्रुतौ कल्पितमितीति भाष्ये अपाततः प्रतीयते। अमरावत्याद्युद्वासापेक्षया अमरावत्यादितो वस्वादिपदप्राप्तोद्वासो युक्त इत्यपि भाष्याशय इव।

अथ किञ्चिदत्र विचार्यते — वसुरुद्रादित्यादयस्तावत् प्रकृतवैवस्वतमन्वन्तरे वर्तमाना देवगणाः। तत्र वसुपदं प्राप्तस्य एकमन्वन्तरस्थायिनः आकल्पं प्रागुदयप्रत्यगस्तमयप्रवर्तकस्यादित्यस्य स्थितिकालं यावत् फलभोगः कथम्? एवं तद्भोग एव क्षीणायुषः, कल्पस्यावसितत्वाद् रुद्रादिभोगश्च कदेति। तत्रैव समादध्युः—उपायान्तरेण वसुभूतस्य मन्वन्तरमात्रस्थायित्वेऽपि मधुविद्यया वसुर्भवन् आकल्पस्थायी स्यात्। एकैकामृतमात्रोपासनपक्षे वसुभूतस्य रुद्रादिपदप्रसक्तिरेव न। रुद्रादिरूपेण भवन्नपि अनेकैः कल्पैरेव भोगान् अनुभवतु। तावद्विलम्बसहिष्णोरेव मधुविद्याधिकारादिति॥

वस्तुतः यावदादित्यस्थिति आधिपत्यं पर्येतेत्यनिर्दिश्य, **यावत् उदेताऽस्तमेतेति** निर्देशे श्रुतिहृदयं किञ्चिदत्र्यम्। तदेवमूह्यते—पूर्वं **दृष्ट्वा तृप्यन्ति, अभिसंविशन्ति, उद्यन्तीति** भोगमध्ये अभोगो ह्युक्तः। तेन मध्ये औदासीन्यं रोहितादिरूपदर्शनाभावादिति ग्राह्यम्। दर्शनञ्चादित्यस्य उदयात् प्रभृति अस्तमयं यावदेव भवति, न पश्चादिति सर्वविदितम्। एवञ्च पूर्वरश्मिनाडीनिष्पन्नरसाश्रयं मधु द्रष्टुं पूर्वदिक्प्रान्ते स्थितो वसुः पूर्वदिगवच्छिन्नोदयप्रभृति अस्तमयपर्यन्तमेव पश्येत्। तत्तद्देशस्थितानां जनानां तत्तद्देशोयदर्शनादर्शनग्रहणेनैवोदयास्तमयव्यवहारस्यानुभविकत्वात्। अत एवोक्तम्, **यावत् पुरस्तादुदेता पश्चादस्तमेतेति**। एवं दक्षिणरश्मिसमार्जितं मधु पश्यन् रुद्रः तद्दिगवच्छिन्नोदयाद्यस्तमयान्तमेव पश्येदिति **यावद्दक्षिणत उदेतेत्यादि**। अत्र प्राग्दक्षिणादिव्यवहारः अस्मद्दृष्ट्या। उदयास्तमयव्यवहारः वस्वादिपदप्राप्तपुरुषदृष्ट्या। एवं तत्तद्दिगवच्छिन्नरश्मिसंपादितमधुदर्शनं तत्रतत्र स्थितेन स्वदेशप्राप्तसूर्योदयकालमारभ्य त्रिंशन्नाडीपर्यन्तं क्रियते, तदनन्तरञ्च तत्तद्दिक्प्रतिदिशि तदस्तमयात् अदर्शनम्। पुनः रात्र्यपाये स्वदेशे उदयप्राप्त्या पुनर्दर्शनात् **एतस्माद्रूपादुदेतीत्युच्यते**। मेरुप्रदक्षिण्येनामरावत्यादिसर्वदिङ्नगरीषु समवेगं परिभ्रमतश्चादित्यस्य पुरस्तादुदयात् त्रिंशन्नाड्यः पश्चाद्देशसंगमे सतीति स एवास्तमयः। दक्षिणदेशोदयात् त्रिंशन्नाड्य उत्तरदिक्संगमकाल इति तदा सोऽस्तमय इत्येवं ग्राह्यम्। एवं तत्तद्दिशिस्थितैरादित्यानुभवश्च **श्रुतप्रकाशिकायां** संगृहीतः, 'वसुरुद्रादित्यमरुत्साध्यगणा एकैकं प्रतिदिशमुपरि च स्थित्वा आदित्यं प्रधानमनुभवन्ती'ति। एवञ्च **यावत् पुरस्तादुदेते**त्यादिवाक्यं न सूर्यस्थितिकालपर्यन्ततदनुभवप्रतिपादकम्। किन्तु तस्यतस्यादि तदनुभवः, न रात्रावित्यर्थदर्शकम्। नन्वादित्यदर्शनस्य रात्रावसंभवेपि वसुनिष्ठाधिपत्यस्वाराज्ययोः रात्रौ संभवेन, 'यावत् अस्तमेता, तावत्—पर्येते'ति रात्रौ तन्निषेधः कथमिति चेत्—वसुभुज्यमानरसाश्रयमधूपासकस्य मध्वनुभवातिरिक्तविलक्षणाधिपत्य-

३—८.

अथ यत् तृतीयममृतम्, तदादित्या उपजीवन्ति वरुणेन मुखेन। न वै देवा अश्नन्ति, न पिबन्ति; एतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥; त एतदेव रूपमभिसंविशन्ति; एतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद, आदित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति; स एतदेव रूपमभिसंविशति; एतस्माद्रूपादुदेति ॥३॥

स यावदादित्यो दक्षिणत उदेता उत्तरतोऽस्तमेता, द्विस्तावत्, पश्चादुदेता पुरस्तादस्तमेता, आदित्यानामेव तावदाधिपत्यँ स्वाराज्यं पर्येता ॥ ४ ॥ इति तृतीयाध्याये अष्टमः खण्डः

स्वाराज्यसंबन्धे प्रमाणाभावेन तदुपयोग्याधिपत्यादिरेव तदर्थ इति। कियत्सु अहस्सु एवं तदनुभव इत्येतत्तु गमकान्तरनिर्णेयम्। संवेशपूर्वकपुनरुद्गमश्रवणादत्र तस्मिन् दिन इति सिद्धम्। पुरस्तादुदयपश्चादस्तमयमध्यं यावत् वसुभोगकालात्मकम्, द्विस्तावत् रुद्रस्य। परन्तु तत् उक्तविध दक्षिणोदयोत्तरास्तमयमध्यकालात्मकमिति श्रुतिवाक्यार्थः। एवमत्र द्वैगुण्यस्य, तथोत्तरितनभोगकालेष्वपि उत्तरोत्तरद्वैगुण्यस्य श्रुत्या दर्शितत्वात् वसुरुद्रादीनाञ्चैकमन्वन्तरस्थायित्वात् तं मन्वन्तरकालमेकत्रिंशदंशात्मना विभज्य एकोंशो वसुभोगकालः, अंशद्वयं रुद्रस्य, अंशचतुष्कमादित्यस्य, अंशाष्टकं मरुतां, अंशषोडशकं साध्यस्येति विनियोगो भाव्यः। तत्र यावन्त्यहानि यस्य संभवन्ति, तावत्सु तस्याऽऽदित्यानुभवो मधुविद्याफलम्। एवञ्चोपासको वसुरहमात्रकामनयोपासने आंशिकेऽनुमन्यताम्; आंशिकपक्षे वसूनां रुद्राद्युपासनसंभवेन सामान्यतो मध्वादिष्वसंभवादित्युक्तैरखरसत्वादिना तत्पक्षायोगे कृत्स्नकामनया कृत्स्न एव वा। फलं तु एवं परिमितमिति न काचिदनुपपत्तिः।

एवञ्चास्य भाष्यस्यायमर्थः — पुरस्तादुदयपश्चादस्तमयौ वसुभोगोपयोगितया यावन्तौ इष्टौ, तावदपेक्षया द्विगुणतया रुद्रभोगार्थदक्षिणोदयादी यथावत् परिकल्प्यैव श्रुतिः फलं ब्रवीतीति नात्र काचिदनुपपत्तिरिति। नन्वयमुपासको वस्वादिरेव वा वस्वादिसमानभोगो वेति चेत्—स विचार उपरि भाष्य एव भविष्यति। साक्षाद् वसुत्वे तत्फलमनुभूय रुद्रपदं प्रति प्रस्थितौ मध्य एवान्यो वसुत्वेन कल्प्यते। वसुसमानभोगत्वे तु न किञ्चित्। सर्वमपि सर्वंवादिनो भगवतः सुकरम्। वस्तुतः प्रधानभूतानां वस्वादीनामष्टत्वादिना संख्यातत्वेऽपि तदूनान्विताः अन्येऽपि वस्वादिव्यपदेशभाजः स्युरेव। यथा, 'एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः। शतं त्वेकं समाम्नातं रुद्राणाममितौजसाम्' (वि. पु. १–१५.) इति। माध्वास्तु, 'यः पुरस्तादुदयपश्चादस्तमयात्मको वसुभोगकालः स दक्षिणोदयादिकालापेक्षया द्विरावृत्त, एवं पूर्वपूर्व उत्तरोत्तरस्मात् द्विगुण' इति व्युत्क्रमेण योजयन्ति; अखिलमपि फलकालमेकस्मिन्नेवाहोरात्रे घटयन्तीत्यलं बहुना।

३—९.

अथ यच्चतुर्थममृतम्, तन्मरुत उपजीवन्ति सोमेन मुखेन; न वै देवा अश्नन्ति, न पिबन्ति; एतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ ; त एतदेव रूपमभिसंविशन्ति; एतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद, मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति; स एतदेव रूपमभिसंविशति; एतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता, द्विस्तावत्, उत्तरत उदेता दक्षिणतोऽस्तमेता, मरुतामेव तावदाधिपत्यँ स्वाराज्यं पर्येता ॥ ४ ॥

इति तृतीयाध्याये नवमः खण्डः

३—१०.

अथ यत् पञ्चममृतम्, तत् साध्या उपजीवन्ति ब्रह्मणा मुखेन, न वै देवा अश्नन्ति, न पिबन्ति; एतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥ ; त एतदेव रूपमभिसंविशन्ति; एतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद, साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति; स एतदेव रूपमभिसंविशति; एतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता, द्विस्तावत्, ऊर्ध्व उदेताऽर्वागस्तमेता, साध्यानामेव तावदाधिपत्यँ स्वाराज्यं पर्येता ॥ ४ ॥

इति तृतीयाध्याये दशमः खण्डः

---

[1]एवं वसुरुद्रादित्यमरुत्साध्यगणभोग्यरोहितादिपञ्चरूपात्मकपञ्चामृताश्रय देवमधुत्वरूपित ज्योतिर्मण्डलाख्यरूपयुक्तस्य उदयास्तमयादिकृत्यविशिष्टस्य आदित्यनाम-

1. ख. कोशे अथयच्चतुर्थमित्यादि । पूर्ववत् । अथ यत् पञ्चममित्यादि । सर्वं समानम् इति ।

ऊर्ध्व उदेताऽर्वागस्तमेतेति । वस्वादीनां प्रागादिदिक्षु स्थितानां स्वस्वदिशि समीपे यदा सूर्यप्राथमिकदर्शनम् तदा तदुदयप्रतीतिवत्, उपरिस्थितानां साध्यानामूर्ध्वस्वदेशसमीपाऽऽगनात् प्राक् केनापि कारणेन नियमेन सूर्यस्यादर्शने सति समीपदेश एव चेत् प्रथमं तद्दर्शनम्, तदा ऊर्ध्वमेव तदुदयो भवति, अथ तदूर्ध्वदेशादूरतो गते अर्वागस्तमयप्रतीतिः । तथाच पूर्व मरुद्भोगकालः उत्तरोदयदक्षिणास्तमयान्तरालात्मको यावानध्यवसितः, तावानेव द्विगुणीकृतः ऊर्ध्वोदयार्वागस्तमयान्तरालेषु याक्षु आवर्तितेषु सिध्यति, तावान् साध्यानां भोगकाल इति ।

३—११.

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेता, एकल एव मध्ये स्थाता ।

कस्य आदित्यशरीरककार्यावस्थब्रह्मण उपासनमुपदिश्य, नामरूपकृत्यादिरहिताकार्यावस्थादित्यजीवशरीरकब्रह्मोपासनं दर्शयति **अथ तत ऊर्ध्व** —। अथ ब्रह्मदिवसरूपस्य कल्पस्य समाप्त्यनन्तरं **तत ऊर्ध्व उदेत्य** उदयास्तमयाभ्यां प्राण्यनुग्रहादूर्ध्व उदेत्य-उदयास्तमयकृत्य [प्रयुक्त] प्राण्यनुग्रहरहित इत्यर्थः—**नैवोदेता** — **स्थाता** । उदयास्तमयशून्यः एकस्वभाव एव उदासीनतया वर्तत इत्यर्थः ।

अथ तत ऊर्ध्व इति । ननु किमिति कार्यावस्थादित्यपरतयैवेदं वाक्यमपि न योज्यते । अत्र **मध्ये स्थातेति** गतिनिवृत्तिवाचिस्थाधातुप्रयोगेण' आदित्यस्य वस्तुतो भ्रमणमेव नास्ति । उदयास्तमयवर्णनं प्रातीतिकमात्रम्'इति पक्षस्यात्र वर्णनप्रतीतेः । यद्वा तद्भ्रमणपक्षस्यैव प्रामाणिकत्वेऽप्येवमर्थः सुवचः । यौ खलूदयास्तमयौ नाना प्रागुक्तौ, तौ परिभ्रमतः कार्यावस्थस्यादित्यस्यैव वस्तुनो न स्तः इति । तदुक्तं विष्णुपुराणे, 'दिवसस्य रविर्मध्ये सर्वकालं व्यवस्थितः', 'नैवास्तमय(न)मर्कस्य नोदयः सर्वदा सतः । उदयास्तमयाख्यं हि दर्शनादर्शनं रवेः' (२-८.) इति । तदयं श्रुत्यर्थः—**तत ऊर्ध्वः** तत्तद्दिगूर्ध्वप्रदेशावच्छिन्नः **उदेत्य** उपर्यागत्य एकल एव **मध्ये** दिवसस्य मध्ये स्थाता (सर्वदा यत्र क्वापि देशे मध्याह्न इव दीप्यमानतया विरश्मित्वानुष्णत्वादि विना सदा तिग्मसहस्ररश्मित्वरूपैकस्वभाव एवेति यावत्) । नोदेति, नास्तमेति च वस्तुत इति । अत्रोच्यते—एवं तर्हि तदुपबृंहणानुसारादेवमेव कस्मान्न श्रुत्यर्थ इष्यते, यथा तत्रैव (२-११), 'नोदेता नास्तमेता च कदाचिच्छक्तिरूपधृत् । विष्णुर्विष्णोः पृथक् तस्य गणः सप्तविधोऽप्यय'मिति । अत्र हि **नोदेता नास्तमेतेति** सम्यगियं श्रुतिः प्रत्यभिज्ञाप्यते । तदयं श्रुत्यर्थः—य एतावदुदयास्तमयशाली आदित्यो वर्णितः, तत ऊर्ध्वं परमपदे स्थितः परवासुदेवो विष्णुरादित्यादुत्कृष्टः तत इहाविर्भूतः आदित्यमण्डलगतादित्यतत्परिकरवत् प्रतिमासमागमापायौ न प्राप्नोति, किन्त्वेकरूप एव सर्वदा आदित्यमण्डले ऽवतिष्ठत इति । आदर्तुमर्हश्चायमर्थः ; मधुविद्यायाः संप्रति साक्षाद् भगवद्विषयकतया ब्रह्मविद्यात्वस्याऽऽवश्यकत्वेन संपत्तेः । न च शांकरभाष्यविरोधोऽपि । तत्र, 'आदित्यान्तरात्मतयाऽवस्थितं कारणावस्थमेव ब्रह्म' इत्येतावत एव सत्त्वात् । आदित्यमण्डलान्तर्वर्ती हिरण्मयः पुरुषः कारणावस्थः ; तदधिष्ठितः तच्छक्त्याप्यायितसर्वं आदित्यस्तं प्रति कार्य एवेति प्राक् कार्यावस्थादित्य उक्त इति सुनिर्वहत्वादिति ॥ अस्तु तावेवमेव श्रुत्यर्थः, किमिति सृष्टिप्रागवस्थादित्यजीवपरतया मुक्तयवस्थजीवपरतया वा व्याख्यानमिति चेत्—पूर्वं यद्रूपौ उदयास्तमयौ प्रस्तुतौ, तद्रूपयोरेव तयोरिह **नोदेता नास्तमेतेति** निषेधप्रतियोगित्वं सति संभवे स्वीकर्तुं युक्तम् ; न त्वनुपस्थितयोरन्यादृशयोः । प्रस्तुतौ च दर्शनविशेषरूप उदयः, दर्शनध्वंसरूपोऽस्तमयश्च । तन्निषेधश्च तादृशादित्यजीवपरतायामेवेत्याशयादित्यलमधिकेन ।

तदेष श्लोकः —

अत्र हि भाष्ये, [भाष्ये, 'अत्र हि ?] 'कार्यकारणावस्थब्रह्मोपासनं विधियते । **असौ वा आदित्यो देवमधु** इत्यारभ्य, **अथ तत ऊर्ध्व उदेत्य** इत्यतः प्राक् आदित्यवस्वादिकार्यविशेषावस्थं ब्रह्म उपास्यमुपदिश्यते । **अथ तत ऊर्ध्व उदेत्येत्यादिना** आदित्यान्तरामतयाऽवस्थितं कारणावस्थमेव ब्रह्मोपदिश्यते' इत्युक्तम् । तत्र **अथततऊर्ध्वउदेत्येत्यस्य** मुक्तावस्थादित्यान्तर्यामिब्रह्मोपासनपरत्वे **अथशब्दादिस्वारस्यात् कारणावस्थमिति** भाष्यस्य अकार्यावस्थं, मुक्तयवस्थमित्यर्थ एवोचितः । न तु आदित्यभावप्राप्तिपूर्वावस्था । व्यासार्यैस्तु — भाष्यस्वारस्यमवलम्ब्य आदित्यनामरूपभाक्त्वावस्थापूर्वभाव्यवस्थैव **अथततऊर्ध्वउदेत्येत्यादिसंदर्भेण** प्रतिपाद्यत इति वर्णितम् । तेषामयमाशयः — **अथशब्दो** न निर्दिष्टानन्तर्यार्थः । अपितु [1]अर्थान्तरप्रस्तावार्थः । 'अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेता एकल एव मध्ये स्थाता' इत्यस्यापि उदयास्तमयतत्कार्यशून्यत्वमर्थः[2] । तच्चाऽऽदित्यभावपूर्वावस्थायां कल्पादौ संभवतीति ।

तदेष श्लोकः । **तत्** तस्मिन् विषये देवान् प्रति केनचित् योगिना गीतः

1. कारणावस्थालक्षणगुणान्तरप्रस्तावार्थ. **क.** उपासनान्तरप्रस्तावार्थ **घ. ग.** 2. **ख. कोशादौ,** 'शून्यत्वमर्थ' इति । **क** कोशे तु 'शून्यत्वमात्रमर्थः । न तु ततउदेत्येतत्स्वारस्यमनुरोद्धव्यम्' **क.** ।

अथशब्दादिस्वारस्यादिति । अथशब्दस्य पूर्वोक्तानन्तर्यं मुख्यार्थः । पूर्वसंदर्भे च आदित्योदयास्तमयमध्ये देवगणानां तदनुभव उक्तः । एवञ्च स्वकर्तव्यदेवादिप्राणिजातानुग्रहानन्तरमित्यर्थस्यैव लाभात् आदित्यावस्थाप्राग्भाव्यवस्थाग्रहणे तदानन्तर्यं दुर्घटम् । एवं **ऊर्ध्व उदेत्येति** पदस्वारस्यमपि प्राणिजातानुग्रहोत्तरकालग्रहणे । ऊर्ध्वं प्राणिति पदयोर्मध्ये ऊर्ध्वपदस्योत्तरकालरूपार्थे प्राणित्यस्य पूर्वकालरूपार्थे च प्रयोगस्य व्यवस्थितत्वात् । श्रुतप्रकाशिकारीतौ **तु कारणावस्थमिति** भाष्यपदस्वारस्येऽपि नैतच्छ्रुतिस्वारस्यम् । स्वपक्षे च नातीव भाष्यस्वारस्यहानिः । मुक्तेरात्यन्तिकलयरूपत्वात्, लयस्य च स्वकारण एव वक्तव्यत्वात् मुक्तयवस्थं ब्रह्म कथञ्चित् कारणावस्थतया सुवचमिति । अन्यथा मुक्त्यतिरिक्तावस्थाग्रहणे तस्या अनित्यत्वेन एकलत्वाद्यसारस्याच्च । अत एवास्मद्भाष्यानुसारिणि श्रीकण्ठभाष्ये कारणावस्थपदसद्भावेऽपि **मुक्तविषयतयैवाप्पय्यदीक्षितयोजना । शून्यत्वमिति** । उदयास्तमयध्वंसरूपार्थो न ग्राह्यः; किन्तु सामान्यतस्तदभाव । स च प्राक्कलेऽपि सुवच इति भावः । **देवान् प्रति** इति । अस्य योगिवचनस्य देवातिरिक्तं कञ्चित् पुरुषं प्रति प्रवृत्तत्वे **देवा** इति संबोधनं क्लिष्टं नेयं

न वै तत्र स[1] निम्लोच नोदियाय कदाचन ।
देवास्तेनाहँ सत्येन मा विराधिषि ब्रह्मणा ॥ इति ।

न ह वा अस्मा उदेति, न निम्लोचति । सकृदिवा हैवास्मै भवति य एनामेवं ब्रह्मोपनिषदं वेद ॥ ३ ॥

तद्धैतत् ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः ।

1. न निम्लोच शां. न निम्लोचो मा.

श्लोकः । उच्यत इति शेषः । **न वै — ब्रह्मणेति** । हे देवाः ! **तत्र** तस्मिन् आदित्यभावमुक्तिकाले **सः** मुक्तादित्यान्तर्यामी परमात्मा **न निम्लोच** नास्तमितः ; **नोदियाय** नोदितश्च । तेन **सत्येन**[1] वचनेन, ब्रह्मणाऽहं **मा विराधिषि**[2] विरोधं न गच्छामि, अप्राप्तिं न गच्छामीति यावत्[3] । **निम्लोचेति** छान्दसो द्विर्वचनाभावः ।

न ह — वेद । य एतां मधुविद्यारूपां **ब्रह्मोपनिषदं** ब्रह्मविद्यां **वेद** अनुतिष्ठति, **अस्मै**[4] ब्रह्मविदे आदित्यो नोदेति, नास्तमेति । आदित्योदयाप्रकाशाभ्यां न किञ्चित् तस्य प्रयोजनमित्यर्थः । कुत इत्यत आह **सकृद् — अस्मै** ब्रह्मविदे सकृद् दिवैव भवति । सकृदुदितमहरेव भवति । सदैवाहर्भवतीत्यर्थः । संततं सर्वविषयकसाक्षात्कारोऽस्य भवतीत्यर्थः ।

मधुविद्यासंप्रदायमाह — **तद्धैतत् — प्रजाभ्यः** । तद् ह एतत् मधु-

1. सत्येन वचनेन **क. ख.** । **क.** कोशे, 'यद्यसत्यं मयोक्तं स्यात् तर्हि न ब्रह्म प्राप्नुयामिति भावः' इत्यप्यधिकम् । वचनेनेत्येतत्स्थाने 'निर्विकारेण' इति सत्यशब्दार्थवचनं ब्रह्मविशेषणं **ग. घ.** कोशयोः । 3. विरोधं न गच्छामीति यावत् **ख. ग.** 4. तस्मै **क.**

स्यादिति तादृशशाङ्करमार्गं उपेक्षितः । **शाङ्करे, न निम्लोचेति** पाठः । न वै तत्रेति **पृथग्वा.** क्यम् । तद्विवरणं न निम्लोचेत्यादि । **निम्लोच**—निमुम्लोच । ननु सूर्यस्य सर्वथैवाभावादन्धकार एव स्यात् ; कथमहरेव सर्वदेत्यत्र **सकृदिवा**शब्दतात्पर्यार्थमाह **संतत**मित्यादिना । उदयास्तमयपदयोर्दर्शनादर्शनपरत्ववत् **दिवा**पदमपि दर्शनपरमेव । तत्र सूर्योदयादिशब्दः सूर्यदर्शनादिपरः । **दिवा**शब्दश्च पदान्तरासमभिव्याहारादविशेषात् सर्वदर्शनपर इति भावः ।

तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥ ४ ॥

इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्, प्राणाय्याय वाऽन्तेवासिने ॥ ५ ॥; नान्यस्मै कस्मै चन; यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यात्, एतदेव ततो भूय इति एतदेव ततो भूय इति।

इति तृतीयाध्याये एकादशः खण्डः

विज्ञानमित्यर्थः।[1] **तद्धैतत् — ब्रह्म प्रोवाच**। तद्धैतत् ब्रह्म उद्दालकाय पिता प्रोक्तवान्[2]। **इदं — वासिने**। तस्माद्धेतोः इदं ब्रह्मविज्ञानं ज्येष्ठाय पुत्राय वा प्रब्रूयात्; **प्राणाय्याय** योग्याय शिष्याय वा प्रब्रूयादित्यर्थः। 'प्राणाय्योऽसंमतौ' इति निष्कामार्थे प्राणाय्यशब्दस्य निपातितत्वात्। **नान्यस्मै कस्मैचन**। उक्तपुत्रशिष्यव्यतिरिक्ताय कस्मैचिदपि न ब्रूयादित्यन्वयः। **यद्यपि — इति**। **अद्भिः परिगृहीतां** समुद्रावृतां भोगोपकरणैः पूर्णामिमां पृथिवीं यद्यपि अस्मै = आचार्याय दद्यात्, तदपेक्षयाऽप्येतद्विज्ञानमेवाधिकम्। नैतस्यानुरूपो निष्क्रयोऽस्तीत्यर्थः। **एतदेव —**। द्विरुक्तिर्विद्यासमाप्त्यर्था ॥

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते — समन्वयाध्याये—

(१) — मधुविद्यायाः वस्वादिगणभोग्यरोहितरूपादिपञ्चामृताश्रयादित्योपासनारूपतया अस्यां विद्यायां वस्वादीनां नाधिकारः संभवति; उपास्योपासकभावस्यैकस्मिन्नसंभवात्। न हि एकस्यैव प्रीणनीयत्वं प्रीणयितृत्वञ्च संभवति। वसूनामेवैको भूत्वेत्यादिना वसुत्वादिप्राप्तेरेव मधुविद्याफलत्वेन वस्वादीनामेव सतां वस्वादित्व[3]प्राप्तिकामनाया असंभवाच्चार्थित्वाद्यसंभवात्[4]। 'तं देवा ज्योतिषां ज्योतिरायुर्हो-

1. ख. एतदुपरि, 'ब्रह्मा चतुर्मुखः। प्रजापतये दक्षाय। मनवे स्वायम्भुवाय' इति। 2. वानित्यर्थ. ख. 3. वस्वादित्य क. ख. 4. भवाच्च ग. घ.

तद्धैतत् ब्रह्म मधुविज्ञानविषयं प्रजाभिरधिगतं ब्रह्म। **पिता** अरुणः।

आदित्योपासनारूपतयेति। तावन्मात्रोपासनरूपतयेत्यर्थः। ब्रह्मविद्यात्वाभावादिति यावत्। वस्वादिभिरादित्यांशस्य भुज्यमानत्वेऽपि तदन्तस्थब्रह्मणो भुज्यमानत्वाभावात् 'आदित्यो वा देवमधु' इत्यत्रादित्यपदं न ब्रह्मपरम्। एवं, 'तद्वसव उपजीवन्ती'त्यादुक्तोपजीवनकर्तृत्वस्य ब्रह्मण्यसंभवेन वस्वादिपदमपि शुद्धवस्वादिपरमेवेति भावः। ब्रह्मणोऽनुपास्यत्वे, 'सकृद्विभा

पासतेऽमृतम्' इति परब्रह्मव्यतिरिक्तस्य देवोपास्यत्वनिषेधेन ज्योतिश्शब्दिते ब्रह्मण्येवोपासन[1]सद्भावावगमाच्च मधुविद्यादिषु नाधिकार इति, "मध्वादिष्वसंभवादनधिकारं जैमिनिः", "ज्योतिषि भावाच्च" इति सूत्राभ्यां पूर्वपक्षं कृत्वा, "भावं तु बादरायणोऽस्ति हि" इति सूत्रेण सिद्धान्तः कृतः।

अस्यायमर्थः — अधिकारस्य सद्भावं बादरायण आचार्यो मन्यते। अस्ति हि तेषामप्यर्थित्वादिसंभव इति। अयमाशयः — न हीयं विद्या वस्वादित्यादिमात्रपर्यवसिता; अपितु तच्छरीरकपरमात्मपर्यन्ता। वस्वादीनामेव सतां स्वान्तर्यामिपरमात्मोपासनं [2]संभवत्येव। न चोपास्यप्रतिपादकवस्वादिशब्दानां ब्रह्मपर्यन्तत्वे प्रमाणाभावः; उपसंहारे, "ब्रह्मोपनिषदं वेद" इति श्रवणात्। वस्वादीनामेव सतां कल्पान्तरे वसुत्वा[3]दिप्राप्तिपूर्वकब्रह्मप्राप्तेरुद्देश्यत्वसंभवाच्च। लोके पुत्रिणामेव सतां जन्मान्तरेऽपि पुत्रित्वेप्साया दर्शनात्।

1. पासनासद्भाव क. पासनसंभव ख. 2. भवत्येव ग. 3. वस्वादि क.

हैवास्मै भवती'ति मुक्तिफलश्रवणं कथमिति चेत्—वस्वादिपदप्राप्त्यनन्तरं तत्रोपायस्यानुष्ठास्यमानस्य तत् फलमिति क्रममुक्तिपरं तत्। यद्वा आदित्योपासनादादित्यसायुज्यं प्राप्तस्य तन्मण्डलमध्य एव च स्थिरस्य तददर्शनाभावात् सर्वदा दिवैवेत्यर्थसंभवान्न मोक्षरूपक्रियार्थपरत्वं तस्येति पूर्वपक्ष्याशयः स्यात्। ननु वस्वादिमात्रोपासने वस्वादिपदमपि दुर्लभम् — फलकाले भाविनि मन्वन्तरे उपासितवस्वादेर्दातुरभावात् इति चेन्न—वस्वादिभोगसाम्यस्यैव फलत्वेनास्मिन्नेव मन्वन्तरे तैस्तत्प्रदानसंभवात्। वस्वादित्वस्यैव फलत्वेऽपि, 'इन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं निरवपन्महाव्रीहीणाम्; ततो वै स ज्यैष्ठ्यं देवानामभ्यजयत्' इत्येवमिन्द्राद्युद्देश्यकयागात् इन्द्रादिपदप्राप्तेः श्रुततया तद्वत् वचनबलात् सर्वोपपत्तेः। फलस्य भगवदधीनत्वेऽपि तदाज्ञयैव तदर्थं वस्वाद्याराधनमिति। अतो वस्वादिप्रीतिरिहोद्देश्यम्। न च उपसंहारे ब्रह्मोपनिषदं वेदेति ब्रह्मविद्यात्वं श्रूयत इति वाच्यम्। प्रथमप्रतीतवस्वादिमात्रोपासनतया मनुष्यादिविषये विद्याया लब्धावकाशत्वेन तत्र ब्रह्मपदस्य वेदपरत्वादिति पूर्वपक्ष्याशयः। सिद्धान्त्याशयस्तु ब्रह्मोपनिषदमित्यत्र ब्रह्मपदस्य वेदपरत्वे तद्वैयर्थ्यात्, 'मा विराधिषि ब्रह्मणा' 'ब्रह्म प्रोवाच' इत्यभ्यस्तस्य ब्रह्मपदस्य मुख्यार्थग्रहणौचित्यात् उपासनस्य ब्रह्मविषयकत्वे अवगते, वस्तुतः सर्वस्यापि फलस्य साक्षात् परम्परया वा परब्रह्मप्रीत्यधीनतया तस्यैतदुपासनाराध्यत्वावगमेन आदित्यवस्वादिपदमविशेषात् विशिष्टवाचि। देवमधुत्वोपजीवितृत्वादिकं तु विशेष्ये बाधाद्विशेषणविश्रान्तं प्रतर्दनविद्यादिष्विवेति।

ननु वस्वादिपञ्चगणोपजीव्यरोहितादिपञ्चरूपात्मकपञ्चामृताश्रयादित्यमधूपासनत्वान्मधुविद्यायाः, तस्याश्च विद्यायामादित्यस्यैवोपास्यतया आदित्यस्य तद्विद्याधिकारासंभवेऽपि वस्वादीनां कथमनधिकारशङ्का। न ह्यस्यां विद्यायां वस्वादीनामुपास्यत्वम्; अपितु तद्भोग्यादित्यस्यैव। भाष्यकृता, "मधुविद्यायामृग्वेदादिप्रतिपाद्यकर्मनिष्पाद्यस्य रश्मिद्वारेण प्राप्तस्य रसस्याश्रयतया लब्धमधुव्यपदेशस्यादित्यस्यांशानां वस्वादिभिर्भुज्यमानानामुपास्यत्वम्" इति पूर्वपक्षे, "वस्वादिभोग्यभूतादित्यांशस्य विधीयमानमुपासनं तदवस्थस्यैव ब्रह्मण इत्यवगम्यते" इति सिद्धान्ते चोक्तत्वात्। न हि स्वोपासनवत् स्वोपजीव्यत्वेनान्यस्योपासनं विरुद्धम्; तथासति उपासनाशास्त्रोच्छेदप्रसङ्गात्। सर्वेष्वप्युपासनेषु उपास्यगतस्वोपजीव्यत्वस्वसेव्यत्वस्वाधारत्वस्वान्तर्यामित्वादीनामनुसंधेयत्वात्। ततश्च वसूनामेव सतां स्वोपजीव्यपञ्चामृताश्रयादित्यविषयमधुविद्यानुष्ठानसंभवात् कुतोऽनधिकारशङ्केति चेत्—

उच्यते। 'वसूनामेवैको भूत्वे'त्यादिना वसुत्वादिप्राप्तेः फलत्वेन[1] कीर्तनेन मधुविद्यायां तत्क्रतुन्यायेन वस्वादीनामुपास्यत्वस्याप्यभ्युपगन्तव्यत्वात्। "**अथ तत ऊर्ध्व उदेत्ये**त्यतः प्राक् आदित्यवस्वादिकार्यविशेषावस्थं ब्रह्म उपास्यमुपदिश्यते। **अथ तत ऊर्ध्व उदेत्ये**त्यादिना आदित्यान्तरात्मतयाऽवस्थितं कारणावस्थं ब्रह्म उपास्यमुपदिश्यत" इति कार्यावस्थोपासनदशायां[2]मादित्यवत् वस्वादीनामप्यविशेषेणोपास्यत्वस्य भाषितत्वात्, "अस्ति ह्यादित्यवस्वादीनामपि स्वावस्थब्रह्मोपासनेन वस्वादित्वप्राप्तिपूर्वकब्रह्मवेप्सासंभवः" इति आदित्यस्य वस्वादीनाञ्च तुल्यत्वस्य भाषितत्वाच्च मधुविद्याया आदित्योपासनत्व पञ्चामृतोपासनत्व वस्वाद्युपासनत्वरूपाकारत्रयवत्त्वान्न पूर्वपक्षोत्थित्यनुपपत्तिरिति द्रष्टव्यम्।

ननु वस्ववस्थस्य ब्रह्मण उपास्यत्वसंभवेऽपि **तद्वसव उपजीवन्ती**ति निर्दिष्टमुपजीवितृत्वलक्षणं भोक्तृत्वं न ब्रह्मणः संभवतीति चेन्न — उपजीवितृत्व-

1. फलत्वादि कीर्तनेन **ख**. फलत्वेन कीर्तितत्वेन घ. 2. अयं घ. पाठः। **क. ग.** कोशयोः आदित्यवस्वादीनामविशेषेणेति। **ख**. कोशे तु आदित्यवदित्यारभ्य भाषितत्वाच्चेत्येतदन्तस्य स्थाने, 'आदित्यवत् वस्वादीनाञ्च तुल्यत्वस्य भाषितत्वाच्च' इत्येव।

प्राप्तस्यापि फलस्य पुनःप्रेप्सायां आनुभविकत्वात् स्वस्य वस्वादेः रुद्रादिभावानुभाव्यफलान्तरसत्त्वाच्च स्वानाराध्यत्वमेव पूर्वपक्षे मुख्ययुक्तिः, न फलस्य प्राप्तत्वमित्याशयेन शङ्कते **नन्विति**।

स्यापि सद्वारकतया तत्र संभवात्। नन्वेवं, तद्वसव उपजीवन्तीत्यत्र वसुशब्दस्य तदन्तर्यामिपरत्वे वसूनामेवैकोभूत्वेत्यत्रापि वसुशब्दस्य [1]वस्ववस्थब्रह्मपरत्वं स्यात्। न च तद् युक्तम्; न ह्युपासकस्य[2] जीवस्य कल्पान्तरे वसुत्वप्राप्तिलक्षणसंसारदशायां वस्ववस्थब्रह्मभावोक्तिः संगच्छत इति चेन्न—'वसूनामेवैकोभूत्वे'त्यत्र यथाश्रुते बाधकाभावेन, ब्रह्मपरत्वे बाधकसद्भावेन[3] च यथाश्रुतार्थस्यैवोपपन्नत्वादित्यलमतिचर्चया।

ननु, 'वसूनामेवैको भूत्वा', 'सकृद्दिवा हैवास्मै भवति' इति वाक्यद्वयानुसारेणानया विद्यया कल्पान्तरे कञ्चित् कालं वसुभावं प्राप्य पश्चाद् ब्रह्म प्राप्नोतीत्यभ्युपगमो न युक्तः। तथासति इदानीं मधुविद्योपासकानां प्रायणानन्तरं फलप्राप्तिर्न स्यात्। कल्पान्तरभावित्वात् वसुत्वस्य। न च स विलम्बः सोढव्य एवेति वाच्यम्—कल्पान्तरेऽपि वस्वादिभावप्रापकमधुविद्यानिष्ठानां तत्प्रापककर्मान्तरनिष्ठानाञ्चानन्तानां संभवेन सर्वेषां[4] युगपद्वस्वादिभावे वसुगताष्टत्वसंख्याविरोधप्रसङ्गेन, 'वसुत्वप्रापककर्मनिष्ठानामनन्तानां मध्ये विपाकानुसारेण केषाञ्चित् त्रिचतुरकल्पमध्ये वसुत्वादिप्राप्तिर्भवति; केषाञ्चित् अनुष्ठितमधुविद्यानामपि सहस्रकल्पप्रतीक्षणमप्यस्ति' इत्यभ्युपगन्तव्यम्। न हीदृशः कश्चिन्मुमुक्षुर्भवति। सहस्रकल्पपर्यन्तविलम्बमभ्युपगच्छतः कथं मुमुक्षुता? हैरण्यगर्भान्तसकलभोगविरक्तिपूर्वकब्रह्मानन्दप्रेप्सालक्षणमुमुक्षाशाली हि ब्रह्मविद्यायामधिकरोति; [5]वस्वादिपदाभिलाषिणः कथं मुमुक्षुता; कथं[6] ब्रह्मविद्याधिकार इति चेत्—

सत्यम्। ब्रह्मानन्दैकप्रेप्सुरेव मुमुक्षुः। अथापि यथा देहावसानकाले ब्रह्मानन्दैकप्रेप्सा मुमुक्षा, एवम्, 'वसुत्वावसाने ब्रह्मैव प्राप्नवानि' इति प्रेप्साऽपि

1 ख. ग. कोशयो. वस्वस्थेति न। 2. उपासकस्यापि ग. 3. यथाश्रुते बाधकाभावेन ब्रह्मपरत्वे बाधकसंभवेन ख 4. सर्वेषाञ्च ख. 5 ततश्च वस्वादि ख. 6 कथं वा ख.

यथाश्रुते बाधकाभावेनेति। तस्य वाक्यस्य फलपरत्वेनोपासनाकारसमर्पकवाक्यवृन्दे निवेशाभावादिति भावः। ब्रह्मपरत्वे **बाधकं** षष्ठीबहुवचनोक्तं बहुत्वं निर्धारणञ्च भा. प्र।

न्यायरक्षामणि शिवार्कमणिदीपिकोक्तमालोड्य तत्रास्माकं हेयोपादेयविवेकाय विस्तरं करोति **ननु वसूनामि**त्यादिना। **कर्मनिष्ठानामि**ति। कर्म मधुविद्याऽपि अन्यदपि।

ब्रह्मानन्दैकप्रेप्सा भवत्येव। शास्त्रबलाच्चेदृशविलम्बसहिष्णवोऽप्यधिकारिणः सन्तीत्यभ्युपगन्तव्यम्। तत्र च प्रारब्धवैचित्र्यमेव नियामकम्। अत एव—

'याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्।
कारकल्पं वपुरपि विदन् कस्तितिक्षेत बन्धम्॥'

इत्युक्तरीत्या विवेकिनः कथं विलम्बसहिष्णुता—इत्यप्यपास्तम्। प्रारब्धमहिम्ना सर्वस्याप्युपपत्तेः।

वस्तुतस्तु, 'भ्रातॄणां मध्ये त्वमेकः' इति लौकिकोक्तेः भ्रातृभोगसाम्याभिप्रायत्ववत्, 'वसूनामेवैको भूत्वे'त्यस्य[1], 'किञ्चित्कालमानुषङ्गिकवस्वादिभोगसाम्यमनुभूय तेन पथा परं ज्योतिरुपसंपद्यत' इत्यभिप्रायत्वात् तादृशभोगसाम्यस्य च देहवियोगानन्तरमेव संभवान्नानुपपत्तिरित्यप्याहुः॥

(२) ननु वस्वादिदेवतानां विग्रहाभावेनोपासनसामर्थ्यासंभवात् कथमुपासनाधिकारः। न हि देवादीनां शरीरवत्त्वे प्रमाणमुपलभ्यते। न तावत् प्रत्यक्षानुमाने; तस्य तद्गोचरत्वात्। नापि, 'वज्रहस्तः पुरन्दरः', 'तेनेन्द्रो वज्रमुदयच्छत्' इत्यादीनां प्रामाण्यम्; मन्त्रार्थवादानामनुष्ठेयार्थस्मृति—स्तुतिप्रयोजनकतया विग्रहादौ तात्पर्याभावेन तात्पर्यविषये शब्दस्याप्रामाण्यात्। अन्यथा श्वेतवर्णरजकर्तृकवस्त्र-

1. इत्यस्य च वाक्यस्य ख.

प्रारब्धमहिम्नेति। उक्तं हीदमप्याचार्यैः, 'नियत्या वैयात्यं नियमयितुमेवं प्रभवति' इति। इत्यप्याहुरिति। शिवार्कमणिदीपिकायां 'वस्वादिभोगसाम्यं पूर्वपक्ष्यभिमतम्; वस्वादित्वमेव सिद्धान्त्यभिमतम्' इति व्यवस्थाकरणममूलमनपेक्षितश्चेतीह दर्शितं भवति। वस्वादित्वफलपक्षेऽपि पूर्वपक्षसंभवस्य प्राग् दर्शितत्वात्। मधुविद्याया अंशतोऽनुष्ठाने मानाभावेन एतद्विद्यानिष्ठस्य वसुरुद्रादित्यभावप्राप्तेरुत्तरोत्तरद्विगुणकालानुभाव्यायाः फलत्वेन तावल्लाभस्य वस्वादिभोगसाम्यपक्ष एवैकस्मिन् कल्पे स्वरसत्वात्। 'ब्रह्मैव भवती'तिवत् 'वसूनामेक एव भवती'त्यस्य निर्वाहाच्च। अत्र किञ्चित्कालमानुषङ्गिकेत्यनेन एतन्मन्वन्तरात् प्राक् मधुविद्यानिष्ठो मन्वन्तरेऽस्मिन् पूर्णकालं फलमनुभवति यथा, तथा एतन्मन्वन्तरमध्ये एतन्निष्ठः अत्र मन्वन्तरे यावान् कालोऽवशिष्टः, तावति काले पूर्ववदेकत्रिंशदंशात्मना विभक्ते सर्वमवान्तरं फलमनुभूय मुच्यते। तदिदमपूर्णत्वं न तदनिष्टम्, तथा ज्ञानवैव तेन तदनुष्ठानात्। अस्याप्रधानफलत्वादिति सूचितम्। आहुरित्यनेन, 'इदानीं वसूनामेव सतां कल्पान्तरे वस्वादित्वप्राप्तिश्चे'ति भाष्यादिकमस्मिन् पक्षे क्लिष्टमक्लिष्टं वेति विमृश्यमिति सूच्यते। अत्र भाष्ये एकत्र आदिपदप्रयोगात् एकस्यैककल्पे वस्वाद्यनेकतत्पत्तिप्रदर्शनात् भोगसाम्यमभिमतं स्यादिति।

शोधनतात्पर्येण प्रयुक्तस्य, 'श्वेतो धावति' इत्यस्य शुनकसमीपगमनप्रतीत्युत्पादकत्वसंभवमात्रेण तत्रापि प्रामाण्यप्रसङ्गात् ।

ननु रेवत्याधारवारवन्तीयसामसाध्याग्निष्टोमस्तोत्रविशिष्टक्रतुविधायके, 'रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' इति वाक्ये, 'रेवतीषु वारवन्तीयम्' इत्यंशस्य, 'रेवतीर्नस्सधमाद' इति ऋक्त्रयाधारवारवन्तीयसामरूपे अग्निष्टोमस्तोत्रविशेषणे, तात्पर्याभावेऽपि, प्रामाण्यं दृष्टम् । न हि तद् विशेषणम्, 'सोमेन यजेत' इत्यादिविशिष्टविधिषु सोमलतादिविशेषणवत्, लोकसिद्धम्; नापि विधिसिद्धम्; 'कवतीषु[1] रथन्तरं गायेत्' इतिवत्, रेवतीषु वारवन्तीयं गायेदिति विध्यदर्शनात । न चास्यैव विशिष्टगोचरस्य विधेर्विशेषणविधावपि तात्पर्यं वक्तुं शक्यम्—विध्यावृत्तिप्रसङ्गात् । न चाऽऽक्षेपाद् विशेषणप्रसिद्धिः—अन्योन्याश्रयात् = विशेषणप्रसिद्धौ सत्यां विशिष्टविधिः, विशिष्टविधिनैव विशेषणस्याक्षेप इति परस्पराश्रयापत्तेः । तस्माद् विशिष्टविधेर्विशेषणस्वरूपे तात्पर्याभावेऽपि 'रेवतीषु वारवन्तीय'मिति पदद्वय समभिव्याहारस्यैव प्रामाण्यमभ्युपगन्तव्यमिति चेत्—

मैवम् । रेवतीषु वारवन्तीयमिति पदद्वयसमभिव्याहारलभ्यां रेवत्याधारवारवन्तीयप्रतीतिमुपजीव्य प्रवृत्तेन विशिष्टविधिना आक्षिप्तस्य 'रेवतीषु वारवन्तीयं कुर्यात्' इति विशेषणविधेरेव तत्र प्रमाणत्वेन, रेवतीषु वारवन्तीयमिति पदद्वयसमभिव्याहारस्याप्रमाणत्वात् । इयांस्तु विशेषः—'सोमलतादि विशेषणं मानान्तरसिद्धं सोमपदात् प्रतीयते । इह तु मानान्तरासिद्धमेव पदसमभिव्याहारात् प्रतीयत' इति । प्रतीयमानेऽपि विशेषणे विशिष्टविधेः प्रामाण्याभावः उभयत्राप्यविशिष्टः । ततश्च यथा सोमप्रत्यायकं सोमपदं[2] न सोमस्वरूपे प्रमाणम्, एवं

1. कवतीषु इति घ. पाठः मीमांसकप्रसिद्धश्च; न्यायरक्षाभाष्यनुसारी च । अन्यत्र तु रेवतीषु इत्येव पाठः । 2. सोमपदम्, यथा च न सोम क.

आक्षेपादिति । तद्विशेषणविशिष्टकिञ्चिद्विशेष्यविधानं तस्य विशेषणस्याप्रसिद्धौ नोपपद्यत इत्यन्यथानुपपत्त्येत्यर्थः ।

मैवमिति । अयं भावः — विशेषणस्य प्रतीत्यभावे विशिष्टविधानासंभवेऽपि समभिव्याहारस्य विशेषणप्रतीतिजनकत्वेऽपि न तत्प्रमाजनकत्वरूपं प्रामाण्यम्, तस्य विशेषणसत्ताधीनत्वात् । रेवत्याधारकवारवन्तीयरूपविशेषणस्य च विशेषणविधिकल्पनाधीनतदनु-

रेवतीषु वारवन्तीयमितिपदद्वयसंभभिव्याहारो रेवतीवारवन्तीयरूपविशेषणरूपार्थप्रत्यायकोऽपि न तत्र प्रमाणम्। अयञ्चापरो विशेषः—सोमलताद्रव्यस्य लोकसिद्धत्वात् तत्र यागसंबन्धित्वेनैव विधिः कल्प्यः; इह तु [रेवतीवारवन्तीयरूप] विशेषणस्वरूपस्यापि मानान्तरासिद्धत्वात् प्रतीयमानेऽपि तस्मिन् विशेष्टविधेः प्रामाण्याभावाच्च तत्सिद्ध्यर्थं स्वरूपे, स्तोत्रविशेषसंबन्धित्वे च विधिद्वयं कल्प्यमिति।

तस्मान्मन्त्रार्थवादानां स्वार्थे तात्पर्याभावात् न तेभ्यो देवताविग्रहसिद्धिः।

ननु मन्त्रार्थवादानां विध्येकवाक्यतापन्नानां स्वार्थेऽप्यवान्तरतात्पर्यं संभवत्येव; दर्शपूर्णमासादिप्रधानविध्येक[1]वाक्यतापन्नप्रयाजादिविधिवत् इति चेत्—

सत्यम्। मानान्तराविरोधे प्रतीयमानार्थे तात्पर्यं संभवति; न तु तद्विरुद्धे। अन्यथा, 'यजमानः प्रस्तरः' इत्यत्रापि प्रतीयमानाभेदे तात्पर्यप्रसङ्गात्। अस्ति च मन्त्रार्थवादवशेन देवताविग्रहाभ्युपगमे मानान्तरविरोधः। देवताविग्रहाभ्युपगमे हि न्यायतौल्येन नानायागदेशे युगपदाहूतानामागमनस्य, अग्निप्रक्षिप्तभस्मीभूतहविःस्वीकारादेरपि अभ्युपगमात् प्रत्यक्षोपपत्तिविरोधः। अतो न देवताविग्रहे तात्पर्यं संभवति।

अतो विग्रहाभावादुपासनास्वनधिकार इति पूर्वपक्षे प्राप्ते—उच्यते—

"तदुपर्यपि बादरायणः संभवात्"। **तत्** ब्रह्मोपासनम् **उपरि** मनुष्याणामुपरि देवादिष्वपि संभवतीति भगवान् बादरायणो मन्यते। तेषामप्यर्थित्व-

1. विध्येकतापन्न ख.

ष्ठानायत्तत्वात् विशेषणविधिरेव तत्र प्रमाणमिति। **प्रत्यायकोऽपीति**। रेवतीष्वित्यत्र सप्तम्याः कारकविभक्तित्वेन क्रियान्वयेऽपि सर्वत्र सप्तम्यर्थाधिकरणत्वस्य क्रियायां कर्तृकर्मान्यतरद्वारकत्वात् रेवत्याधारकवारवन्तीयप्रतीतिरिति भावः।

स्वरूपे इत्यन्तेनाधिकं विधिं प्रदर्श्य सोमेनयजेतेत्यत्रत्यविशेषणविधितुल्यं विधिं दर्शयति **स्तोत्रविशेषसंबन्धित्वे चेति**। अत्र परमसिद्धान्ताशयस्तु विशेषणं द्विविधं विध्यधीनकर्तव्यत्वावगमसिद्धानुष्ठानायत्तात्मलाभम्, अग्नये पावकायेतिवत् स्वतःसिद्धश्चेति। प्रथमेऽपि स्वतःप्रामाण्यवादिनां समभिव्याहारजन्यज्ञानस्य प्रमात्वसिध्या प्रामाण्यं तस्याक्षतम्। विशेषणविधिस्तु कर्तव्यतामात्रबोधक इति। तदिदं **प्राप्तिविरोधयोरसतोरित्युपसंहारेऽनुसंधेयम्**। **तस्मादिति**। यस्मिन्नर्थे यस्य तात्पर्यं नास्ति, तस्मिन्नर्थे तस्याप्रमाणत्वादित्यर्थः।

सामर्थ्ययोः संभवात् । अर्थित्वं तावत् आध्यात्मिकादि[1]दुर्विषहदुःखाभितापात्, परस्मिन् ब्रह्मणि च निरस्तनिखिलदोषगन्धे अनवधिकातिशयासंख्येयकल्याणगुणगणे निरतिशयभोग्यत्वादिज्ञानाच्च संभवति । सामर्थ्यमपि पटुतरदेहेन्द्रियादिमत्तया संभवति । देहेन्द्रियादिमत्त्वञ्च सर्वेषु सृष्टिवाक्येषु देवतिर्यङ्मनुष्यस्थावरात्मना चतुर्विधसृष्ट्यामानात् सिद्धम् । देवादिभेदश्च तत्तत्कर्मानुगुणब्रह्मलोकप्रभृतिचतुर्दशलोकस्थभोगयोग्यदेहेन्द्रियादियोगायत्तः । तथा, 'देवत्वं गच्छन्ति, य एता उपयन्ति' इति देवत्वप्राप्त्यर्थक्रतुविधान्यथानुपपत्त्याऽपि देवताविग्रहवत्त्वसिद्धिः । ज्योतिष्टोमादिविधान्यथानुपपत्त्या [2]देशान्तरदेहान्तरभोग्य — ऐहिकसुख[3]विलक्षण-स्वर्गशब्दोक्तसुखरूपतत्फलभोक्तृ[4]कर्मदेवसिद्धेरभ्युपगतत्वात् । देवतासायुज्यसालोक्यादिफलकर्मविधान्यथानुपपत्त्या देवताविग्रहाणां तद्भोग्यभोगोपकरणानामभ्युपगन्तव्यत्वाच्च ।

"विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्" । नन्वेवं[5] मन्त्रार्थवादादिभिर्देवताया विग्रहाभ्युपगमे कर्मणि विरोधः प्रसज्यते । बहुषु यागेषु युगपदेकस्येन्द्रस्य विग्रहवतः, 'अग्निमग्न आवह', 'इन्द्र आगच्छ' इत्यादिना आहूतस्य संनिधानानुपपत्तेर्विरोधः प्रसज्यते इति चेत्—तन्न— अनेकप्रतिपत्तेर्दर्शनात् । दृश्यते हि सौभरिप्रभृतीनां शक्तिमतां युगपदनेकशरीरप्रतिपत्तिः ।

"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" । मा भूत् कर्मणि विरोधः । वैदिके तु शब्दे विरोधः प्रसज्यते । देवताविग्रहाभ्युपगमे हि विग्रहस्य सावयवत्वेनानित्यत्वात्, इन्द्रादेरर्थस्य विनाशादूर्ध्वं, प्राक् उत्पत्तेश्च—तदर्थवाचिवैदिकशब्दानां सत्त्वे, शब्दस्यार्थेन औत्पत्तिकः संबन्धो न स्यात्; शब्दस्वरूप-

1. आध्यात्मिकादिषु क. 2. घ. कोशे देशेत्यादि — नुपपत्त्येत्यन्तं भ्रष्टम । 3. सुखलक्षण ख. ग. । 4. भोक्तृदेहसिद्धेः क. 5. नन्वेभिः क.

एता उपयन्तीति। पञ्चदशरात्रीरुपयन्ति ' पञ्चदशरात्रं सत्रमनुतिष्ठन्तीति यावत् । अयञ्च पञ्चदशरात्रः ' चत्वारः पञ्चदशरात्रा ' इत्युक्तेषु प्रथमः (ता म.ब्रा. २३.६.) । एतस्य फलं ' देवत्वं गच्छन्ती ' ति ।

स्यापि नाशे, अनित्यत्वं स्यात्। ततश्च, "औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः" इति सूत्रप्रतिपादितं शब्दार्थसंबन्धानां नित्यत्वं विरुध्येत इति चेत्— न। 'वेदेन नामरूपे व्याकरोत् सतासती प्रजापतिः', 'नामरूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवादीनां चकार सः' इति प्रत्यक्षानुमानशब्दिताभ्यां[1] श्रुतिस्मृतिभ्यामिन्द्राद्यर्थानां वेदप्रभवत्वावेदनात्। यथा शिल्पिना शिल्पशास्त्रोदित [नाम] रूपाद्यनुसंधानपूर्वकं निर्मितं देवताप्रतिमादिकं पूर्वपूर्वसमानरूपम्, एवमिन्द्राद्यर्थोऽपि वेदोक्तनामरूपानुसंधानशालिना प्रजापतिना निर्मीयमाणः पूर्वपूर्वसमानरूप एव भवति। ततः समानरूपाभिव्यङ्ग्याकृतिवाचित्वादिन्द्रादिशब्दानाम्, व्यक्तीनामनित्यत्वेऽपि जातिवाचिगवादिशब्दवत् इन्द्रादिशब्दानामपि जातिवाचितया नानित्यार्थसंयोगकृतो विरोध इत्यर्थः।

ननु, 'मन्त्रकृतो वृणीते', 'संहिताकारपदकारसूत्रकारब्राह्मणकाराणाम्,' 'विश्वामित्रस्य सूक्तं भवति' इति मन्त्रादीनां कार्यत्वश्रवणान्न वेदनित्यत्वमित्यत्राह—, "अत एव च नित्यत्वम्"। 'अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतयः' इति मन्त्रकृत्त्वेन प्रसिद्धानामपि वसिष्ठविश्वामित्रादीनां वेदजन्यत्वाज्ज्ञानात् मन्त्रकृत्त्वं मन्त्रद्रष्टृत्वमेव, न तु मन्त्र[2]कर्तृत्वमित्यवसीयते। अतो वेदनित्यत्वस्य नानुपपत्तिः।

नन्वेवमपि शब्दस्य तदुपादानभूताहङ्कारादेश्च नष्टत्वात् कथं वेदनित्यत्वम्? कथं वा सर्वेषां वेदशब्दप्रभवत्वम्? तत्राऽऽह "समाननामरूपत्वाच्चाऽऽवृत्तावप्यविरोधो दर्शनात् स्मृतेश्च"। कृत्स्नोपसंहारे जगदुत्पत्त्यावृत्तावपि पूर्वोक्तसमाननामरू-

1. शब्दाभ्यां क. ख. 2. करत्वं ख.

औत्पत्तिकः सहजः, सांसिद्धिक, नित्य इति यावत्। **रूपाभिव्यङ्ग्याकृतीति**। **रूपं** संस्थानम्। अस्मन्मते तदतिरिक्ताकृतेरभावेऽपि मीमांसकादिभिस्तदतिरिक्तनित्यजातिरूपाकृतिकथनात् तान् प्रति तथोक्तिः। **न वेदनित्यत्वमिति**। ननु पूर्वपक्षिणो मीमांसकस्यापि वेदनित्यत्वमिष्टमिति कथं तेन वेदनित्यत्वाक्षेपः, कथञ्च सूत्रे तान् प्रति वेदनित्यत्वस्थापनमिति न शङ्क्यम्। अर्थवादानां वाच्यार्थे तात्पर्यमिच्छतस्ते मन्त्रकृत्त्वसंहिताकारत्वाद्यर्थवादार्थेऽपि तात्पर्यस्यावश्यकतया वेदनित्यत्वं न सिध्येदिति शङ्काभिप्रायात्। एवमुत्तरसूत्रेऽपि अर्थवादस्य वाच्यार्थतात्पर्ये प्राकृतप्रलयस्यापि स्वीकार्यतया वेदनित्यत्वं न स्यादिति शङ्कातात्पर्यं ग्राह्यम्।

पत्वस्य तदवस्थत्वादेव न शब्दानित्यत्वम् । 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्', 'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' इति श्रुतिस्मृतिभ्यां तथैव प्रतिपादनादेतस्य नित्यत्वमपौरुषेयत्वञ्च । इदमेव हि वेदस्यापौरुषेयत्वम्, यत् पूर्वपूर्वोच्चारणक्रमानुसंधानसापेक्षोच्चारणक्रमवत्त्वम् । तदिदानीन्तनवेदे सर्गाऽऽद्यवेदेऽपि समानम् । इयांस्तु विशेषः- —भगवद्व्यतिरिक्ताः सर्वेऽपि पूर्वपूर्ववेदानुपूर्व्यनुभवजनितसंस्कारवशेन पूर्वानुपूर्वीं स्मृत्वा तयैवानुपूर्व्या वेदमुच्चारयन्ति, भगवांस्तु संस्कारनिरपेक्षमेव पूर्वानुपूर्वीमनुसंधाय तयैवानुपूर्व्या वेदमुच्चारयतीति । इदमेव हि पौरुषेयप्रबन्धापेक्षया वेदस्य वैलक्षण्यं नित्यत्वञ्च ।

ननु चतुर्मुखकर्तृकावान्तरकल्पसृष्टिविषयतयाऽपि, 'धाता यथापूर्वमकल्पयत्' इत्यादिप्रमाणानामुपपत्तौ स्वतन्त्रपरमात्मकर्तृकब्रह्मकल्पाद्यसमयप्रवृत्तवेदचतुर्मुखादिसृष्टेः समानानुपूर्वीकत्वसमाननामरूपकृत्यत्वादौ किं प्रमाणमिति चेत्— उच्यते । चतुर्मुखादेर्नामरूपकृत्यादीनि इतिहासपुराणादिभ्योऽवगत्य, 'एतादृशनामरूपकृत्यविशिष्टश्चतुर्मुखो भवानि' इत्येवंसकल्पपूर्वकं भगवन्तमाराध्य तत्तत्पदं प्राप्नुवन्तीति हि शास्त्रप्रसिद्धिः । यदि हि कल्पान्तरे उत्पद्यमानश्चतुर्मुखो विलक्षणनामरूपकृत्यः स्यात्, तदा तस्य भगवदाराधकस्य वाञ्छितार्थसिद्ध्यभावात् तदिष्टसाधनत्ववेदकशास्त्रस्याप्रामाण्यमेव स्यात् । तत्तत्पदाभिलाषिणः प्रवृत्तिश्च कस्यापि न स्यात् । अतः प्राक्तनसृष्ट्यावृत्तावपि यथापूर्वमेव सृष्टिरिति देवताधिकरणे स्थितमिति ॥

ननु अग्निलोकादूर्ध्वलोकवर्तिनामर्चिराद्यनतिवाह्यानां [1]ब्रह्मोपासकदेवानामर्चिराद्यातिवाहिकचिन्तनरूपाङ्गासंभवात्, तदङ्गत्वस्य, "तच्छेषगत्यनुस्मृतियोगाच्च", "योगिनः प्रति स्मर्येते स्मार्ते चैते" इत्यादिष्वविष्कृतत्वात्, तदङ्गहीनानां देवानां कथमङ्गिभूतब्रह्मविद्यायामधिकार इति चेन्न—आतिवाहिकचिन्तनस्य दृष्टार्थतया तत्तल्लोकवर्तिनां [2]तत्तदूर्ध्वलोकवर्त्यातिवाहिकचिन्तनेनैव साद्गुण्योपपत्तेः । मृतयजमान[3]के-

1. ब्रह्मोपासकदेवानामित्यधिकं क. 2. तदूर्ध्वेति एकतत्पदं ख. कोशे । 3. मृतयजमानेष्टि ख.

ब्रह्मकल्पः । चतुर्मुखस्याहः सर्वं कल्प । तत्र, यत्र तदुत्पत्तिः, स ब्रह्मकल्प । इत्येवमित्यनेन रुद्रो भवानि, इन्द्रो भवानि, वसिष्ठो भवानीत्यादिसंकल्पग्रहणम् ।

ष्टिकर्मणि सूक्तवाके यजमानस्यायुराशासनाद्यभावात्, अनपेक्षितम्, 'आयुराशास्ते' इत्यादिकमंशं विहाय अपेक्षितांशपाठस्याङ्गीकृतत्वात् तद्वदिहाप्यनपेक्षितातिवाहिकांशत्यागेनापेक्षितस्वस्वलोकोर्ध्ववर्त्यातिवाहिकानामेव चिन्तनीयत्वोपपत्तेः ॥

ननु, 'तदुपर्यपि बादरायणः संभवात्,' 'मध्वादिष्वसंभवात्' इत्यधिकरणद्वयेन किं प्रयोजनम्; देवतानां देवताविशेषाणाञ्चार्थित्वसामर्थ्यनिर्णयस्य मनुष्याणां प्रवृत्तिविशेषानौपयिकत्वात्। न च देवानामनेनाधिकरणद्वयेन किञ्चिदस्ति प्रयोजनम्। तेषां स्वकीयपटुतरदेहादिमत्त्वे अर्थित्व[1]सद्भावनिर्णये च अधिकरणन्यायानपेक्षणादिति चेत् — उच्यते — 'परं ब्रह्म देवानां वस्वादिदेवताविशेषाणाञ्चोपास्यं फलप्रदञ्चेति ईदृशमहिमविशिष्टतया उपासनकालेऽनुसंधेयत्वसिद्धिलक्षणप्रयोजनसद्भावात्। देवताविग्रहासिद्धौ मधुविद्याया देवतापदप्राप्तिः फलमित्यपि न भवेत्। गत्यनुस्मृतौ अचेतनानामर्चिरादीनामेव मार्गपर्वत्वेन चिन्तनीयता स्यात्; नातिवाहिकदेवतानाम्। तथा, "भाक्तं वाऽनात्मवित्त्वात्" इति सूत्रोक्तन्यायेन ज्योतिष्टोमादिकर्मफलं भुञ्जानानां, 'तं देवा भक्षयन्ति' इति निरन्तराजानदेवकर्मकरभावावगत्या वैराग्यं न सिध्येत्। [मानान्तर] प्राप्तिविरोधयोरसतोर्मन्त्रार्थवादानां प्रतीयमानार्थे प्रामाण्यमस्तीति न्यायव्युत्पादनेन, 'प्लवा ह्येते अदृढा यज्ञरूपाः', 'एतत् तृतीयं स्थानम्' इत्यादिमन्त्रार्थवादैर्वैराग्यसंसिद्धिः' इत्यादीनि प्रयोजनानि द्रष्टव्यानि ॥ प्रकृतमनुसरामः। ३-११.

चतुष्पात्त्व षाड्विध्याभ्यां ब्रह्मणो गायत्रीसादृश्यानुसंधानरूपा विद्या प्रस्तूयते—[2]

'इन्द्रः शचीपतिः, बलेन पीडितः। दुश्च्यवनो वृषा, समित्सु सासहिः॥'

इति गायत्री चतुष्पदा; एकैकस्य पादस्य षडक्षरात्मकतया षडक्षरपादवत्त्वेन षड्विधा च। एवं ब्रह्मणोऽपि सर्वभूतशब्दितात्मवर्ग एकः पादः; कर्मार्जितभोगस्थानरूपः पृथिवीलोक एकः पादः; भोगोपकरणं शरीरमेकः पादः; आत्मस्थित्यनुगुणप्रदेशविशेषरूपं हृदयमेकः पाद इति भूतपृथिवीशरीरहृदयानि चत्वारः

1. संभव ख. 2. गायत्री वा इत्यादिना इत्यधिकं ख. ग.

श्रुतप्रकाशिकोक्तं प्रयोजनं प्रदर्श्य न्यायरक्षामप्यायुक्तमप्याह **देवताविग्रहेति**। **अवगत्या वैराग्यमिति**। अवगत्यधीनं वैराग्यमित्यर्थः। **प्राप्तिविरोधयोरिति**। प्राप्तिः प्रमाणान्तरप्राप्तता। अप्राप्ते हि शास्त्रमर्थवत्।

३—१२.

गायत्री वा इदं सर्वं भूतं यदिदं किञ्च । वाग्वै गायत्री । वाग्वा इदं सर्वं भूतं गायति च त्रायते च ॥ १ ॥

पादाः । तत्र सर्वभूतलक्षणपादस्य ब्रह्मात्मकत्वाकर्तृकगानकर्मत्वत्राणकर्मत्वलक्षणं विधाद्वयम्; पृथिवीलक्षणस्य पादस्य सर्वभूतप्रतिष्ठात्वसर्वभूतानतिवर्त्यत्वलक्षणं विधाद्वयम्; शरीरहृदयलक्षणयोः पादयोः प्राणप्रतिष्ठात्वतदनतिवर्त्यत्वलक्षणं विधाद्वयमेव, द्वयोरपि विधाद्वययोरपि[1] भेदाभावात् । ततश्च [पर] ब्रह्मरूपा गायत्री भूतपृथिवीशरीरहृदयरूपपादचतुष्टयवत्तया चतुष्पदा, गानकर्मत्वत्राणकर्मत्व सर्वभूतप्रतिष्ठात्वसर्वभूतानतिवर्त्यत्व सर्व [प्राणि] प्राणप्रतिष्ठात्वसर्वप्राणानतिवर्त्यत्वलक्षणविधाषट्कयुक्ततया षड्विधा च । अतः चतुष्पात्त्वषाड्विध्याभ्यां ब्रह्मणि गायत्रीसादृश्यानुसंधानं कर्तव्यमिति प्रतिपादयति--**गायत्री वा इदं सर्वं भूतं यदिदं किञ्च** । अत्र गायत्रीशब्देन न प्रसिद्धा गायत्री अभिधीयते । तस्याः भूतादिपादचतुष्टयसंबन्धाभावात् । 'तावानस्य महिमा' इति [2]वक्ष्यमाणपुंसूक्तमन्त्रप्रतिपाद्यत्वाभावाच्च । अपितु परमात्मा । यथा कुण्डपायिनामयने, 'मासमग्निहोत्रं जुहो (ह्व ?) ति' इति अग्निहोत्रशब्दः प्रयुज्यमानः तत्सादृश्यविशिष्टानुष्ठानार्थः, तथा गायत्रीशब्दो ब्रह्मणि प्रयुज्यमानः तत्सादृश्यानुसंधानार्थः । ततश्च गायत्रीशब्देन ब्रह्मैवाभिधीयते । वैशब्दोऽवधारणार्थः । ब्रह्मैव परिदृश्यमानसर्वभूतात्मकमित्यर्थः । ततश्च ब्रह्मणो भूतलक्षणपादवत्त्वमुक्तम् । अथ गायत्रीशब्दप्रवृत्तिनिमित्तमपि ब्रह्मण्युपपादयन् विधाद्वयमाह **वाग्वै—त्रायते च । वाग्वै गायत्री** । गायत्रीशब्दितं गायत्रीसदृशं[3] ब्रह्मैव वाग्रूपविशिष्टं भवतीत्यर्थः । 'शब्दमूर्तिधरस्यैतद्रूपं विष्णोर्महात्मनः' इति पराशरस्मृत्यानुरोधेन ब्रह्मण एव शब्दरूपत्वमिति भावः । ततश्च किमित्यत्राह **वाग्वा इदं—च** ।

1. अयं अपिः न क. कोशे. 2. वक्ष्यमाणेऽधिकं क. कोशे. 3. 'गायत्रीसदृश'मिति न क.

उक्ता प्रागादिदिग्वर्तिवस्वाद्यनुभाव्यादित्यमधुविद्या । प्रागादिसुषिगतादित्यादिद्वारोपासनाङ्गकब्रह्मविद्या प्रस्तूयते **गायत्री**ति । **तत्सादृश्यविशिष्टे**ति । इदमग्निहोत्रादं नित्याग्निहोत्रसदृशार्थकम् । तेनास्य कर्मणः नित्याग्निहोत्रात् धर्मातिदेशसिद्धौ तदीयसर्वाङ्गविशिष्टपूर्वकर्मानुष्ठानसिद्धिरिति प्रकरणान्तरादिह कर्मभेद इति स्थितं पूर्वतन्त्रे (७—३—१; २—३—११.)।

ब्रह्मण्युपपादयन्निति । अत्र विद्यायां श्रुतिव्याख्याप्रकारः सर्वोऽपि टीकायां वादप्रकाशमतनिराकरणावसरे (ज्योतिरधिकरणे) कृतस्यानुवादरूप एवेतीदमग्रे वक्ष्यत एव । ननु

या वै सा गायत्री इयं वाव सा येयं पृथिवी। अस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥ २ ॥

वाग्रूपमेव ब्रह्म सर्वाणि भूतान्यभिधत्ते; हिताहितविधिनिषेधमुखेन त्रायते च। अतश्च ब्रह्मणो वाग्रूपस्य [1]सर्वभूतगानत्राणकर्तृत्वाभ्यां गायत्रीशब्दवाच्यत्वम्, भूतात्मकपादवतो ब्रह्मणो [2]वाग्रूपब्रह्मकर्तृकगानत्राणकर्मत्वाभ्यां द्वैविध्यञ्चोक्तं भवति।

उक्तार्थानुवादपूर्वकं द्वितीयं पादं सामानाधिकरण्येनाऽऽह—**या—पृथिवी**; उक्तरूपविशिष्टप्रकृतधर्मिपरो यच्छब्दः। **या** सर्वभूतरूपैकपादयुता **गायत्री** गायत्र्याख्यं ब्रह्म, तदेव प्रसिद्धा पृथिवीत्यर्थः। कथं पृथिव्या ब्रह्मात्मकत्वमित्यत्राह **अस्यां हीदं सर्वं भूतं प्रतिष्ठितम्**। ब्रह्मात्मकत्वादेव हि सर्वभूतप्रतिष्ठात्वम्। न हि केवलपृथिव्याः सर्वभूतधारणशक्तिरस्तीत्यर्थः। प्रतिष्ठात्वञ्च नियतमित्याह **एतामेव नातिशीयते**। पृथिवीं भूतानि नातिवर्तन्ते। कर्मवश्यात्मनां हि प्रतिष्ठात्वादेव पृथिवी नियमेनाशक्यातिक्रमणेत्यर्थः। पृथिवीमयब्रह्माण्डोदरे हि भोक्तृवर्गः परिवर्तते, न ततोऽन्यत्रेति भावः। एवं द्वितीयः पादः, भूतप्रतिष्ठात्वतदनतिवर्त्यत्वरूपं विधाद्वयञ्चोक्तम्।

1. सर्वभूतेत्यधिकं **ख. ग.** 2. वाक्कर्तृक. **ख.ग.**

गायत्रीपदेन सर्वभूतात्मकत्वानुपपत्त्या ब्रह्म मा ग्राहीत्येतदर्थमेव 'वाग्वै गायत्री'ति वाक्यप्रवृत्तिरस्तु। अतः सर्वभूतगानादिकर्तृत्वात् भूतात्मकत्वमौपचारिकं गायत्र्यामिष्टमिति चेन्न—वक्ष्यमाणपुंसूक्तर्गनन्वयात्। ननु छन्दोभिधानादितिसूत्रे टीकान्ते शङ्कितरीत्या सर्वभूतात्मकत्वस्य गायत्रीछन्दसि बाधात् आकाशाधिकरणनयेन गानत्राणरूपयोगार्थमात्रविवक्षया गायत्रीपदं ब्रह्मपरं भवेत्। तन्मा भूत्। गायत्रीपदेन वाचं छन्द एव गृहीत्वा तत्सादृश्यरूपं प्रवृत्तिनिमित्तं ग्राह्यमित्युपपादयितुं 'वाग्वै गायत्री'त्युक्तमिति किं न स्यात। अतः, 'ब्रह्मैव वाग्रूपविशिष्टं भवति' इत्यर्थवर्णनं शब्दमूर्तिधरस्येत्यादिप्रमाणोदाहरणञ्च कुत इति चेन्न — गायत्रीसादृश्यरूपार्थविवक्षायाः सैषा चतुष्पदेत्यादित एव स्पष्टं सिद्धेः अत्र छन्दसो वाचः सर्वभूतगानत्राणकरत्वमपि तदूतब्रह्मात्मकत्वाधीनमिति तत्त्वज्ञापनस्य युक्तत्वात्। अत्रेदं बोध्यम—सर्वभूतात्मकपादे वाक्कर्तृकगानत्राणकर्मत्वरूपविधाद्वयमेव प्रकृते वक्तव्यम्, पादान्तरे विधान्तरवत्। एवं सति,उपरि पादत्रयगतरीत्या, 'इदं हि सर्वं भूतं गायत्र्या गीयते च त्रायते च' इति निर्देशे कार्ये, 'वाग्वै गायत्री वाग्वा'इति रीत्यन्तरादरणम्, छन्दसो गायत्र्याः सामान्यतो वाग्रूपत्वेनैव सर्वभूतगानकर्तृत्वमाक्षेपसमाधानाभ्यामिव गानत्राणकर्तृत्वतोऽपि गायत्रीत्वमिति ज्ञापनाय च। तत्र वाक्पदस्य ब्रह्मपर्यन्तता च पूर्वं पश्चाच्चेवात्रापि गायत्रीपदस्य ब्रह्मपरत्वादित्यलमधिकेन।

या वै सा पृथिवी इयं वाव सा यदिदमस्मिन् पुरुषे शरीरम् । अस्मिन् हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते ॥ ३ ॥

यद्वै तत् पुरुषे शरीरमिदं वाव तद् यदिदमस्मिन्नन्तः पुरुषे हृदयम् । अस्मिन् हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते ॥ ४ ॥

अथ तृतीयं पादमाह **या वै सा पृथिवी—शरीरम्** । अत्र पुरुषशब्दः शरीरविशिष्टजीवपरः । **पृथिवी** पृथिवीरूपपादविशिष्टा **या** गायत्री = गायत्र्याख्यं ब्रह्म, सा **शरीरं** शरीराख्यपादविशिष्टेत्यर्थः । भूतपृथिव्योर्गायत्रीसामानाधिकरण्येन निर्दिष्टतया भूतपृथिवीशब्दयोः ब्रह्मपर्यन्तत्वेन तदुपस्थापनक्षमत्वात् अग्र्यप्रायन्यायेन अत्र शरीरलक्षणपादान्तरनिर्देशकस्य शरीरशब्दस्य निष्कर्षकशब्दत्वेऽपि सामानाधिकरण्येन निर्देशो युक्तः । शरीरस्य ब्रह्मात्मकत्वं प्राणप्रतिष्ठात्वतदनतिवर्त्यत्वाभ्यामुपपादयति **अस्मिन्—शीयन्ते** । **नातिशीयन्ते** नातिवर्तन्त इत्यर्थः ।

चतुर्थं पादमाह **यद्वै—हृदयम्** ।[1] [**पुरुषे शरीरं** पुरुषशब्दितशरीरविशिष्टजीवनिष्ठ]शरीराख्यपादविशिष्टं **यद्** गायत्र्याख्यं ब्रह्म, तदेव **हृदयं** हृदयशरीरकम् हृदयलक्षणपादकमित्यर्थः । हृदयस्य ब्रह्मात्मकत्वमुपपादयति **अस्मिन्—शीयन्ते** । प्राणशब्देन प्राणापानादयः इन्द्रियाणि[2] वा कथ्यन्ते । तेषां हृदयसंबन्धिनाडीद्वारा हृदयप्रतिष्ठितत्वम् । एवं तृतीयचतुर्थपादौ, प्राणप्रतिष्ठात्वतदनतिवर्त्यत्वरूपं विधाद्वयञ्चोक्तम् ।

1. नेदं क. कोशे । 2. च क.

तृतीयं पादमिति । तृतीये तुरीये च वाक्ये गायत्रीपदानिर्देशेऽपि शरीरहृदययोस्तत्पादत्वं **सैषा चतुष्पदेत्यादितोऽवसीयते** ।

अग्र्यप्रायन्यायेनेति । शाबरभाष्ये, 'प्राये वचनाच्च' (२-१-११.) इति सूत्रे, 'प्रधानकर्मप्राये वचनं प्रधानकर्मतामुपोद्बलयति, यथा अग्र्यप्राये लिखितं दृष्ट्वा भवेत् अयमग्र्य इति मतिः ।' इत्युक्तम् । तन्मूलकोऽयं सर्वत्राग्र्यप्रायन्यायव्यवहारः । **युक्तश्चेति** । एवं पूर्ववाक्यपदेऽपि द्रष्टव्यम् । 'रसोऽहमप्सु (गी. ता. चं)' इतिवदिति ।

प्राणापानादय इन्द्रियाणि वेति । त्रयोदशखण्डे हृदयसुषिषु प्राणापानादिनिर्देशात् चक्षुरादिकतिपयेन्द्रियकथनाच्च तत्समानाभिप्रायकत्वस्यात्र युक्तत्वादिति भावः । इदं सूचयितुमेव प्राणपदव्याख्यानं पूर्वमकृत्वाऽत्र कृतम् ।

सैषा चतुष्पदा षड्विधा गायत्री । तदेतदृचाऽभ्यनूक्तम् – ॥ ५ ॥
तावानस्य महिमा ततो ज्यायाँश्च पुरुषः ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ इति ॥ ६ ॥

एवमुक्तं चतुष्पात्त्वं षाड्विध्यञ्च निगमयति **सैषा चतुष्पदा षड्विधा गायत्री** ॥ नन्वेवं चतुष्पात्त्वे ब्रह्मणः परिच्छिन्नत्वं स्यादिति शंकायाम् उक्तस्य महिम्न एतावत्त्वप्रतिषेधिकामृचमुदाहरति **तदेतदृचाभ्यनूक्तम् । तदेतत्** गायत्र्याख्यं ब्रह्म, अभिमुखीकृत्य, ऋचाप्युक्तमित्यर्थः । ताम्[1] ऋचं पठति **तावानस्य महिमा** । पूर्वोक्तः सर्वोऽपि एतस्य **महिमा** नियाम्यवर्गः । **ततो ज्यायांश्च पुरुषः** । पूर्वोक्तमहिमापेक्षया **पुरुषो ज्यायान्** [परमात्मा ज्यायान् ।] ततोऽधिकमहिमशालीत्यर्थः । **पादोऽस्य सर्वा भूतानि** । अत्र **सर्वाभूतानीति** कार्यजगदन्तर्गता अचित्संसृष्टाश्चेतना उच्यन्ते । ते सर्वे **पादः** अंशमात्रमित्यर्थः । सर्वशब्दात् परस्य शेः, 'सुपां सुलुक्' इति लुकि नलोपे [च] रूपम् । **त्रिपादस्यामृतं दिवि** । अत्र द्युशब्दः समष्टिव्यष्टितत्त्वबहिर्भूताप्राकृतस्थानविशेषपरः । अप्राकृते स्थानविशेषे **अस्य** परमात्मनः अमृतं पादत्रयमित्यर्थः । त्रिपात्त्वञ्चाप्राकृतैर्भोग्यभोगस्थानभोगोपकरणविशेषैर्वा, [2]भूषणास्त्रादिरूपेण जगदन्तर्गतवस्त्वभिमानिभिर्नित्यैः भगवदनुभवमात्रपरैर्नित्यसिद्धैश्च मुक्तैश्च आत्मभिर्वा संभवति ।

अथ चतुर्थपादत्वेनोक्तस्य उपास्यतया वक्ष्यमाणस्य हृदयस्य स्तुत्यर्थं हृदयाकाशस्य बाह्याकाशाभेदेन महत्त्वं वक्तुं बाह्याकाशस्य ब्रह्मतुल्यत्वं सामानाधिकरण्येनाऽऽह

1. तामेव ऋचं क. 2. भूषणान्नादि. ख.

उक्तस्य महिम्न इति । पुरुषसूक्ते, 'स भूमिं विश्वतो वृत्वा' इत्यारभ्य. एतावानस्य महिमा' इत्युक्तम् । पृथिव्यां भूतशरीरहृदयान्यन्तर्गतानि । अतः **तावानस्य महिमेति** पृथिव्यन्तर्गतपदार्थकृतचतुष्पात्त्वरूपमहिमानुवाद इति व्यक्तं श्रुतप्रकाशिकायाम् । **गायत्र्याख्यं ब्रह्मेति** । ब्रह्माभिप्रायेण **तदेतदिति** नपुंसकत्वमिति व्यक्तं तत्रैव । उपरि, **यद्वै तद् ब्रह्मेति** इति स्थितस्य तदेतदिति पूर्वेण सहैकवाक्यताऽप्यस्तु इत्याशयः स्यात् । अत्र **तदेतत्** पादवत्त्वम् = पादपरिच्छिन्नत्वं **अनूक्तम** अपरिच्छिन्नत्वानुबन्धेन ऋचोक्तमित्यर्थवर्णनमपि संभवति । **मुक्तैश्चेति** । **मुक्तानां सर्वाभूतानीति** पूर्वदशया गृहीतत्वे तु दिव्यनगरादिपालनाधिकृतनित्यगणग्रहणम् ।

चतुर्षु पादेषु हृदयस्य किमिति विशिष्य स्तुतिरित्याह **उपास्यतया वक्ष्यमाणस्येति** । यद्यपि – **तदेतत्** पूर्णमिति गायत्रीब्रह्मोपासनमुच्यते । अथ च द्वारोपासनमेवोपरि (१३)

यद्वै तद् ब्रह्मेति इदं वाव तत् योऽयं बहिर्धा पुरुषादाकाशः। यो वै स बहिर्धा पुरुषादाकाशः ॥ ७ ॥ अयं वाव स योऽयमन्तः पुरुषे आकाशः। यो वै सोऽन्तः पुरुष आकाशः ॥ ८ ॥ अयं वाव स योऽयमन्तर्हृदय आकाशः। [1][यो ह वै (यो वै) सोन्तर्हृदय आकाशः]

1. [ ] एवं कुण्डलितं न शाङ्करे। माध्वे त्वस्ति।

यद्वै तद् ब्रह्मेति— [1]**अन्तःपुरुष आकाशः**। स्वकार्यव्याप्तत्वामूर्तत्वाचलत्वादिभिः ब्रह्मतुल्यबाह्याकाशाभिन्नः पुरुषशब्दितशरीरेऽन्तर्वर्तमान आकाश इत्यर्थः। बाह्यान्तराकाशयोर्भेदसत्त्वेऽपि धर्म्यैक्याभिप्रायेणाभेदनिर्देशः। [2]**यो वै सोऽन्तः पुरुष आकाशः**। एवं ब्रह्मतुल्यबाह्याकाशाभिन्नः शरीरान्तराकाशो य इत्यर्थः। **अयं वाव स योऽयमन्तर्हृदय आकाशः**। तादृशशरीरान्तःस्थाकाशाभिन्नो हृदयावच्छिन्नाकाश इत्यर्थः। पूर्ववत् धर्म्यैक्यादिति भावः। [एवं ब्रह्मतुल्यबाह्याकाशाभिन्नपुरुषान्तर्गताकाशाभेदं हृदयाकाशस्योक्त्वा एतादृशमहिमशाली हृदयाकाश इति स्तौति **यो वै सोऽन्तर्हृदय आकाशः**। अन्तर्हृदये वर्तमानो य आकाशः, अयं सः तादृशमहिमशालीत्यर्थः] अनया च हृदयाकाशस्तुत्या चतुर्थपादत्वेनोक्तं हृदयं स्तुतं भवति।

1. यद्वै—यो वै - **आकाशः**। स्वकार्य—ब्रह्मतुल्यो बाह्याकाशो यो वर्तत इत्यर्थः। **अयं वाव**—**पुरुष आकाशः**। तादृशबाह्याकाशाभिन्नःपुरुषशब्दित—श इत्यर्थः इति **ख. ग.** ३. 'योवै—**हृदय आकाशः, अयं सः** तादृशमहिमशालीत्यर्थः। अनया च' इत्यादि **क.** अत्र यो वै सोऽन्तर्हृदय आकाश इति वाक्यग्रहणादिकं नास्ति।

वक्ष्यते – अथापि हृदयच्छिद्रदेवतारूपद्वारोपासनविधानात् एवमुक्तिः। अत्रार्थात्, 'यथा अपरिच्छिन्नव्याप्याकाशस्य शरीरहृदयादिकृतः परिच्छेदः, तथा ब्रह्मणोऽपि चतुष्पात्त्वकल्पनमिति नापरिच्छिन्नत्वक्षतिरिति ब्रह्मणि व्योमवद्भावो दर्शितो भवतीत्यपि ध्येयम्। अत्र मूले **अयं वाव स योऽयमन्तर्हृदय आकाशः, तदेतत् पूर्णमप्रवर्ति** इत्यानुपूर्व्येव शाङ्करे, टीकायां, भावप्रकाशिकायाञ्च लक्ष्यते। न तु, **योवै सोऽन्तर्हृदय आकाश** इति वाक्यं तन्मध्ये लक्ष्यते। उपनिषद्भाष्यपाठस्तु द्वेधा लक्ष्यते। तादृशमूलपाठसत्त्वे तस्य **तदेतत् पूर्ण**मित्युत्तरवाक्येनैकवाक्यताकल्पनया, 'यः सोऽन्तर्हृदय आकाशः तत् तदभिन्नं एतत् गायत्रीब्रह्म—बाह्याकाशाद्यभिन्नहार्दाकाशाभिन्नम् अपरिच्छिन्नत्वेऽप्याकाशवत् हृदयादिना परिच्छिद्यमानं ब्रह्म—वस्तुतः

तदेतत् पूर्णमप्रवर्ति[1]। पूर्णामप्रवर्तिनीँ श्रियं लभते, य एवं वेद ॥९॥

इति तृतीयाध्याये द्वादशः खण्डः

३–१३.

तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः। स योऽस्य प्राङ् सुषिः, स प्राणः, तच्चक्षुः, स आदित्यः। तदेतत् तेजोऽन्नाद्यमित्युपासीत। तेजस्व्यन्नादो भवति, य एवं वेद ॥ १ ॥

अथ योऽस्य दक्षिणः सुषिः, स व्यानः, तच्छ्रोत्रम्, स चन्द्रमाः। तदेतत् श्रीश्च यशश्चेत्युपासीत। श्रीमान् यशस्वी भवति, य एवं वेद ॥ २ ॥

1. अप्रवृत्ति **मा.**

एवं चतुष्पदः षड्विधस्य ब्रह्मणः प्रपञ्चान्तर्भावेन परिच्छिन्नत्वास्थिरत्वशङ्का-व्यावृत्त्यर्थं पूर्णत्वाप्रवर्तित्वगुणकतयोपासनं मोक्षफलं विदधाति **तदेतत् पूर्णम-प्रवर्ति**। **पूर्णत्वमपरिच्छिन्नत्वम् अप्रवर्तित्वमचलत्वम्, पूर्णामप्रवर्तिनीं श्रियं लभते, य एवं वेद**। अनन्तस्थिरा श्रीः मुक्तैश्वर्यमेव। तदुपासीनो मुक्तिं भज-तीत्यर्थः। ३–१२.

अथोक्तब्रह्मोपासनाङ्गत्वेन द्वारोपासनं विधीयते—**तस्य—देवसुषयः**। **तस्यैतस्य** चतुर्थपादत्वेन निर्दिष्टस्य प्रकृतस्य **हृदयस्य** देवताधिष्ठानभूतानि **पञ्च** द्वारच्छिद्राणीत्यर्थः। **स योऽस्य—वेद**। प्राणवृत्तिविशेषाप्यायितचक्षुरनुग्राहक-मादित्यस्य हृदयप्राक्सुषिरद्वारपालस्य तेजोन्नाद्यतयोपासने उपासकः स्वयमपि तेजस्वी अन्नादो भवतीत्यर्थः। **तदेतदिति** आदित्यस्य तेजोन्नाद्यापेक्षया नपुंसकलिङ्गनि-र्देशः। [**तेजस्वित्वं** लावण्यम्] एवमुत्तरत्रापि।

अथ योऽस्य—वेद। **श्रीमान्** संपत्तिमान्। **ब्रह्मवर्चसं** वृत्ताध्ययनजं

पूर्णमप्रवर्ति' इति व्याख्यानमपि संभवति। अथापि तस्य पाठस्य टीकादौ अदर्शनात्, **तदेतत् पूर्णमित्यस्य** चतुष्पात् षड्विधं ब्रह्मेत्येव टीकायां व्याख्यानात्, **माध्वरीत्या** तादृशमूलपाठादर-णेऽपि 'यो वै सोऽन्तर्हृदय आकाश' इत्यत्रैवावान्तरवाक्यद्वयकल्पनया, योऽयमन्तर्हृदय आकाशः, अयं **सः** उक्तमहिमशालीति टीकाऽविरोधेन योजना कृता अधिकपाठे इति ध्येयम्।

स प्राणः, तच्चक्षुः स आदित्य इति। सुषिः प्राणः, प्राणश्चक्षुः, चक्षुरादित्य इत्यर्थः। अभेदोऽयं यथायथमौपचारिक इति व्यक्तम्। **नपुंसकेति**। नन्वेवं निर्वाहः **तदेतत् की-**

अथ योऽस्य प्रत्यङ् सुषिः, सोऽपानः, सा वाक्, सोऽग्निः। तदेतत् ब्रह्मवर्चसमन्नाद्यमित्युपासीत। ब्रह्मवर्चस्यन्नादो भवति, य एवं वेद॥ ३॥

अथ योऽस्योदङ् सुषिः, स समानः, तन्मनः, स पर्जन्यः। तदेतत् कीर्तिश्च व्युष्टिश्चेत्युपासीत। कीर्तिमान् व्युष्टिमान् भवति, य एवं वेद॥ ४॥

अथ योऽस्योर्ध्वः सुषिः स उदानः, स वायुः, स आकाशः। तदेतदोजश्च महश्चेत्युपासीत। ओजस्वी महस्वान् भवति, य एवं वेद॥ ५॥

ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः। स य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद, अस्य कुले वीरो जायते। प्रतिपद्यते स्वर्गं लोकम्, य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद॥ ६॥

1. ब्रह्मवर्चस्वी मा.

तेजः। **पर्जन्यः** देवताविशेषः। **व्युष्टिः** देहकान्तिः। **ओजः** बलम्। **महत्त्वं महः**। **आकाशश्च** देवताविशेषः।

ते—द्वारपाः। **त एते** उक्तगुणविशिष्टाः आदित्यचन्द्रमोऽग्निपर्जन्याकाशाख्याः **ब्रह्मपुरुषाः** ब्रह्मसंबन्धिनः पुरुषाः **स्वर्गस्य लोकस्य** भगवल्लोकस्य हृदयाकाशाख्यस्य द्वारपालकाः। यद्वा भगवल्लोकस्य **द्वारपाः** आतिवाहिकाः। **स य—**। **अस्य कुले वीरो जायते**। वीरः पुत्रो जायते। विद्यावीर्यसंपन्नो जायत इत्यर्थः। आनुषङ्गिकं फलमुक्त्वा प्रधानफलमाह **प्रतिपद्यते—**। भगवल्लोकद्वारपालकोपासनया अनिवारितः सन् भगवल्लोकं प्रतिपद्यत इत्यर्थः॥

र्तिश्च व्युष्टिश्चेत्युपरितनवाक्ये न घटते। अत. **तदेतदिति** प्राणचक्षुरादिसमाहारतया तावदभिन्नहृदयपरतया वा निर्वाह्यमिति चेन्न – उपरि, 'ते वा एते पञ्च ब्रह्मपुरुषा' इति द्वारपानां विशिष्य ग्रहणात् देवताभूतानाञ्च तेषामुपासने प्राधान्यस्य युक्तत्वात् आदित्याद्युपासनपरत्वं स्वीकृत्य नपुंसकत्वं कथमपि नेयमिति टीकाशयात्। **स उदानः स वायुरिति**। पूर्वं चक्षुरादीन्द्रियकथनादत्र **वायुरदं** वाय्वाप्यायितत्वगिन्द्रियपरं स्याच्चेत्, चक्षुः श्रोत्रं मनो वाक् त्वक्' इति तैत्तिरीयपाङ्क्तोक्तमत्रोक्तं स्यात्। ननु गायत्र्युपासनफलं खलु भगवल्लोकप्राप्तिः। तत् कथं द्वारपरूपाब्रह्मोपासनफलमित्यत्राह **अनिवारितः सन्** इति। तत्फलस्यैतत्फलत्वेन कीर्तनेन तदङ्गमेतदिति ज्ञाप्यत इति भावः। एतच्च वीरजन्म आनुषङ्गिकं फलम्।

अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु, इदं वाव तद् यदिदमस्मिन् अन्तः पुरुषे ज्योतिः। तस्यैषा दृष्टिः ॥ ७ ॥, यत्रैतदस्मिन् शरीरे सँस्पर्शेनोष्णिमानं विजानाति।

एवं गायत्रीविद्याप्रकृतस्य द्युसंबन्धिनः सकलफलप्रदस्य परस्य ब्रह्मणः आभिरूप्यकीर्तिमत्त्वरूपफलविशेषार्थं कौक्षेयज्योतीरूपत्वेनोपासनाविधानायाऽऽह —**अथ यदतः**—**लोकेषु**। 'तथाऽक्षरात् संभवतीह विश्वम्' इत्यत्र जगदन्तर्वर्तिव्यष्टिजाते विश्वशब्दप्रयोगात् **विश्व**शब्दो व्यष्टिपरः। **सर्व**शब्दः परिशेषात् समष्टितत्त्वपरः। ततश्च **अतः परो दिवः** अप्राकृतस्थानविशेषस्योपरिष्टात् समष्टिव्यष्टिबहिर्भूतेषु **अनुत्तमेषु** स्वावधिकोत्तमरहितेषु उत्तमस्थानविशेषेषु, 'तस्य भासा सर्वमिदं विभाति' इत्यवभासकतया ज्योतिश्शब्दितः परमात्मा यो दीप्यत इत्यर्थः। अत्र यच्छब्दस्य सर्वनामत्वेन प्रकृतपरामर्शितया प्रकृतं त्रिपाद् ब्रह्म परामृश्यते। **इदं**—**ज्योतिः**। **तत्** दिवः परस्तात् दीप्यमानं त्रिपाद्ब्रह्म, **यदिदमस्मिन्नन्तःपुरुषे** शरीरस्यान्तः ज्योतिः, **इदं वाव**=कौक्षेयज्योतिरेव। कौक्षेयज्योतिश्शरीरकमेवेत्यर्थः। 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥' इति स्मरणात्। ततश्च तदात्मकत्वानुसंधानं कर्तव्यमित्यर्थः।

तस्यैषा दृष्टिः। **तस्य** परमात्मनः शरीरभूतस्य जाठराग्नेः **एषा दृष्टिः** इदं दर्शनमित्यर्थः। **यत्र—उष्णिमानं विजानाति**। [[1]**यत्र** यदा अस्मिन् शरीरे **हस्तस्पर्शेन** उष्णिमानं विजानाति। इति यत्र] यत् औष्ण्योपलम्भनमित्यर्थः[2]। [उपलभ्यमानस्योष्णस्पर्शस्य जाठराग्निसंबन्धित्वात् तत्स्पर्शसाक्षात्कार एव तत्साक्षात्कार इत्यर्थः।]

1. कुण्डलितं न ग. कोशे.। 2. इत्यर्थइत्यादि इत्यर्थइत्यन्तं घ. कोशे न।

गायत्रीविद्याप्रकृतस्येति। मध्ये **यएवंवेदेति** सकृत्सकृदुक्त्या कौक्षेयज्योतिःकथनानन्तरं **य एवं वेद यएवं वेदेति** द्विरुक्तया, 'ततोभूय इति ततोभूय इति' इति प्रागुक्तानन्तरं तावत्पर्यन्तमेकविषयकमित्यवधार्यते ॥ **अथ यदत इति दिवः अत इति विशेषणं, त्रिपादस्यामृतं दिवि', 'स्वर्गं लोकम्' इति प्रागुक्तपरामर्शात्**। तेन यत्पदमिवेदमपि उक्तब्रह्मैकयं ज्योतिषः साधयतीति ध्येयम्। **परः** परतः।

तस्यैषा श्रुतिः, यत्रैतत् कर्णावपिगृह्य, निनदमिव, नदथुरिव, अग्नेरिव [1]ज्वलत उपशृणोति ।

तदेतत् दृष्टञ्च श्रुतञ्चेत्युपासीत । चक्षुष्यः श्रुतो भवति, य एवं वेद य एवं वेद ॥ ८ ॥

इति तृतीयाध्याये त्रयोदशः खण्डः

---

1. प्रज्वलतः मा.

तस्यैषा श्रुतिः—उपशृणोति । यत्र यदा पुरुषः स्वकर्णौ अङ्गुलीभ्यामपिधाय **निनदमिव** रथघोषमिव, **नदथुरिव** नदथुमिव ऋषभकूजितमिव, बहिर्ज्वलतोऽग्नेः शब्दमिव च शृणोति । इति यत्, तदेव[1] जाठराग्निश्रवणम् । आन्तरस्य शब्दस्य जाठराग्निसंबन्धित्वात् तच्छब्दश्रवणमेव तच्छ्रवणमित्यर्थः ।

तदेतद् दृष्टं च श्रुतं चेत्युपासीत । तदेतत् परमात्मशरीरभूतं कौक्षेयज्योतिः उक्तरीत्या दृष्टत्वश्रुतत्वाभ्यां गुणाभ्यामुपासीतेत्यर्थः । तस्य फलमाह — **चक्षुष्यः श्रुतो भवति, य एवं वेद । चक्षुष्यत्वमाभिरूप्यम् ।** चक्षुषे हित इत्यर्थे, 'शरीरावयवाच्च' इति यत् । **श्रुतत्वं** कीर्तिमत्त्वम् । द्विरुक्तिर्विद्यासमाप्त्यर्था ।

उक्तश्रुत्यर्थः सर्वोऽपि ज्योतिरधिकरणे श्रुतप्रकाशिकायां स्पष्टः ॥

1. तदेतत् ग.

चक्षुष्य इति । ननु **संस्पर्शेनेति** त्वगिन्द्रियदृष्टत्वमुष्णिम्न उक्तम् । ततः त्वगिन्द्रियदृष्टत्वोपासनफलं कथं चक्षुष्यत्वमिति चेन्न । उष्णिम्नस्तथात्वेऽपि उपासनस्य सामान्यतो दृष्टत्वमात्रविषयकत्वात् स्वस्य दर्शनीयरूपत्वात्मकचक्षुष्यत्वसंपत्तेः । न च **दृष्टमित्यस्य** प्रत्यक्षसामान्यविषय इत्यर्थस्वीकारे **श्रुतमिति** व्यर्थमिति वाच्यम् — स्पर्शस्य द्रव्येण सहेन्द्रियग्राह्यत्वात् **कौक्षेयज्योतिषोऽपि** अंशतः प्रत्यक्षस्य सिद्धान्ते वायोरिव स्वीकार्यत्वात्, **शब्दस्य** च द्रव्यं विनैव श्रोत्रग्राह्यत्वात् दृष्टमित्यनेन साक्षात् प्रत्यक्षविषय (द्रव्य) त्वोपासनं **श्रुत**मिति प्रत्यक्षविषयशब्दवत्त्वोपासनञ्चोच्यत इति वैलक्षण्यात् । एवञ्च **तत्स्पर्शसाक्षात्कार एव तत्साक्षात्कार** इति भाष्यपाठे स्पर्शसाक्षात्काररूप एव तत्साक्षात्कारः, न तु रूपसाक्षात्काररूपः इत्यर्थः । **कौक्षेयज्योतिष** स्पर्शेन सहैवोपलम्भात्; रूपेण सहानुपलम्भात् । **तच्छब्दश्रवणमेव तच्छ्रवणमित्यस्य** तु द्रव्यस्य श्रोत्राग्राह्यत्वात् तच्छ्रवणत्वं तदीयशब्दश्रवणे औपचारिकमित्यर्थ इति ।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते—

'अथ यदतः परो दिवो ज्योति'रिति ज्योतिश्शब्दितं प्रसिद्धमन्यादिज्योतिरेव कौक्षेयज्योतिषैक्याध्यासस्य भौतिकज्योतिष्येवोपपत्तेः। दीप्तेः रूपवद्विषयत्वेन नीरूपे परमात्मनि दीप्तेरसंभवात्। 'दिवः परः' इति द्युमर्यादत्वस्यापि निर्मर्यादे परमात्मन्यसंभ (न्यभा) वात्। 'लोकेषु' इत्याधारबहुत्वस्यापि निराधारेऽसंभवात्। चक्षुष्यत्वश्रुतत्वरूपाल्पफलश्रवणाच्च। रूपवद्विषयदीप्ति—द्युमर्यादत्व—आधारबहुत्व—कौक्षेयज्योतिरध्यास—चक्षुष्यत्वश्रुतत्वरूपाल्पफलोपासनोपास्यत्वरूपवाक्यशेषश्रुतलिङ्गानुगृहीतज्योतिश्श्रुत्या प्रसिद्धमन्यादिज्योतिरेवेहोपदिश्यत इति पूर्वपक्षे प्राप्ते उच्यते —

'ज्योतिश्चरणाभिधानात्'। द्युसंबन्धितया निर्दिष्टं निरतिशयदीप्तियुक्तं ज्योतिः परमपुरुष एव। 'पादोऽस्य सर्वा भूतानि' इति मन्त्रे द्युसंबन्धिनः सर्वभूतचरणत्वाभिधानात्। तस्यैव द्युसंबन्धिन इहापि द्युसंबन्धित्वेन प्रत्यभिज्ञानात्। यच्छब्दस्य सर्वनामत्वेन प्रकृतपरामर्शित्वस्यैव युक्ततया द्युसंबन्धित्वेन प्रकृतत्वेपाद्ब्रह्मपरामर्शस्यैव युक्तत्वात्। फलार्थतया परमात्मन्येव कौक्षेयज्योतिश्शरीरकत्वानुसंधानस्योपपत्तेः, रूपवद्विषयदीप्तिद्युमर्यादत्वलोकाधारत्वादीनाम् अन्तरादित्यविद्यान्यायेन विग्रहविशिष्ट एवोपपत्तेः, भासकत्वप्रवृत्तिनिमित्तकज्योतिश्शब्दस्यापि तत्र वृत्तिसंभवात् ज्योतिश्शब्दितः परमपुरुष एव।

'छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगमात् तथा हि दर्शनम्'। पूर्वत्र, 'गायत्री वा इदं सर्वम्' इति गायत्र्याख्यच्छन्दस एव प्रकृतत्वात् तस्यैव, 'पादोऽस्य सर्वा भूतानि' इति सर्वभूतचरणत्वाभिधानात् न परब्रह्मणः प्रकृतत्वम्, येन यच्छब्दश्रुत्या तत्परामर्शः स्यात् इति चेत्, न—तत्र गायत्रीशब्देन न छन्दः परामृश्यते। अपितु ब्रह्मण एव गायत्रीचेतोर्पणमिह निगम्यते। ब्रह्मणि गायत्रीसादृश्यानुसंधानं फलायोपदिश्यत इत्यर्थः। चतुष्पदश्च ब्रह्मणः चतुष्पदया गायत्र्या सादृश्यसंभवात्। तथा अन्यत्रापि सादृश्यात् छन्दोभिधायी शब्दः अर्थान्तरे प्रयुज्यमानो दृश्यते। यथा संवर्गविद्यायाम् अग्निसूर्यजलचन्द्रवायु—वाक्चक्षुःश्रोत्रमनःप्राणरूपेषु दशसु दशत्वसंख्यासाम्यात्, 'सैषा विराडन्नादी' इति छन्दोवाचिनो

३—१४

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत।

विराट्छन्दस्य प्रयोगो दृष्टः। **'भूतादिपादव्यपदेशोपपत्तेश्चैवम्'**। भूतपृथिवीशरीरहृदयलक्षणपादचतुष्टयस्य, 'सैषा चतुष्पदा' इति प्रतिपादितस्य छन्दोरूपायां गायत्र्यामसंभवात् गायत्रीशब्देन ब्रह्मैवाभिधीयते। अतो गायत्रीशब्दितं त्रिपाद् ब्रह्मैव ज्योतिर्वाक्येऽपि यच्छब्दश्रुत्या पूर्वप्रत्यभिज्ञापकद्युसंबन्धित्वलिङ्गानुगृहीतया प्रतिपाद्यते। **'उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्'**। पूर्ववाक्ये, 'त्रिपादस्यामृतं दिवि' इति दिवोऽधिकरणत्वेन निर्देशात् ज्योतिर्वाक्ये, 'दिवः पर' इति अवधित्वेन निर्देशात् न प्रत्यभिज्ञासंभव इति चेन्न — वृक्षाग्रे वर्तमाने श्येने, वृक्षाग्राच्छ्येनः, वृक्षाग्रे श्येनः इति पञ्चमीसप्तम्योः प्रयोगदर्शनवत् इहाप्युपपत्तेरिति भाव इति स्थितम्॥ प्रकृतमनुसरामः—

शाण्डिल्यविद्या प्रस्तूयते—

सर्वं खल्विदं — उपासीत। जायत इति **जम्**। लीयत इति **लम्**। **जल**शब्दौ डप्रत्ययान्तौ। अनितीति **अन्**। अनिति = जीवतीत्यर्थः। क्विबन्तो विजन्तो वाऽयं शब्दः। तस्य जलान् **तज्जलान्**। **इति**र्हेत्वर्थः। **सर्व**शब्दः सर्वशरीरकपरः। **इदम्**त्येतत् ब्रह्मणः, सर्वस्य वा विशेषणम्। अतश्च तज्जत्वात्, तल्लत्वात्, तदनत्वात् सर्वात्मकं ब्रह्मेति **शान्त**ः सन् उपासीतेत्यर्थः। अत्र तज्जत्वतल्लत्वे स्थूलचिदचिच्छरीरकब्रह्मगते। [1]तदनत्वरूपं तन्नियाम्यत्वं तु न ब्रह्मगतम्। ब्रह्मणस्तदसंभवात्। अपितु चिदचिन्मात्रगतमिति द्रष्टव्यम्।

[2]भगवता भाष्यकृता, "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति सर्वोत्पत्तिस्थिति (?) प्रलयकारणत्वेन सर्वस्यात्मतयाऽनुप्रवेशकृतजीवयितृत्वेन च सर्वात्मकं ब्रह्मोपासीतेति उपासनं विधाये" ति भाषितम्। व्यासार्यैश्च, "ब्रह्मात्म-

1. ब्रह्मगते तदनुरूपे। तन्नियाम्यत्वं तु ख. ग. 2. भगवता च भाष्यकृता घ. भगवता भाष्यकृता च. क.

तज्जत्वात् — **सर्वात्मकं ब्रह्मेति**। सर्वस्येत्यादिः। 'ब्रह्मणो जातत्वात् ब्रह्मणि लीनत्वात् ब्रह्माधीनजीवनत्वाच्च हेतोर्ब्रह्मात्मकं सर्वं खल्विदं जगत्'इति भाष्यरीतिरिह भाव्या, **न ब्रह्मगतमिति**। तदिदमत्र भाष्यादौ, 'कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामितया च' इति टीकायाञ्च स्पष्टम्। अत्र वाक्येऽयमंशो विधीयते, अयं नेति विवेकाय भाष्यादिकं प्रमाणयति

कत्वं सर्वस्य शास्त्रादवगम्य, 'सर्वभूतात्मके तात जगन्नाथे जगन्मये। परमात्मनि गोविन्दे मित्रामित्रकथा कुतः' इत्युक्तरीत्या रागद्वेषादिरहितस्सन् वक्ष्यमाणगुणकं ब्रह्मोपासीतेत्यर्थ" इत्युक्तम्।

वक्ष्यमाणगुणकं ब्रह्मेति वदतां व्यासार्याणामयमाशयः — सर्वं खल्विति वाक्योक्तं सार्वात्म्यं तु नोपास्यगुणः। उत्पत्तिशिष्टसार्वात्म्यगुणावरुद्धे मनोमयत्वादि-वक्ष्यमाणगुणविधानानुपपत्तिप्रसङ्गात्। न चोपासनोत्पत्तिवाक्यश्रुतस्य सार्वात्म्यस्य अविवक्षा कथमभ्युपगन्तव्येति वाच्यम्—सर्वं खल्विदं ब्रह्म तज्जलानित्यन्तस्य वाक्यस्य खलुशब्दकृतेन प्रसिद्धवन्निर्देशेन एकवाक्यत्वस्य निवारितत्वात्। न हि, 'उपासीत खलु' इति वचनव्यक्तिर्घटते। अतः सार्वात्म्यस्योपासनोत्पत्तिवाक्यश्रुतत्वाभावेन, 'शान्त उपासीत' इति वाक्ये उपास्याकाङ्क्षायां पूर्ववाक्यप्रतिपन्नस्य ब्रह्मरूपधर्मिमात्र-स्यैवोपास्यतयाऽन्वयः, न तु सार्वात्म्यविशिष्टस्य। ततश्चोत्पत्तिशिष्टसार्वात्म्यानवरोधात् न वक्ष्यमाणमनोमयत्वादिगुणानन्वयशङ्का। "सर्वात्मकं ब्रह्मोपासीत" इति तदर्थ-निर्देशकभाष्येऽपि सर्वात्मकत्वं नोपास्यगुणतया निर्दिष्टम्। अपितु उपास्यब्रह्मणः स्वरूपकथनमात्रपरमिति। एतच्च सर्वमपि तैः कण्ठत एव वर्णितञ्च।

ननु, 'ब्रह्मात्मकत्वं सर्वस्य शास्त्रादवगम्य रागद्वेषादिरहितस्सन् वक्ष्यमाण-गुणकं ब्रह्मोपासीतेत्यर्थः' इति व्यासार्यैरेवोक्तत्वात्, तदेकवाक्यत्वसंभवे, 'तज्जला-निति' इत्यन्तस्य पृथग्वाक्यत्वकल्पनाऽयोगात्, सार्वात्म्यस्योत्पत्तिवाक्यविहितत्वेऽपि मनोमयत्वादीनामुत्पत्तिशिष्टगुणाविरोधिनामन्वये दोषाभावाच्च वाक्यभेदकल्पनं वा, शाण्डिल्यविद्यायां सार्वात्म्यस्यानुपास्यत्वकल्पनं वा व्यर्थमिति चेन्न — उपासीतेत्यनेन

भगवतेति। उत्पत्तिशिष्टेति। उत्पत्तिवाक्योपदिष्टेत्यर्थः। यत्र कर्मस्वरूपं विधीयते, तत् उत्पत्तिवाक्यम्। धर्मिमात्रस्येति। यदि धर्मिणो ब्रह्मणोऽप्युत्पत्तिवाक्येऽत्र अश्रुतत्वेनानन्वयः, तर्हि रूपाश्रवणात्, संभवति रूपवति वाक्ये कर्मविधाने नीरूपे तद्विधानं न युक्तमिति उपासन-विधिरप्यत्र न स्यात्। उपासेर्नियमेन कर्माकाङ्क्षत्वात्तु अन्यत्रान्वितमपि ब्रह्म आकाङ्क्षाबलात् कर्मतयेष्यते; न तथा सर्वात्मकत्वमप्याकांक्ष्यमिति। ननु अग्निरहस्योपक्रमे 'सर्वं खलु' इत्या-दिस्थाने 'सत्यं ब्रह्मेत्युपासीते'ति श्रवणात् सत्यत्वविशिष्टब्रह्मविधानं स्वीकार्यम्। सत्यत्वञ्च प्रकृतानुरोधात् सत् ति यम् इति श्रुत्यन्तरकृतविभागानुसारेण च चिदचित्सर्वान्तर्यामित्वरूप-मेवेति अत्रापि सर्वात्मकत्वं विवक्षितमिति चेन्न — स्वरसाकाङ्क्षाविरहेणात्र तदविवक्षया मनोमय-त्वादिगुणविधानाविरोधात्। श्रुत्यन्तरबलेनैव तस्याप्युपास्यगुणतया स्वीकारेऽपि प्रकृतवाक्ये

अथ खलु क्रतुमयः पुरुषः । यथाक्रतुरस्मिन् लोके पुरुषो भवति,

वाक्यैकवाक्यत्वाभ्युपगमेऽपि [1]पदैकवाक्यत्वनिराकरणे दोषाभावात् । शान्तिहेतुतयाऽन्वितस्य सार्वात्म्यस्योपास्यत्वे प्रमाणाभावादिति व्यासार्याभिप्रायात् । ननु ब्रह्मणः सर्वात्मकत्वात् यत्र क्वचित् क्रियमाणस्यापि द्वेषादेरात्मद्वेषपर्यवसन्नत्वेनायुक्तत्वात् शान्तः सन्नुपासीतेत्युक्ते, ब्रह्मोपासीतेति कथमवगम्यते, सर्वं खल्विदं ब्रह्मेत्यस्य शमविध्यर्थवादभूतस्योपास्यसमर्पकत्वाभावादिति चेत् – सत्यम् — शमविध्यर्थतया निर्दिष्टस्यापि ब्रह्मण उपास्याकाङ्क्षापूरकत्वस्यापि संभवात् । अन्यार्थतयापि स्ववाक्यनिर्दिष्टं ब्रह्म विहायोपास्यान्तरकल्पनस्यानुचित्तत्वात् । 'मूलतः शाखां परिवास्योपवेषं करोति' इत्यत्र 'मूलत' इत्यस्य शाखापरिवासनेऽपादानतयाऽन्वितस्यापि आकाङ्क्षावशेन, 'उपवेषं करोति' इत्यनेनाप्यन्वयाभ्युपगमादिति द्रष्टव्यम् ।

विहितमुपासनं स्तौति — **अथ खलु** — **भवति** । 'तं यथायथोपासते, तथैव भवति' इति श्रुत्यन्तरादिह लोके पुरुषः **यथाक्रतुः** यथोपासनः, तथैवेतः

1. प्रकारान्तरेणैकवाक्यत्व घ.

तस्याविवक्षणीयत्वात् । **मूलत** इति । अयमर्थो मी ४-२ ३. द्रष्टव्यः । दर्शे शाखामाहृत्य तत्र मूलांशात् अग्रांशं पृथक्कृत्य मूलमुपवेषं करोति । अग्रभागरूपां शाखां वत्सापाकरणे, मूलांशरूपमुपमेवषञ्च कपालोपधाने उपयुङ्क्ते ।

स्तौतीति । भाष्ये, अथ खल्वित्यादिवाक्यं गृहीत्वा, 'यथोपासनं प्राप्यसिद्धिमभिधाय' इति व्याख्यातत्वात्, 'स्तुतयेऽनुमतिर्वे'ति सूत्रे विद्यायाः 'न कर्म लिप्यते नरे' इत्यलेपकत्वरूपवास्तवार्थमादाय स्तुतिकथनवत् अत्रोपासनस्य स्वविषयप्रकारप्रापकत्वरूपवास्तवार्थेन स्तुतिकथनमिति ध्येयम् । एवञ्च उपासनम्, यथोपासितफलप्राप्तिञ्च क्रमेण कथयित्वोपास्याकारस्तदनुरूपः **स क्रतु**मित्यादिनोपदेक्ष्यते । अस्य तत्क्रतुवाक्यस्यार्थवैशद्याय श्रुत्यन्तरं गृह्णाति **तं यथा यथेति** । तत्र **उपासत** इति प्रयोगादिह क्रतुशब्द उपासनपर इति विशदम् । अत्रैव आदौ **शान्त उपासीतेत्युपासि**प्रयोगात्, **इति यस्य स्याद्**द्वेति अन्ते निश्चयात्मकज्ञानकथनाच्च मध्येऽयं क्रतुशब्द उपासनज्ञानपर इत्यवसीयत एव । **उपासते, भवती**ति क्रमेण बहुवचनैकवचनप्रयोगात्, उपासकाः पूर्वत्र कर्तारः, उपास्य उत्तरत्र कर्तेति स्पष्टम् । तथाचोपासका उपास्येन प्रकारेणोपासते, **तत्तत्प्रकारः** स फलकाले तेषां **भवती**ति तद्वाक्यार्थः । तदनुसारेण प्रकृतवाक्येऽप्यर्थस्य वर्ण्यत्वे स्थिते, **प्रेत्ये**ति ल्यबन्तसमानकर्तृकत्वस्यात्र **भवती**ति पदे आवश्यकत्वेन उपास्यस्य परमात्मनो भवतिकर्तृत्वायोगेन, **भवती**त्यत्र 'अनु' इत्युपसर्गाध्याहार्यान्तर्भावकल्पनया **तथा भवति**, तादृशमनुभवति, तादृशममिसंभवतीत्यर्थो ग्राह्यः । एतामितः प्रेत्याभिसंभवितास्मीति वक्ष्यमाणत्वात् । यदि तु — **यथाक्रतुः** यादृशप्राप्तिप्रकारकोपासनवान्,

तथेतः प्रेत्य भवति ।

स क्रतुं कुर्वीत ॥ १ ॥ --- मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्याक्तोऽवाक्यनादरः ॥ २ ॥

प्रेत्य अमुष्मिन् लोके भवति । ततो हेतोः पुरुषः **क्रतुमयः** क्रतुप्रधानः, उपासनप्रधान इत्यर्थः । ततश्चोपासनस्यैव हिततमत्वात् सर्वथाऽनुष्ठेयमित्यर्थः ।

एवं विहितं ब्रह्मोपासनं मनोमयत्वादिगुणान्तरविधानायानुवदति — **स क्रतुं कुर्वीत । सः** उपासकः **क्रतुं** ब्रह्मण उपासनं कुर्वीतेत्यर्थः । गुणानेवाऽऽह — **मनोमयः** परिशुद्धमनोमात्रग्राह्यः । विवेकादिसाधनसप्तकानुगृहीतपरमात्मोपासननिर्मलीकृतमनोमात्रग्राह्य इत्यर्थः । **प्राणशरीरः** जगति सर्वेषां प्राणानां धारकः । प्राणो यस्य शरीरम् = आधेयं विधेयं शेषभूतञ्च स प्राणशरीरः । आधेयत्वविधेयत्वशेषत्वानामेव शरीरशब्दप्रवृत्तिनिमित्तत्वात् । **भारूपः** भास्वररूपः । 'आदित्यवर्णं तमसः परस्तात्', 'पश्यते रुक्मवर्णम्' इत्यादिवाक्यप्रतिपन्नाप्राकृतस्वासाधारण निरतिशयकल्याणगुणगणनिरतिशयदीप्तियुक्तविग्रहशालीत्यर्थः । **सत्यसंकल्पः** अप्रतिहतसंकल्पः । **आकाशात्मा** आकाशवत् सूक्ष्मस्वच्छस्वरूपः । सकलेतरकारणभूतस्याव्याकृताकाशस्यात्मभूत इति वा **आकाशात्मा** । स्वयञ्च प्रकाशते, अन्यांश्च प्रकाशयतीति वा **आकाशात्मा । सर्वकर्मा ।** क्रियत इति कर्म । सर्वं जगत् यस्य कर्म, असौ **सर्वकर्मा ।** सर्वा वा क्रिया यस्याराधनमसौ **सर्वकर्मा । सर्वकामः ।** काम्यन्त इति कामाः भोग्यभोगोपकरणादयः । ते परिशुद्धास्तस्य सन्तीत्यर्थः[1] । **सर्वगन्धः सर्वरसः ।** 'अशब्दमस्पर्शम्' इत्यादिना प्राकृतगन्धरसादिनिषेधात् अप्राकृताः स्वासाधारणाः निरवद्याः निरतिशयाः कल्याणाः स्वभोग्यभूताः सर्वविधाः गन्धरसास्तस्य सन्तीत्यर्थः । **सर्वमिदमभ्याक्तः ।** उक्तं सर्वमिदं कल्याणगुणजातम्

1. परिशुद्धा यस्य स सर्वकामः क.

तथा तादृशप्राप्तिमानेव भवतीत्यर्थ इष्यते, तदापि तात्पर्यमेकमेव । शाङ्करसूत्रभाष्यादौ, 'तं यथायथोपासते, तदेव भवती'त्येव श्रुत्यानुपूर्वी तत्रतत्र । तथैव च माध्यन्दिनशतपथेऽपि (१०-५ २) । तत्र प्रकरणे चोपास्यस्यैव भवतिक्रियाकर्तृत्वं विस्पष्टम् । एवमप्यत्र, श्रीभाष्ये च, **तदेवेत्यत्र तथैवे**ति महणं मुद्गलोपनिषद्गतवाक्यामिप्रायेणेति ध्येयम् ।

एष म आत्मा अन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा । एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः ॥ ३ ॥ सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्माऽन्तर्हृदय एतद् ब्रह्म ।

अभ्यात्तः स्वीकृतवान् । भुक्ताः ब्राह्मणा इतिवत् कर्तरिक्तप्रत्ययः, अर्शआद्यजन्तो वा । **अवाकी** । **वाकः** उक्तिः । सोऽस्य नास्ति इत्यवाकी । कुत इत्यत्राह **अनादरः** । अवाप्तसमस्तकामत्वेनाऽऽदर्तव्याभावात् आदररहितः, अत एवावाकी । परिपूर्णैश्वर्यत्वात् ब्रह्मादिस्तम्बपर्यन्तं निखिलं जगत् तृणीकृत्य जोषमासीन इत्यर्थः ।

एष म आत्मा — तण्डुलाद्वा । मदीये हृदये व्रीह्याद्यपेक्षया अणुत्वेन [1]अल्पत्वेन एष परमात्मा उपासनार्थमवास्थित इत्यर्थः । तथानुसंधानं कर्तव्यमिति भावः ।

अन्तर्हृदयेऽवस्थितस्योपास्यमानस्य प्राप्याकारमनुसंधेयं निर्दिशति **एष म आत्माऽन्तर्हृदये ज्यायान् — लोकेभ्यः** । अन्तर्हृदये विद्यमानोऽपि स्वरूपतो निरतिशयपरिमाण इत्यर्थः । **सर्वकर्मा — अनादरः**[2] । उक्तोऽर्थः । एवम्भूतं परं ब्रह्म परमकारुण्येनास्मदुज्जिजीवयिषयाऽस्मद्धृदये संनिहितमित्यनुसंधातव्यमित्याह **एष म आत्माऽन्तर्हृदये एतत् ब्रह्म** ।

यथोपासनमीदृशं परमात्मानम्, 'अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इत्युक्तरीत्या देशविशेषविशिष्टं प्राप्तास्मीति निश्चयरूप-

1. अल्पत्वेनेति ख. कोशे न । 2. उक्तोऽर्थ इति न क

अर्शआद्यजन्तो वेति । एतत्पक्षे अभ्यात्त इति भावे क्तप्रत्ययः । अग्निरहस्ये **सर्वादिगनुप्रभूतत्वरूपगुणान्तरस्यापि** कथनात् **सर्वमिदमभ्यात्त** इतीदं न सर्वव्यापित्वरूपम्, किन्तु **सर्वाशाभ्याप्तितृप्तत्वरूपमिति** ध्येयम् । **तण्डुलाद्वा** इत्येतदनन्तरेण **एतद् ब्रह्मे**त्यन्तेन तत्प्राप्याकारप्रतिसंधापनेन तस्य परत्वमनुभाव्य तादृशस्य तस्य केवलाश्रितबृहत्त्वापादकानधिककारुण्यमात्रकृतोऽत्रान्तर्हृदये प्रवेश इति ज्ञाप्यते ।

एतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्साऽस्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः ॥ ४ ॥

मनुसंधानं कर्तव्यमित्याह — **एतमितः प्रेत्याभिसंभवितास्मीति** । अत्र **इति** इत्यस्य **स क्रतुं कुर्वीत**इत्यनेनान्वयः । **मनोमयः प्राणशरीर** इत्यारभ्य, **एतमितः प्रेत्याभिसंभवितास्मी**त्येतत्पर्यन्तोऽनुसंधानप्रकारः ।

अत्र च इतिशब्दनिर्दिष्टो मनोमयत्वादिगुणगतः क्रमविशेष एक एव विधीयते । मनोमयत्वाद्युपास्यगुणानां तु आक्षेपतो विधानम्, पृष्ठगतसर्वताविधानादिव पृष्ठानाम् । ततश्च, 'प्राप्तानुवादेन मनोमयत्वाद्यनेकगुणविधाने वाक्यभेद' इति शङ्का प्रत्युक्ता । यद्वा विधेयानां बहुत्वेऽपि क्रमरूपविधेयतावच्छेदकैक्यान्न वाक्यभेदः । 'यदग्नये च प्रजापतये चे'ति वाक्ये देवतात्वरूपविधेयतावच्छेदकैक्येन वाक्य-

---

अत्र वाक्येऽनुसंधानस्य कर्तव्यतालाभप्रकारं दर्शयति **अत्र इतीत्यस्ये**ति । अयं भावः— भाष्ये, 'स क्रतुं कुर्वीतेति गुणविधानार्थमुपासनमनूद्य' इत्युक्तत्वात् कुर्वीतेति विधिर्नोपासनांशे इति बुद्धम् । अथ, 'स्वरूपगुणांश्चोपादेयान् प्रतिपाद्य', 'हृदये संनिहितमितीदमनुसंधानं विधाय', 'प्राप्तिनिश्चयानुसंधानञ्च विधाय' इति विधेयांशानां विशिष्य निर्देशात्, **अभिसंभवितास्मीति** इत्यत्र इतिशब्दस्य कुर्वीतेत्यत्रान्वयो व्यज्यते । उपरि च **इति यस्य स्या**दिति वाक्यमुपसंहारात्मकमिति भाष्य एव दर्शितम् । तेन **इति**शब्दस्य तत्राप्यन्वय इष्टः । **ननु** 'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः' । न चारुणयैकहायन्येत्यत्र समानाधिकरणनिर्देशबलात् आरुण्यैकहायनीत्वविशिष्टैकद्रव्यविधिवादिहोपपत्तिः । अत्र ब्रह्मरूपविशेष्यांशस्यापि उपासीतेत्यत्रैव विहिततया मनोमयत्वादिधर्माणामेव विधेयत्वादित्यत्र दीक्षितोक्तं द्विविधं समाधिमादौ दर्शयति **अत्र चे**ति । **गुणगतः क्रमविशेष** इति । गुणानुसंधानक्रम इति यावत् । **पृष्ठानामि**ति । 'विश्वजिता यजेते'ति वाक्येन 'विश्वजिद्यागस्य विहितत्वात् तदुद्देशेन पृष्ठस्तोत्राणां पृष्ठाख्यसामविशेषाणां वा, तद्गतसर्वतायाश्च, 'विश्वजित्सर्वपृष्ठ' इति वाक्येन विश्वजिदुद्देशेन विधाने वाक्यभेद इति विमृश्य पृष्ठगतसर्वतामात्रविधानम्, पृष्ठानां पार्ष्णिको विनियोग इत्युक्तं सप्तमे (७.३.३.), तद्वदिति भावः । एवं विशेषणविधिकल्पनया विधानमुक्तम् । अथ श्रूयमाणविधिनैव सर्वविधिमदोषञ्च दर्शयति **यद्वे**ति । **क्रमरूपेत्य**विवक्षितम् । क्रमो वा भवतु, अन्यो वा भवतु कश्चिदयमितिशब्दप्रतिपाद्यधर्म इति । **यदग्नये चे**ति । एतदर्थः **न्यायप्रकाशे, तद्व्याख्याने अस्मदीये मीमांसासुधास्वादे** च द्रष्टव्यः । एतद्दृष्टान्तस्य यथातथाभावेऽपि अत्र विवक्षितांशो नानुपपन्नः । **इति**शब्दस्य प्रकारवाचित्वात् **मनोमय** इत्यारभ्य **अभिसंभवितास्मि** इत्येतदुपर्यन्तकथितप्रकारस्य सर्वस्य एकेन इतिशब्देनोक्तस्य कुर्वीतेतिविधावन्वयेनानेकार्थविधानाभावात् । नन्वस्तु तावदिहैवं परिहारः । समानप्रकरणे अग्निरहस्ये कथम्? तत्र, 'सत्यं ब्रह्मे-

भेदस्य तान्त्रिकैः परिहृतत्वात् । केचित्तु प्राप्तोपासनानुवादेन अभ्युदयेष्टिवाक्यवत् प्रयोगविधित्वसंभवान्न वाक्यभेद इति वदन्ति ।

त्युपासीते'ति पूर्वमुपासनस्य ब्रह्मणश्च विहितत्वात्, उपरि 'स आत्मानमुपासीत मनोमयं प्राणशरीरं—सर्वा अनु दिशः प्रभूतं सर्वमिदमभ्यात्तमवाक्यनादरम्' इति प्राप्तानुवादेनानेकविधानात्। न च तत्र इतिशब्दादिरस्ति इत्याशङ्क्य तदुचितं प्रकारं दर्शयति केचित्तु इति। षष्ठे (६.५.१.) 'यस्य हविर्निरुप्तं चन्द्रमा अभ्युदियात्' इत्यादिवाक्यमादाय, नात्र दर्शयागातिरिक्तयागविधिः दर्शादिसंबन्धिहविर्द्रव्यप्रत्यभिज्ञानात्, किं तु उक्तदेवतापनयेन देवतान्तरोद्देश्यको विलक्षणाकारः दर्शप्रयोगभेद इत्युक्त्वा द्रव्यदेवताद्यनेकविधानप्रयुक्तो वाक्यभेदः प्रयोगभेदात् अनेकगुणविशिष्टविलक्षणप्रयोगरूपैकार्थविधानान्न भवतीत्युक्तम्। तद्वदिति भावः। अयं भावः—प्रधानकर्मविधिस्तावत् त्रिविधः, उत्पत्तिविधिः, अधिकारविधिः, प्रयोगविधिश्चेति। कर्मस्वरूपस्याज्ञातस्य ज्ञापनमुत्पत्तिविधिः। तस्य फलसंबन्धबोधनम् अधिकारविधिः। तस्य सर्वाङ्गविशिष्टस्य कर्तव्यताविधानं प्रयोगविधिः। न च कालकर्तृदेशकर्मादीनां प्रयोगान्वयिगुणानामेव प्रयोगभेदकत्वमिति द्रव्यदेवतावैलक्षण्यमादायाभ्युदयेष्टौ कथं प्रयोगभेद इति वाच्यम् — कालदेशादीनां प्रयोगैकान्वयिगुणत्वमित्येव विशेषात्। सर्वाङ्गविशिष्टप्रधानविषयकप्रयोगेऽनन्वयिगुणस्य कस्याप्यभावेन यत्किञ्चिद्धेदेऽपि प्रयोगभेदसंभवात्। वस्तुतश्चन्द्रमोभ्युदयकालस्य दर्शे प्रागप्राप्ततया तद्विशिष्टकर्तृकत्वविधानात् तादृशगुणभेदप्रयुक्तप्रयोगभेदविधाने, तत्रापूर्वदेवताद्यन्वयादित्याशयात्। प्रकृते च पूर्वमुपासनमात्रविधानात् तत्कर्तृवाक्येन यथोपासनफलोक्त्या अधिकारविधावपि प्रयोगस्याविहिततया, 'स आत्मानमुपासीत' इति वाक्ये तद्विधानस्वीकारात् तत्र मनोमयत्वादीनां प्रयोगान्वयकल्पनया वाक्यभेदपरिहारादिति। एवञ्चोक्ताग्निरहस्यरीत्या प्रकृतवाक्येऽपि **मनोमय** इत्यादौ **अनादर**इत्यन्ते षष्ठीविपरिणामेन मनोमयस्य—अनादरस्य ब्रह्मणः क्रतुं कुर्वीतेति कल्पनेऽपि प्रयोगविधानान्न वाक्यभेदः। 'एष म आत्मा' इत्यादेस्तु मे इत्युल्लेखबलात् अभिसंभवितास्मीति इतिशब्देन ग्रहणेन, 'यस्य स्यादद्धे'त्युपरितनवाक्यान्वयस्तदा वाच्यः। अस्तु वा पूर्वोक्तरीत्या इतिशब्दोक्तक्रम एव मनोमयत्वाद्यन्वयोऽपि। क्रमस्य प्रयोगान्वयिगुणतया च सर्वक्रमविशिष्टप्रयोगविधिरिति। नन्वेवं विधिनैव मनोमयत्वादिलाभे, सर्वत्रप्रसिद्धाधिकरणोपक्रमे टीकायाम्, 'अत्र रात्रिसत्रन्यायेन मनोमय उपास्यतया संबध्यते, आर्थवादिकस्यापि विध्यपेक्षितस्य स्वीकार्यत्वात्' इति कथमुक्तमिति चेन्न—मनोमयइत्यादेः क्रतुकर्तृपरत्वे वैयर्थ्यात् उपास्यपरतया साक्षादनन्वयाच्च क्रतुं कुर्वीतेत्येतदर्थवादत्वमेव। परन्तु एतद्ब्रह्मेत्यन्तोऽर्थवादः। 'एतमितः प्रेत्याभिसंभवितास्मीति' इत्यत्र एतमितिपदं मनोमयत्वाद्यार्थवादिकापेक्षितसर्वविशेषणविशिष्टपरमिति ततस्तल्लाभ इत्याशयादिति।

एवंविधप्राप्यप्राप्तिनिश्चयोपेतस्योपासकस्य प्राप्तौ न संशयोऽस्तीत्युपसंहरति **यस्य स्याद्धा न विचिकित्साऽस्ति**। अत्र **इति**शब्दोऽध्याहर्तव्यः। **अभिसंभवितास्मीति इतीति**शब्दस्य काकाक्षिन्यायेन वाऽन्वयः। **इति** उक्तप्रकारेण **यस्य** उपासकस्य **अद्धा** निश्चयोऽस्ति, तस्य प्राप्तौ **विचिकित्सा** संशयो नास्तीत्यर्थः।

उक्तार्थस्य[1] श्रद्धेयत्वसिध्यै वक्तुरापिं दर्शयति **इति ह स्माह शाण्डिल्यश्शाण्डिल्यः**। द्विरुक्तिर्विद्यासमाप्त्यर्था। अयमर्थः सर्वोऽपि **भाष्यश्रुतप्रकाशिकयोः स्पष्टः** ॥

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते — इयञ्च विद्या समन्वयाध्याये द्वितीयपादे चिन्तिता। तत्र हि — सर्वं खल्विदं ब्रह्मेत्यत्र ब्रह्मशब्देन प्रत्यगात्मैव निर्दिश्यते। तस्यैव सर्वपदसामानाधिकरण्यनिर्देशोपपत्तेः। सर्वशब्दनिर्दिष्टं हि ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत्। ब्रह्मादिस्तम्बपर्यन्तभावश्च प्रत्यगात्मन एवानाद्यविद्यामूलकर्मविशेषोपाधिक उपपद्यते। परमात्मनः निरस्तसमस्तावद्यस्य समस्तहेयाकरसर्वभावो नोपपद्यते। प्रत्यगात्मन्यपि ब्रह्मशब्दः क्वचित् क्वचित् प्रयुज्यते, 'इदं ब्रह्माऽऽयाती'त्यादौ। अत एव परमात्मा, **परं ब्रह्मेति** परमेश्वरस्य **क्वचित्** सविशेषणो निर्देशः। प्रत्यगात्मनश्च निर्मुक्तोपाधेः ब्रह्मत्वञ्च विद्यते, 'स चानन्त्याय कल्पत' इति श्रुतेः। अविदुषस्तस्यैव कर्मनिमित्तत्वात् जगज्जन्मस्थितिलयानाम्, 'तज्जलान्' इति हेतुनिर्देशोऽप्युपपद्यते। अतो जीव एवात्र संदर्भे प्रतिपाद्यत इति पूर्वपक्षे प्राप्ते — उच्यते।

'सर्वत्र प्रसिद्धोपदेशात्'। **सर्वत्र** सर्वस्मिन्, जगति, 'सर्वं खल्विदं ब्रह्मे'ति तदात्मतया विधीयमानं परं ब्रह्मैव। कुतः? **प्रसिद्धोपदेशात्**। तज्जत्व-

1. उक्तस्य ख.

तस्यैवेति। न तु परब्रह्मणः। सर्वशब्देन इदन्त्वतज्जत्वतल्लत्वतदनत्वान्वयार्हस्य जगन्मात्रस्य वाच्यत्वात् तत्र **ब्रह्मा**भेदबाधादिति पूर्वपक्षियुक्तिः। **हेयाकरसर्वभावेति**। हेयान्तर्वर्तित्वस्वीकारस्यापि संभोगप्राप्त्याऽनुपपन्नत्वे स्थिते हेयभाव एव कथमित्याशयः। **'इदं ब्रह्माऽऽयाति'** इति। **इदं ब्रह्मागच्छती**ति श्रुत्यन्तरमिति दीक्षितोक्तम्। **ब्रह्मत्वञ्च विद्यत इति**। अत्र, **'ब्रह्मभूयाय कल्पते। ब्रह्मभूतः प्रसन्नात्मा'**(१८.५३,५४)इति गीताऽप्यनुसंधेया।

तल्लत्वादिना सर्वं खल्विदमिति प्रसिद्धवदुपदेशात्, यस्मात् जगज्जन्मस्थितिलयाः वेदान्तेषु प्रसिद्धाः, तदेवात्र ब्रह्मेति प्रतीयते। वेदान्तप्रसिद्धत्वञ्च परब्रह्मण एव। तस्यैव[1] 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवेदान्तेषु प्रसिद्धेः। तस्य ब्रह्मादिस्तम्बभावेऽपि प्रकारभूतशरीरगतानां दोषाणां प्रकारिण्यात्मन्यस्पर्शात्[2] निरस्तसमस्तावद्यत्वस्य नानुपपत्तिः। जीवानाञ्च प्रतिशरीरं भिन्नानामन्योन्यतादात्म्यासंभवेन सार्वात्म्यस्यासंभावितत्वात्। अतः सर्वजगत्कारणत्वप्रयुक्तसर्वात्मकत्वस्य परब्रह्मण्येव संभवात् परमेव ब्रह्मेह वाक्ये प्रतिपाद्यते।

'विवक्षितगुणोपपत्तेश्च'। विवक्षितानां [3]विशुद्धमनोग्राह्यत्वरूपमनोमयत्वसत्यसंकल्पत्वादीनां गुणानां परमात्मन्येवोपपत्तेश्च। **विवक्षितत्वं** तात्पर्यविषयत्वम्। मनोमयत्वादीनाञ्च, 'यथाक्रतुरस्मिन् लोके पुरुषो भवति' इति वाक्येन[4] मनोमयत्वादिगुणकोपासनेन तद्गुणकब्रह्मप्राप्तेः फलत्वाऽऽवेदनेन फलरूपतात्पर्यलिङ्ग[5]सद्भावात् मनोमयत्वादीनां तात्पर्यविषयत्वलक्षणं विवक्षितत्वमवसीयते। **'अनुपपत्तेस्तु न शारीरः'**। विवक्षितानां गुणानां शारीरेऽनुपपन्नत्वात् न शारीरपरिग्रहशङ्का कार्येत्यर्थः।

'कर्मकर्तृव्यपदेशाच्च'। 'एतमितः प्रेत्याभिसंभवितास्मी' ति प्राप्यतया परं ब्रह्म व्यपदिश्यते, प्राप्तृतया च जीवः। अतः प्राप्ता जीव उपासकः। प्राप्यं परं ब्रह्मोपास्यमिति। **'शब्दविशेषात्'**। 'एष म आत्माऽन्तर्हृदय' इति शारीरः षष्ठ्या निर्दिष्टः; उपास्यस्तु प्रथमया। अतो नोपासकस्य जीवस्योपास्यत्वम्। **'स्मृतेश्च'**। 'सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च' इति स्मृतिश्चोपास्यं हृदयगतमुपासकाद्भिन्नं परमात्मानं दर्शयति।

'अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च'। अल्पायतनत्वमर्भकौकस्त्वम्। तद्व्यपदेशः अल्पत्वव्यपदेशः। 'एष म आत्माऽन्तर्हृदय' इति अणीयसि हृदयायतने स्थितत्वात्, 'अणीयान् व्रीहेर्वा यवाद्वा' इत्यादिना स्वरूपेणाणीयस्त्वव्यपदेशाच्च नायं परमात्मा; अपितु जीव एव। परमात्मनोऽल्पायतनत्वाल्पत्वयोरसंभवादिति चेन्न – **एवं निचाय्यत्वात्** अल्पायतनत्वाल्प-

1. तस्यैवेति **क.** कोशे तद्विहाय तदर्थेऽत्र परब्रह्मण एवेति **ख.** 2. असंस्पर्शात् **ख.** 3. विशुद्धमनोग्राह्यत्वरूपेत्यधिकं **क.** 4. वाक्ये खादन्यत्र. 5. संभवात् **ख.**

३—१५.

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति ।
दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलम् ॥
स एष कोशो वसुधानस्तस्मिन् [1]विश्वमिदँ श्रितम् ॥ १ ॥

1. सर्वं मा.

त्वाभ्यां तस्यैवोपास्यत्वसंभवात् । व्योमवच्चेदं ब्रह्म व्यपदिश्यते, 'ज्यायान् पृथिव्याः' इत्यादिना । अतश्च ज्यायस्त्वे उपाध्यश्रवणात् ज्यायस्त्वं स्वाभाविकम्, अणीयस्त्वे उपाधिश्रवणात् अणीयस्त्वमौपाधिकमित्यवसीयते ।

'संभोगप्राप्तिरिति चेन्न वैशेष्यात्' । परब्रह्मणः शरीरान्तर्वर्तित्वे तन्निमित्तसुखदुःखोपभोगप्रसक्तिः जीववत् स्यात् इति चेन्न — तयोरपहतपाप्मत्वानपहतपाप्मत्वकृतविशेषसंभवात् । अतो न जीववद् भोगप्रसक्तिरिति स्थितम् ॥ प्रकृतमनुसरामः । ॥ ३-१४.

पुत्रदीर्घायुष्यफलकं त्रैलोक्यात्मककोशविज्ञानमारभ्यते । **अन्तरिक्षोदरः — जीर्यति** । अन्तरिक्षमुदरं यस्य स तथोक्तः । मध्यवर्तित्वादन्तरिक्षस्य उदरत्वम् । कोश इव **कोशः** । कोशसादृश्यात् **कोशः** । भूमिः **बुध्नः** मूलं यस्य सः **भूमिबुध्नः** । **न जीर्यति** न विनश्यति । [1]चिरकालस्थायित्वादिति भावः । **दिशो ह्यस्य स्रक्तयः** । **स्रक्तयः** कोणा इत्यर्थः । **द्यौरस्योत्तरं बिलम्** । [2]**उत्तरं बिलं** ऊर्ध्वं मुखमित्यर्थः । **स एष कोशो वसुधानः** । कर्मफलाख्यं वसु धीयतेऽस्मिन् इति **वसुधानः** । **तस्मिन् विश्वमिदं श्रितम्** । कर्मकर्तृफलात्मकमिदं परिदृश्यमानं कृत्स्नं [3]**तस्मिन्** कोशे श्रितमित्यर्थः ।

1. स्थिरकालत्वात् ख. चिरकालावस्थायित्वात् ग. 2. अयमर्थः ख. कोशमात्रे । 3. अस्मिन् ख. ग.

इतः परमस्मिन् प्रपाठके ऐहिकफलानि चत्वार्युपासनानि । तत्र प्रथमं पुत्रदीर्घायुष्टफलकम् । त्रैलोक्यरूपवसुधानकोशस्य अजीर्यत्त्वेन अरिष्टत्वेन खदिरवत्सवायुकत्वेन च विज्ञानात् सपुत्रक एव सदा भवतीति । **कोशसादृश्यादिति** । उदरबुध्नशक्तिमुखवत्त्वेन विश्वाख्यवसुमत्त्वेन च

तस्य प्राची जुहूर्नाम, सहमाना नाम दक्षिणा, राज्ञी नाम प्रतीची, सुभूता नामोदीची । तासां वायुर्वत्सः । स य एतमेवं वायुं दिशां वत्सं वेद, न पुत्ररोदँ रोदिति । सोऽहमेतमेवं वायुं दिशां वत्सं वेद; मा पुत्ररोदँ रुदम् ॥ २ ॥

अरिष्टं कोशं प्रपद्येऽमुनाऽमुनाऽमुना; प्राणं प्रपद्येऽमुनाऽमुनाऽमुना; भूः प्रपद्येऽमुनाऽमुनाऽमुना; भुवः प्रपद्येऽमुनाऽमुनाऽमुना; स्वः प्रपद्येऽमुनाऽमुनाऽमुना ॥ ३ ॥

[1]स यदवोचम्—प्राणं प्रपद्य इति, प्राणो वा इदँ सर्वं भूतम्, यदिदं किञ्च, तमेव तत् प्रापत्सि[2] ॥ ४ ॥

1. अथ यत् मा. 2. प्राप्स्यथ मा.

तस्य प्राची—नामोदीची । [1]स्पष्टोऽर्थः । **तासां वायुर्वत्सः** । वायोः दिक्प्रसूतत्वात् वत्सत्वम् । **स य—रोदिति** । दिग्वत्सत्वेन वायूपासकः पुत्रनाश-[2]निमित्तं रोदनं न करोति । पाकं पचतीतिवदयं निर्देशः । **रोदमिति** णमुलन्तो वा । **सोऽह—रुदम्** । **सः** एतदुपदेष्टा अहम् [3]**एवमेतदुपासनमनुष्ठाय** पुत्ररोदनाभावं फलं प्राप्तवानस्मीत्यर्थः ।

अथ कोशविज्ञानाङ्गभूतान् प्रपदनमन्त्रानाह—**अरिष्टं–ऽमुना** । **अरिष्टम्** अविनाशं कोशं प्रपद्ये । **अमुनाऽमुनाऽमुनेति** त्रिः पुत्रस्य नाम गृह्णाति । अमुना पुत्रेण हेतुना अरिष्टं कोशं प्रपद्य इत्यर्थः । एवमुत्तरत्रापि ।

प्राणं प्रपद्य इत्यादिस्वोक्तमन्त्रान् [चतुरः] स्वयमेव व्याचष्टे । **' स य दवोचं—प्रापत्सि** । **सोऽहं प्राणं प्रपद्ये** इति यद् वचनमवोचम् , तेन वचनेन

1. तस्योक्तत्रैलोक्यकोशस्य या प्रची दिक् सा जुहूनाम्ना ध्यातव्येत्यर्थ । एवमेवावशिष्टस्य **स्पष्टोऽर्थः ख.** 2. नाशननिमित्तं रोदं **रोदनं** करोति **ख.** । 3. एवमिति **ख.** अन्यत्र एवकारः ।

सादृश्यम् । **प्राचीदिगादिपदं** प्राग्भागादिपरम् । **मा–रुदमिति** । रोदनं मे मा भूदिति **शाङ्करोक्तार्थे** उपासितुरनुसंधानरूपमिदं वाक्यम् । अत्रोक्तार्थे उपदेष्टुनुभवकथनरूपमिदम् । अरिष्टमिति प्रथममन्त्रस्य अन्तरिक्षोदरः कोश इत्यादिनैव व्याख्यायाः वृत्तत्वात् प्राणमित्यादिरेव पश्चाद् व्याख्यात । **प्रापत्सीति** शब्दप्रयोगस्यारस्यात् व्याख्यातरीत्याऽनुसंधानमपि मन्त्रप्रयोगानन्तरमुपासकेन कार्यमिति प्रतीयते ।

अथ यदवोचम्—भूः प्रपद्य इति, पृथिवीं प्रपद्ये, अन्तरिक्षं प्रपद्ये, दिवं प्रपद्ये इत्येव तदवोचम् ॥ ५ ॥ अथ यदवोचम्—भुवः प्रपद्य इति, अग्निं प्रपद्ये, वायुं प्रपद्ये, आदित्यं प्रपद्ये, इत्येव तदवोचम् ॥ ६ ॥ अथ यदवोचम्—स्वः प्रपद्य इति, ऋग्वेदं प्रपद्ये, यजुर्वेदं प्रपद्ये, सामवेदं प्रपद्ये इत्येव तदवोचम्, तदवोचम् ॥ ७ ॥

इति तृतीयाध्याये पञ्चदशः खण्डः ।

३–१६.

पुरुषो वाव यज्ञः । तस्य यानि चतुर्विंशतिवर्षाणि, तत् प्रातस्सवनम् । चतुर्विंशत्यक्षरा गायत्री; गायत्रं[1] प्रातस्सवनम् । तदस्य वस-

1. गायत्रं हि **मा.**

प्राणात्मकं सर्वं जगत् **प्रापत्सि** प्रपन्नोऽभवमित्यर्थः । **अथ यदवोचं भूः—तदवोचम्** । भूः प्रपद्य इत्यस्य[1] त्रीन् लोकान् प्रपद्ये इत्यर्थः । **अथ—तदवोचं तदवोचम्** । स्पष्टम् । द्विरुक्तिर्विद्यासमाप्त्यर्था ॥ ३–१५.

दीर्घायुष्ट्वफलकपुरुषविद्या प्रस्तूयते—**पुरुषो वाव यज्ञः** । [2]पुरुषस्य यज्ञसादृश्यमेवाह—

तस्य—प्रातस्सवनम् । षोडशोत्तरवर्षशतमिते पुरुषायुषे आद्यानि चतुर्विंशतिवर्षाणि प्रातस्सवनमित्यर्थः । तत्र तद्दृष्टिः कर्तव्येति यावत् । तत्र हेतुमाह **चतुर्विंश—सवनम्** । प्रातस्सवनस्य गायत्रीछन्दस्कत्वात्, गायत्रीछन्दसश्चतुर्विंशत्यक्षरात्मकत्वात चतुर्विंशतिवर्षे प्रातस्सवनत्वाध्यासो युज्यत इति भावः । **तदस्य वसवोऽन्वायत्ताः** । **अस्य**उपासकस्य **तत्** प्रातस्सवनं वसवः स्वामित्वेनानुगताः ।

1. इत्यस्य मन्त्रस्य **ख.** . पुरुषः स्वस्मिन् यज्ञदृष्टिं कुर्यादित्यर्थः इत्यधिकं **ख.**

स्वायुर्मध्ये पुत्रामरणार्था कोशविद्योपदिष्टा । अथ स्वदीर्घायुःफला पुरुषावद्योपदिश्यते । एतद्विद्यायाः षोडशाधिकवर्षशतजीवनफलकत्वम् अस्याः यज्ञभावनारूपत्वात् यज्ञे च सोमे सवनत्रयसंबन्धिच्छन्दस्त्रयगताक्षराणां संहत्य तावत्संख्यकत्वादादृतम् । तत्संख्यानुरोधेनैव सवनत्रयविभागोऽपि कृतः । सोमे च यज्ञादिनस्य सवनत्रयात्मकत्वात् तत्र क्रियमाणस्य यज्ञस्य प्रधानत्वात् दीक्षादीनाञ्चाङ्गत्वात् तद्दीक्षा इहापि पुरुषे यज्ञभावना तदायुर्भागेषु सवनत्रयभावनोपस्कृता प्रधानम् । तत्फलं तावद्वर्षजीवनम् । तदङ्गजातञ्च पुरुषसंबन्ध्यशिशिषादिषु दीक्षादित्वचिन्तनाः । ताश्चाङ्गत्वात् पृथगुत्तरखण्डेन कथ्यन्ते ।

वोऽन्वायत्ताः । प्राणा वाव वसवः । एते हीदं सर्वं वासयन्ति ॥ १ ॥

तं चेत् एतस्मिन् वयसि किञ्चिदुपतपेत्, स ब्रूयात् 'प्राणा वसवः! इदं मे प्रातस्सवनं। माध्यन्दिनँ सवनमनु संतनुते'ति। 'माऽहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीये'ति। उद्धैव तत एति, अगदो ह भवति ॥ २ ॥

अथ यानि चतुश्चत्वारिँशद्वर्षाणि, तन्माध्यन्दिनँ सवनम्। चतुश्चत्वारिँशदक्षरा त्रिष्टुप्; त्रैष्टुभं माध्यन्दिनँ सवनम्। तदस्य रुद्रा अन्वायत्ताः। प्राणा वाव रुद्राः। एते हीदं सर्वँ रोदयन्ति ॥ ३ ॥

तं चेत् एतस्मिन् वयसि किञ्चिदुपतपेत्, स ब्रूयात्, 'प्राणा रुद्राः! इदं मे माध्यन्दिनँ सवनं तृतीयसवनमनु संतनुते'ति। माऽहं प्राणानाँ

प्रसिद्धयज्ञे प्रातस्सवनस्य वसुस्वामिकत्वादिति भावः । प्रसिद्धान् वसून् व्यावर्तयति **प्राणा वाव वसवः** । वावशब्दोऽवधारणे । प्राणानां वसुत्वे युक्तिमाह **एते हीदं सर्वं वासयन्ति** । शरीराणामशैथिल्यलक्षणवासस्य प्राणाधीनत्वादिति भावः । **तं चेत्—तपेत्** । तं पुरुषविद्यानिष्ठम्, **एतस्मिन् वयसि** चतुर्विंशतिवर्षात्मके वयसि **किञ्चित्** रोगादिकम् **उपतपेत्** बाधेत चेदित्यर्थः । **स ब्रूयात्—विलोप्यसीयेति** । तदा इमं मन्त्रं स उपासको **ब्रूयात्** जपेत् । हे प्राणा वसवः! यज्ञरूपस्य ममाधुना प्रातस्सवनं प्रवर्तते । इदं प्रवर्तमानं प्रातस्सवनं माध्यन्दिनसवनेनाविच्छिन्नं कुरुत । प्रातस्सवनेशानां प्राणानां वसूनां मध्ये = [1]तेषु पश्यत्सु, यज्ञरूपोऽहं **मा विलोप्सीय** लुप्तो मा भूवम् । छान्दसो माङि लुङभावः । माशब्दो वा । **उद्धैव—भवति** । ततः उपतापात् **उदेति** उद्गच्छति । **अगदो भवति** अरोगो भवति[2] । एवमुत्तरत्रापि ।

अथ यानि—रोदयन्ति । [3]यौवने इन्द्रियाणामत्यन्तं विषयप्रावण्यजनकतया पुरुषान् रोदयन्तीति रुद्रत्वमुपपन्नमित्यर्थः । **तं चेद्—। एतस्मिन् वयसि**

1. तेषु पश्यत्सु इत्यधिकं क. 2. भवतीत्यर्थः ख. 3. यौवनेत्यादिपङ्क्तिषट्कस्थाने 'स्पष्टोऽर्थ' इति. क.

वासयन्तीतिशब्दप्रयोगः वसुशब्दार्थस्य प्रकृते समन्वयाय । वास इह स्थितिः सत्ता । **यज्ञो विलोप्सीयेति** । षोडशवर्षशतात्मकसवनत्रयसंततो हि पुरुषयज्ञः मध्ये व्याध्यादिना पुरुषलोपे लुप्तः स्यात् । अतो वस्वादित्वेन भावितेषु प्राणेषु प्रसक्तयज्ञविलोपनिवर्तकत्वमपि भावनीयम् ।

रुद्राणां मध्ये यज्ञो विलोप्सीयेति। उद्धैव तत एति ; अगदो ह भवति ॥ ४ ॥

अथ यान्यष्टाचत्वारिंशद्वर्षाणि, तत् तृतीयसवनम्। अष्टाचत्वारिँ-शदक्षरा जगती। जागतं तृतीयसवनम्। तदस्याऽऽदित्या अन्वायत्ताः। प्राणा वाव आदित्याः। एते हीदँ सर्वमाददते ॥ ५ ॥

तं चेत् एतस्मिन् वयसि किञ्चिदुपतपेत्, स ब्रूयात्, 'प्राणा आदित्याः इदं मे तृतीयसवनम् आयुरनु संतनुते' ति। 'माऽऽहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीये' ति। उद्धैव तत एति ; अगदो हैव भवति ॥ ६ ॥

एतद्ध स्म वै तद् विद्वानाह महिदास ऐतरेयः, 'स किं म एतदुप-

चतुर्विंशतिवर्षादूर्ध्वम अष्टषष्टिवर्षमध्ये इत्यर्थः। **प्राणानां रुद्राणां मध्ये** माध्यन्दिनसवनेशानां भवतां मध्ये इत्यर्थः।

अथ यान्यष्टाचत्वारिंशद्वर्षा-। **प्राणा वा आदित्याः एते हीदं सर्वमाददते**। सर्वस्य विषयजातस्याऽऽदानात् प्राणानामादित्यत्वमित्यर्थः। **तं चेत्**-। **एतस्मिन् वयसि** अष्टषष्टिवर्षादूर्ध्वं षोडशोत्तरशतवर्षमध्य इत्यर्थः। **तृतीयसवनमायुरनुसंतनुतेति**। तृतीयसवनात्मकमायुः आसमाप्ति अविच्छिन्नं कुरुतेत्यर्थः। **प्राणानामादित्यानां मध्ये** तृतीयसवनस्वामिनां भवतां मध्ये इत्यर्थः।

एतद्ध—**न प्रैष्यामीति**। हे रोग! स त्वं **मे** मां **किं** कस्मात् **एतत्** एवम्प्रकारेण उपतपसि, योऽहं पुरुषविद्यानिष्ठः त्वत्कृतेनानेनोपतापेन **न प्रैष्यामि** न मरिष्यामि। अतस्तव श्रमो वृथैवेति, **एतत्** पुरुषविज्ञानस्वरूपं विद्वान् इतरपुत्रो महिदासनामा, आह स्मेत्यर्थः। **ऐतरेयः**। शुभ्रादित्वात् इतरशब्दात् अप-

---

इतरपुत्र इति। एवमेव सर्वत्र पाठः। शुभ्रादिगणेऽपि इतरशब्दः ह्रस्वान्त एव पठितोऽस्ति। शाङ्करभाष्ये, 'इतरायाः पुत्र' इत्युक्तम्। तत ऐतरेयब्राह्मणभाष्यभूमिकायामपि कस्यचिन्महर्षेर्ब्रह्मीषु भार्यासु इतरानामधेया काचिदिति संप्रदायविद इति सायणेनोक्तम्। एवंसति 'स्त्रीभ्यो ढक्' इति ढक् अत्र न प्राप्नोति। किन्तु तदपवादः, 'अवृद्धाभ्य—' इति अणेव। शुभ्रादिगतेतरपदेन स्त्रीप्रत्ययान्तस्यापि विवक्षासंभवे तु ढक् स्यात्। एवंसति इहापि गणपाठगतेतरशब्दार्थो यो जनः, तत्पुत्र इत्यर्थो विवक्षणीयः स्यात्। स्वरसतस्तु गणपाठगतपुङ्क्तेतरशब्दबलात् ऐतरेयपितुरेव इतरेति नाम, न मातुरिति पाणिन्याशये स्थिते तद्विरुद्धो व्याख्यानसंप्रदायो न विश्वसनीयाविति भाष्याशय उन्नीयते।

तपसि, योऽहमनेन न प्रैष्या[1]मी'ति। स ह षोडशं वर्षशतमजीवत्।
[2]प्र ह षोडशं वर्षशतं जीवति, य एवं वेद ॥ ७ ॥

इति तृतीयाध्याये षोडशः खण्डः।

३—१७.

स यदशिशिषति, यत् पिपासति, यन्न रमते, ता अस्य दीक्षा[3] ॥ १ ॥
अथ यदश्नाति, यत् पिबति, यद् रमते, तदुपसद्भिरेति ॥ २ ॥
अथ यद्धसति, यज्जक्षति, यन्मैथुनं चरति, स्तुतशस्त्रैरेव तदेति ॥ ३ ॥
अथ यत् तपो दानमार्जवमहिँसा सत्यवचनमिति, ता अस्य दक्षिणाः[4] ॥ ४ ॥

1. प्रेष्यामि शां. मा. 2. स ह मा. 3. दीक्षाः. पा. 4. एतदनन्तरं, ददात्यात्मदक्षिणं वैतत् सत्रमिति इत्यधिकं माध्वमूले। न तु व्याख्याने।

त्यर्थे ठक्। स—शतमजीवत्। सः महिदासः षोडशं षोडशाधिकं वर्षशतमजीवदित्यर्थः। 'तदस्मिन्नधिकमिति दशान्ताड्डः' इति षोडशशब्दात् डप्रत्ययः॥ [अतो विद्यायां फलप्रापकत्वनिश्चयवतोऽवश्यं फलप्राप्तिर्भवतीति भाव।] अन्योऽप्येवंवित् षोडशं वर्षशतं जीवतीत्याह प्र ह—वेद। [स्पष्टोऽर्थः] ३—१६.

[तथा पुरुषस्य यज्ञसादृश्यमेव निरूपयति]—स यत्—दीक्षा। अशनायापिपासारत्यभावानां दुःखात्मकत्वेन दीक्षात्वम् [कल्प्यमित्यर्थः]। अथ यत्—एति। अशनपानरतीनां पयोव्रतादियुक्तोपसद्वत् सुखरूपत्वात् उपसद्रूपत्वम्। उपसदैरेति उपसद्भिः साम्यमेति। उपसद्दृष्टिस्तासु [अशनपानरतिषु] कर्तव्येत्यर्थः। अथ यद्धसति—तदेति। हासादीनां[1] शब्दवत्त्वसाम्यात् स्तुतशस्त्रैः साम्यमेतीत्यर्थः। अथ यत् तपः—दक्षिणाः। दक्षिणादृष्टिस्तेषु कर्तव्येत्यर्थः। धर्मपु[2]ष्टिकरत्वसाम्यादिति भावः।

1. हासभक्षणमैथुनादीनाम् ख. 2. तुष्टि क.

प्र ह्येति। प्रजीवति। प्रकर्षो रोगाद्युपतापराहित्यम्।

तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवावभृथः ॥ ५ ॥

तस्मादाहुः, 'सोष्यति, असोष्टे'ति पुनरुत्पादनमेवास्य [तत्?]। यतो हेतोः पुरुषस्यैव यज्ञरूपत्वम्, अत एव, यथा यज्ञं करिष्यमाणे पुरुषे 'देवदत्तः सोमं सोष्यती'ति प्रयुञ्जते, तथा—यदा माता तं पुरुषं जनयिष्यति तदा पुरुषस्योत्पादनं प्रतीक्ष्य—'पुरुषं सोष्यती'ति प्रयुञ्जते लोकाः। [1]यागानन्तरम् 'असोष्ट सोमं यज्ञदत्त' इतिवत्, 'असोष्ट माता पुरुषम्' इति उत्पत्तेः पश्चात् प्रयुञ्जते। अतश्च पुरुषस्योत्पादनमेव 'सोष्यति', 'असोष्टे'ति शब्दसंबन्धित्वसामान्यात् यज्ञानुष्ठानलक्षणमुत्पादनमित्यर्थः। [2]यज्ञपक्षे षुञ् अभिषवे इति धातुः; उत्पत्तिपक्षे षूङ् प्राणिप्रसव इति धातुः। **तन्मर (मर?) मरणमेवावभृथः।** समाप्तित्वसाम्यात् मरणे अवभृथत्वं पश्येदिति भावः।

1. यागाद्यनन्तरं क. 2. यज्ञपक्ष इत्यादिः धातुविवेकभागः क. कोशे.।

नन्वशिशिषादौ दीक्षादित्वकल्पनायां दुःखात्मकत्वादिसाम्यं प्रयोजकमुन्नीयते। चेतने पुरुषे द्रव्ये अचेतनयज्ञक्रियात्वकल्पनायां किं साम्यमित्यत्र साम्यं किञ्चित् श्रुतिर्दर्शयति **तस्मादाहुरिति**। ननु सोमं सोष्यतीत्यत्र सवने अभिषवे सोमो लता कर्म; न तु यज्ञः। तेन पुरुषे द्रव्यसाम्यं स्यात्; न यज्ञसाम्यम्। तत्राह **पुनरुत्पादनमेवास्य तत्**। यज्ञस्योत्पादनमेव तु **तत्** सोमद्रव्यसवनम्। **पुनश्शब्दः** त्वर्थे। वस्तुतोऽभिषवयागयोर्भेदेऽपि अदूरविप्रकर्षात्, चरुं निर्वपति, पशुमालभते, सोमं सौतीति इष्टिपशुसोमयागोत्पादनेषु परिभाषणं प्रसिद्धमिति भावः। भवति च सोमद्रव्याभिषवस्य यज्ञोत्पत्त्यनुकूलव्यापारतया स यज्ञोत्पादनमेवेति, पुरुषोत्पादनं यज्ञोत्पादनमिति। अस्य वाक्यस्य विधेयोद्देश्यवाचिपदद्वयसापेक्षत्वात् **तदि**त्यस्य अत्रैव घटनं युक्तम्। उत्तरवाक्ये तत् अनपेक्षितञ्च। एवमेव भाष्याकूतं स्यात्। पुरुषोत्पादनमेव यज्ञोत्पादनमिति मूलार्थेऽपि तात्पर्यं पूर्वोक्तं ग्राह्यम्। **पुनरित्येतत्** पूर्ववाक्येऽप्यन्वियात्। तदा चार्थकम्।

तद्धैतत् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाच, अपिपास

तद्धैतत्— उवाच । घोरनामा अङ्गिरोगोत्रः कश्चिदृषिः **तदेतत्** पुरुषयज्ञदर्शनं **देवकीपुत्राय कृष्णाय**—इति शब्दोऽध्याहर्तव्यः— [1]कृष्णशेषभूतम्, तत्प्रीत्यर्थमित्युक्त्वा इत्यनुसंधाय **उवाच** अनुष्ठितवानित्यर्थः । वचेर्लक्षणयाऽनुष्ठानार्थत्वम् । **अपिपास एव स बभूव** । सः घोरनामा भगवच्छेषत्वानुसंधानपूर्वकपुरुषयज्ञोपासनानुष्ठानेन ब्रह्मविद्यां प्राप्य **अपिपासः**— [इदमुपलक्षणमपहतपाप्म

1. इदं ख. कोशे ।

कृष्णायेति । ननु श्रीदेवकीपुत्रश्रीकृष्णवत् भक्तिधारिततन्नामदेवक्यन्तरपुत्रकृष्णान्तरस्यापि संभावितत्वात् कस्यचित् शिष्यभूतस्य कृष्णस्य ग्रहणेन **समञ्जसे** वाक्यार्थे **किमिति** भाष्ये परमात्मग्रहणम्, इतिशब्दाध्याहारः, **उवाचे**त्यस्यानुष्ठाने लक्षणा, **अपिपास** इत्यस्य मुक्ते लक्षणा चेति चेत् – सत्यम् । अस्तु तावत् सान्दीपनेरिव घोरस्यापि शिष्यः श्रीकृष्ण इति ; अस्तु वा तन्नामाऽन्यः कृष्ण एवेह । तथापि कोऽसौ **समञ्जसो** वाक्यार्थः ? पुरुषविद्यारूपविज्ञानं कृष्णाय शिष्यायोक्त्वोवाचेत्यत्र **उवाचे**त्यस्य किं कर्म ? **अपिपास** इत्यादेः न तत्कर्मत्वं संभवति । **सोऽन्तवेलाया**मित्यादेः कर्मत्वे व्यवहितान्वयापत्तिः । अपिपास इत्यादेश्च कस्तदाऽर्थः । कृष्णो विद्यान्तराधिजिगमिषारूपापिपासारहितो बभूवेत्यर्थ इति चेत् – स इत्यस्याप्रधानपरामर्शित्वापत्तिः ; पिपासापदलक्षणा च । ननु ५–२–३. स्थल इव **अपिपास** इत्यादिकं सर्वमेव उवाचेत्यस्य कर्म । **सः** पुरुषविद्यानिष्ठः **अपिपासः** रोगादिरहितः सुखजीवी **बभूव** भवेत् । 'छन्दसि लुङ्लङ्लिटः' इति लिङर्थे लिट् । 'प्रोवाच तां तत्त्वतो ब्रह्मविद्या' मितिवत् इति चेत् – अशनाया पिपासा च यथाकालं यस्य, स खलु सुखजीवी । न त्वपिपासो मन्दाग्निः । तत् कथं तदर्थयोगः ? पिपासाशान्त्यर्थवस्त्वलाभप्रयुक्तपिपासापीडारहित इति तदर्थ इति चेत् – लक्षणैव दोषः । एतादृशार्थवर्णने च **अपिपास एव स बभूवे**त्यस्य **सोऽन्तवेलाया**मित्यादेश्च न कश्चित् संबन्धोऽस्ति । षोडशाधिकवर्षशतजीवनरूपफलस्य प्रागेतदकरणेऽपि लब्धतया अन्तवेलायां विहितस्य एतत्त्रयजपस्य पुरुषविद्याङ्गत्वानुपपत्तिश्च । अतः अधस्तात्, 'महिदास आह ; स ह षोडशं वर्षशतमजीवत्' इतिवत् 'घोर उवाच, अपिपास एव स बभूवे' ति प्राचीनपुरुषव्यापारस्य साफल्यप्रदर्शनेन प्रशोचकमिदं वाक्यं युक्तम् । तदा च बभूवेत्येतन्न लाक्षणिकम् । एवञ्च **तद्धैत**दिति वाक्यस्यैवमवतरणम् । ननु किमनेन षोडशवर्षशतजीवनेन पश्चात्तनपुरुषार्थानुपयोगिना ? तत्राह **तद्धैत**दिति । पुरुषविद्यानिष्ठ एव घोर आङ्गिरसः अपिपासोऽपि बभूव । यत्तत् प्रेतीभूतस्य पिपासा कापि भवतीति वदन्ति तद्रहितो बभूव । 'यदु चैवास्मै शव्यं कुर्वन्ति, यदु च ने'त्युक्तरीत्या प्रेतभावाद्यभावात् अपिपासो मुक्तो बभूवेति । ननु पुरुषविद्यारूपदृष्टिविधिप्रवृत्तस्य परब्रह्मचिन्तारहितस्य कथं मुक्तिरिति शङ्कानुन्मेषाय अपिपासभावप्रयोजकाकारप्रदर्शकं कृष्णाय देवकीपुत्रायोक्त्वोवाचेति

एव स बभूव, सोऽन्तवेलायामेतत् त्रयँ प्रतिपद्येत, 'अक्षितमसि,' 'अच्युतमसि,' 'प्राणसँशितमसी'ति ।

त्वादिगुणाष्टकस्य] – मुक्तो बभूवेत्यर्थः । ततश्च षोडशाधिकवर्षशतजीवनफलकस्यापि पुरुषयज्ञदर्शनस्य भगवच्छेषत्वानुसंधानपूर्वकमनुष्ठितस्य ब्रह्मविद्योपयोगित्वमप्यस्तीति भावः । [1]यद्वा **स बभूवेत्यस्य** स भवतीत्यर्थः । **सोऽन्तवेलायामित्यत्र स इत्यस्य य इत्यर्थः** । ततश्च योऽन्तवेलायामेतत्त्रयं प्रतिपद्येत, सोऽपिपासो भवतीत्युत्तरत्रान्वयः । [[2]पुरुषविद्यानिष्ठस्यान्त्यकाले जप्यान् मन्त्रानाह ··] **सोऽन्त—प्रतिपद्येत** । सः भगवच्छेषत्वानुसंधानपूर्वकपुरुषविद्यासाधितचिरायुष्ट्वानुगृहीतब्रह्मविद्यानिष्ठः पुरुषः **अक्षितमसि, अच्युतमसि, प्राणसंशितमसि** इत्येतन्मन्त्रत्रयं मरणकाले जपेदित्यर्थः । **अक्षितमसि** क्षयशून्यमसि । **अच्युतमसि** स्वरूपस्वभावप्रच्युतिशून्यमसि । **प्राणसंशितमसि** जगत्प्राणयितृत्वे सति **संशितं** सूक्ष्मतत्त्वमसीति **ब्रह्म**[3]संबोधनम् । शो तनूकरण इति हि धातुः ।

1. इदं ग कोशे घ. कोशे च । ग. कोशे यद्वा इति न । 2. इदं क. कोशे । 3. ब्रह्मणः क. ।

वाक्यम् । अतस्तदर्थ एवमेव वर्णनीय इति । एवञ्च **उवाचेत्यस्यानुष्ठानलक्षणायां** न 'सोऽन्तवेलाया'मित्यादिना व्यवहितेनान्वय इति दोषोऽपि । ननु श्रीकृष्णप्रीत्यर्थं पुरुषविद्यानुष्ठाने तस्य निष्कामकर्मणः चिरायुष्ट्वरूपं फलं कथमिति चेन्न – पुरुषविद्यासंपादितस्यायुषः श्रीकृष्णार्थतयैव तदनुष्ठानात् । नन्वेवं पुरुषविद्यानिष्ठेनानुष्ठीयमाना का सा ब्रह्मविद्या, यतो मोक्षो भवेदित्यत्राह **सोऽन्ते**त्यादि । अन्तिमप्रत्ययोपयोगितया अन्तवेलायामस्यैतन्मन्त्रत्रयार्थानुसंधान तदर्थजपादिकं श्रीकृष्णानुग्रहबलाद्भवेदित्युक्त्या पुरुषविद्यानिष्ठः स्वायुषि एतन्मन्त्रत्रयजपपरः स्यादिति सूच्यते । अत्रेदं बोध्यम् – 'नात्र कृष्णपदेन शिष्यो ग्राह्यः । नाप्युवाचेत्यस्य मुख्यार्थ आदर्तव्यः । नापि बभूवेत्यस्य भवेदित्यर्थो ग्राह्य' इत्यत्र न भाष्यकृतां निर्भरः । किंतु पुरुषविद्यानिष्ठेनापि परं ब्रह्म प्राप्यते तदायुर्द्वारेत्यर्थ इह विवक्षणीयः, उपरि ऋग्द्वयोदाहरणाद्यनुरोधादित्येव । तथाच घोर आङ्गिरसः स्वशिष्यं कञ्चित् प्रति पुरुषविज्ञानमुपदिश्योपर्येवमुवाच । किमिति ? 'सोऽयं पुरुषविद्यानिष्ठो मुक्त एव भवति । कथमिति चेत् – अन्तवेलायामेतन्मन्त्रत्रयार्थानुसंधाना' दिति वाक्यार्थवर्णनेऽपि न नो विद्वेषः । समानतात्पर्यादिति । इदमेव **यद्वे**त्यादियोजनान्तरेण दर्शितमपि स्यात् । एवं तत्र तच्छब्दस्य यच्छब्दार्थवर्णनेऽप्यनिर्भरो द्रष्टव्यः ।

तत्रैते द्वे ऋचौ भवतः—
आदित् प्रत्नस्य रेतसः— ॥
उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरम्
स्वः पश्यन्त उत्तरम् ।

तत्रैते द्वे ऋचौ भवतः । तत्र परब्रह्मविषये एतौ [1]ऋङ्मन्त्रौ भवत इत्यर्थः । **आदित् प्रत्नस्य रेतसः** । तयोः ऋचोरयमाद्यो मन्त्रः प्रतीकेन गृहीतः । ' आदित् प्रत्नस्य रेतसः ज्योतिः पश्यन्ति वासरम् । परो यदिध्यते दिवि ' इति । **प्रत्नस्य** पुरातनस्य **रेतसः** जगद्बीजभूतस्याव्यक्तस्य **आदित्** आदिभूतम्, संसारसंतमसनिवारकतया ज्योतिश्शब्दितं परं ब्रह्म, ' सदा पश्यन्ति सूरयः ' इत्युक्तरीत्या नित्यसूरयः [2]**वासरं** नित्यप्रकाशरूपं सर्वकालं पश्यन्तीत्यर्थः । **यत्** ज्योतिः, 'अथ यदतः परो दिवो ज्योतिर्दीप्यते ' इत्युक्तरीत्या **दिवि** भगवल्लोके परत्वेन **इध्यते** निरतिशयदीप्तियुक्तविग्रहयुक्तमित्यर्थः ।

उद्वयं—ज्योतिरुत्तममिति । **तमसः** प्रकृतेः परस्तात् **उत्तरं ज्योतिः** परब्रह्म परिपश्यन्तः, **उत्तरं** सर्वलोकोर्ध्वं **स्वः** भगवल्लोकं परिपश्यन्तः — अत्र **परिपश्यन्त** इत्युभयत्र हेत्वर्थे शतृप्रत्ययः । भगवल्लोकस्य तद्भूतपरमात्मनश्च दर्शना-

1. एतौ ऋचौ मन्त्रौ ख. 2 घ. कोशे ' नित्यसूरयः पश्यन्ति ' इत्येतावदेव । ' वासरं नित्यप्रकाशरूप ' मिति नास्ति क. कोशे ।

प्रतीकेन गृहीतः इति । नन्वत्र षण्णां पादानां श्रवणात् गायत्रीच्छन्दस्कर्ग्द्वयमिदमित्येव कस्मान्न भवतीति चेन्न — तादृशकर्मठस्य कुत्राप्यदर्शनात् । अत्र प्रथममन्त्रे अन्ते ' दिवा ' इति ऋग्वेदपाठः शाङ्करादृतः । अस्य सामवेदोपनिषत्त्वात् ' दिव ' इति सामवेदीयपाठ एवात्रादृत इति विशेषः । ननूपरि कथं पक्षपातात् एका ऋक् इति चेन्न । तत्र ' ज्योतिः पश्यन्त उत्तरम् ' इति ऋग्वेदादृतद्वितीयपादस्थाने शुक्लयजुर्वेदादृतो द्वितीयः पादः, 'स्वः पश्यन्त उत्तरम् ' इति । तदटितस्यापि प्रकृते उदाजिहीर्षयाऽधिकोक्तेः । तथाच चतुष्पादेव सा ऋगिति । एवं, ' रोहन्तो नाकमुत्तमम् ' इत्यथर्ववेदादृतद्वितीयपादोऽपि भाव्यः । एवमृग्द्वयोदाहरणेन पुरुषविद्यानिष्ठोऽन्तत एवं मुक्तिमाप्नोतीति श्रुत्या विशदीक्रियते । ' मन्त्रद्वयमिदं न जप्यम् । किन्तु उक्तार्थसाक्षिभूत ' मिति शाङ्करे । ऐतरेये तु मुमूर्षोरिमौ मन्त्रौ जप्यावेवोक्तौ ( )।

देवं देवत्रा सूर्यमगन्मज्योतिरुत्तमम् ॥ इति, ज्योतिरुत्तममिति ।

इति तृतीयप्रपाठके सप्तदशः खण्डः

येति यावत्—**देवत्रा** देवेषु—'देवमनुष्ये' त्यादिना [1]सप्तम्याः त्राप्रत्ययः—**देवं** द्योतमानम्[2] **उत्तमम्** अचिरादिपर्वभूतम्[3] सूर्यरूपं ज्योतिः **'वयमुदगन्म** उद्गत्य प्राप्ताः स्मः इत्यर्थः । द्विरभ्यासो यज्ञकल्पनासमाप्त्यर्थः ॥

एतत्खण्डांतर्गतवाक्यविषयकमधिकरणं लिख्यते —

गुणोपसंहारपादे तैत्तिरीयके, 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी[5]—' इति श्रुतायाः पुरुषविद्यायाः, 'पुरुषो वाव यज्ञः' इति छान्दोग्यान्नाता पुरुषविद्या न भिन्ना । पुरुषविद्येति समाख्यैक्यात् । पुरुषसंबन्धिषु यज्ञावगवत्वकल्पनासाम्यात् । मरणावभृथत्व[6]साम्याच्च इति पूर्वपक्षे प्राप्ते उच्यते—

'पुरुषविद्यायामपि चेतरेषामनाम्नानात्'। उभयत्राम्नातयोः पुरुषविद्यात्वेऽपि विद्याभेदोऽस्त्येव । कुतः ? **इतरेषामनाम्नानात्** । 'यत् सायं प्रातर्मध्यन्दिनञ्च तानि सवनानी' त्यादीनां तैत्तिरीयकाम्नातानां छान्दोग्येऽनाम्नानात् । त्रेधाविभक्तपुरुषायुषस्यैव छान्दोग्ये सवनत्वाम्नानात् । छान्दोग्यश्रुताशिशिषादिदीक्षादित्वपरिकल्पनस्य तैत्तिरीयके अदर्शनात् । यजमानपत्न्यादिपरिकल्पनानाञ्च भिन्नभिन्नत्वात् ।

छान्दोग्ये, 'पुरुषो वाव यज्ञ' इति श्रुतस्य पुरुषे यज्ञत्वकल्पनस्य तैत्तिरीयके अदर्शनाच्च विद्याभेद एव । न च, 'तस्यैवं विदुषो यज्ञस्ये' त्यत्र षष्ठ्यन्तयोः सामानाधिकरण्याश्रयणेन पुरुषे यज्ञत्वकल्पनं तैत्तिरीयकेऽप्यस्तीति वाच्यम् – पुरुषस्यैव, यज्ञत्वे तस्यैव यजमानत्वं विरुद्धम् । यज्ञत्वयजमानत्वयोरेकस्मिन् विरोधात् । किञ्च पुरुषे यज्ञत्वकल्पने हि, 'विद्वान् यज्ञः, आत्मा यजमान' इत्येव वक्तव्यं स्यात्; न तु एकवाक्यतया, 'विदुषो यज्ञस्यात्मा यजमानः' इति । अतो 'विदुषो यज्ञस्ये' ति व्यधिकरणे षष्ठ्यौ । विद्वत्संबन्धियज्ञस्येत्यर्थः । ततश्च, 'प्रणव एव विस्वरः' इति न्यायेन पुरुषस्य यज्ञत्वकल्पनैकरूप्याभावात् विद्याभेद एव ।

1. सप्तम्यन्तात् ग. 2. उत्तरम् ख. 3. अर्चिरादि पूर्वभूतं घ. अर्चिसर्वभूतं ख. 4. द्वयं ख. 5. अत्र ख कोशे पूर्णश्रुतिरुद्धृताऽस्ति । 6 'त्व' इति न ख. कोशे ।

अधिकरणं लिख्यत इति । विदुषो यज्ञस्येत्यस्य अत्र कृतादधिकोऽर्थविवेकः तैत्तिरीयभाष्ये कृतो द्रष्टव्यः । अन्योऽपि विशेषस्तत्र तत्परिष्कारे च ॥

३—१८.

मनो ब्रह्मेत्युपासीतेत्यध्यात्मम् । अथाधिदैवतम् । आकाशो ब्रह्मेति । उभयमादिष्टं भवति अध्यात्मञ्चाधिदैवतञ्च ॥ १ ॥

तदेतच्चतुष्पाद् ब्रह्म ।

वाक् पादः, प्राणः पादः, चक्षुः पादः, श्रोत्रं पाद इत्यध्यात्मम् ; अथाधिदैवतम् — अग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इति । उभयमेवादिष्टं भवति अध्यात्मञ्चैवाधिदैवतञ्च ॥ २ ॥

वागेव ब्रह्मणश्चतुर्थः पादः । सोऽग्निना ज्योतिषा भाति च तपति

किञ्च छान्दोग्यान्नातायाः पुरुषविद्यायाः, 'प्र ह षोडशं वर्षशतं जीवति' इति षोडशाधिकवर्षशतजीवनं फलत्वेनान्नातम् । तैत्तिरीयके तु श्रुतायाः पुरुषविद्यायाः, 'ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत' इति पूर्वानुवाकविहितायाः ब्रह्मविद्यायाः, 'ब्रह्मणो महिमानमाप्नोति' इति ब्रह्मप्राप्तिफलिकायाः संनिधौ पठितत्वात् ब्रह्मविद्याङ्गतया ब्रह्मप्राप्तिफलकत्वमेव । अतः फलसंयोगभेदाच्च पुरुषविद्ययोर्भेद इति सिद्धान्तितम् ॥ प्रकृतमनुसरामः ॥ ३—१७.

अध्यात्मं मनसि, अधिदैवतमाकाशे च ब्रह्मदृष्टिरुपदिश्यते — **मनो ब्रह्म** —। **आदिष्टं भवति** । उपदिष्टं भवतीत्यर्थः । शिष्टं स्पष्टम् । **तदेतच्चतुष्पाद् ब्रह्म** । **तदेतत्** मनआख्यं ब्रह्म चतुष्पात् । कथं मनोरूपस्य ब्रह्मणश्चतुष्पात्त्वमित्यत्राह **वाक् पादः**—**श्रोत्रं पादः** । वागादीनां चतुर्णां मनोनियाम्यत्वात् मनःपादत्वाध्यासो युक्त इति भावः । **इत्यध्यात्मम्** । उक्तमिति शेषः । **अथाधिदैवतम्** । उच्यत इति शेषः । **अग्निः**—**पादः** । अग्न्यादयश्चत्वारः ब्रह्मरूपाकाशस्योदरलग्नाः पादा इव भान्ती (भवन्ती)त्यर्थः । **इत्युभयमेव** — **च** । स्पष्टोऽर्थः ।

वागेव— **तपति च** । अध्यात्मं ब्रह्मरूपस्य मनसः वागेव चतुर्थः पादः । सोऽधिदैवतं ब्रह्मरूपाकाशपादतया तत्संबन्धिनाऽग्निना **ज्योतिषा** प्रकाशकेन **भाति** प्रकाशते (श्य) ते । **तपति** स्वकार्योत्साही भवतीत्यर्थः । 'अग्निर्वाग् भूत्वा मुखं

च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं वेद ॥ ३ ॥

प्राण एव ब्रह्मणश्चतुर्थः पादः । स वायुना ज्योतिषा भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं वेद ॥ ४ ॥

चक्षुरेव ब्रह्मणश्चतुर्थः पादः । स आदित्येन ज्योतिषा भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं वेद ॥५॥

श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः । स दिग्भिर्ज्योतिषा भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ६ ॥

इति तृतीयाध्याये अष्टादशः खण्डः ।

प्राविश 'दिति अग्निदेवताया एव वागधिष्ठातृत्वेन तदधीन[1]प्रकाशप्रवृत्तिकत्वादिति भावः । एवमुत्तरत्रापि द्रष्टव्यम् । **भाति च—वेद** । वितरणविक्रमरूपहेतुभेदात् कीर्तियशसोर्भेदः । **ब्रह्मवर्चसं** वृत्ताध्ययनसमृद्धिः । शिष्टं स्पष्टम् । **प्राण एव—वायुना ज्योतिषा भाति** । वायुप्राणयोरेकतत्त्व[2]त्वादिति भावः । **चक्षुरेव—आदित्येन**—। आदित्यस्य चक्षुरधिष्ठातृत्वादिति भावः । **श्रोत्रमेव—दिग्भिः**—। 'दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्' इति दिग्देवतानां श्रोत्राधिष्ठातृत्वादिति भावः । अवशिष्टस्योक्तोऽर्थः । द्विरुक्तिर्विद्यासमाप्त्यर्था ॥ ३—१८.

1. प्रवृत्तिप्रकाश क. 2. एकवृत्तित्वा क.

वितरणविक्रमेति । इदं टीकातत्त्वटीकयोरुक्तम् । **भाति च तपति चेति** । अत्र कीर्त्या यशसा भाति, ब्रह्मवर्चसेन तपतीति योज्यमिति **तत्त्वटीका** । **वायुना ज्योतिषेति** । वायोर्ज्योतिष्ट्वं प्राणभानकरत्वात् । वह्न्यादेरग्न्यादिरिव न प्राणस्य वायुर्देवता । अथापि तस्य तादधीन्योक्तिः तद्विकारत्वादित्याशयेनाऽऽह **एकतत्त्वत्वादिति** । इदञ्च प्राणोऽयं मुख्यप्राण इत्याशयेन । प्राणो घ्राणमिति तु शाङ्करे । तदाऽपि न वायुर्देवता । किन्तु 'वायुर्गन्धानिवाशयात्' इति न्यायेनोपकारी ॥

३--१९.

आदित्यो ब्रह्मेत्यादेशः । तस्योपव्याख्यानम्—

असदेवेदमग्र आसीत् । तत् सदासीत् । तत् समभवत् । तदाण्डं निरवर्तत । तत् संवत्सरस्य मात्रामशयत । तन्निरभिद्यत । ते आण्डकपाले रजतश्च सुवर्णश्चाभवताम् ॥ १ ॥

तद् यद्रजतँ सेयं पृथिवी । यत् सुवर्णँ सा द्यौः । यज्जरायु ते पर्वताः ।

पूर्वत्रादित्यो ब्रह्मणः पाद उक्तः । अथ तस्मिन् सकलब्रह्मदृष्ट्यर्थमिदमार-भ्यते—**आदित्यो ब्रह्मेत्यादेशः** । 'आदित्यो ब्रह्म' इत्युपदेशः क्रियत' इत्यर्थः । **तस्योपव्याख्यानम्** । क्रियत इति शेषः । **असदेवेदमग्र आसीत्** । **इदं** जगत् अग्रे **असत्** अव्याकृतनामरूपमासीत् । **तत् सदासीत्** । **तत्** अव्या-कृतनामरूपं जगत् **सदासीत्** ईषन्नामरूपकार्याभिमुखमासीत् । **तत् समभवत्** । अल्पतरनामरूपव्याकरणेन, अङ्कुरीभूतमिव बीजं क्रमेण स्थूलमभवदित्यर्थः । **तदाण्डं समवर्तत** । अण्डं संवृत्तमित्यर्थः । आण्डमिति च्छान्दसो दीर्घः । **तत् संवत्स-रस्य मात्रामशयत** । संवत्सरस्य कालस्य **मात्रां** परिमाणम् एकरूपतया **अशयत** स्थितं बभूवेत्यर्थः । **तन्निरभिद्यत** । संवत्सरकालादूर्ध्वं तदण्डं निर्भिन्नमभवत् । **ते—चाभवताम्** । ते **आण्डकपाले** अण्डकपाले **रजतश्च सुवर्णश्चैकैकमभवता-मित्यर्थः** ।

तद्—पृथिवी । यत् रजतमयं कपालम्, तत् पृथिव्याद्युपलक्षितमधोण्ड-कपालमित्यर्थः । **यत् सुवर्णं सा द्यौः** । सुवर्णमयं कपालं द्युलोकोपलक्षितमूर्ध्व-कपालम् । **यज्जरायु ते पर्वताः** । **जरायु** गर्भपरिवेष्टनम् । अण्डस्य शकली-

---

आदित्यो ब्रह्मेति । अस्या आदित्यदृष्टेर्निर्दुष्टकल्याणघोषप्राप्त्यधीनसुखलाभः **फलम्** । यथा लोके अण्डोत्पत्तिरण्डजजन्तूत्पत्त्यर्था, तथेहेति ब्रह्माण्डान्तः आदित्यस्यैव प्राधान्यं गम-यितुमेतदुपव्याख्यानम् । अत एव पृथिवीद्युपर्वतादिषु निर्भिन्नकपालत्वादिकल्पनया **सर्वस्य** गुणभूतत्वोक्तिः । **मात्रा**मिति अत्यन्तसंयोगे द्वितीया । यथा पक्ष्यादिजमण्डं कञ्चित् कालं तथैव स्थितं कालविपाकात् निर्भिद्यते, तथेति । **रजतमय**मिति । ऊर्ध्वाधोलोकानां सुवर्णत्वरजतत्वे अतिशयितभोगसाधनत्वतारतम्यादारोपिते । नात्र मयट् विकारार्थे । वस्तुतो रजतविकारत्वाभावात् ।

यदुल्बं स मेघो नीहारः। या धमनयस्ता नद्यः। यद् वास्तेयमुदकं स समुद्रः॥२॥

अथ यत्तदजायत, सोऽसावादित्यः। तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्; सर्वाणि च[1] भूतानि; सर्वे च कामाः। तस्मात् तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति, सर्वाणि च भूतानि; सर्वे चैव[2] कामाः॥ ३॥

1. चकारो न माध्वे 2. सर्वे च कामाः शां मा.

भावदशायां याः स्थूलगर्भपरिवेष्टनसिराः, ते पर्वता बभूवुरित्यर्थः। **यदुल्बम्, स मेघो नीहारः।** यत् **उल्बं** सूक्ष्मं गर्भपरिवेष्टनम्, तत् मेघसहितं हिमम्। **या धमनयः, ता नद्यः।** धमनयः सिरा इत्यर्थः। **यद् वास्तेयमुदकम्, स समुद्रः।** वस्तौ भवं **वास्तेयम्।**

अथ यत्तदजायत, सोऽसावादित्यः। तत् तस्मिन्नण्डे गर्भरूपं यदजायत, सः असावादित्य इत्यर्थः। **तं—कामाः।** तमादित्यं जायमानमनु **उलूलवः** उरुरवः = उरुरवाः विस्तीर्णरवाः महाध्वनियुक्ताः। **उलूलव** इति छान्दसं रूपम्। **घोषाः** शब्दाः, स्थावरजङ्गमानि **भूतानि** च, तेषां **कामाः** काम्यमानाः स्त्रीवस्त्रादयश्च **उदतिष्ठन्** उत्थितवन्त इत्यर्थः। सर्वस्यादित्योदयानन्तरभावित्वादिति भावः। **तस्मात्—कामाः।** तस्मादद्यत्वेऽपि आदित्यस्योदयं प्रति, **प्रत्यायनमस्तमयञ्च** प्रति, उरुरवाः शब्दाश्च भूतानि च कामाश्च उत्पद्यन्त इत्यर्थः। उदयास्तमयवेलायां पक्षिघोषादीनां दर्शनादिति भावः।

अतः, 'प्राणिरजतादिभ्योऽञ्' इति राजतमित्येव स्यादिति न शङ्क्यम्। किंतु 'तत्प्रकृतवचने मयट्' इति भावे मयट्। प्रचुररजतरूपमित्यर्थः। **वस्तिः** मूत्रस्थानम्। **वास्तेयमिति**, 'यस्य वास्तेयमब्धिः' इतिवत्। **उलूलव** इति उत्सवकालीनाः शब्दविशेषाः देशविशेषे प्रसिद्धा इत्यानन्दगिरिः। अत्र बहुवचनत्वोपपत्तये उलूलुशब्दमुकारान्तं देशविशेषप्रसिद्धं कल्पयन्ति केचित्। सर्वथा तु शब्दे इति धातुनिष्पाद्यैतच्छान्दसरूपमूलको देशविशेषे ईदृशव्यवहारः, न तु अपभ्रंशलौकिकपदमिदमिति ज्ञापनाय **उरुरवा इति, छान्दसमिति** चोक्तम्। **अस्तमयञ्चेति**। यद्यपि प्राक् **जायमानमित्युक्तस्यात्रोदयमात्रे** घोषादयुत्थितिकथनमुपष्टम्भकम्—अथापि तत्साहित्येनास्तमयेऽप्येतद्दर्शनादेवमुक्तम्। **प्रत्यायनपदस्य** प्रत्यागमन एव प्रसिद्धत्वात् सोऽप्यर्थः **आहरोक्तः** उदयपदेनैव तस्योक्तत्वादिहोपेक्षितः। अस्तु वा सोऽप्यर्थ इहोपलक्ष्यः; **उदयं प्रति इत्यत्रैव** जायमानत्वरूपार्थव्युदासाय **प्रत्यायनं प्रति** इति विवरणम्; अन्यथाऽस्तमयपरत्वे

स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्ते, अभ्याशो ह यदेनं साधवो घोषा आ च गच्छेयुः, उप च निम्रेडेरन्, निम्रेडेरन् ॥ ४ ॥

इति तृतीयाध्याये एकोनविंशः खण्डः ।

इति छान्दोग्योपनिषदि तृतीयोऽध्यायः (तृतीयः प्रपाठकः) ।

अथ चतुर्थोऽध्यायः । ४—१.

ओं । जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य

स य—निम्रेडेरन् । हशब्दः प्रसिद्धौ । **एनम्** आदित्यब्रह्मोपासकम् । **अभ्याशः** क्षिप्रम् । **यत्** ये इत्यर्थः । ये **साधवः** शोभनाः घोषाः, ते **उप** समीपे आगच्छेयुश्च । **निम्रेडेरन्** सुखं च कुर्युरित्यर्थः । 'मृड सुखे च' इति हि धातुः; अन्तर्भावितण्यर्थः । **निम्रेडेरन् निम्रेडेरन्** इति द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

इति छान्दोग्योपनिषत्प्रकाशिकायां तृतीयोऽध्यायः (तृतीयः प्रपाठकः)।

संवर्गविद्या प्रस्तूयते—

विद्यास्तुत्यर्था आख्यायिका — **जानश्रुतिर्ह — आस** । जनश्रुतस्यापत्यं **जानश्रुतिः** । हशब्दः प्रसिद्धौ । पुत्रसंज्ञस्य पुत्रः पौत्रः; तस्यापत्यं **पौत्रायणः** । **श्रद्धापुरःसरं देयं** [1]यस्य, सः **श्रद्धादेयः** । अर्थिभ्यो बहु दातुं शीलमस्य; स **बहुदायी** । बहुस्य गेहेऽन्नं पक्तव्यं यस्य, स **बहुपाक्यः** । एवङ्गुणसंपन्नो जानश्रुतिः

1. अयं ग. पाठः । अन्यत्र, 'देयमस्य' इति ।

चक्रारापत्तेरिति । **निम्रेडेरन्निति** । मृड क्षोदे सुखे च (सुखने) इति धातुग्रहणे मृड्णाति इति रूपं भवति । म्रेडृ उन्मादे इति धातौ च म्रेडतीति । प्रयोगोऽयं विमृश्यः !!

तृतीयेऽध्याये प्रथममैश्वर्यमिश्रमुक्तिफलां आदित्यमधुविद्यामादिश्य अथ शुद्धमुक्तिफलिकां गायत्रीविद्या, तदनुबन्धिक्षुद्रफलकौक्षेयज्योतिर्विद्या, अथ तद्वदेव भारूपज्योतिर्विषयिणी मुक्त्यर्था शाण्डिल्यविद्या, ततः प्रसक्तप्राणतत्त्वभूतवायुविषयिणी वायुवत्सककोशविद्या, प्राणात्मकपुरुषायुर्विषयपुरुषविद्या, वायुप्राणरूपादविशिष्टमनोब्रह्मदृष्टि, अथ तदृष्टयन्तर्गतप्रथमोपकान्तादित्यविषयकब्रह्मदृष्टिश्च क्रमेणोक्ताः । तत्राप्रधानतया दर्शितयोर्वायुप्राणयोः प्राधान्येन ग्रहणं यत्र, सा वायुप्राणरूपसंवर्गविषयिणी परविद्या रैक्केण ब्राह्मणेन जानश्रुतये क्षत्रियायोपदिश्य चतुर्थप्रपाटकारम्भे प्रस्तूयते ।

आस । स ह सर्वत आवसथान् मापयाञ्चक्रे, 'सर्वत एव मेऽन्न[1]मत्स्यन्ती' ति ॥ १ ॥

अथ ह हँसा निशायामतिपेतुः । तद्धैवँ हँसो हँसमभ्युवाद, '[2]भो भोऽयि भल्लाक्ष! भल्लाक्ष! जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततम् । तन्मा प्रसाङ्क्षीः[3] । तत् त्वा मा प्रधाक्षी' दि[4]ति ॥ २ ॥

1, अन्नमिति न शां मा. 2. होहोऽयि शां. मा. 3. प्रसांक्षीत् शां. 4. प्रधाक्षीः शा. मा.

कस्मिंश्चिद्देशे आस । स—अत्स्यन्तीति । स ह जानश्रुतिः, 'सर्वत एत्य अतिथयो ममान्नं भोक्ष्यन्त' इत्यभिप्रायेण सर्वासु दिक्षु ग्रामनगरमार्गारण्यादिषु पान्थानामनाथानां शीतवातवर्षातप[1]वारणान्नोदकशयनाच्छादनादिपूर्णाः शालाः कारितवानित्यर्थः ।

अथ — पेतुः । एवंसति कस्यांचित् रात्रौ केचन महात्मानोऽन्नदानादि-गुणैस्तोषिता भूत्वा हंसरूपास्सन्तो राज्ञो दर्शनगोचरे आगताः । तद्ध — अभ्युवाद । तत् तस्मिन् काले तेषां हंसानां मध्ये एकः पृष्ठतो गच्छन् हंसः अग्रेगामिनं कञ्चन हंसमुवाच । भो — प्रधाक्षीदिति । भो भो अयि इति संबोध्य, भल्लाक्षभल्लाक्षेत्यनेन विपरीतलक्षणया मन्दलोचनेति संभ्रमेण द्विवारं संबोधनम् । समं दिवा स्वर्गेण समम्, [2]दिवा दिवसेन समं वा अस्य राज्ञः तेजः प्रसृतम् । तत् तस्मिन् तेजसि मा प्रसाङ्क्षीः मा प्रसक्तो भूः । 'प्रसक्तौ को दोष' इत्यत्राऽऽह तत् त्वा मा प्रधाक्षीदि[3]ति । तत् तेजः त्वां मा दहेदित्यर्थः । इत्यभ्युवादेत्यन्वयः ।

1. वर्षातपनिवारक ग. 2. स्वर्गेण दिवसेन वा समम् क. 3. प्रधाक्षीरिति ग.

श्रद्धादेय इति । तथाच तैत्तिरीयम्, श्रद्धया देयमिति । अतिपेतुरिति । सर्वत्रान्नादि-प्रदानार्थावसथादिनिर्मातुरस्य जानश्रुतेर्धार्मिकाग्रेसरस्य स्वदेशवर्तिमहात्मरैकसंराधन—सर्वदर्शित्व-सर्वेश्वाभ्यपरमान्नभोक्तृत्वार्थपरविज्ञानलम्भनकाम्ययेति शेषः । अभ्युवादेति । अभिमुखीकरणेन संबोधनेन उवादेत्यर्थः । एवमुपर्यपि । भोभो इति संबोधनं तस्य दूरं गतत्वात् । तदाशये-नाऽऽह इति संबोध्येति । इति संबोध्य भल्लाक्षेति द्विवारं संबोधनं तेन विपरीतार्थे लक्षणा-करणेन मन्दलोचनेत्यर्थे संभ्रमकृतमिति योजना । भोभो इत्यस्यैव पर्याप्तत्वाद् भल्लाक्षेति संबोधनं व्यर्थमिति न; दिवासमस्य जानश्रुतिज्योतिषोऽपि दर्शनं ते बत नेति, सावधानं तेजोदर्शनेन दूरान्निवृत्त्यर्थ, मन्दलोचनेत्यर्थविवक्षया तत्करणात् । तत्रापि द्विरुक्तिस्तु भोभो इतिवत् संभ्रमकृतेति भावः । भद्राक्षेति पदं भल्लाक्षेति विकृतमित्यानन्दगिरिः । (भद्र, भद्दल. भल्लेति ?) भल्लतुल्यनेत्रेति क्वचित् कोशे व्याख्यानम् । दिवसेनेति । इयं निशाप्यत्र

तमुह परः प्रत्युवाच, 'कम्बर एनमेतत्सन्तँ सयुग्वानमिव रैक्कमात्थे' ति। 'यो नु, कथँ सयुग्वा रैक्क' इति ॥ ३ ॥

यथा कृताय विजिताया धरेऽयाः संयन्ति, एवमेनँ सर्वं तदभिस-

तमुह परः प्रत्युवाच। एवं जानश्रुतिप्रशंसारूपं वाक्यमुपश्रुत्य तदसहमान इवापरो हंसः प्रत्युवाचेत्यर्थः। [प्रत्युक्तिमेवाह] **कं—रैक्कमात्थेति**। **उ** इत्यनर्थको निपातः। अरे **कं सन्तं** केन माहात्म्येन युक्तं सन्तम् **एनं** जानश्रुतिं प्रति **सयुग्वानं** सशकटं **रैक्कमिव** रैकं प्रतीव **एतत्** [1]प्रशंसावचनं ब्रवीषि[2]। रैक एव ब्रह्मज्ञो महाप्रभावः। अब्रह्मज्ञस्यास्य किं तेजः; किं वा मां दहेदिति भावः।

एवमुक्तः पश्चात् एतन् हंसः पृच्छति -- **यो नु कथं सयुग्वा रैक्क इति**। **य** उक्तः, स किंप्रकार इत्यर्थः।

इतर आह — **यथा कृताय—स मयैतदुक्त** इति। यथा लोके — कृतनामा **अयः** द्यूतसमयप्रसिद्धः **चतुरङ्कायः**, तत्र **विजितं** जयो यस्य सः

1. प्रशंसापरं वचनम् **ग.** 2. प्रब्रूषि **ख.**

दिवसप्राया। तत् कथं न पश्यसीति भावः। **उ** इति। **कम्बर** इत्यत्र कं वरः इति छित्वा **वरो** वराको जानश्रुतिरिति क्लिष्टस्यातिनिन्दारूपस्यानन्वितस्य परानुयायिभामत्यादिकथितस्यार्थस्यासंमत्या इदमेव शाङ्करेऽपि दृष्टमादृतम्। न च 'निपात एकाजनाङ्' इति प्रगृह्यापत्तिः। 'मय उञो वो वा' इति संध्युत्पत्तेः। अतः उकार एवेहेति **एतदित्यस्य** एवमित्यर्थोऽपि स्यात्। **सन्तमिति** रैक्कविशेषणमिति माध्वयोजना। तदा, 'सन्तमेनं ततो विदुः' इत्युक्तस्य ब्रह्मवित्त्वस्य रैक्के कण्ठोक्तिः। **सयुग्वानम्**। युग्ययुक्ता शकटी युग्वा। (मत्वर्थीयो वनिप्प्रत्ययः।) तत्सहितम्। **ओ** न्विति। एतदनन्तरं स इत्यध्याहारः। योऽसौ, **स सयुग्वा रैक्कः** कथम्भूत इति। **इतिशब्दः** प्रश्नसमाप्तौ।

चतुरङ्काय इति। यथा चतुरादिपाद्धर्मकाः चतुरादिसहस्र संवत्सरसंख्याकाः युगभेदाः, तथा चतुरङ्क्यङ्क द्व्यङ्कैकाङ्काः अयाः क्रमेण कृतत्रेताद्वापरकलिनामानः। एतद्द्यूतप्रकारः **उशनोऽधिकरणकल्पतरुपरिमले** विशदं द्रष्टव्यः। अत्र किञ्चिदुच्यते। अयो नाम अक्ष इति केचित्। अक्षस्य भागः पार्श्वम् अय इत्यन्ये। 'अयः शुभावहे दैवे, गतौ, द्यूताक्षपातने' इति निघण्टुमनुसृत्य अयोऽक्षपातनमिति परे। तद् द्यूतम्। तद् द्विविधम् एकाक्षपातनं बहुक्षपातनञ्च। तत्र एकाक्षपातनमङ्किताक्षपातनम्। अङ्को नाम बिन्दुरूपं चिह्नमक्षगात्रेषु। एकत्र चत्वारोऽङ्काः, अन्यत्र त्रयः, अपरत्र द्वौ, इतरत्र एकश्च। एवम्भूतेनाक्षेण दीव्यत्सु पुरुषेषु येन पातितस्याक्षस्य चतुरङ्को भागः उत्तानः उपरि दृश्यमानो भवति, स कृतायभाक् विजयी।

मेति, यत् किञ्च प्रजाः साधु कुर्वन्ति, यत्तद् वेद, यत् स वेद, स मयैतदुक्तः' इति ॥ ४ ॥

कृतायविजितः पुरुषः; अथवा विजितं विजयः। तस्मै इत्यर्थः — तदर्थमितरे त्रिद्व्येकाङ्काः अधरे न्यूनाः अयाः संयन्ति संगच्छन्ते, अन्तर्भवन्ति — चतुरङ्के कृताये एकाङ्कद्व्यङ्कत्र्यङ्कानां 'शतं सहस्रे संभवती'ति न्यायेन विद्यमानत्वात् तत्रान्तर्भवन्तीत्यतः कृताङ्कविजयिनः एकाङ्कादिविजयोऽप्यस्तीति भावः —, एवमेव लोके प्रजाः यत् साधु कुर्वन्ति यद्यत् शोभनं कर्मानुतिष्ठन्ति, तत् सर्वम् एनं कृतायस्थानीयं रैकमभिसमेति संगच्छते। तत्कर्मणि सकलं शोभनं कर्म अन्तर्गतमिति यावत्। किञ्च यत्तद् वेद यत् स वेद स मयैतदुक्त इति। सः रैकः यद् वेद, तदेवान्योऽपि यः कश्चिद् वेद। तदज्ञातमेवान्ये जानन्ति। तदज्ञाने सर्वज्ञानमन्तर्गतमित्यर्थः। सः तादृशो रैकः मया एतत् इदानीं (एतद्वाक्येन), 'सयुग्वानमिव

यैस्तु पातितेऽक्षे त्र्यङ्कादिपार्श्वानामुत्तानता, ते पराजयिनः। चतुर्षु त्र्यादीनामन्तर्भावात्। अनङ्किताक्षपातनं तु बह्वक्षपातनम्। अनियतसंख्यान् राशिभूतान् अक्षान् विकीर्य चतुष्कशो गणने क्रियमाणे यस्य पुंसोऽन्तिममपि गणनं पूर्वसमं चतुरक्षात्मकम्, स कृतायेन विजयी। येषां तु त्र्यादिरूपतया तत् न्यूनम्, ते पराजयिनः। अत्र कृतायविजितायेति मूलमुभयसाधारणमिति भाष्येऽपि 'चतुरङ्काय'इत्यादि उदाहरणमात्रत्वात् प्रकारान्तरोपलक्षणम्। अस्त्यन्यदपि द्यूतं नियतसंख्यपञ्चाक्षपातनादिरूपम्, यत्राक्षाणां सर्वेषामुत्तानतया पातने विजयः, अन्यदा पराजय इत्यादिव्यवस्था। तादृशं तु द्यूतं न कृतादिशब्दैः प्रसिद्धम्।

अत्र कृतायस्य दृष्टान्ततया कथनम्, राज्ञां द्यूतपरिचयशालितया परिचितस्य दृष्टान्ततया कथनस्य युक्तत्वात्, रैकविद्यायां कृतत्वभावनासद्भावाच्च तस्योपस्थितत्वात्। एतच्छ्रवणाच्च राजा कितव इवाक्षपराजितो व्याकुलहृदयो भवेदिति।

पुरुष इति। एनमिति रैकस्य पुरुषस्य दार्ष्टान्तिकत्वेन ग्रहणात् इदं दृष्टान्तपदं पुरुषपरं स्वीकृतम्। आहिताग्न्यादिगणान्तर्भावकल्पनया वा 'विजितकृतायाय' इत्यर्थे इदं रूपम्। दार्ष्टान्तिके सर्वं तदिति क्रियाग्रहणात् क्रियायाः क्रियायामन्तर्भावस्य स्वरसत्वात् एनमिति रैकोक्तावपि रैककियायां पर्यवसानमित्यालोच्यात्रापि विजयक्रियापरत्वेन व्याख्याति अथवेति। एवं कृतायेति चतुर्थ्यन्तं पृथक्पदमेव स्यात्। विजितायेति रामो विजयत इतिवदकर्मकात् कर्तरि क्तः। अस्तु वा कर्मणि क्त एव; 'कृतं यजमानो विजिनाति' (आ. श्रौ. ५–२१) इति प्रयोगात्। तदर्थस्तु कृतेन यजमानो विजयत इत्येव। सहस्रे संभवतीति। संभवो मेलनम्। अन्तर्भावः।

रैक्कमात्थे' ति (त्यनेन) उक्त इत्यर्थः। **वेदान्ताचार्यैस्तत्त्वटीकायामस्यार्थस्य प्रतिपादितत्वात्।** उक्तञ्च भगवता भाष्यकृता, "लोके यत् किञ्चित् साध्वनुष्ठितं कर्म, यच्च सर्वचेतनगतं विज्ञानम्, तदुभयं यदीयज्ञानकर्मान्तर्गतम्, स रैक्क इत्याह" इति।

तत्त्वटीकायामिति। अत्र तत्त्वटीकाभावप्रकाशिकानुसारात्, 'तदेवान्योपि यः कश्चिद् वेद' इत्यस्य अन्योपि कश्चित् यो वेदेति योजना ग्राह्या। यच्छब्दस्य प्रतिसंबन्धि च **एन**मिति पूर्वपदम्। अतः, 'एवकारे कश्चिदितिपदे चाश्रूयमाणे कथमयमर्थ। एवकाराभावे हि अधिकत्वं न सिध्यति' इति न शङ्क्यम्। अत्र रैक्ककर्मणि सकलकर्मान्तर्भाववत् रैक्कज्ञाने सर्वज्ञानान्तर्भावोऽपि सिध्यतीति विशदीकरणार्थं, 'तदुज्ञातमेवान्ये जानन्ति। तदुज्ञाने सर्वज्ञानमन्तर्गतम्' इति स्वयं किञ्चिदुक्तम्। 'यस्तद्वेदे' त्यस्यान्वयस्तु, 'एनं सर्वं कर्म तदभिसमेती'त्यत्रैवेष्टः, तत्त्वटीकानुसारस्य दर्शितत्वात्। अत्र **तज्ज्ञात**मित्यत्र तत्पदं रैक्कविदितवेदिपुरुषपरम्। तथाच, एनं सर्वं कर्म तदभिसमेतीत्यन्वय एव दर्शितो भवति। **शाङ्करे**ऽपि इत्थमेवोपनिषद्योजना। यतः — एनमित्यादेः प्रथमोऽर्थः रैक्कं सर्वमभिसमेतीति; अथ यस्तद् वेदेत्यादिना, 'न केवलं रैक्कमेव, किंतु रैक्कविदितं यो वेद एनमपी'ति उच्यते इत्यर्थद्वयं स्पष्टं तत्र। तमित्यनुक्ता एनमितिकथनं संनिहितं जानश्रुतिमाकलय्येति च **स्वरस**म्। यत् रैक्को वेद, तत् जानश्रुतिरपि विद्याच्चेत्, रैक्कमिव एनमपि प्रजाकर्म सर्वमभिसमियात्। ततोऽयमपि स इव समाततज्योतिः स्यात्। न तु तदज्ञानेन एवं बहुदायित्वादिमात्रेणेति इतोऽवगमात् रैक्कशिष्येण मया भाव्यमिति जानश्रुतिः प्ररोचितो भवति। अत्र तत्त्वटीकाद्वीतीययोजनायां रैक्कविदितवेदिनि सर्वप्रजासाधुकर्मसंगम एव श्रुत्या साक्षादुक्तः। एवं सति **भाष्योक्तज्ञानकर्मोभयसंगमलाभः कथमिति** चेत् — एकत्र कर्ममात्रस्य अन्यत्र ज्ञानमात्रस्य चोक्तावपि उभयमुभयत्र विवक्षितम्। कर्मज्ञानयोर्मिथः साध्यसाधनभावात्। तदैवोपादनौचित्यात्। अत्र पूर्वत्र कर्मणा ज्ञानमुपलक्षितमिति ज्ञापनाय **सर्वचेतनगतविज्ञानस्य** भाष्ये पश्चान्निर्देशः; **वेदे**ति **कर्मोपलक्षणमिति** ज्ञापनायोत्तरत्र **ज्ञानकर्मे**ति क्रमादरणमिति च भाव्यम्। माध्वे तु **तत् यत्** इति पदयोर्विनिमयेन, 'लोके यो यद् वेद, तत् स रैक्को वेदेत्युक्तम्।

एवं तु समीक्षणे अन्यान्योऽप्यर्थः संभाव्यते। यथा—**सः** रैक्को यद् वेद, तद् यो वेद, स रैक्को मयोक्त इत्यर्थः। अनेन रैक्कविदितवेदी रैक्क इति कथनात् तद्विदितं स एव वेद, नान्य इति सर्वज्ञानस्य तदीयज्ञानान्तर्गतत्वं भाष्योक्तं स्पष्टम्। यथा च—यो रैक्कः तत् प्रकृष्टं **दुर्ग्रहं** (ब्रह्म) वेद, एनं सर्वं कर्माभिसमेति। **यत्** यस्मात् कारणात् स वेद, **एतत्** एतस्मात् **कारणात्** स रैक्को मया **उक्तः** प्रशंसित इत्यर्थः। तेनाब्रह्मविदो जानश्रुतेः बहुदायित्वादिसर्वविहितकर्मपरत्वेऽपि, 'अन्तवदेवास्य तद् भवती'त्युक्तरीत्या न महत्त्वम् — यावत् रैक्कस्य, 'पामानं कषमाण'मित्युक्तरीत्या विहितमहनीयकर्मानुष्ठानविरहिणोऽन्यथा चेष्टमानस्यापि ब्रह्मवित्त्वात् महत्त्वमित्युक्तं भवति। सर्वापेक्षया तु तत्त्वटीकादर्शितोऽर्थः सर्वयच्छब्दतत्प्रतिसंबन्धिशब्दैकान्वयेनैकवाक्यतासंपादकोऽक्लिष्टो जानश्रुतिप्ररोचकश्चेति।

यदपि **व्यासार्यैर्लघुसिद्धान्ते**, "आवृत्तिरसकृदुपदेशात्" इत्यत्र, **यस्तद् वेद** = यो वेदिता, **यत् स वेद** = यद् वेद्यम्, **स मयैतदुक्तः**(म्) स वेदिता **रैक्वः**, **एतत्** तद्वेद्यं ब्रह्म इत्येतदुभयं मयोक्तम्, तव मयोपदिष्टमित्यर्थः' इत्युक्तम्—तदप्येतत्परं द्रष्टव्यम्; न तु प्रतीयमानार्थपरम्। **यस्तद् वेद यत् स वेदेति** वाक्यात् प्राचीने, 'यथा कृतायविजितायाधरेऽयाः संयन्ति, एवमेनं सर्वं तदभिसमेति यत् किञ्च प्रजाः साधु कुर्वन्ती'ति वाक्ये ब्रह्मप्रसक्तेरेवाभावेन वेदिता वेद्यञ्च तवोपदिष्टमित्यस्यार्थस्यासंभवेन **यस्तद् वेद यत् स वेदेति** वाक्येन प्रतिपादनासंभवात्; भाष्यविरोधाच्चेति द्रष्टव्यम्।

[केचित्तु—भगवता भाष्यकृता लघुसिद्धान्तभाष्ये, 'यस्तद् वेद यत् स वेद स मयैतदुक्तमित्यत्र' इति एतद्वाक्यप्रतीकस्य धृतत्वात् तदनुरोधेन व्यासार्यैः स मयैतदुक्तमिति नपुंसकान्तपाठस्य गृहीततया तत्र नपुंसकस्य उक्तशब्दस्य स इति पुल्लिङ्गतच्छब्दविशेषणत्वायोगात्, यस्तद् वेद यत्स वेदेति पुंनपुंसकान्तयच्छब्दद्वयनिर्दिष्टयोः वेत्तृ (वेदितृ?) वेद्ययोः 'स मयैतदुक्त'मित्यत्र क्रमेण प्रतिनिर्देशकयोः स एतदिति पुंनपुंसकसर्वनामशब्दयोः श्रवणेन, **सः** वेदिता **एतद्** वेद्यं परं ब्रह्मेत्येतदुभयं मयोक्तमित्यर्थस्यैव वाक्यस्वारस्यलभ्यत्वाच्च स एवार्थो युक्त इति व्यासार्याभिप्रायः। न चात्रोदाहृतभाष्यविरोधः; 'प्रकाशश्च कर्मण्यभ्यासात्' इति सूत्रे,

'वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्।
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः॥'

इति मनुस्मृतौ च मनोव्यापारात्मके वेदने कर्मशब्दप्रयोगदर्शनेन 'यत् किञ्च प्रजाः साधु कुर्वन्ति'इत्यनेनैव सर्वप्रजानुष्ठितसाधुकर्मण इव सर्वचेतनगतज्ञानस्यापि ग्रहणं संभवतीत्यभिप्रायेणैव तत्र भाष्ये, 'यत् किञ्चित् साध्वनुष्ठितं कर्म यच्च सर्वचेतनगतं विज्ञानम्' इति कर्मापेक्षया ज्ञानस्य पृथङ्निर्देशात्। अत एव

लघुसिद्धान्ते—इत्यत्रेति। लघुसिद्धान्तगतावृत्तिसूत्र व्याख्यानावसरे इत्यर्थः। आवृत्त्यधिकरणेपीदमुक्तमेव। **भाष्यविरोधादिति**। रैक्वमात्रोपदेशस्यैव भाष्ये उक्तेरिति भावः। **केचित्तु** इत्यादिः **आहुरित्यन्तः** पाठः क्वाचित्कः। आहुरित्यस्वरसः सूच्यते, लघुसिद्धान्तभाष्ये **उक्तमिति** नपुंसकोपनिषत्प्रतीकधारणादर्शनात्। आवृत्त्यधिकरणटीकायां, 'पुल्लिङ्गनिर्देशो रैक्वाभिप्रायेणेत्युक्तत्वाच्च। भावप्रकाशिकायामपि पूर्वोक्तनिर्वाह एवास्ति; टीकापर्यवसानञ्च।

तदुह जानश्रुतिः पौत्रायण उपशुश्राव । स ह सञ्जिहान एव क्षत्तार-मुवाच, 'अङ्गारे ! ह, 'सयुग्वानमिव रैक्कमात्थे'ति; 'यो नु कथँ सयुग्वा रैक्क' इति (५); 'यथा कृतायविजितायाधरेऽयाः संयन्ति एवमेनँ सर्वे तदभिसमेति यत् किञ्च प्रजाः साधु कुर्वन्ति यस्तद् वेद, यत् स वेद स मयै तदुक्त' इति" ॥ ६ ॥

स ह क्षत्ताऽन्विष्य, 'नाविद' मिति प्रत्येयाय । तँ होवाच, 'यत्रारे

पूर्ववाक्ये ब्रह्मप्रसक्तिरेव नास्तीत्यपि प्रत्युक्तम् । सर्वप्रजानुष्ठितसाधुकर्मणः सर्व-चेतनगतज्ञानस्य च रैक्कज्ञानकर्मणोः स्वरूपेणान्तर्भावस्य दुरुपपादतया कृतायाधरा-यदृष्टान्तस्वारस्येन च रैक्कवेदनविषये तत्कर्मोद्देश्यभूते च सविभूतिकब्रह्मणि सर्व-प्रजानुष्ठितकर्मोद्देश्यसर्वचेतनगतज्ञानविषययोरन्तर्भावस्यैव वक्तव्यत्वेन पूर्ववाक्ये ब्रह्म-प्रसक्तेरावश्यकत्वात् । तत्त्वटीकाग्रन्थस्तु, 'स मयैतदुक्त'इति पुल्लिङ्गान्तपाठे च सति तन्निर्वाहमात्राभिप्रायः । अतो व्यासार्यप्रतिपादितार्थ एव भगवद्भाष्यकृदभिमत इति न काप्यनुपपत्तिरित्याहुः ।]

तदु—शुश्राव । **तत्** ब्रह्मज्ञानविधुरतया आत्मनिन्दागर्भं तद्वत्तया च रैक्कप्रशंसारूपं वाक्यं स राजा **शुश्राव** । **स ह—उवाच** । स कथमपि निशाम-यित्वा **संजिहान एव** तल्पं त्यजन्नेव **क्षत्तारमुवाच** वक्ष्यमाणमुक्तवान् । क्षत्ता नाम,

"वैश्याद् ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते ।
जीविकावृत्तिरेतस्य राजान्तःपुररक्षणम् ॥"

इत्युक्तरीत्या राजान्तःपुररक्षकः प्रतिलोमजातिविशेषः[1] । **अङ्ग अरे ह सयुग्वान-मिव—तदुक्त इति** । ह (?) अरे अङ्ग वत्सेति तं क्षत्तारं राजा संबोध्य, 'रात्रावेवं हंसयोः सल्लापः समजनी'ति, **सयुग्वानमिव रैक्कमात्थेत्यादिहंसोक्तिप्रत्युक्तिवाक्यानु-वादपूर्वकं** रैक्कस्य **चिह्नमुक्तवानित्यर्थः** ।

स ह क्षत्ता प्रत्येयाय । स च क्षत्ता शकटलक्षणरैक्कचिह्नमनुस्मरन् ग्रामनग-

1. अत्र 'क्षत्ता' इति ख. न तु पूर्वं क्षत्ता नामेति ।

अङ्गेत्यादि । अत्र सयुग्वानमित्यादि सर्वं हंसोक्तिप्रत्युक्त्यनुवादरूपम् । न तु, 'हे क्षत्तः किमिति मां रैक्कमिव स्तौषी'ति जानश्रुतिराहेत्येवंरूपशाङ्करव्याख्यानं रुचिरम् । तथाच, 'इति हंसव्याहारः श्रुतः । तत् तमन्विष्याऽऽगच्छे'ति पूरणीयम् ।

ब्राह्मणस्यान्वेषणा, तदेन[1]मर्च्छे'ति ॥ ७ ॥

सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश। तँ हाभ्युवाद, 'त्वं नु भगवः! सयुग्वा रैक्क' इति। 'अहँ ह्वरा ३' इति [2]ह प्रतिजज्ञे। स ह क्षत्ता[3], 'अविद' मिति प्रत्येयाय ॥ ८ ॥

इति चतुर्थाध्याये प्रथमः खण्डः।

४—२.

तदुह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथं तदाऽऽदाय प्रतिचक्रमे। तँ हाभ्युवाद (१), 'रैक्केमानि षट् शतानि गवाम्,

1. तदेनमृच्छेति मा. 2. इति प्रतिजज्ञे मा. 3. क्षत्ताऽन्विष्य अविदं मा.

रादिकमन्विष्य नाविदं नाज्ञासिषमिति प्रत्यागतवात्। तं—तदेनमर्च्छेति। अरे[1] ब्राह्मणस्य ब्रह्मविदः यत्र विजनेषु[2] नदीपुलिनारण्यादिषु मार्गणं युक्तम्, तत् तत्र गत्वा एनमर्च्छ रैक्कं प्राप्नुहि=मार्गणं कुर्विति तं राजोवाचेत्यर्थः।

सोऽधस्तात्—विवेश। अथ पुनः सः क्षत्ता गत्वा विजने कस्मिंश्चिद्देशे शकटस्याधस्तात् पामानं कषमाणं कण्डूयमानं रैक्कमेत्य दृष्ट्वा उपोपविवेश समीपे गत्वा विनयेनोपविष्टवान्। तं ह—प्रत्येयाय। 'हे भगवन्! त्वं वा रैक्कः' इति क्षत्ता पृष्टः ऋषिः, 'अरे! क्षत्तः! रैक्कोऽहमेवे'ति प्रत्युवाच। तत् श्रुत्वा स क्षत्ता अविदम् अज्ञासिषमिति प्रत्यागत इत्यर्थः। ४—१.

तदुह जानश्रुतिः—प्रतिचक्रमे। [उहेत्यनर्थको निपातः। तत्] तत्र जानश्रुतिः गवां षट् शतानि, निष्कं कण्ठाभरणम्, अश्वतरीयुक्तरथं तदा गृहीत्वा रैक्कं प्रतिचक्रमे गतवान्। तं हाभ्युवाद। गत्वा च राजा तं रैक्कम् इत्युवाचेत्यर्थः। रैक्केमानि—रथः। हे रैक्क! एतत् सर्वमानीतम्। तद् गृहाण त्वमित्यर्थः।

1. अरे क्षत्तः ख. 2. विविक्तेषु क.

रैक्केमानीति। ननु तूष्णीं गवादिकमुपहृत्य विद्योपदेशमात्रप्रार्थनं युक्तम्। न तु गुरोस्तन्नाम्ना समाह्वानं स्वदीयमानार्थगणनञ्चेति चेत्—अयमेव रैक्क इति पुनः स्वयं निर्णेतुं नामनिर्देशः। पुनरागमनकाले नामनिर्देशोऽपि पुना रैक्कत्वनिश्चयार्थमेव स्यात्। तावत् रैक्केण तपोबलेन कन्यास्वीकारानुगुणं स्वरूपमन्यथाकृतं स्यादिति। अस्तु वा शूद्रेतिसंबोधनानुगुणं तस्यो-

अयं निष्कोऽयमश्वतरीरथः । अनु म एतां भगवो! देवतां शाधि, यां देवतामुपास्से'इति ॥ २ ॥

तमुह परः प्रत्युवाच-अह हारेत्वा शूद्र! तवैव सह गोभिरस्त्विति ।

अनु—उपास्स इति । एतद् गृहीत्वा, यां देवतां त्वमुपास्से, तां देवतां मे **अनुशाधि** विविच्य ज्ञापयेति प्रार्थयामास ।

तमुह परः प्रत्युवाच । परः रैक्कः तं राजानं प्रत्युवाच । तदेवाह—**अह—अस्तु** । **अहेति** निपात आश्चर्ये । योगमहिमविदितलोकत्रयः ऋषिर्जानश्रुतेः ब्रह्मज्ञानविधुरतानिमित्तानादरगर्भहंसवाक्यश्रवणेन शोकाविष्टतां तदनन्तरमेव ब्रह्मजिज्ञासयोद्योगञ्च विदित्वा अस्य ब्रह्मविद्यायोग्यतामभिज्ञाय, 'सत्यामपि योग्यतायां चिरकालसेवां विना अर्थप्रदानेन शुश्रूषमाणस्यास्य यावच्छक्तिप्रदानेन[1] विना ब्रह्मविद्या प्रतिष्ठिता न भवती'ति मत्वा तमनुगृह्णन्, अस्य शोकाविष्टतामुपदेशयोग्यताख्यापिकाम्[2], ब्रह्मजिज्ञासादार्ढ्यसिध्यर्थं स्वयोगमहिम[3]साक्षात्कृतसकलवृत्तान्तत्वलक्षणस्वमहिमानञ्च शोचितृत्वप्रवृत्तिनिमित्तक**शूद्र**शब्दामन्त्रणेन ख्यापयन्, **हारेत्वा** हारसहितः इत्वा=रथः अश्वतरीरथः तवैव गोभिः सहास्तु । कलत्रहीनस्य ग्रामगृहादि-

1. **क.** कोशे, यावच्छक्तिप्रदानेन ब्रह्मविद्या प्रतिष्ठिता भवतीत्येव यथाश्रीभाष्यं पाठः । तत्र **प्रदानेने**त्यस्य प्रदानेनैवेति सावधारणनिर्देशाभिप्रायकत्वात् तदर्थवैशद्यमुपरितनवाक्ये । 2. ख्यायिकाम् **ख**. 3. महिम्ना **क.**

पसर्पणपद्धतिज्ञानवैकल्यम् । दीयमानद्रव्यदर्शनञ्च, 'नाहं चिरकालसेवने शक्तः । अतो द्रव्यग्रहणेनानुग्राह्य इति निवेदनाभिप्रायेण । परिजनरहितेन रैक्केण स्वाभीष्टहरणजिज्ञासया किमाहृतमिति पृष्ट्वादेवं सर्वं न्यवेदयदिति वा भाव्यम् ।

योगमहिमेत्यादिकं **परः** इति पदेन सूच्यते । '**हारेत्वे**ति । ननु हारः प्राङ् नोक्तो जानश्रुतिना । उच्यते । अनुक्तत्वेऽपि इत एव तस्यापि नीतत्वं कल्प्यम् । अत एव भामत्यां हारश्चेत्युक्तम् । निष्कस्यैव वा हारत्वेनानुवादः कण्ठाभरणत्वात् भा. प्र.) । अस्तु वा इत्येतेनेन समस्तत्वात् हारपदं शकटहारि(नेतृ)युग्यपरम् । अश्वतरीरथ इत्युक्तेः । 'न मे किञ्चिदपेक्षितम्' 'नाहमुपदेक्ष्यामि' इतीवानुक्त्वा, तदुक्तद्रव्याणि स्वयं सकृदनुवाच्य, "तवैवास्तु" इत्युक्त्वा, 'एतद्रक्षणौपयिकपरिजनपरिच्छदविरहादिदं माऽस्तु' इति रैक्काशयो ज्ञाप्यत इति विवृणोति **कलत्रे**त्यादिना ।

तदुह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदाऽऽदाय प्रतिचक्रमे ॥ ३ ॥ तँ हाभ्युवाद — रैक्केदँ सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायाऽयं ग्रामो यस्मिन्नास्से । अन्वेव मा भगवः शाधीति ॥ ४ ॥

तस्याह मुखमुपोद्गृह्णन्नुवाच — आजहारेमाः शूद्रानेनैव

शून्यस्य मम गोरथादिरक्षणे का शक्तिः । मत्प्रयोजनापर्यवसाय्यल्पधनदानेन च कथं तव ब्रह्मविद्या प्रतिष्ठिता भवेदित्युवाचेत्यर्थः । 'स्फायितञ्ची 'त्यादिना रक्प्रकरण[1]-पठितेन, 'शुचेर्दश्च ' इति सूत्रेण रक्प्रत्यये, शुचेश्चकारस्य दकारे, 'अमितम्यो-र्दीर्घश्च ' इति पूर्वसूत्रानुवृत्तेः[2] धातोरुकारस्य दीर्घादेशे च शूद्रशब्दो निष्पन्नो भवति ।

तदुह पुनरेव—प्रतिचक्रमे । तदभिप्रायं जानन् अधिकं गवां सह-स्रम्, रैक्कस्य परिणयार्थं स्वकन्याम्, आवासार्थं तत्रत्यं ग्रामञ्चोपा(प?)जहारेत्यर्थः[3] । **तं ह—शाधीति** । स्वोपहृतं सर्वं समर्प्य, 'मा मां अनुशाध्येव । न प्रत्याख्याहि' इति प्रार्थयामासेत्यर्थः । 'यस्मिन् ग्रामे **त्वमास्से** निवसिष्यसि, सोऽयं तव वासार्थो ग्रामः' इत्यन्वयः ।

तस्याह—उवाच । **मुखम्** उपायनरूपोपायं **तस्य** जानश्रुतिसंबन्धिनम् **उपोद्गृह्णन्** अङ्गीकुर्वन् उक्तवानित्यर्थः । उक्तिमेवाह— **आजहार** — **आलप-यिष्यथा इति** । **इमाः** दक्षिणाः आजहर्थ । **आजहारे**ति व्यत्ययः छान्दसः ।

1. प्रकरणे **ख.** 2. पूर्वसूत्रेण **ख.** 3. उपजहारेत्यादि—अन्वय इत्यन्तवाक्यजातस्थाने, 'उपाहृत्य प्रार्थयामासेत्यर्थः' इत्येतावत् **क.** कोशे ।

निष्पन्नो भवतीति । तथाच 'शुगस्ये'ति सूत्रोक्तादधिकं यत् शाङ्करोक्तम्, 'शूद्रवद्वा धनेन विद्याग्रहणायाजगामे'ति, 'ऋषैनं शूद्रेत्युक्तवान्' इति च—तदमूलम्, द्वितीयावृत्तौ शूद्रेत्यामन्त्रणाननुगतश्चेति ध्येयम् ।

तस्याहेति । अत्र **तस्याः** राजदुहितुरिति शाङ्करम् । तत्रापि मुखशब्दो न वदनपरः । '**मुखं** द्वारं विद्यादानतीर्थं (द्वारतां) इति तदुक्तेः । भाष्ये तु **अहे**त्यव्ययं कृत्वा तस्य मुखमिति समुचितार्थः स्वीकृतः । मुखमित्यस्य वदनपरत्वेऽपि, 'दुहितुः स्वपरिणयौत्सुक्यं मुखे विजानन्' इति वा, 'जानश्रुतेः प्रणतस्योत्कटभक्तिश्रद्धापूर्णं मुखमुद्गृह्णन्' इति वाऽर्थो नासं-भवी । द्वितीयं तु **मुखेने**ति पदमुपायार्थकमेव । अथवा येन मुखेन त्वं प्राङ् निवर्तितः, तेनैव मन्मुखेनेत्यर्थोऽपि स्यात् । '**आजहारेमा** इति स्वगतम्; **शूद्रे**त्यादि

मुखेनालापयिष्यथा इति ।

तै हैते रैक्कपर्णा नाम महावृषेषु यत्रास्मा उवास; तस्मै होवाच ॥ ५ ॥

इति चतुर्थाध्याये द्वितीयः खण्डः ।

अनेनैव **मुखेन** उपायेन मां ब्रह्मोपदेशरूपं वाक्यं आलापयिष्यसे । ब्रह्मविद्योपदेष्टारं करिष्यसीत्यर्थः । 'थासस्से' इत्येतदभावः[1] छान्दसः । पुनरपि **शूद्रेति** संबोधनस्य पूर्ववदेव प्रयोजनम् । अत्र शूद्रशब्दस्य न रूढ्या वर्णविशेषोऽर्थः, चतुर्थवर्णस्य ब्रह्मविद्यायामनधिकारादिति द्रष्टव्यम् ।

ते—उवास । यत्र ग्रामेषु रैक्क उवास, ते महावृषाख्यदेशेषु रैक्कपर्णा इति प्रसिद्धाः । तान् ग्रामांश्चास्मै ददावित्यर्थः । स(?) **तस्मै होवाच** । तत् सर्वं दत्तवते जानश्रुतये रैक्कः स्वोपास्यां देवतामुपदिदेशेत्यर्थः । ४—२.

1. इत्यदभावः क.

बाह्यवचनम्' इति स्वीकारे आजहारेति प्रथमपुरुषस्योपपन्नत्वेऽपि अपरोक्षे लिट्प्रयोगस्येव प्रथमपुरुषस्यापि छान्दसत्वं युक्तमित्याशयः । '**आजहार** अहं प्रतिगृहीतवानस्मि' इति व्याख्यासंभवेऽपि दाने एतद्धातोः श्रौतप्रसिद्ध्यतिशयात् आजहर्थेत्युक्तमिति **टीका**। **आलापयिष्यथा** इति लृङ्प्रयोगात्, 'यदि पूर्वमेवाऽऽहृतवान् स्याः, तर्हि तदैवानेन मुखेनाऽऽलापितवान् स्याः' इत्यर्थोऽप्यभिसंहितो ज्ञायते; 'छन्दसि लुङ्लङ्लिट' इति यथेच्छं लिट्प्रयोगसंभवात् । पूर्वं 'तवैवास्तु' इत्युक्तत्वात्, इदानीं 'समिधं सोम्याहर' इतिवत् **आहर**=आनयेमा इति अनुमतिर्दर्श्यत इत्यपि स्यात् । **निष्करथादिष्वस्त्रीषु** वर्तमानेषु **इमा** इति स्त्रात्वेन निर्देशो जायाप्राधान्यात् । **बहुत्वञ्च** जायायां गोषु अश्वतर्यां च स्त्रीष्वेव निबोधम् । उपलक्षणमिदं निष्कादेरपि ।

ते ह्यैते इति । **नन्वेको ग्रामस्तदत्तः** । तत् **कथमत्र बहुत्वम्** । **उच्यते** । दानकाले ग्राम एक एव । पश्चाद् बहुधा विभक्त इति । महावृषपदवत् अवान्तरदेशनामत्वाद्वा रैक्कपर्णपदं बहुत्वमिति तदनुरोधादेवम् । यद्वा **यस्मिन् ग्रामे त्वमास्स** इत्यत्र उद्देश्यविशेषणमेकत्वमविवक्षितम् । यत्र यत्र वासः क्रियते स स भवत इत्यर्थः । अत एव आस्से इत्यस्य निवसिष्यसीति-भाष्ये विवरणम् । **महावृषेति** काश्मीरपर्याय इत्याहुः । **यत्रास्मा उवासेति** । असौ इत्यश्रवणात् **अस्मै** इति श्रवणात् यत्र देशे जानश्रुत्यर्थमेवायं चिरमुवासेत्यर्थः संभवति—अथापि **तस्मै** इति पदेन प्राप्तस्यात्र **अस्मै** इति पदेन ग्रहणेऽनौचित्यादिवान्यथैव सर्वं व्याख्यातम् । यत्र रैक्कोऽस्मै=गार्हस्थ्यापेक्षया जानश्रुतितः प्रतिग्रहविशेषार्थं उपदेशार्थं वा उवासेत्यपि सुवचम् । यत्रास्मै उवास, उवाच च तस्मै, ते रैक्कपर्णा इति योजना संभवतीति ।

४—३.

वायुर्वाव संवर्गः । यदा वा अग्निरुद्वायति, वायुमेवाप्येति । यदा सूर्योऽस्तमेति, वायुमेवाप्येति । यदा चन्द्रोऽस्तमेति, वायुमेवाप्येति ॥ १ ॥ यदाऽऽप उच्छुष्यन्ति, वायुमेवापियन्ति । वायुर्ह्येवैतान् सर्वान् संवृङ्क्त इत्यधिदैवतम् ॥ २ ॥

अथाध्यात्मम्—प्राणो वाव संवर्गः । स यदा स्वपिति, प्राणमेव वागप्येति; प्राणं चक्षुः; प्राणँ श्रोत्रम्; प्राणं मनः; प्राणो ह्येवैतान् सर्वान् संवृङ्क्त इति ॥ ३ ॥

उपदेशमाह **वायुर्वाव संवर्गः** । संवर्जनाख्य[1]गुणयोगात् वायुरेव[2] संवर्गः । संवर्जनं संग्रहणम् । एकीकृत्य ग्रहणमित्यर्थः । संवर्गत्वगुणको वायुर्ध्येय इति यावत् । संवर्गत्वमेवोपपादयति—**यदा—संवृङ्क्ते** । **उद्वायति** उद्वासनं (उद्वानं?) प्राप्नोति; विनश्यतीत्यर्थः । शिष्टं स्पष्टम् । अग्निसूर्यचन्द्राणां तेजोरूपाणां जलस्य च लये वायावेकीभावात् वायुः संवर्ग इत्यर्थः । प्रक्रमे हि, 'एनं सर्वं तदभिसमेती'-त्यादिब्रह्मविद्याप्रशंसावगमात् वक्ष्यमाणलिङ्गानुपपत्तेश्च वायुशब्देन वायुशरीरकपरमात्मा उच्यते । **संवृङ्क्ते** एकीकृत्य गृह्णातीत्यर्थः । **इत्यधिदैवतम्** । एवं देवेषु संवर्गोऽयमित्यर्थः ।

तथा प्राणः संवर्ग इत्याह **अथाध्यात्मम्, प्राणो वाव संवर्गः** । तदुपपादयति—**स यदा स्वपिति** । **सः** पुरुषः **यदा** यस्मिन् काले स्वपितीत्यर्थः[3] । तस्मिन् काले **प्राणमेव—संवृङ्क्ते** । प्राणे वाक्चक्षुश्श्रोत्रमनसामेकीभावात् प्राणं संवर्गमुपासीतेत्यर्थः । अत्रापि प्राणशब्दस्तच्छरीरकपरमात्मपरो द्रष्टव्यः ।

1. संवर्जननामगुण **ख.** 2. एवकारो न **क.** 3. स्वपिति, तदा **ख.**

जानश्रुतये रैक्वोपदिष्टमर्थं श्रुतिरुपदिशति **वायुरिति** । शोषणदाहनप्लावनोपयुक्ततया वस्तुविलयकरत्वेन प्रसिद्धानि वायुतेजोजलानि । तत्र वायुः संवर्गः; तेजोजलयोरपि मूलहेतुतया लयस्थानत्वात् । एवंभूतवाय्वभिन्नः प्राणोऽध्यात्मं यानि प्रति संवर्गः, तानि वक्ष्यन्ते **स यदा स्वपिती**ति । **वक्ष्यमाणलिङ्गे**ति । **इति वै वयमुपास्महे** इति वक्ष्यमाणोपास्याकारदर्शनेत्यर्थः ।

तौ वा एतौ द्वौ संवर्गौ, वायुरेव देवेषु, प्राणः प्राणेषु ॥ ४ ॥

अथ ह शौनकश्च कापेयमभिप्रतारिणश्च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे । तस्मा उह न ददतुः ॥ ५ ॥

उक्तमर्थमुपसंहरति—**तौ वा एतौ**—**प्राणेषु** । स्पष्टोऽर्थः ।

संवर्गविद्यास्तुत्यर्थमाख्यायिकेयमारभ्यते—**अथ ह**—**बिभिक्षे** । कपिगोत्रं शुनकपुत्रं[1] च, कक्षसेनसुतमभिप्रतारिनामानञ्च तौ द्वौ सूपकारैः परिविष्यमाणौ भोजनायोपविष्टौ कश्चित संवर्गोपासको ब्रह्मचारी भिक्षितवान् । **तस्मा उह न ददतुः** । अयं ब्रह्मचारी संवर्गविद्यानिष्ठो दुरभिमानी यद् वक्ष्यति, तत् श्रोष्याव इति बुध्या तस्मै तौ भिक्षां न दत्तवन्तौ ।

1. सुतं **क.** अत्र चकारद्वयमपि नास्ति ।

अथ ह शौनकमिति । आख्यायिकेयं जैमिनीयोपनिषद्ब्राह्मणेऽप्यस्ति । तत्र तृतीयेऽध्याये वायोः स्तुतिमारभ्य, तत्र आदित्यचन्द्रमोनक्षत्राग्न्यहोरात्रादिकार्जन्याबोषधिवनस्पतीनामप्ययं प्रतिपाद्य, अध्यात्मं प्राणात्मनि वायावत्रैव वागादित्यमुक्त्वा, "तद्ध शौनकश्च कापेयमभिप्रतारिणश्च" इत्यारभ्य, "तौ ह बिभिक्षे । तं ह नादद्राते को वा को वेति मन्यमानौ । तौ होपजगौ,

'महात्मनश्चतुरो देव एकः क स जगार भुवनस्य गोपाः ।
तं कापेय न विजानन्त्येकेऽभिप्रतारिन् बहुधा निविष्टम् ' इति ।

स होवाचाभिप्रतारी, 'इमं वाव प्रपद्य प्रतिब्रूहीति ; त्वया वाऽयं प्रत्युच्य' इति । तँ ह शौनकः प्रत्युवाच—

'आत्मा देवानामुत मर्त्यानां हिरण्यदन्तो रपसो न सूनुः ।
महान्तमस्य महिमानमाहुरनद्यमानो यददन्तमत्ति ' इति ।"

इति श्रुतम् । विवृतञ्च मन्त्रद्वयं तत्रैव किञ्चित् । तत्र महात्मशब्देन वाङ् मनश्चक्षुः श्रोत्रमित्येषां देवताः अग्निचन्द्रादित्यदिशो गृहीताः । कः प्रजापतिः । स एव जगारेति गिरणकर्ता प्राण उक्तः । 'रपसो न सूनुः' इत्यस्य विवरणञ्च, 'न ह्येष सूनुः । सूनुरूपो(सूनुरपो) ह्येष सन् न सूनुः' इति कृतम् ।

नन्वस्मिन् संदर्भे परिशील्यमाने भोजने प्रवृत्तयोः कापेयाभिप्रतारिणोः, कश्चिद् बिभिक्षे । तदा तयाभोजने प्रवृत्तत्वाद्वा, स यः कश्चिदिति मत्वा, 'रक्षणीयमभक्तेभ्यस्तदन्नं विष्णुयाजकैः । प्रायश्चित्ती भवेत् दाता अपात्रे प्रतिपादनात्' इत्यादिरीत्या विमर्शेन वा केनापि कारणेन भिक्षा-

स होवाच—

'महात्मनश्चतुरो देव एकः कः स[1]जगार भुवनस्य गोपाः।
तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन् बहुधा वसन्तम् ॥

1. कः सो मा ?

स होवाच। स ब्रह्मचारी उवाच—**महात्मनः**—**वसन्तम्**। अधिदैवतं महात्मनः अग्न्यादित्यचन्द्रजलरूपान् अध्यात्मं वाक्चक्षुःश्रोत्रमनोरूपान् **चतुरः** चतुस्संख्याकान् देवान् सर्वलोकस्य **गोपाः** गोप्ता स एक एव देवो वायुप्राणरूपी **कः** प्रजापतिः **जगार** संहृतवान्। हे कापेयाभिप्रतारिणौ! एवंभूतं प्रजापतिं **बहुधा** बहुरूपतया वसन्तं **मर्त्याः** मरणधर्माणोऽविद्यामोहितास्सन्तो न जानन्ती-

---

विषयेऽनादरे प्राप्ते ब्राह्मणः ब्रह्मणे भिक्षामपेक्षितां तयोः संबोधनपूर्वकं प्रकटीचकार। अथाभिप्रतारिणा उचितसमाधानाय प्रेरितः कापेयः, **'तं कापेय न विजानन्त्येके** इत्युक्तरीत्या न वयं न जानीम'इति स्वस्य तद्देवतास्वरूपतदीयदेवमर्त्यसर्वात्मत्वाद्यभिज्ञत्वं भिक्षमाणाय प्रकाशयामासेति प्रतीयते। एवं स्वरसप्रतीतानुसारेण शौनको ब्रह्मचारिणं स्वोपास्यदेवतोपासकत्वेन प्रशस्यैव भिक्षादानमनुमन्यते स्म; न तु तस्यानभिज्ञत्वाविष्करणेनेति सुवचम्, तथाच शाङ्करे, 'ब्रह्मचारिणो ब्रह्मविन्मानितां बुध्वा तं जिज्ञासमानौ' इति, अत्र च भाष्ये तदनुसारेण, 'अयं 'ब्रह्मचारी संवर्गविद्यानिष्ठो' दुरभिमानी यद् वक्ष्यति, तत् श्रोष्यावः' इति चोक्तं न घटते। यत्तु 'ब्रह्मचारिन्निदमुपास्महे' इति, तस्य शाङ्करे, 'न इद 'मिति पदविभागमादृत्य, 'न वयमिदमुपास्महे; किं तर्हि परं ब्रह्म' इति काचिद् व्याख्या दर्शिता। पूर्वं ब्रह्मविन्मानितां शाङ्करोक्तामनुरुध्य सैवात्रापि स्वीकृता। यदि दुरभिमानित्वे विशेषगमकं नास्ति, तर्हि शाङ्करोक्त एव, ब्रह्मचारिन् आ इदमुपास्महे'इति पदविभागमादृत्य, 'यथोक्तलक्षणं ब्रह्म वयमा उपास्महे'इत्यर्थ इहापि ग्राह्योऽस्तु। माध्वास्तु **ब्रह्मचारिन्निदम्** इत्येव पठन्ति। मन्त्रयोश्च समानविषयकत्वमेव शाङ्करोक्तम्। परमात्मपरत्वञ्चोभयोः प्रतीयते। प्रथममन्त्रेऽपि हि, **देव एकः, भुवनस्य गोपाः, बहुधा वसन्तम्**इति 'दिव्यो देव एको नारायणः' इत्याद्युक्तो जगद्रक्षको व्यूहविभवहार्दादिरूपेणावतीर्णो व्यापी विष्णुरुक्त एव। **क** इति च, 'स वः कः किम्,' 'कस्मै देवाय हविषा विधेम' 'संवत्सरः कः' इति तद्वाचि। तत् कथं ब्रह्मचारिणो दुरभिमानित्वकल्पनमिति चेत्—

उच्यते। प्रथममन्त्रे 'महात्मनश्चतुर' इति चतुर्णामिवाद्यमानत्वमुक्तम्; द्वितीयमन्त्रे 'पश्चान्ये' इति वक्ष्यमाणरीत्या, 'अनद्यमानो यददन्तमत्ति' इति अदतः प्राणस्याप्यदनमनद्यमानत्वञ्चोक्तमिति वैषम्यात् उत्तरत्रैव परमात्मप्रतीतिर्यथावदित्याशयः। अस्तु तावदयं ब्रह्मचारी अभिज्ञोऽनभिज्ञो वा। अभिज्ञत्वे मन्त्रद्वयादपि संवर्गविद्यावेद्यः परमात्मेति सिद्धयेत्। अनभिज्ञत्वे उत्तरमन्त्रादिति सर्वथा विवक्षितसिद्धिः।

यस्मै वा एतदन्नम्, तस्मा एतन्न दत्तम्' इति ॥ ६ ॥

तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येयाय —

'आत्मा देवानां जनिता प्रजानाँ हिरण्यदँष्ट्रो बभसोऽनसूरिः।
महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्ति ॥
इति वै वयं ब्रह्मचारि[1]न्नेदमुपास्महे।'

1. ब्रह्मचारिन्निदमुपासाहे मा.

त्यर्थः। **गोपाः**। गुपू रक्षणे। असुप्रत्ययान्तं पदम्[1]। **यस्मै–न दत्तम्**। जगत् सर्वं **यस्मै** यस्य संवर्गस्य प्रजापतेरन्नम्, **तस्मै** भिक्षमाणाय मह्यमन्नं न दत्तम्; अतः केऽपि न जानन्ति इति उपासनदार्ढ्यायत्तोपास्यैक्यबुध्या भिक्षमाणाय स्वस्मै अप्रदानमेव स्वोपास्यदेवतायै अप्रदानं मत्वा, 'तस्मा एतन्न दत्त'मिति तौ निन्दितवानित्यर्थः।

तदु ह—प्रत्येयाय! कापेयः शौनकः **तत्** ब्रह्मचारिणोक्तं **प्रतिमन्वानः** मनसा आलोचयन् तत्समीपं **प्रत्येयाय**। प्रत्यागत्योवाच — **आत्मा—अत्ति**। देवानां**आत्मा** नियन्ता, प्रजानामुत्पादकः, **हिरण्यदंष्ट्रः** कमनीयदंष्ट्रायुक्तः, हिरण्यविदारकदंष्ट्रायुक्त इति वा, **बभसः** भक्षणशीलः असुरसंहारक इति यावत्। असूरिर्न भवतीत्यनसूरिः। विपश्चिदिति यावत्। अस्य च श्रीनृसिंहस्य परमात्मनो महिमानं महान्तमाहुः, यत्—स्वयमन्यै**रनद्यमानः** अनाद्यमानः **अनन्नं** वागादिकम् **अत्ति** नाशयति। एवम्भूतः परमात्मैव संवर्गः, न त्वदुक्तः प्रजापतिरित्यर्थः। अतो हे ब्रह्मचारिन्! वयं न त्वदुक्तप्रजापतिरूपं संवर्गमुपास्महे; अपितु **इति वै** इत्येव = परमात्मानमेव। अतः त्वं संवर्गं न यथावत् जानासि—

1. असुप्रत्ययान्तः ख

तस्मै तद्रूपाय। **उपास्यैक्यबुद्ध्येति**। ननु किमर्थमैक्यबुद्धिः; ब्रह्मचारिणा भिक्षां गृहीत्वा स्वदेवतायै निवेदनस्य कार्यतया तदर्थतयैव तेन भिक्षणात्, 'तस्मै न दत्तम्' इत्युक्तिसंभवात्। न। परस्वत्वापादनरूपदानसंप्रदानत्वं हि भिक्षुकस्य, नोपास्यस्य प्राणादेः। अतस्तदुपासकायेति वक्तव्ये **तस्मै** इत्युक्तिरेवंबुद्ध्येति। यदि कदाचिद् दाताऽप्येतद्देवतोपासकः स्यात्, तर्हि तदन्नं तस्मै देवाय निवेदितमेव स्यात्। अथापि बहुधास्थितत्वाद्देवस्य स्वसंबन्धिरूपेण स्थिताय तस्मै न दत्तमिति दोषोऽस्त्येवेति ब्रह्मचारी ज्ञापयतीति भावः। **अनसूरि**रिति। न सूनुरिति पूर्वदर्शितजैमिनीयपाठे अनुत्पाद्यत्वं परमात्मन उक्तं भवेत्। अत्र तु

'दत्तास्मै भिक्षा'मिति ॥ ७ ॥ तस्मा उह ददुः ।

ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तः तत् कृतम् । तस्मात् सर्वासु

इत्युक्त्वा, 'अस्मै भिक्षां **दत्त** प्रयच्छते' ति परिचारकान् आहतुरित्यर्थः । अनेन संवर्गविद्यायाः वायुप्राणशरीरकपरमात्मपरत्वमाविष्कृतं भवति ।

तस्मा उह ददुः । तस्मै ब्रह्मचारिणे परिचारकाः भिक्षां ददुरित्यर्थः ।

संवर्गविद्यास्तुतये तत्संबन्धिपदार्थान् कृतायत्वेन विराट्त्वेन अन्नत्वेन अन्नादित्वेन च स्तौति—**ते वा एते—तत् कृतम्** । अधिदैवतमग्न्यादित्यचन्द्रजलरूपाः पदार्थाः अपियन्तश्चत्वारः अपीयमानो वायुरेक इति **पञ्च**, अध्यात्मं वागाद्या अपियन्तश्चत्वारः अपीयमानः प्राण एक इति पञ्च आहत्य दशत्वसंख्यां प्राप्तास्सन्तः कृतायतां भजन्ते । [1]कृतसंज्ञे तस्मिन् अये चतुरङ्कायत्र्यङ्कायद्व्यङ्कायैकाङ्कायानामनुप्रविष्टतया दशाङ्कत्वम् । एकस्य द्वयोस्त्रयाणां चतुर्णाञ्च समावेशात (शे) दशत्वसंख्यासंभवादिति भावः । **तस्मात्—दशकृतम्** । तस्माद्धेतोः संवर्गविद्यो-

1. कृतसंज्ञकस्यायस्य चतुरङ्कतया कथं दशत्वाद्याश्रयतया तत्साम्यमिति चेत्—उच्यते। कृतसंज्ञे—इत्येवं क. पाठः ।

असूरिभिन्नत्वरूपं विशिष्टत्वम् । अनश्वासौ सूरिश्चेत्यपि केचिद् व्याख्यान्ति । तदा अन इति प्राणान्तर्यामित्वमुक्तम् । प्रयुज्यते हि, 'यत् किञ्चिदिदमा श्वभ्य आ शकुनिभ्यः—तद्वा एतदन्नस्यान्नम्' (५-२.) इति । **अनन्नं वागादिकमिति** । अनन्नम् अद्यमानाभिन्नम् अत्तारमित्यर्थवर्णने, 'यददन्तमत्ति' इति पाठेन समानार्थता । **वायुप्राणशरीरकपरमात्मपरत्वमिति** । संवर्गविद्यास्तुत्यर्थमाख्यायिकेति प्रागुक्तम् ; रैक्वप्रशंसाऽऽवेशेन प्रागेव परमात्मपरत्वावसायात् तदर्थमाख्यायिकानपेक्षणात् । स्तुत्यर्थत्वेन तदपि दिशदीकृतमिति भावः । एवं, 'यस्मै वा एतदन्नम्,' 'अनद्यमानो यदनन्नमत्ति' इति कथनात् भिक्षादानोपाख्यानबलाच्च प्रकृतविद्यायां परमात्मन्युपास्यतया वक्ष्यमाणान्नादित्वादिधर्मप्रस्तावार्थमपीदमुपाख्यानमिति द्रष्टव्यम् ।

कृतायत्वेनेति । ननु पूर्वं, **कृतायविजितायेति** हंसवाक्ये दृष्टान्ते अयशब्दसमभिव्याहारबलात् कृताख्यस्य अयस्य ग्रहणेऽपि अत्र **कृत**पदेन तद्ग्रहणे किं मानमिति चेन्न—कृतशब्दसुप्रसिद्धार्थस्यात्राघटमानत्वात् कस्यचिदर्थस्य वक्तव्यत्वे उपस्थितस्य अयरूपार्थस्यैव युक्तत्वात् ।

दिक्ष्वन्नमेव दशकृतम् । सैषा विराडन्नादी । तयेदं सर्वं दृष्टम् ।

पास्यं दशत्वसंख्या[1]युक्ततया कृतायरूपं सत् दशसु दिक्षु विद्यमानमन्नमेव भवति । "दशाक्षरा विराट् अन्नं विराट्" इति श्रुतेः ।

सैषा विराडन्नादी । दशत्वसंख्याश्रयत्वात्, 'दशाक्षरा विराट्' इति विराट्छन्दो भवति । अन्नमत्तीत्यन्नादी । कृतसंज्ञके अये दशसंख्यायाः भक्ष्यवदन्तर्भूतत्वात् दश[त्व]संख्यायाश्च विराट्त्वात् विराजश्चान्नत्वात् दशत्वसंख्यागर्भककृतायस्थानीयस्य संवर्गविद्योपास्यस्य [2]**पञ्चान्ये पञ्चान्ये** इति निर्दिष्टस्यास्य अन्नादित्वमप्यस्तीत्यर्थः । **तयेदं सर्वं दृष्टम्** । तया विराजा उपासितया इदं सर्वं दशदिग्वर्तिपदार्थजातं दशत्वसंख्यासाम्यात् **दृष्टं** भवति उपासितं भवतीत्यर्थः । तदुपास-

1. संख्यारूपतया **ख**. 2. इदं षष्ठ्यन्तं विशेषणमधिकं **क**. कोशे ।

प्रसिद्धश्च सामान्यतः कृतपदप्रयोगे अयग्रहणं श्रुतौ, 'ये वै चत्वारः स्तोमाः, कृतं तत्' इत्येवम् । अत्र तत्कृतमिति तच्छब्दश्रवणाच्च पूर्वोक्तकृतग्रहणम् । 'पूर्वोक्तं कृतम्' इति आनन्दगिरिव्याख्या च । न च हंसोक्त्यनभिज्ञेन रैक्केण कथं **तदिति** पूर्वोक्तपरामर्श इति वाच्यम्— रैक्कस्य तदनभिज्ञत्वेपि अत्र **वायुर्वावे**त्यादेः रैक्कोक्तसारांशरूपेण श्रुत्यैवोच्यमानतया तदिति पूर्वोक्तपरामर्शोपपत्तेः । उपरि जानश्रुतिसंबोधनतत्प्रशंसनेतिकरणाद्यभावेन रैक्कवाक्यत्वाप्रतीतेः । **तदि**त्यस्योक्तदशकपरामर्शित्वे **दश सन्त** इत्यत्र वाक्यसमाप्त्यभावेनानन्वयाच्च तच्छब्दः पूर्वपरामर्शी ।

ते वा एते इत्यादिश्रुतेरेवमन्वयार्थः— ते एते आधिदैविका आध्यात्मिकाश्च मिथो मिन्नाः पञ्च पञ्च संहत्य दश भवन्तः पूर्वोक्तकृतायरूपा भवन्ति । कृतस्य चतुरङ्कत्वेऽपि कृतेन विजयमानेन पुंसा त्रिद्व्येकाङ्कायानां पराजयविधानेन तेषामत्रानुप्रवेशात् त्रेतादीनामपि कृतांशत्वात् कृतस्य दशत्वसंख्यावत्त्वोपपत्तिः । तस्मादेव दशत्वसंख्यावत्त्वाद्धेतोः **दश**रूपकृतमिदं, **यस्मै वा एतदन्न**मित्युक्तदशदिग्वर्त्यन्नरूपञ्च । अन्नस्यापि दशदिग्वर्तितया दशत्वात् । एवं दशत्वादन्नत्वाच्च वाय्वादिदशकं विराडपि । तथा अन्नादि च । कथमन्नस्य सतोऽस्यान्नादित्वमिति चेत्— अत्रोक्तं भाष्ये **कृतसंज्ञके अये** इत्यादि । विराजो दशत्वसंख्यात्मकत्वादन्नत्वाच्च दशत्वसंख्याऽप्यन्नम् । तद्वत्त्वाद्दशकमिदमन्नादि । एवं कृतमप्यन्नादि; तत्कुक्षावपि दशत्वसंख्यारूपान्नसत्त्वादिति । आनन्दगिरिणा तु अस्य दशकस्य विराट्त्वेनान्नत्वं कृतत्वेन च अत्तृत्वमित्युक्तम् । कृतं हि द्यूतं सर्वहरत्वात् सर्वान्नभक्षकमिति । एवमेषां दशानां किञ्चित्किञ्चित्संवर्जनकरत्वेनाप्यत्तृत्वं स्यात् । विराट्छरीरकपरमात्मग्रहणे तु उपाख्यानोक्तरीत्या अन्नादित्वं सम्यगेव भवति । तदा चायमर्थः — अन्नादी प्रागुक्तः परमात्मा सैषा विराट् । **सा** इत्यस्य दशकृतरूपेत्यर्थः । **एषे**त्यस्य अन्नरूपेत्यर्थः । **विरा**डिति वाय्वादिपञ्चक प्राणादिपञ्चकद्वयमुच्यते

सर्वमस्येदं दृष्टं भवत्यन्नादो भवति, य एवं वेद [1]य एवं वेद ॥ ८ ॥

इति चतुर्थाध्याये तृतीयः खण्डः

---

1. य एवं वेदेति सकृदेव **मा** ?

नस्य फलमाह **सर्वमस्य—वेद** । एतदुपासकस्य सार्वज्ञ्यं ब्रह्मलक्षणान्नानुभवश्च भवतीत्यर्थः । विद्यासमाप्तिद्योतकं द्विर्वचनम् ।

व्यासार्यैस्तु, 'छन्दोभिधानात्— ' इति सूत्रे **अन्नात्** इति पाठमाश्रित्य अन्नं च तत् अत्तीत्यन्नादिति भोक्तृत्वभोग्यत्वाश्रयपरमात्मपरतया व्याख्यातम् ।

अस्याः संवर्गविद्यायाः परमात्मपरत्वमेव; न प्रसिद्धवायुप्राणविषयत्वम् । 'यथा कृताय विजितायाधरेऽयाः संयन्ति' इत्यादिना संवर्गविद्यानिष्ठैरेकप्रभावे सर्वेषामन्तर्भाववर्णनात् । 'आत्मा देवानां जनिता प्रजानां हिरण्यदंष्ट्रो बभसोऽन-सूरिः । महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्ति' इति इतराविनाश्यत्वे सति सकलविनाशकत्व—सर्वसंप्रतिपन्नमहामहिमशालित्व — सर्वदेवनियन्तृत्व—ब्रह्मादिसकल-प्रजोत्पादकत्व -- हिरण्यदंष्ट्रत्वाद्युपलक्षितनरसिंहविग्रहवत्त्वादिप्रतिपादनात्, 'वै वयं ब्रह्मचारिन्नेदमुपास्महे' इति कशब्दितप्रजापत्यात्मकसंवर्गप्रत्याख्यानाच्च परमात्म-विषयैवेयं विद्येति द्रष्टव्यम् ॥

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते—

समन्वयाध्याये — जानश्रुतिं शूद्रेत्यामन्त्र्य रैको ब्रह्मविद्यामुपदिदेशेति [1]संवर्गविद्यायां श्रवणात्, विदुरादीनां ब्रह्म[2]विद्यानिष्ठानामपि दर्शनात्, अग्निविद्या-

1. संवर्गविद्यायामित्यधिकं **क.** 2. विद्यापदमधिकं **क.**

विराट्सादृश्यात् । विराट्छन्दसि हि प्रतिपादमक्षराणि दश; इमेऽपि दशेति । अत्र तस्य साक्षादन्नादित्वानन्वयज्ञापना । मन्त्रोक्तस्यात्मनो विशेष्यतया ग्रहणमाशय्य **अन्नादी**ति पुल्लिङ्ग-निर्देशः । तथाच मन्त्रायुक्तो योऽन्नादी स कृतान्नरूप विराडन्तर्यामीत्यर्थः ॥ तयोपास्यभूतया विराजा करणेन सर्वमिदं जगत् उपासकेन दृष्टं भवति । तदेव विब्रियते **सर्वमस्ये**त्यादिनेत्यपि **तये**त्यादेरर्थः स्यात् । यद्वा **तये**तिवाक्ये विराडन्तर्यामिणः सर्वदर्शितत्वरूपोपास्याकारोक्तिः, एवं सर्वज्ञत्वान्नादित्वविशिष्टविषयकसंवर्गविद्यां विधाय उपरि यथोपासनफलोक्तिरिति ।

साध्ययज्ञादिषु अग्निविद्याशून्यानां शूद्राणां कर्मकाण्डापशूद्राधिकरणन्यायेनाधिकाराभावेऽपि ब्रह्मोपासने अधिकारः संभवत्येव। न च शूद्रस्य ब्रह्मोपासनोपयुक्तज्ञानासंभवः शङ्कनीयः—इतिहासपुराणादिना तज्ज्ञानसंभवात्। न चैवं यज्ञादिष्वपि तथा प्रसङ्गः,—अग्न्यभावात्। 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति यज्ञानुष्ठानस्य निषिद्धतया च तस्य तदसंभवेऽपि संवर्गविद्या[1]गतशूद्रशब्दामन्त्रणलिङ्गानुग्रहात् ब्रह्मोपासनाधिकारोऽङ्गीकर्तव्य एवेति पूर्वपक्षे प्राप्ते—

उच्यते। 'शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि'। शोचितृत्वप्रवृत्तिनिमित्तकेन शूद्रशब्देन जानश्रुतेः, 'कम्वर एनमेतत् सन्तं सयुग्वानमिव रैकमात्थे'ति हंसोक्तानादरगर्भवाक्यश्रवणात् तदाद्रवणहेतुभूतात् उत्पन्ना शुक् सूच्यते; न चतुर्थवर्णत्वम्। यौगिकार्थस्य प्रकृतस्य मानान्तराविरुद्धस्य ग्रहणसंभवे मानान्तरविरुद्धस्य रूढ्यर्थस्याग्राह्यत्वात्। शूद्रस्य ब्रह्मोपासनौपयिक वैदुष्यलक्षणसामर्थ्यासंभवाच्च न ब्रह्मविद्यायामधिकारः। 'वैदिकविधीनामध्ययनविधि[2]सिद्धवेदजन्यज्ञानवतः[3] त्रैवर्णिकाधिकारिण आसाद्य निवृत्तानां शूद्राधिकारानाक्षेपकत्वात्' इति न्यायस्य यज्ञोपासनयोरविशेषात्। 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इत्यस्य न्यायसिद्धैकदेशानुवादित्वेन तस्य विनिगमकत्वासंभवात्।

'क्षत्रियत्वगतेश्च'। पक्वान्नप्रदत्व—[राजान्तः पुररक्षक] [4]क्षत्तृप्रेषण—रैक्कन्याप्रदान—अनेकग्रामप्रदानादिना जानश्रुतेः क्षत्रियत्वावगतेश्च। एतेषां क्षत्रियधर्मत्वस्यैव शास्त्रीयत्वात्। 'उत्तरत्र चैत्ररथेन लिङ्गात्'। संवर्गविद्यासंबन्धिनोऽभिप्रतारिनाम्नः चित्ररथवंश्यस्य क्षत्रियस्य तादृशेन [संवर्गविद्यानिष्ठेन ब्राह्मणेन] शौनकेन कापेयेन साहचर्यदर्शनात् इहापि संवर्गविद्यासंबन्धी रैकेन ब्राह्मणेन सहचरितजान-

1. संवर्गविद्यावगतशूद्रशब्दामन्त्रणलिङ्गानुग्रहाय क. 2 लब्ध ख. 3. वैत्रैवर्णिक ख. 4. क्षत्तृविशेषण क.

निवृत्तानामित्यादि। 'न ह्यविद्वानधिकृतोऽस्ति' इति विदुषामेव कर्माधिकारसंभवात् विधिगता विद्वदधिकार्याकाङ्क्षा अध्ययनविधिकृतप्रवर्तनलब्धवैदुष्याणां, 'अनेन वैदुष्येण किं कर्तव्यम्' इति साकाङ्क्षाणां त्रैवर्णिकपुरुषाणां लाभेन शान्तेति न कर्मविधयः स्वावैयर्थ्याय विद्याक्षेपं क्वचिदपि जने करिष्यन्तीति कुतः शूद्रे विद्याकल्पनं वैदिकविधिबलादिति भावः।

श्रुतिरपि क्षत्रिय एवेत्यवसीयते। नन्वभिप्रतारिणः क्षत्रियत्वं कुतोऽवसीयते इति चेत् — चित्ररथवंश्यत्वात्। न च तदपि कुतोऽवसितमिति वाच्यम्—कापेययाज्यत्वात् लिङ्गात्। न च कापेययाज्यत्वेऽपि चित्ररथवंश्यत्वं कुत इति वाच्यम् — 'एतेन वै चित्ररथं कापेया अयाजयन्' इति छन्दोगब्राह्मणे चित्ररथस्य कापेययाज्यत्वश्रवणात्।

नन्वभिप्रतारिणः कापेययाज्यत्वं वा कुतोऽवसीयते। 'शौनकञ्च कापेयमभिप्रतारिणञ्च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी विभिक्षे' इति एकपङ्क्त्युपवेशमात्रस्य श्रवणात्। नानादेशागतानां [परस्पर] संबन्धशून्यानामप्येकपङ्क्त्युपवेशसंभवात्। अस्तु वा कथञ्चिद् याज्ययाजकभावः। तावता छन्दोगब्राह्मणे चित्ररथस्य कापेययाज्यत्वश्रवणेन चित्ररथत्वमेव सिध्येत्, न तु तद्वंश्यत्वमिति चेत् — उच्यते। कापेयाभिप्रतारिणोः वल्लसंबन्धयोरेकपङ्क्त्युपवेशस्योचि[1]तत्वात् कापेयानां चित्ररथवंश्यानाञ्च याज्ययाजकसंबन्धस्यान्यत्र प्रसिद्धत्वात् अभिप्रतार्यपि कापेययाज्यचित्ररथवंश्य इत्यवसीयते। न च कापेययाज्यतया चित्ररथत्वमेवास्त्विति शङ्क्यम्—अभिप्रतारिसंज्ञावरुद्धे चित्ररथसंज्ञानिवेशासंभवात्। नायं चित्ररथः अपितु तद्वंश्यः, समानान्वयानां याज्ययाजकभावस्य लोकवेदप्रसिद्धत्वात्। न च कापेययाज्यस्य चित्ररथस्य क्षत्रियत्वे किं प्रमाणमिति वाच्यम् — 'एतेन वै चित्ररथं कापेया अयाजयन्। तस्माच्चैत्रथो नामैकः (चैत्ररथीनामेकः?) क्षत्रपतिरजायत' इति चित्ररथोत्पन्नस्य क्षत्रियत्वावेदनात्।

ततश्चोत्तरत्र ब्राह्मणक्षत्रिययोः शौनकाभिप्रतारिणोः संवर्गविद्यासंबन्धश्रवणात् इहापि तद्विद्यासंबन्धिनोः रैक्वजानश्रुत्योः ब्राह्मणक्षत्रियत्वमवसीयते।

'संस्कारपरामर्शात् तदभावाभिलापाच्च'। ब्रह्मविद्योपदेशप्रदेशेषु, 'उप त्वा नेष्ये; न सत्यादगा इति', 'तं होपनिन्ये', 'अधीहि भगव इति होपससाद सनत्कुमारं नारदः', 'समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः' इति संस्कारः परामृश्यते। शूद्रस्य संस्काराभावोऽभिलप्यते, 'शूद्रश्चतुर्थो वर्ण एकजातिः', 'न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति' इति।

1 उदितत्वात् ख.

'तदभावनिर्धारणे च प्रवृत्तेः'। शूद्रत्वाभावनिर्धारणे सत्येव विद्योपदेशाय प्रवृत्तिर्दृश्यते, 'नैतदब्राह्मणो विवक्तुमर्हति। समिधं सोम्याहर। उप त्वा नेष्ये। न सत्यादगाः' इति।

'श्रवणाध्ययनार्थप्रतिषेधात्'। 'पद्भ्यु ह वा एतत् श्मशानं, यच्छूद्रः। तस्माच्छूद्रसमीपे नाध्येतव्यम्' इति शूद्रस्य वेदश्रवणप्रतिषेधेन तदध्ययनतदर्थानुष्ठानयोः सुतरां प्रतिषेधात्।

'स्मृतेश्च'। 'अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्, उदाहरणे जिह्वाच्छेदः, धारणे शरीरभेदः' इति स्मृत्या च श्रवणादिकं शूद्रस्य प्रतिषिद्धम्।

अतो न ब्रह्मविद्यायां शूद्रस्याधिकारः। विदुरादयस्तु भवान्तराधिगतज्ञानाप्रमोषात् ज्ञानवन्तः; प्रारब्धकर्मवशाच्चेदृशजन्मयोग इति तेषां ब्रह्मनिष्ठत्वम्। ननु शूद्राणां ब्रह्मोपासनानधिकारे पञ्चरात्राद्यागमोक्ततान्त्रिकमन्त्रानुसंधानपूर्वक ब्रह्मोपासनेऽप्यधिकारो न स्यात्। नारदस्य शूद्रजन्मनि महर्षिवचनादनुष्ठितमच्युतोपासनमप्यप्रामाणिकं स्यादिति चेत्—न हि ब्रह्मोपासनमात्रे शूद्रस्यानधिकारं ब्रूमः; अपितु संवर्गविद्यादिषु वैदिकेषूपासनेषु। अतो नात्र तद्दोषशङ्कावकाशः॥

ननु, 'संबन्धादेवमन्यत्रापि' इत्यधिकरणे व्याहृतिविद्यायाः अध्यात्माधिदैवतस्थानभेदेन भेदस्य प्रतिपादितत्वात् संवर्गविद्याया अपि अध्यात्माधिदैवतस्थानभेदेन भेदः स्यात्। न चेष्टापत्तिः, 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' इति ब्रह्मविद्यामात्रार्थिने जानश्रुतये विद्याद्वयोपदेशस्यायुक्तत्वादिति चेत्—मैवम्—व्याहृतिविद्यायाम्, 'य एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्' इत्यत्रैव 'वायौ', 'प्राणे' इत्येवं वायुप्राणयोः स्थानत्वेन निर्देशाभावात् स्थानभेदप्रयुक्तविद्याभेदाप्रसक्तेः। 'यां देवतामुपास्से' इति रैक्कोपास्यदेवता[1]प्रश्नस्य उपासनप्रकारपर्यन्तत्वात् तत्प्रकारे पृष्टे, रैक्कोपास्यसंवर्गस्य देवतात्मलक्षण-

1. देवताया उपासनप्रकारे पृष्टे ख.

नारदस्येति। अस्य दासीपुत्रत्वादिपूर्वजन्मवृत्तं श्रीभागवते (१–५)।

४—४.

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे — 'ब्रह्मचर्यं भवति ! विवत्स्यामि । किंगोत्रोऽहमस्मीति ॥ १ ॥

सा हैनमुवाच— नाहमेतद् वेद तात !, यद्गोत्रस्त्वमसि । बह्वहं

स्थानभेदेन उपासनाद्वय[1]संभवमभिप्रेत्य उपासनाद्वयोपदेशे दोषाभावाच्च । न च, 'विकल्पोऽविशिष्टफलत्वात्' इति न्यायेन रैक्वस्य विद्याद्वयानुष्ठानाभावात् स्वानुष्ठीयमानविद्यामात्रोपदेश एव युक्तः; नाधिक इति इति वाच्यम्—अप्रयोजकत्वात् । परोपदेशे स्वावगतेरेव प्रयोजकत्वेन स्वानुष्ठानस्याप्रयोजकत्वात् इति स्थितम् ॥ प्रकृतमनुसरामः ॥ ४—३.

षोडशकलब्रह्मविद्यां प्रस्तौति—**सत्यकामो—चक्रे** । हेति ऐतिह्यार्थः । जबालासुतः सत्यकामनामा जबालां मातरमामन्त्रितवान् । किमितीत्यत्राह—**ब्रह्मचर्यं—मस्मीति** । हे भवति! स्वाध्यायग्रहणाय आचार्यकुले ब्रह्मचर्यं विवत्स्यामि; मे गोत्रं(गोत्रं मे?) किमिति पृष्टवान् ।

सा—ब्रवीथा इति । "अहं भर्तृगृहे अतिथ्यभ्यागतादिभ्यो बहुपरि-

1. संबन्ध ख.

दोषाभावाच्चेति । इयमन्वारुह्योक्तिः । अत्र आधिदैविकाध्यात्मिकसमाहारेण दशत्वकृतत्वविराट्त्वाद्यनुसंधानस्योक्ततया विद्यैक्यप्रतीतेः । न च वायुप्राणयोः शरीरत्वमात्रेण स्थानभेदः; तथासति सार्वात्म्योपासनस्यायोगात् । मधुविद्यादौ वस्वादित्याद्यनेकात्मत्वोपासनायोगाच्च । न च शरीरमात्मानं प्रति स्थानम्; किंतु आधेयम् । युक्तं तु शुभाश्रयस्य स्थानं यत्, तद्भेदे विद्याभेद इति । **अप्रयोजकत्वादिति** । रैक्वस्य घोराङ्गिरस्तो विद्यान्तरग्रहणमुक्तं सुबालोपनिषदि । **यां देवतामुपास्से** इति च उपास्यमानदेवतैव पृष्टा; न तदादृत मुपासनम् ॥

पुष्कलेन धनेन जानश्रुतेर्विद्याप्राप्तिरुक्ता । अथ गुर्व्या शुश्रूषया विद्याप्राप्तिरन्यस्योच्यते । संवर्गविद्या दशान्नादिब्रह्मविषयिणी; इयं षोडशकलब्रह्मविषयिणी । पूर्वा प्राणाद्याध्यात्मिकाग्न्याद्याधिदैविकतिपयविषया; इयमपि । एवं सा दशदिग्वर्त्यन्नगोचरा; इयं प्राच्यादिकतिपयदिग्विषयिणीत्यादिसंगत्या एतदारम्भः । **भवतीति** संबुद्धिः । पूज्ये! इत्यर्थः । **विवत्स्यामीति** । **विवासो** देशान्तरवासः । **बहुचरन्तीत्यनेनैव** सर्वपरिचरणेऽपि सुग्रहे **परि-**

चरन्ती परिचारिणी यौवने त्वामलभे। साऽहमेतन्न वेद, यद्गोत्रस्त्वमसि। जबाला तु नामाहमस्मि। सत्यकामो नाम त्वमसि। स सत्यकाम एव जाबालो [1]ब्रवीथा इति ॥ २ ॥

स ह हारिद्रुमतं गौतममेत्योवाच— ब्रह्मचर्यं भगवति वत्स्यामि। उपेयां भगवन्तमिति।

तँ होवाच — किंगोत्रो नु सोम्यासीति। स होवाच, 'नाहमेतद्वेद भो!, यद्गोत्रोऽहमस्मि। अपृच्छं मातरम्। सा मा प्रत्यब्रवीत्—बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे। साऽहमेतन्न वेद, यद्गोत्रस्त्वमसि। जबाला तु नामाहमस्मि। सत्यकामो नाम त्वमसीति। सोऽहँ सत्यकामो जाबालोऽस्मि भो' इति ॥ ४ ॥

1. ब्रुवीथाः शां.

चर्याजातं चरन्ती **परिचारिणी** गुर्वादिपरिचरणशीला च सती तद्व्यासङ्गेन गोत्रानभिज्ञैव यौवनकाले त्वां लब्धवती। अतो गोत्रं न जाने। अतः, 'जबालायाः पुत्रः सत्यकामनामाऽहमस्मि। नाहं गोत्रं वेद' इति गुरुसमीपे ब्रूहि" इत्युक्तवतीत्यर्थः।

स—उवाच। अथ **सः** सत्यकामः हरिद्रुमत्पुत्रं गोत्रतो गौतममेत्योक्तवान्। उक्तिमेवाह—**ब्रह्म—भगवन्तमिति**। **भगवति** पूजावति त्वयि ब्रह्मचर्यं वत्स्यामि। शिष्यत्वेन भगवन्तमुपगच्छानीत्युक्तवान्।

तं—असीति। हे सोम्य! किंगोत्रस्त्वम्? ज्ञातकुलगोत्रः उपनेतव्यः। अन्ततः शूद्रत्वाभावो वा(हि) निश्चेतव्य इत्यभिप्रायः। **स होवाच**। **सः** सत्यकामः प्रत्युवाचेत्यर्थः। तदेवाह—**न—भो इति**। स्पष्टोऽर्थः।

चारिणीत्युक्तिः ताच्छील्यात् तदेकरतया गोत्राद्यवगमोत्कण्ठाविरहज्ञापनाय। कति कति ह्यद्यत्वेऽपि कुलगोत्रादिकमजानानाः कुलस्त्रियः। **यौवन इति** लज्जा, अनुपयुक्तसल्लापार्थधार्ष्टर्यवैकल्यम्, भर्तृपराधीनता, भर्तुः शीघ्रोपरतिश्च व्यज्यन्ते।

तँ होवाच — नैतदब्राह्मणो विवक्तुमर्हति । समिधँ सोम्याहर । उप त्वा नेष्ये । न सत्यादगा इति ।

तमुपनीय कृशानामबलानां चतुःशता[1] गा निराकृत्योवाच—

1. चतुःशतं मा.

तं होवाच । तं गौतमः प्रत्युवाच । किमिति । नैतत्—इति । एतत् एतादृशम् आर्जवयुक्तं वचः नाब्राह्मणो विशेषेण वक्तुमर्हति । अत्र ब्राह्मणशब्दः त्रैवर्णिकमात्रपरः । अब्राह्मणः अत्रैवर्णिकः शूद्र इति यावत् । शूद्रो न विवक्तुमर्हति; शूद्राणां कुटिलस्वभावत्वादिति भावः । हे सोम्य! उपनयनसंस्कारार्थं समिधमाहर । सत्यं नातिक्रान्तवानसि । सत्यमेवोक्तवानसि । अतस्त्वामुपनेष्ये इत्यर्थः । सूत्रितञ्च, 'तदभावनिर्धारणे च प्रवृत्तेः' इति । शूद्रत्वाभावनिश्चये सत्येव, 'उप त्वा नेष्ये' इत्युपनयनप्रवृत्तेर्दर्शनादित्यर्थः । अतोऽब्राह्मणशब्दः शूद्रपरः ।

तमुपनीय—उवाच । तमेवमाचार्यः उपनीय कृशानामबलानां गवां मध्ये अतिदुर्बलानि कृशानि गवां चत्वारि शतानि निराकृत्य पृथक्कृत्य इदं वक्ष्यमाण-

---

अब्राह्मणपदस्य शूद्र इत्यर्थवर्णनं ब्राह्मणवत् क्षत्रियवैश्ययोरपि विद्याधिकारित्वात् । ब्राह्मणत्वनिर्धारणमेवेतो भवतीत्यपि सुवचम्—ब्राह्मणत्वाभावेऽयं स्वमातरं नूनं गोत्रादि न पृच्छेत् । किन्तु को नः पुरोहितो गुरुरिति । साऽपि ईदृशमुत्तरं न वक्ष्यति । यतो राजन्यविशां पुरोहितगोत्रादन्यत् प्रातिस्विकं गोत्रं न वर्तते । न च शूद्रस्य गोत्रमिति । मातापुत्रवचनसरण्या त्वत्र, 'अस्ति किञ्चिदसाधारणं तस्य गोत्रम् । तत्तु न बुध्यत' इत्येव ज्ञायते । तदयं ब्राह्मण इति । न चैवं, 'तदभावनिर्धारणे च प्रवृत्तेः' इति सूत्रभाष्यादौ कथं शूद्रपरतया व्याख्यानमिति शङ्क्यम् । अन्तत इह अब्राह्मणपदस्य अगोत्रः विद्यानधिकृतः इत्याद्यर्थे पर्यवसानं मनसिकृत्य तथोक्तिरित्यलमत्र । न विवक्तुमिति । शूद्रश्चेत्, स्वस्य गुरुणा अपरिग्रहशङ्कया किमप्येकं गोत्राद्यारोप्य वदेदिति भावः । विवक्तुं विशेषेण वक्तुम् । विशेषो वैलक्षण्यम् । विलक्षणैषा वचनसरणिर्गोत्ररहितस्य अध्ययनानधिकृतस्य तदर्थिनो न भवतीति । शूद्राणामिति शास्त्रातिलङ्घिनामिति शेषः ।

इमाः सोम्यानुसंव्रजेति ।

ता अभिप्रस्थापयन्नुवाच — नासहस्रेणावर्तेयेति । स ह वर्षगणं प्रोवास । ता यदा सहस्रं संपेदुः ॥ ५ ॥

इति चतुर्थाध्याये चतुर्थखण्डः

४—५.

अथ हैनमृषभोऽभ्युवाद — 'सत्यकामा३ इति । भगव इति ह प्रतिशुश्राव । प्राप्ताः सोम्य सहस्रँ स्मः । प्रापय न आचार्यकुलम् [१]

मुवाचेत्यर्थः । **इमाः—व्रजेति** । हे **सोम्य** सोमार्ह! इमाः गाः अनुगच्छेति[1] । **ताः—आवर्तेयेति** । स सत्यकामः, 'सहस्रसंख्यापूरणात् प्राक् न प्रतिनिवृत्तो भवानि' इति, गाः अरण्यमभिप्रस्थापयन्, उवाचेत्यर्थः । **स ह वर्षगणं प्रोवास** । चिरकालं तृणोदकपूर्णे वने गाः प्रवेश्योषितवान् । **ताः—संपेदुः** । यस्मिन् काले ताः सहस्रं संपन्ना बभूवुः, तावन्तं वर्षगणं वने उषितवानित्यर्थः ॥ ४—४.

अथ—इति । एनं[2] गवां संरक्षणेन प्रीतदेवताविशेषाधिष्ठितः **ऋषभः सत्यकामा ३ इति अभ्युवाद** आमन्त्रितवान् । **सत्यकामा ३ इति**, 'दूराद्धूते च' इति प्लुतिः[3] । **भगव इति ह प्रतिशुश्राव** । **प्रतिशुश्राव** प्रत्युत्तरं ददौ । सत्यकाम इति शेषः । ऋषभ आह **प्राप्ताः—ब्रवाणीति** । **सहस्रं** सहस्रसंख्यां वयं **प्राप्ताः स्मः** । तव प्रतिज्ञा च निर्व्यूढा । अस्मान् आचार्यकुलं प्रापय । प्रीतश्च

1. इत्युवाचेत्यर्थः ख. 2. एवं ख. 3. प्लुतः ख.

निराकृत्य निरिति पृथक्कारवाचि । यथा निर्वपतीति, निष्कर्षतीति च । **आकृत्य** आकृतिं बृन्दरूपसंनिवेशं परिकल्प्य । **सर्वगवीसंवर्धनमनाह्नाप्य** चतुश्शतमात्रविभजनं कृपाकृतम् । तदवेत्य ततः सहस्रपर्यन्तसंवर्धनप्रतिज्ञा शिष्यस्य भक्तिकृता । **यदा** यस्मिन् वर्षगणे । यद्वा उत्तरखण्डेष्विव खण्डभेदस्य वाक्यभेदानापादकत्वे, **यदा सहस्रमिति** वाक्यं **अथ हैनमि**-त्युत्तरवाक्येन एकवाक्यं भवितुमर्हति । **संपेदुरिति** परस्मैपदं छान्दसम् ।

गुरुक्त् गुरुक्तुषु वर्तितव्यमिति बुध्या, व्यक्तवचनश्रवणजनितविस्मयेन च गौरवेण **भगव** इति संबोधनम् । **प्रतिश्रवणं** श्रवणप्रत्यनीकम्; व्याहरणम् । प्रतिमोचनं धारण-मित्यन्ये । **ब्रह्मणश्चेति** चकारः, **प्राप्ताः सोम्येति** वचनेन प्रकृतपादवचनसमुच्चये ।

ब्रह्मणश्च ते पादं ब्रवाणी' ति। ब्रवीतु मे भगवानिति। तस्मै [1]होवाच—

'प्राची दिक् कला; प्रतीची दिक् कला; दक्षिणा दिक् कला; उदीची दिक् कला। एष वै सोम्य चतुष्कलः पादो ब्रह्मणः, प्रकाशवान् नाम (२)। स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते, प्रकाशवानस्मिन् लोके भवति। प्रकाशवतो ह लोकान् जयति, य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३ ॥

इति चतुर्थाध्याये पञ्चमः खण्डः

४—६.

अग्निष्टे पादं वक्ते' ति॥

स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार। ता यत्राभिसायं बभूवुः; तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश॥१॥

1. तस्मै स होवाच मा. एवमुत्तरत्रापि।

तेऽहं ब्रह्मणः पादं ब्रवाणीति। इतर आह—**ब्रवीतु मे भगवानिति। तस्मै होवाच**। ऋषभ इति शेषः। किमिति—

प्राची—नाम। **कलाः** अवयवाः, एकैकस्य हि गोः पादस्य चत्वारोऽवयवाः—पुरतः खुरद्वयम्, पृष्ठतः पार्ष्णिद्वयञ्च। अतः पादश्चतुष्कलो भवति। अतः प्रागादिदिक्चतुष्टयं ब्रह्मणः पादत्वेन प्रकाशवन्नामकत्वेन चोपास्यमित्यर्थः। **स य—भवति**। **एतं** पादम् उक्तप्रकारेण य उपास्ते, स इहलोके प्रकाशवान् भवतीत्यर्थः। नैतावन्मात्रं फलमित्याह—**प्रकाशवतो—जयति**। कस्येदं फलमित्यत्र, उक्तमधिकारिणमुपसंहरति **य—उपास्ते**। उक्तोऽर्थः॥ ४—५.

अग्निष्टे पादं वक्तेति। एवं स्वयं पादमुक्त्वा पादान्तरमग्निरुपदेक्ष्यतीत्युक्त्वा ऋषभः तूष्णीं बभूवेत्यर्थः।

स—विवेश। स ह सत्यकामोऽपरेद्युः नित्यनैमित्तिकं कर्म कृत्वा आचार्यकुलाभिमुख्येन गाः प्रस्थाप्य—ताः सर्वा गावो यत्र देशे सायंकाले **अभिबभूवुः** [अभितो बभूवुः] परितः स्थिता भवन्ति(?), तत्र—अग्निमाहृत्य गाश्चोपरुध्य सन्ध्यामुपास्य समिदाधानं[1] कृत्वा ऋषभवचो ध्यायन् अग्नेः पश्चात् प्राङ्मुख उपविष्टवानित्यर्थः।

1. समिधमाधाय क. ग.

तमग्निरभ्युवाद—सत्यकामा ३, इति। भगव इति ह प्रतिशुश्राव। ब्रह्मणः सोम्य ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाच—'पृथिवी कला; अन्तरिक्षं कला; द्यौः कला; समुद्रः कला। एष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान् नाम ॥ ३ ॥ स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते, अनन्तवानस्मिन् लोके भवति। अनन्तवतो ह लोकान् जयति, य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ॥ ४ ॥

इति चतुर्थाध्याये षष्ठः खण्डः।

४—७.

हँसस्ते पादं वक्ते' ति ॥

स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार। ता यत्राभिसायं बभूवुः, तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥

तँ हँस उपनिपत्याभ्युवाद, सत्यकामा ३ इति। भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाच—

[[1]तमग्निरभ्युवाद। तम् एकमुपविष्टं सत्यकाममग्निरामन्त्रयाञ्चकारेत्यर्थः। शिष्टं स्पष्टम्। ब्रह्मणः—पादं द्वितीयमित्यर्थः। अनन्तवान् नाम अनन्तवन्नामोपास्य इत्यर्थः। फलमाह—स—भवति। अनन्तवान् केनचिदपि पारं गन्तुमशक्य इत्यर्थः। अजेय इति यावत्। अनन्तवतो ह लोकान् जयति। अनन्तवतः अविनाशिन इत्यर्थः। शिष्टं स्पष्टम् ॥] ४—६.

1. [| एवं कुण्डलितमिदं प्रायः ख कोशमात्रे।

श्वोभूते अनन्तरपरदिने उषसि। पश्चात् प्रतीच्याम्। उप समीपे। अनन्तवानिति। पूर्वं पश्चाच्चेव अत्रापि अनन्तशब्दान्मतुबिति तदनुगुणोऽर्थो भाव्यः।

'अग्निः कला; सूर्यः कला; चन्द्रः कला; विद्युत् कला। एष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान् नाम ॥ ३ ॥ स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते, ज्योतिष्मानस्मिन् लोके भवति। ज्योतिष्मतो ह लोकान् जयति, य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ४ ॥

इति चतुर्थाध्याये सप्तमः खण्डः।

४—८.

मद्गुष्टे पादं वक्ते' ति ॥

स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार। ता यत्राभिसायं बभूवुः, तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥ तं मद्गुरुपनिपत्याभ्युवाद, सत्यकामा३ इति। भगव इति ह प्रतिशुश्राव ॥ २ ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाच—

'प्राणः कला; चक्षुः कला; श्रोत्रं कला; मनः कला। एष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान् नाम ॥ ३ ॥ स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते, आयतनवानस्मिन् लोके भवति। आयतनवतो ह लोकान् जयति, य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते' ॥ ४ ॥

इति चतुर्थाध्याये अष्टमः खण्डः।

४—९.

प्राप हाऽऽचार्यकुलम्। तमाचार्योऽभ्युवाद सत्यकामा ३ इति।

हंसः—। सर्वं स्पष्टम्। ज्योतिष्मानस्मिन् लोके भवति। तेजस्वी भवतीत्यर्थः। ज्योतिष्मतो ह लोकान्। अग्निसूर्यादिलोकानित्यर्थः। ४—७.

मद्गुष्टे—। मद्गुः जलपक्षिविशेषः। [हंसमद्गू अपि वृषभवदेव देक्ताविष्टौ द्रष्टव्यौ। आयतनवान् आश्रयवान् भवतीत्यर्थः। आयतनवतः सावकाशानित्यर्थः। शिष्टं पूर्ववत्।] ४—८.

प्राप हाचार्यकुलम्। गोभिः सह सत्यकाम इति शेषः। शिष्टं स्पष्टम्।

भगव इति ह प्रतिशुश्राव ॥ १ ॥ ब्रह्मविदिव वै सोम्य भासि; को नु त्वाऽनुशशासेति । अन्ये मनुष्येभ्य इति ह प्रतिजज्ञे । भगवांस्त्वेव मे कामे ब्रूयात् ॥ २ ॥ श्रुतँ ह्येव मे भगवद्दृशेभ्यः, 'आचार्याद्धैव[1] विद्या विदिता साधिष्ठं [2]प्रापत्' इति । तस्मै हैतदेवोवाच अत्र ह न किञ्चन वीयायेति वीयायेति ॥ ३ ॥ इति चतुर्थाध्याये नवमः खण्डः ।

1. ध्येव **मा.** 2. प्रापति **शां.** प्रापयति **मा.**

को नु त्वाऽनुशशास । को वा ते ब्रह्मोपदिष्टवानित्यर्थः । शिष्टं स्पष्टम् ।

अन्ये मनुष्येभ्य इति ह प्रतिजज्ञे । मनुष्या मां नानुशिष्टवन्तः । न हि भगवतः शिष्यं मां कश्चिन्मनुष्योऽनुशासितुमुत्सहते । अपितु देवा एवानुशिष्टवन्त इति प्रतिज्ञातवान् । **भगवांस्त्वेव मे कामे ब्रूयात्** । **कामे** इच्छायां सत्यां मे भगवानेव वक्ष्यति । [अतो] मम किमर्थमितरप्रार्थनमित्यर्थः । किञ्च—**श्रुतं ह्येव मे—प्रापदिति** । आचार्यादेव विद्याऽधिगता **साधिष्ठं** [साधिष्ठत्वं] श्रुतत्वं **प्रापदिति** प्राप्नोतीति **भगवद्दृशेभ्यः** भवादृशेभ्यो **मे** मया श्रुतम् । अतो नाहं भगवत्तोऽन्यस्मादनुशासनं वाञ्छामीति भावः ।

तस्मै हैतदेवोवाच । एवमुक्त आचार्यस्तस्मै सत्यकामाय एतदेव षोडशकलब्रह्मविज्ञानमेवोवाच । तदेवान्यूनानतिरिक्तमुवाचेत्यर्थः । तत्र हेतुमाह—**अत्र—वीयायेति** । **अत्र** षोडशकलविद्यायां किञ्चिदपि **न वीयाय** वैविध्यं न प्राप्तम् । अतो हेतोर्विद्याप्रकारे भेदाभावात् अन्यूनानतिरिक्तं तदेवोवाचेत्यर्थः । द्विरुक्तिर्विद्यासमाप्त्यर्था । ४—९.

मे कामे इत्यस्य ममेच्छायामिति नार्थः । किंतु यदा भवत इच्छा, तदा मह्यमिति । इदमभिप्रेत्योक्तं **भगवानेव वक्ष्यती**ति । **प्रापदि**ति, 'छन्दसि लुङ्लङ्लिटः' इति लडर्थे लुङ् ।

वैविध्यमिति । **न वीयाये**ति व्ययं-लोपं न प्राप्तम् , न किञ्चित् न्यूनमित्यर्थे स्वरसम् । **वीयाय** विगतमिति च शाङ्करम् । ऋषभाद्युक्तगुरूक्तयोर्मध्ये एकतरस्य न्यूनत्वे तयोर्वैविध्यसंभवात्तु एवमिदं विवृतम् । **अत्र**=आचार्योक्ते किमपि अधिकं नासीदित्यपि वक्तव्यमिति च एवमुक्तम् । **वीयायेति इति**शब्दो हेतौ । तैः सर्वमेवोक्तमिति हेतोस्तदेवोवाचेत्यर्थः । **एतदेवेत्यस्य** 'अत्र न किञ्चिद्वीयाय' इति वाक्यमेवेति नार्थः । तदा एतदेवेत्यस्य वैयर्थ्यात् । आचार्यमुखात् सर्वमेकमुखं जिज्ञासोस्तदनुपदेशायोगाच्च ॥

४—१०.

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास। तस्य ह द्वादश वर्षाण्यग्नीन् परिचचार। स ह स्नान्यान् अन्तेवासिनः समावर्तयँस्तँ ह स्मैव न समावर्तयति ॥ १ ॥ तं जायोवाच, 'तपो ब्रह्मचारी कुशलमग्नीन् [1]पर्यचारीत्। मा त्वाऽग्नयः परिप्र[2]वोचन्; प्रब्रू-

1. परिचचारीत् शां. मा. 2. प्रावोचन् मा.

उपकोसलविद्यां वक्तुमाह—**उपकोसलो—उवास**। कमलसुतः उपकोसलनामा [अत्र] पूर्वोक्ते जाबाले सत्यकामे विद्यार्थं ब्रह्मचर्यमवात्सीत्। **तस्य—परिचचार**। तदभिशुश्रूषां द्वादशवर्षं कृतवान्। **स ह—समावर्तयति**। स्वाध्यायार्थिन इतरान् ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्तयन् तं ब्रह्मविद्यार्थिनं ज्ञात्वा, चिरसेवामन्तरेण ब्रह्मविद्या नोपदेष्टव्येति मत्वा, तमेव न समावर्तयति स्म।

तं—इति। तपसा तप्तो ब्रह्मचारी **कुशलं** सम्यक् अग्निशुश्रूषां कृतवान्। एतस्य विद्यानुपदेशे तत्परिचरणप्रीता अग्नय एव तव गर्हां कुर्युः। [1]अतो यथा त्वां मा परिप्रवोचन् अग्नयः, तथा **अस्मै** उपकोसलाय विद्यामुपदिशेति तस्य भार्योक्त-

1. अत इत्यादेः तथा इत्यन्तस्य स्थाने 'तस्मात्' इतिपदमात्रम् क.

सत्यकामस्य विद्या प्रागुक्ता। तच्छिष्यस्य ततो विद्याधिगमप्रकारः कश्चिदथोच्यते। अत्राप्यतिशयितशुश्रूषालब्धत्वमुपवर्ण्यते। तत्र सत्यकामः स्वयमेव गोसहस्रवृद्धिपर्यन्तं कालमवधिं कृत्वा वर्षगणं प्रोष्य तावच्छुश्रूषां विधाय त्वरारहितोऽत्यर्थमाचार्यपरतन्त्रः, तस्य कामो यदा तदा विद्यां प्रेप्सितवानासीत्। अतः कृपया ऋषभादिभिः पूर्णमेवोपदिष्टम्। अयं पुनरुपकोसलः अप्रोष्य गुरुकुल एव वर्धमानोऽपि असोढविलम्बः, 'आचार्यः क्षिप्रं कृपां न करोति' इति दूयमानमना एव शुश्रूषां यथावन्निर्वर्तयन्नासेति अग्नयो दयमाना अप्यपूर्णमेवोपदिश्य आचार्यदयापारवाश्यमेवास्य परिकल्पयामासुरिति वैषम्यं वीक्ष्यम्। पूर्ववदस्या अपि अग्निप्राणादित्यादिविषयकत्वादपि तदुत्तरमेतदुक्तिः संगतेति ध्येयम्।

स्मेति प्रथममपि भूतकालद्योतकम; **समावर्तयन्नि**त्युक्तक्रियान्वयि। अस्तु वाऽन्यपरम्। **न समावर्तयति स्मे**ति। अन्येषामिव स्वाध्यायग्रहणमासीदेव। समावर्तनं तु न कृतम्, ब्रह्मविद्यार्थीति ज्ञात्वेति। एवं क्षिप्रं विद्यामधिगम्य गन्तव्यमिति शुश्रूषायां विशेषभोग्यतावैकल्यमस्य शङ्कित्वेत्यपि स्यात्। **तप्त** इति तपोवैशिष्ट्यमिव विद्यानधिगमप्रयुक्तमनस्तापोऽपि कथ्यते।

गर्हामिति। **परिप्रवोचन्**निति परिवादो विवक्षित इति भावः। **परि**र्लक्षणार्थकोऽपि स्यात्। त्वां लक्षयित्वा अग्नयः स्वयं **प्रब्रूयुः** प्रवचनं कुर्युरित्यर्थः इति। इदानीं त्वं नोपदिशसि

ह्यस्मा' इति। तस्मै हाप्रोच्यैव प्रवासांचक्रे ॥ २ ॥

स ह व्याधिनाऽनशितुं दध्रे। तमाचार्यजायोवाच—ब्रह्मचारिन्! अशान; किं नु नाश्नासीति[1]। स होवाच — बहव इमेऽस्मिन् पुरुषे कामाः नानात्ययाः। व्याधिभिः प्रतिपूर्णोऽस्मि; नाशिष्यामीति ॥ ३ ॥

अथ हाग्नयः समूदिरे—तप्तो ब्रह्मचारी कुशलं नः [2]पर्यचारीत्। हन्तास्मै प्रब्रवामेति।

1. इतिशब्दो नास्ति माध्वग्रन्थे। 2. परिचचारीत् मा. पर्यचारीत् शां.

क्तीत्यर्थः। तस्मै—चक्रे। एवं जाययोक्तोऽप्याचार्यः तस्य विद्यामनुपदिश्यैव देशान्तरं प्रोषितः।

स ह—दध्रे। स उपकोसलो व्याधिना मानसेन दुःखेन पीडितस्सन् अनशनायावतस्थे[1]। धृङ् अवस्थाने इति हि धातुः। तं—इति। अशान भुङ्क्ष्वेत्यर्थः। शिष्टस्य स्पष्टोऽर्थः। स—इति। सः ब्रह्मचारी, 'अस्मिन् जीवे ब्रह्मप्राप्तिव्यतिरिक्ताः काम्यमाना विषयाः नानात्ययाः नानाविधगर्भजन्मजरामरणादिलक्षणफलजनकाः मनसि विपरिवर्तमानाः सन्ति। अतः तद्विषयभयरूपव्याधिभिः पूर्णोऽस्मि। अतो न भुञ्जे' इति प्रत्युवाचेत्यर्थः।

अथ—समूदिरे। एतद्वाक्यं श्रुत्वा [1]परिचरणप्रीताः गार्हपत्यादयोऽग्नयो दयमानमानसाः संभूयोक्तवन्तः। किमिति। तप्तो—प्रब्रवामेति। हन्तेत्यनुकम्पायाम्। प्रब्रवाम। ब्रह्मेति शेषः। शिष्टस्य स्पष्टोऽर्थः।

1. अवतस्थे इत्यत्र मतिं चक्रे इति ख. अवस्थितः इति क.

चेत्, विलम्बमसहमानाः तव च प्रवृत्तिमाधित्सवोऽग्नयः 'आचार्यस्तु ते गतिं वक्ते'ति त्वां लक्षयन्तः स्वयमुपदेशे प्रवर्तेरन् इति अभिज्ञायाः पतिव्रताया अभ्यूहः। बहव इमे पुरुषे कामा नानात्यया इति। विद्याधिकारसंपत्त्यनुगुणं सम्यगेव प्राचामत्र व्याख्यानम्। परन्तु वाक्यसरणिरियं अस्य विद्याकर्मसमृद्धगृहस्थाश्रमशीघ्रप्रवेशचिन्तावैयाकुलीमप्याविष्कुर्यात्। प्रतिपूर्णत्वम् एकैकव्याधिनाऽपि पूर्णत्वम्। नाशिष्यामीति। अनेनानशनं शीघ्रफलसिद्धिकृदिति ज्ञायते। समूदिरे इत्यात्मनेपदम्, "व्यक्तवाचां समुच्चारणे" इत्यनुशासनात् संभूयवचनविशेषे। अग्नयो व्यक्तवाचो भूत्वा संभूय त्वुपदिदिक्षुरिति।

तस्मै होचुः — ॥ ४ ॥ प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ।

स होवाच, 'विजानाम्यहं यत् प्राणो ब्रह्म ; कं च तु खं च न विजानामी'ति ।

तस्मै होचुः । तस्मै उपकोसलायाग्नयो वक्ष्यमाणमूचुरित्यर्थः । तदेवाह **प्राणो—ब्रह्मेति** ।

स होवाच । एवमुक्तः स उपकोसल उवाच । **विजानामि—न विजानामीति** अस्यायमभिप्रायः—'न तावत् प्राणादिप्रतीकोपासनमग्निभिरभिधीयते, जन्मजरामरणादिभवभयभीतस्य मुमुक्षोर्मोक्षोपदेशाय प्रवृत्तत्वात् । अतो ब्रह्मैवोपास्यमुपदिष्टम् । तत्र प्राणादिभिः समानाधिकरणं ब्रह्म निर्दिष्टम् । तत्र सकलजगत्प्राणयितृत्वयोगेन प्राणशब्दितत्वस्य ब्रह्मण उपपन्नत्वात्, **यत् प्राणो ब्रह्मेत्युक्तम्**, तत् जानामि । **कं ब्रह्म खं ब्रह्मेत्युक्तं** तु न विजानामि । यद्यपि **कं**शब्दस्य सुखमर्थः—, **खमित्यस्य** चाऽऽकाशोऽर्थः । ततश्च वैषयिकसुखशरीरकमाकाशशरीरकञ्च ब्रह्मेत्यभिप्रायः? उत **कमित्यनेन** सुखमभिधीयते, **खमित्यनेनाकाशवाचिना** अपरिच्छिन्नत्वमभिधीयते । तयोरन्योन्यविशेषणविशेष्यभावे अपरिच्छिन्नसुखं ब्रह्मेत्यपि अर्थो(ति अस्यार्थो) लभ्यते । ततश्चानयोर्मध्ये कस्मिन्नर्थे (कार्थे) तात्पर्यमिति न जाने'—इति ।

प्राणयितृत्वयोगेनेति । **श्रीभाष्ये** प्राणशरीरकत्वरूपार्थस्याप्युक्तत्वेऽपि सकृत्प्रयुक्तशब्दस्यार्थद्वयपरत्वायोगादेकतरार्थस्य ग्राह्यत्वे प्राणवायुग्राहकानन्यथासिद्धलिङ्गाभावात्, सर्वप्राणयितृत्वरूपार्थसंभवे प्राणप्राणयितृत्वरूपसंकुचितार्थग्रहणायोगाच्च एतन्मात्रमादृतम् । भाष्ये तु पूर्वविद्यासु सर्वत्र मुख्यप्राणप्रस्तावात् उपस्थिततदर्थाभङ्गाय सोऽप्यर्थो दर्शितः । इहाप्यग्निविद्यायां, 'प्राण आकाश' इति मुख्यप्राणप्रस्तावात्, 'प्राणो ब्रह्म' इत्यत्र योगार्थग्रहणेऽपि न मुख्यप्राणानुगमभङ्ग इति उपनिषद्भाष्याशयः ।

यद्यपीत्यस्य प्रतिसंबन्धि तथापीतिपदं **खमित्यस्ये**त्यतः प्राक् पूरणीयम् । **अर्थो लभ्यत** इति । 'यः, स'इति शेषः । तत्र **उतेत्ये**तदन्वेति । ननु खं कं ब्रह्मेत्यनुक्त्वा, **कं ब्रह्म खं ब्रह्मेति** ब्रह्मपदावृत्तिकरणात् पृथग्भूतार्थविवक्षाप्रतीतेः अपरिच्छिन्नसुखरूपं ब्रह्मेति एकीकृतार्थलाभः ततः कथमिति चेत्—उच्यते । प्राणशब्दे योगव्युत्पत्तेः स्पष्टं प्रतीतेः जगत्प्राणयितृत्वग्रहणमुपपन्नम् । **क**शब्दस्य सुखसामान्यवाचित्वात् सर्वस्यापि सुखस्य ब्रह्मपदसामानाधिकरण्यसंभवात् वैषयिकसुखात्मत्वं किं ध्येयम्, उत निरतिशयानन्दसारतया तद्रूपत्वम् । **ख**शब्दस्य चाकाशवाचितया

ते होचुः, 'यद्वाव कम्, तदेव खम्; यदेव खम्, तदेव क'मिति। प्राणं च हास्मै तदाकाशं चोचुः।

इति चतुर्थाध्याये दशमः खण्डः।

ते—कमिति। तदभिप्रायज्ञा अमयः, **'कं खमित्यनयोर्विशेषणविशेष्यभावोऽभिप्रेत'** इति स्वाभिप्रायमुक्तवन्त इत्यर्थः। ननु **यद्वाव कं तदेव खमित्यनेन** विशेष्यविशेषणभावप्रतिपादनेन अपरिच्छिन्नसुखं ब्रह्मेत्यस्यार्थस्य लाभात्, **यदेव खं तदेव कमिति** पुनः उक्तिर्व्यर्थेति चेन्न—दार्ढ्यार्थं वा, अपरिच्छिन्नसुखत्वेन सुखरूपापरिच्छिन्नत्वेन चोपासनासिद्ध्यर्थं वा परस्परविशेषणविशेष्यभावोपदेशसार्थक्यात्।

प्राणश्च—चोचुः। [अतः] जगत्प्राणयितृत्वेन प्राणत्वविशिष्टं यद् ब्रह्म, तदेवापरिच्छिन्नसुखरूपञ्चेत्यमय उक्तवन्त इत्यर्थः। ४—१०.

आकाशान्तर्यामित्वं किमुच्यते, उत व्योमवदपरिच्छिन्नत्वमित्येवोपकोसलजिज्ञासा। एवं **कखशब्दयोर्जलेन्द्रियाद्यनेकार्थरूढत्वादपि** अनिर्धारणाज्जिज्ञासा। एवं जिज्ञासायां **यद्वावेत्यादिकमभिमिरुक्तम्**। तत्र **तदेव खमित्यनेन खशब्दस्येह** नाकाशादिरर्थः; नापि ब्रह्मगतापरिच्छिन्नत्वम्, ब्रह्मशब्दादेव तल्लाभात्। किन्तु कशब्दार्थसुखगतापरिच्छिन्नत्वमिति ज्ञापितम्। **तदेव कमित्यनेन** च कशब्दस्य न वैषयिकसुखादिरर्थः। किन्तु यदपरिच्छिन्नं तदेव तद्गतं सुखमिति ज्ञापितम्। एवं तदुपपादनवशात् विशेषणविशेष्यभावोऽनेन गृहीत इत्युक्तौ नानुपपत्तिः। एवं अपरिच्छिन्नानन्दविशिष्टब्रह्मप्रतिपादनपरैरभिमिः **कं ब्रह्मेति** स्वोक्तैकवाक्यताद्योतकखरविशेषेण **खं ब्रह्मेति** प्रयुक्तं स्यात्। तत्स्वरश्रवणबलात् विशेषणविशेष्यभावः किं विवक्षित इति जिज्ञासितवान् इत्युक्तिरपि घटते। नन्वेवं विशेष्यविशेषणभावे विवक्षिते किमिति **खं कं ब्रह्मेत्येवाभिमिर्नोपदिष्टमिति चेत्**—**'बहव इमेऽस्मिन् पुरुषे कामाः'** इति वैषयिकसुखविरक्तस्योपकोसलस्य **ब्रह्मप्रकारतयाऽपि वैषयिकसुखध्याने** भीतिरस्तीति तद्वैराग्यविशेषावधारणार्थम्, उभयविधोपासनलाभार्थञ्च। **सुखरूपेति। अयं भावः**—कत्वमत्रोक्तं सुखविशिष्टस्वरूपम्। अत एव, **'सुखविशिष्टमिधा-**

४—११.

अथ हैनं गार्हपत्योऽनुशशास — 'पृथिव्यग्निरन्नमादित्य' इति। य एष आदित्ये पुरुषो दृश्यते, सोऽहमस्मि; स एवाहमस्मीति ॥ १ ॥

एवं ब्रह्मोपदिश्य अग्निभिरेतद्विद्याङ्गभूता अग्निविद्याऽप्युपदिष्टेत्याह— **अथ —शशास**। 'जगत्प्राणयितृ अपरिच्छिन्नसुखरूपञ्च ब्रह्म' इत्युपदिश्य, एवमुपदिष्टब्रह्मविद्यमेनमुपकोसलं गार्हपत्योऽग्निः स्वविद्यां वक्ष्यमाणामुपदिदेशेत्यर्थः। **अथ**शब्दश्च प्रकृतविषयत्वद्योतनार्थः। अत्र च (अतश्च?) **अथैन**मितिशब्दाभ्यां वक्ष्यमाणाग्निविद्यायाः प्रकृतब्रह्मविद्याङ्गत्वमुच्यते। अनुशासनप्रकारमेवाह—**पृथिवी —इति**। मे गार्हपत्याग्नेः एताः चतस्रः तनव इत्यर्थः। **य—इति**। पृथिव्यन्यन्नादित्यलक्षणानां चतुर्णां रूपाणां मध्ये अग्न्यादित्यरूपयोः पक्तृत्वप्रकाशकत्वरूपधर्मसंबन्धादैक्यम्। अग्नेरादित्येन यादृशमैक्यम्, न तादृशमैक्यं पृथिव्यन्नाभ्याम्। तस्मादादित्य एवाहमस्मि इत्यग्निरुवाचेत्यर्थः।

नादेव चे'ति सूत्रेऽपि विशिष्टपदम्। तत्र विशिष्टान्वयिविधेयस्य विशेषणेऽप्यन्वयस्यौत्सर्गिकत्वात् सुखेऽप्यपरिच्छेदलाभः प्रथमोक्तौ। तथा, नास्य परमात्मनः, विभुजीववादिमते देहमात्रावच्छेदेनेव अव्याप्यवृत्तिसुखवैशिष्ट्यम्, किन्त्वपरिच्छिन्नस्वस्वरूपकात्स्न्र्येनेति सूचनं अपरिच्छिन्ने सुखविशिष्टवोक्तिरूप पुनरुक्तिफलमिति।

चतस्रस्तनव इति। पृथिव्यादीनां गार्हपत्यतनुत्वमप्रत्यक्षम्। अथापि आदित्यवर्तिपुरुषाभेदस्य गार्हपत्ये उक्त्या आदित्यस्य तनुत्वे सिद्धे तत्प्रायपाठात् पृथिव्यादीनामपि तनुत्वसिद्धिरिति भावः। एवमग्नेऽपि।

सोऽहमस्मीत्युक्तार्थस्य स एवाहमस्मीति पुनर्वचनं किमर्थमित्यत्र शाङ्करोक्तं विशेषं किञ्चिद्रूपेण दर्शयति **पृथिव्यग्नी**त्यादिना। पुनः कथनम् आदित्यैक्यवत् पृथिव्याद्यैक्यं स्वस्मिन् न भवतीत्यर्थस्य **एव**कारेण ज्ञापनायेति भावः। अत्र पृथिव्यग्निरित्यत्र अग्निपदं न गार्हपत्यमात्रपरम्, अविशेषेण सर्वग्रहणस्यैवोचितत्वात्। स्वस्यैव स्वतनुत्वापेक्षया स्वभिन्नाग्नीनां स्वतनुत्वस्योचितत्वाच्च। उपरि अन्वाहार्यपचनाहवनीययोः तत्तद्रूपचतुष्टये त्रयत्यागेन एकान्तिमरूपवर्तिपुरुषाभेदवत् अत्रापि त्रयत्यागेन अन्तिमादित्यान्तर्वर्तिपुरुषाभेदः कथ्यते **सोऽहमस्मी**ति। तस्य कथितस्य **स एवाहमस्मी**ति पुनःकथनं चतुष्टये चतुर्थैक्यवत् अन्यत्रयैक्यं न भवतीति ज्ञापनार्थमिति वाच्यम्। तदत्र न युज्यते; गार्हपत्ये अत्तृत्वपक्तृत्वाभ्यामग्न्यैक्यस्यापि स्थित-

स य एतमेवं विद्वानुपास्ते, अपहते पापकृत्याम्; लोकी भवति; सर्वमायुरेति; ज्योग् जीवति; नास्यावरपुरुषाः क्षीयन्ते। उप

स—क्षीयन्ते। एतदुपासकः ब्रह्मप्राप्तिविरोधि पापं कर्मापहन्ति। **लोकी भवति**। तद्विरोधिनि पापे निरस्ते ब्रह्मलोकं प्राप्नोतीत्यर्थः। यद्यपि ब्रह्मप्राप्तिविरोधिपापनिवृत्तेः ब्रह्मप्राप्तेश्च प्रधानभूतब्रह्मविद्याफलत्वमेव—तथापि अङ्गफलेन अङ्गं स्तूयत इति द्रष्टव्यम्। यद्वा पापशब्दो ब्रह्मविद्योत्पत्तिप्रतिबन्धकपापपरः। लोकशब्दो ब्रह्मलोकप्राप्तिमार्गभूताग्निलोकपरो द्रष्टव्यः। **सर्वमायुरेति**। ब्रह्मोपासनसमाप्तेः यावत् आयुरपेक्षितम्, तत् सर्वमेति। **ज्योक् जीवति**। व्याध्यादिभिरनुपहतो यावद्ब्रह्मप्राप्ति उज्ज्वलो जीवति। **नास्यावरपुरुषाः क्षीयन्ते**। अस्य शिष्यप्रशिष्यादयः पुत्रपौत्रादयोऽपि न क्षीयन्ते। ब्रह्मविद एव भवन्तीत्यर्थः। संततौ ब्रह्मविद्यानुवृत्तेः, 'नास्याब्रह्मवित् कुले भवति' इति श्रुत्यन्तरे ब्रह्मविद्याफलत्वेन श्रवणात्। **उप—उपास्ते**। य एवमुपास्ते, तमस्मिंश्च लोके अमुष्मिंश्च

त्वात्। तस्मात् पृथिव्यन्नैक्याभावमात्रपरमिदं वाक्यमित्याशयेन **अग्न्यादित्यरूपयोरित्यादिकमुक्तमिति** ध्येयम्।

अग्निफलेनाङ्गस्तुतिरित्युक्तं शाङ्करानुसारेण। साक्षात् स्वफलविवक्षयाऽपि व्याख्याति **यद्वेति**। **इदं** श्रीभाष्यानारूढमपि न तदननुमतम्; **अङ्गफलाविरुद्धं फलमत्रोक्तमित्यत्रैव** श्रीभाष्यनैर्मर्यादस्यापि प्राह्यत्वात्। **अग्निलोकपरमिति**। नन्वग्निलोकोऽर्चिरादिमार्गे प्रथमः। स च ब्रह्मविद्ययैव लभ्यत इति किमनयाऽग्निविद्ययेति चेन्न - 'उप वयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च' इति फलवर्णनात्, यस्यैतज्जन्मनि ब्रह्मविद्या न निष्पन्ना, तमग्निविद्यानुष्ठाने सति अमयः तत्प्रतिबन्धकपापनिवर्तनेन स्वलोकं प्रापय्य तत्र ब्रह्मविद्यानिष्पत्त्युपयोगि तद्रक्षणं विदधतीत्याशयात्। एवं **लोकीभवती**त्यस्य विद्यापेक्षितपरिकरसंपन्नो भवतीत्यप्यर्थः संभवति। लोक्यत इति लोकः (परिकरः परिजनश्च)। अत एव, 'लोकान् वाव किल ते सोम्यावोचन्' इति अग्रे वक्ष्यमाणमपि संगतम्। लोकादिफलप्राप्तिप्रतिबन्धककतिपयपापनिवर्तनमात्रेण तत्प्राप्तिमात्रं हि तैरुक्तम्। **अहं तु**, यथा सर्वपापापहतिः स्यात्—न केवलं सर्वपूर्वपापापहतिः, उत्तरपापाश्लेषोऽपि **यथा स्यात्**, तं प्रकारं **वक्ष्यामी**ति वक्ष्यमाणवाक्यार्थः।

वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च, य एतमेवं विद्वानुपास्ते ॥ २॥

इति चतुर्थाध्याये एकादशः खण्डः ।

४—१२.

अथ हैनमन्वाहार्यपचनोऽनुशशास—आपो दिशो नक्षत्राणि चन्द्रमा इति । य एष चन्द्रमसि पुरुषो दृश्यते, सोऽहमस्मि; स एवाहमस्मीति । (१)

स य एतमेवं विद्वानुपास्ते, अपहते पापकृत्याम्; लोकी भवति; सर्वमायुरेति; ज्योग् जीवति; नास्यावरपुरुषाः क्षीयन्ते । उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च, य एतमेवं विद्वानुपास्ते । (२)

इति चतुर्थाध्याये द्वादशः खण्डः

४—१३.

अथ हैनमाहवनीयोऽनुशशास—प्राण आकाशो द्यौर्विद्युदिति । य एष विद्युति पुरुषो दृश्यते, सोऽहमस्मि; स एवाहमस्मीति । (१)

स य एतमेवं विद्वानुपास्ते, अपहते पापकृत्याम्; लोकी भवति; सर्वमायुरेति; ज्योग् जीवति; नास्यावरपुरुषाः क्षीयन्ते । उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च, य एतमेवं विद्वानुपास्ते । (३)

इति चतुर्थाध्याये त्रयोदशः खण्डः

लोके **वयं** अन्नयः **उपभुञ्जामः** यावद्ब्रह्मप्राप्ति विघ्नेभ्यः परिपालयाम **इत्यर्थः**[1] । एवमुत्तरत्रापि द्रष्टव्यम् । ४—११.

अथ—शशास । अन्वाहार्यपचनः दक्षिणाग्निः । **आपो—इति** । आपो दिशो नक्षत्राणि चन्द्रमा इति मे रूपाणीत्यर्थः । **य—अस्मीति** । [2]चन्द्रमसश्चाग्नेश्च प्रकाशकत्वसाम्यादिति भावः । ४—१२.

अथ हैनमाहवनीयः—उपास्ते । विद्युत्पुरुषस्यापि प्रकाशकत्वादाहवनीयैक्यम् । ४—१३.

1. एतदुपरि, 'भुजपालनाभ्यवहारयोः । अनवने इत्यात्मनेपदम् । प्रकृते अवनरूपत्वात् परस्मैपदम्' इति **क.** 2. चन्द्रस्याग्नेश्च **ख.**

४—१४.

ते होचुः — उपकोसल! एषा सोम्य तेऽस्मद्विद्या चात्मविद्या च। अचार्यस्तु ते गतिं वक्तेति।

आजगाम हास्याचार्यः। तमाचार्येऽभ्युवाद, उपकोसला ३ इति। भगव इति ह प्रतिशुश्राव। ब्रह्मविद इव सोम्य ते मुखं भाति। को नु त्वाऽनुशशासेति। को नु माऽनुशिष्याद् भो इती[1] (?) हापेव निह्नुते,

1. इतीहापेव निह्नुते शां. इतीहावेव निह्नुतः मा. (इहेति मनुष्यलोकस्थ उच्यते। अवेति पातालस्थः। मानुषासुरौभगवन्तं निह्नुत एवेति माध्वव्याख्या)। अत्र भाष्ये पूर्ववाक्यव्याख्यानावसरे इहेति पदं प्रयुक्तम्। अत्र (हेतिभेदे) इति कतिपयकोश पाठः।

ते होचुः—वक्तेति। प्रत्येकमनुशासनानन्तरं मिलित्वा तेऽग्नयोऽब्रुवन्। **अस्मद्विद्या** अग्निविद्या। **आत्मविद्या** परमात्मविद्येत्यर्थः। **चशब्दोऽङ्गाङ्गिभूतविद्ययोरुपदेशक्रियायां समुच्चयद्योतनार्थः।** अग्निविद्या चात्मविद्या चोपदिष्टेत्यर्थः। **आचार्यस्तु ते गतिं वक्तेति।** एवं वदतामग्नीनामयमभिप्रायः—हे उपकोसल! ब्रह्मविद्यामनुपदिश्य प्रोषुषि[1] गुरौ तदलाभादनाश्वांसं [2]त्वांमुज्जीवयितुं ब्रह्मस्वरूपमात्रं तदङ्गभूतामग्निविद्याञ्चोपादिक्षाम। आचार्यादेव[3] विदिताया विद्यायाः साधिष्ठत्वात् आचार्य एव संयद्वामत्वादिगुणकं ब्रह्म, अक्षिरूपं च तदुपासनस्थानम्, अर्चिरादिकाञ्च गतिमुपदिशतु—इति। ततश्च **गतिं वक्तेत्यस्यावशिष्टं वक्तेत्यर्थः।** न तु गतिमात्रमिति द्रष्टव्यम्।

आजगाम—इति। स्पष्टोऽर्थः **ब्रह्मविद इव—अनुशशासेति** [1]गुरुणैवमुक्तः शिष्य आह—**को नु माऽनु—निह्नुते।** हे भगवन्! त्वयि प्रोषिते इह मां कोऽनुशिष्यादित्यर्थः। **अपेव निह्नुते।** ([3]**हापेवनिह्नुते।** हेतिभेदे)। अपनिह्नुत इवेत्यर्थः।

1. प्रोषिते. क. 2. अयं घ पाठः। अन्यत्र अनाश्वासमिति। 3. आचार्यादैव ख. 3. एवकारो न ख. 4. कुण्डलितं क कोशे न, शारीरकशास्त्रार्थदीपिकायामिव।

अनाश्वांसमिति। भावप्रकाशिकायां, 'उपेयिवाननाश्वान् —' इति नञ्पूर्वादश्नातेः अनाश्वानिति रूपम्। अभुक्तवन्तमित्यर्थ इति श्रीभाष्यस्थमिदं पदं व्याख्यातम्। 'स ह व्याधिनाऽनशितुं दध्रे', 'व्याधिभिः प्रतिपूर्णोऽस्मि, नाशिष्यामी'त्यर्थग्रहणमिदम्। **ब्रह्मस्वरूपमात्रमिति।** मात्रपदेन आचार्यव्यतिरिक्ताद् ब्रह्मग्रहणेऽपि ब्रह्मविद्याग्रहणमाचार्यादेव कार्यमिति गम्यते।

अपेव निह्नुते। इवकारः निह्नुवानपुरुषवाक्यतुल्यमिदं वाक्यं न निह्नवाभिप्रायकम्; किन्तु अनुशासनमिदं न मनुष्यान्तरमूलकम्। यदप्यवगतम्, तदपि न पर्याप्तमित्याशयादिति ज्ञापनार्थः।

इमे नूनमीदृशा अन्यादृशा इति[1] हाग्नीन् अभ्यूदे । किं नु सोम्य किल तेऽवोचन् इति। इदमिति ह प्रतिजज्ञे। लोकान् वाव किल सोम्य तेऽवोचन्। अहं तु ते तद् वक्ष्यामि, यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवंविदि पापं कर्म न श्लिष्यत इति। ब्रवीतु मे भगवानिति। तस्मै होवाच—३

इति चतुर्थाध्याये चतुर्दशः खण्डः

४—१५.

य एषोऽक्षिणि पुरुषो दृश्यते, एष आत्मेति होवाच, एतदमृत-

1. इतीदृशां. मा.

नापनिह्नुते; न यथावत्, 'अग्निभिक्तम्' इत्यपि ब्रवीतीत्यभिप्रायः। कञ्चित् कालमपह्नुत्य, अथाग्नीन् निर्दिश्य, इम एव नूनमुपदिष्टवन्त [1]इत्युक्तवानित्याह—**इमे—अभ्यूदे**। ये इदानीमीदृशाः ज्वलनाकारतया परिदृश्यमानाः, एत एवाग्नयः पूर्वमन्याकारास्सन्तो ममोपदिष्टवन्त इत्युक्तवानित्यर्थः। आचार्य आह **किं नु—अवोचन्** इति। इतर आह **इदम्। इति ह प्रतिजज्ञे**। एतावदुपदिष्टमिति प्रतिज्ञातवान्। इतर आह **लोकान्—इति**। हे सोम्य! **ते** अग्नयः पृथिव्यादीन् लोकानेव [2]कात्स्न्र्येन] तवोक्तवन्तः। [3अङ्गभूतामग्निविद्यां कात्स्न्र्येनोक्तवन्त इत्यर्थः।] न तु ज्ञातव्यं ब्रह्म कात्स्न्र्येन। अहं तु ते पद्मपत्रजलाश्लेषतुल्यसर्वपापाश्लेषापादकविद्याविषयभूतं ब्रह्म वक्ष्यामि, यदि शुश्रूषसे इत्यर्थः। पापाश्लेषो नाम पापहेतुभूतकर्माचरणेऽपि पापोत्पत्तिप्रतिबन्धकशक्तिमत्त्वम्। इदञ्च प्रामादिकपापविषयम्। पापशब्दश्च सुकृतदुष्कृतसाधारणः। एतच्च तत्रतत्रोक्तं तत्रैवानुसंधेयम्। इतर आह **ब्रवीतु मे भगवानिति**। **तस्मै होवाच**। **तस्मै** एवमुपसन्नायोपकोसलाय आचार्यो वक्ष्यमाणमाहेत्यर्थः॥ ४—१४.

य एषोऽक्षिणि — ब्रह्मेति। योगिभिर्योऽक्ष्यन्तर्वर्ती पुरुषो दृश्यते, अयमेव[4] आत्मा नियन्तेत्यर्थः। **अमृतत्वं** निरतिशयभोग्यत्वम्। **अभयत्वं**

1. उपदिष्टवन्त इत्याह ख. 2-3. कुण्डलितं न क. कोशे। 4. एवकारो न ख. कोशे.

अभ्यूदे अभिमुखीकरणेन उवाच; प्रदर्श्योवाचेत्यर्थः। 'भाषनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः' इतीहात्मनेपदम्।

पुष्करेति। मदुक्ष्यमाणदेवतास्थानमपि हि श्लेषासहमिति भावः।

मभयम्,[1] एतद् ब्रह्मेति । तद् यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति, वर्त्मनी[2] ह्येव गच्छति (१) ।

एतँ संयद्वाम इत्याचक्षते । एतँ हि सर्वाणि वामान्यभिसंयन्ति । सर्वाण्येनं वामान्यभिसंयन्ति, य एवं वेद (२) ।

एष उ एव वामनीः[3] । एष हि सर्वाणि वामानि नयति । सर्वाणि वामानि नयति, य एवं वेद । (३)

एष उ एव भामनीः[4] । एष हि सर्वेषु लोकेषु भाति । सर्वेषु लोकेषु भाति, य एवं वेद । (४)

1. एतद्ब्रह्म एतस्मिन् न किञ्चनश्लिष्यति तद् यद्यपीति **मा.** 2. वर्त्मनी एव **शां.मा.** 3. वामनिः **मा.** 4. भामनिः **मा.**

दुःखासंभिन्नत्वम् । **ब्रह्मत्वं** निरतिशयबृहत्त्वम् । **तत्—गच्छति** । **तत्** तस्मात् निर्लेपस्थानिप्रभावात्, अस्मिन् अक्षिणि यद्यपि सर्पिर्वा उदकं वा कश्चित् सिञ्चेत्, तत् **वर्त्मनी** तत्पार्श्वद्वयमेव [हि] गच्छति । न [1]तत्र लिप्यते ।

एतं—आचक्षते । **संयन्ति** संगतानि **वामानि** वननीयानि प्रार्थनीयानि यस्मिन् स **संयद्वामः** । सर्वकल्याणगुणाश्रयत्वं सत्यसंकल्पत्वं वा संयद्वामत्वम् । **सर्वाण्येनं—वेद** । तदुपासकस्यापि तत्क्रतुन्यायात् तद्वत्वीत्यर्थः । **एष—वेद** । **वामनीत्वं** स्वाश्रितेषु शोभन[धी]प्रापकत्वम् । तत्क्रतुन्यायेन तद्गुणोपासकस्यापि तद् भवतीत्यर्थः । **एष—वेद** । **भामनीत्वं** सर्वलोकव्याप्तदीप्तिमद्विग्रहयुक्तत्वम् । उपासकस्यापि तद् भवति अपेक्षायामित्यर्थः । अत्र, 'संयद्वामत्ववामनीत्वभामनीत्वेषु फलकथनं फलरूपतात्पर्यलिङ्गोपन्यासेन तेषु गुणेषु तात्पर्यप्रदर्शनार्थम्, न तु **सर्पिर्वोदकं वा सिञ्चति** । इत्यत्रेवार्थवादमात्रतया स्तुतिरूपत्वम्' इति प्रदर्शनार्थं **सर्पिर्वेति** वाक्यस्य स्तुतित्वं व्यासार्यैरुक्तम् (१–२–१३.) ।

1. तत् तत्र. **ख.**

एतद् ब्रह्मेति । अग्निभिरुपदिष्टं यद् ब्रह्म तत् एवंभूतम् । इदमक्षिस्थानमात्मत्वादि च तस्येति भाव्यमिति यावत् । ब्रह्मण्यमृतत्वाभयत्वाद्युपवर्ण्य उपासितुरपहतपाप्मत्वादिलाभ उक्तः । अथ तस्य सत्यकामत्वादिगुणातिशयलाभ उच्यते **एतमित्यादिना** ।

अथ यदु चैवास्मिन् शव्यं कुर्वन्ति, यदु(दि)[1] च न, अर्चिषमेवाभिसंभवन्ति; अर्चिषोऽहः; अह्न आपूर्यमाणपक्षम्; आपूर्यमाणपक्षाद् यान् षडुदङ् एति मासाँ स्तान्; मासेभ्यः संवथ्सरम्; संवथ्सरादादित्यम्; आदित्याच्चन्द्रमसम्; चन्द्रमसो विद्युतम्; तत्पुरुषोऽमानवः (५); स एनान् ब्रह्म गमयति। एष देवपथो ब्रह्मपथः। एतेन प्रतिपद्यमाना इमं

1. यदि च शां यदु च मा.

अथ—गमयति। अथशब्दः प्रकृतविषयत्वद्योतनार्थः। **अस्मिन्** ब्रह्मविदि। सामान्याभिप्रायत्वादस्यैकवचनस्य, उत्तरत्र **अभिसंभवन्ती**ति बहुवचनेन न विरोधः। **यत्** यदि **शव्यं** शवदहनादिकर्म पुत्रादयः कुर्वन्ति, यदि वा न कुर्वन्ति, सर्वथाऽपि ते अर्चिषमेवाभिसंभवन्ति। **अर्चिरादि**शब्दाश्च, 'आतिवाहिकास्तल्लिङ्गात्' इति न्यायेन तदभिमानिदेवतापरा इति अन्यत्र स्थितम्।

अत्र केचित् — 'उपकोसलविद्याङ्गभूताग्निविद्यावैभवेन, शवदहनादिवैगुण्येऽपि, उपकोसलविद्यानिष्ठस्य न क्षतिः। विद्यान्तरनिष्ठस्य दहनादिवैगुण्ये किञ्चिद् वैगुण्यमस्ती'ति वदन्ति। तन्न—'न कर्मणा लिप्यते' इति श्रुतिसिद्धार्थानुवादित्वादस्य वाक्यस्यैतादृशार्थप्रत्यायकत्वाभावात्। अतः **अथ यदु चैवास्मिन्** इत्येतत् सर्वब्रह्मवित्साधारणमेव।

यान् षडुदङ्डेति मासांस्तान्। यान् षट् मासान् **उदक्** उत्तरदिशायां आदित्य एति, तान् मासानित्यर्थः। शिष्टं स्पष्टम्। **एष—नावर्तन्ते**। देवैरातिवाहिकैर्नीयमानः पन्थाः **देवपथः**। ब्रह्मप्रापकः पन्थाः **ब्रह्मपथः**। एतेन

न कर्मणा लिप्यत इति। अयं भावः। देहवियोगकाल एव सर्वसुकृतदुष्कृतविधूननं सांपरायाधिकरणसिद्धम्। अतो न निष्पन्नविद्यस्य प्रेतभावस्य तत्परिहारककर्मप्रतीक्षणस्य च प्रसक्तिः। कार्यान्तरशून्यं सूक्ष्मदेहं विद्याबलादर्चिरादिगतये उपादाय मूर्धन्यनाड्या निष्क्रम्यार्चिरादिप्रवेश एव हि सर्वस्य विदुषस्तत्राधिकरणे उक्तः। सद्विद्यायाश्च, यावन्न विमोक्ष्ये, अथ संपत्स्य इति एतच्छरीरपातमात्रविलम्बो वेदितः। दहरविद्यायामपि 'अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य'ति ल्यपा स्वारस्यादविलम्बो दर्शितः। तत्रैव, 'नोपजनं स्मरन्निदं शरीरम्' इति बन्धुजनपरिवृते सत्येव स्वत्यक्तशरीरे, तदस्मरणसहचरितं परमपदे जक्षणादि वर्णितम्। तत्रैव (८.५) 'तमभित आसीना आहुः जानासि मां जानासि मामिति स यावदस्माच्छरीरा-

मानवमावर्तं नावर्तन्ते नावर्तन्ते ॥ ६ ॥

इति चतुर्थाध्याये पञ्चदशः खण्डः

मार्गेण प्रतिपद्यमाना **इमं** घोरं **मानवमावर्तं** घटीयन्त्रवत् जननमरणाद्यावर्तकं (णप्रापकं) मनुष्यादिशरीरोपलक्षितं संसारं **नाऽऽवर्न्तते** पुनर्न प्रतिपद्यन्ते। द्विरुक्तिर्विद्यासमाप्त्यर्था। अत्र च यत् किञ्चिद् वक्तव्यमुत्तरत्र वक्ष्यते।

(I) अत्र पञ्चाग्निविद्यायामुपकोसलविद्यायाञ्च अर्चिरादिगतेः पाठात्, यस्यां विद्यायामर्चिरादिगतिः श्रूयते, तन्निष्ठानामेवार्चिरादिगत्या ब्रह्मप्राप्तिः; नान्येषाम्। न च, 'तद् य इत्थं विदुः, ये चेमेऽरण्ये श्रद्धा तप इत्युपासते', 'श्रद्धां सत्यमुपासते' इति सर्वब्रह्मविद्यासाधारण्यं श्रुतमिति वाच्यम्—तथासति उपकोसलविद्यायामर्चिरादिगतिश्रुतिवैयर्थ्यप्रसङ्गात् इति पूर्वपक्षे प्राप्ते—उच्यते—

'अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्'। **सर्वेषां** सर्वोपासननिष्ठानामर्चिरादिमार्गेणैव गन्तव्यत्वात् एतद्विद्यानिष्ठानामेवेति नियमो नास्ति। तथा हि नियमे सति 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते', 'श्रद्धां सत्यमुपासते',

'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥'

इति श्रुतिस्मृतिभ्यां विरोधप्रसङ्गः। उपकोसलविद्यायां पुनरान्नानं तु, 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' इति पञ्चाग्निविद्याप्राप्तसर्वब्रह्मविद्यासाधारणार्चिरादिगतेरपुनरावृत्तिविधानार्थमनुवाद इति स्थितम्।

(२) उपकोसलविद्यायाः परमात्मविद्यात्वञ्च, 'अन्तर उपपत्तेः' इत्यत्र स्थितम्। तथा हि—, 'य एषोऽक्षिणि पुरुषो दृश्यते' इति निर्दिश्यमानः प्रतिबिम्बात्मा;

दनुत्क्रान्तो भवति, तावज्जानाति। अथ यत्रैतदस्माच्छरीरादुत्क्रामति, अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते। स ओमिति वाह। उद्वा मीयते। स यावत् क्षिप्येन्मनः, तावदादित्यं गच्छति' इति उत्क्रान्तिसमनन्तरमतिवेगादादित्यमण्डलप्राप्तिरुक्ता। एवं बहु द्रष्टव्यम्। अतः श्रव्यानपेक्षा सर्वविद्यासाधारणीति।

प्रसिद्धवन्निर्देशात्। दृश्यत इति अपरोक्षाभिधानाच्च। जीवो वा स्यात्। चक्षुषि तस्य विशेषेण संनिधानात् प्रसिद्धिरुपपद्यते। उन्मीलितचक्षुरुद्वीक्षणेन जीवस्य स्थितिगतिनिश्चयात्, 'दृश्यत' इत्युक्तिरुपपद्यते। [[1]चक्षुःप्रतिष्ठितत्वेन श्रुतिप्रसिद्धो देवताविशेषो वा।?] न तु परमात्मा। तस्यानाधारत्वात्, अदृश्यत्वाच्च। न च आत्मत्वामृतत्वाभयत्वब्रह्मत्वादिविरोधः। 'एष आत्मेति होवाच' इति इतिकरणेन, 'मनो ब्रह्मेत्युपासीत' इतिवत् [2]अर्थाविवक्षाया दर्शितत्वात् इत्येवं प्राप्ते—

अभिधीयते—'अन्तर उपपत्तेः'। अक्ष्यन्तरः परमात्मा। तस्यैवात्मत्वामृतत्वसंयद्वामत्ववामनीत्वभामनीत्वादिधर्माणामुपपत्तेः। न च इतिकरणेन तेषामविवक्षा शङ्क्या—यत्र उच्यमानस्यार्थस्याप्त[3]वचनसंबन्धः प्रतिपाद्यः, तत्र इतिशब्दो नार्थविवक्षां वारयति, यथा—'इति ह स्मोपाध्यायः कथयति' इति। तस्मादिहामृतत्वादीनामाचार्यवचनसंबन्धस्य प्रतिपाद्यत्वात् इतिशब्दः, 'मनो ब्रह्मेति' इत्यादाविव [4]नार्थविवक्षावारकः। ततश्च स्वाभाविकामृतत्वादीनां जीवेऽसंभवात्, तथा प्रतिबिम्बे, 'रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः' इति चक्षुःप्रतिष्ठितत्वेन श्रुतिप्रसिद्धादित्यरूपदेवताविशेषे चासंभवात् परमात्मैव [5]अत्राक्ष्यन्तर्वर्ती।

यदुक्तम् — निराधारस्य परमात्मनः चक्षुरवस्थितिर्न संभवति — इति, तत्राह — 'स्थानादिव्यपदेशाच्च'। 'यश्चक्षुषि तिष्ठन्' इत्यादावन्तर्यामिब्राह्मणे चक्षुषि स्थितिनियमनादेः परमात्मधर्मतया श्रवणात्, योगिदृश्यतया, 'दृश्यत' इत्यस्मोपपत्तेश्चाक्ष्यन्तर्वर्तिनः परमात्मत्वे नानुपपत्तिः।

'सुखविशिष्टाभिधानादेव च'। 'कं ब्रह्म खं ब्रह्म' इत्यपरिच्छिन्नत्वविशिष्टसुखरूपस्य अग्निभिरुपदिष्टस्य ब्रह्मण एव, 'य एषोऽक्षिणि पुरुषो दृश्यते' इति वाक्ये प्रकृतपरामर्शिना 'य एष' इति सर्वत्राम्नाऽभिधीयमानत्वाच्च। न च तद् ब्रह्म

1. इदं कुण्डलितं भाष्यानुसारात् सिद्धान्ते विकृत्य कथनानुसाराच्च संग्रहेण कल्पितम्। 2. पदार्थाविवक्षायाः ख. पदार्थोविवक्षया ग. 3. आत्मवचन ग. 4. अयं 2. पाठवत् शारीरकशास्त्रार्थदीपिकानुसारी क. पाठः। ख. ग. पाठस्तु 'नाविविक्षाकारकः' इति। 5. अत्रेत्यधिकं क.

अग्निविद्यया व्यवहितमिति वाच्यम्—अग्निविद्याया अपि ब्रह्मविद्याङ्गत्वेन, 'न हि स्वाङ्गम्' इति न्यायेनाव्यवधायकत्वात्। तदङ्गत्वञ्च तत्प्रकरणमध्यपातात्; 'अथ हैनं गार्हपत्योऽनुशशास' इति ब्रह्मविद्याधिकृतस्यैवाग्निविद्योपदेश इति प्रतिपादनात्; ब्रह्मविद्योपयुक्तफलव्यतिरिक्तफलान्तराश्रवणाच्च।

ननु, 'कं ब्रह्म खं ब्रह्म' इति वाक्येन अपरिच्छिन्नसुखरूपं ब्रह्मेति नोपदिश्यते; अपितु, 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इति त्रिभिर्वाक्यैः मुख्यप्राणे, [1]लौकिकसुखे, आकाशे च ब्रह्मदृष्टिर्विधीयते। तत्राह — 'अत एव च स ब्रह्म'। अत एव अपरिच्छिन्नसुखस्य ब्रह्मत्वाभिधानादेव अपरिच्छिन्नसुखरूपं ब्रह्मैवात्र प्रतिपाद्यते; नाब्रह्मणि ब्रह्मदृष्टिः। अब्रह्मभूतेषु मुख्यप्राणलौकिकसुखाकाशेषु ब्रह्मदृष्टिविधिरूपत्वे तत्रानुपपत्तेरे[2]वाभावेन, 'विजानाम्यहं यत् प्राणो ब्रह्म कञ्च तु खञ्च न विजानामि' इति प्रश्नस्य, 'यद्वाव कं तदेव खं यदेव खं तदेव कम्' इति प्रतिवचनस्य चासंगतत्वापत्तेः। तदसंगतिप्रकारश्च प्रागेव वर्णितः।

इतश्च परं ब्रह्म — 'श्रुतोपनिषत्कगत्यभिधानाच्च'। श्रुतोपनिषत्कस्य अधिगतपरमपुरुषयाथात्म्यस्य अनुसंधेयतया श्रुत्यन्तर[3]प्रतिपाद्यमाना अर्चिरादिका गतिर्या, तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीम् उपकोसलायाक्षिपुरुषं श्रुतवते, 'अथ यदु चैवास्मिन् शव्यं कुर्वन्ति' इत्यादिना आचार्य उपदिशति। अतोऽप्ययमक्षिपुरुषः परमात्मा। 'अनवस्थितेरसंभवाच्च नेतरः' प्रतिबिम्बादीनामक्षिणि नियमेनानवस्थानात् अमृतत्वादीनाञ्च निरुपाधिकानां तेष्वसंभवात् न परमात्मेतरः छायादिरक्षिपुरुषो भवितुमर्हतीति स्थितम्॥ प्रकृतमनुसरामः। ४—१५.

1. वैषयिक क. 2. एवकारो न ख. 3. प्रतीयमाना ख.

न हीति। 'न हि स्वाङ्गं स्वव्यवधायकम्' इति न्यायः। अत एव प्रयाजानुयाजादीनां क्रमेण विहितानामपि एकदर्शाद्यङ्गता। अन्यथा एकव्यवहितत्वादन्यदनङ्गं स्यादिति।

४—१६.

एष ह वै यज्ञो योऽयं पवते । एष[1] ह यन् इदँ सर्वं पुनाति । यदेष[2] ह यन्निदँ सर्वं पुनाति, तस्मादेष एव यज्ञः ।

1. एष यन् मा 2. यदेष यन् शां.. मा.

रहस्यप्रकरणे प्रसङ्गादारण्यकत्वसाम्याच्च यज्ञे क्षते उत्पन्ने व्याहृतयः प्रायश्चित्तार्थं होममन्त्रतया विधातव्याः । 'तदभिज्ञस्यैव ब्रह्मत्वलक्षणमार्त्विज्यम् । तस्य च ब्रह्मणो मौनमावश्यकम्' इत्येवमादिविध्यर्थमिदमारभ्यते — **एष** —**पवते** । योऽयं पवते वायुः, स एव यज्ञ इत्यर्थः । कथं वायोर्यज्ञत्वमित्यत्राऽऽह **एष ह यन्**—**पुनाति** । वायुर्हि गच्छन् सर्वं पुनाति । वर्षवातातपैर्वस्तुशुद्धिः स्मृतिप्रसिद्धा । **यन् पुनाती**ति पदद्वयगतयोः यकारनकारयोः यज्ञशब्दे प्रत्यभिज्ञानात्, अकारस्य नकारविकारत्वात् यज्ञशब्दस्य यन् पुनातीति निर्वचनं [1]वायाविति भावः । उक्तमेवोपसंहरति **यदेष**—**यज्ञः** ।

1. वायौ इत्यधिकं क.

ननु ब्रह्मोपदेशरूपायामुपनिषदि यज्ञलोपपरिहारकप्रायश्चित्तविशेषाणां परब्रह्मगन्धविधुराणां कुतो निरूपणमित्यत्र सङ्गतिमाह **रहस्ये**ति । उपनिषद्धि रहस्यार्थोपदेशिका । वक्ष्यमाणप्रायश्चित्तादेरपि **रहस्यत्वात्** प्रसक्तिरासीदिति भावः । संगत्यन्तरं ब्रह्मप्रतिपादकभागानामिव अस्य श्रुतिभागस्याप्यारण्यकत्वम् । अस्य पञ्चम्यन्तद्वयस्य **आरभ्यत** इत्यत्रान्वयः । किमत्रोच्यमानमित्यत्र विवृणोति **यज्ञे क्षत** इत्यादिना । एवमाशयमेव तु शाङ्करावतरणवाक्यं स्वयं सङ्गतिचतुष्टयपरतया व्याचख्यावानन्दगिरिः । तदुक्तार्थस्तु—**रहस्यमुपासनम्** । तत्प्रकरणे तत्फलप्राप्त्यर्थार्चिरादिमार्गप्रसङ्गात् अत्रोक्तयज्ञशब्दयौगिकार्थविशेषस्य यज्ञसमाप्तिमार्गस्य चोपस्थितिरित्येका । आरण्यकत्वं द्वितीया । अग्निविद्या पूर्वमुक्ता; इह अग्निसंबन्धियज्ञप्रायश्चित्तादुत्युक्तिरिति तृतीया । ब्रह्मोपासनं मौनसाध्यम्; ब्रह्मर्त्विजोऽपि मौनं तत उपस्थितमिति चतुर्थीति । तस्य व्याख्यानस्य समञ्जसत्वे अनेकसंगतिलाभात् अस्यापि ग्रन्थस्य तथैव व्याख्यानं भाव्यम् । **प्रसङ्गा**दिति पदेनान्योऽपि प्रसङ्गः सुवचः । एतावत्पर्यन्तं वायुप्राणसंबन्धिविद्यानामेव निरूपणं कृतम् । उपकोसलविद्यायामपि, 'प्राणो ब्रह्म कं ब्रह्म', 'प्राण आकाशो द्यौर्विद्युत्' इति प्राणवायुप्रस्तावात् । अतः सर्वत्र वायोरनुकर्षात् वायुविषययज्ञभावनारूपदृष्टिविध्यन्तरं प्रसक्तमिति ।

वायुः स एव यज्ञ इति । अत्र वायोर्यज्ञत्वे बहुश्रुत्युदाहरणं कृतं शाङ्करे । 'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते' इति आदित्यसमीपगमने वायुरपि सहकारीत्यपि ध्येयम् ।

तस्य मनश्च वाक् च वर्तनी । (१)

तयोरन्यतरां मनसा संस्करोति ब्रह्मा; वाचा होताऽध्वर्युरुद्गाताऽन्यतराम् ।

स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यव[1]दति (२), अन्यतरामेव वर्तनीं [2]संस्कुर्वन्ति; हीयतेऽन्यतरा ।

1. व्यववदति शां. व्यपवदति मा. 2. वर्तनिं मा.

एवं यज्ञस्य वायोश्चाभेदप्रतिपादनेन यज्ञस्य गन्तृत्वं संपाद्य गन्तुर्यज्ञस्य मार्गमाह **तस्य—वर्तनी** । प्रवृत्तिसाधनभूतो वाङ्मनसमयो[1] मार्ग इति यावत् । **तयोः—अन्यतराम्** । यज्ञस्य मनोलक्षणमार्गं मनसा प्रणिहितेन ब्रह्मा संस्करोति । होत्राद्याः त्रयोऽपि वाचैव सम्यक् प्रयुक्तया वाचं संस्कुर्वन्तीत्यर्थः ।

स यत्र—अन्यतरा । व्यवदति । [2]अत्र क्षेपार्थो नञ् । 'नञो नलोपस्तिङि क्षेपे' इति नलोपः । **यत्र** यज्ञे प्रातरनुवाकशस्त्रे **उपाकृते** आरब्धे सति परिधानीयायाः ऋचः **प्राक् ब्रह्मा व्यवदति** — **वि**शब्दो विविधार्थः । नञश्च निन्दितत्वमर्थः—विविधं निन्दितञ्च वदति । मौनं त्यजति चेदित्यर्थः । तदा मनःप्राणिधानस्य [3]मौशेन मनोलक्षणयज्ञवर्तनीसंस्कारकस्य ब्रह्ममनसोऽभावात् एषा वर्तनी नश्यति । होत्रादिवाक्संस्कार्या वाङ्मूपा यज्ञवर्तनी परम् आस्ते इत्यर्थः ।

1. वाङ्मनसयोः क. ग. 2 अयं घ. पाठः । ख. कोशे 'क्षेपार्थो नञो नलोपः । 'नञिङ्क्षेपे' इति निन्दायां नलोपः' इति । ग. कोशे, 'क्षेपार्थो 'नञो नलोपस्तिङि क्षेपे' इति नलोपः' इति । क. कोशे—'नञ् क्षेपार्थे । अकारपूर्वस्य नकारस्य लोपे अवदतीति व्यवसन्नम् । विशब्दो विविधार्थकः । अकारश्च क्षेपार्थकः । विविधं निन्दितञ्च वदतीत्यर्थः इति । विशब्द इत्यादिकं किञ्चिदुपरि ख. ग. कोशयोः । 3. भंशे ग.

वाङ्मनसमयो मार्ग इति। अत्र **वर्तनी**शब्दस्य ईकारान्ततया प्रथमैकवचनान्तरूपत्वे उपरि **तयो**रित्यस्य मनोवाचोरित्यर्थसंभवेऽपि वर्तन्योरित्यर्थायोगात् अन्यतरामिति स्त्रीलिङ्गपदद्वयनिर्देशो नातीव युक्त इति **वर्तनी** इति द्विवचनान्तमुचितम् । उपरि **उभे एव वर्तनी** इति प्रयोगात् । अन्यतरामेव वर्तनीमिति अत्रैव प्रयोगात् शब्दोऽयमीकारान्त एव, न तु इकारान्त इति यदि चिन्त्यते, तर्हि, 'छान्दसो द्विवचनस्य लुक्' इति वक्ष्यमाणरीतिरत्रापि स्यात् । माध्वास्तु सर्वत्र वर्तनिशब्दमेव इकारान्तं पठन्ति ।

स यथा एकपाद् व्रजन्, रथो वैकेन चक्रेण वर्तमानो रिष्यति—एवमस्य यज्ञो रिष्यति; यज्ञं रिष्यन्तं यजमानोऽनु रिष्यति; स इष्ट्वा पापीयान् भवति। (३)

अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा [1]व्यवदति, उभे एव वर्तनी सँस्कुर्वन्ति; न हीयतेऽन्यतरा (४)। स यथोभयपाद् व्रजन्, रथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठति—एवमस्य यज्ञः प्रतितिष्ठति; यज्ञं प्रतितिष्ठन्तं यजमानोऽनु प्रतितिष्ठति; स इष्ट्वा श्रेयान् भवति। (५) इति चतुर्थाध्याये षोडशः खण्डः

४—१७.

प्रजापतिर्लोकानभ्यतपत्। तेषां तप्यमानानाँ रसान् प्राबृहत्—

1. व्यवदति शां. व्यपवदति मा.

तर्हि को दोष इत्यत्राऽऽह—**स यथा—भवति**। गच्छन् एकपात् पुरुषो वा एकेन चक्रेण प्रवर्तमानो रथो वा यथा **रिष्यति** नश्यति, **एवमस्य** यजमानस्य यज्ञो नश्यति। विगुणो भवतीति यावत्। तस्मिन् नष्टे यजमानोऽपि नष्टफलः पापी च भवतीत्यर्थः।

अथ यत्र—अन्यतरा। न व्यवदतीति संबन्धः। **उभे एव वर्तनी** इत्यत्र वर्तन्याविति वक्तव्ये, 'सुपां सु लुक्' इति छान्दसो लुक्। शिष्टं स्पष्टम्। **स यथा—श्रेयान् भवति। यज्ञः प्रतितिष्ठति**। साद्गुण्यवान् भवतीत्यर्थः। **यजमानः प्रतितिष्ठति**। लब्धफलो भवतीत्यर्थः। शिष्टं स्पष्टम्॥ ४—१६.

तत्र यज्ञभ्रंशे[1] व्याहृतिहोमः प्रायश्चित्तमिति वक्तुं प्रस्तौति—**प्रजापतिर्लोकानभ्यतपत्**। लोकसारजिघृक्षया लोकान् उद्दिश्याऽतपत्। तप आलोचने। आलोचनरूपं ज्ञानं कृतवानित्यर्थः। **तेषां—। प्राबृहत्** उद्धृतवान्। जग्राहेत्यर्थः।

1. भ्रंशे ग

यज्ञस्य गन्तृत्वं नाम सर्वाङ्गोपसंहारपर्यन्तं विततत्वम्। संपूर्यमाणत्वमिति यावत्। मनसो वाचश्च वर्तन्योर्मध्ये ब्रह्मनसः संस्कारो मौनमुक्तम्। अथानन्तरखण्डे होत्रादीनामृग्वेदादिपराणां वाचः संस्कारः कर्मलोपप्रसक्तिवारकं यथावदध्ययनम्। तल्लोपेन तत्तद्वेदसंबन्धिलोपप्रसङ्गे च प्रायश्चित्ताहुतय उच्यन्ते।

अग्निं पृथिव्याः; वायुमन्तरिक्षात्; आदित्यं दिवः। (१)

स एतास्तिस्रो देवता अभ्यतपत्। तासां तप्यमानानाँ रसान् प्राबृहत्—अग्नेः ऋचः; वायोर्यजूँषि; सामान्यादित्यात्। (२)

स एतां त्रयीं विद्यामभ्यतपत्। तस्यास्तप्यमानाया रसान् प्राबृहत्—भूरिति ऋग्भ्यः, भुवरिति यजुर्भ्यः; [1]सुवरिति सामभ्यः। (३)

'तद् यदृक्तो रिष्येत्, भूः स्वाहेति गार्हपत्ये जुहुयात्। ऋचामेव तद्रसेन ऋचां वीर्येण ऋचां यज्ञस्य विरिष्टँ[2] संदधाति। (४)

अथ यदि यजुष्टो रिष्येत्, भुवः स्वाहेति दक्षिणाग्नौ जुहुयात्, यजुषामेव तद्रसेन यजुषां वीर्येण यजुषां यज्ञस्य विरिष्टँ[2] संदधाति। (५)

अथ यदि सामतो रिष्येत्, सुवः[1] स्वाहेत्याहवनीये जुहुयात्। साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टँ[2] संदधाति। (६)

1. स्वः. शां. मा. 2. विरिष्टिं मा.

अग्निं—दिवः। लोकान् आलोच्य त्रिलोक्याः अग्निवाय्वादित्याः सारभूता इति निश्चिकायेत्यर्थः। एवमुत्तरत्रापि।

स—आदित्यात्। अग्निवाय्वादित्यसारतया त्रयीं निश्चितवानित्यर्थः। स एतां—सामभ्यः। त्रयीसारतया व्याहृतित्रयं निरचिनोदित्यर्थः। शिष्टं स्पष्टम्।

तत्—जुहुयात्। तत् तस्माद्धेतोः ऋक्तः ऋचो निमित्तात् यदि यज्ञो रिष्येत् क्षतं प्राप्नुयादित्यर्थः। तर्हि तत्प्रायश्चित्तार्थं भूस्स्वाहेतिमन्त्रेण गार्हपत्येऽग्नौ जुहुयादित्यर्थः। ऋचामेव—संदधाति। यत् ऋचां ऋक्संबन्धि, तद् विरिष्टं तत् यज्ञस्य क्षतं ऋचां वीर्येणौजसा ऋचां रसेन [1सारभूतेन च] भूरितिव्याहृत्या संदधाति समाधत्ते इत्यर्थः।

अथ—संदधाति[2]। अथ—संदधाति। [3]पूर्ववदर्थः।

1. इदं ख. कोशे। 2. यजुष्टः यजुषो निमित्तात्। पूर्ववदर्थः इत्यधिकं ख. 3. आहवनीये अग्नौ इत्यधिकं ख.

तद् यथा लवणेन सुवर्णँ संदध्यात् सुवर्णेन रजतँ रजतेन त्रपु त्रपुणा सीसँ सीसेन लोहं लोहेन दारु दारुचर्मणा (७), एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्येण यज्ञस्य विरिष्टँ[1] संदधाति। भेषजकृतो ह वा एष यज्ञः, यत्रैवंवित् ब्रह्मा भवति। (८)

1. विरिष्टिं मा.

तद् यथा—दारुचर्मणा। सुवर्णस्य संधानं नाम कठिनस्य[1] मृदुतापादनम्। (क्षारद्रव्य) क्षाररसस्य संपर्कपूर्वकतापेन हि सुवर्णस्य परस्परसंधानयोग्यमृदुता भवतीत्यर्थः। शिष्टं स्पष्टम्। **एवं—संदधाति।** व्याहृतीनां पृथिव्यादिलोकसारभूताग्न्यादिदेवतासारभूतत्रयीसारत्वात् तद्वीर्यत्वाच्च एषां उक्तानां वीर्येण **एवं** सुवर्णादिसंधानवदेव यज्ञक्षतं समाहितं भवतीत्यर्थः।

भेषज—भवति। यस्मिन् यज्ञे एवंवित् ब्रह्मनामा ऋत्विक् भवति, स यज्ञः कृतभेषजः कृतौषधः, समीचीनेन चिकित्सकेन यथा रोगार्तः पुमान् कृतभेषजो भवति, तथेत्यर्थः।

1. खरस्य ख.

तद् यथा लवणेनेत्यादि। नन्वत्र लवणेन सुवर्णं संदध्यात्। रजतं सुवर्णेन संदध्यात्। त्रपु रजतेन संदध्यादित्येवं तृतीयान्तानां क्रमेणोपर्यन्वयः शाङ्करादीष्टः। लवणवत् सुवर्णादीनां संधानकरणद्रव्यत्वनियमाभावात् रजतादेरपि क्षारद्रव्यसंपर्कपूर्वकतापेनैव मृदुत्वस्य संपाद्यत्वात् सुवर्णं सुवर्णेन संदध्याल्लवणेन, एवं रजतं रजतेनेति रीत्याऽर्थवर्णनं संभवति। लोहवत् चर्मापि दारुद्वयसंधायकं चेत्, लोहेन चर्मणा वा दारु इति सकृद् दारुशब्दः प्रयुज्येत। अतः दारुचर्मणेति एकं पदं सत्, दारुणोः वर्षातपादिकृतजरापरिहाराय वा अन्यार्थं वा तत्र संधेयं यत् द्रव्यम्, तत्परं स्यात्। दारुत्वक् च पाट्यमाना रज्जुतया रज्जुप्रकृतिद्रव्यतया चोपयुज्यत इति ततो दारुबन्धनमिति वाऽस्तु। एवञ्च प्राचीनयोजनास्वारस्यं किम्। भाष्ये संधानं मृदुत्वापादनमित्युक्तम्, लवणस्य तावन्मात्रकरत्वेपि **सुवर्णेने**त्यादिषु संधानं हि संयोजनमेव। तेषां मृदुत्वकरत्वाभावात्। अतो भाष्याभिमतोऽर्थश्च क इति चेत्—मूले **वीर्येणे**ति तृतीयया संधानकरणस्य, **विरिष्टि**मित्येकेन पदेन विच्छिन्नस्य चोक्त्या तद्वदत्र तृतीयान्तं करणपरम्। सुवर्णमित्येवमेकं पदमेव संधेयपरम्। रजतादिनिकृष्टलोहसंधानाय सुवर्णाद्युत्कृष्टलोहप्रक्षेपे केनचित् कृते यावद् दार्ढ्यम्, तावदत्रेदृशवीर्यकृतसंधाने इति स्तुतये एवमुक्तिः। तथाच लवणेन सुवर्णादि द्रवीकृत्य तेन द्रवीभूतेन रजतादेः संधानवदिति विवक्षितम्। लोहेन दारु दारुचर्मणेत्यस्य च लोहपट्टरज्जुबन्धनयोः समुच्चयेनान्यतरेण वा दारुद्वयसंधानवदित्यर्थो भवितुमर्हति। दारुचर्मेत्येकमेव पदमिति स्यादिति।

एष ह वा उदक्प्रवणो यज्ञः, यत्रैवंविद् ब्रह्मा भवति । एवंविदं ह वा एषा ब्रह्माणमनु गाथा—

यतो यत आवर्तते तत्तद् गच्छति (९) मानवः ।
ब्रह्मैवैक ऋत्विक् कुरूनश्वाऽभिरक्षति ॥
एवंविद्ध वै ब्रह्मा यज्ञं यजमानँ सर्वाँश्चर्त्विजोऽभिरक्षति ।

1. एकर्त्विक् ? मा.

एष—भवति । उदक्प्रवणः [1]उत्तरमार्गप्रतिपत्तिहेतुरित्यर्थः । **एवंविदं—गाथा** । एवंविदं ब्रह्मनामानमृत्विजमनुगता **एषा** वक्ष्यमाणा गाथा भवतीत्यर्थः ।

यतो यतः—मानवः । यत्रयत्र यज्ञस्य क्षत**मावर्तते आ** समन्ताद् व्याप्य वर्तते, **आ** ईषद्वा वर्तते,—[2]तत् सर्वं **मानवः** मननशीलो ब्रह्मा **गच्छति** समाधत्त इत्यर्थः । **ब्रह्मैवैक—रक्षति । अश्वा** बडबा आरूढान् योधान्[3] यथा रक्षति, एवमेक एव ब्रह्मा **ऋत्विक् कुरून्** कर्तॄन् ऋत्विजो रक्षति ।

एवंविद्ध—रक्षति । अत्र ब्रह्मणो वेदनेन 'यजमानादीनामृत्विजाञ्च रक्षण-प्रतिपादनेन उद्गातृप्रभृतीनां वेदनानियमः सूच्यते इति, 'अङ्गेषु यथाश्रयभावः'

1. अर्चिरादिमासोत्तर क. 2. 'तत्सर्वं गच्छति समाधत्त इत्यथः । क इत्यत्राह **मानव** इति । **मानवः** मननशीलः ब्रह्माख्य ऋत्विगित्यर्थः' ख. 3. योद्धॄन् क. 4. यजमानानां क.

उदक्प्रवणः । उदङ्निम्नः दक्षिणोच्छ्रायः । उत्तरमार्गप्रतिपत्तिहेतुरित्यर्थ इति शाङ्करम् । **उदक्** ऊर्ध्वलोकः । तत्प्रवणत्वं तद्धेतुत्वमिति माध्वव्याख्या ।

गाथेत्युक्तत्वात् **यत** इत्यारभ्य **रक्षती**त्यन्तं गाथानुवादः । तत्र **मानव** इत्यन्तं पूर्वार्धम् । एवञ्च **गच्छती**त्यत्र मानवः कर्ता स्वरसलब्धः । मानवपदं मनुष्यपरतयैव प्रसिद्धमपि, **ब्रह्माणमनु गाथा** इति ब्रह्मविषयकत्वज्ञापनात् तदुचितं व्याख्येयम् । अतो मननशील इति व्याख्याय मानवपदमात्रस्य गच्छतीत्यत्र, ब्रह्मेत्यादेश्चोत्तरार्धगतत्वात् रक्षतीत्यत्रान्वयं कृत्वा व्याख्याति **यत्रयत्रे**त्यादिना । गाथायां तृतीयपादे प्रतिपदमक्षरद्वयमिति अष्टाक्षरता ।

वेदनानियमः सूच्यत इति । ननु उद्गातृप्रभृतीनां वेदनं तावत्, 'यदेव विद्यया करोति' इत्यादिवशात् वीर्यवत्तरत्वादिहेतुः । ब्रह्मवेदनञ्च प्रायश्चित्ताहुतिमन्त्रविषयकत्वात् प्रायश्चित्तानुष्ठापनेन अङ्गवैकल्यपरिहारद्वारा यज्ञसादगुण्यमात्रहेतुः । अतश्च ब्रह्मवेदनं क्रतोर्यथावन्निष्पत्तिहेतुभूतं उद्गात्रादिवेदनस्य निष्पन्नक्रत्वाश्रितगुणफलरूपवीर्यवत्तरत्वादिहेतोरनियमापादकं कथमिति चेत्—उक्तं 'दर्शयति चे'ति सूत्रे **व्यासार्यैः**, 'अत्रोक्तं यजमानसंरक्षणं क्रतुफलाप्रतिबन्धकरणादिभिरिति मन्तव्यम्' इति । **नयमयूखमालिकादि**कमपि द्रष्टव्यम् । **इदं तु बोध्यम्**—अस्य, 'एष ह वै' इत्यादिखण्डद्वयस्य केवलब्रह्मवर्तव्यकर्मविशेषमात्रपरत्वे उपनिषदि

तस्मादेवंविदमेव ब्रह्माणं कुर्वीत, नानेवंविदम्, नानेवंविदम्॥

इति चतुर्थाध्याये सप्तदशः खण्डः

इति छान्दोग्योपनिषदि चतुर्थाध्यायः (चतुर्थः प्रपाठकः)।

इत्यधिकरणे [दर्शनाच्चेति] सूत्रितम्। [1]उक्तब्रह्मवेदनस्तुतिं प्रयोजनेनोपसंहरति **तस्मात्—नानेवंविदम्**। द्विरुक्तिरध्याय[2] समाप्त्यर्था॥ ४—१७.

इति छान्दोग्योपनिषत्प्रकाशिकायां चतुर्थोऽध्यायः (चतुर्थः प्रपाठकः)।

---

1. एतदादि **ग.** कोशे न। 2. विद्यासमाप्त्यर्था **ख.**

नातीव संगतिः। द्वितीयाध्यायान्तिमखण्डे केवलकर्मोक्तिश्च तृतीयाध्यायवक्ष्यमाणमधुविद्योपास्य वसुरुद्रादित्यविषयत्वात् कथञ्चित् सङ्गता। 'एष ह वै यज्ञो योऽयं पवते' इत्युपक्रमवाक्यस्य च केवलस्तुतिपरत्वापेक्षया वायुत्वभावनापरत्वं युक्तम्। एवं यज्ञशब्दस्य, 'यन् जगत् पुनाति' इति निर्वचनमपि भावनार्थम्। पूर्वमुपकोसलविद्यायां, 'इमं मानवमावर्तं नावर्तन्ते' इत्युक्तस्य, इह, 'यतो यत आवर्तते तत्तद् गच्छति मानवः' इत्यस्य च कश्चित् संबन्धः प्रतीयते। यतोयत इति पञ्चमी, स्वरसात्। आवृत्तिपदार्थोऽपि मुख्यो ग्राह्यः। 'उदक्प्रवणशब्दश्चार्चिरादिरूपोत्तरदिग्वर्तिदेवयानविषयको लक्ष्यते। तस्मात् एवं वक्तव्यम्—मनोवाग्रूपवर्तनीद्वयं तद्वैकल्यप्रयुक्तगमनवैकल्यं व्याहृतीनां लोकत्रयरसभूतदेवत्रयरसात्मक वेदत्रयरसरूपत्वं तत्करणकहोमानां यज्ञविरिष्टसंधानात्मत्वञ्चोपवर्ण्य अपेक्षितफलहेतुत्वं यज्ञस्येदृशस्येति सूचयित्वा, 'एष ह वा उदक्प्रवणो यज्ञ' इत्यादिना कश्चिद्विशेष उच्यते—यत्र हि ब्रह्मा यथावत् यज्ञसमापनमात्रेऽनुपरम्य यज्ञस्य पवनत्वं यज्ञशब्दनिर्वचनमुपर्युक्तप्रकारांश्च विदन् उद्गात्रादिकार्यवेदनान्तरतुल्येदृशवेदनविशेषशाली भवति; स यज्ञो न धूमादिमार्गमात्रप्रतिपत्तिहेतुः, किन्तु उदक्प्रवणः उत्तरगतिरूपदेवयानप्रापकविद्यापेक्षितक्रतुवीर्यवत्तरत्वपावनत्वादिहेतुः। तदुक्तं गाथायाम्—लोके मानवः ऐश्वर्यं नानालोकात्मकं यज्ञफलमनुभूय मानव एव भविष्यन् ततस्तत आवर्तमानोऽस्ति। एकस्तु ऋत्विक् ब्रह्मा उद्गात्रादिनिरपेक्ष एव स्ववेदनविशेषेण तं कर्तारं मानवमन्यांश्च कर्तॄन् ऋत्विजो यज्ञञ्च रक्षति। अनावृत्तिकामियजमानयज्ञापेक्षितसर्ववेदनविशेषप्रतिनिधिभूतेदृशवेदनवत्त्वादिति। तस्मात् सर्वर्त्विक्संपाद्यतावद्वेदनफलस्य ब्रह्मवेदनत एव संभवात् एवंविदमेव ब्रह्माणं कुर्वीत अमुमुक्षुरिव मुमुक्षुरपि यजमानः। तत्र यज्ञरक्षणमङ्गवैकल्यपरिहरणम्। यजमानरक्षणं तदपेक्षितक्रतुवीर्यवत्तरत्वाद्यधिकफलसंपादनम्। ऋत्विग्रक्षणम् विद्यावैकल्यप्रयुक्तर्त्विग्वरणभङ्गवारणम्। अविद्वांसोऽपि हि ऋत्विजो वरीतुं पार्यन्ते, ब्रह्मकर्तृकवेदनत एवार्थसिद्धेरिति। एवं प्रघट्टकार्थवर्णने, 'दर्शयति च' इतिसूत्रश्रीभाष्यमपि उद्गात्रादिवेदनानियमवेदकं सूपपन्नं लक्ष्यत इति।

अथ पञ्चमाध्यायः ५—१.

यो ह वै ज्येष्ठश्च श्रेष्ठश्च वेद, ज्येष्ठश्च ह वै श्रेष्ठश्च भवति। प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥ १ ॥

यो ह वै वसिष्ठं वेद, वसिष्ठो ह स्वानां भवति। वाग् वाव वसिष्ठः॥२॥

प्राणविद्या प्रस्तूयते **यो ह**—**भवति**। ज्येष्ठत्वश्रेष्ठत्वगुणकं प्राणं यो वेद, स तत्कतुन्यायेन स्वयमपि ज्येष्ठश्च श्रेष्ठश्च भवतीत्यर्थः। **ज्येष्ठत्वं**[1] वृद्धत्वम्, 'वृद्धस्य च' इति वृद्धशब्दस्य ज्यादेशविधानात्। श्रेष्ठत्वं प्रशस्ततमत्वम्; 'प्रशस्यस्य श्रः' इति प्रशस्यशब्दस्य श्रादेशविधानात्। एवं फलप्रदर्शनेन पुरुषमभिमुखीकृत्याऽऽह **प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च**। **वाव**शब्दोऽवधारणार्थः। गर्भस्थपुरुषे प्राणव्यापारप्रवृत्त्यनन्तरभावित्वादिन्द्रियप्रवृत्तेः, प्राणस्येंद्रियापेक्षया ज्यैष्ठ्यम्। इन्द्रियव्यापाराणां सर्वथैतदधीनत्वात् श्रैष्ठ्यञ्च।

यो—**भवति**। **स्वानां** ज्ञातीनां मध्ये वसिष्ठो भवतीत्यर्थः। को वसिष्ठ इत्यत्राऽऽह **वाग्वाव वसिष्ठः**। अतिशयेन वसुमान् वसिष्ठः। वाग्मी हि लोकेऽतिशयेन वसुमान् भवति। अतश्च वसुमत्तासंपादकसव्यवहारजनकत्वं वाचो वसिष्ठत्वमिति भावः।

1. ज्येष्ठत्वञ्च ग.

एतावत् यथाकथञ्चित् वायु-तद्विशेषप्राणसंबन्धिन्यो विद्या उक्ताः। अथ साक्षात् प्राणविद्यैवोच्यते। इयं किञ्चिद्विस्तरेण बृहदारण्यके (८-१.। **वृद्धेति**। ज्येष्ठशब्दः प्रशस्यशब्दस्य वृद्धशब्दस्य च ज्यादेशाद् भवति। श्रेष्ठशब्दस्तु प्रशस्यशब्दस्यैव। अतः श्रेष्ठपदापौनरुक्त्याय ज्येष्ठशब्दस्य वृद्धतमत्वमर्थ इति भावः। ननु प्राणो वायुरूपमहाभूतविकारः पश्चाद्भवः; वागादीनि इन्द्रियाणि तु आहङ्कारिकत्वात् प्राचीनानि। तत् कथं प्राणो ज्येष्ठ इत्यत्राह **गर्भे**ति। **अनन्तरे**ति। आदित एव प्राणनव्यापारात् गर्भो वर्धते। चक्षुरादिव्यापारस्तु चक्षुर्गोलकादिनिष्पत्त्यनन्तरमिति व्यापारविशिष्टेन्द्रियापेक्षया ज्यैष्ठ्यमिति। **वसिष्ठ**मिति पुंस्त्वमविवक्षितम्। 'वसिष्ठां वेद' इति बृहदारण्यके। वसुशब्दात् 'विन्मतोर्लुक्' इति लुकि रूपम्। वसुमत्तमत्वं वसिष्ठत्वम्। स्वानामिति। 'अपि च येषां बुभूषति' इत्यधिकं फलमन्यत्र। स्वपदं, 'स्वमज्ञातिधनाख्ययाम्' इति ज्ञातिवाचित्वादसर्वनाम। **इत्यन्वय** इत्यन्तेन **सा**मित्युपसर्गान्वयो दर्शितः। **आयतन**मिति मनआयत्तत्वात् सर्वेन्द्रियकार्य—स्मृतिस्वप्नोहाद्यशेषात्मगुणानाम्। प्राणनव्यापारस्तु न मनोधीनः, सुषुप्तावपि भावात्। तदत्र, 'वागादयो वसिष्ठत्वादिविशिष्टाः; तद्वसवसिष्ठत्वादिहेतुताप्रयुक्तश्रैष्ठ्यवान् उक्तविधया ज्येष्ठश्च प्राण इत्युपासीतेति पिण्डितार्थः।

यो ह वै प्रतिष्ठां वेद, प्रति ह तिष्ठत्यस्मिँश्च लोकेऽमुष्मिँश्च । चक्षुर्वाव प्रतिष्ठा ॥ ३ ॥

यो ह वै संपदं वेद, सँ हास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च । श्रोत्रं वाव संपत् ॥ ४ ॥

यो ह वा आयतनं वेद, आयतनँ ह स्वानां भवति । मनो ह वा आयतनम् ॥ ५ ॥

अथ ह प्राणा अहँश्रेयसि व्यूदिरे, 'अहँ श्रेयानस्मि, अहँ श्रेया-

---

यो—अमुष्मिंश्च । हशब्दः प्रसिद्धौ । अत्र चामुत्र च **प्रतितिष्ठति** भवतीत्यर्थः । का तर्हि प्रतिष्ठेत्यत्राह **चक्षुर्वाव प्रतिष्ठा** । 'चक्षुषा हि समे दुर्गे च प्रतितिष्ठति' इति बृहदारण्यके [1]समानप्रकरणे श्रवणात् प्रतिष्ठासंपादक समविषमभूतल प्रदर्शकत्वमेव चक्षुषः प्रतिष्ठात्वम् ।

यो—मानुषाश्च । अस्मै उपासकाय कामाः संपद्यन्त इत्यन्वयः[2] । का तर्हि संपदित्यत्राह **श्रोत्रं वाव संपत्** । 'श्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः' इति बृहदारण्यके समानप्रकरणे श्रवणात् संपद्धेतुभूतवेदशास्त्रतदर्थश्रवणादिसंपादकत्वमेव श्रोत्रस्य संपत्त्वम् ।

यो—आयतनम् । स्रक्चन्दनादिविषयज्ञानरूपभोगायतनत्वमेव **मनस आयतनत्वम्** ॥

मुख्यप्राणस्य श्रैष्ठ्यसंपादनायाऽऽख्यायिकामाह **अथ ह—अस्मीति** । **अथशब्द** आख्यायिकोपक्रमे[3] । **अहंश्रेयसि** स्वश्रेयसि निमित्ते विषये वा **व्यूदिरे** अहं श्रेयानस्मि, अहं श्रेयानस्मीति विवादं चक्रुरित्यर्थः । **ते—श्रेष्ठ**

1. नेदं पदं **ख.** कोशे । 2. इत्यर्थः **ग.** 3. आख्यायिकोपक्रमार्था **क. ग.**

अहंश्रेयसि । **अह**मित्यव्ययं प्रत्यगात्मवाचि । **श्रेयः** उत्कर्षः । स्वस्योत्कर्षे इत्यर्थः । अहंश्रेयसे' इति बृहदारण्यकानुसारात् **निमित्ते** इति । स्वारस्यानुरोधात् **विषये** इति । अत्र विवाद पितृसमीपगमनोत्क्रमण प्रवास प्रतिवचनादि सर्वं वागाद्यधिष्ठातृदेवताकर्तृकमिति

नस्मी' ति । ते ह प्राणाः प्रजापतिं पितरमेत्योचुः, 'भगवन्! को नः श्रेष्ठ इति ॥ ६ ॥

तान् होवाच, 'यस्मिन् व उत्क्रान्ते [1]शरीरं पापिष्ठतरमिव दृश्येत, स वः श्रेष्ठ' इति ॥ ७ ॥

सा ह वागुच्चक्राम । सा संवत्सरं प्रोष्य पर्येत्योवाच, 'कथमशकत ऋते मज्जीवितु' मिति । यथा [2]कला अवदन्तः, प्राणन्तः प्राणेन, पश्यन्तश्चक्षुषा, शृण्वन्तः श्रोत्रेण, ध्यायन्तो मनसा – एवमिति । प्रविवेश ह वाक् ॥ ८ ॥

1. इदं शरीरं मा. 2. यथाऽकलाः मा.

इति । स्पष्टोऽर्थः । तान्—वः श्रेष्ठ इति । युष्माकं मध्ये यस्मिन् उत्क्रान्ते शरीरं अतिशयेन पापिष्ठं अतिहेयमिव दृश्येत, स वः श्रेष्ठ इत्युवाचेत्यर्थः ।

सा ह वागुच्चक्राम । सा प्रसिद्धा वाक् स्वश्रैष्ठ्यपरीक्षणाय शरीरादुत्क्रान्तवतीत्यर्थः । सा संवत्सरं—जीवितुमिति । सा वाक् एकं संवत्सरं प्रोष्य प्रवासं कृत्वा पुनरागत्य मदृते मां विना जीवितुं यूयं कथमशकत कथं शक्ता इति इतरान् प्राणान् उक्तवती । इतरे प्राणाः प्रत्यूचुः यथा कलाः — एवमिति । यथा कलाः मूकाः वागिन्द्रियव्यापारहिता अपि इतरैः प्राणैः तत्कार्यं कुर्वन्तो जीवन्ति, एवं वयमप्यजीविष्मेति प्रत्यूचुरित्यर्थः । प्रविवेश ह वाक् ! एवमुक्ता वाक् स्वस्य श्रैष्ठ्यं नास्तीति निश्चित्य देहं प्रविष्टवतीत्यर्थः ।

वक्ष्यते । सेति । मुख्यप्राणव्यापारः पूर्वम् । ततो मनसः, ततो ज्ञानेन्द्रियाणाम्, तत एव कर्मेन्द्रियस्य । एवं सति वाक् स्त्री धार्ष्ट्यात् सर्वप्रथममुच्चक्रामेति विशेषद्योतनाय अत्र परं सेत्यधिकमुक्तम् । वाचो वरं चक्षुः ज्ञानेन्द्रियत्वात् । संनिकृष्टवर्तमानमात्रग्राहिणस्ततो वरं श्रोत्रमतीतानागतव्यवहितादिपरवेदादिशब्दग्राहि । ततो वरं मनः सर्वग्राहि । सर्वकरणप्रवर्तकत्वात् प्राणो वरिष्ठः । प्राणादिपञ्चकमात्रकथनं प्राय उपनिषत्सु प्राधान्यादिति केनादौ दर्शितमेव । बृहदारण्यके तु प्रजननेन्द्रियमपि विवदमानतया गृहीतम् । उच्चक्रामेति । परीक्षार्थमकस्मिन् मनुष्यशरीरे वाग्देवता वागिन्द्रियमनधिष्ठायापगतेत्यर्थः । ध्यायन्त इति । कलाः अव्यक्तवाचः । ध्यानं व्यवहित-

चक्षुर्होच्चक्राम । तत् संवत्सरं प्रोष्य पर्येत्योवाच, 'कथमशकत ऋते मज्जीवितु' मिति । यथा अन्धा अपश्यन्तः, प्राणन्तः प्राणेन, वदन्तो वाचा, शृण्वन्तः श्रोत्रेण, ध्यायन्तो मनसा—एवमिति । प्रविवेश ह चक्षुः ॥ ९ ॥

श्रोत्रँ होच्चक्राम । तत् संवत्सरं प्रोष्य पर्येत्योवाच, 'कथमशकत ऋते मज्जीवितु' मिति । यथा बाला अमनसः, प्राणन्तः प्राणेन, वदन्तो वाचा, पश्यन्तश्चक्षुषा, शृण्वन्तः श्रोत्रेण — एवमिति । प्रविवेश ह मनः ॥ १० ॥

अथ ह प्राण उच्चिक्रमिषन्[1], स यथा सुहयः पड्डीशशङ्कून् संखिदेत्, एवमितरान् प्राणान् समखिदत् । तँ हाभिसमेत्योचुः, 'भगवन्

1. उच्चिक्रमिष्यन् ख.

चक्षुर्होच्चक्राम । चक्षुरुत्क्रान्तम् । एवमुत्तरत्रापि द्रष्टव्यम् ।

अमनसः अप्रौढमनसः ।

अथ ह प्राण—समखिदन् । सः मुख्यः प्राण उच्चिक्रमिषन् उत्क्रमितुमिच्छन्, यथा शोभनोऽश्वः परीक्षार्थमश्वारूढेन ताडितः पड्डीशशङ्कून् पादबन्धनकीलकान् संखिदेत् उत्पाटयेत्, एवमितरान् प्राणान् स्वस्वस्थानेभ्य उत्पा-

---

विप्रकृष्टस्मरणं दूरभविष्यदादिचिन्तनं यथाबृहदारण्यकं वैदुष्यरूपम् । अमनसः अप्रौढमनसः । बालानामपि सामान्यतः समनस्कत्वात् । सर्वत्र चोत्क्रमणं न सर्वथा संबन्धविरहरूपमुच्यते; किन्तु विशेषकार्यकरणे औदासीन्यमेव । तत्र मनसो विशेषकार्यं पशुबालादिव्यावृत्तध्यानविशेषरूपम् । प्राणस्य विशेषकार्यञ्च पतनप्रतिबन्धकधारणसञ्चरणादि । यथोक्तं प्रश्ने, 'अहमेवैतत् पञ्चधाऽऽत्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामि' इति । एवं विशेषकार्येष्वौदासीन्यमात्रस्योत्क्रमणरूपत्वादेव कौषीतक्यां प्राणादिसर्वोत्क्रमणेऽपि वागादेः पृथक्पृथक् प्रविष्टस्य किञ्चित्कार्यकरत्वप्रदर्शनम्, 'शिश्य एव'इति शरीरसञ्चरणाद्यक्षमत्ववर्णनञ्चोपपद्यते । पड्डीशेति । पड्डिः पादसंहतिः । तस्या ईशाः नियामका इत्यानन्दगिरिः । पड्डीशपदं नपुंसकमृग्वेदे १–१६२–१४. (पादबन्धनसाधनं वा बन्धनक्रिया वा तदर्थ इति) । 'पश्चाच्चरणशङ्कौ तु पड्डीशो घुटिकोऽपि च' इति गजप्रकरणे वैजयन्ती (भू. क्ष.) । अनेन दृष्टान्तेन शङ्कवो हयमिव, प्राणमुत्क्रामन्तमाकृष्टुं वागादयः प्रायतन्त स्वनियम्यत्वं तस्येत्यभिमानेन । स तु सैन्धवसुहयसमानत्वात् तानपि स्वेन सह निनायेति ज्ञाप्यते ।

एधि। त्वं नः श्रेष्ठोऽसि, मोत्क्रमी'रिति ॥ १२ ॥

अथ हैनं वागुवाच, 'यदहं वसिष्ठा[1]ऽस्मि, त्वं तद् वसिष्ठोऽसी'ति, अथ हैनं चक्षुरुवाच, 'यदहं प्रतिष्ठाऽस्मि, त्वं तत् प्रतिष्ठाऽसी'ति (१३)। अथ हैनँ श्रोत्रमुवाच, 'यदहँ संपदस्मि, त्वं तत् संपदसी'ति। अथ हैनं मन उवाच; 'यदहमायतनमस्मि, त्वं तदायतनमसी'ति ॥ १४ ॥

न वै वाचो, न चक्षूँषि, न श्रोत्राणि, न मनाँसीत्याचक्षते। प्राणा इत्येवाचक्षते। प्राणो ह्येवैतानि सर्वाणि भवति ॥ १५ ॥

इति पञ्चमाध्याये प्रथमः खण्डः

1. वसिष्ठोऽस्मि शां.

टितवानित्यर्थः। तं ह—**मोत्क्रमीरिति**। हे **भगवन्** पूजार्ह! **त्वमेधि**। स्वामीति शेषः। अस्तेर्लोटि मध्यमपुरुषैकवचनम्। भवेत्यर्थः। **नः** अस्माकं मध्ये त्वमेव श्रेष्ठोऽसि। त्वमुत्क्रमणं मा कार्षीरिति इतरे प्राणाः तमागत्योचुरित्यर्थः।

अथेतरे प्राणाः, विशः करानिव राज्ञे, मुख्यप्राणाय स्वस्वगुणान् अर्पितवन्त इत्याह **अथ हैनं—यत्** येन वाग्मिनो वसुमत्तासंपादकत्वलक्षणेन गुणेनाहं वसिष्ठाऽस्मि, त्वं **तत्** तेन गुणेन वसिष्ठोऽसीत्यर्थः। मदीयगुणस्य त्वदधीनत्वात् त्वदीय एव स गुण इति भावः। उक्तञ्च व्यासार्यैः, 'अहं यत्स्वकार्यकरणसमर्थोऽस्मि, तस्य त्वदधीनत्वात् तवैव तत्सामर्थ्यमित्यर्थः' इति। एवमुत्तरत्रापि द्रष्टव्यम्।

न वै—सर्वाणि भवति। लौकिका वा आगमज्ञा वा वागादीनि इन्द्रि-

यत् येनेति। 'अहं वसिष्ठाऽस्मीति यत् प्रसिद्धं लोके, तत् त्वं वसिष्ठोऽसीत्येतदेव। तत् तवैव वस्तुतः' इति व्याख्यानेऽपि भाव एक एव। न च 'इति यत्, इति तत्' इति इतिशब्दाध्याहारदोषः; यत्तदोः क्रियाविशेषणत्वसंभवात्।

न वै वाच इत्यादि। एवं न बृहदारण्यके।

याणि सर्वाणि वागादिशब्दैर्न व्यवहरन्ति; अपितु प्राणशब्देनैव व्यवहरन्ति । तत् कस्य हेतोः? प्राणाधीनसत्ताकत्वादितरेषाम् ।

'यदधीना यस्य सत्ता तत् तदित्येव भण्यते'

इत्युक्तेः । प्राणाधीनसत्ताकत्वादितरेषामिन्द्रियाणां सर्वाणीन्द्रियाणि प्राणा एव भवन्तीत्यर्थः ।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते —

गुणोपसंहारपादे—

छान्दोग्यवाजसनेयकयोः, कौषीतकिनामुपनिषदि च दशमे (?) अध्याये, 'यो ह वै ज्येष्ठश्च श्रेष्ठश्च वेद, ज्येष्ठश्च ह वै श्रेष्ठश्च स्वानां भवति' इत्यारभ्य प्राणविद्या पठ्यते । तत्र सर्वत्र प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यगुणकत्वं वाक्चक्षुश्श्रोत्रमनसां वसुमत्तासंपादकत्व - समविषमभूतलादिप्रदर्शकत्व - संपद्धेतुभूतवेदशास्त्रतदर्थश्रवणादिसंपादकत्व - स्रक्चन्दनादिविषयज्ञानरूपभोगायतनत्वलक्षणवसिष्ठत्वप्रतिष्ठात्वसंपत्त्वायतनत्वरूपगुणवत्त्वम्, वागादीनाञ्च श्रैष्ठ्यविषयपरस्परविवादेन ब्रह्मसभोपसर्पणम्, 'यस्मिन् व उत्क्रान्ते शरीरानवस्थितिः स वः श्रेष्ठ' इति ब्रह्मवचनम्, तत्परीक्षिषया वागादीनामेकैकस्य शरीरादुत्क्रम्य पर्यटनम्, तस्मिन् [1]काले शरीरस्येन्द्रियाणाञ्च यथापूर्वमवस्थानम्, प्राणस्योत्क्रमणप्रवृत्तौ तेषां विशरणम्, ततो भीतानां वागादीनां, 'मोत्क्रमीः, त्वं नः श्रेष्ठः' इति मुख्यप्राणं प्रति प्रार्थनमित्येतत् सर्वं क्रमेण वर्णितम् ।

कौषितकिशाखायां तु छान्दोग्यवाजसनेयकवत्, 'यदहं वसिष्ठोऽस्मि त्वं तद् वसिष्ठोऽसि' इत्यनेन प्रकारेण प्राणे वागादिगतवसिष्ठत्वादिसमर्पणं नोक्तम् । अतो वागादिगतवसिष्ठत्वादेः प्राणाधीनत्वाप्रतीत्या वागादीनां स्वातन्त्र्यप्रतीतेः छान्दोग्यवाजसनेयकाम्नातप्राणविद्यातः कौषीतक्याम्नातप्राणविद्याया भेदप्रतिभोद्गमः । तथा तस्यामेवोपनिषदि चतुर्थे (?)ऽध्याये, 'अथातो निःश्रेयसादानम्, सर्वा ह वै देवता अहंश्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुः । तद् दारुभूतं शिश्ये ।

1. काले इत्यधिकं क.

५—२.

स होवाच, किं मेऽन्नं भविष्यती' ति। 'यत् किञ्चिदिदमा श्वभ्य

अथैनद्[1] वाक् प्रविवेश, तद्वाचा वदत् शिश्य एव। अथैनच्चक्षुः प्रविवेश। तद् वाचा[2] वदत् चक्षुषा पश्यत् शिश्य एव। अथैनच्छ्रोत्रं प्रविवेश। तद्वाचा वदत् चक्षुषा पश्यत् श्रोत्रेण शृण्वत् शिश्य एव। अथैन[3]न्मनः प्रविवेश। तत् वाचा वदत् चक्षुषा पश्यत् श्रोत्रेण शृण्वत् मनसा ध्यायत् शिश्य एव। अथैनत् प्राणः प्रविवेश। तत् तत एव समुत्तस्थौ। तद् देवाः प्राणे निःश्रेयसं विदित्वा[4] प्राणमेव प्रज्ञात्मानमभिसंभूय[5]' इति प्राणराहित्यदशायामपि वागादीनां स्वकार्यकरत्वप्रदर्शनेन छान्दोग्यैक्यप्रतीतेः इति पूर्वपक्षं कृत्वा,

बहुसारूप्यप्रतीतौ किञ्चिद्वैरूप्यस्य प्रत्यभिज्ञाविरोधित्वाभावाद् विद्यैक्यमिति, 'सर्वाभेदादन्यत्रमे' इति सूत्रेण सिद्धान्तितम्। **सर्वाभेदात्**। प्रतिज्ञातप्राणज्यैष्ठय-श्रैष्ठ्योपपादनप्रकारस्य तिसृष्वपि शाखास्वभेदात् शाखान्तरविद्यायां शाखान्तरविद्यागत-गुणोपसंहारः कर्तव्य इति सूत्रार्थः॥ प्रकृतमनुसरामः। ५—१.

स—भविष्यतीति। वागादीन् [प्रति], 'किं मेऽन्नं भविष्यती' ति

1. अथैनं **ख**. 2. वाचाऽवदत् **ख**. 3. अथैनं **ख**. 4. विजित्य **ख**. 5. अभि-संभवन् **ख**.

किञ्चिद्वैरूप्यस्येत्यादि। एकैकोत्क्रमणमुक्तमन्यत्र; कौषीतक्यां तु युगपत् सर्वोत्क्रमणम्। अन्यत्रैकैकमात्रापक्रमणमुखेन प्राणश्रेष्ठ्यमुपपादितम्। कौषीतक्यां तु एकैकप्रवेशेन तत् इति उपपादनभेदेऽपि उपास्यं श्रैष्ठ्यमविशिष्टम्। न च प्राणोत्क्रमणानन्तरमपि वागादीनां स्वकार्यकरत्वस्य तत्र प्रदर्शनात् प्राणानधीनव्यापारानुसंधानं वागादिषु कर्तव्यं प्रतीयते; अत एव वागादिगतवसिष्ठत्वादेः प्राणेऽनर्पणं तत्र। अन्यत्र तु वागादौ प्राणाधीनव्यापारानुसंधानमिति भेद इति वाच्यम्—'शिश्य एव' इति प्राणावष्टम्भवैकल्येन वागादेरपि देहस्येव संपूर्णकार्या-क्षमत्वज्ञापनात्। 'तद् देवाः प्राणे निःश्रेयस' मिति स्वव्यापारे प्राणापेक्षामूलकस्य प्राणश्रैष्ठ्यस्य प्रतिपादनाच्च सर्वोऽपि वागादिव्यापारः यथार्हं प्राणापेक्ष एव। कौषीतक्यामेव चाध्यायान्तरे प्राणाय वागादिभिर्बलिहरणं भणितमेवेति।

किं मेऽन्नमिति। किमिति मुख्यः प्राणो वागादीन्, किं मेऽन्नमिति पप्रच्छेति चेत्—अत्र शाङ्करम्—'सर्वस्मिन्नन्ने प्राणान्नत्वचिन्तनं आचमनीयास्वप्सु प्राणवासस्त्वानुसंधानञ्च कार्यमिति वक्तव्यम्। तदेतत् प्रश्नप्रतिवचनमुखेन भङ्ग्या वदती' ति। इदमपि बोध्यम्—यदा, 'सोत्क-

आ शकुनिभ्य' इति होचुः ।

तद् वा एतदनस्यान्नम् । अनो ह वै नाम.प्रत्यक्षम् ।

मुख्यप्राणः पप्रच्छेत्यर्थः । **यत्—होचुः ।** श्व शकुनिपर्यन्तसर्वप्राणिनां यदन्न जातम्, तत् तवान्नजातमिति वागादयः प्रत्यूचुः ।

श्रुतिः स्वेन रूपेणाह **तद्वा एतदनस्यान्नम्** । यत् किञ्चिल्लोके प्राणिभिरद्यते, तदेतत् **अनस्य** प्राणस्यान्नम् । प्राणेनैव तदद्यत इत्यर्थः । **अनो ह वै नाम प्रत्यक्षम्** । अदनादिविविधचेष्टायुक्तत्वात् प्राणस्य अन इति प्रत्यक्षं नाम । देवानां परोक्षप्रियत्वात् प्रत्यक्षं अन इति नाम परित्यज्य प्राण इति परोक्षेण नाम्ना व्यवहारः । ततश्च अदनचेष्टाया अपि तदीयत्वात् सर्वप्राणिजातेनाद्यमानमन्नं सर्वं तेनैवाद्यत इति प्राणस्य सर्वमन्नमित्यर्थः । [1]यद्वा अन इत्यस्य नकारान्तरयुक्तस्यान्नत्वेन अन्नस्यानसंबन्धित्वात् अन इत्यस्य प्राणनामत्वस्य प्रत्यक्षत्वादन्नं तत्संबन्धीत्यर्थः । अत्र, प्राणविद्यानिष्ठेन सर्वप्राण्यन्नादनस्य कर्तुमशक्यत्वात् नास्य सर्वप्राण्यन्नादनकर्तव्यत्वमर्थः । अपितु सर्वप्राणिजातान्ने प्राणान्नत्वचिन्तनं कर्तव्यमित्यर्थः ।

1. यद्वेति कल्पो न क कोशे ।

मीः' इत्यर्थितं सर्वैः, तदा प्राण आह, 'बलिं हरत मे' इति । तदुक्तं बृहदारण्यके । अथ ते स्वगतं वसिष्ठत्वादिकमर्पितवन्तः । अत एव, मद्गतं वसिष्ठत्वं त्वदधीनम्' इत्यनुक्त्वा, मदीयं वसिष्ठत्वं तवैवे' त्युक्तम् । तावता प्राणो न ततर्प । अशनाच्छादने हि मुख्यमुपहरणीये प्रभवे भृत्यैः । अत ईदृशं बलिमपेक्षत इति । अन्यच्च—व्यवहारादि कार्यं तावत् वागादिकरणकमेव, परन्तु प्राणाधीनम् । इतरानधीनप्राणव्यापारस्तावदस्ति अशनपानादिः । तदत्र प्राणोऽजिज्ञासत । 'किं किञ्चिदशनपानविषयेऽपि स्वकार्यत्वं वागादयो मन्यन्ते' इति । तत्र आ श्वकीटादिभ्यः सर्वमन्नं तवैवेति तैः प्रत्युक्तमिति । अत्र प्राणः स्वयमशनपाने निर्वर्त्य बहिर्वायुसखामितुल्येन स्वसखेनोदर्येण अन्तः सर्वं परिपाच्य तद्रसपरिणामं नाडीद्वारा तत्तदिन्द्रियस्थानं नीत्वा तत्तत् परिपोष्य वागादेर्वसिष्ठत्वादि निर्वहतीति चेह ज्ञाप्यते । किञ्च वागादिव्यापाराणां विशेषतोऽभिव्यक्तिः व्यक्तवाङ्मनुष्यादिमात्रे । प्राणकार्यमशनादि तु पशुपक्ष्यादिष्वाप्तम् । अतोऽस्मान् विनाप्यन्नं त्वं बहु भुङ्क्ष इति चेह वागादिभिर्विवक्षितम् ।

स्वेन रूपेणेति । तदित्यादिकं न वागाद्युक्तानुवादरूपम्; किंतु श्रुतेः स्ववाक्यमिति भावः । **सर्वप्राण्यन्नादनस्ये**ति । अत्र सर्वप्राण्यन्नप्रस्तावात् तदधिकृत्य किञ्चिद् विधेयमिति सिद्धम् । तत् तावत् न अदनम् । मनुष्येणेतरसर्वान्नादनासंभवात् । संभवदन्नादनविधाने च सर्व-

न ह वा एवंविदि किञ्चनानन्नं भवतीति ॥ १ ॥

स होवाच, 'किं मे वासो भविष्यती' ति। 'आप' इति होचुः। तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति । लम्भुको ह वासो भवति, अनग्नो भवति ॥ २ ॥

सर्वप्राणिजातान्ने प्राणान्नत्वचिन्तनं स्तौति **न—भवतीति**। प्राणविद्याविद्यानिष्ठस्याभक्ष्यभक्षणदोषो नास्तीत्यर्थः।

स—होचुः। किं मे वस्त्रं भविष्यतीति मुख्यप्राणेन पृष्टा इतरे प्राणाः, 'आपस्ते वस्त्रं भविष्यन्ती'त्यूचुः। 'आपो वासस्त्वेन चिन्तनीया'इति होचुः(?) इत्यर्थः। **तस्मात्—भवति** । **तस्मात्** अपां वासस्त्वादेव **एतत्** एतस्मिन्नपि काले भोक्ष्यमाणाः भोजनात् प्राक् पश्चाच्च आचमनीयाभिरद्भिर्वासोभिः परिहितं [1]प्राणमनग्नं कुर्वन्ति । आचमनीयास्वप्सु वासस्त्वचिन्तनेन, वासोभूताभिरद्भिः प्राणस्य परिहितत्वा[2]दनग्नत्वचिन्तनेन च स्वयमपि **वासो लम्भुको भवति** वासो लब्धा भवति, **अनग्नश्च** भवति तत्क्रतुन्यायेनेति भावः।

1. परिहितमनग्नं प्राणं **ग.** 2 परिहितत्वादनग्नत्वचिन्तनं कुर्वन्ति इत्यर्थः। एवं चिन्तकस्तेन चिन्तनेन च **ख.** परिहितत्वादिति भावः अप्सु वासस्त्वचिन्तनेन प्राणस्यानग्नत्व **ग.**

प्राप्यन्नस्य गृहीतस्य त्यागादसंगतिः। अतस्तददनस्य कर्तुमशक्यतया प्रवृत्त्यप्रसक्त्या तत्र विधेरनुज्ञाया वा अयोगात् सर्वप्राण्यन्नविषयकश्चिन्तनविशेष एव विधेय इति। अत्र शङ्कितुरभिप्रायमाह—मतार्थरीतिस्तु—प्राणविद्यानिष्ठस्य सर्वान्नादनाविधानार्थमिदं वाक्यं प्रवृत्तम्। तत्र **स होवाचे**त्यर्थवादपूर्वकं **तद्वा एतदनस्यान्न**मिति वाक्येनादनकर्तव्यत्वं विधीयते। **अनस्य** प्रकृतप्राणविद्यासंबन्धिप्राणविशेषस्यैतत् सर्वमन्नमिति। इयं न युज्यते; उक्तयुक्त्या कर्तुमशक्यत्वात्। अनशब्दस्य तत्तत्प्राणिप्राणपरस्य प्राणवित्प्राणमात्रसंकोचे प्रमाणाभावात्। **एवंविदी**त्युपरितनानुवादबलेन चिन्तनविधेरवगमाच्चेति। **दोषो नास्तीत्यर्थ** इति। 'न ह वा अस्यानन्नं जघं भवति— य एवमेतदनस्यान्नं वेद' इति वाजसनेयकानुसारादेवमर्थ इति भावः। अन्यथा अस्य वाक्यस्य, 'श्वशकुनिपर्यन्तसर्वप्राण्यन्नविदि अस्मिन् अनन्नं न किञ्चित्। एतद्वेदनविषयभूतान्नव्यतिरिक्तमन्नं न किञ्चिल्लोके' इत्यर्थवर्णनसंभवात् **श्वशकुनि**पदतः सर्वप्राण्युपलक्षणं कार्यमित्येतदर्थतया वाक्यसार्थक्यादिति॥ तर्हि दोषाभावे यथेष्टं भक्षयेदिति न। एतत्तात्पर्यस्योपरि विवेचयिष्यमाणत्वात्।

अद्भिः परिदधतीत्येतत् आचामन्तीति विवृतं वाजसनेयके। भाष्ये, 'चिन्तनाया इति यावत्' इति पाठः स्यात्। पुरस्तादुपरिष्टाच्च धारणमन्तरीयोत्तरीयद्वयधारणरूपम्। तदुच्यते **लम्भुक** इति वाक्यद्वयेन। **तत्क्रतुन्यायेने**ति। मूले औचित्यात्, 'य एवं वेद' इति पूरणीयमिति भावः। अयमर्थः **शाङ्करानुसारात्**। अन्यथा हि, 'अधस्तादुक्तः **अनः** प्राणः **अद्भिः** परिधानात् **वासो लब्धा अनग्नो भवती**त्येवार्थः स्यात्। 'एतमेव तदनग्नं कुरुत' इति श्रुत्यन्तरात्।

तद्धैतत् सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच, [1] यद्यप्येनच्छुष्काय स्थाणवे ब्रूयात्, जायेरन्नेवास्मिन् शाखाः; प्ररोहेयुः पलाशानी ' ति ॥ ३ ॥

अथ यदि महज्जिगमिषेत् अमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य, ' ज्योष्ठाय श्रेष्ठाय स्वाहे ' त्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ॥ ४ ॥

वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् । प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् । संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् । आयतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ॥ ५ ॥

1. एतत् मा.

तद्ध—**उवाच** । व्याघ्रप[1]त्पुत्राय नाम्ना गोश्रुतये जबालापुत्रः सत्यकामनामा इदं प्राणदर्शनमुक्त्वाऽन्यदप्युवाचेत्यर्थः । किं तदित्यत्राह **यदि**—**पलाशानीति** । **एनत्** प्राणदर्शनं [प्राणविद्यारूपं] शुष्काय वृक्षायापि यदि ब्रूयात् । अस्य [वृक्षस्य] शाखा [2]अप्युत्पद्येरन् पत्राणि च प्ररोहेयुरित्यर्थः ।

मन्थाख्यं कर्मारभ्यते **अथ**—**जिगमिषेत्** । महत्त्वं ज्यैष्ठ्यश्रैष्ठ्यादिलक्षणं यदि प्राप्तुमिच्छेदित्यर्थः । **अमावास्यायां**—**अवनयेत्** । उक्तकाले **सर्वौषधस्य** ग्राम्यारण्यौषधानां[3] **मन्थं** पिष्टमौदुम्बरे कंसाकारे चमसाकारे वा पात्रे दधिमधुनोः प्रक्षिप्योपमथ्य अग्रतः स्थापयित्वा, ' ज्येष्ठाय श्रेष्ठाय स्वाहे ' ति अग्नौ आज्येन हुत्वा मन्थे **संपातं** हुतशेषं निनयेदित्यर्थः । [वसिष्ठायेत्यादि सर्वं स्पष्टम् ।]

1. पात् क. 2. अभ्युत्पद्येरन् ग. 3. धीनां ग.

व्याघ्रपदिति । **वैयाघ्रपद्यायेति** ह्रस्वश्रवणात् अयं पच्छब्दः, न तु पादशब्दः । **यद्यप्येनदि**त्यत्र **अपि**शब्दः पृथक्कृत्य **स्थाणवे** इत्यत्र संगमनीयः ।

उपदिष्टा प्राणविद्या । अथ प्रसङ्गात् महत्त्वफलकं उक्तप्राणादिपञ्चकविषयकहोमादिकर्मोच्यते **अथ यदी**ति । इदं वाजसनेयके माध्यन्दिनशाखायां प्राणविद्यानन्तरमेव स्थितमपि काण्वशाखायामेतदुत्तरपञ्चाग्निविद्यानन्तरमाम्नातम् । ग्राम्यारण्यौषधदशकं पात्रौदुम्बरत्वादि च बृहदारण्यकतो (८–१३.) ऽवसेयम् । कंसचमसाकारत्वमुत्तरवाक्यादेव ज्ञायते । **दधिमधुनोरि**ति

अथ प्रतिसृत्याञ्जौ मन्थमाधाय जपति, 'अमोनामास्यमा हि ते सर्वमिदँ स हि ज्येष्ठः श्रेष्ठो राजाऽधिपतिः। स मा ज्यैष्ठ्यँ श्रैष्ठ्यँ राज्यमाधिपत्यं गमयत्वहमेवेदं सर्वमसानी' ति ॥ ६ ॥

अथ खल्वेतयर्चा पच्छ आचामति— 'तत् सवितुर्वृणीमह' इत्या-

अथ प्रतिसृप्य—जपति। **प्रतिसृप्य** अभिगम्य। प्रदक्षिणं कृत्वेति वाऽर्थः। अञ्जलौ मन्थं निधाय वक्ष्यमाणं मन्त्रं जपेदित्यर्थः। मन्त्रमेवाऽऽह— **अमोनामासि।** अमा(म[1]) इति नाम यस्य सः अमोनामा। सोऽसीत्यर्थः। ननु अमा(म[1]) इति हि प्राणनाम। कथमप्राणस्य मन्थस्य अमोनामत्वमित्यत्राह **अमा हीति।** त्वमिति शेषः। त्वं प्राणोऽसि हीत्यर्थः। मन्थस्य प्राणत्वमुपपादयति **ते सर्वमिदम्।** इदं जगत् सर्वं **ते** त्वदधीनम्। मन्थलक्षणान्नाधीनत्वाज्जगत इति भावः। **स हि—सर्वमसानीति।** स हि मन्थभूतः प्राण इत्यर्थः। **राजा** दीप्तिमान्। **अधिपतिः** शेषीत्यर्थः। **मा** मां **गमयतु** प्रापयतु। इदं सर्वमहमेव **असानि** भवानि। सर्वनियन्तृतया भवानीत्यर्थः। शिष्टं स्पष्टम्।

अथ खल्वेतया ऋचा पच्छ आचामति। **एतया** वक्ष्यमाणया **ऋचा पच्छः** पादशः मन्थं भक्षयतीत्यर्थः। मन्त्रस्यैकैकपादेन एकैकग्रासं भक्षयेदित्यर्थः।

1. म इति विना दीर्घं क. कोशे।

सप्तमी। अग्नौ होम आज्येन। मन्थद्रव्यस्योपर्याचमने विनियोगः। **अमोनामासि अमा हि ते सर्वमिदमित्येतत्स्थाने** माध्यन्दिनपाठः, 'अमोऽसि आमं ते मयि' इति। काण्वपाठः, 'आमस्यामंहितमहि' इति। तदर्थं आनन्दगिरीये, '**आमंसि** सर्वमिदं जानासि। ते **महि** माहिमानं रूपं **आमंहि** मन्यामहे इति। अत्र तु शाङ्करे, '**अमा** सह ते तव इदं सर्वं जगत्' इत्युक्तम्। अत्र तु भाष्ये **अमाहीत्यादेरन्यथा** व्याख्या। इत्थमपि स्यात्:—**निरुक्ते** अमत्रेमिरिति पदं गृहीत्वा, 'अमत्रं=पात्रम्, अमा अस्मिन् अदन्तीति' इत्युक्तम्। अमा पुनः अनिर्मितं=अपरिमितमिति **दुर्गाचार्यः**। माङ् माने इत्यतः अमा अमितमित्यर्थः सुलभः। ततश्च अमोऽसि हे प्राणभूतमन्य! कथममत्वम्? तदाह **अमा हि ते सर्वमिदम्।** आक्रिमिकीटादिभ्यः स्थितं सर्वमिदमपरिमितमन्नं किलेति। **ते** इति। प्राणभूतस्य ते इत्यर्थः। यद्वा **ते सर्वमिदं** त्वद्घटकं सर्वमिदमौषधादिद्रव्यमित्यर्थः इति।

पच्छ आचामतीत्युक्तस्यैव विवरणं **तत्सवितुरित्यादिना।**

चामति, 'वयं देवस्य भोजन' मित्याचामति; 'श्रेष्ठं सर्वधातम' मित्याचामति। 'तुरं भगस्य धीमही' ति सर्वं पिबति ॥ ७ ॥

निर्णिज्य कँसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः। स यदि स्त्रियं पश्येत्, समृद्धं कर्मेति विद्यात्। तदेष श्लोकः—

"यदा कर्मसु काम्येषु स्त्रियँ स्वप्नेषु पश्यति।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने॥"

तस्मिन् स्वप्ननिदर्शने।

इति पञ्चमाध्याये द्वितीयः खण्डः।

"तत सवितुर्वृणीमहे वयं देवस्य भोजनम्। श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि"। अस्याश्च ऋचोऽयमर्थः। वयं श्रेष्ठं **सर्वधातमं** सर्वधारकं **तत्** [1]तथाप्रसिद्धं श्रेष्ठं(?) भोजनं **सवितुर्देवस्य** सवितुर्देवात् **वृणीमहे** प्रार्थयामहे। अत्र प्राणस्य सवितुश्चाभेदेन **सवितु**रित्युक्तिः। अथ तद्दत्तेन भोजनेन संतुष्टास्सन्तः **तुरं** तूर्णं शीघ्रं **भगस्य** सूर्यस्य देवस्य **धीमहि** ध्यायेमेत्यर्थः। स्वरूपमित्यध्याहारः। अथवा संबन्धसामान्ये षष्ठी। सवितारं ध्यायेमेत्यर्थः। **तत् सवितुः—पिबति**। स्पष्टोऽर्थः।

निर्णिज्य—स्थण्डिले वा। कंसाकारं चमसाकारं वा औदुम्बरपात्रं प्रक्षाल्य, अग्नेः पश्चात् अजिने वा केवलभूम्यां वा प्राक्छिराः शयीतेत्यर्थः। शयाने नियममाह **वाचंयमोऽप्रसाहः**। **वाचंयमः** वाग्यतस्सन्। **अप्रसाहः** न प्रसह्यत इत्यप्रसाहः। अनिष्टस्वप्नदर्शनेन यथा नाभिप्लुतो भवति, तथा संयतचित्तस्सन्नित्यर्थः। **स यदि—विद्यात्**। स्पष्टोऽर्थः।

तदेष श्लोकः। **तत्** तस्मिन् स्वप्नविषये एष श्लोको भवतीत्यर्थः। श्लोकमेवाह **यदा कर्मसु—**। **तस्मिन् स्वप्ननिदर्शने**। [अत्र] सतीति शेषः। **समृद्धिं** कर्मनिष्पत्तिमित्यर्थः। **तस्मिन् स्वप्ननिदर्शन** इति द्विरुक्तिर्विद्यासमाप्त्यर्था॥

अप्रसाहः इति। प्रसहनं बलात्कारः। चित्तस्य तीव्रा व्याप्तिरित्यपि सुवचम्।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते —

(१) 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्' इत्यत्र—

'न ह वा एवंविदि किञ्चनानन्नं भवती'ति छान्दोग्ये, 'नास्यानन्नं जग्धं भवती'ति वाजसनेयके च श्रवणात्, वामदेव्योपासनानिष्ठस्य प्रार्थ्यमानसर्वयोषिद्-परिहारानुमतिवत् सर्वान्नानुमतिः प्राणविद्यानिष्ठस्य सर्वदा क्रियत इति पूर्वपक्षे प्राप्ते—उच्यते। 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्'। प्राणत्यय एव प्राण-विदः सर्वान्नानुज्ञानम्; न सर्वदा। ब्रह्मविदोऽप्युषस्तेः प्राणात्यय एव इभ्यो-च्छिष्टाशनस्य दर्शनेन प्राणविदः सर्वान्नानुमतेरापद्विषयत्वस्य किंपुनर्न्यायसिद्धत्वात्।

'अबाधाच्च'। 'आहारशुद्धौ सत्त्वशुद्धिः' इति शास्त्राबाधार्थमप्येवमेव न्याय्यम्। इतरथा तस्य बाधः स्यात्।

'अपि स्मर्यते'। 'प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥'
इति स्मरणाच्च सर्वान्नीनत्वमापद्विषयम्।

'शब्दश्चातोऽकामकारे'। 'तस्माद् ब्राह्मणः सुरां न पिबति पाप्मना नोत्सृजा' इति संहितायां कामकारप्रतिषेधकशब्ददर्शनात्। पाप्मना संस्पृष्टो न भवानीति मत्वा ब्राह्मणः सुरां न पिबतीति हि तस्याः श्रुतेरर्थः।

ननु ब्रह्मविद उषस्तेः प्राणात्यये सर्वान्नीनत्वदर्शनात् प्राणविदः सर्वान्नीन-त्वस्यापद्विषयत्वं कैमुत्यन्यायेन सिद्ध्यतीत्यनुपपन्नम्। वामदेव्योपासननिष्ठस्य सर्वयोषिदपरिहारवत् प्राणविद्यानिष्ठस्य वचनबलात् सर्वान्नोनत्वमिति वदन्तं प्रति एतस्यानुत्तरत्वादिति चेन्न—वामदेव्योपासनस्य, 'न काञ्चन परिहरेत् तद् व्रतम्' इति सर्वयोषिदपरिहारेऽपि स्पष्टविधिश्रवणात्। प्रकृते च, 'न ह वा एवंविदि

शब्दश्चातोकामकारे। अतः सर्वान्नीनत्वस्यापद्विषयत्वादेव **अकामकारे शब्दः** यथेच्छाचरणप्रतिषेधविषयकः शब्दोऽप्यस्ति इति सूत्रार्थः।

किञ्चनानन्नं भवती' त्यत्र सर्वान्नभक्षणविधेः कल्प्यत्वात्, प्रत्यक्षनिषेधविरोधे च विधिकल्पनानुदयेनार्थवादत्वस्यैव युक्तत्वात् सर्वप्राण्यन्ने, 'यत् किञ्चिदिदमा श्वभ्य आ शकुनिभ्यः' इति विहितस्य प्राणान्नत्वचिन्तनस्य स्तुतिमात्रं क्रियते, 'न ह वा एवंविदि किञ्चनानन्नं भवती'ति।

न चैवं सति निषेधशास्त्रविरोधात्, 'एवंविदि पापं कर्म न श्लिष्यते' इत्यादेरपि स्तुतिमात्रत्वप्रसङ्ग इति वाच्यम्—पाप्मनामश्लेषाभावे अनिर्मोक्षप्रसङ्गेन सकलपापा-

---

कल्प्यत्वादिति। तथाच वचनबलात् प्राणविदः सर्वान्नीनत्वपूर्वपक्षे वचनबलमत्र नास्तीत्येव समाधिरिति भावः। अत्र प्राणविद एव सर्वान्नीनत्वे ब्रह्मविदि तत् कैमुत्यसिद्धमिति पूर्वपक्षः। तत्र ब्रह्मविदां तद्दर्शनादिहेतुभिः सर्वान्नीनत्वं निरस्य कैमुत्यनयेनैव प्राणविदोऽपि तन्निरास इहाभिप्रेत इति श्रुतप्रकाशिकासरणिः। एतावन्मात्रस्य सूत्राभिमतत्वे, 'वामदेव्योपासक-विषय इव विशेषवचनबलात् प्राणविन्मात्रस्य सर्वान्नीनत्वमस्तु। न हि वामदेव्योपासकस्येव सर्वस्य ब्रह्मविदोऽपि सर्वयोषिदपरिहारः कैमुत्यादशङ्क्येत इत्युपरितनाशङ्कायां कर्तव्यः परिहारः सूत्रानुक्त इति न्यूनता स्यादिति शाङ्करसरणिमपि श्रीभाष्यानुमतामभिप्रेत्यैवमुक्तमिति ध्येयम्। तर्हि सूत्रकारेण वचनबलाभावरूपसमाधिमनुक्त्वा तद्दर्शनादिति उषस्तिवृत्तान्तप्रदर्शनमनुपपन्नमिति चेत्—उच्यते। अत्र किं सर्वान्नभक्षणस्य विधिरनुमतिर्वा। नाद्यः। वामदेव्योपासनस्थले, 'न परिहरे'दिति विधिश्रवणात्, 'तद् व्रत'मिति व्रतशब्दप्रयोगाच्च प्रार्थ्यमानयोषिदपरिहरणमवश्यकर्तव्यं प्रतीयते। तद्वदत्र श्वपर्यन्तप्राण्यन्नभक्षणमवश्यकर्तव्यं न प्रतीयते। न च प्रत्याययितुं शक्यते। यावदुदरपूर्त्यैव च भोजने शक्तेः स्वभोज्यसर्ववस्तुभोजनमेव न सुकरम्, नतरां श्वभोज्यप्रभृतिभोजनम्। विधिपक्षे च तदपि भोज्यं स्यात्। अतोऽत्र न सर्वान्नविधिः, किंतु सर्वान्नानुमतिरेवेति सिद्धं वामदेव्यवैषम्यम्। अथानुमतिरेव सार्वकालिकी अस्तु, न तु प्राणसंशयकाल एवेति चेत्—अनुमतिस्तावत् स्वतः प्रवृत्तौ पुरुषे दोषाभावमात्रं ज्ञापयेत्, न प्रवृत्तिमुत्पादयेत्। विदुषश्च स्वतः प्रवृत्तिर्निषिद्धान्ने इन्द्रियचापल्याद्वा तदभावे प्राणधारणासंभवाद्वा। आद्ये इन्द्रियलौल्यस्य साधीयो वैदुष्यम्। अतः सतो विदुषस्तदसंभवि। परिशेषात् प्राणसंशयापन्नस्यैव तत्र प्रवृत्तिरिति। तदिदं सूत्रकारः, 'सर्वान्नानुमतिश्च प्राणात्यये' इत्येवतैव दर्शयित्वा, इदं प्राणवित्तादितरपरमैकान्तिपर्यन्तसाधारणमिति गमयितुम् उषस्ति वृत्तमुपष्टम्भकं दर्शयति तद्दर्शनादिति। ननु प्राचीनकर्मवशात् यदि कदाचित् क्वचित् रागो भवेत्, तदा प्राणवित् निषेधशास्त्रात् अभीतस्तद्भक्षयेदिति विधिः कल्प्यत इति चेत्, आह अबाधाचेति। कल्प्येन विधिना कल्पशास्त्रं न बाध्यते। अतो विध्यश्रवणान्न सामान्यशास्त्रबाध इति। उपरि सूत्रद्वयेन च सर्वान्नमिति किं सर्वस्यान्नम् उत सर्वमन्नम्? उभयमपि न शक्यं स्वीकर्तुं विरोधादिति क्रमेण दर्श्यते इत्यलमधिकेन।

श्लेषस्य मोक्षविधिशास्त्रापेक्षितत्वेन फलविधित्वस्य वक्तव्यत्वात्। प्राणविद्यायाश्च ज्येष्ठत्वश्रेष्ठत्वादिफलकत्वेन फलाकाङ्क्षाया अभावादिति स्थितम्।

(२) तथा गुणोपसंहारपादे—'लम्भुको ह वासो भवति' इत्यर्थवादोपबृंहितात्, 'किं मे वासो भविष्यतीति। आप इति होचुः। तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधती'ति छान्दोग्ये श्रवणात् वासस्त्वचिन्तनमिति प्रतीयते। बृहदारण्यके—काण्वशाखायाम्, 'तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्ति अशित्वा चाचामन्ति एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते' इति वाक्ये, 'अनग्नं कुर्वन्त' इति वचनाद्वसस्त्वचिन्तनमपि प्रतीयते; 'आचामन्ती'ति आचमनविधिरपि प्रतीयते। माध्यन्दिनशाखायाम्, तस्मादेवंवित् अशिष्यन् आचामेत् अशित्वा चाचामेत् एतमेव तदनमनग्नं कुरुते' इति अनग्नत्वचिन्तनात् वासस्त्वचिन्तनविधिरपि प्रतीयते; आचामेदिति आचमने विधिप्रत्ययश्रवणात् आचमनविधिः स्पष्टं प्रतीयते। तत्र द्वयोरपि विधेयत्वे गौरवादेकस्यैव विधेयत्वे वक्तव्ये आचामेदिति आचमने स्पष्टविधिप्रत्ययश्रवणात् स्मृत्याचारप्राप्ताचमनातिरिक्तमाचमनान्तरं प्रतीयते। वासस्त्वादिश्रवणं तु कथञ्चित् स्तुतिरूपतया नेतव्यमिति पूर्वपक्षे प्राप्ते—अभिधीयते — 'कार्याख्यानादपूर्वम्'। **कार्याख्यानात्** विधेरप्राप्तविधानस्वाभाव्यात् आचमनस्य [1]च स्मृत्याचाराभ्यामेव प्राप्तत्वात् आचमनान्तरविधाने विनिगमकानुपलम्भात् [2]**अपूर्वं** अप्राप्तं आचमनीयास्वप्सु वासस्त्वानुचिन्तनं विधीयते। छान्दोग्ये आचमनस्यैवाप्रतीतेः शाखान्तरेऽपि वासस्त्वानुसंधानस्यानुगतत्वात् तदेव विधीयत इति स्थितम्।

ननु कथं वागादीनामचेतनानामुक्तिप्रत्युक्तिपरम्परेति चेन्न— वागादिशब्दानाम्, 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' इति सूत्रोक्तन्यायेन तदभिमानिदेवतापरत्वात्। तत्र हि—

1. चकारो न ख. कोशे। 2. अपूर्वमिति न ख. कोशे।

पूर्वपक्ष्युक्तमपि सिद्धान्त्यप्रतिषिद्धत्वात् ग्राह्यमिति दर्शयितुं तदधिकरणं कृत्स्नं दर्शयति तत्र हीति।

(३) 'न विलक्षणत्वादस्य तथात्वञ्च शब्दात्'। ब्रह्मणो जगद्विलक्षणत्वेनोपादानत्वं न संभवति। घटरुचकादिषु हि सलक्षणानामेव मृत्सुवर्णादीनामुपादानत्वं दृष्टम्। प्रकृते च ब्रह्मजगतोर्विलक्षणत्वं, 'विज्ञानञ्चाविज्ञानञ्चे'ति ब्रह्मजगतोर्विज्ञानत्वाविज्ञानत्वप्रतिपादकशब्दादेवावगम्यते।

ननु जगतोऽचेतनत्वे, 'मृदब्रवीत्' इति अचेतनाया मृदो वक्तृत्वं नोपपद्यते। तत्राऽऽह—'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्'। मृदादिशब्दैस्तत्तदभिमानिदेवताः व्यपदिश्यन्ते। 'हन्ताहमिमास्तिस्रो देवताः' इति तेजोबन्नानां देवताशब्देन विशेषणात् अचेतनानाञ्च देवतात्वासंभवात् तदभिमानिनी देवता तेजोबन्नादिशब्दैर्व्यपदिश्यत इत्यध्यवस्यामः। 'अग्निर्वाग् भूत्वा मुखं प्राविशत्' इति अग्नेर्वाचि अनुप्रवेशरूपानुगतिश्रवणात् वागादिशब्दैस्तदनुविष्टतदभिमान्य[1]भ्याद्यभिधानात् नानुपपत्तिः। अतः चेतनस्य ब्रह्मणोऽचेतनजगदुपादानत्वं न संभवति—

इति पूर्वपक्षे प्राप्ते उच्यते—

'दृश्यते तु'। तुशब्दः चोद्यव्यावृत्त्यर्थः। विलक्षणेभ्योऽपि गोमयादिभ्यो वृश्चिकादेरुत्पत्तिदर्शनात् विलक्षणाद् ब्रह्मणो विलक्षणजगदुत्पत्तिरुपपद्यते। 'असदिति चेन्न प्रतिषेधमात्रत्वात्'। विलक्षणादुपादानाद्विलक्षणोत्पत्त्यङ्गीकारे उपादेयस्य उत्पत्तेः प्राक् विलक्षणोपादानात्मनि अवस्थानस्य वक्तुमशक्यत्वेन असत्कार्यवादप्रसङ्ग इति चेन्न—उपादानोपादेययोः सालक्षण्यनियमप्रतिषेधमात्र एवास्माकं संरम्भः। सूक्ष्मचिदचिद्विशिष्टं ब्रह्म स्वस्मात् विलक्षणजगदाकारेण परिणमत इत्येतत्तु न त्यक्तम्।

अत्र चोदयति—'अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्'। ब्रह्मण एव जगद्रूपेण परिणामे तयोरैक्यात् अप्ययादिषु सर्वदशासु अचेतनगता दोषाः ब्रह्मणि[2] स्युः।

1. तदनुप्रवेशेन तदात्मभूता. ग. 2. ब्रह्मणः ख.

विज्ञानञ्चाविज्ञानञ्चेति जीवस्य किल विज्ञानत्वमुच्यते। तत् कथं **ब्रह्मजगतो**रिति। सत्यम्। ब्रह्मणस्तदभेदात्, भेदेऽपि कैमुत्यन्यायात् विज्ञानत्वं प्रतिपादितमेवेति भावः।

न त्यक्तमिति। उपादानोपादेययोर्वैलक्षण्यमपीष्यते, ऐक्यमपीति नासत्कार्यवादादिदोषः। उपादानत्ववत् उपादेयत्वमपि विशिष्टब्रह्मण इति ऐक्यं सुस्थम्। स्थूलभूताचेतनांशस्यापि ब्रह्म प्रति उपादेयत्वात् वैलक्षण्यमपीति गूढाशयः। इममविद्वान् शङ्किष्यते **अपीतौ**विति। आशयमाविष्करिष्यति **न तु दृष्टान्तभावा**दिति इति भावः। शेषं सद्विद्यायाम् (6.8)।

५—३.

श्वेतकेतुर्हारुणेयः पञ्चालानाँ समितिमेयाय । तँ ह प्रवाहणो जैबलिरुवाच, कुमारानु त्वाऽशिषत् पितेति । अनु हि भगव इति ॥ १ ॥

ततश्च ब्रह्मणो निरनिष्टत्वनिरवद्यत्वप्रतिपादकश्रुत्यसामञ्जस्यं भवति ।

तत्र सिद्धान्तमाह — 'न तु दृष्टान्तभावात्' । न त्वेवं संभवति । यथा बालस्य युवानं प्रति उपादानत्वेऽपि बालयुवादिशब्दैरात्मनोऽभिधानेऽपि बालत्वयुवत्वादिभिर्नात्मा दूष्यते; एवमेव चेतनाचेतनगतैर्दोषैरात्मा न दूष्यते ।

'स्वपक्षदोषाच्च' । 'निर्विकारस्य चिन्मात्रैकरसस्य पुरुषस्य प्रकृतिसंनिधानेन[1] प्रकृतिधर्माध्यासनिबन्धना जगत्प्रवृत्तिः' इति साङ्ख्यपक्षो [ऽपि] दुष्ट एव । 'तर्काप्रतिष्ठानादपि' । तर्काणामन्योन्यव्याघातेनाप्रतिष्ठितत्वादपि तन्मूलप्रधानकारणवादः त्याज्य एव । 'अन्यथाऽनुमेयमिति चेत्, एवमप्यनिर्मोक्षप्रसङ्गः' । यथा प्रतिकूलतर्कपराहतिर्न भवति, तथा सत्तर्कैः प्रधानकारणत्वमनुमीयत इति चेत् — एवमपि कालान्तरे त्वत्तोऽतिशयितानां [2]तर्ककुशलानां संभवेन प्रतिकूलतर्कपराहतिदोषामिस्तारात् । तस्माद् ब्रह्मणो जगदुपादानत्वं न दुष्यति – इत्युक्तम् ॥

अतो वागादीनां वक्तृत्वे नानुपपत्तिरिति स्थितम् । प्रकृतमनुसरामः । ५–२.

प्रकृतिविविक्तजीवयाथात्म्यविषयां पञ्चाग्निविद्यां संसृतिवैराग्याय प्रस्तौति— **श्वेतकेतुः — एयाय** । अरुणस्यापत्यमारुणिः । तस्यापत्यमारुणेयः श्वेतकेतुः पञ्चालानां जनपदानां सभामाजगाम । **तं — उवच** । जीबलस्यापत्यं जैबलिः, नाम्तः प्रवाहणः तं श्वेतकेतुमुक्तवान् । **कुमार — पितेति** । हे कुमार! **त्वा** त्वां तव पिता **अन्वशिषत् किम्** अनुशिष्टवान् किमित्यपृच्छदित्यर्थः । इतर आह **अनु हि भगव** इति । हे **भगवः** पूजार्ह! अनुशिष्टोऽस्मि हीति ।

1. संनिधाने क. 2. कुतर्क क.

एवमुपकरणविषयिणी विद्या उपदिष्टा । अथोपकरणिजीवविषयिणी ब्रह्मविद्या । कुमारेति संबोधनमल्पवयस्त्वात् । अत एव प्रवाहणस्य स्वाचार्यत्वाभावेऽपि क्षत्रियत्वेऽपि ब्रह्मवित्तम इति गौरवात् **भगव** इति कुमारेण श्वेतकेतुना संबोधनम् । पूज्यानां मिथः भगवत्पदेन व्यवहारो वैश्वानरविद्यायां द्रष्टव्यः । **अनु ही**ति । प्रश्नवाक्यात् **अशिषत् पिते**त्यनुषज्यते । **वेत्थे**त्यस्य सर्वत्र कर्मवाचकं तदिति पदमध्याहार्यम् । तच्च यत्, यथेत्युक्तयच्छब्दप्रतिसंबन्धि । वेत्थ

[१] वेत्थ यदितोऽधि प्रजाः प्रयन्तीति । न भगव इति ॥
[२] वेत्थ यथा पुनरावर्तन्ता ३ [1]इति । न भगव इति ।
[३] वेत्थ पथोर्देवयानस्य पितृयाण[2]स्य च व्यावर्तना ३ [1]इति । न भगव इति ॥ २ ॥
[४] वेत्थ यथाऽसौ लोको न संपूर्यता ३ [2]इति । न भगव इति ।
[५] वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति ।

1. मिति मा. 2. पितृयानस्य मा.

एवमुक्तो जैबलिः पप्रच्छ **वेत्थ — प्रयन्तीति** । प्रजाः **इतोऽधि** इत ऊर्ध्वं यत् प्रयन्ति, तत् **वेत्थ** जानीषे किम्? कर्मिणां गन्तव्यो देशः क इत्यर्थः । इतर **आह न भगव इति** । वेद्मि[1] (जाने) इति शेषः । राजा पुनः पृच्छति—**वेत्थ—आवर्तन्त इति** । कर्मिणां पुनरावृत्तिप्रकारः क इत्यर्थः । इतर आह—**न भगव इति** । पुनः पृच्छति **वेत्थ—व्यावर्तना ३ इति** । देवयानपितृयाणयोर्व्यावर्तने भेदके रूपे किं वेत्थेत्यर्थः । केन प्रकारेण तयोर्भेद इत्यर्थः । इतर आह **न भगव इति** । पुनः पृच्छति **वेत्थ—संपूर्यता ३ इति** ! अस्माल्लोकादनवरतं गच्छद्भिः पुरुषैः कस्माद्धेतोः द्युलोको न संपूर्यत इत्यर्थः । वाजसनेयके समानप्रकरणे, 'वेत्थ यथाऽसौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यत ३ इति' इति श्रवणात् । अमुष्य लोकस्याप्राप्ता क इति प्रश्नस्य फलितार्थः । इतर आह **न भगव इति** । पुनः पृच्छति **वेत्थ—भवन्तीति** । **आप** इति भूतान्तराणामप्युपलक्षणम् । भूतसूक्ष्माणि पञ्चम्यामाहुतौ **यथा** येन प्रकारेण **पुरुषवाचसः** । पुरुष

1. वेद्मि क.

किमिति प्रश्नपर्यवसानं तत्तद्वाक्यावसानगतप्लुतिबलात् । वाक्यान्ते स्वरविशेषेण प्रश्नव्यञ्जनमानुभविकम् । तत्र प्रथमवाक्येऽपि ग्राह्यम् । नेत्येतदनन्तरं सर्वत्र वेद्मीति विपरिणम्यानुषङ्गः । **व्यावर्तने** इति द्वितीयाद्विवचनम् । **यथा** येन प्रकारेण न संपूर्यते, तं प्रकारं वेत्थेति प्रश्ने संपूरणाभावहेतुरेवान्ततः प्रकारत्वेन विवक्षित इति **कस्माद्धेतोरित्युक्तम्** । अनवरतं गच्छद्भिरित्यादिपूरणे प्रमाणमाह **वाजसनेयक** इति । **पञ्चम्यामिति** । वाजसनेयके, 'यतिष्यामाहुत्यां हुतायामापः पुरुषवाच' इति आहुतिसंख्याप्रश्नः प्रतीयते । अत्र तु पञ्चम्यामिति निर्देशात् स नास्तीति वैषम्यमिति चेन्न तत्रापि संख्याप्रश्ने तात्पर्यविरहात् । कतमस्यामहुत्यां पुरुषाकारपरिणाम इति प्रश्ने, सा आहुतिः का, ततः पूर्वमाहुतयः काः, तत्र कस्कः परिणाम इत्येव

नैव भगव इति ॥ ३ ॥

इति वचो यासां ताः **पुरुषवचसः**। पुरुषशब्दाभिलप्या इत्यर्थः। कस्य पञ्चम्यामाहुताविति अपेक्षायां पुरुषवचस्त्वभवनकर्तृतया निर्दिष्टा आप एव हूयमानतया संबध्यन्ते। असंनिहितार्थान्तरकल्पने गौरवात्। ततश्चापां पञ्चम्यामाहुतौ आपः पुरुषवचसो भवन्तीत्यर्थः। ततश्चापामेव पञ्चस्वप्याहुतिषु हूयमानत्वमिति सिध्यतीति द्रष्टव्यम्। इतर आह **नैव भगव इति**। [अत्र] रंहत्यधिकरणे **भगवता भाष्यकृता**, 'कर्मिणां गन्तव्यदेशम्, पुनरावृत्तिप्रकारम्, देवयानपितृयाणपथव्यावर्तने, अमुष्य लोकस्याप्राप्तारञ्च वेत्थेति पृष्ट्वा, 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती' इति पप्रच्छे' ति भाषितम्।

पृष्टं भवति। अत्रापि का पञ्चमी, काः पूर्वाहुतय इत्यादिप्रश्न एवेति। **अभिलप्या भवन्ती**ति। अभिलप्यशरीररूपेण कुक्षौ परिणमन्तीत्यर्थः। ननु पुरुषा भवन्तीत्यलम्। किमिति **पुरुषवचस** इतीति चेत्—किमाक्षेपः क्रियते, अन्य एवार्थो वक्तव्य इति, किं वा अधिकप्रयोगफलजिज्ञासामात्रम्? वाजसनेयके, 'पुरुषवाचो भूत्वा समुत्थाय वदन्ति' इति वचनात् वदनोपयोगि वागिन्द्रियं व्यक्तवाचां पुरुषाणां यत्, तद्वत्त्वं पुरुषवाच इत्युच्यते। तत्पर्यायत्वादिह **पुरुषवचस** इत्यपि तथेत्यर्थान्तरविवक्षेवेति चेन्न—तत्रापि **वदन्ती**त्यनेनैव वागिन्द्रियाक्षेपात् **पुरुषवाचो भूत्वे**त्यस्य वैयर्थ्यात्। वाङ्मात्रं पुरुषाणामिव, अन्यत्तु अपुरुषाणामिवेति अनभिमतार्थापत्तेश्च। अतः पुरुषशब्दवाच्या इत्येवार्थस्तत्रापि। अधिकप्रयोगस्य तु 'न पुरुषपदस्य शरीरं मुख्योऽर्थः, आत्मसंबन्धादमुख्यः' इति ज्ञापनं फलम्। 'समुत्थाय वदन्ती'ति वाजसनेयके अधिकोक्तिरपि आत्मकार्योत्थानवचनरूपविशेषदर्शनात् आत्मवाचिपुरुषपदं तत्र प्रयुज्यते, न तु पूर्वाहुतिस्थलेषु, नापि तिर्यगादिष्विति प्रयोगौचित्यसूचनायेति। **नैव भगव इति**। अत्र परं **एव**कारः इङ्गितादिनाऽयमन्तिमः प्रश्न इति ज्ञात्वा प्रयुक्तः, 'नाहमत एकञ्चन वेद' इति वाजसनेयकवत्।

प्रायणे देशमेतव्यम्, पुनरावृत्तिपद्धतिम्।
देवपित्र्यध्वनोर्भेदम्, अदोलोकानवापकम् ॥ १ ॥
पञ्चाहुतिपरीणाममप्यपां पृष्टवान् नृपः।
वैश्वानरात्मविद्यार्थिन्यायात् किञ्चिदज्ञताऽस्ति किम् ॥ २ ॥
इति जिज्ञासया पञ्च प्रश्नांश्चक्रे प्रवाहणः।
अनुबन्धिपरिज्ञानविरहेऽप्येष किं वदेत् ॥ ३ ॥
पञ्चाग्निविद्यामुख्यांशमिति मुख्यः कृतोऽन्तिमः।
बृहदारण्यके त्वत्र तृतीय. पञ्चमः कृतः ॥ ४ ॥
विद्योपदेशनैर्भर्यात् प्रत्युक्तावन्यथा क्रमः।
अर्थात् प्रश्नस्य सर्वस्य समाधानं भवेदिति ॥ ५ ॥

अथ नु किमनुशिष्टोऽवोचथाः। यो हीमानि न विद्यात्, कथं सो-ऽनुशिष्टो ब्रुवीतेति।

स हाऽऽयस्तः पितुरर्धमेयाय; तँ होवाच, "अननुशिष्य वाव किल मा भगवानब्रवीत्, 'अनु त्वाऽशिष' मिति॥ ४॥ पञ्च मा राजन्यबन्धुः

एवमुक्तवन्तं श्वेतकेतुं राजा प्रत्याह, 'अथानु — ब्रुवीतेति। किं कस्मात् अनुशिष्टोऽस्मीत्युक्तवानसि। यो हि इमान्यर्थजातानि न जानीयात्, स कथं अनुशिष्टोऽस्मीति वदेदित्यर्थः। यद्वा **किमनुशिष्टः** किमर्थमनुशिष्ट इत्यर्थः।

स — एयाय। स श्वेतकेतुः राज्ञा जैबलिना **आयस्तः** आयासितस्सन् **पितुः अर्धं** स्थानमाजगाम। **तं — त्वाऽशिषमिति।** गत्वा च तं पितरमित्थमुवाच, **मामननुशिष्य** समावर्तनकाले अनुशासनीयानि सर्वाणि अननुशिष्यैव 'त्वामन्वशिषम्'इति भगवान् मां प्रति अब्रवीदित्यर्थः। तत् कथमित्यत्राह **पञ्च—विवक्तुमिति। राजन्यबन्धुः** [1]राजापशदः मां पञ्च प्रश्नान् अप्राक्षीत्। तेषां मध्ये

1. राजापशद इति न ग.

किमर्थं कमर्थम्। **इमानि न विद्यात् कथं सोऽनुशिष्ट** इति। नन्विदं कथम्? एतत्पञ्चाग्निविद्यावेदनविरहेऽपि विद्यान्तरेणानुशिष्टत्वसंभवात्। उपरि सद्विद्यासंदर्भाच्च श्वेतकेतुरनुशिष्टः सद्विद्य इति विज्ञायत इति चेत् - उच्यते। प्रसिद्धं किल द्वादशवर्षो गुरुसविधमित्त्वा मेधाबलात् साङ्गं सर्वं वेदं शीघ्रमधीत्य चतुर्विंशतिवर्ष एव प्रत्यायातो महामना अनूचानमानी स्तब्धः श्वेतकेतुरिति। स च पञ्चालानां परिषदं प्राप्तो राज्ञा पृष्ट इत्युपक्रमे श्रावितम्। तत्र यशःप्रथनाय परिषदं प्राप्य तां जित्वा राजानमपि जेष्यामीति गर्वेणाऽऽजगामेति शाङ्करोक्त्या **तस्य** गर्वभङ्गायैतावदुक्तमिति। इयमेका समाधानसरणिः। अन्या तु—पञ्चाग्निविद्याप्रयोगाविज्ञानेऽप्येतद्विषयज्ञानमावश्यकम्, सर्वेषामपि विदुषां ब्रह्मणि जगत्कारणत्वविज्ञानवत्। न च तत् स्थितमेव श्वेतकेतोः; अर्चिरादिगतेः सर्वविद्यानिष्ठानुचिन्तनीयत्वात् वैराग्यसिद्धये प्रयत्प्रजागन्तव्यदेशादिज्ञानस्य सर्वसाधारणत्वाच्च - इति वाच्यम्—अवश्यज्ञातव्योऽप्ययमंशः तत्पित्राऽपि न विशिष्य ज्ञात इत्येव संदर्भपर्यालोचनया वक्तव्यत्वात्। मुख्यस्य विद्याभागस्यैव सद्विद्यायामुपदिष्टत्वात्। पञ्चाग्निविदां तु स्वागम्यमार्गे पितृयाणवैलक्षण्यानुसंधानस्यावश्यकतया सर्वस्यास्य विद्याकुक्षिनिवेशादवर्जनीयं वेदनम्। अत एवापूर्वां पञ्चाग्निविद्यामेवाधिगन्तुं गौतमः प्रववृते, अनुषङ्गात् सर्वं ज्ञातं भविष्यतीति। तदर्थमेव विशिष्टविद्योपदेशपरेण राज्ञा तस्य चिरवसत्याज्ञापनम्, आरम्भ एव पञ्चमप्रश्नसमाधानञ्चेति। अस्तु वा श्वेतकेतोर्बुद्धिश्रद्धे विदुषः पाञ्चालसभापते. तन्मुखेन राजन्यमात्रलीनायाः पञ्चाग्निविद्याया भुवि प्रचिचारयिषया तस्याश्चोत्कटत्वरासंपत्तये समादृत इत्थं व्याहार इति। **तत्** अननुशिष्टत्वमित्यर्थः।

आयासित इति। एवमुपर्युपरि अज्ञातप्रश्नकरणेनेति शेषः। न तु उपचाराकरणेन।

ब्रह्मानजग्राह्यीत् । तेषां नैकं चनाशकं विवक्तुं " मिति ।

स होवाच, " यथा मा त्वं तदैतानवदो यथाऽहमेषां नैकञ्चन वेद, यद्यहमिमानवेदिष्यम्, कथं ते नावक्ष्यम् " इति ॥ ५ ॥

स ह गौतमो राज्ञोऽर्धमेयाय । तस्मै ह प्राप्तायार्हां चकार । स ह प्रातः समाग उदेयाय ।

एकञ्चन एकमपि प्रश्नं विवक्तुं विशिष्य वक्तुं नाशकम् न शक्तोऽ[1]भूवम् इति पितरमुवाचेत्यर्थः । [2]त्वया सम्यगनुशिष्टस्य कथमियमशक्तिः स्यादिति भावः । राजन्याः बन्धवो यस्य स राजन्यबन्धुः । राजन्यानां बन्धुरिति वा । स्वयमराजन्य इत्यर्थः । राजन्याभास इति यावत् ।

स—नावक्ष्यमिति । [सः पिता पुत्रं वक्ष्यमाणमुवाच ।] त्वं मां प्रति तदा आगमनकाले एतान् प्रश्नान् यथाऽवदः 'तेषां नैकञ्चनाशकं विवक्तुम्' इति यथोक्तवानसि, तथाऽहमपि तेषां [3]प्रश्नानां मध्ये एकञ्चन एकमपि यथा यथावत् —सत्यमित्यर्थः—न वेद नाज्ञासिषम् । यदि अज्ञासिषम्, तर्हि ते प्रियाय पुत्राय समावर्तनकाले कुतो नावक्ष्यमित्युवाचेत्यर्थः ।

स — राज्ञोऽर्धमेयाय । एवमुक्त्वा स गोत्रतो गौतमः आरुणिः राज्ञः स्थानमाजगाम । तस्मै — चकार । प्राप्ताय तस्मै गौतमाय राजा अर्हां पूजां चकारेत्यर्थः । स — उदेयाय । तदा सः प्रातःकाले राज्ञि समागे सभागते सति उदेयाय । गौतमः आजगामेत्यर्थः । यद्वा सभागः [4]भजनं भागः पूजा । तेन युक्तः अर्घ्यादिभिः पूज्यमानः स गौतमः समागत इत्यर्थः ।

1. न शक्तोऽस्मि ख. 2. त्वयेति वाक्यं ख. कोशे । 3. प्रश्नानामिति ख. कोशे । 4. भजनं क. भाजन ग. नेदं ख. कोशे ।

अथैनं वसत्योपमन्त्रयाञ्चक्रे । अनादृत्य वसतिं कुमारः प्रदुद्राव' इत्यन्यत्र श्रवणात् । अस्य ह आवसतः स्वयमायासयन् इत्यपि सुकरम् । राजन्यबन्धुरिति । 'जनको जनक इति वै जना धावन्ति' यत्र, तद्वदप्रसिद्धस्यापि प्रश्नो मया न समाहित इति निर्वेदो व्यज्यते इह । स ह गौतम इति । न तु श्वेतकेतुरपि । पितुः सकाशादेव पश्चादधिजिगमिषया स आहूतोऽपि न सह जग्मेति । सभाग इत्यपि । अर्हां कृत्वा, 'वरं भगवते गौतमाय दद्म' इत्युक्तं

तँ होवाच, मानुषस्य भगवन् गौतम! वित्तस्य वरं वृणीथाः' इति । स होवाच, 'तवैव राजन्! मानुषं वित्तम्। यामेव कुमारस्यान्ते वाचमभाषथाः, तामेव ब्रूहीति ॥ ६ ॥

स ह कृच्छ्रीबभूव । तँ ह चिरं वसेत्याज्ञापयाञ्चकार । तँ होवाच, 'यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या

तं — [1]**वृणीथा इति** । हे भगवन् गौतम! मनुष्यसंबन्धिवित्तसंबन्धि वरं वृणीष्वेत्युवाचेत्यर्थः । [2]**स होवाच । सः** गौतमः प्रत्युवाचेत्यर्थः । तदेवाह — **तवैव — ब्रूहीति** । हे राजन्! मानुषं वित्तं तवैव तिष्ठतु [[3]तेन मम न किञ्चित् प्रयोजनम् । किन्तु] मत्पुत्रस्य समीपे पञ्चप्रश्नलक्षणां यां वाचं उक्तवानसि, तामेव मे ब्रूहीति ।

स — चक्कार । एवमुक्तो राजा गौतमस्याप्रत्याख्येयतां ज्ञात्वा **कृच्छ्री** दुःखितो बभूव । तञ्च गौतमं विद्यार्थं, 'चिरं वस' इत्याज्ञप्तवान् । **तं होवाच** एवमाज्ञाप्य राजा तं गौतमं पुनरुवाच । किमिति । **यथा — अभूदिति** । हे गौतम! त्वं मां **यथा** अवदः । तथा करिष्यामीति शेषः । इयं वक्ष्यमाणा विद्या पुरा विद्यमानाऽपि (?) **यथा** येन प्रकारेण—यस्माद्धेतोरिति यावत्—त्वत्तः प्राक्

1. तं **होवाच** । राजा गौतमं वक्ष्यमाणमुवाचेत्यर्थं । **मानुषस्य — वृणीथाः ख.** 2. वाक्यमिदं **ख.** कोशे ।

प्रवाहणेन । गौतमेन च, 'प्रतिज्ञातो म एष वरः' इत्युक्ता विद्यैव सा प्रार्थिता । अथोक्तं राज्ञा, 'दैवेषु वै गौतम तद् वरेषु । मानुषाणां ब्रूहि' इति । तदुपेक्ष्य पुनरपि विद्यैव पृष्टेति क्रम इहानुसंधेयः । तथाच दत्तवरत्वाद् भागधेयशाली विद्यामर्थयामासेत्यपि **सभाग उदेयाये**त्यत्र विवक्षितम । **तामेव ब्रूहीति** । तत्प्रश्नजिज्ञासितार्थमुपदिशेत्यर्थः । **कृच्छ्रीबभूव** । कथमयं भगवान् शिष्यः कार्य इति; कथञ्च दत्तो वरो न पूरणीय इति । **यथेयमिति** द्वितीय**यथा**शब्दः पूर्वं **यथाह**मिति द्वितीय**यथा**शब्दवत् यथावदित्यर्थेऽपि स्यात् । **पुरेति** । इदं गच्छतीत्यत्रान्वेति । 'यावत् पुरानिपातयोर्लट्' इति लडिति । **विद्या** पञ्चाग्निविद्या । त्वत्तः पूर्वं ब्राह्मणगतत्वाभावात् अन्यतस्ते तदधिगमस्य दुर्वचत्वात् त्वत्प्रार्थनामनुसृत्य प्रवक्ष्यामि । अतश्चिरं वसेति भावः ।

ब्राह्मणान् गच्छति, तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूत्' इति।

तस्मै होवाच (७)—

इति पञ्चमाध्याये तृतीयः खण्डः

५—४.

असौ वाव लोको गौतमाग्निः; तस्यादित्य एव समित् रश्मयो धूमोऽहरर्चिः चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः॥ १॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति।

ब्राह्मणान् [1]न प्राप्नवती' तस्मात् सर्वेषु लोकेषु **क्षत्रस्यैव प्रशासनमभूत्** क्षत्रियजातेरेवैतद्विद्योपदेष्टृत्वम्। अतो ब्राह्मणेषु एतद्विद्याया अभावात् ब्राह्मणानामेव समीपं गमिष्यामीति बुद्धि[2]र्न कार्या। चिरवासाज्ञापनमपि सोढव्यमिति भावः।

तस्मै होवाच। अथ चिरकालमुषितवते तस्मै गौतमाय राजा विद्यामुपदिदेशेत्यर्थः। तत्र, 'वेत्थ यथा पञ्चम्यामाहुतावापः' इति पञ्चमप्रश्नप्रतिवचनस्य इतरप्रतिवचनानुकूलत्वात् प्रथमतस्तदेवाह — **असौ वाव लोको गौतमाग्निः**। हे गौतम! **असौ लोकः** स्वर्गलोक एवाग्निः। **तस्यादित्य एव समित्**। आदित्येन हि द्युलोको दीप्यते। **रश्मयो धूमः**। धूमस्य समित्प्रभवत्वादादित्यरश्मीनां धूमत्वम्। **अहरर्चिः**। प्रकाशकत्वात्। **चन्द्रमा अङ्गाराः**। अर्चिःप्रशमकालप्रभवत्वाच्च चन्द्रमसोऽङ्गारत्वम्। **नक्षत्राणि विस्फुलिङ्गाः**। चन्द्रावयवत्व उपलभ्यमानत्वात् विस्फुलिङ्गत्वम्। **तस्मिन्** — **जुह्वति**। आदित्यादिलक्षणसमिदाद्युपेते द्युलोकलक्षणाग्नौ **देवाः** इन्द्रियाणि **श्रद्धां** 'श्रद्धा वा आप' इति श्रुतेः श्रद्धा-

1. न गच्छति न प्राप्नवती ख. ग. 2. माकार्या ख.

अग्नीन् पञ्च वदन् तदनुगुणं समिद्धूमादिकमपि कल्पयति **असाविति**त्यादिना। वाजसनेयके एतदपेक्षया कल्पनावैषम्यं किञ्चिदस्तीति अनुष्ठाने विकल्पः कल्प्यः। **देवाः** इन्द्रियाणीति। ननु वाजसनेयपञ्चाग्निविद्यायाम्, मृतं पुरुषं दाहाग्नये हृतं देवा अग्नौ जुह्वतीत्युक्तम्। न हि तत्र देवा इन्द्रियाणि। इन्द्रियाणां मरणकाल एव जीवेन सह निष्क्रान्तत्वादिति चेत्— यत्र येषां होमकर्तृत्वं संभवति, तत्र तेषामौचित्याद् देवशब्देन ग्रहणमस्तु। यद्वा तत्रापि

तस्या आहुतेः सोमो राजा संभवति ॥ २ ॥

इति पञ्चमाध्याये चतुर्थः खण्डः ।

शब्दिता अपो जुह्वति । आत्मधर्मभूतबुद्धिविशेषलक्षणश्रद्धाया होतव्यत्वासंभवात् श्रद्धाशब्देन आप एवोच्यन्त इति द्रष्टव्यम् । न चेन्द्रियाणां द्युलोकाग्नौ भूतसूक्ष्मरूपाहुतिप्रक्षेपकर्तृत्वं कथमिति वाच्यम् — इन्द्रियाणामभावे भूतसूक्ष्माणां जीवं परिष्वज्य द्युलोकगमनासंभवादिन्द्रियाणां होतृत्वमुपपद्य इति द्रष्टव्यम् । द्युलोकादिप्रापककर्मणामिन्द्रियाधीनत्वाद्वा तथोक्तिरिति[1] द्रष्टव्यम् । **तस्या आहुतेः सोमो राजा संभवति** । एवं[2] स्वकर्मभिर्द्युलोकं गतो जीवः स्वर्गभोगयोग्यदिव्यदेहयुक्तो भवतीत्यर्थः । न च अप्छब्दितानां भूतसूक्ष्माणां सोमराजभावे कथिते कथं जीवस्य सोमराजभाव उच्यत इति वाच्यम् — उत्तरत्र पितृयाणे, 'एष सोमो राजा' इति चन्द्रमसं प्राप्तस्य जीवस्य सोमराजभावश्रवणात् अत्र निर्दिश्यमानसोमराजभावस्यापि भूतसूक्ष्मपरिष्वक्तजीवविषयत्वात् । ५-४.

1. तथोक्तं क.

मृतेन्द्रियाग्रहणेऽपि संस्कर्त्रिन्द्रियग्रहणसंभवादेवशब्दस्यैकार्थ्यं न भज्यते । वस्तुतो मृतभोगसाधनप्रवृत्ततदिन्द्रियाद्यधिष्ठातृदेवतापर्यन्तार्थकत्वादेवपदस्य दाहादिशव्यकर्मापि तदधीनमेवेति । **श्रद्धा वा आप** इति । अत्र, 'मनसा सृष्टा आपश्च वरुणश्च । आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे (२-१-७.)' इति ऐतरेयोपनिषदप्यनुसंधेया । **श्रद्धा** आस्तिक्यम् । अस्ति परलोक इति बुद्धिमत एव हि भूतसूक्ष्मं परलोकं गच्छेदिति श्रद्धापदेन तादृश्य आप उच्यन्ते । होम्यतादशायामपि जीवः सश्रद्धः । उपपादितश्च शाङ्करे, अर्चिरादिना धूमादिना च गच्छतां वासनाज्ञानेन सविज्ञानत्वम्, न त्ववरोहकाल इव मूर्छितत्वमिति अवरोहप्रकरणान्ते । श्रद्धाफलञ्च सोमराजभावादि, 'यो यच्छ्रद्धः स एव स' इति । एवं संपरिष्वक्तस्य द्युलोकारंहणमेवात्र **तस्मिन्नग्नौ देवाः श्रद्धां जुह्वती**ति दर्शितम् । श्रद्धानुष्ठितकर्मणं जीवं श्रद्धापदेन कथयदिदं वाक्यं भूतसूक्ष्मादिविशिष्टतया गतं कथयतीति ॥ सोमस्य चन्द्रस्य एतत्कर्मगमनात् प्राक् आगमनादूर्ध्वञ्च स्थितत्वात् तदा सोमराजोत्पत्त्ययोगादाह **स्वर्भोगे**ति । चन्द्रमसं प्राप्तः चन्द्रतुल्यं भोग्यो भवतीति एवमुच्यत इति भावः । अन्यथा चन्द्रत्वस्यैव स्वीकारे उपरि सोमं राजानं जुह्वतीत्यत्रापि तथा स्वीकार्यतया चन्द्रलोप-नानाचन्द्रस्वीकारापत्तेश्च ।

५—५.

पर्जन्यो वाव गौतमाग्निः; तस्य वायुरेव समित् अभ्रं धूमो विद्युदर्चिः अशनिरङ्गाराः ह्रादुनयो विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवाः सोमँ राजानं जुह्वति । तस्या आहुतेर्वर्षँ संभवति ।

इति पञ्चमाध्याये पञ्चमः खण्डः ।

५—६.

पृथिवी वाव गौतमाग्निः; तस्याः संवत्सर एव समित् आकाशो धूमो रात्रिरर्चिः दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति । तस्या आहुतेरन्नँ संभवति ॥ २ ॥

इति पञ्चमाध्याये षष्ठः खण्डः ।

पर्जन्यो — विस्फुलिङ्गाः । **पर्जन्यो** वृष्टिप्रवर्तको देवः । **ह्रादुनयः** मेघगर्जितानि । शिष्टं स्पष्टम् । अत्र वाय्वादीनां समिदादिकल्पनानिमित्तं यथायोग्यमन्वेषणीयम् । **तस्मिन् — वर्षं संभवति ।** द्युलोकभोगनिमित्तकर्मावसाने सोमराजशब्दितः स देहो द्रवीभूय सह जीवेन मेघमण्डले पततीत्यर्थः । ५—५.

पृथिवी — विस्फुलिङ्गाः । **तस्याः संवत्सर एव समित् ।** संवत्सरेण कालेन समिद्धा हि पृथिवी सस्यादिनिष्पत्तये भवति । **रात्रिरर्चिः ।** नीलरूपाश्रयपृथिव्यग्नेरनुरूपत्वात् रात्रेरर्चिष्ट्वम् । **तस्मिन् — संभवति ।** श्रद्धाशब्दवाच्यानि भूतसूक्ष्माणि इन्द्रियसंयुक्तानि स्वर्गभोगयोग्यदेहाकारेण परिणतानि सुकृतक्षये द्रवीभूतानि सन्ति [1]पर्जन्यमवाप्य वर्षरूपाणि भूत्वा पृथिवीं प्राप्य व्रीहियवाद्यन्नानि भवन्तीत्यर्थः । ५—६.

1. पर्जन्यरूपाग्निं प्राप्य — पृथिवीरूपाग्निं क.

५—७.

पुरुषो वाव गौतमाग्निः; तस्य वागेव समित् प्राणो धूमो जिह्वाऽर्चिः चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः ॥ १ ॥ । तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति । तस्या आहुते रेतः संभवति ॥ २ ॥

इति पञ्चमाध्याये सप्तमः खण्डः ।

५—८.

योषा वाव गौतमाग्निः; तस्या उपस्थ एव समित् उपमन्त्रयते स धूमो योनिरर्चिः, यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति । तस्या आहुतेर्गर्भः संभवति ॥ २ ॥

इति पञ्चमाध्याये अष्टमः खण्डः ।

पुरुषो — विस्फुलिङ्गाः । [1]**तस्य वागेव समित् ।** वाचा हि समिध्यते पुरुषः; नावाग्नी । अतो वाक् समित् । एवमन्यत् द्रष्टव्यम् । **तस्मिन् — संभवति ।** एवं व्रीह्याद्यन्नरूपाणि भूतसूक्ष्माणि जीवसंश्लिष्टानि पुरुषेणाद्यमानानि पुरुषे रेतोरूपेण परिणमन्त इत्यर्थः । ५—७.

योषा — विस्फुलिङ्गाः । **उपमन्त्रणं** संकेतकरणम् । लोहितत्त्वात् योनेरर्चिष्ट्वम् । **अन्तः करणं** मिथुनीकरणम् । **अभिनन्दाः** तज्जन्यसुखलवाः । **तस्मिन् — संभवति ।** रेतोरूपाणि तानि योनिद्वारा स्त्रियं प्रविश्य गर्भत्वेन परिणमन्त इत्यर्थः । ५—८.

1. तस्येत्यादि – योषेत्यन्तस्य स्थाने, स्पष्टोऽर्थ इति क.

५—९.

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति ।

स उल्बावृतो गर्भो दश वा मासान् अन्तः शयित्वा यावद्वाऽथ जायते ॥ १ ॥ स जातो यावदायुषं जीवति । तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः संभूतो भवति ॥ २ ॥

इति पञ्चमाध्याये नवमः खण्डः ।

इति तु — **भवन्तीति** । उक्तप्रकारेण श्रद्धासोमवृष्ट्यन्नरेतोरूपाहुतीनां मध्ये रेतोरूपायामाहुतौ अप्छब्दितानि भूतसूक्ष्माणि पुरुषशब्दाभिलपनीयानि भवन्तीत्यर्थः । **इति**शब्दः पञ्चमप्रश्नप्रतिवचनसमाप्तिद्योतनार्थः ।

स उल्बावृतो — **जायते** । स गर्भः **उल्बेन** जरायुणा वेष्टनेन वेष्टितस्सन् [1]**दश मासान्** वा **यावद्वा** नव वा एकादश वा द्वादश वा मातुः कुक्षौ **शयित्वा अथ** अनन्तरं जायत इत्यर्थः । **स जातो** — **भवति** । स गर्भो जातश्च यावदायुर्जीवति । आयुःक्षयसमय एव तं प्रेतं पुरुषं **दिष्टं** परलोकाय निर्दिष्टम्, अथ वा **दिष्टं** कर्मानुसृत्य—**यतः** द्युलोकपर्जन्याद्यग्नेः **इतः** इहाऽऽगतः, **यतश्च** योषिद्रूपाग्नेः **संभूतः** उत्पन्नः—तस्मा अग्नय एव देवा हरन्ति । ततश्च द्युपर्जन्यपृथिवीपुरुषयोषित्सु पुनरपि संभ्रमतीत्यर्थः ।

अयञ्चोपन्यासो **वैराग्यहेतोः** । कष्टं हि मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य [2]गर्भस्य उल्बाशुचि[3]पटावृतस्य शुक्रशोणितबीजस्य मातु-

1. दश वा मासान् **अन्तः** मातृकुक्षौ शयित्वा यावद्वा **ख.** 2. शोषैस्य **च** 3 पूयावृतस्य **ख.** तटावृत्तस्य **क.** शाङ्करं द्रष्टव्यम् । विशकलिततत्संग्रहरूपत्वादस्य मन्थस्य ।

इतिशब्द इति । **भवन्तीति** इतीतिशब्द इत्यर्थः । **प्रेतं दिष्टम्** — परिचयवह्निभिरग्न्यादिभिः प्रेतत्वेनोपदिष्टमित्यपि स्यात् । **अग्नय एव हरन्तीति** । नन्वत्र **एव**कारबलात् अयमग्निर्न द्युलोकाद्यग्निवत् कल्पितः; अपितु वास्तवाग्निरिति ज्ञाप्यते । **प्रेतं हरन्तीत्युक्त्वा** च प्रेतशरीरस्य दाहार्थमग्नये हरणमत्र स्मर्यते । युक्तश्चायमर्थः । वाजसनेयके, 'अथ यदा म्रियते, तदेनमग्नये हरन्ति । तस्याग्निरेवाग्निर्भवति । समित् समित् ।

५—१०.

तद्य इत्थं विदुः, ये चेमेऽरण्ये श्रद्धा तप इत्युपासते — तेऽर्चिष-

रशितपीतरसानुप्रवेशेन विवर्धमानस्य निरुद्धवीर्यबलशक्तितेजःप्रज्ञाचेष्टस्य बहुकालं शयनम्, ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिः, कर्मणोपात्तं यावत् आयुः तावदेव जीवनम्, पुनरपि घटीयन्त्रकुण्डिकान्यायेन आरोहणावरोहणलक्षणं भ्रमणं हि श्रयमाणं वैराग्यमापादयति। अत एतदुपन्यस्तमिति द्रष्टव्यम्। ५—९.

अथ, 'वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तने' इति तृतीयं प्रश्नं प्रतिवक्ति **तद्य— अभिसंभवन्ति**। प्राक्प्रस्तुतस्य संसरतो जीवस्य स्वरूपं **तदित्यनेन** परामृश्यते। **तत्** प्रत्यगात्मस्वरूपं **ये इत्थम्** उक्तप्रकारेण = द्युपर्जन्यपृथिवीपुरुष-योषित्सु श्रद्धासोमवृष्ट्यन्नरेतश्शरीरकतया देहादिलक्षणप्रकृतिविविक्ततया च ये,

---

धूमो धूम इति समशीलवाक्येनाग्निदाहस्यैवोक्तत्वात्। तत् कथं द्युपर्जन्येत्यादिना अन्यथा व्याख्यानमिति चेत्—

उच्यते। वाजसनेयके, 'यत एवेतो यतः संभूतः' इतीदृशं वाक्यं तावन्न श्रूयते। तस्मात् तत्र स एव स्वरसार्थः। इह तु अत्र वाक्ये यच्छब्दद्वये पञ्चाग्निग्रहणात् यच्छब्दार्थवाचिना **अमुय** इतिपदेनापि पञ्चाग्निग्रहणमेव कार्यम्। न च प्रेतशब्दो मृतशरीरमात्रवाची। तादृश-जीवस्यैव योगतस्तन्मुख्यार्थत्वात्। एवञ्च क्रियासमभिहारेण जीवस्य गतागतप्राप्तिरुच्यत इति विशेषार्थलाभादेवं व्याख्यातम्। शाङ्करे तु पञ्चानामग्नीनां मृतदाहाग्नेश्चाग्नित्वेनाभेदकल्पनया, 'यत एवेत' इतिवाक्यनिर्वाहः कृतः। तदपेक्षयाऽयं स्वरसोऽर्थः। वाजसनेयके, 'एनमग्नये हरन्ती'त्येव श्रवणात् **इतश्**शब्दाभावात्। अत्र **इतोऽमुय एव हरन्ती**ति तच्छ्रवणात्। न हि **इतश्**शब्दस्य गृहादित्यर्थः; किंतु भूलोकादिति। अतोऽमुय इति द्युलोकाग्निपरम्। 'यतोऽग्नेरागतः, तस्मै अग्नये हरन्ति; यतः यस्मादेवं हरणात् पुनः संभूतो भवती'त्यर्थोऽपि स्यात्। तदाऽपि द्युलोकाग्निपरत्वमेव; न तु दाहकाग्निपरत्वम्। 'यतः संभूतः यतो देशादयं जातः, तं देशं यत एवेतो भवति यादृशाग्नितः प्राप्तो भवति, तस्मै दाहकाग्नये हरन्तीत्येवंरीत्या कश्चिदर्थोऽस्त्विति चेत्। एवमपि **इतोऽमुय** इत्यत्र इतःपदं न समर्थितमिति कृतं क्लेशेन। ननु **भवन्तीति** इतिशब्दान्तेन वेद्यपञ्चाग्न्युपदेशस्य समापितत्वात् **सउल्बेत्यादि** किमर्थमित्यत्राह **अयञ्चेति**।

प्राक् प्रस्तुतस्येति। ननु कुत्र पूर्वं जीवः प्रस्तुतः। श्रद्धां जुह्वतीति आपः किल प्रस्तुताः। तासां तत्रतत्र परिणामभेदः पुरुषात्मकपरिणामपर्यन्त उक्तः। किञ्चास्याः पञ्चाग्निविद्यात्वात् अग्निपञ्चकवेदनमेव वक्तुं युक्तम्। वक्ष्यते च, 'य एतानेवं पञ्चाग्नीन् वेद' इति। अतः **तदिति** अग्निपञ्चकं समाहृत्योच्यते। **इत्थमिति** च तत्तदग्निभेदमिश्रादित्यादिसमिदादिप्रकारः। यद्वा **तच्छब्दो** नातीवाऽऽदृतः। अर्थविशेषाभावेऽपि पूर्वेण सहैकमहावाक्यत्वमात्रतात्प-

विदुरित्यर्थः। अत्र ब्रह्मात्मकतया चेत्यपि योजनीयम्। **भाष्यकृता** 'अप्रतीकालम्बनान् —' इति सूत्रे, "पञ्चाग्निविदोऽप्यर्चिरादिना गतिश्रवणात्, अर्चिरादिना गतस्य ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च। अत एव तत्क्रतुन्यायेन प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसंधानं सिद्धम्" इति हि भाषितम्।

ये च—उपासते। अरण्ये स्थित्वा श्रद्धां पुरस्कृत्य तपश्शब्दितं ब्रह्मोपासत इत्यर्थः। वाजसनेयके समानप्रकरणे, 'श्रद्धां सत्यमुपासते' इति श्रवणात्,

---

र्येण बहुलमिह तत्पदप्रयोगात्। यथा, 'तदुह जानश्रुतिः पौत्रायणः षट्छतानि', 'तद्य इह रमणीयचरणाः' इत्येवम्। अस्तु वाऽर्थः; तथापि **तत्** तत्र = एवं संसरत्सु पुरुषेषु मध्ये ये एवं केचिद्विदुरित्यर्थः स्यात्। अतो न जीवस्वरूपं तच्छब्दार्थ इति—अत्रोच्यते। इह तावत् **विदुरिति** कर्मसाकाङ्क्षम्। **इत्थं**शब्दश्च एतत्प्रकारकमिति विशेषणभूतार्थस्वरसं न विशेष्यवाचि। **तत्पदं च** न निरर्थकम्; नापि स्वरसतः सप्तम्यन्तमिति द्वितीयान्तं तद् विशेष्यवाचि। तत्र वेदनफलस्येह कीर्तनात् प्राप्यस्योपास्यत्वौचित्यात् प्राप्यं तच्छब्देन ग्रहीतुमुचितम्। जीवश्च मुक्तौ प्राप्यः। न च स न पूर्वोक्तः, येन **तद्**वृत्तं तं न परामृशेत्। 'श्रद्धां जुह्वति', 'आपः पुरुषवचसः' इत्यादौ श्रद्धादिपदं हि भूतसूक्ष्मविशिष्टजीवपरम्। 'य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते—एष सोमोराजे'ति सोमराजत्वेनेष्टादिकारिणामुक्तत्वात् अत्रापि श्रद्धायाः सोमराजभावकथनेन श्रद्धापदादिष्टादिकारिणां प्रतीतेः। तदिदम्, 'अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः' इति सूत्रितमेव। शरीरवाचिनां शरीरपर्यन्तत्वनयाच्च श्रद्धादिपदं विशिष्टजीवपरम्। तत्र इत्थमिति पदेन भूतसूक्ष्मशरीरकत्वरूपप्रकारस्यापि सुवचतया तु प्राप्यस्वरूपमात्रपरं तदितीष्यते। **ब्रह्मवित्तमं** गौतमं प्रति प्रवाहणोपदेशाच्च **तदिति** गौतमेनापि विदितं श्रुतिप्रसिद्धं जीवस्वरूपं सुग्रहम्। ननु, 'स एनान् ब्रह्म गमयती'ति ब्रह्मणः प्राप्यत्वश्रवणात् गौतमाविदितप्रसिद्धतमब्रह्मपरमेव तत्पदमस्तु। न च तन्न पूर्वोक्तम्। अपर्यवसानवृत्त्या श्रद्धादिपदस्यापि ब्रह्मपर्यन्तत्वात्। विशिष्टस्यैव कार्यत्वादिति चेन्न—तथासति, 'ये चेमेऽरण्ये' इति विशिष्य ब्रह्मविशेष्यकोपासनोक्तेर्वैयर्थ्यप्रसङ्गात्। तेन ब्रह्मेतरविशेष्यकमिदमुपासनामिति लाभात्।

नन्वेवं **तत्** जीवस्वरूपं **इत्थं** पञ्चाग्निहोम्यसूक्ष्मशरीरकत्वेन ये विदुरित्यर्थस्वीकारे ब्रह्मणोऽनुपासनान्न ब्रह्मप्राप्तिसंभवः। न चेत्थमिति ब्रह्मात्मकत्वप्रकारपरम्। तदंशस्य प्रकरणादप्रतीतेः; अत एव **ब्रह्मात्मकतयाचेत्यपि योजनीयमित्युक्तमिति** चेन्न—**तच्छब्देन** यथावस्थितात्मस्वरूपस्य विवक्षितत्वात् आत्मयाथात्म्यस्य च ज्ञानानन्दत्वादिरूपत्वत्, परमात्मशेषत्वतदपृथक्सिद्धत्वादिरूपतायाः अपि सत्त्वेन आत्मयाथात्म्यानुसंधाने ब्रह्मणो विशेषणतया प्रविष्टत्वात्। अत एव ब्रह्मात्मकत्वात्मानुसंधानं पञ्चाग्निविद्यायामिति संप्रदायः। अन्यत्र सत्यतपश्शब्दवाच्यब्रह्मविशेष्यकत्वकण्ठोक्तया ब्रह्मणो विशेष्यतयाऽनुसंधानमावश्यकम्। अत्र भाष्ये, **प्रकृतिविविक्तयेति, ब्रह्मात्मकतया चेति** च विवरणं, 'विविक्ते चिदचिद्विस्तुनी' इति गीताभाष्य-

मभिसंभवन्ति, अर्चिषोऽहः, अह्न आपूर्यमाणपक्षम्, आपूर्यमाणपक्षात् यान् षडुदङ्ङेति मासाँस्तान् (१), मासेभ्यः संवत्सरँ, संवत्सरादा-

सत्यशब्दस्य ब्रह्मपरत्वात् तपश्शब्दोऽपि ब्रह्मपरः। "अनियमः सर्वेषाम् —" इत्यधिकरणे भगवता भाष्यकृता, "'तद्य इत्थं विदुः' 'य एवमेतद्विदुः' इति पञ्चाग्निविद्यानिष्ठान्, 'ये चेमे' इत्यादिना श्रद्धापूर्वकं ब्रह्मोपासीनांश्चोद्दिश्यार्चिरादिका गतिरुपदिश्यते। 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सत्यं त्वेव विजिज्ञासितव्यम्' इति सत्यशब्दस्य ब्रह्मणि प्रसिद्धेः तपश्शब्दस्यापि तेनैकार्थ्यात् सत्यतपश्शब्दाभ्यां ब्रह्मैवाभिधीयते। श्रद्धापूर्वकं ब्रह्मोपासनञ्चान्यत्र श्रुतम्; 'सत्यं त्वेव विजिज्ञासितव्यम्' इत्युपक्रम्य, 'श्रद्धा त्वेव विजिज्ञासितव्या' इति श्रुतेः" इति हि भाषितम्। उक्तं च व्यासार्यैः, "परमं यो महत् तप इत्यादिषु तपश्शब्दस्य ब्रह्मपरत्व" मिति। अत्र वाजसनेयके, 'श्रद्धां सत्यम्' इति श्रद्धाशब्दस्य द्वितीयान्तत्वश्रवणात् इहापि श्रद्धाशब्दो द्वितीयान्तः। छान्दसत्वात्, 'सुपां सुलुक्' इति सुपो लुक्। ततश्च पुरस्कृत्येध्याहारः। श्रद्धां पुरस्कृत्य ब्रह्मोपासत इत्यर्थः। इतिस्त्वविवक्षितः। अथवा एवकारोऽत्राध्याहर्तव्यः। ब्रह्मेत्येव य उपासत इत्यर्थः। ततश्च अब्रह्मोपास-

(८–२३.) अप्रतीकालम्बनसूत्रभाष्यादि मनसिकृत्य। न तु इत्थंशब्दस्यैव तत्तदर्थकतया। पञ्चाग्निहोम्यभूतसूक्ष्मशरीरकत्वरूपेत्थंशब्दार्थत एव तद्विविक्तत्वस्य, तच्छब्दार्थशोधनत एव ब्रह्मात्मकत्वस्य च लब्धत्वादिति। न तु तत्पदं पञ्चाग्निपरम्; तेषां होमाधारतयोपसर्जनत्वात्। जीवोपासनस्य सर्वविद्यासाधारण्यात् इतरविद्याव्यावृत्तिस्फुटप्रतिपत्तये तु विशेषणभूताग्निग्रहणेन **पञ्चाग्नीन् वेदेत्येतदनुसृत्य पञ्चाग्निविद्येति नाम।**

यद्यपि स्यात् — तत्पदं श्रद्धासोमवर्षान्नरेतःपदानुस्यूतपरामृष्टभूतसूक्ष्मपरम्; **इत्थमिति च पञ्चाग्निहोम्यत्वपरम्।** तत्र, 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती'त्युक्तत्वात् श्रद्धामयकर्मिशरीरस्य तद्भोगसाधनप्रवृत्तेन्द्रियहोम्यत्वावगमात् जीवानुसंधानं सिद्धमेव। यद्वा तदिति समाहारबलात् जीवभूतसूक्ष्मोभयपरम्; इत्थमिति च तयोर्विविक्तत्वपरं यथागीताभाष्यम्। अथवा तदिति अग्निपञ्चकपरम्; **इत्थमिति** समिदादिप्रकारवत् जीवसंश्लिष्टभूतसूक्ष्महोमाधारत्वरूपप्रकारस्यापि बोधकम्। अपि वा 'एवंवित्', 'इत्थंवित्' इत्यादाविव इत्थम्पदमेव विशेष्यान्तरनिरपेक्षं उक्तप्रकारविशिष्टोक्तविशेष्यपर्यन्तपरं सत् विदुरित्यस्य कर्म। तत्र च सर्वत्र जीवस्य प्राप्याकारेणानुसधाने ब्रह्मात्मकत्वमप्यनुप्रविष्टमिति — तथापि **अनियमाधिकरणश्रुतप्रकाशिकाधृतस्मृतिवचने** उक्तच्छान्दोग्यवाजसनेयकवाक्यविवरणरूपे, **'य एवमेनं जानन्ती'ति निर्देशस्वरसात् तदर्थं स्वात्मानमित्यध्याहारे गौरवाच्च तदिति जीवपरं वर्णितमिति। तत्रैव श्रद्धादिपदार्थतदन्वयप्रकारोऽपि द्रष्टव्यः। अन्यथा श्रद्धापदं तत्सोमपरत्वे स्वरसाच्चयमिति।**

दित्यम्, आदित्याच्चन्द्रमसम्, चन्द्रमसो विद्युतम्। तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति। एष देवयानः पन्था इति ॥ २ ॥

अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते, ते धूममभिसंभवन्ति, धूमाद्रात्रिम्, रात्रेरपरपक्षम्, अपरपक्षात् यान् षड् दक्षिणैति मासाँ-

---

नव्यावृत्तिफलकोऽयमितिशब्दो द्रष्टव्यः। यद्वा श्रद्धातपश्शब्दयोः प्रसिद्ध एवार्थः। श्रद्धातपःपरायणानाञ्च ब्रह्मविद्यानिष्ठत्वमर्थसिद्धम्। ततश्च ब्रह्मविद्यानिष्ठा इत्यर्थः फलति। अयमप्यर्थः, "तदप्यविरुद्धम्। आर्थत्वादपि शाब्दत्वं [1]संभवत् युक्ततमम्" इति वदतां व्यासार्याणामनुमत एव।

तेऽर्चिषमभिसंभवन्ति। [2]अर्चिर्देवतामातिवाहिकतया प्राप्नुवन्तीत्यर्थः। अत्र अर्चिरादिशब्दाः [3]तत्तदभिमानिदेवतापराः। **तत्पुरुषोऽ — गमयति**। **तत्पुरुषः** वैद्युतः पुरुषः, [स एव] **अमानवः** असंसारी ब्रह्मलोकादागत्य **एनान्** पूर्वोक्तद्विविधोपासकान् ब्रह्मलोकं प्रापयतीत्यर्थः। 'अमानवस्स एत्य ब्रह्मलोकान् गमयती' ति श्रुत्यन्तरे श्रवणात्। **एष देवयानः पन्था इति**। स्पष्टोऽर्थः।

अथ — प्राप्नुवन्ति। **ये** पुरुषाः ग्राम एव स्थिताः[4]। **इष्टं** यागादि; **पूर्तं** खातादि। **दत्तं** दानम्। **इतिशब्दः** तज्जातीयोपवासादिकर्मान्तरपरः। यागदानहोमादीनि कर्माणि येऽनुतिष्ठन्तीत्यर्थः। [5]'उक्तप्रकारेणानुतिष्ठन्तीत्यर्थ' इति व्यासार्यवचनस्याप्ययमेवार्थः। श्रुतौ पूर्वमनुष्ठानप्रकारानुवृत्तेः। [6]यद्वा श्रद्धापूर्वकत्वरूपोक्तप्रकारवाची **इतिशब्दः**। **ते धूममभिसंभवन्ति** धूमदेवतां प्रतिपद्यन्ते आतिवाहिकत्वेनेत्यर्थः। अत्रापि धूमादिशब्दाः तत्तदभिमानिदेवतापराः। **दक्षिणैति** दक्षिणां दिशमादित्य एति। "दक्षिणादाच्" इति आजन्तोऽयं शब्दः। [7]दक्षिणा-

1. 'भवतीति उक्तम्' **ग.** 2. नेदं वाक्यं **क** कोशे। प्राप्नुवन्तीति **ग** पाठः प्राप्नोतीत्यर्थः। शिष्टं स्पष्टम् इति **ख.** 3. तत्तादति **क.** अन्यत्र तादिति। 4. अयं **ग.** पाठः। पा स्थित्वा। 5. **उक्तेत्यादि इत्यर्थ** इत्यन्तं **क.** कोशे न। 6. यद्वेति पक्षो न **ख. कोशे**। 7. **शब्द इत्येतदनन्तरं दक्षिणायनमासान्** प्राप्याप्यविद्वांस एव न संवत्सरमित्येव **ग.**

स्तान्—नैते संवत्सरमभिप्राप्नुवन्ति (३)— मासेभ्यः पितृलोकम्, पितृलोकादाकाशम्, आकाशाच्चन्द्रमसम्। एष सोमो राजा; तद् देवानामन्नम्; तं देवा भक्षयन्ति ॥ ४ ॥

तस्मिन् यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते

यनमासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः। **नैते संवत्सरमभिप्राप्नुवन्ति**। एते इष्टादिकेवलकर्मकारिणः दक्षिणायनमासान् प्राप्यापि विद्वांस इव न संवत्सरदेवतां प्राप्नुवन्तीत्यर्थः। पुनः किं प्राप्नुवन्तीत्यत्राह **मासेभ्यः — चन्द्रमसम्**। स्पष्टोऽर्थः। एतेन, 'वेत्थ यदितोऽधि प्रजाः प्रयन्ती'ति प्रथमश्च[1] प्रश्नः प्रत्युक्तो भवति। **एष सोमो राजा**। अत्र **एष** इत्यनेन न अभिसंभाव्यश्चन्द्रमाः परामृश्यते। चन्द्रमसः सोमराजभावोपदेशस्य व्यर्थत्वात्। अपि तु इष्टादिकारी अभिसंभविता परामृश्यते। 'तस्या आहुतेः सोमो राजा संभवती'ति न्यायेन [2]स्वर्भोगयोग्यदिव्यदेहयुक्तो भवतीत्यर्थः। **तद् देवानामन्नम्**। [3]अन्नवत् स देवानामुपकरणभूतो भवतीत्यर्थः। **तं देवा भक्षयन्ति**। तं इष्टादिकारिणं देवभाव[4]मुपगतं आजानसिद्धा देवा **भक्षयन्ति** स्वकैङ्कर्येषु पशूनिव [5]विनियुञ्जत इत्यर्थः। सूत्रितञ्च, 'भाक्तं वाऽनात्मवित्त्वात्' इति।

तस्मिन् यावत्संपातमुषित्वा। संपतत्यनेनेति **संपातः** कर्मशेषः (विशेषः?)। यावत्कर्मशे (र्मविशे?) ष मुषित्वेत्यर्थः। यावच्छब्दः साकल्यार्थः।

1. चकारो न ग- कोशे। 2. स्वर्गभोग ख. 3. अन्नेत्यादि न। किन्तु तदुपकरणभूत इति ग. 4. देवभागं क. 5. 'वि' इति क. कोशे न।

अभिसंभवितेति। **एष** इत्येकवचनमपि सोमो राजेत्येतदनुसारादिति भावः। **एष** इत्यस्य एवं चन्द्रमसं प्राप्त इत्यर्थात् सोमराजत्वं तस्य गौणम्। **यावत्संपातमित्यस्य** पतनपर्यन्तमित्यर्थे तत्पदं व्यर्थम्। पतनार्हद्रव्यं क्वचिदुच्यते, यथा, 'मन्थे संपातमवनये'दिति प्राक्। तदत्रानन्वितम्। अतोऽन्यथा व्याख्याति **संपतन्ती**ति। अत्र शाङ्करे संपतन्ति येनेति संपातः कर्मक्षय इत्युक्तम्। एवञ्च कर्मक्षयं यावदित्युक्तौ, 'प्राप्यान्तं कर्मण' इति वाक्यसमानार्थकत्वं भवत्येव। श्रीभाष्ये तु, 'संपतन्त्यनेन स्वर्गं लोकमिति संपातः कर्मोच्यते' इति पूर्वमुक्त्वा पश्चात् 'यावत्संपातमिति फलदानप्रवृत्तकर्मविशेषविषय'मित्युक्तम्। **संपातः कर्मशेष** इति व्याख्या तु न क्वापि। यदि तु संपतन्त्यनेन भुक्तमिति संपातः पुनरावृत्तिहेतुः

यथेतमाकाशम्, आकाशाद्वायुम् ।

साकल्यञ्च फलदानप्रवृत्तकर्मविशेषविषयम्; न तु सर्वकर्मविषयम्[1] । 'वेत्थ यथा पुनरावर्तन्त' इति द्वितीयप्रश्नं प्रतिवक्ति **अथैत—यथेतम्** । **अथ** अनन्तरं **एतमेवाध्वानं** धूमादिमार्गं **यथेतं** यथागतं पुनर्निवर्तन्ते । धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशक्रमेणाऽऽरोहणात् तेनैव विपरीतक्रमेणावरोहणे प्राप्ते, अत्र विशेषमाह—**आकाशमाकाशाद्वायुम्** । यथा आरोहणे आकाशाच्चन्द्रमसमभिसंभवन्ति, एवमवरोहणे चन्द्रमस आकाशमभिसंभवन्ति । आरोहणावरोहणयोराकाशाभिसंभवस्त्वविशिष्ट इति भावः । **आकाशाद्वायुम्** । अभिसंभवन्तीति शेषः । अत्र, 'वायुर्भूत्वा धूमो भवती'त्युत्तरत्र श्रवणात् अत्राप्यवरोहन्त आकाशो भवन्ति । वायुर्भवन्तीत्येवार्थः । अवरोहताञ्च आकाशादिभवनं न तच्छरीरकत्वम् । सर्गाद्यकालमारभ्य आप्रलयमाकाशाद्यभिमानिदेवतानामन्यासां वलृतानां सत्त्वेन प्रतिक्षणमवरोहतामाकाशाद्यभिमानिदेवतात्वानुपपत्तेः । अतः तत्सादृश्यमेवार्थः । या आपः चन्द्रमण्डले दिव्यशरीरमारब्धवत्यः, तासां कर्मक्षये द्रवीभूतानामाकाशगतानां भेदकाकारप्रहाणेनाकाशसादृश्ये तदुपश्लिष्टाजीवा अपि आकाशसमा[2] उच्यन्ते । ताश्चाऽऽप इतश्चामुतश्च वायुना नीयमाना वायुसमा भवन्ति । ततश्च तत्संश्लिष्टो जीवोऽपि वायुर्भवतीत्युच्यते । एवमुत्तरत्रापि द्रष्टव्यम् ।

1. विषयं द्रष्टव्यम् **ख.** 2 समा इत्युच्यन्ते **क.**

कर्मेति, पूर्वं संपातो हुतशेष इतिवत्, कर्मशेष उच्यते, तदा तस्य **निवर्तन्त** इत्यत्रान्वयः स्यात्, न तु उषित्वेत्यत्र । अतः संपातः कर्मविशेषः । यावत्कर्मविशेषमुषित्वेति पाठः स्यात्, भाष्यानुरोधात् । यद्वा पूर्वं देवभक्ष्यमाणत्ववचनेन कर्मफलं दर्शितमेव । तत्कर्मांशो य. शेषः तत्पर्यन्तमुषित्वेत्यर्थ इति । **साकल्यार्थक** इति । **संपातं यावदिति** यावच्छब्दस्यावध्यर्थकत्वेऽपि कर्मविशेषसत्तापर्यन्तमुषित्वेति समन्वितमेव । साकल्यपक्षेऽपि सर्वकर्मविषयकता न भवतीत्यस्य व्यक्तये त्वेवं व्याख्यातम्; 'यत् किञ्चेह करोत्ययम्' इति साकल्यदर्शिबृहदारण्यकानुरोधात् । साकल्यकण्ठोक्तिपक्षे चात्र यावन्तः संपाताः कर्मविशेषाः तावतः प्रति उषित्वेत्यर्थः । अत्रापि पूर्ववत् पाठतत्त्वं परीक्ष्यं वा । **यथेतम्** । **इतं** गतम् । गमनमनतिक्रम्य ।

एतदत्रेति । पूर्वमपि सोमो राजा भवतीति साहश्यमूलकं भवनमुक्तमिति ध्येयम् ।

वायुर्भूत्वा धूमो भवति; धूमो भूत्वाऽभ्रं भवति (५); अभ्रं भूत्वा मेघो भवति; मेघो भूत्वा प्रवर्षति।

त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते।

अतो वै खलु दुर्निष्प्रपतरम्,

वायु—भवति। अपो बिभर्तीत्यभ्रम्। मूलविभुजादित्वात् कः। ततश्चाभ्रशब्देन जलधारणावस्थोच्यते। मिह सेचन इति धातोः पचाद्यच्प्रत्यये न्यङ्क्वादित्वात् कुत्वे **मेघ** इति रूपम्। ततश्च **मेघ**शब्देन वर्षोन्मुखावस्थोच्यते। एवमेवाभ्रमेघयोर्भेदो व्यासार्यैरुक्तः। **मेघो भूत्वा प्रवर्षति।** मेघसंश्लिष्टो भूत्वा वर्षधारारूपेण भूमौ पततीति फलितार्थः। **त इह—जायन्ते।** ते वर्षसंश्लिष्टभूतसूक्ष्मपरिष्वक्ता[1] जीवाः इह भूमौ, [2]पतित्वा, व्रीहियवादिरूपेण जायन्त इत्यर्थः। अत्र तेन रूपेण जननं नाम न स्थावरभावप्रतिपत्तिः, स्थावरत्वप्राप्तिहेतुभूतकर्मणामिहाकीर्तनात्, किंतु जीवान्तराधिष्ठितेषु व्रीह्यादिषु संश्लेषमात्रम्। सूचितञ्च, 'अन्याधिष्ठिते पूर्ववदभिलापात्' इति।

अतो वै खलु दुर्निष्प्रपतरम्। अतः स्थावरादिभावात् अतिचिरेण निर्गमनं भवतीत्यर्थः।

अत्र खलन्तात् दुर्निष्प्रपतशब्दात् आतिशायनिके तरप्प्रत्यये, छान्दसे तशब्दलोपे दुर्निष्प्रपतरमिति रूपम्। ततश्चातिशयस्य प्रतियोग्याकाङ्क्षायां प्राग्नुक्रान्ताकाशादीनां बुद्धौ संनिधानात् तेषामेव प्रतियोगित्वेनान्वयः स्यात्। ततश्च व्रीह्यादिष्वाकाशाद्यपेक्षया चिरावस्थानोक्त्या आकाशादिष्ववस्थानस्य तदपेक्षयाऽल्प-

1. परिष्वक्तजीवानां व्रीहियवादिरूपेण जन्म। 2. पतित्वा इति क. कोशे न।

बहुवचनोपक्रमेऽपि **धूमो भवतीत्येकवचनं**, 'स पुनरावृत्तः सुवर्णपिण्डः खदिराङ्गारसवर्णं कुण्डले भवतः', 'तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति' इतिवत् विधेयानुसारात्। पुनरपि **ते** इति बहुवचनं प्रयोक्ष्यत एव। वाय्वादिः कदाचिदनेकोऽपि संश्लेषवशादेकीभवितुमर्हति; न तथा व्रीह्यादय इति अत्र परमेकवचनम्। **फलिता** इति। मेघभावात् मेघगतं वर्षणकर्तृत्वमस्योक्तमिति भावः। ननु भूमौ पतनार्थं प्रस्थितस्य मध्ये आकाशादिभावः संश्लेषरूपो युक्तः; न तु पतनानन्तरव्रीह्यादिभावोऽपि तथा; **जायन्त** इति जन्मस्वरसपदश्रवणाच्च। **तत्राह अत्र तेनेति। अत** इति। व्रीह्यादिभ्य इत्यर्थः। **दुर्निष्प्रपतर-**

कालत्वं पर्यवस्यति । उक्तञ्च भगवता भाष्यकृता, 'छान्दसः तशब्दलोपः । दुर्निष्प्रपतरमिति दुःखनिष्क्रमणतरमित्यर्थ' इति । न च, 'तयोरेव कृत्यक्तखलर्थाः' इति खलो भावकर्ममात्रविषयत्वात् पतेश्चाकर्मकत्वेन भावार्थस्यैव परिशिष्टत्वात् तत्र च भावार्थस्य प्रकर्षाभावात् तरपो दौर्लभ्यमिति शङ्क्यम्—शिश्येतरामित्यादिप्रयोगात् भावार्थेऽपि प्रकर्षसंभवात् । कर्त्रर्थपचाद्यजन्तात् तरपः संभवाच्च भाष्यस्य नानुपपत्तिः । यद्वा, 'आतो युच्', 'छन्दसि गत्यर्थेभ्यः' इति छन्दसि विशेषविहितखलर्थयुजन्त एवायं शब्दः । रेफरूपवर्णविकारः छान्दसः । नन्वस्य तरप्प्रत्ययत्वाभावे पूर्वनिर्दिष्टाकाशादिभ्योऽतिशयः, तेष्वचिरावस्थानं वा कथं सिध्येदिति वाच्यम्—वैशब्दस्यावधारणार्थतया अतश्शब्दितात् व्रीह्यादिभावादेव चिरं निष्क्रमणे कथिते ततः पूर्वनिर्दिष्टेभ्य आकाशादिभ्योऽचिरान्निष्क्रमणं सिध्यति । 'तशब्दलोपश्छान्दस' इति भाष्यस्यापि वर्णलोपेन वा वर्णविकारेण वा यथाकथञ्चित् साधुत्वं समर्थनीयमित्यत्र तात्पर्यम् ।

व्रीह्यादयो हि गिरितटात् उदकस्रोतसा उह्यमानाः नदीं प्राप्नुवन्ति । ततः समुद्रम् । ततो मकरादिभिर्भक्ष्यन्ते । तेऽप्यन्यैः । तत्रैव च मकरेण सह समुद्रे विलीनाः समुद्राम्भोभिः सह जलधरैराकृष्टाः पुनर्वर्षधाराभिः मरुदेशे शिलातले

मित्येकवचनं दुर्निष्प्रपतरं सत् तद्भूय एव भवतीत्युत्तरेणैकवाक्यत्वसिद्धये स्यात् । तत्रैकवचनं तु, 'यो रेतः सिञ्चती'त्येतदनुसारात् । व्रीह्यादिभूतेषु सहस्राधिकेषु एकमेव दुःखेन निष्क्रम्य रेतस्सिग्भावं भजतीति तद्दौर्लभ्यसूचनार्थमप्येकवचनम् । एतावन्मूर्छितमचेतनप्रायमस्तीति ज्ञप्तये जीवनिर्देशः ।

अतिशयद्योतिनस्तरब्ग्रहणेन एकतकारलोपे उक्ते भाष्यं प्रमाणयति उक्तञ्चेति । शिश्येतरामिति भावे लिट् । प्रकर्षसंभवादिति । भावो धात्वर्थोऽतिशयार्हानर्हभेदेन द्विविधः । जातिरूपे भाव एव प्रकर्षवत्ता नास्तीति भावः । वस्तुत इहातिशयस्य दुःशब्दार्थे कृच्छ्रेऽन्वयान्नानुपपत्तिः । शाङ्करेऽप्येवमर्थ एवादृतः । प्रकारान्तरेण भाष्यं निर्वहति कर्त्रर्थेति । अत्र भावप्रकाशिकापि द्रष्टव्या । तत्र लोपविकारौ विनैव साधुत्वमपि चिन्तितम् । खल् न भवतीति विमृश्य स्वयमन्यं पक्षमाह यद्वेति । खलोऽपवादभूते, 'आतो युच्' इति सूत्रे वार्तिकं, 'छन्दसि गत्यर्थेभ्यः' इति । तेन अकारान्तादपि गत्यर्थकत्वे युजेव भवति । तथाच दुर्निष्प्रपतनमिति प्रयोक्तव्ये नकारस्थाने रेफो वर्णविकार इति ।

भाष्यवैशद्याय शाङ्करग्रन्थमनुवदति व्रीह्यादयो हीत्यादिना । पीता इत्यस्य

यो यो ह्यन्नमत्ति यो रेतः सिञ्चति, तद्भूय एव भवति ॥ ६ ॥

वा[1] हर्म्ये वा पतितास्तिष्ठन्ति । कदाचित् व्यालमृगादिपीताः, ते भक्षिताश्चान्यैः, तेऽप्यन्यैरित्येवंप्रकाराः परिवर्तेरन् । कदाचिदभक्ष्येषु स्थावरेषु जाताः तत्रैव शुष्येरन् । भक्ष्येष्वपि स्थावरेषु जातानां रेतस्सिग्देहसंबन्धो दुर्लभ एव, बहुत्वात् स्थावराणामित्यतो दुर्निष्क्रमणत्वम् ।

यो यो—भवति । अत्र स इत्यध्याहारः । यो व्रीह्यादिसंश्लिष्टोऽवरोहति[2] जीवः सः, [3]यो योऽन्नमत्ति यो रेतः सिञ्चति भूयः पश्चात् **तत्—भवति** । रेतस्सिग्भावं प्राप्नोति । आकाशादिभाववत् रेतस्सिग्भावोऽप्यौपचारिकः । रेतस्सिग्योगी भवतीत्यर्थः । [4]एवमेव व्यासार्यैरुक्तम् ।

1. शिलातले वाऽगम्ये पतिताः शां. 2. अवरोहन् ग. 3. योऽन्नमत्ति रेतः सिञ्चति ग. 4. नेदं क. कोशे ।

वर्षधारारूपा इति विशेष्यम् । **ते** व्यालमृगादयः । नन्वेतावता अन्यान्यसंक्रमस्यैव कथनात् व्रीह्यादोषधिभ्यो दुर्निष्क्रमणत्वं कथमिति चेत्—दुर्निष्क्रमणत्वमिति शीघ्रं शरीरालाभमात्रविवक्षेति । यद्वा अन्नरूपपरिणाममन्तरा रेतोद्वारा शरीरप्राप्तिर्न भवतीति तदर्थो व्रीह्यादिभावः । तदेषां शरीरग्रहणार्थमवरुह्य व्रीह्यादिभूतानां यदि रेतस्सिग्योगमन्तरा प्रकारान्तरेण भूमौ विशीर्णता—तदा, तथा भुक्तत्वेऽपि कदाचित् मलादिरूपेण भूमिगतत्वे च, पुनरप्यन्नभावाय व्रीह्यादिसंश्लेष एवेति यावज्जन्म व्रीह्यादिभावाऽऽवृत्त्या दुर्निष्क्रमणत्वमिति । **यो रेत** इत्यत्र परं यच्छब्दश्रीप्सानादरः, 'बालब्रह्मचारितपस्विस्थविरादीनामप्यन्नत्वात् अन्नसंबन्धमात्रेणापि नेष्टसिद्धिः, किन्तु अन्नान्तर्गतकतिपयसंबन्ध एव' इति ज्ञापनेन यो योऽन्नमत्ति, तत्र कोऽपि यो रेतः सिञ्चति तद्भाव एवेति योजनादर्शनाय । अथापि तत्रेत्यप्रयोगः **भवती**तिपदेन सर्वयच्छब्दान्वयस्यापि विवक्षया—यो योऽन्नमत्ति तद्भवति, यो रेतः सिञ्चति तद्भवतीति । अत एव **तद्भूय एव भवती**त्यस्य, 'रेतस्सिक्समानाकृतिरेव जायते । नरान्नरो वानराद्वानर इतिरीत्ये'ति शाङ्करार्थो न स्वीकृतः । 'रेतस्सिग्योगोऽथ' इति सूत्रसंमतार्थत्यागायोगाच्च । **एवमेव व्यासार्यैरिति** । अयं भावः—यच्छब्दप्रतिसंबन्धितच्छब्दस्य क्लीबता कथमित्याशङ्काप्रसङ्गाभावाय **तद्भूय** इति एकमेव पदं सुखोकरम् । 'भुवो भावे' इति सूत्रात् क्यपि तस्य भावस्तद्भूयम् । तद्भूयपदात् इह सप्तमी । **तद्भूये** रेतस्सिग्भावे सत्येव **भवति** जायते । अन्यदा तु दुर्निष्क्रमणमेवेत्युक्तं भवति । सूत्रे रेतस्सिग्योगपदञ्च तद्भूयशब्दविवरणरूपमिति—अथापि, 'बहुवचनान्तक्रियामध्ये भवतीत्येकवचनान्तप्रयोगोपपत्तये तदिति पृथक् प्रथमान्तं युक्तम् । एवञ्च भूयःशब्देन पूर्वं, 'इतोऽन्यत्र एव हरन्ति,—यतः संभूतो भवती'त्यत्रैव पुनःपुनर्जननवचनात् वैराग्यं वर्धितं भवति । **भूयः** पश्चात्=पुनः इत्यर्थात्' इति विमृश्य व्यासार्यैरेवमुक्तम् । तदिति क्लीबं तु दुर्निष्प्रपञ्चमित्येतदनुसारात् । अव्ययं वा तदिति ।

तद्य इह रमणीयचरणा अभ्याशो ह यत् ते रमणीयां योनिमापद्येरन्, ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा । अथ य इह कपूयचरणा अभ्याशो ह यत् ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा ॥ ७ ॥

अथैतयोः पथोर्न कतरेण चन, तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेति—

तद्य—योनिंत्रा । तत् तेषु ये **अभ्याशः** अभ्यागन्तारः । अभ्याङ्पूर्वात् अशेर्धातोः किबन्ताद् बहुवचनान्तोऽयं शब्दः । परलोकादिहलोकं[1] प्रति अक्तरन्त इत्यर्थः । **ह** इति प्रसिद्धौ । **यत्** यदा । **रमणीयचरणाः** । चर्यत इति चरणं कर्म । रमणीयकर्माणः = भुक्तशिष्टपरिपक्वसुकृतकर्मयुक्ता भवन्तीत्यर्थः । अत्र यदाशब्दानुरोधात्[2] तदेत्यप्यध्याहर्तव्यम् । तदा ते रमणीयां ब्राह्मणादियोनिमाप्नुवन्तीत्यर्थः । **कपूयचरणाः** कुत्सितकर्माण इत्यर्थः । भुक्तशिष्टकर्मानुसारि जन्म प्राप्नुवन्तीत्यर्थः । [3]शिष्टं स्पष्टम् ।

'वेत्थ यथाऽसौ लोको न संपूर्यत' इति चतुर्थप्रश्नं प्रतिवक्ति **अथैतयोः—न संपूर्यते** । अथशब्दः प्रतिवचनान्तरोपक्रमे । यानि भूतानि उक्तयोरेतयोर्देवयानपितृयाणयोः पथोर्मध्ये **कतरेण चन** केनापि मार्गेण न गच्छन्ति,—मार्गद्वयप्राप्तिहेतुभूतविद्याकर्मरहिता(रहितानि?)इत्यर्थः—, **तानीमानि भूतानि क्षुद्राणि** दंशमशककीटादीनि असकृदावर्तीनि सन्ति, जायस्वम्रियस्वेति भवन्ति । पुनःपुनर्जायन्ते म्रियन्त इत्यर्थः । 'सक्तून् पिब धानाः खादेत्ययमभ्यवहरती'त्यस्य, पुनःपुनः

1. इहलोकमिति पदं न क. कोशे। 2. रोधेन ग. 3. नेदं क. कोशे।

यत् यदेति । ये यदा रमणीयचरणाः, ते तदा रमणीयजन्मभाजः इति यदातदाशब्दप्रयोगात् एकैकस्यापि कदाचित् गमनात् प्राक् रमणीयचरणत्वं कदाचित् तदा कपूयचरणत्वञ्च भवतीति ज्ञाप्यते । **यत्** इत्यस्य यदीत्यर्थे च, 'पदव्यत्यासेनान्वयः कल्प्य' इति व्यासार्धदर्शितरीतिः प्राह्या । **चर्यत इतीति** । चरणपदं रूढं वा भावे व्युत्पन्नं वा आचारपरम् । कर्मरूपार्थे कर्मकारके व्युत्पन्नम् ।

तानीमानीति उपरितच्छब्दघटितवाक्यारम्भात्, पूर्वं यानीत्यध्याहारः ।

एतत् तृतीयँ स्थानम् । तेनासौ लोको न संपूर्यते ।

पिबति पुनःपुनः खादतीति ह्यर्थः; तद्वत् । "क्रियासमभिहारे लोट्; लोटो हिस्वौ वा च तध्वमोः" इति पौनःपुन्यलक्षण[1]क्रियासमभिहारे लोटः [2]तध्वमोः हिस्वादेशविधानात् जायस्वम्रियस्वेति रूपम् । 'यथाविध्यप्रयोगः पूर्वस्मिन्', 'समुच्चये सामान्यवचनस्य' इति **भवन्ती**ति सामान्यशब्दस्यानुप्रयोगः । **उक्तञ्च** व्यासार्यैः, 'पुरीमवस्कन्द लुनीहि नन्दनमितिवत्' इति । **एतत् तृतीयं स्थानम्** । अत्र **एत**च्छब्देन, 'जायस्वम्रियस्वेति भूतानि भवन्ती'ति प्रथमान्तशब्देन प्रधानतया निर्दिष्टाः पापकर्माणः परामृश्यन्ते, सर्वनाम्नां पूर्वनिर्दिष्टप्रधानपरामर्शित्वात् । **स्थान**शब्दाभिप्रायेणैकवचनम् । पूर्वनिर्दिष्टद्युलोकब्रह्मलोकापेक्षया क्षुद्रजन्तुभवनादिलक्षणस्थानस्य तृतीयत्वात् तत्स्थानसंबन्धात् पापकर्माणः तृतीयं **स्थान**मित्युच्यन्ते । **तेनासौ लोको न संपूर्यते** । **तेन** तृतीयस्थानशब्दितैः पापकर्मभिः

1. पौनःपुन्ये क्रियासमभिहारे **क. ख.** 2. लोट् तध्वमोः **ख.** लोड्धर्महिस्वा **क. घ.**

लोटस्तध्वमोरिति । क्रियासमभिहारे द्योत्ये सर्वलकारापवादेन लोड् भवति । तत्र परस्मैपदात्मनेपदभेदेन सर्वतत्तदादेशप्रसक्तौ क्रमात् हिस्वौ परं त, ध्वं इत्येतद्व्यतिरिक्तलोडादेशस्थले नियमेन, तध्वंविषये च विकल्पेन भवतः । इह च भूतानां बहुत्वात् जायध्वं म्रियध्वमितिवत्, जायस्व म्रियस्वेत्यपि भवतीति ।

सामान्यशब्दस्यानुप्रयोग इति । नन्वत्र क्रियासमभिहारे इति सूत्रेण वा लोट्, समुच्चयेऽन्यतरस्यामिति सूत्रेण वा । नाद्यः; तत्र, 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' इति प्रकृतलोट्प्रकृतिभूतधात्वनुप्रयोगस्यैव विहिततया भवन्तीत्यनुप्रयोगायोगात्-नान्त्यः, द्वितीयसूत्रे समुच्चयरूपद्योत्यार्थस्योक्ततया पूर्वसूत्रात् क्रियासमभिहारपदव्यतिरिक्तसर्वपदानुवृत्तेरवेष्टत्वेन क्रियासमभिहाररूपद्योत्यार्थाभावेन पुनःपुनर्जायन्त इति व्याख्यानायोगात् । न च महाभाष्ये क्रियासमभिहारपदानुवृत्तिरुक्ता । तदनुवृत्तौ च, 'क्रियासमभिहारे द्वे वाच्ये' इति वार्तिकबलात् जायस्वेत्यादौ द्विरुक्त्यापत्तिश्च । किञ्चात्र **भवन्ती**त्यपि नानुप्रयोगः । अनुप्रयोगसूत्रयोर्भाष्ये प्रत्याख्यातत्वेन तस्यानपेक्षितत्वात् । अतः भूतानि असकृदावर्तीनि भवन्ति, जायन्ते म्रियन्ते चेत्यर्थ इति चेत् —

उच्यते । यथा पचतिपचति, पापच्यते, इति प्रयोगाभ्यां विकल्पेन पचपचेति पचतीति प्रयोगः क्रियासमभिहारसूत्रेणेष्टः, तथा सक्तून् पिबति धानाः खादति, सक्तून् पिबति च धानाः खादति चेति प्रयोगाभ्यां विकल्पेनैव सक्तून् पिब धानाः खादेत्यभ्यवहरतीति प्रयोगः सिध्यतीति

असौ द्युलोको न संपूर्यते न प्राप्यत इत्यर्थः। अत्र, 'एतत् तृतीयं स्थानमित्येतच्छब्देन पूर्वनिर्दिष्टः पौनःपुन्येन जननमरणादिभवनलक्षणो धात्वर्थ एव परामृश्यते। तस्यैव तृतीयस्थानत्वम्। ततश्च एतस्य तृतीयस्थानस्य सद्भावात् अत्रैव स्थाने जीवानां प्रायेण प्रचारात् द्युलोकगन्तॄणामल्पत्वात् द्युलोको न संपूर्यते' इत्युक्तावपि भाष्यस्य न विरोधः। अत एव, 'द्युलोकारोहावरोहाभावेन द्युलोकासंपूर्तिवचनात्' इति भाषितमिति द्रष्टव्यम्।

उत्तरसूत्रे परम्, 'अन्यतरस्या मिति कुत इति विवेचनीयम्। अतः एकक्रियास्थले क्रियासमभिहारे पचपचेति पचतीति यथा, तथा क्रियासमुच्चयस्थलेपि क्रियासमभिहारे नियमेन लोटः प्रसक्तौ 'समुच्चयेऽन्यतरस्या'मिति लोटं विनाऽपि तादृशप्रयोगोऽनुमन्यत इति सक्तून् पिबति धानाः खादतीत्यभ्यवहरतीति प्रयोग एव अन्यतरस्यामिति दिदर्शयिषितः। अत्र क्रियासमभिहारः कस्मात् पदात् प्रतीयत इति चेत्—सक्तून् पिबति धानाः खादतीति भवदभिमतसमुच्चयोदाहरणे समुच्चयप्रतीतिः कस्मात् पदात्? सहप्रयोगबलादेव तल्लाभ इति चेत्—वरमिह 'इत्यभ्यवहरती'ति प्रयोगादिति। प्रकारवचिन इतिशब्दस्येह क्रियासमभिहारपर्यन्ततात्पर्यात्। एवं 'पचपचेति पचतीति पूर्वसूत्रोदाहरणेऽपि इतिशब्दादितस्तुल्यम्। अत एव भाष्ये इतिशब्दघटनेनोदाहरणदानम्। 'पुरीमवस्कन्दे'ति श्लोके च इतिशब्दपर्याय इत्थंशब्दः। एवम् इत्यभ्यवहरतीत्येकेन पदेन सर्वक्रियाक्रोडीकारात् समुच्चयलाभश्च। अतो लोट् समुच्चयस्येव क्रियासमभिहारस्यापि नावश्यं द्योतकः। समुच्चये इत्यस्य समुच्चीयमानक्रियावचनाद्धातोरित्यर्थो भावप्रकाशिकायाम्।

एवं क्रियासमभिहारे गम्यमाने एकक्रियास्थले नियमेन, नानाक्रियास्थले च विकल्पेन लोडिह सूत्राभ्यां क्रमेण विधीयते। लौकिकभाषायामप्येवं प्रयोग आनुभविकः। एतत्सूत्रद्वयाभावे च, 'पचतिपचति,' 'पिबति खादतीत्यभ्यवहरति' इति प्रयोगावेव स्याताम्। सक्तून् पिबति धानाः खादतीति तु न समुच्चयस्य मुख्यमुदाहरणम्। तत्र समुच्चयप्रतीत्यनियमात्। यथासंख्यं विभिन्नकर्त्रन्वयपरतयाऽपि तथा प्रयोगसंभवात्। न च लोट्स्थले कालसंख्याकर्त्रादिप्रतिपत्तयेऽनुप्रयोगस्यावश्यकत्वेऽपि पिबतिखादतीत्यभ्यवहरतीत्यनुप्रयोगो न युक्तः; पूर्वतिङन्ताभ्यामेव कालादिसिद्धेरिति वाच्यम्—क्रियासमभिहारज्ञापनाय इतिशब्दे प्रयुक्ते तदन्वयाय, समुच्चयस्वीकाराय च सामान्यशब्दप्रयोगात्। एकक्रियास्थले तु पचतिपचतीत्युक्तौ तत एव, 'नित्यवीप्सयो'रिति पौनःपुन्यग्रहात् इतीत्यादिरनपेक्षितम्। न चैवं समुच्चयस्थलेऽपि क्रियासमभिहारस्वीकारे वार्तिकबलात् द्विर्वचनापत्तिरिति वाच्यम्—तस्य वार्तिकस्य पूर्वसूत्रविहितलोण्मात्रविषयकताया भाष्येऽत्वात्। युक्तश्चैतत्। पचतिपचतीत्यादाविव द्विर्वचनस्यैव क्रियासमभिहारद्योतकत्वाभावात् प्रकारान्तरेण क्रियासमभिहारज्ञप्तेः, केवलं इतिशब्दोक्तप्रकारस्य नानापदार्थमुखेन ज्ञाप्यतया एकवारं पचेति प्रयोगे नानापदार्थलाभमाकलय्य क्रियासमभिहारे द्विर्वचनमनु-

---

1. அடி அடி யென்று அடிக்கிறான். போகிறதும் வருகிறதுமா யிருக்கிறான்.

शिष्टं वार्तिककृता । समुच्चयस्थले तु पिबति खादतीति नानापदार्थलाभोऽस्त्येवेति न तदर्थं द्विरुक्तिप्रसक्तिरिति । [भृशार्थे द्विर्वचनञ्च कैयटासंमतमिति क्रियासमभिहारोऽत्र पौनःपुन्यमात्रमित्यन्यदेतत् ।] उक्तरीत्या इतिशब्दघटितसमुच्चयोदाहरणं काशिकायां द्रष्टव्यम् । कामं समुच्चयस्थले लोटं विना प्रयोगः केवलसमुच्चयेऽपि स्यात् । लोटि तु क्रियासमभिहारो नियत इति । तत्रतत्र इतिशब्दार्थे किञ्चिद् वैलक्षण्यं भाव्यम् ।

यत्तु अनुप्रयोगोऽनपेक्षित इति—तन्न । 'असकृदावर्तीनि जायस्वम्रियस्वेति भवन्ती'त्येकवाक्यत्वसंभवे वाक्यभेदकल्पनायोगेन जायस्वेत्यादौ कालसंख्याद्यप्रतीत्या च स्थितस्यानुप्रयोगस्योपेक्षणायोगात् । अप्पयदीक्षितेष्टश्चास्यानुप्रयोगत्वम् । अत एव, 'जायस्वम्रियस्वेति विपरिवर्तमानम्' इति भामतीवाक्येऽपि विपरिवर्तमानपदमेव सामान्यवचनं भवितुमर्हति । तिङन्तमेव सामान्यवाचीत्यत्र मानाभावात् । तर्हि अत्रापि आवर्तीनीतिपदं सामान्यवचनमस्तु । अस्तु कामम् । प्रधानक्रियापदमेव तादृशमस्तीति तत् उपेक्षितम् । इदमत्र बोध्यम्—मुक्तकप्रयोगे लोडन्तमात्रसत्त्वे अनुप्रयोगाभावे संख्याकालाद्यग्रहणात् वाक्यासमाप्तिः स्पष्टा । प्रकरणगतवाक्ये तु यथाकथञ्चित्तदवगमोऽस्तु । एवं लोडन्तबोध्यक्रियायाः प्रथमान्तपदार्थगतत्वे वाक्यस्याख्यातप्रधानकतया च वाक्यसमाप्त्यर्थं प्रधानतिङन्तानुप्रयोगस्यावश्यकत्वेऽपि अप्रथमान्तपदार्थगतत्वे अनुप्रयोग उपेक्ष्यतेऽपि । अत एव बृहदारण्यके, 'देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेति — भक्षयन्ति' इति वाक्ये अनुप्रयोगोपेक्षा । अत्र, 'भवन्त'मिति सोमराजविशेषणमनुप्रयोक्तव्यम्; इतिशब्दार्थस्य साक्षाद्वा सोमराजविशेषणत्वम्; आप्यायापक्षययोस्तद्गतत्वात् । इतिशब्दस्तु नोपेक्ष्यते । तस्यैव क्रियासमभिहारज्ञापनधुरन्धरत्वात् । एवं प्रथमान्तस्थले तत्रैव इतिशब्दान्वयेऽपि वाक्यसमाप्तये क्रिया अपेक्षितैव । एवं प्रकारेणेह वैयाकरणमूर्धन्यानामेषामाशय उन्नेय इति सिद्धोऽत्र क्रियासमभिहारः ।

ननु महाभाष्ये क्रियासमभिहारपदस्य समुच्चयसूत्रेऽनुवृत्तिर्नोक्ता । तत् किं अन्यांशानुवृत्तिः परं तत्रोक्ताऽस्ति । समुच्चयसूत्रस्यैवाव्याकृतत्वात् तत्र । तस्मात् अविरोध एवालम् । तदत्र कौमुदीशेखरादिगतिविरोधेऽपि न दोषः ।

भाष्येऽनुक्तं भवतु किमतः सूत्रमव्याकृतं यत्;
प्राह्यं प्राज्ञैर्बहुभिरितरैरेककण्ठं यदुक्तम् ।
तस्मादेवं सरणिरुचिता चिन्तिता; शाब्दिकाये
त्वर्वाञ्चस्ते विहतवचसः तत्त्वमादर्तुमर्हम् ॥
किं शब्दशास्त्रसंबन्धिग्रन्थकर्तैव शाब्दिकः ।
न किं शास्त्रान्तरे शब्दसूत्रव्याख्याकृतस्तथा ॥

तस्माज्जुगुप्सेत । तदेष श्लोकः (८)—

'स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन् ब्रह्महा च ।
एते पतन्ति चत्वारः पञ्चमश्चाचरँस्तैः ॥' इति ॥ ९ ॥

अथ ह य एतानेवं पञ्चाग्नीन् वेद, न सह तैरप्याचरन् पाप्मना लिप्यते । शुद्धः पूतः पुण्यलोको भवति, य एवं वेद ॥ १० ॥

इति पञ्चमाध्याये दशमः खण्डः ।

तस्माज्जुगुप्सेत । यस्मात् संसारिणां गतिरुक्तरीत्या कष्टतरा, तस्मात् संसारात् जुगुप्सेत । 'मा भून्मे एवंविधसंसारमहोदधौ घोरे पात' इति निन्देत् इत्यर्थः । मुक्तिफलकपञ्चाग्निविद्यास्वरूपज्ञानस्य [1]फलान्तरं वक्तुमाह **तदेष श्लोकः** । तच्छब्दः प्रसिद्ध[2]परः । **एषः** वक्ष्यमाणः श्लोकः [3]प्रसिद्ध इत्यर्थः । [4]**स्तेनो—तैरिति । तैराचरन्** स्तेनादिभिः चतुर्भिर्विद्यायोनिसंबन्धमाचरन्नित्यर्थः । शिष्टं स्पष्टम् ।

अथ—वेद । स्तेनादिरुक्तमहापातकिभिरपि सह [5]संसर्गमाचरन् पाप्मना न लिप्यते । पूर्वोत्तराघशून्यो(न्यश्च) भवतीत्यर्थः । य **एवं वेद** । द्विरुक्तिः [6]समस्तप्रश्नप्रतिवचनसमाप्तिद्योतिका[7] ।

1. फलान्तरमप्याह क. 2. प्रसिद्धिपरः ख. 3. प्रसिद्ध इति पदं ख. कोशे । 4. मन्त्रमेवाह स्तेन इति । ख. 5. संबन्धं ग. 6. समस्तेत्यधिकं क. कोशे । 7. शिष्टं स्पष्टं ख.

महापातकिगणनपरस्य श्लोकस्योक्तार्थविषयकत्वाभावेन **तदि**त्यस्य, 'तस्मिन् उक्तेऽर्थे' इत्यर्थवर्णनायोगादन्यथा व्याख्याति **तच्छब्दः प्रसिद्धपर** इति । अस्तु स प्रसिद्धः । किं प्रकृते ? तत्राह **अथ हे**त्यादि । अत्र क्षुद्राणीत्यस्य बृहदारण्यकानुसारेण दंशमशकादिपरतया व्याख्यानेऽपि तत्तुल्यतया अनिष्टादिकारिणः सर्वेऽपि, 'अथैतयोः पथोर्न कतरेणे'त्यादिवाक्ये विवक्षिता एव स्युः; मार्गद्वयास्पर्शित्वस्य अदोलोकासंपूरकत्वस्य चोपक्रमोपसंहारोक्तयोः सर्वसाधारणत्वात् । ते च अनिष्टादिकारिणः विहितत्यागिनः निषिद्धकारिणश्चेति द्विविधाः । निषिद्धकारिषु महापातकिनो मुख्यगण्याः निकृष्टतमाः । अतः तावत्पर्यन्तसर्वानिष्टादिकारि—तदनुभाव्यफल—तन्मार्गादिकमत्र भाव्यमिति ज्ञापये **तदेष श्लोक** इति वाक्यप्रवृत्तिरित्यपि सुवचम् । **पतन्ती**ति । सत्कर्माधिकारात् च्यवन्ते, घोरे च नरके पतन्ति । तत एव ते पतिताः । तथाच नरकपर्यन्तानुभव इह श्रुत्यभिमतः । प्रकृतसंदर्भस्यार्थश्च **न्यायसिद्धाञ्जने**, 'अपुण्यकृता'मित्यारभ्य, 'तेषामतिघोरा निरयसरणिः निरयदुःखानुभूतिश्च पुराणादिषु प्रपञ्चिता स्मर्यमाणाऽपि कलेबरं कदम्बगोलायतीति'इति समग्राहि ॥ **सह तैरप्याचरन्नि**ति । आचरन्नपीत्यन्वयोपि स्यात् । संसर्गमात्रे न दोषः । हिरण्यस्तेयादिकं तु पञ्चाग्निविदपि न कुर्यात् । **पूर्वोत्तरे**ति । ईदृशसंसर्गस्य विद्या-

एतत्खण्डान्तर्गतवाक्यविषयकाणि अधिकरणानि उपन्यस्यन्ते —

(१) अर्चिरादिपादे — "कार्यं बादरिरस्य गत्युपपत्तेः"। **कार्यं** हिरण्यगर्भमुपासीनानेव अर्चिरादिर्गणो नयतीति बादरिराचार्यो मन्यते। परिच्छिन्नप्राप्त्यर्थं हि गतिरुपपद्यते, नापरिच्छिन्नपरब्रह्मप्राप्तये। न ह्याकाशं प्रेप्सता देशविशेषो गन्तव्यो भवतीति[1]। "विशेषितत्वाच्च"। 'पुरुषो मानस एत्य ब्रह्मलोकान् गमयति। [2]ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' इति गन्तव्यस्य बहुवचनान्तलोकशब्देन विशेषितत्वात् परब्रह्मण एकत्वेन बहुत्वासंभवात् लोकशब्दस्य देशविशेष एव मुख्यत्वाच्च न परब्रह्मणोऽर्चिरादिप्राप्यत्वम्।

ननु, 'स एनान् ब्रह्म गमयती' ति नपुंसकलिङ्गब्रह्मशब्देन चतुर्मुखस्य कथं निर्देश इत्यत्राह, "सामीप्यात्तु तद्व्यपदेशः"। 'यो ब्रह्माणं विदधाति पूर्वम्' इति हिरण्यगर्भस्य प्रथमजत्वेन ब्रह्मसामीप्यात् ब्रह्मशब्देन अमुख्यया वृत्त्या चतुर्मुखस्य निर्देश उपपद्यत इति भावः।

ननु हिरण्यगर्भस्य द्विपरार्धावसाने नाशात् तं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वात्, 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' इत्यनावृत्तिप्रतिपादकश्रुतिविरोधः। तत्राह, "कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्"। 'ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे' इत्यभिधानात् **कार्यस्य** ब्रह्मलोकस्यात्यये **तदध्यक्षेण** ब्रह्मणा सह **अतः** ब्रह्मलोकात् **परं** ब्रह्म प्राप्नोति। अतश्चानावृत्तिश्रुतिरुपपद्यत इति भावः। [3]"स्मृतेश्च"।

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥'

इति स्मृतेश्चायमर्थोऽवसीयते।

1. भवति ख. 2. वाक्यमिदं न ख. कोशे। 3. एतत्सूत्रमेतद्व्याख्यानं च ख. कोशे न। भ्रष्टं स्यात्।

विरोधित्वाभावात् तन्निष्पत्त्या सर्वपापहतिरिति भावः। इदं **शुद्धः पूत** इत्येतदर्थपरं वा। यद्वा पुण्यलोक इति, य एवं वेदेति चाधिकश्रवणात् प्रवाहणोपदेशादिकृत्स्नवृत्तज्ञानफलं **पूत** इत्यादि। सोऽयं **प्रवाहणो जैवलिः** (१–८, ९.) पूर्वमपि श्रुतः।

"परं जैमिनिर्मुख्यत्वात्"। नपुंसकलिङ्गब्रह्मशब्दस्य परस्मिन् ब्रह्मण्येव मुख्यत्वात् परमेव ब्रह्म अर्चिरादिः प्रापयतीति जैमिनिराचार्यो मन्यते। तस्य परिपूर्णत्वेऽपि, 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुत्यनुसारेण निःशेषाविद्यानिवृत्तेर्देशविशेषविशिष्टब्रह्मप्राप्तिसापेक्षत्वात् देशविशेषविशिष्टब्रह्मप्राप्तये गतिरुपपद्यते। लोक्यत इति व्युत्पत्त्या लोकशब्दोऽपि ब्रह्मण्युपपन्नः। बहुवचनमपि एकस्मिन् उपचारात् प्रयुज्यते।

"दर्शनाच्च"। दर्शयति च श्रुतिर्ब्रह्मप्राप्तेर्गतिसापेक्षत्वम्, एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत' इति। ननु, 'प्रजापतेः सभां वेश्म प्रपद्ये' इत्यर्चिरादिना गतस्य कार्यप्रजापति विषयाभिसंधिर्दृश्यते। तत्राऽऽह, "न च कार्ये प्रत्यभिसंधिः"। नायं प्रत्यभिसंधिः कार्यहिरण्यगर्भविषयः, अपितु परब्रह्मविषयः। तस्यैव प्रजापतिशब्दमुख्यवाच्यत्वात्। उत्तरत्र, 'यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशाम्' इति सर्वाविद्याविमोकपूर्वक सर्वात्मभावाभिसंधानात्, 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानि' इति ब्रह्मलोकस्याकृतत्वेन विशेषितत्वाच्च परमेव ब्रह्म अर्चिरादिर्नयतीति जैमिनिराचार्यो मन्यते।

"अप्रतीकालम्बनान् नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्च"। अब्रह्मभूतं नामादिकं ये ब्रह्मत्वेनोपासते, ते प्रतीकालम्बनाः। तद्भिन्नान् = प्रकृतिवियुक्तं प्रत्यगात्मानं ब्रह्मात्मकत्वेन ये पञ्चाग्निविद उपासते, ये च केवलं परं ब्रह्मोपासते, तान् उभयविधानपि नयतीति बादरायण आचार्यो मन्यते। केवलं परमेवोपासीनान् नयतीति पक्षे, कार्यमुपासीनान् नयतीति पक्षे च, 'तद्य इत्थं विदुः ये चेमेऽरण्ये' इति श्रुतिविरोधप्रसङ्गात्। ननु पञ्चाग्निविद्यायाः ब्रह्मात्मकप्रत्यगात्मविद्यात्वे किं प्रमाणम्? तत्राह — तत्क्रतुश्च। पञ्चाग्निविद्यायाः ब्रह्मविद्यात्वाभावे अर्चिरादिगतिर्वा तया गत्या ब्रह्मप्राप्तिर्वा न स्यात्। तत्क्रतुन्यायविरोधप्रसङ्गात्। ब्रह्मविद्यात्वे तु तत्क्रतुन्यायोऽप्यनुगृहीतो भवति। इयांस्तु विशेषः—पञ्चाग्निविद्या ब्रह्मात्मकत्वात्मविद्या। [1]दहरविद्यादिकास्तु प्रत्यगात्मशरीरकपरमात्मविद्याः। विशेष्यविशेषणभावे परं व्यत्यासः। अयं तु भगवतो बादरायणस्य सिद्धान्त इति स्थितम्।

1. दहरादिविद्याः ख. ग.

(२) तथा— लोके ग्रामादिगन्तॄणाम् इमं वृक्षं गत्वा इमां नदीं गत्वा स (अयं) ग्रामो गन्तव्य इति तत्तद्देशिकोपदेशस[1]रूपत्वादस्यापि वाक्यस्य अर्चिरादयो मार्गचिह्नभूताः। अथवा, 'अग्निर्लोकमागच्छति स वायुर्लोक'मिति लोकशब्दश्रवणादर्चिराद्या भोगभूमयः इत्येवं पूर्वपक्षे प्राप्ते—उच्यते—"आतिवाहिकास्तल्लिङ्गात्"। विदुषामतिवाहे परमपुरुषेण नियुक्ता देवताविशेषा आतिवाहिकाः। गन्तॄणां गमयितार इति यावत्। **तल्लिङ्गात्**। 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयती'ति वैद्युतपुरुषस्य गमयितृत्वसिद्धवत्कारेण ब्रह्मगमयितृत्वमात्रविशेषप्रतिपादनपरेण वाक्येन इतरेऽपि गमयितार इति प्रतीतेः। अर्चिरादिशब्दानाञ्च, 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्या'मिति सूत्रेण तदभिमानिदेवतापरत्वसंभवात्। ननु वैद्युतपुरुषस्यैव ब्रह्मगमयितृत्वे विद्युत[2] ऊर्ध्वं कौषीतकीवाक्यानुसारेण निवेशितानां वरुणेन्द्रप्रजापतीनां कथं संबन्धः? तत्राह, "वैद्युतेनैव ततस्तच्छ्रुतेः"। **ततः** विद्युतः उपरि वैद्युतेनैव ब्रह्मप्राप्त्यतिवहनम्; 'स एनान् ब्रह्म गमयती'ति श्रुतेः। वरुणादयोऽपि तदनुग्राहका भवन्तीति द्रष्टव्यमिति स्थितम्।

(३) तथा वैराग्यपादे – लोकान्तरं गच्छतो जीवस्य देहारम्भकभूतसूक्ष्माणां तत्रैव सुलभतया न भूतसूक्ष्मपरिष्वक्ततया गमनमिति पूर्वपक्षे प्राप्ते – उच्यते, "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्"। पूर्वत्र, 'संज्ञामूर्तिक्लृप्ति'रिति सूत्रे मूर्तिशब्देन निर्दिष्टो देहः तच्छब्देन परामृश्यते। तदन्तरप्रतिपत्तौ = देहान्तरप्रतिपत्त्यर्थं जीवो भूतसूक्ष्मैः परिष्वक्त एव रंहति[3] गच्छतीत्यर्थः। पञ्चाग्निविद्यायाम्, 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'ति पञ्चस्वप्याहुतिषु अप्छब्दितानां भूतसूक्ष्माणां हूयमानतया संबन्धं सिद्धवत्कृत्यैव, अपां पञ्चम्यामाहुतौ आपः पुरुषवचसो भवन्तीति कथं वेत्थेति प्रश्नात्, द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपेषु अग्निषु आपः श्रद्धासोमवृष्ट्यन्नरेतोरूपेण हूयमानास्तत्यः पञ्चम्यां रेतआहुतौ पुरुषाकारेण परिणमन्तीति प्रतिवचनदर्शनाच्च अप्छब्दितभूतसूक्ष्मपरिष्वक्त एव आरोहावरोहयोः संचरतीति भावः। ननु, 'आपः पुरुषवचसो भवन्ती'ति अपामेव पुरुषवचस्त्वं प्रतिपाद्यते। न

1 .स्वरूप ख. 2. विद्युत इति पदं ग. कोशे। 3. रहि गताविति धातुरित्याधिकं क कोशे।

भूतान्तराणामिति । तत्राऽऽह, "त्र्यात्मकत्वात्तु भूयस्त्वात्" । तुशब्दः चोद्यव्यावृत्त्यर्थः । केवलानामपां देहारम्भकत्वासंभवेन त्र्यात्मकत्वात् अप्छब्दो भूतान्तरस्याप्युपलक्षकः । तर्हि कुतोऽप्छब्देन निर्देश इत्यत्राह **भूयस्त्वात्** । तेजोबन्नलक्षणभूतत्रयमध्ये देहस्य लोहितप्रचुरतया अपां भूयस्त्वादप्छब्देन निर्देश इति भावः ।

"प्राणगतेश्च" । 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति । प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती'ति इन्द्रियाणामपि सहगतिश्रवणात् भूतसूक्ष्मपरिष्वक्ततया जीवगमनाभावे निराश्रयाणामिन्द्रियाणां गमनासंभवात् भूतसूक्ष्मपरिष्वक्तस्यैव गमनमभ्युपगन्तव्यम् ।

"स्मर्यते च" । 'गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्' इति इन्द्रियाणाञ्च नयनस्य स्मरणात् तेषाञ्चाश्रयतया भूतसूक्ष्माणां गतिरभ्युपगन्तव्या । "अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्" । 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्' इत्यादिना प्राणानाम्, मरणकाले अग्न्यादिष्वप्ययश्रवणात् न प्राणानां जीवेन सह गतिः संभवतीति चेन्न — अग्न्यादिष्वप्ययश्रवणस्य भाक्तत्वात् । 'ओषधीर्लोमानि वनस्पतीन् केशाः' इति लोमकेशानामप्योषधिवनस्पतिष्वप्ययश्रवणात् तस्य च प्रत्यक्षबाधितत्वेन ओषधिवनस्पतिषु लोमकेशाप्ययस्य भाक्तत्वस्याभ्युपगन्तव्यत्वात् तत्सहपठितानामग्न्यादिषु वागाद्यप्ययानामपि भाक्तत्वमेव । ततश्च, 'अग्निं वागेप्येती'त्यस्यायमर्थः — 'अग्निर्वाग् भूत्वा मुखं प्रविशत्' इत्यग्नेर्वागधिष्ठातृतया मुखप्रवेशप्रतिपादनात् मरणकालेऽग्निर्म्रियमाणपुरुषवागधिष्ठातृतां परित्यज्य अनधिष्ठातृरूपेण वर्तत इति ।

"प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः" । यदुक्तम्—प्रश्नप्रतिवचनाभ्यां द्युपर्जन्यादिषु भूतसूक्ष्मपरिष्वक्तस्यैव जीवस्य गमनमिति, तन्नोपपद्यते । प्रणव एव विस्वर इति न्यायेन प्रथमाहुतावेव, 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती'ति प्रथमपर्याये श्रद्धाया एव होम्यत्वश्रवणेन अप्छब्दितभूतसूक्ष्माणां होम्यत्वाश्रवणादिति चेन्न—यदि प्रथमे पर्याये अप्छब्दितव्यतिरिक्तायाः श्रद्धाया होम्यत्वम्, तर्हि प्रश्नप्रतिवचनयोः अपां पञ्चम्यामाहुताविति निर्देशो नोपपद्यते ।

अपां पञ्चमाहुतिसंबन्धो हि तदितराहुतिचतुष्टयसंबन्ध एवोपपद्यते[1] । बुद्धिविशेषलक्षणश्रद्धाया आत्मतो निष्कृष्य होम्यत्वानुपपत्तेश्च[2] श्रद्धाशब्देन आप एवोच्यन्ते । 'श्रद्धा वा आप' इति श्रुतेः ।

"अश्रुतत्वादिति चेत्— न, इष्टादिकारिणां प्रतीतेः" । द्युपर्जन्यादिषु प्रश्नप्रतिवचनवशात् भूतसूक्ष्माणां गमनसंभवेऽपि न तत्परिष्वक्तस्य जीवस्य गमनम्, अश्रुतत्वात् इति चेन्न—उत्तरत्र पितृयाणवाक्ये, 'मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा' इति द्युलोकं प्राप्तस्य इष्टादिकारिणो जीवस्य सोमराजभावश्रवणात्, अत्रापि 'तस्या आहुतेः सोमो राजा संभवती'ति द्युलोकं प्रविष्टानां भूतसूक्ष्माणां सोमराजभावश्रवणात् अत्रापि आपः पुरुषवचसो भवन्तीत्यप्छब्देन न केवलभूतसूक्ष्ममात्रमुच्यते; अपितु तत्परिष्वक्तो जीवः । पुरुषशब्दाभिलपनीयत्वमपि तत्परिष्वक्तजीवस्यैव । ततश्च, 'आपः पुरुषवचसो भवन्ती'त्यत्र अबादिशब्दानां तत्परिष्वक्तजीवपरत्वात् भूतसूक्ष्मपरिष्वक्तस्यैव जीवस्य गमनं सिद्धम् ।

ननु, 'तं देवा भक्षयन्ती'ति सोमराजभावं प्राप्तस्य भक्ष्यमाणत्वश्रवणात्, जीवस्यानदनीयत्वात्, पितृयाणमार्गे सोमराजशब्दनिर्दिष्टो न जीव इत्यत्राह— "भाक्तं वाऽनात्मवित्त्वात् तथा हि दर्शयति" । देवभक्ष्यमाणत्ववचनं भाक्तम्, केवलेष्टादिकारिणामनात्मवित्त्वात् । अनात्मविदाञ्च, 'यथा पशुरेवं स देवानाम्' इति श्रुतिदर्शनेन पशुवद् भोगोपकरणत्वात् 'तं देवा भक्षयन्ती'त्युक्तिरुपपद्यते । अतो भूतसूक्ष्मपरिष्वक्त एव जीवो गच्छतीति स्थितम् ।

(४) समनन्तराधिकरणे — '[3]यावत्संपातमुषित्वे'ति संपातशब्दितसर्वकर्मफलस्य तत्रैवोपभोक्तव्यत्वश्रवणात्, 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे' इति बृहदारण्यके श्रवणात् सर्वं कर्मफलं भुक्त्वा निरनुशय एवावरोहति जीवः । अनुशयः भुक्तशिष्टं कर्म । एवं 'पूर्वपक्षे

1. पद्येत ख. ग. 2. अयं ग. पाठः । अन्यत्र, 'होमाद्यानुपपत्तेश्च' । 3. अयं ग. पाठः । अन्यत्र, 'यावत्संपातमुषित्वेति वाक्यं विचारितम् । तत्र यावत्संपातम्' इति । 4. इदं पदं ग. कोशे ।

प्राप्ते उच्यते—" कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च" । **कृतस्य** कर्मणः **अत्यये** अवसाने अनुशयवानेव प्रत्यवरोहति जीवः, **दृष्टस्मृतिभ्यां** श्रुतिस्मृतिभ्यामित्यर्थः । ' तद् य इह रमणीयचरणा अभ्याशो ह यत् ' इति श्रुतेः ' वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशजातिकुलरूपायुश्श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते । विष्वञ्चो विपरीता विनश्यन्ति ' इति स्मरणच्च । अतः सानुशय एवावरोहति[1] । ' यावत्संपातमुषित्वे ' त्यादिकं तु फलदानप्रवृत्तकर्मविशेषविषयम् । तत्र च, ' अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशम् ' इति श्रवणात् यथागमनं प्रत्यागमनम् । ' आकाशाद्वायुं वायुर्भूत्वा धूमो भवती'ति श्रवणात् **अनेवञ्च** । येन प्रकारेण गतम्, तदन्येन प्रकारेणावरोहती[2]त्यर्थः । " चरणादिति चेन्न तदुपलक्षणार्थेति काष्णाजिनिः" । ननु, ' रमणीयचरणा अभ्याशो ह यत् ते रमणीयां योनिमापद्येरन्' इत्यादिना सदसच्चरणयोरेव सदसद्योनि[3]प्राप्तिहेतुत्वं श्रूयते । **चरणम्** आचारः शीलं वृत्तमिति पर्यायाः । ततश्च, ' रमणीयचरणाः ' इति श्रुतिवशादवरोहतां सदसद्योनिजन्महेतुभूतचरणशब्दिताचारानुवृत्तावपि न कर्मशेषानुवृत्तौ प्रमाणमस्तीति चेन्न—चरणश्रुतिः कर्मोपलक्षणार्थेति काष्णाजिनिराचार्यो मन्यते । केवलात् चरणशब्दितादाचारात् सुखदुःखहेतुभूतयोनिप्राप्त्यसंभवात् । " आनर्थक्यमिति चेन्न तदपेक्षत्वात् " । ननु सन्ध्यावन्दनाद्याचारस्य सुखदुःखहेतुत्वाभावे आनर्थक्यं स्यादिति चेन्न — तदपेक्षत्वादग्निहोत्रादिपुण्यकर्मणः । ' सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ' इति श्रवणत् सन्ध्यावन्दनाद्याचारवत एव वैदिककर्मणि अधिकारात् । " सुकृतदुष्कृते एवेति तु बादरिः । ' पुण्यं कर्माचरति, पापं कर्माचरति ' इति सुकृतदुष्कृतकर्मसु चरतिशब्दप्रयोगात् चर्यत इति चरणमिति व्युत्पत्त्या सुकृतदुष्कृते एव चरणशब्दाभिधेये । ' यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि । यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि ' इति कर्माचारयोः पृथङ्निर्देशस्तु गोबलीवर्दन्यायादुपपद्यते । वैतानिकानि तु कर्माणि कर्माणीत्युच्यन्ते । इतराणि तु आचारशब्देनाभिलप्यन्ते । अतः[4] चरणशब्देन सुकृतदुष्कृतयोरेवाभिलाप इति बादरिराचार्यो मन्यत इति स्थितम् ।

1. अयं क. पाठः । अन्यत्र ' सानुशया एवारोहन्ति ' । 2. रोहन्तीत्यर्थः ख. ग. 3. सदसत्प्राप्ति ख. 4. ततश्च क.

(५) तथा, 'यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवती' त्यादौ आकाशादिभावोऽपि देवमनुष्यादिभाववत् [1]तत्तच्छरीरकत्वलक्षण एवास्त्विति पूर्वपक्षे प्राप्ते — उच्यते— "तत्स्वाभाव्यापत्तिरुपपत्तेः"। तत्स्वाभाव्यापत्तिः = आकाशादिसादृश्यापत्तिरित्यर्थः। स्वभाव एव स्वाभाव्यम्। 'वर्तमानसामीप्ये' इत्यादिवत् स्वार्थिकः ष्यञ्। अतः तत्स्वाभाव्यापत्तिः तत्सादृश्यापत्तिरित्यर्थः। चन्द्रमण्डले शरीरारम्भकाणां भूतसूक्ष्माणां कर्मक्षये द्रवीभूतानां आकाशादि(आकाश)गतानां भेदकाकारप्रहाणेन आकाशादिसादृश्ये तदुपश्लिष्टानुशयिनोऽप्याकाशसमा भवन्तीत्यर्थः। कुतः? उपपत्तेः। सुखदुःखोपभोगाय हि तच्छरीरसंसर्गः। न हि अनुशयिनं प्रति आकाशादेर्जीवान्तरशरीरभूतस्य [2]तद्भोगाश्रयत्वमस्ति। युगपद् भोक्तृद्वयसमावेशे तयोः परस्परविरुद्धभोगार्थतया शरीरोन्मथनप्रसङ्गात्। [3]ननु अवरोहन्तो जीवा एव तत्तदभिमानिदेवता भवन्तिति चेन्न — सर्गाद्यकालमारभ्य आप्रलयमाकाशाद्यभिमानिदेवतानां अनुशयिभ्योऽन्यासां कृत्स्नानां सत्त्वेन अनुक्षणमवरोहतामनुशयिनामाकाशाद्यभिमानिदेवतात्वानुपपत्तेरिति स्थितम्।

(६) तदुत्तराधिकरणे — आकाशप्राप्तिप्रभृति यावद्व्रीह्यादिप्राप्ति किं तत्रतत्र नातिचिरं तिष्ठति, उत अनियम इति विशये, नियमहेत्वभावादनियम इति प्राप्ते—उच्यते, "नातिचिरेण विशेषात्"। आकाशादितो नातिचिरेण निष्क्रमणम्। कुतः? विशेषात्। उत्तरत्र व्रीह्यादिप्राप्तौ, 'अतो वै खलु दुर्निष्प्रपतर'मिति विशिष्य कृच्छ्रनिष्क्रमणाभिधानादिति स्थितम्।

(७) तदुत्तराधिकरणे, 'व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' इत्यनेन अनुशयिनां व्रीह्यादिभाव उच्यते। तत्र, 'देवो जायते, मनुष्यो जायते' इतिवत् इह, 'तिलमाषा इति जायन्त' इति श्रवणात् व्रीह्यादिशरीरका एवानुशयिनो भवन्तीति प्राप्ते उच्यते, "अन्याधिष्ठिते पूर्ववदभिलापात्"। अवरोहतां जीवान्तराधिष्ठिते व्रीह्यादौ संश्लेषमात्रम्। कुतः? पूर्ववदभिलापात्। 'आकाशाद्वायुं वायुर्भूत्वा धूमो भवती' त्यादौ आकाशादिभावे हेतुभूतकर्मकीर्तनाभावात् यथा आकाशादिषु संश्लेषमात्रम्, एवं व्रीह्यादिस्थावरभावहेतुभूतकर्मकीर्तनाभावात्, उत्त-

1. अयं क. पाठ। अन्यत्र तच्छरीरकः। 2. एतद् क. 3. न च ख. ननु ग.

रत्वैव, 'रमणीयचरणा अभ्याशो ह यत्' इति ब्राह्मणादिभाव एव हेतुभूतस्य कर्मणः कीर्तनात् ब्रीह्यादौ जीवान्तराधिष्ठिते संश्लेषमात्रमेव। "अशुद्धमिति चेन्न शब्दात्"। इष्टादिकर्मणां पशुहिंसामिश्रत्वात् हिंसायाश्च, 'न हिंस्यात्' इति निषिद्धत्वेनानिष्टसाधनत्वेन पापतया तन्मिश्रतया सुकृतकर्मणामशुद्धत्वात् सुकृतांशस्य फलं स्वर्गेऽनुभूय हिंसांशस्य स्थावरादिभावलक्षणं फलं अवरोहन् अनुभवतु। ननु, 'न हिंस्यात्' इति निषेधो विहितकर्त्वर्थहिंसाव्यतिरिक्तविषयोऽस्तु इति चेन्न—पुष्ट्यादिरूपेष्टसाधनघृतपानादौ [1]मेहादिरूपानिष्टसाधनत्वस्य च दर्शनेन उत्सर्गापवादन्यायस्यात्रानवतारात्। अतो यागाद्यनुप्रविष्टहिंसाफलत्वेन स्थावरभावोऽनुभोक्तव्य इति चेन्न — प्रवर्तनानिवर्तनारूपविधिनिषेधयोरविरोधस्य वक्तुमशक्यतया, सति च विरोधे सामान्यविशेषन्यायेन निषेधस्य विहितहिंसाव्यतिरिक्तविषयत्वात्। वस्तुतस्तु यागीयपशुहिंसायाः[2] हिंसात्वस्यैवाभावात्। 'न वा उ एतन्म्रियसे न रिष्यसी' ति मन्त्रवर्णात् हिंसात्वाभावस्यैव प्रतिपादनात्। न रिष्यसि = न हिंस्यसे इति हि तस्यार्थः।

ननु 'न रिष्यसी' ति मन्त्रवर्णात् हिंसात्वाभावाभ्युपगमे, 'न म्रियस' इति मन्त्रवर्णात् तन्मरणस्य मरणत्वमपि न स्यात्। ततश्च 'न म्रियस' इतिवत् 'न रिष्यसी' त्युक्तिरप्यौपचारिकीत्येवाऽऽश्रयणीयम्। मरणोद्देश्यकमरणानुकूलव्यापारत्वस्यैव हिंसात्वरूपत्वादिति चेत् — न मरणोद्देश्यकमरणानुकूलव्यापारत्वं हिंसात्वम्। कशाताडन – तप्तसंदंशिनीपाटन – क्रकचदारणादीनां मरणोद्देश्यकमरणानुकूलव्यापारत्वाभावेन हिंसात्वाभावप्रसंगात्। अतः तीव्रदुःखजननौपयिकव्यापारत्वस्यैव हिंसापदप्रवृत्तिनिमित्तत्वे वक्तव्ये,[3] 'व्रणादिचिकित्सके तात्कालिकतीव्रवेदनोत्पादके हिंसकत्वव्यपदेशाभावेन बलवत्तद्धिताजनकत्वे सति तद्वेदनाजनकव्यापारत्वं तद्धिंसात्वमित्याश्रयणीयम्। ततश्च व्रणचिकित्सया जायमानस्य आरोग्यरूपहितस्य तादात्विकवेदनापेक्षया बलवत्त्वान्न हिंसात्वम्' इति स्थिते पशुमरणानुकूलव्यापारस्य पशुवेदनाजनकत्वेऽपि स्वर्गप्राप्त्यादिलक्षणस्य पशुहितस्य बलवत्त्वान्न हिंसात्वम्।

1. मेह क. अन्यत्र मोह. 2. हिंसायां क. 3. अत्र संदर्भे, 'वक्तव्ये' सति— व्यपदेशाभावेन हि — इति पाठः। उपरि, 'ततश्च' 'तादात्विक' इति पदद्वयाभावश्च, क. कोशे।

५—११.

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनश्शार्कराक्ष्यो बुडिल आश्वतराश्विः ते हैते महाशाला महाश्रोत्रियाः

अतो, 'न हिंस्या' दिति निषेधाविषयत्वात् क्रत्वर्थपशुहिंसाया न पापजनकत्वमिति तद्भक्षेनावरोहतोऽनुशयिनो न व्रीह्यादिभावापत्तिरिति ।

"रेतस्सिग्योगोऽथ" । इतश्चौपचारिकं व्रीह्यादिजन्मवचनम् । व्रीह्यादिभाववचनान्तरम्, 'यो यो ह्यन्नमत्ति, यो रेतः सिञ्चति, तद्भूय एव भवति' इति रेतस्सिग्भावोऽनुशयिनां श्रूयमाणो यथा न मुख्यः, एवं व्रीह्यादिभावोऽपीत्यर्थः । "योनेः शरीरम्" । योनिप्राप्तेः पश्चादेवानुशयिनां ब्राह्मणादिशरीरप्राप्तिश्रवणात् ततः प्राङ् न शरीरपरिग्रहः । किन्तु संश्लेषमात्रम् । यत्र पुण्यापुण्यकर्मणी तत्रैव सुखदुःखे । यत्र सुखदुःखे तत्रैव तद्धेतुभूतं शरीरम् ।

ततश्चाकाशादिषु कर्मकीर्तनाभावेन तत्फलभूतसुखाद्यनुभवाभावात् न तद्धेतुभूतं शरीरमिति न योनिप्राप्तेः प्राक् शरीरपरिग्रह इति स्थितम् ॥ प्रकृतमनुसरामः । ५—१०.

वैश्वानरविद्या प्रस्तूयते । **प्राचीन— किं ब्रह्मेति** । उपमन्युसुतः प्राचीनशालनामा, पुलुषसुतः सत्ययज्ञनामा, भाल्लविसुत इन्द्रद्युम्ननामा, [1]शर्कराक्ष्य (शर्कराक्षः) सुतो जननामा, अश्वतराश्वसुतो बुडिलनामा, ते एते पञ्चापि **महाशालाः** महागृहस्थतया विस्तीर्णशालासंपन्नाः — प्रसिद्धा इति यावत् — **महाश्रोत्रियाः** अतीव

1. शार्कराक्ष्य क.

पञ्चाग्निविद्यानन्तरं वैश्वानरविद्या प्रस्तूयते । पुरुषाकारपरिणतभूतान्तर्वर्तिनो जीवस्य याथात्म्यनिरूपिणी सा; इयं पुरुषरूपेण कल्पितमहाभूततदन्यविश्वान्तरपरमात्मगोचरा । सा पञ्चभूतसूक्ष्माहुत्यनुसंधानमिश्रा; इयं पञ्चप्राणाहुत्यधिका । तत्र राज्ञः सकाशात् सर्वयैव विप्रज्ञातविद्याग्रहणम्; अत्र राज्ञ एव अयथावदज्ञातविद्याग्रहणम् । तत्र पुत्रप्रेरितेन गौतमेन राज्ञो विद्याग्रहणम्; अत्र बहुविप्रपुरस्कृतेन तेनैव गौतमेन राजान्तरात् विद्यान्तरग्रहणमिति रीत्या आनन्तर्यनियामकं विभाव्यम् । **प्राचीनशाल** इति । अयमौपमन्यवोऽग्निरहस्ये महाशालो जाबालो महाकाश्यो निर्दिष्टः । इमे औपवेशिमरुणमहर्षिं समेत्य अश्वपतिमुपसन्नास्तल्लोकाः । इह तु अङ्ग-

समेत्य मीमांसाञ्चक्रुः—को न आत्मा किं ब्रह्मेति ॥ १ ॥

श्रुताध्ययनसंपन्नाश्चैकत्र संभूय, 'अस्माकमन्तर्यामितयाऽऽत्मभूतं ब्रह्म किमिति मीमांसाञ्चक्रुः विचारं कृतवन्त इत्यर्थः ।

णिमुद्दालकं समेत्य । अत्र येन विप्रेण यदंशोद्गासनं क्रियमाणमिहोपवर्णितम्, न तत् तथैव तत्र, अत्र आदित्योपासकः तत्र अबुपासक इतिरीत्या भेददर्शनात् । एवमुपपादनवैषम्येऽपि तत्तदुपास्याकाराणां सर्वेषां मेलनं वैश्वानरविद्यायामित्येतदुभयत्राविशिष्टम् । यत्तु किञ्चित् उपास्यांशेऽपि वैलक्षण्यं प्रतीयमानम्, यथा—अत्र दिव उक्तं सुतेजस्त्वमग्निरहस्ये आदित्यस्योक्तं विश्वरूपत्वस्थाने; दिवस्तु अतिष्ठात्वमिति किञ्चिदिति , तत्र शब्दभेदेऽपि अनुसंधेयार्थ एकरूप एव—सुतेजस्त्वं हि विश्वप्रकाशकतेजस्संपन्नत्वमेव; अतिष्ठात्वञ्च सूर्यचन्द्रादितेजश्शालित्वरूपातिशयवत्तया स्थितत्वमेव—इति श्रुतप्रकाशिकायां समाहितम् । प्रादेशमात्रत्वं परं अत्र तत्र चोक्तं विभिन्नरूपमेवेति वैकल्पिकमिति वक्ष्यते । मूर्धादिपादान्तक्रमानुसारिणी निरूपणसरणिरिह । अग्निरहस्ये पादादिमूर्धान्तक्रमादरणम् ।

मीमांसाञ्चक्रुरिति । विवादेन प्रवृत्तानामेषां मीमांसानन्तरमप्यैकमत्यं न संपन्नमिति व्यक्तमग्निरहस्ये । अत एव स्वस्वपक्षे आग्रहेण अश्वपतिपृष्टैनैकैकेनापि, 'दिवमेव भगवो राजन्' इति रीत्या **एत्र**कारो निर्देक्ष्यते । **को न आत्मा किं ब्रह्मे**त्यस्य पर्यवसितार्थमाह **अस्माकमित्यादिना** । किमित्यस्य किमाकारमित्यर्थः । प्रश्नद्वयं वा । **ननु** आत्मब्रह्मणोरेकत्वात् कथमेवं प्रश्नद्वयम् । न च जीवात्मपरमात्मानौ क्रमेणेह जिज्ञासितौ; **नः आत्मे**ति व्यधिकरणविभक्त्या जीवातिरेकावगमात्; उपरि जीवात्मनिरूपणाच्चेति चेत् - अत्र **श्रुतप्रकाशिका**, 'आत्मब्रह्मशब्दवाच्यधर्म्यैकत्वानेकत्वजिज्ञासया वा किंशब्दद्वयप्रयोग' इति । अयं भावः—किं ब्रह्मेति प्रश्ने, इदं ब्रह्म, एवंलक्षणं ब्रह्मेति उपरि वक्तव्यम् । तत्तु न । उपरि ब्रह्मपदप्रयोग एव न लक्ष्यते । एते च विशिष्य वैश्वानरात्मविषयविवादेन प्रस्थिता इत्यस्य अत्र संदर्भे सुस्पष्टत्वात् **को न आत्मे**त्यस्य (**नः इति विशेषनिर्देशात्**) अस्माभिरुपास्यवैश्वानरात्मा किम्भूत इत्यर्थः । तत्र द्युलोकादित्याद्येकैकांशमात्रमितता तत्तदभिमतो वैश्वानरस्य दर्शयिष्यते । **किं ब्रह्मे**त्यस्य तु **किं** कस्मात् अयं ब्रह्म; यद्वा सोऽयमात्मा किं ब्रह्मैव उतान्य इत्यर्थः । अश्वपत्युत्तरश्रवणानन्तरमेव द्युलोकादित्यादिविश्वरूपत्वस्य वैश्वानरेऽवगमात् तादृशविश्वरूपतया प्रसिद्धं परं ब्रह्मैव वैश्वानर इत्यर्थादवसितं भविष्यति । ततः प्राक् तु द्युलोकादित्यादिमात्रत्ववित्तौ ब्रह्मत्वे संशय एव । तथाच द्यौर्वाऽऽदित्यो वा अन्यो वा कोऽसौ वैश्वानरात्मा । तावन्मात्रत्वे ब्रह्मत्वञ्च कथम्; देवतान्तरत्वस्यापि संभवादिति अस्यात्मनो ब्रह्मणश्चैकत्वमनेकत्वं वेति जिज्ञासया किंशब्दद्वयमिति । अत एव किमयं ब्रह्म अन्यद्वेति मीमांसितवतां वृत्तं वर्णयन् वैश्वानरविद्यासंदर्भे असाधारणतया प्रतीयमानः पुनरशक्यनिर्णयत्व एवात्मानं स्थापयतीति वैश्वानराधिकरणे पूर्वपक्षे प्राप्ते, तन्निरासाय, 'असंभवात्' इति सौत्रखण्डेन त्रैलोक्यशरीरकत्वं हेतुमश्वपतिवाक्याधिगतमुपन्यस्य ब्रह्मत्वसाधनमिति ।

ते ह संपादयाञ्चक्रुः, 'उद्दालको वै भगवन्तोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति, तँ हन्ताभ्यागच्छामे' ति । तँ हाभ्याजग्मुः ।

स ह संपादयाञ्चकार, 'प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियाः । तेभ्यो न सर्वमिव प्रतिपत्स्ये । हन्ताहमन्यमभ्यनुशासानी' ति ॥ ३ ॥

ते ह संपादयाञ्चक्रुः । ते एवं मीमांसित्वा निश्चयमलभमानाः आत्मभूतब्रह्मोपदेष्टारं कञ्चित् संपादितवन्तः । निश्चितवन्त इत्यर्थः । किमिति । तत्राह **उद्दालको — अभ्यागच्छामेति** । हे भगवन्तः ! अरुणसुत उद्दालकनामा इदानीं वैश्वानरमात्मानं अध्येति — इक् स्मरणे । उपास्त इत्यर्थः । यद्वा इण् गताविति गत्यर्थानां ज्ञानार्थत्वात् 'अवगच्छती' त्यर्थः — **तमुद्दालकमभ्यागच्छामेति**[1] ।

तं हाभ्याजग्मुः तमभ्यागतवन्त इत्यर्थः । **स ह — अभ्यनुशासानीति** । स ह उद्दालकः तान् आगतान् दृष्ट्वा, 'एते महाशाला महाश्रोत्रिया मां वैश्वानरमात्मानं प्रक्ष्यन्ति । नाहं तत् सर्वं प्रतिपद्य[2] तेभ्यो वक्तुं शक्नोमि । अतोऽन्यं तदभिज्ञं कञ्चित् **अनुशासानि** उपदिशानी' त्येवं संपादितवान् = निश्चितवानित्यर्थः ।

1. गच्छामेति निश्चित्य **ख**. 2. तत् सर्वं प्रतिपत्तुं शक्नोमि **क**.

संपादयाञ्चक्रुः । न वैश्वानरात्मनिर्णयम्, किंतु तदर्थमभिगन्तव्यव्यक्तिनिर्णयम् । **संप्रती**तिशब्दः सम्यगित्यर्थे श्रुतिप्रसिद्धः । **प्रति**शब्दोऽभिमुखार्थः प्रतिवेश्मादिपदे प्रसिद्धः । संप्रति = सम्यगभिमुखम् ऋजु इति यावत् । तदेव सम्यगिति । पूर्वमपि (२ — ९.) संप्रतिमध्यन्दिन इति ऋजुमध्यन्दिन इत्यर्थे प्रयुक्तमस्ति । **नन्वेवं** संप्रतिशब्दावयवार्थपर्यालोचने संप्रतिमध्यन्दिनेत्यत्र संप्रतिपदं साक्षादुच्चकालमात्रग्रहणाय प्रयुक्तं स्यादित्यालोच्यत इति तत्र षण्णाडिकात्मकमध्यन्दिनरूपार्थवर्णनं कृतमयुक्तमिति चेत् — अस्तु सोऽर्थो यथाकथञ्चित् । एवं व्युत्पत्तेरपि संभवात् श्रुतिप्रयोगस्वरसाच्च सम्यगित्यर्थो ग्राह्यः । अत एव शाङ्करे सम्यगिति व्याख्यातम् । इदानीमित्यर्थश्च तत्काले वैश्वानरवेदनवत्त्वस्य तेषु सर्वेष्वविशिष्टतया अव्यावर्तकः । अभिगमनहेतुश्च सम्यक् तद्वेदनमेव । अत इह भाष्ये **इदानी**मिति **अध्ये**तीति लङुक्तवर्तमानकालविवरणरूपं ग्राह्यम् । **संप्रति**शब्दार्थं तु, 'न च ते तदज्ञानमपलापार्हम्' इति अश्वपतौ दर्शयिष्यति ।

तान् होवाच, 'अश्वपतिर्वै भगवन्तोऽयं कैक[1]यः संप्रतीममात्मानं वैश्वानरमध्येति; तँ हन्ताभ्यागच्छेमे'ति । तँ हाभ्याजगमुः ॥ ४ ॥

तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार । स ह प्रातः संजिहान उवाच, 'न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान् न स्वैरी, स्वैरिणी कुतः । यक्ष्यमाणो वै भगवन्तोऽहमस्मि । यावदेकैकस्मा

1. कैकेयः शां. मा.

तान् होवाच । स उद्दालक औपमन्यवादीन् प्रति आह । किमिति । अश्व—गच्छामेति । केकयस्यापत्यं कैकयः[1] । शिष्टं स्पष्टम् ।

तं हाभ्याजगमुः । तं अश्वपतिमुद्दालकषष्ठाः ते अभ्यागतवन्त इत्यर्थः ।

तेभ्यो ह—चकार । प्राप्तेभ्यः तेभ्यो महर्षिभ्यः कैकयः पृथक्पृथक् अर्हाणि अर्हणानि पूजाः[2] भृत्यैः पुरोहितादिभिश्च कारितवानित्यर्थः ।

स ह—उवाच । स ह राजा अन्येद्युः प्रातःकाले स्वभवनं संजिहानः त्यजन्—स्वभवनात् निर्गत्य; तत्समीपमेत्येति यावत्—तान् महर्षीनुवाचेत्यर्थः । किमिति । तत्राह—

न मे—भगवन्त इति । 'हे भगवन्तः पूजार्हाः ! मदधिष्ठिते जनपदे स्तेनः चोरो वा, कदर्यः दानशून्यो वा, मद्यपायी वा, सत्यां योग्यतायामनाहिताग्निर्वा, अविद्वान् वेदाध्ययनादिशून्यस्त्रैवर्णिको वा, स्वैरी परदारगन्ता वा, [3]पुंश्चली वा एवमाद्याः दुष्टाः न सन्ति — न हि तैर्दत्तं धनमुपजीवामि । अतो

1. कैकेय इतिसर्वत्र भाष्येऽपि पाठः ग. 2. पृथक् पृथक् पूजां क. ग. 3. परदारगन्ता वा न सन्ति । स्वैरिणी पुंश्चली तु कुतः स्यादित्यर्थः । एवमाद्याः दुष्टाः मज्जनपदे न सन्ति ख.

जानश्रुतिविषये संजिहान इति पदं 'तल्पं त्यजन्' इति व्याख्यातम् ; अन्तःपुर एव क्षत्ता व्याहारसंभवात् । इह तु न तथेति । स्वैरिणी कुत इति । स्वैरित्वस्य मिथुनायत्तत्वात् पुंसि स्वैरित्वनिषेधे स्त्रियः स न पृथक् कर्तव्य इति भावः । यद्वा इतस्ततो जनपदाद् बहिरटतां पुंसामेवास्वैरित्वे प्रायोऽन्तः स्थितानां स्त्रीणां स्वैरित्वमसंभावितमिति ।

नन्विदं न मे स्तेन इत्यादिकं स्वात्मप्रशंसापर्यवसायि किमित्युक्तं राज्ञेत्यत्र स्वधनं तांस्तत्राप्यप्राप्तान् महात्मनः प्रतिग्राहयितुमिति भावमाह न हि तैरित्यादिना ।

ऋत्विजे धनं दास्यामि, तावद् भगवद्भ्यो दास्यामि । वसन्तु भगवन्त' इति ॥ ५ ॥

ते होचुः, 'येन हैवार्थेन पुरुषश्चरेत्, तँ हैव वदेत् । आत्मानमेवेमं वैश्वानरँ संप्रत्यध्येषि, तमेव नो ब्रूही' ति ॥ ६ ॥

तान् होवाच, 'प्रातर्वः प्रतिवक्तास्मी' ति ।

मम प्रतिग्रहयोग्यताऽस्तीति [1]भावः ।—अहमचिरेणैव कालेन यागं करिष्यामि । तत्र यागे एकैकस्मै ऋत्विजे यावत् धनं दास्यामि, तावत भगवद्भ्यः प्रत्येकं दास्यामि । तावत्कालमत्रैव वसन्तु; यागञ्च पश्यन्तु' इति प्रार्थितवानित्यर्थः । भगवता च भाष्यकृता, "न मे स्तेन इत्यादिना, 'यक्ष्यमाणो वै भगवन्तोऽहमस्मी' त्यन्तेन आत्मनो व्रतस्थतया प्रतिग्रहयोग्यतां ज्ञापयन्नेव ब्रह्मविद्भिरपि प्रतिषिद्धस्य परिहरणीयतां विहितस्य कर्तव्यतां च प्रज्ञाप्य,[2] 'यावदेकैकस्मै ऋत्विजे धनं दास्यामि, तावद् भगवद्भ्यो दास्यामि । वसन्तु भगवन्त' इत्यवोचत्" इति भाषितम् ।

ते होचुः । ते ऋषयो राजनं प्रति ऊचुः । किमिति । तदाह **येन — ब्रूहीति** । येन **अर्थेन** प्रयोजनेन, यत् प्रयोजनमुद्दिश्य पुरुषः **चरेत्** आगच्छति, तमेव पुरुषार्थं तस्य [**वदेत्** कुर्यामिति वदेत् ।] कुर्यात् [इति यावत्] । समीहितं हि कर्तव्यं भवति । अस्माकञ्च वैश्वानर आत्मा जिज्ञासितः । त्वञ्च तमात्मानमधुनाऽध्येषि उपास्से । न च ते तज्ज्ञानमपलापार्हम् । अतः तमेव न उपदिश; न प्रयोजनान्तरमित्यर्थः । विश्वान् नरान् नयतीति, विश्व एनं नरा नयन्तीति वा विश्वानरः । विश्वानर एव वैश्वानरः; वय एव वायस इतिवत् ।

तान् — प्रतिवक्तास्मीति । तेषामभिमानं परिशाध्य, श्वः प्रतिवचनं

1. 'इति भावः'इति ग. कोशे न. 2. प्रतिज्ञाप्य ख. ग.

श्वः इति । ननु पूर्वं प्रातः संजिहान इत्यत्र प्रातःपदमुदयप्राक्कालपरमस्तु । इह च तत् स्नानाद्यनुष्ठानानन्तरकालपरम् । उच्यते हि, 'पूर्वाह्णे प्रतिचक्रमिरे' इति समनन्तरम् । ब्रह्मविद्याग्रहणकालश्च स इति, 'पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम्' इत्यादौ प्रसिद्धम् । अतः किमति दिनभेदकल्पनमिति चेत् — उच्यते । राज्ञः तस्मिन् दिने यज्ञव्यापृतत्वात् प्रतिवक्तास्मीति अनद्यतनार्थकलुङ्प्रयोगाच्च श्व इति सिद्धमिति ।

ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे । तान् हानुपनीयैवैतदुवाच --॥ ७ ॥

इति पञ्चमाध्याये एकादशः खण्डः

५—१२.

औपमन्यव ! कं त्वमात्मानमुपास्से' इति । 'दिवमेव भगवो राजन्' इति होवाच । 'एष वै सुतेजा आत्मा वैश्वानरः, यं त्वमात्मान-

---

दास्यामीति मत्वा, 'प्रातः प्रश्नस्य प्रतिवचनकर्तास्मी'त्युवाचेत्यर्थः । **ते--प्रतिचक्रमिरे** । ते च राज्ञोऽभिप्रायज्ञाः समिद्धारहस्ता अपरेद्युः पूर्वाह्णे राजानम्, 'शिष्या भवेमे'त्युपगतवन्तः । **तान् — उवाच** । राजा तु तान् समित्पाणीन्, उपयामेति वदतः त्यक्तस्वजात्यभिमानान् उद्वीक्ष्य तेषामुपदेशयोग्यतां ज्ञात्वा, 'अब्राह्मणेन न ब्राह्मण उपनेतव्यः' इति शास्त्रार्थं ज्ञात्वा तैः समर्पितं समिदाद्युपायनमस्वीकृत्यैव मैत्र्यैव **एतत्** वक्ष्यमाणमुवाचेत्यर्थः ।

यत एवं महाशालाः महाश्रोत्रिया ब्राह्मणास्सन्तो महाशालत्वाद्यभिमानं हित्वा समिद्धारहस्ताः जातितो हीनं राजानं विद्यार्थितयोपजग्मुः, तस्मात् तथाऽन्यैर्विद्योपादित्सुभिर्भवितव्यमित्याख्यायिकया सूच्यते । ५--११.

अथ कैकयस्तेभ्यो वैश्वानरात्मानमुपदिदिक्षुः विशेषप्रश्नान्यथानुपपत्त्या वैश्वानरात्मन्येतैः किञ्चिद् ज्ञातम्, किञ्चिदज्ञातमिति विज्ञाय ज्ञातांशबुभुत्सया तान् एकैकशः प्रष्टुमुपक्रमते; तत्रौपमन्यवं पृच्छति — **औपमन्यव—उपास्स इति** । **दिव — होवाच** । हे भगवः! द्युलोकशरीरकं वैश्वानरमहमुपास्स इति औपमन्यवः प्रत्युवाचेत्यर्थः । कैकय आह, **एष — नागमिष्य इति** । यं द्युलोकावच्छिन्नं वैश्वानरमात्मानं त्वमुपास्से, एष वैश्वानर आत्मा सुतेजाः । द्युलोको हि सूर्यचन्द्रादि[1]तेजोयुक्ततया सुतेजा भवति । [2]यतश्च द्युलोकावच्छिन्नो वैश्वानर आत्मा त्वयोपास्यमानः सुतेजस्त्वगुणयोगेन सुतेजोनामा वैश्वानरः, तस्मात तव सुतं

1. चन्द्रतेजो. ख. 2. अतश्च क.

मुपास्से । तस्मात् तव सुतं प्रसुतमासुतं कुले दृश्यते (१); अत्स्यन्नम्; पश्यसि प्रियम्॥ अत्स्यन्नम्, पश्यति प्रियम्, भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते । मूर्धा त्वेष आत्मन' इति

प्रसुतमासुतं कुले दृश्यते । अत्र सुत-प्रसुत -- आसुतशब्दाः एकाहाहीनसत्रकर्मगताभिषवणपराः । सुतशब्दवत्त्वसाम्यात् सुतेजस्त्वोपासनायाः सुतादिफलकत्वोपपत्तिरिति भावः । **अत्स्यन्नं पश्यसि प्रियम्** । तदुपासनावैभवेन **अन्नं** लौकिकं भोग्यमनुभवसि, प्रियं पुत्रादिकञ्च पश्यसीत्यर्थः । एवमन्योऽपि यः, त्वमिव, त्वदुपास्यं वैश्वानरमुपास्ते, सोऽपि त्वमिवान्नादनप्रियदर्शनब्रह्मवर्चसशाली सन्तानवांश्च भवतीत्याह — **अत्स्यन्नं — उपास्ते** । उक्तोऽर्थः । एवं तदुक्तमर्थमङ्गीकुर्वन्निव फलप्रदर्शनेन तमभिमुखीकृत्य तत्र वक्तव्यमंशमुपदिशति **मूर्धा तु**— । त्वया वैश्वानरबुद्ध्या उपास्यमान एष द्युलोकः परिच्छिन्नः **आत्मनो** वैश्वानरस्यात्मनो मूर्धावयवभूतः; न तु स एव वैश्वानरात्मा । एतदर्थनिर्णयार्थं तत्र मत्समीपानागमने

एकाहाहीनसत्रेति । सोमयागेषु ज्योतिष्टोम एकाहः; पञ्चद्विनसाध्यस्य तस्य पञ्चममहरेकमेव सुत्याहः । द्विरात्रप्रभृतिरहीनो द्वादशाहं यावत् । द्वादशाहादूर्ध्वं सर्वं सत्रम् । द्वादशाह उभयविधः । **सुत**मिति भावे क्तः । षुञ् अभिषवे । **सुतशब्दवत्त्वसाम्यादिति** । उपरि तत्तन्नामानुगुणमेव फलप्रदर्शनादिहापि तथैव वर्णने औचित्यादिति भावः । अत्र **तस्मादित्यादिना** मूले उपासनकालिकफलस्यैव कथनात् सर्वमिदमानुषङ्गिकफलमेव अयथोपासकेऽपि क्रमेण यथावत् समग्रोपासनसंभावनया भगवता कृपया तात्कालिकं संकल्प्यमानम् । अतः तन्मध्यनिविष्टम् **अत्स्यन्न**मित्यपि लौकिकफलपरमेवेति **लौकिकं भोग्यमनुभवसीत्युक्तम्** । न तु विद्याफलभूतं, 'सर्वेष्वात्मस्वन्नमत्ती' त्यन्नादनमिह संबध्यते । **अत्स्यन्न**मित्युपरितनवाक्यं तु वक्ष्यमाणपरमात्मरूपान्नादनपरं भवितुमर्हति । **एव**मिति द्युलोकप्रकारकमित्यर्थः । **भवत्यस्य प्रिय**मित्यादि च प्राणाग्निहोत्रे वक्ष्यमाणफलैकदेशः । अत्र कैकयस्यान्तराशयस्तावत् — यो यथावस्थितवैश्वानरात्मोपासनैकदेशरूपद्युलोकप्रकारकतदुपासनवान्, स तत्फलैकदेशवानिति । अज्ञाताशयस्तु श्रोता यथावस्थितज्ञानरहितः स्वोपासनस्यापि तत् फलं मेने । तन्मतिनिरासाय चोपरि अनर्थप्रदर्शनमिति । तदिदं सूचयितुं **अङ्गीकुर्वन्निवेति इव**कारः । नेदमनुपास्योपासनं त्वया क्रियमाणम्, किंतु उपास्योपासनमेवेति दर्शयितुमेव **एष वै सुतेजा** इत्यादि प्रागुक्तम् । न तु तावदेव पर्याप्तमिति ।

होवाच, 'मूर्धा ते व्यपतिष्यत्, यन्मां नागमिष्यः' इति ॥ २ ॥

इति पञ्चमाध्याये द्वादशः खण्डः ।

५—१३.

अथ होवाच सत्ययज्ञं पौलुषिम्, 'प्राचीनयोग्य ! कं त्वमात्मानमुपास्से' इति । 'आदित्यमेव भगवो राजन्' इति होवाच, 'एष वै विश्वरूप आत्मा वैश्वानरः, यं त्वमात्मानमुपास्से । तस्मात् तव बहु विश्वरूपं कुले दृश्यते (१); प्रवृत्तोऽश्वतरीरथो दासीनिष्कः; अत्स्यन्नम्; पश्यसि प्रियम् ॥ अत्स्यन्नम्, पश्यति प्रियम्, भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते । चक्षुष्ट्वतदात्मनः' इति होवाच — 'अन्धोऽभविष्यत्, यन्मां नागमिष्यः' इति ।

इति पञ्चमाध्याये त्रयोदशः खण्डः ।

५—१४.

अथ होवाचेन्द्रद्युम्नं भाल्लवेयम्, 'वैयाघ्रपद्य ! कं त्वमात्मान

तत्र[1] वैश्वानरात्मनो मूर्धरूपावयवभूते द्युलोके कृत्स्नवैश्वानरबुद्धिं कुर्वतस्तव **मूर्धा व्यपतिष्यत्** विपरीतविद्यावशादनर्थः स्यात् । अतः साध्वकार्षीः, यत् त्वं मामागतोऽसीत्यभिप्रायः । ५—१२.

अथ — उपास्स इति । प्राचीनयोग्य इति सत्ययज्ञस्य नामान्तरम् । **आदित्य — विश्वरूप आत्मा वैश्वानरः** — । रूप्यत इति रूपम् । विश्वं रूपं प्रकाश्यं यस्य, स विश्वरूपः । आदित्यस्य विश्वप्रकाशकत्वात् विश्वरूपत्वम् । **तस्मात् — दृश्यते** । एतदुपासनात् तव कुले **बहु विश्वरूपं** विश्वप्रकाशकं पुत्ररत्नादिकं दृश्यत इत्यर्थः । **प्रवृत्तो — नागमिष्य इति** । अश्वतरीभिर्युक्तो रथः **अश्वतरीरथः** त्वामनु[2] प्रवृत्तः दासीभिर्युक्तो **निष्कः** हारः **दासीनिष्कः** त्वामनुप्रवृत्तइत्यर्थः । शिष्टं सर्वं पूर्ववत् । ५—१३.

1. तत्रेत्यनन्तरं कृत्स्नेत्यन्तं न **ख.** कोशे । 2. त्वामनुवृत्तः **ख.**

चक्षुष्ट्वतदिति । चक्षुः, तु, एतदिति पदच्छेदः । **दासीनिष्क इति** । अत्र **दासी**ति जात्येकवचनान्तं पृथक्पदमपि सुवचम् । तथापि दासीभ्योपि निष्कदानानुरूपविशेषैश्वर्यलाभात् समास आदृतः । **वैयाघ्रपद्य**इति । अयमिन्द्रद्युम्नो बुडिलश्च द्वावपि वैयाघ्रपद्यौ ।

मुपास्से' इति । "वायुमेव भगवो राजन्' इति होवाच । 'एष वै पृथग्वर्त्मा वैश्वानरः, यं त्वमात्मानमुपास्से । तस्मात् त्वां पृथग् बलय [1]आयन्ति; पृथग् रथश्रेणयोऽनुयन्ति (१); अत्स्यन्नम्; पश्यसि प्रियम् ॥ अत्स्यन्नम्, पश्यति प्रियम्, भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते । प्राणस्त्वेष आत्मन' इति होवाच –, 'प्राणस्त उदक्रमिष्यत्, यन्मां नागमिष्यः' इति ॥ २ ॥

इति पञ्चमाध्याये चतुर्दशः खण्डः ।

५—१५.

अथ होवाच जनँ शार्कराक्ष्यम्, 'शार्कराक्ष्य ! कं त्वमात्मानमुपास्से' इति । 'आकाशमेव भगवो राजन्' इति होवाच । 'एष वै बहुल आत्मा वैश्वानरः, यं त्वमात्मानमुपास्से । तस्मात् त्वं बहुलोऽसि प्रजया च धनेन च (१); अत्स्यन्नम्; पश्यसि प्रियम् ॥ अत्स्यन्नम्, पश्यति प्रियम्, भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते । संदेहस्त्वेष आत्मन' इति होवाच, — 'संदेहस्ते व्यशीर्यत्, यन्मां नागमिष्यः' इति ॥ २ ॥ इति पञ्चमाध्याये पञ्चदशः खण्डः ।

---

1. आयन्ति पा.

अथ — अनुयन्ति । व्याघ्रपद्यस्यापत्यं वैयाघ्रपद्यः । भालुवेरेव व्याघ्रपद्य इति नामान्तरम् । वायोर्विविधगतित्वात् **पृथग्वर्त्मत्वम्** । **तस्मात् — अनुयन्ति** । **पृथक्** नानादिक्स्थाः वस्त्रान्नादिलक्षणाः **बलयः आयन्ति** आगच्छन्ति । रथपङ्क्तयोऽपि त्वामनुयान्तीत्यर्थः । **अत्स्यन्नं — नागमिष्य इति** । सर्वं पूर्ववत् । ५–१४.

अथ — धनेन च । एष वै बहुल आत्मा । भूतान्तरेभ्य आकाशस्य महत्त्वात् बहुलत्वम् । शिष्टं स्पष्टम् । **अत्स्यन्नम्** — । **संदेहः** मध्यकायः । मध्यकायो हि उत्तरापरकाययोः कानुप्रविष्ट इति संदिह्यमानत्वात् **संदेह इत्युच्यते** । **व्यशीर्यत्** विशीर्णोऽभविष्यत् । शिष्टं स्पष्टम् । ५–१५.

संदिह्यमानेति । विदेहेष्वप्यर्थत्वात् मांसादिबहुलं शरीरं **संदेह इति** परे । 'मध्यं ह्येषामङ्गानामात्मा' इति श्रुतिः । 'खं नाभिः' इति स्मृतिः । (१—२, २९.) भूतप्रकाशिका इत्यन्ता ।

५—१६.

अथ होवाच बुडिलमाश्वतराश्विम्, 'वैयाघ्रपद्य ! कं त्वमात्मानमुपास्से' इति। 'अय एव भगवो राजन्' इति होवाच। 'एष वै रयिरात्मा वैश्वानरः, यं त्वमात्मानमुपास्से। तस्मात्त्वँ रयिमान् पुष्टिमानसि (१); अत्स्यन्नम्; पश्यसि प्रियम्॥ अत्स्यन्नम्, पश्यति प्रियम्, भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते। वस्तिस्त्वेष आत्मन' इति होवाच। 'वस्तिस्ते व्यभेत्स्यत्, यन्मां नागमिष्यः' इति॥ २॥

इति पञ्चमाध्याये षोडशः खण्डः।

५—१७.

अथ होवाचोद्दालकमारुणिम्, 'गौतम ! कं त्वमात्मानमुपास्से' इति। 'पृथिवीमेव भगवो राजन्' इति होवाच। 'एष वै प्रतिष्ठाऽऽत्मा वैश्वानरः, यं त्वमात्मानमुपास्से, तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च (१); अत्स्यन्नम्, पश्यसि प्रियम्॥ अत्स्यन्नम्, पश्यति प्रियम्। भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते। 'पादौ त्वेतावात्मनः' इति होवाच, 'पादौ ते व्यम्लास्येताम्, यन्मां नागमिष्यः' इति॥ २॥

इति पञ्चमाध्याये सप्तदशः खण्डः।

अथ — **पुष्टिमानसि**। **वैयाघ्रपद्य** व्याघ्रपद्गोत्रापत्येत्यर्थः। **एष वै रयिरात्मा**। अपां वेगवत्त्वात् रयित्वम्। विसर्गश्छान्दसः। [अतो **रयी**त्यनुक्तिः।] धनप्राप्तिहेतुत्वाद्वा रयित्वम्। रयिमान् धनवानित्यर्थः। **अत्स्यन्नम्** —। **वस्तिः** मूत्रस्थानम्। शिष्टं स्पष्टम्। ५-१६.

अथ—**पशुभिश्च**। प्राण्याधारत्वात् पृथिव्याः प्रतिष्ठात्वम्। **अत्स्यन्नम्**—। **व्यम्लास्येतां** म्लानौ श्लथौ अभविष्यतामित्यर्थः। शिष्टं स्पष्टम्।

५—१८.

तान् होवाच, 'एते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वाँसोऽन्नमत्थ। यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ॥ १ ॥

तान् होवाच। अथ राजा **तान्** ऋषीन् पुनरुवाचेत्यर्थः। **एते वै — अत्थ**। एतादृशा हि यूयमिमं वैश्वानरमात्मानं पृथगिव विद्वांसः भिन्नभिन्नतयोपासीनाः तदानुरूप्येण **अन्नमत्थ** लौकिकं भोगमनुभवथेत्यर्थः। पूर्वत्र **अत्स्यन्नमिति** प्रतिपुरुषमुक्तस्य अत्र **अत्थेति** बहुवचनेन निर्देशः। अत्र **अन्नमत्थेत्येतत्**, प्रियं पश्यथेत्यस्याप्युपलक्षणम्। **यस्तु — अत्ति**। **अभिविमानं** सर्वाभिव्याप्ततया विगतमानं **वैश्वानरं** विश्वेषां नराणां नेतारं एतमात्मानं **प्रादेशमात्रं** — द्युलोकादिप्रदेशसंबन्धिनी प्रादेशी। प्रादेशी मात्रा यस्य तं प्रादेशमात्रं — द्युप्रभृतिप्रदेशपरिच्छिन्नं य उपास्ते, स सर्वलोकसर्वभूतसर्वात्मवर्ति ब्रह्मरूपमन्नं **अत्ति** अनुभवतीत्यर्थः।

अनेन वैश्वानरोपासनस्य ब्रह्मप्राप्तिफलकत्वं उक्तं भवति। **भगवता च भाष्यकृता**, "सर्वेषु भूतेषु सर्वेष्वात्मसु च वर्तमानं यत् **अन्नं** भोग्यम्, तदत्ति। सर्वत्र वर्तमानं स्वत एवानवधिकातिशयानन्दं ब्रह्मानुभवति। यत्तु सर्वैः कर्मवश्यैरात्मभिः

सर्वेषु लोकेष्विति। द्युलोकादित्यादीनां लोकभूतादिरूपत्वादिति भावः।

वर्तिब्रह्मरूपमन्नमिति सर्वत्र सप्तम्यर्थोऽधिकरणत्वं कर्तृद्वारा कर्मद्वारा वा धात्वर्थेऽन्वेति। यथा आसने भुङ्क्ते, पात्रे भुङ्क्ते इति। तत्र कर्तृद्वारा अन्वय इह दुर्वचः। उपासकस्य फलानुभवदशायां सर्वलोकसर्वभूतवर्तित्वसंभवेऽपि सर्वात्मवर्तित्वायोगात्। तस्य परमात्मासाधारणत्वात्। आत्मशब्दस्य शरीराद्यमुख्यार्थग्रहणस्य चायुक्तत्वात्। भूतपदेन चराचरग्रहणात् शुद्धात्मनामेवात्मपदेन ग्राह्यत्वात्। अतः कर्मद्वारा सप्तम्यर्थान्वयः। सर्वात्मवर्ति चान्नं ब्रह्मैव। प्रसिद्धमिदम्, 'अहमन्नाद' इत्यादौ। मोक्षफलस्यात्र अन्नादनरूपेण कथनञ्च एकदेशोपासिनामन्नादनफलस्थितेः प्राक् प्रदर्शनात् तदानुरूप्याय; अन्नादनरूपाग्निहोत्राङ्गिकेयं विद्या अन्नादनफलिकेत्यौचित्याय च। यथा अन्नदातृज्ञानश्रुतिविषये अन्नादनकथनम्। यथा च अन्नानिन्दनादिव्रतोपदेशपूर्वमानन्दमयविद्यायाम्, 'अहमन्नम्, अहमन्नादः' इति।

नन्वस्य मूलवाक्यस्य, सर्वलोकभूतात्मतृप्तिकरमन्नादनमस्योपासकस्य भवतीत्यर्थोऽस्तु। तदेवोपरि विधियते, सर्वलोकादीन् उपासकशरीरे परिकल्प्य सर्वतृप्तिकरप्राणाग्निहोत्रवर्णनेनेति चेत्—न। पूर्वं अत्स्यन्नमिति व्यस्तोपासनेषु अन्नादनस्य फलतया कीर्तनात् तस्य चैतद्वाक्यासंहितविषये अंशानुवादरूपतया अस्यापि वाक्यस्य फलपरताया आवश्यकत्वात्। त्वदुक्तार्थस्येतोऽलाभाच्च। उपरि 'सर्वेष्वात्मसु हुतं भवती'ति वाक्यान्तरेण तस्यार्थस्य वक्ष्यमाणत्वाच्च।

प्रत्येकं अनन्यसाधारणमन्नं भुज्यते, तत् मुमुक्षुभिस्त्याज्यत्वादिह न गृह्यते"इति भाषितम् ।

अत्र, "प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसंपन्नाः । तथा तु व एनान् वक्ष्यामि यथा प्रादेशमात्रमभिसंपादयिष्यामीति । स होवाच मूर्धानमुपदिशन्, 'एष वा अतिष्ठा वैश्वानर' इति; चक्षुषी उपदिशन्नुवाच, 'एष वै सुतेजा वैश्वानर' इति; नासिके उपदिशन्नुवाच, एष वै पृथग्ववर्त्मा वैश्वानर' इति। मुख्यमाकाशमुपदिशन्नुवाच, 'एष वै बहुलो वैश्वानर' इति; मुख्या अप उपदिशन्नुवाच, 'एष वै रयिर्वैश्वानरः' इति; चुबुकमुपदिशन्नुवाच, 'एष वै प्रतिष्ठा वैश्वानर' इति"इति वाजसनेयकोक्तमूर्धचुबुकान्तरालप्रतिष्ठितत्वलभ्यं[1] प्रादेशमात्रत्वं नोपजीव्यम्। द्युप्रभृतिप्रदेशसंबन्धिमात्रावत्त्वस्य[2] यौगिकार्थस्य प्रकरणतः प्रतीतेः। उक्तञ्च व्यासार्यैः सर्ववेदान्तप्रत्ययाधिकरणे, "यस्त्वेतमिति न वाजसनेयकोक्तानुवादः। स्वशाखावाक्य एव पूर्वप्रतिपादितस्यानुवादेन फलसमर्पकत्वोपपत्तेः" इति ।

न चापरिच्छिन्नस्य परस्य ब्रह्मणो द्युप्रभृतिपृथिव्यन्तप्रदेशसंबन्धिन्या मात्रया कथं परिच्छिन्नत्वमिति चोदनीयम् – परिच्छिन्नत्वे बुद्धिसौकर्यलक्षणाभिव्यक्तेः संभवात् । सूत्रितञ्च, "अभिव्यक्तेरित्याश्मरथ्यः" इति । बुद्धिसौकर्यलक्षणाभिव्यक्तेर्हेतोः अभिविमानस्यापि ब्रह्मणः प्रादेशमात्रत्वमुपदिश्यत इत्याश्मरथ्य आचार्यो मन्यते इति सूत्रार्थः ॥ अभिव्यक्त्यर्थं परिच्छिन्नत्वोपदेशेऽपि मूर्धप्रभृत्यवयवविशेषैः पुरुषविधत्वं परस्य ब्रह्मणः किमर्थमिति न चोदनीयम्—तथोपासनार्थत्वात् । सूत्रितञ्च, "अनुस्मृतेर्बादरिः" इति । अनुस्मृतिः उपासनम् । अनुस्मृतेर्हेतोः पुरुषविधत्वमिति (?) रूपणमिति बादरिराचार्यो मन्यत इति सूत्रार्थः ।

1. लभ्यप्रादेशमात्रं क. 2. अयं क. पाठः । अन्यत्र 'संबन्धित्वमात्रस्य' इति ।

यौगिकार्थस्येति । न च प्रादेशशब्दरूढ्यर्थस्य शीघ्रप्रतीतस्य, अग्निरहस्यवाक्यशेषव्युत्पादितस्य प्रादेशमात्रपदार्थस्य च त्यागो न न्याय्य इति वाच्यम् – तदग्रहणे, तस्य ह वा एतस्येत्यादुपरिवर्ण्यमानप्रकारविरोधापत्तिबलादेव तत्त्यागात् । तत्र हि उपासकशरीरे मूर्धादिपादान्तेषु द्युलोकादिपृथिव्यन्तवैश्वानरमूर्धादिपादान्तावयवकल्पना कृताऽस्ति । सा, अग्निरहस्योक्ता मूर्धचुबुकान्तराले तावदवयवकल्पना च मिथोविरुद्धेति । शाङ्करेऽपि प्राकरणिकप्रादेशमात्रत्वमेवाद्रियतेऽत्र ।

तस्य ह वा एतस्यात्मनो वैश्वानरस्य—
मूर्धैव सुतेजाः, चक्षुर्विश्वरूपः, प्राणः पृथग्वर्त्मा, संदेहो बहुलो

अथ [1]प्राणाहुत्याधारत्वेन त्रिविधाग्नित्वेन च परिकल्पितजाठराग्निशरीरक-द्युमूर्धत्वादिविशिष्टात्मभावितें[2] स्वशरीरे क्रियमाणप्राणाद्याहुतिभिः वैश्वानरविद्या-निष्ठेन परमात्मा समाराधनीय इति प्रतिपादयति **तस्य ह** —। **एतस्यात्मनः = उपास्त** इति अव्यवहितप्रकृतस्योपासकस्यात्मनः मूर्धैव **तस्य वैश्वानरस्य** = 'मूर्धा-त्वेष आत्मनः' इति वैश्वानरात्ममूर्धत्वेन निर्दिष्टः सुतेजा इत्यर्थः। न चात्र **तस्य ह वा एतस्ये**ति पदयोः [3]परमात्मपरतया सामानाधिकरण्यमेवास्तु, न त्वेतस्येति शब्दस्योपासकपरामर्शित्वमिति शङ्क्यम् — **उर एव वेदि**रित्यादौ उपासकोरः-परामर्शस्यावश्यम्भावत् **मूर्धैवे**त्यत्राप्युपासकस्य मूर्धैव परामृश्यते। तस्मात् **एतस्ये**ति-शब्दस्योपासकपरत्वमेव सिद्धम्।

इह हि **भगवता भाष्यकृता** 'आमनन्ती' ति सूत्रव्याख्याने,
"**एनं** पुरुषं द्युमूर्धत्वादिविशिष्टं वैश्वानरम**स्मिन्** उपासकशरीरे प्राणाहुत्याधारत्वाया-

1. प्राणाहुतीत्यारभ्य प्राणाद्याहुतिभिरित्यन्तं समस्तमेकं पदं **ख.** कोशे। तृतीयान्त-विभागपाठः **क. घ.** कोशे। 2. 'भाविते शरीरे' इति विभागः **ग.** कोशे। परमात्मत्वेन भावित इति **क.** 3. तस्य पूर्वोक्तवैश्वानरस्य **ख.**

तस्य ह वा इत्यादि। अत्र पृथक्पृथगुक्तानां सुतेजःप्रभृतीनां वैश्वानरीयमूर्धादीनां समुच्चित्यानुवादमात्रमित्युक्तौ वाक्यं सर्वथैव व्यर्थम्। तदाऽस्य वाक्यस्य यस्त्वेतमेवमिति फल-वाक्यात् पूर्वनिवेशापत्तिश्च स्यात्। अतोऽत्र वाक्ये **तस्ये**त्यादि **वैश्वानरस्ये**त्यन्तं न समानाधि-करणम्। किन्तु तस्यैतस्यात्मनो मूर्धा वैश्वानरस्य सुतेजा इत्यन्वयः। आत्मवैश्वानरपदयोर्यथासंख्यं मूर्धसुतेजसोरन्वयात्। **तस्ये**ति यथाभाष्यं वैश्वानरविशेषणं वा। वैश्वानरस्येति षष्ठ्या अप्यव-यवत्वमर्थः। आत्मशब्द उपासकपरः। उपासकमूर्धादिः वैश्वानरावयवभूतसुतेजआदिरित्युक्तं भवति। मूर्धचक्षुरादिपदानामुपासकावयवपरत्वं उरोलोमाद्युपरितनपदवत् स्वरसमिति तज्ज्ञापये एतस्यात्मन इत्येतत् मूर्धादौ उरःप्रभृतौ चान्वेति। नन्वन्वयोऽयं क्लिष्ट इति चेत् — उरइत्यादौ उपासकसंबन्धित्वलाभाय स्वीकार्योऽयं क्लेश इति। भावप्रकाशिकायां उपासकात्मविशेषणतयैव **वैश्वानरस्ये**ति पदं स्वीकृतम्। उपासकात्मनो वैश्वानरसंबन्धित्वं च वैश्वानरोपासितृत्वरूपमेव। यद्वा स्वमूर्धादौ तन्मूर्धत्वादिकल्पनया स्वयं वैश्वानरीभविष्यत इत्यर्थः। अस्तु वा मुक्त्यर्थयथा-वस्थितवैश्वानरविद्याशेषभूतप्राणाग्निहोत्रशेषतया स्वमूर्धादौ वैश्वानरमूर्धादिदृष्टिरिव स्वस्मिन् वैश्वा-नरदृष्टिरिह विवक्षिता **आत्मनो वैश्वानरस्ये**ति षष्ठ्यन्ताभ्याम् 'तस्यैवं विदुषो यज्ञस्यात्मा-

वस्तिरेव रयिः, पृथिव्येव पादौ । उर एव वेदि र्लोमानि बर्हिः

मनन्ति च, 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा' इत्यादिना । अयमर्थः— 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इति त्रैलोक्यशरीरस्य परमात्मनो वैश्वानरस्योपासनं विधाय, 'सर्वेषु लोकेषु' इत्यादिना ब्रह्मप्राप्तिफलमुपदिश्य, अस्यैवोपासनस्याङ्गभूतं प्राणाग्निहोत्रं, 'तस्य ह वा एतस्ये' त्यादिनोपदिशति । यः पूर्वमुपास्यतयोपदिष्टो वैश्वानरः तस्यावयवभूतान् द्यादित्यादीन् सुतेजोविश्वरूपादिनामधेयान् उपासकशरीरे मूर्धादिपादान्तेषु संपादयति । **मूर्धैव सुतेजाः** उपासकस्य मूर्धैव परमात्ममूर्धभूता द्यौरित्यर्थः । **चक्षुर्विश्वरूपः** । आदित्य इत्यर्थः । **प्राणः पृथग्वर्त्मा** । वायुरित्यर्थः । **संदेहो बहुलः** । उपासकस्य मध्यकाय एव परमात्ममध्यकायभूताकाश इत्यर्थः । **वस्तिरेव रयिः** । अस्य वस्तिरेव तदवयवभूता आप इत्यर्थः । **पृथिव्येव पादौ** । अस्य पादावेव तत्पादभूता पृथिवीत्यर्थः । एवमुपासकस्य शरीरे परमात्मानं त्रैलोक्यशरीरं वैश्वानरं संनिहितमनुसंधाय स्वकीयानि उरोलोमहृदयमनआस्यानि प्राणाहुत्याधारस्य परमात्मनो वैश्वानरस्य वेदिबर्हिर्गार्हपत्यान्वाहार्यपचनाहवनीयान् अग्निहोत्रोपकरणभूतान् परिकल्प्य प्राणाहुतेश्चाग्निहोत्रत्वं परिकल्प्य एवंविधेन प्राणाग्निहोत्रेण परमात्मानं वैश्वानरमाराधयेदिति, 'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्य' इत्यादिनोपदिश्यते ।"

1. पदमिदं क. कोशे.

यजमान' इत्यत्र पूर्वपक्षे विदुषि यज्ञदृष्टिवत् । अथवा **आत्मन** इति पदं वा **एतस्ये**ति पदं वा जीवविशिष्टपरमात्मपरम् । विशिष्टस्य मूर्धेति च विशेषणभूतजीवमूर्धत्वाशयेनेति नानुपपत्तिः ।

आमनन्तीति सूत्रश्रीभाष्ये तु, 'तस्य ह वा इत्यादिना प्राणाग्निहोत्रस्य वैश्वानरोपासनाङ्गत्वोपदेश'इति भाषणात्, **वैश्वानरस्ये**त्यन्तं विहाय, 'मूर्धैव सुतेजाः' इत्यादीनेवांशान् खण्डशो गृहीत्वा उपासकमूर्धा वैश्वानरमूर्धेत्येवं व्याख्यानात् वैश्वानरस्येत्यन्तं तत्रानन्वितमित्याशय ऊह्यते । सुतेजा इत्येतावतैव वैश्वानरमूर्धत्वस्य प्रतिपन्नतया वैश्वानरस्य सुतेजा इत्यादन्वयोऽनपेक्षितः, क्लिष्टश्च; सुतेजःपदस्यावयवार्थकत्वाभावादिति । तदा च **तस्ये**त्यादि सर्वं षष्ठ्यन्तं स्वरसगत्या परमात्मपरमेव । वैश्वानरस्य 'आराधनं प्रस्तूयत' इति शेषपूरणं स्यात् । दूरान्वयसंमतौ च **होमीय**मित्युपरितनपदेनान्वयः सम्यक् स्यात् । तस्यैतस्य वैश्वानरस्य परमात्मनः तद्धोमीयमिति प्रधानवाक्यमध्ये होमोपयोग्यंशानिरूपकाणि मूर्धेत्यादीनि अवान्तरवाक्यानि । तथाच प्राप्तं प्रथमभक्तं प्रकृतोपासनोपास्यवैश्वानराराधनभूतहोमसाधनमिति प्रधानवाक्यार्थः । खण्डभेदः एकवाक्यत्वाविरोधीति प्रागेव दर्शितम् ।

हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः ॥ २ ॥—

इति पञ्चमाध्याये अष्टादशः खण्डः ।

५—१९.

तद् यद् भक्तं प्रथममागच्छेत्, तद्धोमीयम् । स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति । प्राणस्तृप्यति (१)। प्राणे तृप्यति चक्षुस्तृप्यति। चक्षुषि तृप्यत्यादित्यस्तृप्यति। आदित्ये तृप्यति द्यौस्तृप्यति। दिवि तृप्यन्त्यां यत् किञ्च द्यौश्चाऽऽदित्यश्चाधितिष्ठतः तत् तृप्यति । तस्यानु

इति भाषितम् । उरःप्रभृतीनां वेद्यादित्वोपदेशश्च प्राणाहुतेरग्निहोत्रत्वसंपत्त्यर्थ इति, 'संपत्तेरिति जैमिनिस्तथा हि दर्शयति' इति सूत्रितम् । 'स य इदमविद्वानग्निहोत्रं जुहोती'ति दर्शितामिहोत्रत्वसंपत्तेर्हेतोर्वेद्यादित्वोपदेश इति जैमिनिर्मन्यते इति सूत्रार्थः । **हृदयं गार्हपत्यः** हृदयकमलावच्छिन्नजाठराग्निर्गार्हपत्यः, **मनोन्वाहार्यपचनः** मनइन्द्रियावच्छिन्नजाठराग्निर्दक्षिणाग्निः, **आस्यमाहवनीयः** आस्यावच्छिन्नजाठर आहवनीय इत्यर्थः । गार्हपत्यान्वाहार्यपचनादिपरिकल्पनस्य सजातीयजाठर एवोचितत्वात्, 'वैश्वानरस्य हृदयादिस्थस्याग्नित्रयकल्पनं क्रियते'इति भाषितत्वाच्चोक्त एवार्थः । अत्र च हृदयादिशब्दाः तत्तदवच्छिन्नजाठराग्निशरीरकपरमात्मपर्यन्ता इति द्रष्टव्यम् । ५—१८.

तद् — होमीयम् । तत् तस्य पुंसो **यद् भक्तं** यत् अन्नं भोजनकाले **प्रथमत आगच्छेत्** उपनमेत्, तत् **होमीयं** होमसाधनम् । तेन होतव्यमित्यर्थः ।

स यां — प्राणस्तृप्यति । प्राणाय स्वाहेति प्रथमायामाहुतौ हुतायां प्राणस्तृप्यतीत्यर्थः । **प्राणे — तत् तृप्यति** । एवं प्राणे तृप्ते सति क्रमात् चक्षुः, आदित्यः, द्यौश्च तृप्यन्ति । ततश्च द्यादित्याभ्यामधिष्ठितं वस्तुजातञ्च तृप्यतीत्यर्थः । **तस्य — ब्रह्मवर्चसेनेति** । तस्मिन् सर्वस्मिन् तृप्ते तस्य **तृप्तिमनु** तृप्तेः पश्चात् प्रजापश्वादिभिर्होताऽपि तृप्यतीत्यर्थः । अत्र प्राणचक्षुरादिशब्दाः तत्तदभिमानिदेवतापराः; अचेतनानां तृप्तेरसंभवादिति ।

तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति पञ्चमाध्याये एकोनविंशः खण्डः ।

५—२०.

अथ यां द्वितीयां जुहुयात्, तां जुहुयात् व्यानाय स्वाहेति । व्यानस्तृप्यति (१) । व्याने तृप्यति श्रोत्रं तृप्यति । श्रोत्रे तृप्यति चन्द्रमास्तृप्यति । चन्द्रमसि तृप्यति दिशस्तृप्यन्ति । दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्चन्द्रमाश्चाधितिष्ठन्ति तत् तृप्यति । तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति पञ्चमाध्याये विंशः खण्डः

५—२१.

अथ यां तृतीयां जुहुयात् तां जुहुयात् अपानाय स्वाहेति । अपानस्तृप्यति (१) । अपाने तृप्यति वाक् तृप्यति । वाचि तृप्यन्त्यामग्निस्तृप्यति । अग्नौ तृप्यति पृथिवी तृप्यति । पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतः तत् तृप्यति । तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति पञ्चमाध्याये एकविंशः खण्डः

५—२२.

अथ यां चतुर्थीं जुहुयात् तां जुहुयात् समानाय स्वहेति । समानस्तृप्यति (१) । समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति । पर्जन्ये तृप्यति विद्युत् तृप्यति । विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतः तत् तृप्यति । तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति पञ्चमाध्याये द्वाविंशः खण्डः

५—२३.

अथ यां पञ्चमीं जुहुयात् तां जुहुयात् उदानाय स्वाहेति । उदा-

नस्तृप्यति (१)। उदाने तृप्यति वायुस्तृप्यति। वायौ तृप्यति आकाशस्तृप्यति। आकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतः तत् तृप्यति। तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति पञ्चमाध्याये त्रयोविंशः खण्डः।

५—२४.

स य इदमविद्वानग्निहोत्रं जुहोति, यथाऽङ्गारानपोह्य भस्मनि जुहुयात् तादृक् तत् स्यात् (१)। अथ य एतदेवं विद्वानग्निहोत्रं जुहोति, तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति। (२)

तद् यथेषीक(का[1])तूलमग्नौ प्रोतं प्रदूयेत, एवँ हास्य सर्वे पाप्मानः प्रदूयन्ते, य एतदेवं विद्वानग्निहोत्रं जुहोति। (३)

1. इषीकातूलमित्येव बहुसंमतः श्रुतिपाठः। साधुस्तु इषीकतूलेति ख. पाठः श्रुतौ भाष्ये च सर्वत्र; 'इष्टकेषीकामालानां चिततूलभारिषु' इत्यनुशासनात्।

एवमुत्तरत्रापि द्रष्टव्यम् ॥ शिष्टं स्पष्टम् ॥ ५—१९,[1]२०,२१,२२,२३.

स य — जुहोति। उरःप्रभृतीनामग्निहोत्रोपकरणवेद्यादितामजानन् यः प्राणाग्निहोत्रमनुतिष्ठतीत्यर्थः। **यथा — स्यात्।** तदनुष्ठानं भस्माहुतिसमानं स्यादित्यर्थः। निष्फलमिति यावत्। **अथ य — भवति।** [2]सर्वात्मकभगवदाराधनेन सर्वमाराधितं भवतीति हुतप्रकर्षोक्तिः।

तद् यथा — प्रदूयन्ते। यथा इषीकायाः मुञ्जान्तर्वर्तितृणविशेषस्य तूलमग्नौ प्रक्षिप्तं सद्यो दह्यते, एवं सर्वाणि पापानि एतादृशविद्यापूर्वकप्राणाग्निहोत्रानुष्ठानेन दग्धानि भवन्तीत्यर्थः। ब्रह्मोपासनफलस्य सर्वपापप्रदाहस्य प्राणाग्निहोत्रं कीर्तनमङ्गफलेनाङ्गस्य स्तुत्यर्थम्। ततश्चानेनापि प्राणाग्निहोत्रस्य वैश्वानरविद्याङ्गत्वं ज्ञापितं भवति।

1. विंशखण्डे, **ब्रह्मवर्चसेन तेजसा** वृत्ताध्ययननिमित्ततेजसेत्यर्थः' इत्यस्ति।
2. सर्वेषु लोकेष्वित्यादि इत्यधिकं ख.

तस्मादु हैवंवित् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेत्, आत्मनि हैवास्य तद् वैश्वानरे हुतं स्यादिति । तदेष श्लोकः (४) —

यथेह क्षुधिता बाला मातरं पर्युपासते ।
एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इति अग्निहोत्रमुपासत इति ।

इति पञ्चमाध्याये चतुर्विंशः खण्डः ।

इति छान्दोग्योपनिषदि पञ्चमोऽध्यायः (पञ्चमः प्रपाठकः)

वैश्वानरविद्यां स्तौति **तस्मादु — स्यादिति** । उच्छिष्टप्रदानायोग्याय चण्डालायोच्छिष्टप्रदानमपि वैश्वानरे सर्वा [भूता] त्मनि अन्नं जुहोमीति बुद्ध्याऽनुष्ठितत्वात् नाधर्माय भवतीत्यर्थः ।

तदेष श्लोकः । तत् उक्तप्राणाग्निहोत्रविषये एष श्लोकः श्रूयत इत्यर्थः । **यथेह — उपासते** । यथा बुभुक्षिताः बालाः, 'कदा माता अन्नं प्रयच्छती' ति मातरं परित उपासते, एवं सर्वाणि भूतानि एवंविदः प्राणाग्निहोत्रमुपासत इति विदुषः प्राणाग्निहोत्रस्तुत्यर्थोऽयं श्लोक इत्यर्थः । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते—

[१] समन्वयाध्याये, 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इत्यत्र श्रुतस्य वैश्वानरशब्दस्य नार्थो निर्णेतुं शक्यः । 'अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते' इति वैश्वानरशब्दस्य जाठरेऽग्नावपि प्रयोगदर्शनात्; 'विश्वस्या अग्निं भुवनाय देवाः वैश्वानरं केतुमह्नामकृण्वन्' इति भूततृतीयेऽपि प्रयोगदर्शनात्; 'वैश्वानरस्य सुमतौ स्याम राजा हिकं भुवनानामभिश्रीः' इति देवतायामपि प्रयोगदर्शनात्; 'तदात्मन्येव हृदय्येऽग्नौ वैश्वानरे प्रास्यत', 'स एष वैश्वानरो

यद्यपि चण्डालायेति । चण्डालायापि यदीत्यन्वयः । **सर्वाणि** बालाबालसर्वरूपाणि **अग्निहोत्रमुपासत** इति । अग्निहोत्रमस्माकं तृप्तिं करोतु इत्यभिसंधेः सर्वभूतनिष्ठत्वाभावेपि, 'तृप्तिकरं किञ्चिदस्तु' इत्यभिसंधिसंभवात् तृप्तिकरत्वेन तद् वस्तुतस्तृप्तिकरं गृहीतं भवतीति भावः ।

हिकमित्यव्ययं हीत्यर्थम् । **अभिश्रीः** अभिगतश्रीः । **तदात्मन्येवे**ति । (तै. ब्रा. ३-११-८.) अत्र हिरण्यस्य कनत्तमत्वं नामौ प्रासनात् स्रष्टृकृतात्, किंतु हृदय्याग्नौ प्रासनादिति प्रसिद्धाग्निं व्युदस्योक्तोऽयं परमात्मैव, न जाठराग्निः । तस्य प्रस्तुताग्निभिन्नत्वाभावात् कान्तिकरत्वाप्रसिद्धेश्च । परमात्मा तु संकल्पतः सर्वकर्ता । **हृदय्य** इति हृदयपुण्डरीकवर्ती चेति भावः । **अग्निः** परमात्मसृष्टकान्तेर्जातु प्रतिबन्धे निवर्तकमात्रम्। सायणं तु उपेक्ष्यम्।

विश्वरूपः प्राणोऽग्निरुदयते' इति परमात्मन्यपि प्रयोगदर्शनात् । अतो नार्थो निर्णेतुं शक्य इति पूर्वपक्षे प्राप्ते — उच्यते —

"वैश्वानरः साधारणशब्दविशेषात्" । वैश्वानरः परमात्मा । साधारणस्य वैश्वानरशब्दस्य परब्रह्मासाधारणैः, 'को न आत्मा किं ब्रह्म,' 'सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति,' 'तद्यथेषीक(का)तूलमग्नौ प्रोतं प्रदूयेत, एवं हास्य सर्वे पाप्मानः प्रदूयन्त' इति वाक्यश्रुतात्मत्वब्रह्मत्वब्रह्म[1]प्राप्तिफलकोपासनविषयत्व-सर्वपापप्रदाहकत्वादिधर्मैर्विशेष्यमाणत्वात् ।

"स्मर्यमाणमनुमानं स्यादिति" । 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग् विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा' इति आथर्वणादिषु परमात्मसंबन्धितया निर्दिष्टं रूपं अस्यां विद्यायां तदिदमिति **स्मर्यमाणं** प्रत्यभिज्ञायमानं वैश्वानरस्य परमात्मत्वेऽनुमानं ज्ञापकं स्यादित्यर्थः । **अग्निरिह** द्युलोकः, 'असौ वाव लोकोऽग्निः' इति श्रुतेः[2] ।

"शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते" । अग्निरहस्ये वैश्वानरविद्याप्रकरणे, 'स एषोऽग्निर्वैश्वानरो यत् पुरुषः' इति वैश्वानरशब्दसमानाधिकरणाग्निशब्दश्रवणात्, अग्नित्रयपरिकल्पन—प्राणाहुत्याधारत्वरूपजाठराग्निलिङ्गाच्च, वाजसनेयके, 'स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद' इति पुरुषान्तःप्रतिष्ठितत्वश्रवणाच्च जाठर एव भवितुमर्हतीति चेन्न — परमात्मलिङ्गानामिह सत्त्वेन अग्निशब्दलिङ्गानां तच्छरीरकपरमात्मोपासनपरतयाप्युपपत्तेः । **तथादृष्ट्युपदेशात्**—तथोपासनस्योपदिष्टत्वादित्यर्थः । त्रैलोक्यशरीरकत्वादीनाञ्च परमात्मधर्माणां जाठरे असंभवात्, वाजसनेयके, 'स एषोऽग्निर्वैश्वानरो यत् पुरुष' इति पुरुषशब्दश्रवणात्, 'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधौ च वर्तते वासुदेवे सनातने' इति निरु-

1. ब्रह्मानुभवफलकत्व. क. ब्रह्मप्राप्तिफलकत्व. घ. 2 अतोऽग्निमूर्धत्वद्युमूर्धत्वयोरैक्यम् इत्यधिकं क.

विशेष्यमाणत्वादिति । तथाच श्रीभाष्ये, 'विशेष्यत इति विशेष' इति भावे व्युत्पत्तिप्रदर्शनम् । तथाच, 'विशेषानुगतिभ्याम्' इत्यत्रैव **विशेषादि**त्यस्य (धर्मैः) विशेषणादित्यर्थ इति भावः ।

पाधिकपुरुषत्वस्य अन्यत्रासंभवात्, अचेतने जाठराग्नौ सर्वात्मना असंभवात् न जाठराग्निः ।

"अत एव न देवता भूतञ्च"। उक्तैरेव हेतुभिः भूततृतीयदेवताविशेषयोरपि न प्रसक्तिरित्यर्थः ।

एवं सूत्रकारः अग्नित्वपरिकल्पनादि जाठराग्न्याद्यनन्यथासिद्धलिङ्गैः, 'प्राणस्तथाऽनुगमात्' इत्यधिकरणोक्तन्यायेन जाठराग्निविशिष्टः परमात्मैव इहोपास्य इति, 'तथा दृष्ट्युपदेशात्' इति सूत्रखण्डेन सिद्धान्तमाविष्कृत्य, लिङ्गान्यथासिद्धिं संभावयतो जैमिनेरग्निशब्दनिर्वाहप्रकारं दर्शयति—"साक्षादप्यविरोधं जैमिनिः"। 'मापुपास्स्व' 'प्राणोऽस्मि प्रज्ञात्मा' इत्यादिशब्दवत् अग्निशब्दस्य अपर्यवसानवृत्त्या न तच्छरीरकपरमात्मपरत्वमाश्रयणीयम् । अग्रं नयतीत्यग्निरिति योगव्युत्पत्त्या अग्निशब्दस्य अग्निव्यवधानमन्तरेण साक्षादेव परमात्मपरत्वसंभवं जैमिनिराचार्यो मन्यते । अत्र व्यासार्यैः, "अग्निलिङ्गे विद्यमाने अग्निशब्दस्यापर्यवसानवृत्त्या अग्निशरीरकपरमात्मपरत्वमेवोचितम् । तादृशानन्यथासिद्धलिङ्गराहित्यस्थले अयमपि न्यायोऽस्तीति व्युत्पादनार्थमिहैतत् उपन्यस्तम्; न तु प्रकृतोपयुक्ततया" इत्युक्तम् ।

"अभिव्यक्तेरित्याश्मरथ्यः, अनुस्मृतेर्बादरिः, संपत्तेरिति जैमिनिस्तथा हि दर्शयति, 'आमनन्ति चैनमस्मिन्' इति चत्वार्यपि सूत्राणि पूर्वत्र व्याख्यातानि ।

अतो वैश्वानरः परमात्मेति स्थितम् । तथा गुणोपसंहारपादे—

(२) द्युमूर्धादिव्यस्तोपासनेषु औपमन्यवादिभिरुक्तेषु, 'अन्नमन्नं पश्यति प्रियं भक्त्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते' इति व्यस्तोपासनेषु फलश्रवणात् व्यस्तोपासनमेव प्रामाणिकम्। 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इति व्यस्तोपासनसमुदायानुवाद एव; न तु समस्तोपासनविधिः । अथवा अनेन वाक्येन समस्तोपासनमपि विधीयते । अतो द्वयमपि प्रामाणिकम् । अल्पफलार्थिभिर्व्यस्तोपासनं कर्तव्यम्—इति पूर्वपक्षे प्राप्ते — उच्यते—

'भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति'। **भूम्नः** सामस्त्यस्य **ज्यायस्त्वं** प्रामाणिकत्वम्। तथा हि दर्शयति श्रुतिः व्यस्तोपासनेऽनर्थं ब्रुवती, 'मूर्धा ते व्यपतिष्यद् यन्मां नागमिष्य' इत्यादिना। न चेदं नहिनिन्दान्यायेन समस्तोपासनप्रशंसार्थमेव किं न स्यादिति वाच्यम् —अग्निहोत्रं प्रकृत्य श्रुतेन, 'जर्तिलयवाग्वा वा जुहुयात्, गवेधुकयवाग्वा वा जुहुयात्, न ग्राम्यान् पशून् हिनस्ति, नारण्यान्' इति वाक्येन जर्तिलगवेधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वोः विकल्पेन अग्निहोत्राहुतौ द्रव्यत्वविधाने ग्राम्यारण्यपशुहिंसारहिततया तयोः स्तवने च प्रतीयमानेऽपि, 'अथो खल्वाहुः अनाहुतिर्वै जर्तिलाश्च गवेधुकाश्च; पयसाऽग्निहोत्रं जुहुयात्' इति तदनन्तरं जर्तिलादिप्रतिक्षेपेण पयोविधिदर्शनात् तदेकवाक्यतया 'जर्तिलयवाग्वा वा जुहुया' दित्यादेः, 'ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्ततया होमार्हा अपि जर्तिला गवेधकाश्च यदपेक्षया दुष्टाः, तत् पय एव प्रशस्त'मिति पयःस्तुत्यर्थत्वं एकवाक्यतानुरोधादिति, 'न चेदन्यं प्रकल्पयेत् प्रकृष्टावर्थवादः स्यात्' इति पूर्वतन्त्राधिकरणे, 'किञ्चिद्विधिपूर्वकं तन्निन्दायां विध्यन्तरश्रवणे सति तदेकवाक्यतानुरोधात् पूर्वप्रवृत्तयोर्विधिनिन्दयोः तदर्थवादत्वम्' इति समर्थितम्। तद्वदेवेहापि युक्तम्।

ननु जर्तिलगवेधुकयोः पयसा सह संबन्धाभावात् जर्तिलगवेधुकयवागूविधानयोरर्थवादतयैव विध्येकवाक्यता समर्थनीयेति तत्र तथाऽस्तु नाम। इह तु —भूमविद्यायां नामादीनां सत्येन ब्रह्मणा सह भूयस्त्वावधित्वेन संबद्धानां प्रासङ्गिकतदुपासनाविधिवत् — समस्तोपासनाविषयेण वैश्वानरात्मना द्वादित्यादीनां तदवयवत्वेन संबद्धानां प्रासङ्गिकोपासनविधिः किं न स्यादिति चेत् — मैवम्। व्यस्तोपासननिन्दनेन, 'मूर्धा त्वेष आत्मन इति होवाच' इत्यादिवाक्येषु तुशब्दकृतेन द्वादित्यादीनां स्वतन्त्रोपास्यत्वव्यवच्छेदेन, 'तान् होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ' इति व्यस्तोपासनानां भ्रममूलत्वोद्घाटनेन

सामस्त्यस्येति। भूमशब्दस्य धर्मिपर्यन्ते प्रयोगदर्शनेऽपि, भूमा बहुत्वं विपुलत्वमिति धर्म एव तस्य मुख्यत्वात् मुख्यस्यैवात्र पर्याप्तत्वात् समस्तस्येति नोक्तम्।

अथ षष्ठोऽध्यायः । ६—१.

श्वेतकेतुर्हारुणेय आस । तँ ह पितोवाच, 'श्वेतकेतो वस ब्रह्मचर्यम् । न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवती'ति । (१)

भूमविद्यावैषम्यस्य बहुविधस्य सत्त्वेन जर्तिलयवागून्यायस्यैवात्र प्रवृत्त्यौचित्यात् । **क्रतुवत्** । यथा 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति विहितस्य क्रतोः, 'यदष्टाकपालो भवति' इत्यादिरर्थवादः, न त्वष्टाकपालादिद्रव्यविधायकः, एवम्, 'अन्यन्नं पश्यति प्रियम्' इत्यादिश्रवणमप्यर्थवाद एवेति स्थितम् । प्रकृतमनुसरामः ॥ ५—२४.

इति छान्दोग्योपनिषत्प्रकाशिकायां पञ्चमोऽध्यायः । (पञ्चमः प्रपाठकः)

सद्विद्यामुपदेष्टुमाख्यायिकामाह— **श्वेतकेतुर्हारुणेय आस** । हः प्रसिद्ध्यर्थः । अरुणपुत्रस्योद्दालकस्य पुत्रः श्वेतकेतुनामा बभूवेत्यर्थः । **तं—भवतीति** । उद्दालकः पिता तं द्वादशवर्षमनुपनीतमनधीतिनं पुत्रं श्वेतकेतुं प्रति, 'हे **सोम्य** सोमार्ह !—प्रियदर्शनेति वार्थः—श्वेतकेतो ! क्वचिद् गुरावध्ययनार्थं वस । अस्मत्कुलप्रसूतः कोपि **अननूच्य** अनधीत्य ब्रह्मबन्धुरिव न भवती'त्युवाचेत्यर्थः ।

क्रतुवदिति । वैश्वानरविद्यायामेकदेशेषु फलकीर्तनं वैश्वानरेष्टौ एकदेशेषु फलकीर्तनवत् फलैकदेशानुवादमात्रमित्यन्तन्तौचित्यमिति भावः ।

उद्दालकाधीता वैश्वानरविद्या प्रागुक्ता । अथ तदध्यापिता सद्विद्या उपदिश्यते । पूर्वमप्ययमुद्दालकः प्रस्तुतः सह श्वेतकेतुना पञ्चाग्निविद्यायाम् । यथा मधुविद्यामुद्दालकः स्वपितुरध्यैष्ट, 'तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच' इति प्राक् तत्र श्रुतेः — तथा श्वेतकेतुरारुणेयः स्वपितुरुद्दालकात् सद्विद्यामिमाम् । पूर्वं पादादिमूर्धान्ततया कल्पितविश्वशरीरकब्रह्मोपासनमुक्तम्; अथ वास्तविकेन शरीरशरीरिभावेन विश्वविशिष्टं विश्वकारणमुपास्य मुच्यत इति च संगतिः ।

औद्दालकिरित्यनुक्त्वा आरुणेय इति कथनम्—पूर्वं, 'श्वेतकेतुर्हारुणेयः पञ्चालानां समितिमेयाय' इत्यत्रैव, अरुणस्यातिप्रसिद्धत्वात् अस्य पारम्परिकमाभिजात्यमाविष्कर्तुम् । अत एव वक्ष्यति, 'अस्मत्कुलीन' इति । तत्र इयायेत्यनुक्त्वा **एयाय**ेति प्रयोगः तस्यावश्यगन्तव्यस्थलत्वव्यक्तये । **आसे**ति । अनेन महाकुलीनोऽपि महत्संनिधानेऽपि बालस्वभावोऽध्ययने स्वयमप्रवृत्त एवासीत्; तादृशस्य पितृप्रेरणव्याजेन ततो भृशोत्कटा प्रवृत्तिरिति वैचित्री व्यज्यते । **वस ब्रह्मचर्यमि**ति । अन्यत्र गुरुकुले स्थित्वाऽधीष्वेत्यर्थः ।

स ह द्वादशवर्षः उपेत्य चतुर्विंशतिवर्षः सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय। तँ ह पितोवाच (२),— श्वेतकेतो! यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽसि, उत तमादेश-

---

यः स्वयमब्राह्मण एव सन् ब्राह्मणान् बन्धुत्वेन व्यपदिशति, स ब्रह्मबन्धुरित्युच्यते। अत्र स्वयं गुणवत एव पितुः गर्भाष्टमाद्युपनयनकालातिक्रमेऽपि उपनेतृत्वाभावे हेतुः प्रवासादिलक्षणात्यन्तानुपपत्तिरिति द्रष्टव्यम्।

स ह—एयाय। सः श्वेतकेतुः द्वादशवर्षस्सन् गुरुमुपेत्य गुरुकुले द्वादश वर्षान् उषित्वा सर्वान् वेदान् अधीत्य **महामनाः** प्रौढमतिः **अनूचानमानी** आत्मानं साङ्गवेदाध्यायिनं मन्यमानः **स्तब्धः** परिपूर्ण इव तृणीकृतजगत्त्रयः चतुर्विंशतिवर्षयुक्तः **एयाय** प्रत्यागतः।

तं ह पितोवाच। स्पष्टोऽर्थः। उक्तिमेवाह **श्वेतकेतो—स्तब्धोऽसि।** हे सोम्य? महामना अनूचानमानी स्तब्धोऽसीतीदं **यत्** यस्माद्धेतोः, स क इत्यर्थः। तस्य ब्रह्मज्ञानरहिततां जानन्नप्यारुणिः 'जगदभिन्ननिमित्तोपादानभूतब्रह्मज्ञानवानेव पूर्णः; नान्यः' इति तस्मै ज्ञापयित्वा पूर्णत्वाभिमानं तदीयमपनुद्य ब्रह्मणि जिज्ञासां संपादयितुं तदनुजिघृक्षया पृच्छति—। **उत तमादेशमप्राक्ष्यो—विज्ञातमिति।**

प्रवासादीति। नन्वस्य प्रवासेऽप्यरुणः पितामहो महान् कथमुपनयनशास्त्रमतिलङ्घितवान् स्यात्। स नूनमतीतोऽशक्तो वा तदेति। अन्यद्वा किमप्युपनयनकारणमस्त्विति अनास्थया **आदि**पदप्रयोगः।

प्रौढमतिरिति **महामनस्त्वं** सर्वशास्त्रार्थमननसंपत्तिसमृद्धत्वम्। सर्वोत्कृष्टोऽहमिति शाङ्करम्। **स्तब्धत्वं** बुभुत्साप्रवृत्त्यादिरहितत्वम्।

आदेशशब्दः कर्मणि करणे वा व्युत्पन्नः सन् उपदेशगम्यं इति वा उपदेशरूपवाक्यमिति वा अर्थं वक्तीति शाङ्करसरणिः। अर्थपुष्टिं पर्यालोच्य तु **श्रीभाष्ये** आदेष्टव्यमित्यर्थो भाषितः। पराक्रान्तं चात्र सूरिभिरर्थतत्त्वविमर्शे। तत्र स्वयमपि विशेषेण विवक्षुः प्राचीनोक्तमप्यनुवदिष्यति **अत्र व्यासार्या** इत्यादिना। **अत्रेदं बोध्यम्**—तमादेशमित्यत्र तच्छब्दतः सर्वविषयकवेदनात्मकस्ववेदनकमित्यर्थः सुगमः; यच्छब्दघटितवाक्यानुरोधात्। वक्ष्यमाणमृन्मयादिदृष्टान्तस्थले कुलालादेरिवात्राप्यन्यस्य निमित्तकारणस्य संभावना भवेत्। तावताऽपि तज्ज्ञानेन तत्कार्यसर्वप्रपञ्चविज्ञानस्याक्षतत्वात् न भवति एकविज्ञानेन सर्वविज्ञानक्षतिरिति। अतो निमित्तस्यैवोपादानत्वमिति प्रथमत एव निर्विचिकित्सप्रतिपत्तये आदेशपदमिति युक्तम्। उपदेशगम्यत्वं तु न वक्तव्यम्; महामनसोऽनूचानमानिनोऽप्यज्ञातत्वादेवास्य सिद्धत्वात्। उताप्राक्ष्य इति प्रश्न-

अत्र व्यासार्याः "उपक्रमे तावत्, उत तमादेशमप्राक्ष्य" इत्यत्रादेश-शब्देन प्रशासिताऽभिधीयते। अत्र श्लोकावाचार्यपादैरुक्तौ—

"छान्दोग्ये केचिदाहुर्दिशतिरुततमादेशमप्राक्ष्य इत्य-
त्राङ्पूर्वस्तूपदेशं प्रकटयति सतो न प्रशास्तिं घञन्तः।
नो कर्तर्यस्ति कर्मण्यगणि घञिह सत् कर्तृ शास्तौ न कर्म
स्यात् [1]स्यात् कर्मोपदेशे तदिद[2]मुदितमादेशवाचोपदेश्यम्॥

अत्र ब्रूमः प्रशास्तिं वदति दिशिरसावाङ्मुखो नोपदेशं
शा[3]स्तौ सोऽतिप्रसिद्धो न हि पर इह चापेक्षितार्थप्रसङ्गः।

1. स्यात तत्कर्मो **ख.** 2. तदिदमुततमादेश. बहुत्र। 3. शास्ता. बहुत्र।

वचनादेव, 'उपदेशमन्तरा न सुज्ञान'मिति दर्शितत्वाच्च। अतः पदमिदं तदा व्यर्थमेव स्यात्। एवमादेष्टाऽप्यास्तिकृतमेन श्वेतकेतुना बहुश्रुतेन विदित एव। जगदुपादानतया जगदभिन्नतया च स न विदित इति त्वमिति विशेषणम्। करणवाची प्रत्यय इति पक्षेण कर्तुः करणत्वविव-क्षाऽपि नानुचिता। फलविशेषसत्त्वात्। अयमादेष्टा स्वयमेव करणमपि तत्र। नास्य करण-कलेबरायचित्संसर्गापेक्षा तदर्थमिति स्वारस्यप्रदर्शनं फलम्। अन्यच्च; यत् प्रमातरि प्रमाणव्यव-हारे। उक्तं **हृदयनाचार्यैः**, 'आप्तप्रामाण्या'दिति सूत्रमादाय, 'तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते' इतीत्यादिरादेष्टेत्यर्थवादिनामभिसंधिरिति।

आचार्यपादैः व्यासार्याणां गुरुचरणैः श्रीवात्स्यवरदाचार्यैः **उक्तम्, तत्त्वसारे** (१६-१७)। अत्र परमतस्य संग्राहकः प्रथमश्लोकः; द्वितीयः स्वमतस्य। एतद्विवरणभूत एवोपरितनो व्यासार्यग्रन्थः। अनयोरन्वयार्थस्तु—छान्दोग्ये, 'उत तमादेशमप्राक्ष्य' इत्यत्र स्थितः आङ्पूर्वो घञन्तो **दिशतिः** दिशिधातुः सद्विषयकं उपदेशरूपमर्थं प्रकटयति; न तु सत्संबन्धिनीं **प्रशास्तिं** प्रशासनम्। घञ् हि कर्तृरूपार्थे नो अस्ति। कर्मरूपार्थे तु शास्त्रेणैवागणि। **इह** सच्छब्दार्थः शास्तिं प्रति कर्तैव; न तु कर्म। उपदेशरूपार्थे तु तत् सत् कर्म स्यात्। **तत्** तस्मात् **इदं** सत् **आदेशवाचा** आदेशमित्यनेन उपदेश्यमेवोदितमिति केचिदाहुः॥ अत्र ब्रूमः—असौ **आङ्मुखः** आङ्पूर्वो दिशिः प्रशास्तिमेवार्थं **शक्त्या** वदति; न तु उपदेशरूपमर्थम्। यत्र क्वापि लक्षणया कामं वदतु। अथापि शास्तिरूपार्थे स आङ्पूर्वः **अत्यन्तं** वेदे लोके शब्दशास्त्रे च प्रसिद्धः; न तु **परे** उपदेशरूपार्थे। किञ्चेह निमित्तोपादानैक्यरूपार्थोऽपेक्षितो वक्तव्यः। अतः तस्य **प्रसङ्गः** प्रस्तावो युक्तः। तथासति असाधारणोक्तिलाभात्। न हीदं निमित्तस्यैव

युक्तोऽसाधारणोक्त्या घञ्गणि करणेऽप्यत्र वैवक्षिकत्वं
शब्दोक्तं कारकाणां ननु करणतया कर्तरि स्याद् विवक्षा ॥" इति ।

आदेशशब्देनोपदेश्यमुच्यते । प्रकृत्यर्थ उपदेशः । प्रत्ययार्थः कर्मत्वम् । 'अकर्तरि च कारके संज्ञाया' मिति कर्तृव्यतिरिक्तकारके घञो विहितत्वात् । उपदेशे ब्रह्मणः कर्मत्वोपपत्तेश्च । प्रशासने तु ब्रह्म न कर्म; अपितु कर्तृ । कर्तृव्यतिरिक्तकारके हि घञ्प्रत्ययविधिः । नात्र कर्तरि[2] कप्रत्यय उपपद्यते 'किङिति च' इति गुणप्रतिषेधात् आदेशशब्दरूपासिद्धेः । नापि पचाद्यच्प्रत्यय उपपद्यते, दिशिधातोरिगुपधत्वेन 'इगुपधात्क' इत्यपवाद[3]सूत्रेण कप्रत्ययप्राप्तेः गुणाभावात् । अतो घञ्प्रत्ययान्त एवायमादेशशब्दः । स च प्रत्ययः कर्तरि अविहित[4] इति कर्मार्थकत्वस्यैव युक्तत्वात् उपदेश्यमेव आदेशशब्दवाच्यमिति ।

अत्रोच्यते— प्रकृत्यर्थः शासनं प्रसिद्धिप्राचुर्यात्, अन्यथा स्वारस्यभङ्गात्, 'आङ्पूर्वो दिशतिर्नियोक्तृप्रयोजनवचनः; उपपूर्वस्तु नियोज्यप्रयोजनवचन' इति

1. युक्ता. ख. 2. नात्रकप्रत्यय ख. नचात्रइगुपधलक्षणकप्रत्यय ग. 3. इगुपधेत्यपवाद ग. 4. अनभिहित ख.

सत उपादानत्वमन्यसाधारणम् । उपदेश्यत्वं तु साधारणम । कर्तरि घञ् मा भूत् । कर्मणीव करणेऽपि तु सोऽगणि । अत्र प्रयोगेषु कारकाणां वैवक्षिकत्वं शाब्दोक्तं ननु । वस्तुस्थितिविमर्शे कस्यचित् किञ्चित्कारकरूपत्वमेवेत्यर्थे सत्यपि एकत्रान्यकारकत्वविवक्षयाऽपि प्रयोगः शब्दानुशासनसंमतः किल । अतः प्रशासनकर्तुरेव तत्र करणत्वविवक्षेति आदेशशब्देन प्रशासनकरणत्वमुखेन प्रशास्तैवोच्यत इति ।

ननु कर्तुरेव करणत्वविवक्षेति कथं श्वेतकेतुर्जानीयात् । आज्ञाकरणभूतमेव किञ्चिदिदं, आज्ञाकर्मभूतं वा, आज्ञाकरस्तु अन्य इति किं न जानीयादिति चेत्—तर्हि एवमाज्ञासंबन्ध्यनेकार्थस्वरसात् आदेशशब्दात् उपदेश्यमित्यमुख्यार्थं परं कथं निश्चिनुयात्? अतः स इदानीं वा जानीताम्, एकमेवाद्वितीयमिति पदश्रवणानन्तरं वा । [सर्वत्र पूर्वापरपरामर्शेनैवार्थस्य निर्णेयतया तादृशविलम्बस्य सह्यत्वात् । अत एव सदेवेदमिति इदम्पदमपि चिदचिद्विशिष्टपरं पर्यन्ते सुग्रहमिति ब्रूमः ।] अस्माभिस्तु वक्तुर्विवक्षितोऽन्ततो निर्धार्योऽर्थः क इति संप्रति विचार्यते । वक्ष्यति च करणत्वविवक्षां विनैव कर्तृपरत्वमपि ।

हि न्यासकारः। नियोक्तरि प्रयोजनं यस्य तस्यार्थस्य वाचक इक्तर्थः। एवमन्यत्रापि। किञ्च उपदेश्यत्वं लौकिकालौकिकध(क)र्मब्रह्मभागार्थसाधारणम्। [प्र] शासितृत्वं तु ब्रह्मणोऽसाधारणम्। 'अन्तः प्रविष्टः शास्ता जनानाम्', 'एतस्य वा अक्षरस्य प्रशासने गार्गि'इत्यादिभिर्निरुपाधिकप्रशासनस्य ब्रह्मासाधारणत्वश्रवणात्। निरुपाधिकोपदेश्यत्वं ब्रह्मण इत्यसाधारण्यमिति चेन्न। इष्टप्राप्त्यनिष्टनिवृत्ति[1]तत्साधनेषु साधारण्यात्। यद्यप्यमितसुख[2]प्राप्तिदुःखनिवृत्त्यादि साक्षादुपदेश्यं स्यात्, तथापि संसारनिवृत्ति-ब्रह्म-तदुपासनानामुपदेश्यत्वं साधारणम्। प्रष्टव्यस्योपदेश्यत्वमर्थसिद्धम्। अत उपदेश्यत्वकथन[3]वैयर्थ्यञ्च। ननु येनाश्रुतमित्यादिनैकवाक्यत्वात् स्वज्ञानेनान्यज्ञानहेतुताविशेषितमुपदेश्यत्वमसाधारणमिति चेत् — तथापि तादृशमुपदेश्यत्वं प्रतिज्ञावाक्येन, द्रष्टव्यत्वोक्त्या च अर्थसिद्धमिति अनपेक्षितोपदेश्यत्वकथनादपि अपेक्षितं प्रशासितृत्वमेव वाच्यमिति युक्तम्। येनाश्रुतमित्युपादानत्वे सिद्धे प्रशासितृत्वेन हि निमित्तत्वं सिध्येत्। निमित्तान्तरे सति हि एकविज्ञानात् सर्वविज्ञानं नोपपद्यते। अतः प्रतिपिपादयिषितवस्तुनोऽपेक्षितासाधरणाकारविशिष्टतयैव प्रतिपादनमुचितम्। घञ्प्रत्ययस्य करणे[4]व्युत्पन्नत्वात्, 'विवक्षातः कारकाणां प्रवृत्तिः' इति शब्दोक्तनयेन कर्तर्येव करणान्तरनैपेक्ष्येण साधकतमत्वविवक्षया तथा प्रयोग उपपद्यते। अकर्तरीति सूत्रस्य प्रयोजनं करणत्वविवक्षया विना कर्तरि असाधुत्वेन प्रयोगनिवृत्तिः। उपदेशपक्षे प्रकृत्यर्थास्वारस्यं प्रत्ययस्वारस्यञ्च; प्रशासनपक्षे प्रत्ययास्वारस्यं प्रधानभूतप्रकृत्यर्थस्वारस्य[5]मर्थौचित्यञ्चेति वैषम्यम्। अतः प्रशासनमेवादेशशब्दाभिधेयमिति स्वीकर्तुं युक्तम्" इति।

1. निवारण ख. ग. 2. सुखदुःखनिवृ ख. ग. 3. कथने ख. 4. करणेप्युपपन्न ख. ग. 5. अर्थौचित्यमिति न क.

न्यासकार इति। न्यासो नाम काशिकाव्याख्या पञ्जिका। उपदेशस्थले यं प्रति उपदेशः, तस्यैव तदनुष्ठाने फलम्। आदेशस्थले तु गामानयेत्यादौ आदेष्टुरेव क्रियाफलं मुख्यं प्रायिकमिति एतन्मुखेनार्थवैलक्षण्यं दर्शितम्। सर्वथा आदेशो नोपदेशः। क्वचित्, 'एष आदेशः, एष उपदेश' इति श्रवणं तु भगवदाशयरूपवैदिकविधिषु उक्ताकारद्वयमप्यस्तीति प्रतिबोधनायेति।

अत्रेदं विचार्यते—यत् तावदुच्यते, प्रसिद्धिप्राचुर्यात् प्रकृत्यर्थः शासनमिति। सत्यमेव तत्। 'शासनं विविच्य ज्ञापनम्' इति धातुवृत्तिकृता व्याख्यातत्वादुपदेश एव पर्यवसानम्। 'उपदेशेऽजनुनासिक इत्', 'स्थानिवदादेशोऽनल्विधौ' इत्यादिसूत्रेषु 'दिशिरुच्चारणक्रियः' इति महाभाष्योक्तेः। 'अथातोऽहङ्कारादेश' इत्यादौ **आदेशः** उपदेश इत्यर्थः। 'इदं शास्त्याचार्य' इति भाष्यस्य, इदमुपदिशतीति ह्यर्थः। 'तदशिष्यम्' इत्यादौ अवक्तव्यमिति व्याख्यातम्। ततश्च आदेशः शासनमुपदेशः। तत्कर्मत्वञ्च, 'अनु म एतां भगवो देवतां शाधि' इति ब्रह्मणः सिद्धमिति प्रकृतिप्रत्यययोरविरोधसंभवात प्रत्ययास्वारस्यानुसरणस्यानुचितत्वात्[1]। न चानुशासनकर्मत्वेऽपि न शासनकर्मत्वमिति वाच्यम्—शासु अनुशिष्टाविति शासनस्यैवानुशासनरूपत्वात्।

ततश्च करणत्वस्यारोपेण घञ्समर्थनमप्यनुचितम्। आरोपस्यानुचितत्वात्। ननु करणत्वस्य[2]नाध्यारोपः, तस्य सिद्धत्वादिति चेन्न—तथासति सिद्धान्ते प्रत्ययास्वारस्याभ्युपगमस्यायुक्तत्वात्। अत एव, 'असिः छिनत्ति' इत्यादौ सौकर्यातिशयविवक्षया, 'ब्रह्मदृष्टिरुत्कर्षात्' इति न्यायेन करणे कर्तृत्वारोपेऽपि कर्तरि करणत्वादेरसंभवः। तथासति राजनि भृत्यत्वारोपस्येवानर्थावहत्वात्। अत एव, 'साधकतमं करणम्' इति सूत्रे अधिकरणस्थाल्याः तनुकपालतया साधकतमत्वविवक्षया स्थाल्या पचतीतिप्रयोगमुपपाद्य, 'न चैवं कर्तुरपि करणत्वविवक्षाप्रसङ्गः; भिन्नजातीयत्वात्। सकलसाधनविनियोगकारी खल्वसौ। न हि शतधनो निष्कधनेन स्पर्धितुमर्हति' इति कर्तुः करणत्वविवक्षाऽभावस्यैवोपपादितत्वात्। **निक्षेपरक्षायाम्**, 'भगवतो रक्षाकरणत्वानुसंधानं प्रपत्तिरितिपक्षे करणस्य कर्तृत्वासंभवेन जीवस्यैव रक्षकत्वमापतेदिति कर्तृत्वकरणत्वविरोधस्य, भगवति करणत्वानुसंधाने, 'ब्रह्मदृष्टिरुत्कर्षात्' इति न्यायविरोधस्य च प्रतिपादितत्वात्। 'शक्तिविपर्ययात्' इति सूत्रे अन्तःकरणस्य कर्तृत्वे ततोऽन्यत् करणं स्यादिति अन्तःकरणातिरिक्तं करणान्तरमभ्युपगन्तव्यं स्यादिति पैरप्युक्तत्वाच्च[3]। किञ्च प्रशासनकर्तुः करणत्वसंभवे परमात्मनः प्रशासनकर्मत्वस्यापि संभवात् तदसंभवोक्तिर्विरुध्येत। किञ्च करणत्वे विवक्षिते,

1. अयुक्तत्वात् ग. 2. करणत्वाद्या(ध्या?)रो क. 3 उपपादितत्वाच्च ख.

'करणाधिकरणयोश्च' इति परेण ल्युटा बाधितत्वेन घञोऽप्रसङ्गात्। न च, 'हलश्च' इत्यनेन घञः प्रसङ्गः। तत्रापि संज्ञायामित्यनुवृत्तेः। न च त्वन्मतेऽपि कर्मणि घञ् न स्यात्, 'अकर्तरि च कारके संज्ञायाम्' इति संज्ञायामेव घञो विधानादिति वाच्यम्—'अकर्तरि चे'त्यत्र चकारस्य भिन्नक्रमत्वमाश्रित्य संज्ञायामप्यस्तीति **पदमञ्जर्यादौ** समर्थितत्वात्। 'संज्ञाग्रहणानर्थक्यञ्च सर्वत्र घञो दर्शनात्' इति वार्तिककृतोक्तत्वाच्च।

किञ्च घञः करणार्थत्वे, उपक्रमे, 'आदेशशब्देन प्रशासिताऽभिधीयत' इति यदभिहितम्, तद् विरुध्येत; प्रशासनकरणत्वस्यैवाभिहितत्वेन प्रशासनकर्तुरनभिहितत्वात्। यच्चोक्तम्, 'प्रशासितृत्वमसाधारण'मिति—तदपि न। आदेशशब्देन प्रशासनकरणत्वमात्राभिधानेन प्रशासितृत्वानभिधानात्। तदभिधानेऽपि निरुपाधिकप्रशासितृत्वस्येव[1] मुख्योपदेश्यत्वस्य ब्रह्मासाधारणत्वात्। अत एव, 'ब्रह्मजिज्ञासा' इति सूत्रे ब्रह्मण इति कर्मणि षष्ठीपरिग्रहात् ब्रह्मण एव आभिधानिकं जिज्ञासाकर्मत्वम्, तदुपासनादीनां त्वाक्षेप्यमित्युक्तम्। किञ्च आदेशशब्दमात्रस्य ह्यतिप्रसङ्गमाशङ्क्य तमित्येवं विशेषणोपादानात् अवश्यं तमित्यस्य आदेशविशेषकत्वमभ्युपेयम्। यदि हि आदेशशब्दस्यैव निरुपाधिकप्रशासितृत्वमर्थः, तदा तस्य परमात्मासाधारणत्वात् तच्छब्दो विशेषको न स्यात्। यदपि चोक्तं प्रष्टव्यत्वकथनेनोपदेश्यत्वं सिद्धमिति तत्कथनस्यानपेक्षितत्वात् प्रशासितृत्वमेवार्थ इति—तन्न। 'यद्यपि पूर्वं नाप्राक्षम्, अधुना स्वयमेव ज्ञास्यामी'ति बुद्धिं व्युदसितुं उपदेष्टव्यत्वकथनस्यैवापेक्षितत्वात्। अत एव, 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादौ प्रष्टव्यस्य उपदेश्यत्वलक्षणौपनिषदत्वकथनम्। यच्चोक्तम्—सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं निमित्तत्वमपेक्षितमिति—तन्न। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाबलादुपादानत्वस्येव तदन्यथानुपपत्त्या निमित्तत्वस्यापि लाभसंभवेन तस्य पृथग् वक्तव्यत्वाभावात्। तदनुपपत्तेर्भवतैवोक्तत्वादिति।—

अत्रोच्यते—'एष आदेशः', 'एष उपदेशः' इत्येवं पृथगुपदिष्टयोः, 'न वायुक्रिये पृथगुपदेशा'दिति न्यायेन आदेशोपदेशयोर्भेदावश्यम्भावात् निम-

1. त्वस्यैव क. ग.

न्त्रणामन्त्रणयोरिव, वृक्षवनस्पतिशब्दयोरिव च, स्नेहभक्तिशब्दयोरिव च क्वचिदेकविषये प्रयोगमात्रेणानुभवभेदस्य दुरपह्नवत्वात्। 'आदिशती'त्युक्ते हि यद्वाक्योल्लङ्घने दण्डो भवति, तादृशशब्दप्रयोक्तृत्वं नियमयितृत्वमाज्ञापयितृत्वं प्रतीयते। अत आदिशतीतिव्यवहारः प्रभुविषय एव। अत एव न्यासकारेण आदेशोपदेशयोर्भेदो वर्णितः— 'आङ्पूर्वो दिशतिर्नियोक्तृप्रयोजनवचनः, उपपूर्वस्तु नियोज्यप्रयोजनवचनः' इति। 'अन्तः प्रविष्टः शास्ता जनानाम्' इत्यादौ तथैव प्रतीतेश्च[1]। प्रकृतिस्वारस्येन नियमनापरपर्यायाज्ञापनरूपार्थे प्रतीते घञ्प्रत्ययस्य कर्तृव्यतिरिक्तकारकमात्रवाचिनो योग्यताशात् त्वन्मते कर्मार्थकत्ववत् अस्मन्मतेऽपि कारकवाचिनो घञ्प्रत्ययस्य सकलकारकप्रयोक्तृकर्तृलक्षणा समाश्रीयते; प्रष्टव्यवस्तुनः तादृग्रूपत्वात्। असंजातविरोधिमुख्यप्रकृत्यर्थानुग्रहेण जघन्यप्रत्ययलक्षणाया आश्रयणीयत्वात्। 'पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः' इत्यादौ अहःपरत्वस्वरसत्रिवृदादिपदमुख्यत्वानुसारेण जघन्यसंवत्सरपदस्यैव सौरचान्द्रमसाद्यनेकार्थसाधारण्येन निश्चयासमर्थस्य [2]अहर्लक्षणाया अभ्युपेतत्वात्। तथा, 'प्रयाजशेषेण हवींष्यभिघारयती'ति प्रयाजशेषप्रातिपदिकानुरोधेन तृतीयाया द्वितीयार्थलक्षणाया आश्रितत्वात्। तथा, 'प्राणा वाव ऋषयः' इत्यादौ ऋषिशब्दानुसारेण बहुवचनश्रुतेः पाशन्यायेन गौणार्थकत्वस्य, 'गौण्यसंभवात् तत्प्राक्छ्रुतेश्च' इत्यत्रोपपादितत्वाच्च।

नन्वादेशपदस्य प्रशासनापरपर्यायाज्ञापनरूपादेशप्रसिद्धस्योपदेशप्रसिद्धिप्राचुर्याभावेऽप्युपदेशार्थकत्वे प्रकृतेः सर्वात्मना मुख्यार्थत्यागाभावात् प्रत्ययस्य त्वन्मते

1. अयं घ. पाठः। 'अन्यत्र प्रतीतेः। ततश्च'। 2. निश्चयासाम(र्थस्या)र्थादजहल्लक्षणायाः ख. ग.

पञ्चपञ्चाशतः त्रिवृतः इति। पञ्चाशत्पञ्चकं सार्धशतद्वयम्। तावन्तः **त्रिवृतः** त्रिवृत्पदवाच्यस्तोमविशेषविशिष्टाः। सहस्रसंवत्सराधिकरणे (६–७–१३) संवत्सरशब्दस्यात्र अहःपरत्वं साधितम्। **अहःपरत्वस्वरसेति**। त्रिवृदादिशब्दानां ऋङ्मन्त्रवकादिस्तोमीयासंख्यारूपस्तोमशक्तत्वेपि तद्युक्तदिनरूपार्थापेक्षया तद्युक्तसर्वदिनकलरूपसंवत्सरविशेषणपरत्वे गौरवादिति भावः। **निश्चयासमर्थस्येति**। इयमभ्युच्चययुक्तिः। सहस्रसंवत्सरजीविपुरुषाभावेन संवत्सरशब्दमुख्यार्थग्रहणायोगात् दिनमासाद्यर्थस्य लक्षणया प्राप्यत्वे सति अहर्लक्षणाश्रयणं त्रिवृदादिपदान्तरस्वारस्यात्। प्रयाजशेषस्थले तु प्रातिपदिकानुसारात् विभक्तौ लक्षणाश्रयणमिति विवेकः। प्रयाजशेषपदस्य प्रयाजोपयुक्तशेषो यः प्रतिपत्तिसापेक्षोंशः, तत्परतया प्रतिपत्तित्वसंपत्तये प्रयाजशेषोद्देशेन हविष्षु अभिधारणविधानाय प्रयाजशेषमित्यर्थस्वीकारात् (४–१–१४)।

कर्तृलक्षणायां मुख्यार्थत्यागात् कांस्यभोजिन्यायेन जघन्यद्यावापृथिव्येककपालानुरोधेन मुख्यैन्द्राग्नादीनां[1] प्रसूनवर्हिर्नियमाश्रयणवत, 'एकधा ब्रह्मण उपहरती' त्यत्र सकृत्सहत्वसाधारणस्य एकधाशब्दस्य भक्षान्तरप्रापकदुर्बलचोदकानुग्रहेण सहत्वार्थस्वीकारवत्, 'सप्तदश प्राजापत्यान्' इत्यत्र प्रजापतिसंबन्ध[2]विशिष्टाविशिष्टान्वययोग्यस्यापि बहुत्वस्य एकपशुनिष्पन्नैकादशावदानप्रापकदुर्बलचोदकानुसारेण विशिष्टान्वयाभ्युपगमेन द्रव्यदेवतासंबन्धाक्षिप्तयागभेदाभ्युपगमवच्च जघन्यघञ्प्रत्ययानुसारेण मुख्यदिशेरुपदेशार्थकत्वमेव युक्तम्। प्रकृतेर्मुख्यार्थत्यागाभावात्। प्रचुरप्रसिद्धमुख्यार्थत्यागमात्रं त्वकशिष्यते। तत्तु न दोषाय। अत एव, 'पत्नय उपगायन्ती'त्यादौ गीतिशब्दस्य शारीरगाने प्रसिद्धिप्राचुर्ये सत्यपि अशारीरवादित्रादिगानस्यापि

1. मुख्येन्द्राग्न्यादीनां ख. ग. 2. विशिष्ट इति सकृदेव सर्वत्र। द्विर्निवेश औचित्यात् भावप्रकाशिकानुसाराच्च।

कांस्यभोजीति। शिष्यस्य कांस्यपात्र एव भोजनमिति नियमे गुरोश्चानियमे सति क्वचिदुभयोरेकपात्रभोजनप्रसक्तौ अमुख्यशिष्यानुरोधात् कांस्यपात्रस्यैव ग्रहणमिति तत्र दर्शितो दृष्टान्तः। **जघन्ये**ति। तृतीयतया श्रुतेत्यर्थः। **प्रसूने**ति। पुष्पितेत्यर्थः। लूनशेषात् पुनरुत्पन्नेत्यप्यर्थमाहुः। ऐन्द्राग्नादेः वर्हिर्मात्रमपेक्षितम्; एककपालस्य तु अतिदेशबलात् प्रसूनबर्हिरिति स्थिते, त्रयाणामेकप्रयोगविषयतया यत्किञ्चिदेकरूपबर्हिषां ग्राह्यत्वे सति जघन्यानुरोधेन प्रसूनबर्हिषामेव ग्रहणमिति (१२-२-१४.)। **सकृत्सहत्वे**ति। **सकृत्त्व**मेकप्रयत्नसाध्यत्वम्, एकत्वमेव वा; **सहत्वं** यौगपद्यम्। **भक्षान्तरे**ति। नानाभक्षेषु चोदकप्राप्तेषु उपहरणे सकृत्त्ववादी प्रथमभक्षोपहरणमात्रमिच्छति। तत्र सिद्धान्तिनोच्यते (१०-२-४.) भक्षान्तराणामप्यविशेषेण प्राप्त्या तदबाधाय सहत्वरूपार्थ एव ग्राह्य इति। **बहुत्वस्ये**ति। प्रकृतौ, हृदयस्याग्रेऽवद्यतीत्यादिना एकादशावयवावदानानि विहितानि। सप्तदश प्राजापत्यानित्यत्र प्रजापतेरिमे प्राजापत्या इति वा, प्राजापत्यश्च प्राजापत्यश्चेत्येवं प्राजापत्या इति वा विग्रहः संभवति। तत्र प्रथमपक्षादरणे सप्तदशसु पशुषु प्रजापतिसंबन्धः सकृदिति याग एकः स्यात्। एवञ्चातिदेशप्राप्तं यत् यागे पश्वेकत्वं अवदानानामेकादशत्वञ्च, तद् बाध्येत। द्वितीयविग्रहे तु प्रतिपशु प्रजापतेः पृथक्संबन्धात् सप्तदश यागा इति एकैकस्य यागस्य पश्वेकत्वादिप्रापकं चोदकमबाधितं भवतीति तदादर इति (२-२-७.)। **चोदके**ति। अतिदेशप्रमाणेत्यर्थः। **पत्नय उपगायन्ती**ति। प्रकृतौ सामगानस्योपगातारः ऋत्विजः। विकृतौ, 'दिक्षु दुन्दभयो नदन्ति, पत्नय उपगायन्ती'ति श्रुतम्। अत्र पत्नीनामुपगातृत्वश्रवणात् ऋत्विगुपगानबाध इति पूर्वपक्षः। यदि गायतेः शारीरगानमेवार्थः, तदा उपगानं नाम तदुपचयः इति ऋत्विग्गानव्यावृत्तिः स्यात्। शारीराशारीरसर्वसाधारण एव गायतिरिति दुन्दुभ्यादिगानोपचयकरत्वं पत्नीनामिति न ऋत्विग्बाध इति सिद्धान्तः (१०-५-४.)। **गानस्यैवोपचय**मित्यनेन उपगानं नाम गानोपचय इत्यर्थेऽपि गानं

[1]गीतिशब्दप्रयोगविषयत्वेन मुख्यार्थत्वात् संनिहितदुन्दुभ्यादिगानस्यैव काण्डवीणादिभिरुपचयं कुर्वत्यः पत्न्यो न ऋत्विजां निवर्तिका इति दशमे सिद्धान्तितमिति चेत् —

मैवम्—गानशब्दस्य बर्हिराज्याधिकरणन्यायेन गीतिमात्रवाचित्वात् युक्तं तत्र संनिहितदुन्दुभ्यादिगानवाचित्वम्। इह तु आदेशशब्दस्य क्वचिदपि, शिष्यो गुरुमादिदेशेत्यादिप्रयोगाभावेन साधारणोच्चारणार्थकत्वाभावात् उपदेशातिदेशशब्दयोरिव आदेशोपदेशशब्दयोरपि भिन्नार्थकत्वेन आदेशशब्दस्योपदेशार्थकत्वे मुख्यार्थत्यागस्यावर्जनीयत्वेन जघन्यप्रत्यय एव लक्षणाया उचितत्वात्।

वस्तुतस्तु, 'उपदेशेऽजनुनासिक इत्' इति सूत्रे, 'करणाधिकरणयोश्च' इति ल्युटा बाधितस्य घञः, 'अकर्तरि च कारके' इत्यनेनाप्रसङ्गमाशङ्क्य, 'कृत्यल्युटो बहुलम्' इति घञो भाष्यकृता समर्थितत्वात् तन्न्यायेन कर्तर्यपि तेनैव सूत्रेण घञ्सिद्धौ लक्षणाया अप्रसङ्गात् प्रशासितृत्वार्थकत्वमेवादेशशब्दस्य युक्तम्। आदेशनम् आदेश इति घञन्ताद् भाववाचिन आदेशशब्दात् अर्शआद्यजन्तादपि प्रशासितृत्वार्थकत्वमेवादेशशब्दस्य युक्तमिति वयमुत्पश्यामः। ततश्च वा[2] 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः', 'प्रशासितारं सर्वेषाम्' इत्यादिश्रुतिस्मृतिप्रतिपन्नं परमात्मधर्मभूतं प्रशासितृत्वमिह आदेशशब्दार्थः। एतत् सर्वमस्माभिर्भावप्रकाशिकायां प्रपञ्चितं तत्रानुसंधेयम्।

1. गीत ख. 2. वाकारः क. कोशे।

दुन्दुभ्यादिगानमिति दर्शितम्। वस्तुतः उपगानं उपचयात्मकं गानमेव। तथाच दुन्दुभिनादस्य षड्जादिस्वरसमाहारात्मकगानत्वाभावेऽपि तदुपचयात्मकं भवितुमर्हति पत्नीगानमिति ध्येयम्। काण्डवीणादिभिरित्यनेन, 'काण्डवीणादिभिरुपगायन्ती'ति अशारीरगानविधानात् अशारीरदुन्दुभिनादस्याशारीरगानमुपचायकम्; तत्रैव पत्नीनां कर्तृत्वमिति नानेन शारीरस्य ऋत्विगुपागानस्य बाध इति दर्शितम्। दुन्दुभ्यादिगानेति। कै गै शब्दे इति गायतेः शब्दमात्रार्थकत्वादिति भावः। इहर्त्विति तुशब्देन वैलक्षण्यपरेण कांस्यभोजिन्यायादिपूर्वोक्तसकलन्यायानवतारः सूचितः।

एवं कर्तुः करणत्वविवक्षा, कर्तृलक्षणा वेति पक्षद्वयमुक्तम्। अथ स्वरसौ द्वौ पक्षौ स्वयमाह वस्तुतस्त्विति। वेदार्थसंग्रहे "आदिश्यते अनेनेत्यादेश" इति, "आदेशः प्रशासनम्" इति च एवं पक्षद्वयकटाक्षेण स्यादित्यपि ध्येयम्।

मप्राक्ष्यो येनाश्रुतँ श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति ।

[1]प्रशासनेन च धारकत्वलक्षणमात्मत्वं फलितम् । ततश्चादेशशब्द आत्मत्वपर्यन्तः ।

'**येनाश्रुतं श्रुतं भवती**'त्यत्र, 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति', 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं भवती'ति मुण्डकबृहदारण्यकवाक्यानुसारेण—येन श्रुतेन मतेन विज्ञातेन, अश्रुतममतमविज्ञातं, श्रुतं मतं विज्ञातं भवतीति वाक्य[2]पर्यवसितोऽर्थः, ब्रह्मस्वरूपसत्तामात्रस्याश्रुतश्रुतत्वापादक[3]त्वाभावात् । अत्र अश्रुतामतादिशब्दानां, इदं सर्वं विदितं भवती'ति श्रुत्यन्तरानुसारात् सर्वार्थकत्वं द्रष्टव्यम् । ततश्च येन श्रुतेन सर्वं श्रुतं भवतीत्यर्थः । ततश्च अश्रुतं श्रुतं भवतीति अश्रुतस्य श्रुतत्वप्रतिपादनं कथमिति शङ्काया नावकाशः । यद्वा अवस्थाविशिष्टतया अश्रुतं स्वरूपेण श्रुतं भवतीत्यर्थः । अत्र **विज्ञात**शब्दो निदिध्यासनपरः; श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति क्रमप्रत्यभिज्ञानादिति द्रष्टव्यम् ।

अत्र, येनाश्रुतं श्रुतमित्यनेन किमुपादानमिति पृष्टं भवति । प्रशसितृत्वार्थकेन आदेशशब्देन चात्मस्वरूपं पृष्टं भवति । ततश्चात्मभूतमुपादानं किमिति प्रश्नस्य फलि-

1. शासितृत्वोक्तया च क. 2. येनाश्रुतमिति वाक्य क. 3. श्रुतत्वहेतुत्वाभावात् क.

अप्राक्षीरित्यर्थे **अप्राक्ष्य** इति छान्दसं रूपम् । ल्यडि च अप्रक्ष्य इत्येव रूपम् । तच्छायया प्रयोगवशात् आगमनात् प्रागेव प्रष्टव्यं न पृष्टं त्वयेति प्रश्नातिपत्तिः सूच्यत इव । **येनाश्रुतमित्यादि** । अत्र एकस्मिन् ज्ञाते अन्यस्य ज्ञातत्ववचनं हेतुज्ञाने साध्यस्य ज्ञातत्ववचनादिस्थल इव न एकज्ञानजन्यान्यविषयकज्ञानान्तराभिप्रायेण; अपि तु तदेकं येन ज्ञानेन विषयीक्रियते, तेनैव सर्वस्यापि विषयीकृतत्वमित्यभिप्रायेण । तदानीमेव सर्वस्मिन् एकाभेदस्य विवक्षितस्य निर्वाहात् । तदिदं स्पष्टीकर्तुं, येन ज्ञातेनाज्ञातं सर्वं ज्ञातं भवतीति संग्रहेणानुक्त्वा **अश्रुतेन श्रुतममतेन मतमित्येवं** विस्तरेण कथनम् । श्रुतं शाब्दबोधविषयः । न ह्येकस्मिन् ध्याननननशाब्दबोधविषये सति सर्वं ध्याननननशाब्दबोधविषयीभवेत्, यदि एकसर्वपदार्थयोरभेदो न स्यादिति ।

किं ब्रह्म ज्ञातवानसीति रीतिं विहायानया भङ्ग्या पिता किमिति पप्रच्छेति चेत्— 'अस्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिवे'ति पितृवाक्यममृष्यमाणः, 'सर्वं विज्ञाय प्रतिनिवर्तितव्यम्' इति गुरुमुपगम्याधीत्य सर्वज्ञमानी हि समागतः श्वेतकेतुः । तमेनं पुनस्तूष्णीमासीनं स्तब्धं प्रति पित्रोच्यते, 'अङ्ग! इत्थम्भूतात् ज्ञानात् सर्वज्ञानं न भवति । अस्ति तु किञ्चिदन्यत् । तज्ज्ञाने कथञ्चित् सर्वं ज्ञातं भवेत् । तदपि च श्रोतव्यं मन्तव्यं विज्ञातव्यश्चोपर्युपरि । तन्न जातु जोषं स्थितेः प्रसक्तिः इति प्रतिबोधयितुमिति । दर्शितमिदमेतदवतरणे भाष्येऽपि ।

कथं नु भगवः स आदेशो भवतीति । (३)
यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातँ स्यात्;

तार्थः । अत एव श्रीविष्णुपुराणे, 'यन्मयं च जगद् ब्रह्मन् यतश्चैतत् चराचरम्' इति [1]श्लोके यन्मयमिति आत्मस्वरूपम्, यतश्चैतच्चराचरमिति उपादानञ्च पृष्टम् । अत एव च, 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति प्रतिवचने सदायतना इति सत आत्मत्वम्, सन्मूलाः सत्प्रतिष्ठा इति सत उपादानत्वञ्च प्रतिपाद्यत इति द्रष्टव्यम् । अत एव, 'अथातोऽहङ्कारादेशः', 'अथात आत्मादेशः', 'अथात आदेशो नेति नेति', 'आदित्यो ब्रह्मेत्यादेशः', 'उभयमादिष्टं भवति अध्यात्मञ्चाधिदैवतञ्च' इत्यादाविव आदेशशब्दस्योपदेशार्थकत्वमेवास्तु, न प्रशासनार्थकत्वमिति शङ्का पराकृता । अतो जगदुपादानभूतं जगदात्मानं किं पृष्टवानसीत्यर्थः । अत्र ज्ञातवानसीत्यनुक्त्वा पृष्टवानसीत्युक्तवतः,

"तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥"

इत्युक्तरीत्या प्रणिपातादिप्रसन्नाचार्योपदेशगम्य एव सोऽर्थः, न तु प्रकारान्तरेणापि ज्ञातुं शक्यत इत्यभिप्रायः ।

अन्यज्ञानेनान्यज्ञानासंभवात् एकविज्ञानेन सर्वविज्ञानासंभवं मन्वानश्चोदयति **कथं नु भगवः स आदेशो भवति** । हे भगवः ईदृश आदेशः कथं भवेदित्यर्थः ।

उपादानोपादेययोः तत् संभवतीत्यभिप्रायेण उत्तरमाह — **यथा सोम्यैकेन — विज्ञातं स्यात्** । यथा उपादानभूते मृत्पिण्डे ज्ञाते तदुपादेयघटशरावादिकं ज्ञातं भवति, तद्वदित्यर्थः । नैयायिकरीत्या—, असदेव घटादिकं मृत्पिण्डेनोत्पद्यते । अतश्चोपादानोपादेययोर्भेदात् न मृत्पिण्डे ज्ञाते सर्वमृन्मयानां ज्ञातत्वं

1. श्लोके इत्यादि चराचरमितीत्यन्तं क. कोशे ।

असंभावितमर्थं कथं पृष्टवान् स्यामहमित्याशयेन प्रवृत्तं चोद्यमवतारयति **अन्यज्ञानेनेति** । **नैयायिकरीत्येति, मन्वानमित्यत्रान्वेति** । असंभवाभिमानस्य दृढत्वात् तत्परिहारायानेकदृष्टान्तमुखेन संभवप्रदर्शनम् ।

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (४)—

संभवतीति मन्वानं प्रत्याह – **वाचारम्भणं — मृत्तिकेत्येव सत्यम्** । घटत्वादिलक्षणो विकारो घटशरावादिनामधेयञ्च आरभ्यते आलभ्यते स्पृश्यत इत्यारम्भणम् । कर्मणि ल्युट् । तेनैव मृद्द्रव्येण घटशरावादिलक्षणो विकारो घटशरावादिनामधेयञ्च स्पृश्यत इत्यर्थः । आरम्भणशब्दस्य पुन्नपुंसकलिंग[1]विकारनामधेयविशेषणत्वेऽपि नपुंसकैकशेषैकवद्भावाभ्यां वा लिंगसामान्यादिविवक्षया वा आरम्भणमिति नपुंसकैकवचननिर्देशः । मृद्द्रव्येण विकारनामधेये कस्मै प्रयोजनाय स्पृश्येते इत्यत्राह — **वाचेति** । प्रयोजनस्य हेतुत्वविवक्षया तृतीया । वाक्छब्दश्च अजहल्लक्षणया वागादिव्यवहारपरः । ततश्च वाक्पूर्वकहानादिव्यवहारार्थं मृत्पिण्डेन नामरूपे स्पृश्येते । मृत्पिण्ड एव नामरूपभाग् भवतीत्यर्थः । अत्र यद्यपि मृत्पिण्डमृन्मयाभेदप्रतिपादनं 'वाचारम्भणं विकार' इत्येतावन्मात्रेणापि सिध्यतीति न नामधेयस्यापि स्पृश्यत्वं वक्तव्यम — तथापि संज्ञाभेदादुपादानोपादेययोर्भेदशङ्काव्युदासाय नामापि मृद्द्रव्येण स्पृश्यत इत्युक्तिरपेक्षितेति द्रष्टव्यम् । — कार्यकारणयोरेकद्रव्यत्वे प्रमाणमाह — **मृत्तिकेत्येव सत्यम्** । मृन्मयं घटादिकं मृत्तिकेत्येव प्रमाणप्रतिपन्नम् । न तु तद्भिन्नत्वेनेत्यर्थः । यद्वा मृन्मयं मृत्तिकेति वाक्यमेव **सत्यं** अबा-

1. लिङ्गान्त ख.

वाचा वागिन्द्रियेण **आरम्भणं** आरभ्यमाणं उत्पाद्यमानमित्यर्थे नामधेयमात्रे तदन्वयः स्यात्; न विकारे । **वाचा** व्यवहारार्थं कुलालादिना आरभ्यते उत्पाद्यत इत्यर्थे सर्वनामधेयेषु तदन्वयो दुर्वचः; घटादिनामधेयस्य कुलालादिकृतत्वाभावात् । अतो मृद्द्रव्येणेति कर्त्रध्याहारेण तेन स्पृश्यत इत्यर्थस्वीकारः । तदा कार्यकारणयोरभेदोपपादनायावश्यवक्तव्यमुपादानस्यैव विकारभासत्वं विशेषनामभाक्त्वं च सम्यगुक्तं भवतीति फलाधिक्यञ्च । एवं विकारनामधेयस्पर्शाभावे लोकव्यवहारो न सिद्ध्येदिति तत्प्रयोजनकथनं **वाचेति** । ननु चकाराभावात् आरम्भणमिति क्लीबनिर्देशाच्च एवमेवार्थोऽस्तु — मृत्तिकेति **नामैव सत्यं** शाश्वतम्; अन्यत्तु घटशरावादिनामधेयं वाचा आरभ्यमाणं **विकारः** असत्यं अशाश्वतम्, कदाचिदेव भवतीति इति चेन्न — एतत्कथनस्य निष्प्रयोजनत्वात्; वाचारम्भणपदवैयर्थ्याच्च । अस्तु अर्थसिद्धः, 'गामश्वं पुरुषं जगत्' इतिवत् । नपुंसकं च निरूढं भाष्ये । ननु नामधेयपददृष्ट्या आरम्भणमिति प्रयोगे वाचारम्भणं नामधेयं विकार इति क्रमो युक्त इत्यत्राह **लिङ्गसामान्येति** । पदसंस्कारपक्षावलम्बनेनेति भावः । **इतिवाक्यमेव सत्यमिति** । मृन्मयं न मृत्तिका; पटो न तन्तवः;

धितार्थकमित्यर्थः । ततश्चोपादानोपादेययोरभेदात् उपादाने ज्ञाते उपादेयस्य ज्ञातता भवतीत्यर्थः ।

एतेन "विकारो **वाचारम्भणं** वागालम्बनमात्रम् । **नामधेयम्** । स्वार्थे धेयट्प्रत्ययः । नामैव केवलम् ; न विकारो नाम वस्त्वस्ति ; मृत्तिकैव सत्यम्" इति यत् परैरुक्तम् — तदपास्तम् । **वाचारम्भण**मित्यस्य वागालम्बनमित्येतदर्थकत्वे प्रमाणाभावात् । नामधेयमित्यनेन वागालम्बनमात्रमित्यतोऽतिरिक्तार्थाप्रतिपादनात् पुनरुक्तिश्च । मृत्तिकासत्यत्वमात्रत्व (?) विवक्षाया**मिति**शब्दवैयर्थ्यञ्च । उक्तञ्चाभियुक्तैः —

"वाचारंभणमित्युक्तेर्मिथ्येत्यश्रुतकल्पनम् ।
पुनरुक्तिर्नामधेयमितीत्यस्य निरर्थता ॥" इति ।

किञ्च परमते,

"येनाश्रुतं श्रुतं भवती" ति सन्दर्भोऽपि न युज्यते । शुक्तितत्त्वे ज्ञाते तदध्यस्तरजतादेर्निवृत्तावपि रजतत्वस्य ज्ञातत्वादर्शनेन ब्रह्मणि ज्ञाते तदध्यस्तप्रपञ्चस्य निवृत्तावपि ज्ञातत्वासंभवात् । ननु शुक्तौ ज्ञातायां रजतस्य तत्त्वं ज्ञातमेव । शुक्तिव्यतिरिक्तरजततत्त्वस्याभावात् । एवं ब्रह्मणि ज्ञाते प्रपञ्चस्य तत्त्वं ज्ञातमेवेति चेत्- न — परमार्थशुक्तेरपरमार्थरजततत्त्वरूपत्वाभावात् । न हि शुक्तौ ज्ञातायां रजततत्त्वं ज्ञातमिति व्यवहारो दृष्टचर इत्यास्तां तावत् ।

ननु सर्वं मृन्मयं विज्ञातं स्यादित्यत्र विकारार्थमयट्प्रत्ययेन घटत्वशरावत्वाद्यवस्थावद्द्रव्यरूपो विकार एवाभिधातव्यः । न तु घटत्वशरावत्वाद्यवस्थारूपो विकारः, तस्य मृत्पिण्डापेक्षया भिन्नत्वेन तज्ज्ञानेन ज्ञातत्वासम्भवात् । ततश्च तदुपादके 'वाचारम्भणं विकार' इति वाक्येऽपि विकारशब्देनावस्थावद्द्रव्यलक्षणस्य विकारस्याभिधानमुचितम् ; न त्ववस्थालक्षणविकारस्येति चेत्, सत्यम् ; तस्यैवाभिधानमुचितम् । तथापि मृद्द्रव्येण घटशरावादिलक्षणस्यावस्थावतो द्रव्यस्य स्पर्शासम्भवात्— न ह्यात्मैवात्मना स्प्रष्टुं शक्यः । अतः, मृन्मयमित्यत्र विकारवाचिमयट्प्रत्ययेनावस्थावतो-

---

मृन्मयं स्ववयवे स्वभिन्ने समवेतम् इत्यादितार्किकवाक्यमसत्यमिति भावः । **वागालम्बनेति** । वाचाया आरम्भणं आलम्बनं वाचारम्भणमिति परमतम् । **एकेन मृत्पिण्डेन** घटशरावादि-

यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातँ स्यात् ; वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् (५)—

यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातँ स्यात् ; वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यम्—

एवँ सोम्य स आदेशो भवतीति । (६)

न वै नूनं भगवन्तस्त एतदवेदिषुः; यद्ध्येतदवेदिष्यन्, कथं मे

ऽभिधानेपि, तदुपपादके **वाचारम्भणं विकार** इति वाक्ये विकारशब्देनावस्थाया एव ग्रहणमुचितम् । तथा **मृत्तिकेत्येव सत्यमित्यत्र** विशेष्याकाङ्क्षायां सत्यमिति नपुंसकलिङ्गानुरोधात् अवस्थावद्द्रव्यवाचि **मृन्मय**मित्येतत् विशेष्यतयाऽनुषज्यते । ततश्च सर्वं मृन्मयं मृत्तिकेत्येव सत्यमित्यत्र अवस्थावद्द्रव्यमेव विकारवाचिना मयट्प्रत्ययेनाभिधीयत इति न कश्चिद्दोष इति द्रष्टव्यम् ।

यथा — स्यादित्यादि । लोहमणिः सुवर्णपिण्डविशेषः । शिष्टं पूर्ववत् ।

यथा — स्यादित्यादि । नखनिकृन्तनशब्देन काष्णायसपिण्डो लक्ष्यते । शिष्टं पूर्ववत् । **एवं सोम्य स आदेशो भवतीति** — मयोक्त आदेशो मृत्पिण्डादितुल्य इत्यर्थः ।

एवमुक्तः पुत्र आह – **न वै नूनं** —। **भगवन्तः** पूजावन्तो मम गुरवः एतत्स्वरूपं न ज्ञातवन्तः । **यत्** यदि एतद् वस्तुतो जानीयुः, तर्हि भक्ताय गुणवते

कार्यार्थमभिभक्तेन मृत्पिण्डेन; **सर्वं** तन्मृत्पिण्डकार्यं सर्वमिति ह्यर्थः । अतः **लोहमणिनखनिकृन्तन**पदाभ्यां पूर्वावस्थलोहकृष्णायसद्रव्यमात्रं विवक्षितम् । अतएवोपरि तथैव निर्देशः । निरवस्थद्रव्यस्थित्ययोगात् इयमेव पूर्वावस्थेत्यनियमाच्च यत्किञ्चिदवस्थानिर्देशः ।

न वै नूनमिति । प्रष्टव्यमेव हन्त ! मया प्राङ् न पृष्टम् । अस्त्विदम् । गुरुर्हि मे, 'नापृष्टः कस्यचिद् ब्रूया'दिति प्रश्नप्रतीक्षो न भवति; अत्यर्थकरुणया अपृष्टानामेवार्थानामनेकेषामतिशीघ्रमेवोपदेशात् । अतः स मन्ये नेदं विदितवान् स्यात् । अस्तु; तथापि तदज्ञानं मयोत्प्रेक्ष्यमाणं वाचा वक्तुं न साम्प्रतम् । अथवा रहसि पितृचरणसविधे मदुत्प्रेक्षायाः निवेदने न दोषः । अन्यथा ह्ययं मां पुनस्तत्र प्रेषयेत् । तदा च गुरोरज्ञानं प्रतिनिवृत्तेन मया व्यक्तमेव वक्तव्यं स्यात् । ततो वरं संप्रति तद्वितर्कविनिवेदनमिति विमृश्यैवमाह श्वेतकेतुः । गुरौ स्वस्य गौरवबुद्धिं **भगवन्त** इति बहुवचनेन व्यनक्ति । **नून**मिति वितर्कमात्रे ।

नावक्ष्य'न्निति। 'भगवाँस्त्वेव मे तद्ब्रवी'त्विति। 'तथा सोम्ये'ति होवाच॥७॥

इति षष्ठाध्याये प्रथमः खण्डः ।

६—२.

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ।

मह्यमुपदिशेयुर्हि । नोपदिष्टवन्तस्तु ते । तेनाहं मन्ये न विदितवन्त इतीत्यर्थः । एवमवाच्यमपि गुरोर्न्यङ्कं पुनर्गुरुकुलं प्रति प्रेषणभयादुक्त्वा, 'भगवानेव तद् वस्तूपदिशतु' इति पितरं प्रार्थयामासेत्यर्थः । **तथा सोम्येति होवाच** । पिताऽपि 'तत् तथैव वदानी'त्युक्तवानित्यर्थः ॥ ६—१.

प्रतिज्ञातस्यैकविज्ञानेन सर्वविज्ञानस्य समर्थनाय जगतो ब्रह्मैककारणतां प्रतिपादयितुं प्रवृत्तः, यथा लोकेऽपराह्णे प्रसारितानां घटशरावोदञ्चनादीनां[1] मृत्पिण्डैकोपादानतां प्रतिपिपादयिषुः, 'पूर्वाह्णे एतद् घटशरावादिकं मृत्पिण्ड एवाऽऽसी'दिति प्रतिपादयति, तथा प्रतिपादयति—

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । **इदं** विभक्तनामरूपं बहुत्वावस्थं जगत् **अग्रे** सृष्टेः प्राक् **एकमेव** अविभक्तनामरूपतयैकत्वावस्थापन्नमेव **अद्वितीयं** अधिष्ठात्रन्तरशून्यं सदेवाऽऽसीदित्यर्थः। अत्र **सच्छब्दो** नामसंबन्धयोग्यत्वलक्षणं सत्त्वं प्रवृत्तिनिमित्तीकृत्य परमात्मनि वर्तते । अयं च सच्छब्दो विशेष्यभूतपरमात्मवाचकोऽपि कारणविषयत्वसामर्थ्यात् कारणत्वौपयिकगुणविशिष्टप्रकृतिपुरुषकालशरीरकं परमात्मानं उपस्थापयति । 'देवाँ आज्यपाँ आवह' इत्यादौ विशेष्यवाचिन एवाऽऽज्यशब्दस्य विकृतिषु पृषदाज्यवाचित्वस्य दाशमिकन्यायसिद्धत्वात्। अत्र **सदेवे**त्येवकारेण नैयायिकाभिमतमुत्पत्तेः प्राक् जगतोऽसत्त्वं व्यावर्त्यते। सदेवेत्येवकारस्य नैयायिकाभिमतोत्पत्तिप्राक्कालीनकार्यासत्त्वव्यावर्तकत्वं 'तद्धैक आहुरसदेवेदमग्र आसीत्' इत्यसत्कार्यवादिदर्शनप्रतिक्षेपपरोत्तरवाक्यसंदर्भादवसीयते ।

1. दीनां च ख ग.

न्यङ्कमिति। न्यग्भावमिति शाङ्करे। न्यङ्को नितरामञ्जनम्। इह तु **न्यङ्कं** न्यूनता। **प्रेषणभया**दिति। प्रेषणे, गुरोश्चैतदवेदने, 'न विदन्ती'ति स्पष्टं वक्तव्यं स्यादिति भयादित्यर्थः ।

अद्वितीयमिति पदेन निषेधमुखेनैवार्थस्योक्तत्वात् न तदुपपत्तेवकारः । अस्य पदस्य, "द्वितीयगणनायोग्यो नासीदस्ति भविष्यति । समो वाऽभ्यधिको वाऽस्य" इति **श्रीभगवद्यामुनमुनि**दर्शितो वाच्यार्थः । एवं स्वतन्त्रवस्त्वन्तरनिषेधपरमिदं, 'तदैक्षते'ति वक्ष्यमाणोपयोतया अधिष्ठात्रन्तरनिषेधपरमुक्तं **भाष्यादा**वित्यन्यत्र विस्तरः ।

एकमेवेत्येवकारेण 'बहु स्याम्' इति वक्ष्यमाणा लक्ष्यमाणकार्यबहुत्वावस्था व्युदस्यते। 'तदैक्षत', 'तत्तेजोऽसृजत' इत्युत्तरवाक्यसंदर्भे सच्छब्दितस्यैव निमित्तत्वकथनात् **अद्वितीय**मित्यनेन निमित्तान्तरं निषिध्यते। ततश्च **एकं अद्वितीय**मिति पदाभ्यामभिन्ननिमित्तोपादानत्वं सिद्धं भवति।

ततश्चायमर्थः— इदं बहुत्वावस्थं विभक्तनामरूपं प्रत्यक्षतया दृश्यमानं जगत् सृष्टेः प्राक् निमित्तान्तरशून्यं अविभक्तनामरूपतया एकं सच्छब्दितं ब्रह्मैवासीदित्यर्थः (ति?)। यद्यपीदानीमपि जगत् सदेव, तथापि अविभक्तनामरूपसद्भावापत्तिः सृष्टेः प्रागेवेति **अग्र** इत्यस्य नानुपपत्तिः। न च सच्छब्दस्य सूक्ष्मप्रकृतिकालजीवशरीरकब्रह्मपरत्वेन सच्छब्दस्य कार्यभूते जगति सृष्टेः प्राक् तादृशब्रह्मत्वबोधकत्वेऽपि जगति सत्तासंबन्धबोधकत्वाभावेन असत्कार्यवादव्युदासकत्वं कथमिति वाच्यम्— सृष्टेः प्राक् सच्छब्दितब्रह्माभेदबोधने नैयायिकाभिमतासत्त्वव्युदासस्याप्यर्थसिद्धत्वात्।

एतेन 'एकमेवाद्वितीयम्' इत्येतत् प्रपञ्चमिथ्यात्वे प्रमाणयन्तः परे प्रत्युक्ताः। तस्य ब्रह्मव्यतिरिक्तमिथ्यात्वपरत्वे 'सदेव सोम्येदमग्र आसी'दिति कालप्रापकेण पूर्वेणाग्रपदेन 'तदैक्षत', 'नामरूपे व्याकरवाणि' इति ईक्षणनामरूपात्मकप्रपञ्चप्रापकेणोत्तरेण च विरोधप्रसंगात्। किञ्च 'इदं'शब्दोदितं सर्वं जगत् सृष्टेः प्राक् एकमेवाद्वितीयं सदेवासी'दिति परैर्व्याख्यातत्वेन सृष्टिप्राक्काले अद्वितीयपदेन द्वितीयासत्त्वबोधनेऽपि सृष्ट्युत्तरकालं तस्यासत्त्वाप्रतिपादनेन जगतो मिथ्यात्वासिद्धेः। घटशरावादिकं सर्वं सृष्टेः प्रागद्वितीयैकमृत्पिण्ड एवासीदित्युक्त्या घटशरावादीनां मिथ्यात्वप्रतिपादनादर्शनात्। प्रागसत्त्वप्रतिपादनेन ह्यनित्यत्वमात्रं सिद्ध्येत्; न तु मिथ्यात्वम्। न च 'नेह नानास्ति' इति वाक्यात् सृष्ट्युत्तरकालमप्यसत्त्वावेदनात् मिथ्यात्वसिद्धिरिति वाच्यम्—'न स्थानतोऽपि परस्ये'त्यधिकरणे तस्य वाक्यस्य ब्रह्मगतनानात्वनिषेधपरतया परैरेव व्याख्यातत्वात्।

नन्वनित्यत्वमेव मिथ्यात्वम्। 'अनित्यस्य धर्मिणः अनित्यत्वं असत्यत्व'मिति **वाचस्पतिमिश्रोक्तेः, विद्यारण्ययतिनाऽपि** तथैवोक्तत्वात्, 'अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणा-

तद्धैक आहुः, 'असदेवेदमग्र आसीदेकमेवाद्वितीयम्। तस्मादसतस्सज्जायत[1]। (१)

1. 'जायत इति' इति **मा.**

मादिसंभूतां तद्वस्तु नृप! तच्च किम्' इति पराशरस्मरणादप्यनित्यत्वमेव मिथ्यात्वमिति चेत्—ईदृशस्य प्रामाणिकस्य प्रत्यक्षाविरुद्धस्य प्रपञ्चमिथ्यात्वस्य अस्माभिरप्यप्रतिक्षेप्यत्वादित्यास्तां तावत्।

सदेवासीदिति सृष्टिप्राक्काले ब्रह्माभेदप्रतिपादनमुखेन सत्कार्यवादमुक्त्वा तद्विरोध्यसत्कार्यवादं नैयायिकाभिमतं **वाचारम्भण**मित्यादिना प्रतिक्षिप्तमपि कण्ठतः प्रतिक्षेप्तुं तन्मतमुपन्यस्यति—**तद्धैक आहुः एकमेवाद्वितीयम्**। इदं जगदग्रे सृष्टेः प्राक् **असदेवासीत्**। न तु सदेवासीदित्यर्थः। नामरूपविभागाभावलक्षणस्यासत्त्वस्य सिद्धान्तेऽपि सम्मतत्वादाह **एकमेवाद्वितीयम्**। प्रागभावव्यतिरेकेणावस्थाया वा अवस्थाश्रयस्य वा कस्यापि सत्त्वं नास्तीत्यर्थः। यद्वा असदेवेत्यत्र अ इत्येतत् सत्पदेनासमस्तं सत् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय'मिति वाक्यार्थप्रतिक्षेपकम्। **तस्मादसतस्सज्जायत**। **स**दिति भावप्रधानो निर्देशः।

तद्धैक आहुरिति नैयायिकखण्डनम्, न तु शाङ्करोक्तरीत्या बौद्धखण्डनमिति परं व्यक्तं **वेदार्थसंग्रहव्याख्यादौ**। अर्थवर्णनरीतिस्त्वत्रैव विशदा। **असदेवासी**दित्युक्तौ अभाव एवासीदित्यर्थः प्रतीयते। स बाधितः। न हि प्रलयकाले कार्याभावमात्रमासीदिति नैयायिकमतम्। अतः इदं कार्यजातं तदानीं **असत्** अभावप्रतियोग्येवासीत्—नैवासीदित्यर्थः। उत्तरत्र **तस्मादसत** इत्यत्र तु **असत्**पदं नाभावप्रतियोग्यर्थकम्; अभावप्रतियोगिभूतात् स्वस्मात् स्वयं जायत इत्युक्तौ विरोधात्। अतस्तत्राभावमात्रपरम्। **एकमेवाद्वितीय**मित्यस्य असच्छब्दार्थे अभावप्रतियोगिनि अनन्वयात्, 'यत् आसीत्, तदेकमेवाद्वितीय'मिति पृथग्वाक्यं कार्यम्। यद्वा **अस**दिति अभावमात्रपरमेव। एकोऽद्वितीयोऽभाव एवासीदित्येवार्थः। कोऽसावभाव इत्यत्र **इद**मिति तद्विशेषणम्। अभावे जगदभेदायोगात् इदमिति बुद्धिस्थमुच्यते। अयमेतज्जगत्प्रतियोगिकोऽभाव आसीदिति। (अस्तु वा मूले **इदमग्रे** इति, भाष्ये **इदंजगदग्रे** इति चैकं पदम्। सृष्टेः प्रागिति तदर्थः।) नैयायिकमते उपादानभूतानां परमाणूनां निमित्तभूतस्येश्वरस्य च प्रलये सत्त्वात् **एकमेवाद्वितीय**मिति कथमित्यत्र आशयमाह **प्रागभावव्यतिरेकेणे**त्यादिना। कार्यावस्थापेक्षया प्रागवस्था वा कार्यावस्थोपलक्षितं धर्मि वा तदानीं नेति पदद्वयविवक्षितम्; न त्वितरनिषेध इति भावः। अत्र शाङ्करवाक्यार्थशोधने असदित्यत्र 'अ' इति पृथक्करणमेवामिसंहितं वाच्यमिति विमृश्य, अर्थपुष्टिबलात् तार्किकखण्डनार्थमपि तमेव पक्षमाद्रियाह **यद्वे**ति।

'कुतस्तु खलु सोम्यैवं स्या'दिति होवाच 'कथमसतस्सज्जायेते'ति। सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। (२)

सत्तेत्यर्थः। यस्माद्धेतोरुत्पत्तेः प्राक् अवस्थाश्रयस्याप्यभावः, तस्माद्धेतोरसतः [1सकाशात्] सत्त्वरूपा उत्पत्तिरजायत अभवदित्यर्थः। पर्यवसन्नमिति यावत्। **जायत** इत्यत्र अडभावश्छान्दसः॥

तन्मतं प्रतिक्षिपति— **कुतस्तु खलु—सज्जायेतेति**। **कुतः** केन प्रमाणेन असत उत्पत्तिः प्रतीयेत। तदेवेदमितिप्रत्यभिज्ञाविरोधेन प्रमाणस्यानवतारादिति भावः। अतः कथमसतो द्रव्यस्य सत्ता भवेत्। अतः असतस्सत्त्वम् उत्पत्तिर्न भवति, अपि तु सत एव द्रव्यस्य प्रथमक्षणावच्छिन्नावस्थान्तरसम्बन्ध एवोत्पत्तिरित्यर्थः। एवं परपक्षं प्रतिक्षिप्य स्वमतमुपसंहरति **सत्त्वेव—एकमेवाद्वितीयम्**।

नन्विदंशब्देन जगन्मात्रपरामर्शे तस्य सच्छब्दितब्रह्मभिन्नत्वेन 'सदेवेदमग्र आसी'दिति ब्रह्माभेदानुपपत्तिः। **नापीदं**शब्देन इदंशब्दितजगच्छरीरकब्रह्मप्रति-

1. सकाशादिति न ग. कोशादौ।

अत्र पक्षे **अद्वितीय**मित्येतदनन्तरं इतिशब्दोऽध्याहार्यः। तथाचैतावदुक्तं भवति—इदं सद्रूपेण नासीत्, कार्यकारणयोर्भेदात्; नाप्येकमासीत्, भूतचतुष्टयपरमाणूनामनन्तानां स्थितत्वात्; नाप्यद्वितीयमासीत्, ईश्वरादेः निमित्तस्यान्यस्य स्थितेरिति। यः खल्वसत्कार्यवादः तैत्तिरीये आनन्दवल्ल्यामुक्तः, न तस्यात्र निरासः। अत **एक** इति पदं न शाखान्तराध्यायिपरम्। अत्रापि प्राक् तादृशासत्कार्यवादस्य (३–१९) उपक्षिप्तत्वादविशेषात्। अतः सूक्ष्मावस्थप्रकृतद्रव्यानभ्युपगन्तृमतनिरासपरमेवेदमिति।

अत्रेदं बोध्यम्— सत्कार्यवाद इत्यस्य सत्=पूर्वकालावच्छेदेन स्थितमेव उत्तरकालावच्छेदेन कार्यं भवतीति वाद इत्यर्थः। सदित्यत्र वर्तमानत्वमविवक्षितम्। असत्कार्यवादश्च पूर्वकालावृत्तिद्रव्योत्पत्तिवादः। असतः सज्जायत इत्यस्य पूर्वकाले अस्थितात् कार्योत्पत्तिरिति नार्थः। पूर्वकालेऽसतः कारणत्वायोगात्। उत्तरकालेऽसतः कार्यं भवतीत्यपि न। तन्तुकपालादेरुत्तरकालेऽवश्यमेव सत्त्वात्। अतोऽभावात् कार्यं जायत इत्यर्थः। तत्र **तस्मादसत** इत्यस्य तादृशात्=अवस्थातदाश्रयधर्मिविकलादभावादित्यर्थसंभवेऽपि **कथमसत** इत्यत्रेवात्रापि **असत** इत्येतेनैव विवक्षितार्थसिद्धया, **असत** इति षष्ठ्यन्तमित्याशयेन च **तस्मा**दित्यस्य हेतुपरत्वमाह **तस्माद्धेतो**रिति। **यस्माद्धेतो**रित्यादिना पूर्ववाक्यस्यार्थो हेतुरिति दर्शितम्। **सज्जायत** इत्यस्य स्वयं पूर्वकालावच्छेदेन स्थितमेव पश्चात् जायत इत्यर्थस्वीकारे सत्कार्यवादस्वीकारापत्तिः। **सत्** वर्तमानं उत्पत्तिकालावच्छेदेन विद्यमानं जायत इत्यर्थे सत्पदवैयर्थ्यम्। उत्पद्यमानस्योत्पत्तिकालावच्छेदेन स्थितेः सर्वसंमतत्वात्। असतः इत्यस्य अभावादितिवत्

पादनं संभवति, अश्रुतवेदान्तं प्रति इदमादिशब्दानां ब्रह्मपर्यन्तप्रत्यायकत्वासंभवादिति चेत्, अस्याः शङ्कायाः परिहारो **मुण्डकप्रकाशिकायामेव** प्रपञ्चितः। अत्रापि च स्वावसरे (६-८.) करिष्यामः। तत्रैवानुसन्धातव्यः॥

सदित्यस्य भाव इत्यर्थे अभावाद् भावपदार्थो जायत इत्यर्थः सिध्यति। तदापि **सत्पदवैयर्थ्यमेव**। अतः सदिति भावप्रधानं कृत्वा **सत्** सत्ता भवनम् उत्पत्तिरित्यर्थम्, जायत इत्यस्य च उत्पत्तिरुत्पद्यत इत्यर्थायोगात् **तस्मादिति** हेत्वन्वयानुकूलं 'पर्यवसन्नम्' इत्यर्थञ्च स्वीकृत्य व्याख्यातम्। **असतः सकाशादिति** क्वाचित्कपाठे, मूले असत इति पञ्चमी। यदि तु, '**कथमसतः सज्जायत** इत्येतत्समानार्थकत्वमत्रावश्यकम्, तदा असतो द्रव्यस्य सत्ता वा उत्पत्तिर्वा कथं भवतीति **तत्र व्याख्यानात्** अत्रापि सकाशादितिपदरहितपाठात् सैव रीतिरस्तु। यदि तु 'उभयत्र **असतः** अभावात् **सत्** भावपदार्थभूतं द्रव्यमित्यनुगतोऽर्थोऽस्तु। **जायत** इत्यस्य चोत्पत्तिरर्थः' इत्यालोच्यते, तदापि न तात्पर्यभेदः। अयमत्र **कथमसत**इति वाक्यस्य भावः। अभावस्य कारणत्वं वदता न तस्योपादानत्वमुच्यते, परमाणूनामेवोपादानतया अस्यापसिद्धान्तत्वात्, असत्सतोर्मिथो वैजात्यादुपादानोपादेयभावायोगाच्च। नापि निमित्तकारणत्वम्—उत्पत्तिशब्दस्य आद्यक्षणावच्छिन्नोत्तरावस्थार्थकत्वात् पूर्वावस्थाश्रयद्रव्यस्य पूर्वमभावे तदयोगात् तस्य द्रव्यस्य कारणत्वेनैव कार्यनिर्वाहे तदतिरिक्तस्याभावस्याकारणत्वात्; अनङ्गीकार्यत्वाच्च। उत्पत्तेस्तादृशावस्थारूपत्वादिकञ्च तन्तुः पटो जात इत्यादिव्यवहारसिद्धमित्यलम्।

इदमपि बोध्यम्—वाचारम्भणादिवाक्यैः तार्किकमतनिरासः कृत इति शाङ्करादिसंमतमेव। ततस्तदुपेक्ष्य तत्त्वबुभुत्सया प्रार्थने कृते **सदेवे**त्यारब्धम्। तत्र पुनस्तार्किकनिरासस्य का आवश्यकता। अतो बौद्ध एव निरस्यताम्। तन्मते इदमेकमेवाद्वितीयमित्यस्य असति कथमन्वय इति चेत्—चोद्यमिदं तार्किकमतेऽपि तुल्यम्। क्लिष्टगतिस्तु सर्वत्र भवति। वस्तुत एवं सुवचम्—अभावमात्राद् भावोत्पत्तिवादेवात्र निरस्यते। स हि, बीजात् किलाङ्कुरोत्पत्तिः; कथमभावादित्याशङ्कायाम्, बीजोपमर्दे जाते अङ्कुरप्रादुर्भावात् अभाव एव कारणमित्याहेत्युक्तं **न्यायदर्शने**, 'अभावाद् भावोत्पत्तिर्न, नानुपमृद्य प्रादुर्भावात्' (४-१-१४). इति। **न्यायभाष्ये** च' 'असतः सदुत्पद्यत' इति असदादिपदप्रयोगः कृतः। तथाच एकमेवाद्वितीयमित्यस्यायमर्थः—सृष्टिमध्ये हि बीजादेः सद्भावः। प्रलये तु उपमर्द्यबीजादितुल्यमपि नास्ति, तदाद्यापकपुरुषतुल्योपि च नास्तीति शुद्धोऽभाव उपादानम्। अत एवासदेवेदमिति सामानाधिकरण्यमप्युपपन्नम्। इदमाक्षिप्यते **कथमसत**इति। सदसतोः साजात्याभावात् उत्पत्त्यादेरवस्थारूपत्वादितश्च पूर्वं सत् धर्मि अवश्यमस्तीति। एवमेतदपि सुवचम्। तार्किकः प्रागेव निरस्तः। अथापि **सदेवेति** उपन्यासानन्तरम्, 'असदेवेति' श्रुत्यन्तरमस्ति खलु' इति श्वेतकेतुशङ्कायाम् तदनुवादपूर्वकम्, नेदं तार्किकादिमतपरम्, तन्मतरीतेरनुपपन्नत्वादित्याहेति। तथा च **एके शाखिन** इत्येवार्थ इति।

अथापि आरम्भणाधिकरणे असद्व्यपदेशादिति तार्किकेण पूर्वपक्षकरणात् तद्दृष्ट्या **पूर्वपक्षार्थो** वर्णित इति।

तदैक्षत, बहु स्यां प्रजायेयेति । तत् तेजोऽसृजत । तत्तेज ऐक्षत, बहु स्यां प्रजायेयेति । तदपोऽसृजत । तस्माद् यत्र क्वचन शोचति स्वेदते वा पुरुषः, तेजस एव तदध्यापो जायन्ते । (३)

ता आप ऐक्षन्त । बह्व्यः स्याम प्रजायेमहीति । ता अन्नमसृ-

तदैक्षत—असृजत । तत् एतत्सच्छब्दवाच्यं परं ब्रह्म विचित्रानन्तचिदचिन्मिश्रव्यष्टिजगद्रूपेणाहमेव बहु स्याम्; तदर्थं तेजोबन्नादिसमष्टिरूपेण प्रकर्षेण जायेयेति सङ्कल्प्य तेजः ससर्जेत्यर्थः । **तत्तेज—असृजत** । अत्राचेतनस्य तेजआदेरीक्षितृत्वासंभवात् **तेज**आदिशब्दाः तच्छरीरकपरमात्मपरा द्रष्टव्याः । **भगवता भाष्यकृता,** 'गौणश्चेन्नात्मशब्दात्' इति सूत्रे "तेजःप्रभृतयोऽपि शब्दाः परमात्मन एव वाचकाः । 'तत्तेज ऐक्षत, ता आप ऐक्षन्त' इति मुख्य एवेक्षणव्यपदेशः"इति भाषितम् । तथा, 'तदभिध्यानादेव तु तल्लिङ्गात् सः'इति सूत्रे "तत्तेज ऐक्षत, ता आप ऐक्षन्त' इति श्रूयमाणमीक्षणं तच्छरीरकस्य परस्यैव ब्रह्मण उपपद्यत" इति भाषितम् । संज्ञामूर्तिक्लृप्त्यधिकरणे, "तत्तेज ऐक्षत इति तेजश्शरीरकं परं ब्रह्मैवाभिधीयत" इति च भाषितम् । ननु तत्तेज ऐक्षतेत्यत्र तेजश्शब्दस्य तेजश्शरीरकब्रह्मपरत्वे, 'ततेजोऽसृजत' इति वाक्येऽपि तेजश्शब्दस्य ब्रह्मपरत्वं स्यात् । न चेष्टापत्तिः । ब्रह्मणः सृज्यत्वाभावादिति चेन्न—तेजश्शरीरकब्रह्मणः कार्यत्वेन सृज्यत्वे दोषाभावात् । तेजसो जलहेतुत्वे उपपत्तिं दर्शयति **तस्माद्यत्र—जायन्ते** । यत्र क्वचन देशे काले च पुरुषः **शोचति** संतप्यते, **स्वेदते** प्रस्विद्यते वा । **तत्** तदा तेजस एवापोऽधिजायन्त इत्यर्थः ।

ता आपः — असृजन्त । अत्रान्नशब्देन महाभूताधिकारात् पृथिवी उच्यते । सूत्रितञ्च 'पृथिवी', 'अधिकाररूपशब्दान्तरेभ्यः' इति । **अधिकारः** महाभूताधिकारः । **रूपम्** 'यत्कृष्णं तदन्नस्ये'ति । तैत्तिरीयके—'अद्भ्यः पृथिवी'

बह्व्यःमिति, **प्रजायेयेति** च—पौनरुक्त्यपरिहारार्थम्, 'नामरूपे व्याकरवाणि, त्रिवृतं त्रिवृतमेकैकां करवाणी'त्यत्रेव मध्ये तदर्थमित्यध्याहारेण व्यष्टि समष्टिपरम् । व्यष्टेः समष्टिपश्चाद्भावेऽपि फलेच्छापूर्विका उपायेच्छेति न्यायेन व्यष्टिसंकल्पात् समष्टिसंकल्पस्य पश्चाद्भावात् **प्रजायेयेति** समष्टिसंकल्पः पश्चादुक्तः । **अद्भ्य एवेति** । पूर्ववाक्ये वर्षान्नयोरन्वयमात्रं

जन्त । तस्माद् यत्र क्वचन वर्षति, तदेव भूयिष्ठमन्नं भवति । अद्भ्य एव तदध्यन्नाद्य जायते । (४)

इति षष्ठाध्याये द्वितीयः खण्डः ।

इति शब्दान्तरम् । एतच्च सूत्रमन्यत्र व्याकृतम् । अपामन्नहेतुत्वे युक्तिमाह- —**तस्मा-द्यत्र—भवति । तदेव** तत्रैवेत्यर्थः । **अद्भ्य एव तदध्यन्नाद्यं जायते । तत्** तस्मात् पृथिव्येकदेशभूतव्रीहियवादिलक्षणस्यान्नस्य वृष्टिप्रभवत्वदर्शनादेव हेतोः **अन्नाद्यं** अन्नप्रभृति पृथिवीत्वावच्छिन्नमपि अद्भ्य एवाधि[1]जायत इत्यर्थः ।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणं लिख्यते—

द्वितीयाध्याये—छान्दोग्ये, 'तत्तेजोऽसृजते' ति तेजस एव प्रथमतः सृष्ट्य-भिधानात्, आकाशोत्पत्तेरश्रुतेः आकाशो नोत्पद्यत इति "न वियदश्रुतेः" इति सूत्रेण पूर्वपक्षे प्राप्ते, उच्यते—"अस्ति तु" । आकाशस्याप्युत्पत्तिरस्त्येव; तैत्तिरी-यके, 'आत्मन आकाशस्संभूतः' इत्युत्पत्तेः श्रवणात् ।

पुनश्चोदयति— "गौण्यसंभवाच्छब्दाच्च" । 'आत्मन आकाशः संभूतः' इति उत्पत्तिश्रुतिर्गौणी, निरवयवाकाशोत्पत्तेः छान्दोग्ये चाश्रुतायाः प्रतिपादनासंभ-वात्, 'वायुश्चान्तरिक्षञ्चैतदमृतमुभय' मिति आकाशस्यामृतत्वश्रवणाच्चेत्यर्थः । ननु "आत्मन आकाशस्संभूत" इत्यत्राकाशे संभूतशब्दस्य गौणत्वे 'आकाशाद् वायुः, वायोरग्निः' इत्यादौ श्रुतस्य संभूतत्वस्यापि गौणत्वं स्यादिति; तत्राह— "स्याच्चैकस्य ब्रह्मशब्दवत्" । एकस्यैव संभूतशब्दस्याकाशे गौणत्वम्, 'वायोरग्निः' इत्यादावनुषक्तस्य संभूतशब्दस्य मुख्यत्वञ्च संभवति, यथा मुण्डके ।—'तस्मादेतद् ब्रह्म नामरूपमन्नञ्च जायत' इति प्रधाने गौणतया प्रयुक्तस्य ब्रह्मशब्दस्य तस्मिन्नेव प्रकरणे 'तपसा चीयते ब्रह्मे' ति ब्रह्मणि मुख्यतया प्रयोगदर्शनात् ।

1. अभि. ग.

दर्शितम् । अत्र तदधीनः अबन्नयोः कार्यकारणभाव उच्यते । **अन्नाद्यमित्यत्र** अन्नं च तत् आद्यञ्चेति प्रसिद्धविग्रहेऽपि अन्नप्रभृतीति तात्पर्यार्थोऽक्षतः । **इदञ्च** वाक्यमुपपादनवाक्या-न्तर्भूतम्; न तु उपपाद्यार्थनिगमनमत्रेति ।

६—३.

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं[1] जीवज-

1. अण्डजं मा.

परिहरति, " प्रतिज्ञाऽहानिरव्यतिरेकात् " । आकाशस्यापि ब्रह्मोपादेयतया ब्रह्माव्यतिरेके सत्येव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अहानिर्भवति । ब्रह्माकार्यस्यापि वस्तुनः सत्त्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं हीयेतेत्यर्थः । " शब्देभ्यः " । ' सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ', ' ऐतदात्म्यमिदं सर्वम् ' इत्यादिशब्दैः सर्वस्यापि वस्तुनो ब्रह्मकार्यत्वब्रह्मात्मकत्वप्रतिपादनपरैश्चायमर्थो विधीयते ।

" यावद्विकारं तु विभागो लोकवत् " । तुशब्दश्चार्थे । छान्दोग्ये ' ऐतदात्म्यमिदं सर्वम् ' इत्यादिभिराकाशादेः सर्वस्यापि विकारत्वप्रतिपादनादेव विभागशब्दिता उत्पत्तिरप्युक्तैव । यथा लोके, एते सर्वे देवदत्तपुत्रा इत्यभिधाय तेषु केषाञ्चिदुत्पत्तिप्रतिपादनेऽपि सर्वेषामप्युत्पत्तिः प्रतिपादितैव भवति, तद्वत् । ' वायुश्चान्तरिक्षञ्चैतदमृतम् ' इति तु देवानामिव चिरकालस्थायित्वाभिप्रायम् ।

" एतेन मातरिश्वा व्याख्यातः " । आकाशोत्पत्तिप्रतिपादनेनैव वायोरप्युत्पत्तिः प्रतिपादितैवेत्यर्थः । " असम्भवस्तु सतोऽनुपपत्तेः " । तुशब्दोऽवधारणार्थः । **असम्भवः** अनुत्पत्तिः **सतः** ब्रह्मण एव । तद्व्यतिरिक्तस्य कृत्स्नस्याव्यक्तमहदहङ्कार-तन्मात्रेन्द्रियवियत्पवनादिकस्य प्रपञ्चस्य एकविज्ञानेन सर्वविज्ञानादिभिरवगतकार्य-भावस्यानुत्पत्तिर्नोपपद्यत इत्यर्थ इति स्थितम् । प्रकृतमनुसरामः ॥ ६—२.

सर्वस्येतरस्य तेजोबन्नात्मकबीजत्रयप्रसूतत्वं दर्शयति— **तेषां—उद्भिज्ज-मिति** । **आण्डजं** अण्डजं पक्षिसर्पादि । स्वार्थे अण् । **जीवजं** गर्भवेष्टनलक्षण-

---

अव्यक्तमहदिति । एवंसति तेजआदित्रयमात्रकण्ठोक्तिः तेषामेव प्रत्यक्षत्वात् तत्रैव त्रिवृत्करणस्य प्रदर्शनसंभवादिति ध्येयम् ।

कार्याभिन्नकारणसंभवं प्रथमखण्डे प्रदर्श्य द्वितीयखण्डे प्रजायेयेति समष्टिरुक्ता । अथ तृतीये बहुस्यामिति व्यष्टिरुच्यते । **तेजोबन्नात्मके**ति । अत्र त्रीणीत्यस्य तेजोबन्नानीत्यर्थ इति न मन्तव्यम् । अत्र हि बीजानीत्युक्तानां कारणानां आण्डजमित्यादिना कार्यमुखेन प्रदर्शन-मिति श्रुतप्रकाशिका । अतो बीजानीत्यनेन आण्डजजीवोद्भित्पदविवक्षितानि प्रकृतिद्रव्याणि रेतः प्रभृतीनि गृह्यन्ते, न तु तेजोबन्नानि । अत एव नचेत्यादिशङ्कासमाधानभाष्यमुपरितनं युज्यते । तेजोबन्नानां बीजपदविवक्षितत्वे स्वेदजरूपशरीरान्तरसद्भावेऽपि तस्यापि तेजोबन्नकार्यतया

मुद्भिज्जमिति। (१)

सेयं देवतैक्षत, 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति (२); तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'ति।

जरायुजं पुरुषपश्वादि। **उद्भिज्जम्**। उद्भिनत्तीत्युद्भित् स्थावरम्। ततो जातमुद्भिज्जम्। [[1]उद्भित् जायत इति वा उद्भिज्जम्।] न च स्वेदजानामत्र सङ्कीर्तनाभावात् कथं त्रीण्येव बीजानीत्यवधारणमिति शङ्क्यम्, उद्भिज्जशब्देन स्वेदजस्यापि संग्रहोपपत्तेः। सूत्रितञ्च "तृतीयशब्दावरोधः संशोकजस्ये"ति। **संशोकजस्य** स्वेदजस्य, 'आण्डजं जीवजमुद्भिज्जम्' इत्यत्र तृतीयेनोद्भिज्जशब्देनावरोधः सङ्ग्रह इत्यर्थः। [[2]**उद्भित्** स्वेदः; तज्जत्वात्, व्यासार्योक्तरीत्या पृथिव्यूष्मजत्वायोनिजत्वपापोत्तरत्वसाम्याच्च द्रष्टव्यम्।] इदञ्च सूत्रमन्यत्र व्याख्यातम्। अण्डजादिशब्दनिर्दिष्टानामेषां भूतानां तेजोबन्नानि त्रीण्येव बीजानीत्यर्थः। [तदेवं परस्मात् ब्रह्मणोऽनन्यत्वं जगतोऽभ्युपगन्तव्यमिति स्थितम्[3]।] तदेवोपपादयति—

1, 2. कुण्डलितं क. कोशे। 3. कुण्डलितं न क. कोशे।

एवकारदर्शितावधारणानुपपत्तिविरहात्। एवंसत्येव श्रीभाष्यादौकरस्यमपि। अतः, 'सद्विद्याविजयोक्तरीत्या तेजोबन्नान्येव बीजपदार्थः' इति न मन्तव्यम्। एवञ्चोपक्रमे **तेजोबन्नात्मके**ति, उपसंहारे **तेजोबन्नानी**ति च कथनमेकैकबीजस्यापि तेजोबन्नरूपत्वस्य वस्तुगत्या सद्भावात्। **तेन** च — तेजोबन्नानि उक्तानि; अथ तद्रूपैकैकबीजजानि भूतानि उच्यन्त इति पूर्वखण्डेन संगतिरस्य प्रदर्शिता भवति। न चात्र बीजानि **भूतानां** तेजोबन्नानां भवन्ति—तत्परिणामभूतानीति, यद्वा तत्परिणामभूतबीजानि त्रीण्येव भवन्तीत्यर्थवर्णनं संगतमिति वाच्यम्; भूतशब्दस्य महाभूतापेक्षया अचिच्छरीरकचिद्रूपव्यष्टिचेतन एव श्रुतिप्रसिद्धयतिशयात्, 'यतो वा इमानि भूतानि,' 'असकृदावर्तीनि भूतानी'त्येवम्। 'भूतानां प्राणिनः श्रेष्ठाः' इत्यादिश्च स्मृतिः। अत एवोपरितनवाक्ये इमानि त्रीणि भूतानीत्यनुक्त्वा इमास्तिस्रो देवता इत्युक्तम्। अत एव **श्रीभाष्येऽ**प्यत्र, "उद्भिज्जस्वेदजयोर्भूतयो"रिति भूतपदप्रयोगः। **तेषा**मिति पृथक्कृत्य बीजानीत्यत्र संगम्यताम्, तेजोबन्नात्मकबीजलाभादिति चेत्—अस्तु। वस्तुतः तेषां भूतानामित्येव स्वरसोऽन्वयः। भूतानामचिदंशे तेजोबन्नरूपत्वात् तथोक्तिः। कार्यकारणैक्याच्च कार्याणां भूतानां तेजोबन्नरूपत्वोक्तौ बीजानां तेजोबन्नात्मकत्वसिद्धिः। तदेवोपपाद्यते उपरि **सेयं देवते**त्यादिना।

आण्डपदस्य अण्डान्तर्गतकारणद्रव्येत्यर्थवर्णनसंभवेऽपि स्वार्थे अणाश्रयणं अण्डरूपार्थे आण्डशब्दश्रौतप्रसिद्धिमवलम्ब्य। **त्रीण्येवेत्येव**कारः यथा प्रकृतिद्रव्याणि त्रीणि, तथा बीजान्यपि त्रीणीति ज्ञापनार्थोऽपि। अत्र संदर्भे सदित्यादिविशेषणत्रिकप्रभृति अनेकत्रिकोक्तिः द्रष्टव्या।

सेयं देवतैक्षत — व्याकरवाणीति । अत्र संज्ञामूर्तिक्लृप्त्यधिकरणे **भगवता भाष्यकृता,** "सेयं देवतेत्यादिवाक्यस्यायमर्थः—, सेयं सच्छब्दितां पर(परा?)देवता इमाः तेजोबन्नरूपाः त्रिस्रो देवताः **अनेन जीवेन** जीवसमष्टिविशिष्टेनात्मनाऽनुप्रविश्य नामरूपे **व्याकरवाणि** देवादिविचित्रसृष्टिं तन्नामधेयानि च करवाणि,—"इति भाषितम्। 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्या' मिति सूत्रे, "हन्ताहमिमास्तिस्रो देवता इति तेजोबन्नानि देवताशब्देन विशेष्यन्त" इति भाषितत्वादत्र **देवता** इत्यभिमानिदेवतापरत्वं [1]वक्तव्यम्। ततश्च इमास्तिस्रो देवता इत्यस्यायमर्थः— स्वस्वाभिमानिदेवताधिष्ठितानि तेजोबन्नानीति। तेजोबन्नाभिमानिदेवतानां परमात्मव्यतिरिक्तत्वे प्रमाणाभावात् परमात्मनश्च सर्वाभिमानिदेवतात्वसंभवाच्च परमात्मरूपदेवताधिष्ठिता इत्यर्थः। परमात्मव्यतिरिक्तदेवताभ्युपगमेऽपि देवताशब्दस्य तदधिष्ठितत्वमेवार्थः। न च 'तत्तेजोसृजत, तत्तेज ऐक्षते' त्यादौ तेजआदिशब्दानां परमात्मपरत्वात् तेजोबन्नावस्थापन्नपरमात्मनां तत्तदुपहितत्वा[2]वस्थाधीनबहुत्वाश्रयाणामेव, 'इमास्तिस्रो देवता' इति देवताशब्देन परामर्शोऽस्तु; न तु देवताशब्दस्य तदधिष्ठितपरामर्शित्वमिति वाच्यम्। तत्तदवस्थपरमात्मसु जीवस्य प्रवेशासंभवेन प्रवेशयोग्यतेजोबन्नानामेव अभेदोपचारेण लक्षणया वा देवताशब्देन निर्देष्टव्यत्वात्। महासिद्धान्ते, "तदैक्षतेति सर्वज्ञत्वम्, 'असृजते'ति निमित्तत्वम्, 'बहु स्या'मित्युपादानत्वम्, तदुभयानुगुणं सर्वशक्तित्वं सत्यसङ्कल्पत्वञ्च, 'अनेन जीवेनात्मनाऽनुप्रविश्ये'ति सर्वान्तरत्वञ्चोक्तं भवति। **जीवेनात्मने**ति जीवशरीरकेण मयेत्यर्थः। 'सिंहेन भूत्वा बहवो मयात्ताः, व्याघ्रेण भूत्वा बहवो मयात्ता' इतिवत्। सार्वज्ञ्यादिगुणकस्य तद्विपरीताकारजीवैक्यासंभवात्, 'यस्यात्मा शरीर'मित्यादिवचनात्, 'तदनुप्रविश्ये'त्यचेतन इव जीवेऽप्यनुप्रवेशश्रवणाच्च, शरीरवाचिशब्दस्य शरीरिपर्यन्तत्वमुख्यताया उपपन्नत्वाच्च अयमेवार्थः" इति **व्यासार्यैरुक्तम्**।

4. अवगन्तव्यम्। 5. त्वाद्यवस्था **ख.** त्वायवस्था **घ. ग. ख.** द्रष्टव्यम् **ग.**

प्रमाणाभावादिति। परमात्मव्यतिरिक्तदेवताकर्तृकाभिमानस्य व्यष्टिरूपतत्सृष्ट्यनन्तरभावितया पूर्वं तादृशदेवताविरहादिति भावः।

मयात्ता इतिवदिति। यथा सिंहपदेन सिंहशरीरमात्राविवक्षया **मये**त्यत्र सिंहभावान्वयाय सिंहशरीरकात्मपर्यन्तग्रहणम्, तथा **जीव**पदेन जीवविशिष्टात्मग्रहणमिति भावः। न तु तृतीयोपपत्त्यर्थमयं दृष्टान्तः; कर्मणिप्रयोगगततृतीयायाः कर्तरिप्रयोगे तत्साधकत्वायोगात्।

ननु जीवशरीरकेण मया प्रविश्य व्याकरवाणीत्यर्थो न संभवति। व्याकरवाणीति तिङा कर्तुरभिहितत्वेन अनभिहिताधिकारविहिततृतीयानुपपत्तेः। न च व्याकरणक्रियाकर्तुस्तिङाऽभिहितत्वेपि प्रवेशक्रियाकर्तुरनभिहितत्वात् तृतीया भविष्यतीति वाच्यम्। तर्हि मया भुक्त्वा व्रजामीत्यपि प्रयोगः साधुः स्यात्। व्रजिक्रियाकर्तुरभिधानेऽपि भुजिक्रियाकर्तुरनभिहितत्वात्। 'स्वादुमि णमुल्' इति सूत्रे कैयटेन, 'क्त्वाप्रत्ययस्य भावार्थत्वात्, पक्त्वौदनं भुङ्क्ते देवदत्तः, पक्त्वौदनो भुज्यते देवदत्तेनेत्यत्र च क्त्वाप्रत्ययेन पचिक्रियाकर्तृकर्मगोरनभिधानात् तृतीयाद्वितीये कुतो न प्राप्नुतः' इत्याशङ्क्य, 'आख्यातपदवाच्या क्रिया विशेष्यत्वात् प्रधानम्। इतरा तु विशेषणत्वादप्रधानम्। तत्क्रियासाधनयो(न्यो?)रपि शक्त्योस्तद्द्वारको गुणप्रधानभावः। तत्र प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहितवत् प्रकाशते, प्रधानानुरोधात् गुणानाम्, पृथक् तद्विरुद्धस्वकार्यारम्भायोगाच्च' इत्युक्तत्वादिति चेत्—

सत्यम्। मयेत्यस्य स्वरूपेणेत्यर्थः। आत्मशब्दः स्वरूपपरः।

अत्ता इति न पदच्छेदः। जग्धा इति हि अदधातौ रूपम्। अतः आत्ता इतिच्छेदः। आदानं अदनार्थमिति तत् अर्थसिद्धम्।

कर्तुरनभिहितत्वादिति। क्त्वाप्रत्ययस्य भावमात्रार्थकत्वात्। 'समानकर्तृकयो' रित्यस्य वस्तुस्थितिकथनरूपत्वात्; संबन्धपरत्वाद्वेति भावः।

सत्यमित्यर्थाङ्गीकारे। अयं भावः — क्त्वाप्रत्ययेन कर्तुरनभिधानं, 'मया भुक्त्वा व्रजामि,' 'गोपालेन मया गोकुले विहृत्य कृष्णोऽहं संप्रति द्वारकामधितिष्ठामि' इत्यादिप्रयोगापत्तिः। प्रधानक्रियायाऽभिहितं कारकं गुणक्रियायामभिहितवद् भवतीति कैयटरक्षे, 'ओदनं भुक्त्वा शास्त्रं पठ्यते,' 'श्रुत्वाऽप्यर्थं नानुमतस्तेन सोऽर्थः कुबुद्धिना' इति प्रयोगानापत्तिः। कर्मणोऽभिहितवद्भावेन ओदनमिति, अर्थमिति च द्वितीयाया अयोगात्। अतो यत्कारकवाचिपदं यत्क्रियान्वयितया विवक्षितम्, तत्क्रियाकारकस्य तत्रानभिधाने अनभिहितकारकविभक्तिर्भवत्येवेति ओदनमिति अर्थमिति च द्वितीयोपपत्तिः। क्त्वाप्रत्ययस्य कर्त्रर्थकत्वे, मया पक्त्वा मया भुज्यत इत्यत्र अहं पक्त्वा मया भुज्यत इति स्यात्। तदर्थकत्वाभावे, मया भुक्त्वा व्रजामीति प्रयोगानुपपत्तिस्तु— 'कर्तरि प्रयोगे परं क्त्वाप्रत्ययस्य कर्तरि निरूढलक्षणा' इति वा, 'प्रधानक्रियाभिहितकर्तृशक्तिः परं गुणक्रियायामभिहितवद्भवति' इति वा स्वीकृत्य वारणीया। व्यक्तमिदं खण्डदेवग्रन्थेषु।

एवं क्त्वाप्रत्ययेन कर्तुः कर्तरिप्रयोगे अभिहितत्वादेव, 'तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्

यद्यपि जीवशरीरकं स्वरूपं व्याकरणकर्तुर्न भिद्यते—तथाऽपि 'व्यपदेशिवदेकस्मिन् बुद्ध्या नानात्व[1]कल्पना' इति न्यायेन कल्पितभेदमादाय अनभिहिताधिकारविहित-तृतीयोपपत्तेः। घटः स्वेन रूपेणेतरव्यावृत्तिं करोतीत्यादिप्रयोगदर्शनात्, करोतीति तिङा कर्तुरभिहितत्वात्।

ननु तत्र करणार्थे तृतीया, करणञ्च[2] न तिङाऽभिहितमिति चेत्, तार्हि प्रकृतेऽपि तथाऽस्तु।

"तेनेशस्तद्विशिष्टस्वकरणकतयाऽनुप्रवेशेऽपि कर्ता"

इत्यधिकरणसारावल्युक्तश्चायमर्थः।

1. नानार्थ ग. 2. करणत्वञ्च क.

त्रिवृदेकैकाऽभवत्' इति उपसर्जनक्रियान्वयि देवतापदं प्रथमान्तम्। न हीदं देवतापदं प्रधान-क्रियान्वयि; बहुवचनान्तस्य एकवचनान्तक्रियान्वययोगात्। अत एव च श्रीमति रामायणे,

"सफेना सस्वना भूत्वा सागरस्य समुत्थिताम्।
प्रशान्तमारुतोद्धूतां जलोर्मिमिव निःस्वनाम्॥" (२-११४)

इति द्वितीयान्तजलोर्मिविशेषणमपि सफेनादिकम्, भूत्वेत्यत्रान्वयानुसारात् तत्र कर्तुरभिहित-त्वात् प्रथमान्तमेव प्रयुक्तम्। एवञ्च, 'मया भुक्त्वा अहं व्रजामि' इत्याद्यप्रयोग उपपन्न इति।

एवं सति अनेन जीवेनात्मनेति कथं तृतीया? कथञ्च, 'आत्मना मया' इति तदर्थभाषणमित्यत्राह मयेत्यस्येति। 'नायमात्मशब्दो जीवात्मपर' इति प्रतिबोधनाय मये-त्युक्तम्; स्वेनेत्येव तु तदर्थ इति भावः। ननु मयेतिवत् स्वेनेत्यप्ययुक्तमेव, उभयोरपि कर्तृ-परत्वादिति शङ्कते यद्यपीति। अस्ति मयेत्यस्मात् स्वेनेत्यस्य विशेष इति प्रयोगदर्शनादर्शनाभ्यां स्वीकार्यम्। स्वशब्दात्मशब्दौ हि तृतीयान्तौ प्रयुज्येते, 'आत्मानमात्मना वेत्सि', 'चैत्रः स्वयं पचती'ति—इत्यभिप्रेत्य परिहरति तथापीति। सत्यमस्ति प्रयोगः। कथं तदुपपत्तिरित्यत्राह व्यपदेशिवदिति। यादृशाकारविशिष्टस्य कर्तृत्वं तृतीयान्तेन विवक्षितम्। तादृशाकारविशिष्टस्य तत् क्त्वाप्रत्ययादिना नाभिहितमिति तृतीयोपपत्तिरिति भावः। नन्वेवं भेदविवक्षया स्वशब्दात्म-शब्दव्यतिरिक्तास्मदादिशब्दस्यापि तृतीयान्तस्य प्रयोगापत्तिः। तथाच 'गोपालेन मया विहृत्याहं द्वारकामधितिष्ठामी'त्यादि स्यादिति चेत्—तर्हि अत्र भवदभिमतो निर्वाहः कः। करणे तृतीयेति स्यादिति चेत्—तर्हि तथैव करणत्वविवक्षया गोपालेनेति किं न स्यात्? अप्रयोगात् तत्र तदविवक्षेति चेत्—कर्तरितृतीयास्वीकारेऽपि समः समाधिरिति; कर्तरिप्रयोगे समानकर्तृ-कत्वस्य क्त्वाप्रत्ययेनाभिधानमित्येतत् स्वशब्दात्मशब्दप्रयोगे परं नेति नियमसंकोचेनापि कर्त-रितृतीयोपपत्तिर्भवितुमर्हतीति च भावः।

नन्वित्यादेरयं भावः—नियमसंकोचो नावश्यकः; 'आत्मानमात्मना वेत्सी' त्यादौ क्त्वाप्रत्ययरहितस्थलेऽपि कर्तुरभिधानेऽपि तृतीयाश्रवणात् श्रूयते। अतस्तत्रैव करणत्वं

यद्वा आरम्भणाधिकरणे " अनेन जीवेनात्मना = मदात्मकजीवेनात्मतयाऽनुप्रविश्य एतत् विचित्रनामरूपभाक् करवाणी " ति भाषितत्वेन जीवशब्दस्य परमात्मपर्यन्तत्वाभावस्यापि [1]प्रदर्शितत्वात् तदनुसारेण **जीवेने**त्यस्य जीव एवार्थः । **आत्मशब्दस्य** शरीर[2]मर्थः । शरीरभूतेनानेन जीवेनानुप्रविश्य नामरूपे व्याकरवाणीत्यर्थः । आत्मशब्दस्य शरीरवाचित्वमभिप्रेत्यैव मदात्मकजीवेनेति भाषितम् ।

1. निश्चितत्वात् क 2. शरीरत्वं ख. ग.

तृतीयार्थः । न चेदृशविशिष्टगतकर्तृत्वस्यानभिहितत्वात् आत्मनेति तृतीयेति वाच्यम् — चैत्रत्वविशिष्टगतकर्तृत्वं क्रियापदेनानभिहितमिति चैत्रः पचतीत्यत्र चैत्रेण पचतीत्यापत्तेः । क्रियायां चैत्रान्वये विशिष्टस्य कर्तृत्वमभिहितमेवेति चेत् — गोपालोऽहं विहरत्येत्यादिरीत्या सर्वत्र प्रथमान्तप्रयोगेऽपि विशिष्टस्य कर्तृत्वमभिधीयेतैव । अतः आत्मनेति न कर्तरि तृतीया । किञ्च, 'आत्मानमात्मा वेत्सि' 'चैत्रः स्वमेव पठति' इति प्रथमान्तप्रयोगस्याप्यापत्ति, कर्तुरभिहितत्वात् । ननु चैत्रादिपदोक्तस्यैव पुनः स्वादिपदेन वचने पुनरुक्तदोष इति चेत् — कुण्डली चैत्रः पठतीतिवत् चैत्रगताकारान्तरपरतया स्वादिपदं प्रयुज्यताम् । स्वादिपदस्याकारान्तरपरत्वं न स्वरसमिति चेत् — व्यपदेशिवद्भावेन भेदकल्पने परं स्वादिपदं किं स्वरसमिति । तस्मात् स्वशब्दात्मशब्दौ क्रियापदानभिहितकरणकारकविवक्षया तृतीयान्तौ प्रयुज्येते इति नियमः स्वीकर्तुमुचित इति । **न्यायपरिशुद्धिरपि** द्रष्टव्या ।

यद्यपि स्वेन रूपेण व्यावृत्तिं करोति, जीवेनात्मनाऽनुप्रविश्येत्यादौ वैशिष्ट्येऽपि तृतीया स्यात्, जीवविशिष्टस्वरूपशक्ती अनुप्रविश्येत्येवम् । अथापि कारकविभक्तौ संभवन्त्यां उपपदविभक्तिरयुक्तेति तत्त्यागः । अत एव जीवेनात्मनेति न सहयोगे तृतीया । यद्यपि जीवस्यानुप्रवेशे कर्तृतया साहित्यमस्ति; भूतेष्विव जीवेऽपि परमात्मानुप्रवेशात् कर्मतया साहित्यमपि — अथापि तत् सर्वं न वाक्यार्थः; 'स्वेन व्यावृत्तिम्', 'आत्मना वेत्सि' इत्यत्रैव कारकविभक्तेरेव संभवात्।

एवं तावत् आत्मना पचति, स्वयं पचतीत्यादिरीत्या स्वशब्दपर्यायात्मशब्दग्रहणेन स्वरससमाधानं वक्तव्यमुक्तम् । अथात्मशब्दस्य परमात्मपरत्वं विहाय तच्छरीरभूतजीवात्मपरत्वेनापि वाक्यार्थसामञ्जस्यं कल्पद्वयेन दर्शयति **यद्वे**त्यादिना ।

किमर्थमेवं पक्षवर्णनमित्यत्राह **अनयो**रिति । कर्तृभिन्नस्यैव करणत्वस्थितिः, अनुप्रवेशस्य परमात्मन्युपपादनक्लेशविरहश्चात्र पक्षद्वये इति भावः । आत्मशब्दस्य परमात्मपरत्वे **अनेन जीवेनात्मने**ति पदत्रयमेवमुपपन्नं मन्तव्यम् — **अनेने**ति पराक्तया निर्देशः स्वापेक्षया जीवे भेदस्य सूच्यत्वानुगुणकर्मवैचित्र्यस्य च प्रदर्शनाय; **जीव**पदेन ईदृशविचित्रजीवविशिष्टपरमात्मपर्यन्तग्रहणमिति प्रतिबोधनाय **आत्मने**ति पदम् । जीवात्ममात्रपरत्वे च **आत्मने**तिपदं व्यर्थमेव स्यात् । 'सर्वं खल्विदं ब्रह्मे'त्यादाविव **अनेने**ति इदन्त्वं विशेषणगतम् । एवं जीवस्य

'आत्मतयाऽनुप्रविश्ये'ति भाष्यस्यायमर्थः—आत्मतयेति हेतौ तृतीया। हेतुत्वञ्च प्रयोजनत्वेन विवक्षितम्। [स्वस्य] आत्मत्वार्थमनुप्रविश्येत्यर्थः। प्रविश्य नियन्तृत्वाभावे आत्मत्वासम्भवात्[1], 'चारेणानुप्रविश्य परबलं सङ्कलयानी'तिवदिति। यद्वा 'जीवेनाऽत्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठती'त्यत्रेव 'अनेन जीवेनात्मनाऽनुप्रविश्ये'त्यत्रापि जीवात्मनेत्येवार्थः। अस्मिन् पक्षे **अनेने**तिशब्दस्य प्रमाणप्रतिपन्नपुरोवर्तिवाचिनो मच्छरीरभूतेनेत्यर्थः। अनयोः पक्षयोः[2], 'चारेणानुप्रविश्य परसैन्यं संकलयानि', 'देवदत्तेन पक्त्वा चैत्रेण भुज्यते[3]' इत्यत्रेव[4] विशिक्रियाप्रयोजककर्त्रा परमात्मना व्याप्रियमाणस्य जीवात्मनः करणतया तृतीयासंभवात् तृतीयाया नानुपपत्तिः। इयांस्तु विशेषः—नामरूपव्याकरणस्य 'तासां त्रिवृतमेकैकां करवाणी'त्रिवक्ष्यमाणेन त्रिवृत्करणेन समानकर्तृकत्वावगमान्नामरूपव्याकरणांशे साक्षात्कर्तृत्वमस्ति। प्रवेशे तु सर्वव्यापकस्य परमात्मनः साक्षात्कर्तृत्वासंभवात् प्रयोजककर्तृत्वम्। एवञ्चानुप्रवेशनामरूपव्याकरणयोः समानकर्तृकत्वसम्भवात् क्त्वाप्रत्ययस्यापि नानुपपत्तिरिति द्रष्टव्यम्॥

एतेनान्तःकरणविशिष्टस्याहमर्थत्वं वदन्तः परे प्रत्युक्ताः, 'बहु स्यां', 'हन्ताहमिमाः' इति सङ्कल्पसमये तस्याभावादित्यास्तां तावत्॥

[5]**तासां त्रिवृतं—करवाणीति**। अत्र संज्ञामूर्तिकल्प्त्यधिकरणे **भगवता भाष्यकृता**, "तदर्थमन्योन्यसंसर्गमप्राप्तानामेषां तेजोबन्नानां विशेषसृष्ट्यसमर्थानां तत्सामर्थ्यायैकैकां त्रिवृतं त्रिवृतं करवाणी"ति इत्येतद्वाक्यार्थ उक्तः। अत्र **तदर्थ**मित्यस्य देवादिविचित्ररूपाणां तन्नामधेयानाञ्च करणार्थमित्यर्थः। पूर्वं "देवादिविचित्रसृष्टिं

1. वाच्च ग. 2. पदमिदं न ख. 3. पक्त्वा भुङ्क्ते क. 4. त्रेव च क. 5. एतत्प्रतीकैतद्व्याख्यानभागो न क. कोशे। परन्तु इयं श्रीभाष्यसूक्तिः परं पूर्वं **व्याकरवाणी**त्यत्र एतत्पूर्वभाष्यप्रदर्शनावसरे सहैव दर्शिता।

परस्य चानुप्रवेशकथनं व्याक्रियमाणनामरूपसंबन्धस्य अचिच्चित्परमात्मसु त्रिष्वपि बोधनाय। एवं **तिस्रो देवता** इति निर्देशः समष्टावपि परमात्मनि अनुप्रवेश तच्छब्दवाच्यत्वयोः ज्ञापनायेति।

पूर्वमेकैकसंकल्पतत्कार्यसृष्ट्युभयानन्तरमन्यान्यसंकल्पतत्कार्योभयकथनवत् इहापि प्रथमं त्रिवृत्करणसंकल्पं तत्कार्यञ्चोक्त्वा नामरूपसंकल्पादौ वक्तव्ये संकल्पद्वयमिश्रणं किमर्थमिति चेत्—अबादिसृष्टिव्यतिरेकेण तेजआदिसृष्टेः फलान्तरं समस्ति। त्रिवृत्करणस्य तु व्यष्टिनामरूपकरणैकार्थत्वमिति व्यञ्जनायैवमिति।

सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनाऽ[1]नुप्रविश्य नामरूपे व्याकरोत् (३); तासां त्रिवृतं त्रिवृतमेकैकामकरोत्।

यथा तु(नु)खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति, तन्मे विजानीहीति। (४) इति षष्ठाध्याये तृतीयः खण्डः।

तन्नामधेयानि च करवाणि" इत्युक्तेरिति द्रष्टव्यम्। अत्र इतिशब्दस्य 'सेयं देवतैक्षते'ति पूर्वेण सम्बन्धः।

एवमीक्षित्वा परा देवता यथासङ्कल्पमकरोदित्याह **सेयं—अकरोत्**। अत्र त्रिवृत्करणाधीनत्वात् नामरूपव्याकरणस्य, अर्थक्रमानुरोधेन पाठक्रमो बाध्यते। तत्र तेजोबन्नदेवतासु एकैकां त्रिवृतं त्रिवृतं कृत्वा नामरूपव्याकरणमकरोदित्यर्थः। अत्र व्यापकस्य परमात्मनः स्वरूपेण [1]स्वापृथक्सिद्धसर्ववस्तुप्रवेशस्य सर्वदा सत्त्वेऽपि स्वशरीरभूतजीवेनानुप्रवेशस्य पूर्वमभावात्, 'जीवेनानुप्रविश्य नामरूपे व्याकरोत्' इत्यस्य नानुपपत्तिः; चारस्य राजशरीरत्वाभावान्न चारेणानुप्रविश्येति वाक्यसाम्यञ्चेति द्रष्टव्यम्।

यथा तु —विजानीहीति। देवताधिष्ठितानां तेजोबन्नानां [2]त्रिवृत्करणप्रकारं मे निगदतः शृण्वित्यर्थः।

व्यासार्यैरानन्दमयाधिकरणे—"'अनुप्रविश्य नामरूपे व्याकरवाणी'त्यत्र नामरूपव्याकरणस्यानुप्रवेशपूर्वकत्वमवगम्यते। 'तत् सृष्ट्वा तदेवानुप्राविशत्' इत्य-

1. अपृथक् ख. 2. त्रिवृत्प्रकारं ख.

ननु फलेच्छापूर्वकत्वादुपायेच्छायाः, संकल्पवाक्यक्रम उपपन्नः। नामरूपे व्याकरोत्, त्रिवृतमकरोदिति कार्यक्रमस्तु न घटते त्रिवृत्करणस्य प्राग्भावित्वे इत्यत्राह **अत्रेति**। प्रथमोक्तसंकल्पजन्यं कार्यं प्रथममुक्तम्, द्वितीयोक्तसंकल्पकार्यं तदनन्तरमुक्तम् औचित्यात्, तत्र तत्र तत्तत्कार्यत्वज्ञप्तये। तदिदमवतरणे दर्शितम्, **यथासंकल्पमकरोदिति**। एवमुक्तिक्रमेऽपि, कार्यस्योत्पत्तिक्रमोऽपि **स** एवेति **न** मन्तव्यम्। तस्य क्रमस्यात्र वाचकपदाभावात्। **पाठक्रमो बाध्यत** इति। पाठगतक्रमकल्प्यः अर्थे क्रमो न सिध्यति। पाठगतक्रमस्यार्थे क्रमकल्पकत्वमिह नेत्यर्थः।

अनुप्रवेशकर्तृत्वमत्यन्तमुख्यरीत्या परमात्मनि दुर्वचम्; किन्तु अणौ जीव एवेत्याह **व्यापकस्ये**त्यादिना। [**इति द्रष्टव्य**मिति। सर्वमिदं **जीवेनात्मने**ति जीवमात्रपरमिति स्वकृतनिर्वाहानुसारेणोक्तमिव।]

यथातुखल्विति वाक्यव्याख्यानात् पूर्वमेव वक्तव्यमिममनुप्रवेशस्वरूपशोधनादिरूपमंशं पूर्णं खण्डं व्याख्यायान्ते वक्तुं साम्प्रतमिति मत्वा पश्चादाह **व्यासार्यैरि**त्यादिना।

त्रानुप्रवेशस्य सृष्टिपूर्वकत्वं गम्यते। तस्मात् समानकर्तृकत्वमेव विवक्षितम्; न पौर्वापर्यमपि। अत एव हि 'तस्य त्वष्टा विदधद्रूपमेती'ति सृष्टयनुप्रवेशयोः समानकालिकत्वमेव प्रतीयते। अथवा 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति सृष्टयनन्तरत्वेन श्रयमाणानुप्रवेशः स्थित्यर्थोऽन्य एत" इत्युक्तम्। व्यापकस्यापि परमात्मनोऽन्तर्यामिविग्रहद्वाराऽनुप्रवेश उपपद्यत इति केचित्। जीवद्वारैवानुप्रवेशः; न स्वत इति केचित्। प्रतिवस्तु तत्तद्वस्तुमात्रपूर्णपरमात्मकार्यकारित्वात् तत्र प्रविष्ट इवेत्युक्तिरिति केचित्॥ ६—३.

प्रविष्टइवेति। कात्स्न्र्येन प्रविष्टे वस्तुनि पूर्णत्वव्यवहारवत् परमात्मन्यपि प्रतिवस्तुपूर्णत्वव्यवहारात् प्रवेशवाचोयुक्तिरिति।

नन्वेकोऽप्यनुप्रवेशः परमात्मनि दुर्वच इति स्थिते व्यासार्यैः कथं सृष्टयनन्तरोऽनुप्रवेशः स्थित्यर्थत्वादन्य इति नानानुप्रवेशकथनमिति चेत्— **अत्रेदं वक्तव्यम्** — सर्वव्यष्टिसृष्टिनिरूपणं तावदत्र क्रियते। तत्रानुप्रवेशो विग्रहद्वारकश्चेत्, स्थावरेषु घटादिषु तत्सत्त्वे न प्रमाणम्। जीवद्वारैव सर्वत्रानुप्रवेशः, न परमात्मनः साक्षादिति पक्षे, 'तत् सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत्' इति पृथग् जीवेऽनुप्रवेशवर्णनं कथम्? वस्तुतः सर्वत्र प्रागेव विद्यमानत्वात् प्रवेशो दुर्वच एव। तथाच **श्रीभागवतम्**, "तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे' इति। 'अन्वयं पुरुषविधः' इतिवत् प्रवेशानुकारमात्रमनुप्रवेशः; अनुकल्पभूतः प्रवेशो वाऽस्तु। वस्तुतो जीवानुप्रवेशोऽपि चिन्त्य एव। शरीरप्रकृतिभूतबीजादिद्रव्येषु प्रागेव संश्लिष्टस्य जीवस्य कोऽयं शरीरे प्रवेशो नामेति। तद्द्रव्यसंबन्धेऽपि शरीराकारपरिणामस्य प्राक् अभावात् प्राक् तादृशपरिणामविशिष्टसंबन्धिनः पश्चात्संबन्ध एव प्रवेश इति चेत्—एष परमात्मन्यपि सुवचः। अतो व्यष्टिसृष्टिगतसर्वांशविवेचने एवं वाक्यार्थो निष्पद्यते — नामरूपव्याकरणं हि समष्टावप्यस्त्येव। (यथा, 'स भूरिति व्याहरत् भुवमसृजत' इत्येवम्।) तदत्र **जीवेनात्मनानुप्रविश्येत्यंशोऽधिकः**। व्यष्टिसृष्टौ च परमात्मा यदा देवादिशरीरसंस्थानं करोति, तदैव जीवं धर्मभूतज्ञानद्वारा तन्नियमनौपयिकव्याप्तिमन्तं करोति; स्वयञ्च तदवस्थावच्छिन्नद्रव्यनियमनौपयिकधर्मभूतज्ञानगतविलक्षणपरिणामवान् भवति। एवम्भूतपरिणामविशिष्टधर्मभूतज्ञानावच्छिष्टस्य जीवस्य स्वस्य च प्रागसंबन्धः, रूपसंपत्तिकाले च संबन्धः स्थित इति स एव प्रवेशः। उक्तश्चैष एव प्रवेशो बृहदारण्यके (२—४—७.), 'स एष इह प्रविष्ट आ नखाग्रेभ्यः' इति। तथाच समष्टौ रूपव्याकरणं तद्रूपावच्छिन्नद्रव्ये स्वयं तन्नियमनौपयिकधर्मभूतज्ञानव्याप्तिरूपप्रवेशञ्च कुर्वन् परमात्मा, व्यष्टौ देवत्वादिसंस्थानात्मकरूपव्याकरणकाले जीवविशिष्टस्वप्रवेशं जीवस्य स्वस्य चोभयोः तदवस्थद्रव्यनियमनौपयिकविलक्षणविकारधर्मभूतज्ञानव्याप्तिरूपं करोतीति विवेचनार्थम्, 'जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'त्युच्यते। अत्र प्रवेशो नामरूपव्याकरणञ्च युगप-

६—४.

यदग्ने रोहितꣳ रूपम्, तेजसस्तद्रूपम्। यच्छुक्लम्, तदपाम्।

यदग्ने रोहितं रूपं तेजसस्तद्रूपम्। अग्नेर्यत् रोहितं **रूपं** स्वरूपम्= रोहितो भागो दृश्यते, तत् अत्रिवृत्कृतस्य तेजसः स्वरूपम्। **यच्छुक्लं—तदन्नस्य। अपाम्, अन्नस्येयत्र रूपमित्यनुवर्तते।** स्पष्टोऽर्थः। अग्नेस्तेजोबन्नसमु-

---

दित्युक्तमेव श्रुतप्रकाशिकायाम्। **रूपशब्दश्च** अचेतनगतसंस्थाने प्रसिद्धः। तदत्र प्रवेशशब्दः **जीवस्य** परमात्मनश्च धर्मभूतज्ञानद्वारकसंबन्धविशेषप्रतिपादनार्थ इति। एतावता शरीरनियन्तृत्वं जीव इव परमात्मन्यपि साक्षात् स्थितमुक्तम्। देवादिशब्दानामचिद्विशिष्टजीवविशिष्टपरमात्मपरत्वञ्च **जीवेनात्मनेति** जीवविशिष्टवाचिजीवपदेन गमितम्। ततो जीवे परमात्मनोऽनुप्रवेशस्य श्रुत्यन्तरसिद्धस्य ज्ञापनात्। अत एव जीवपदस्य विशिष्टवाचित्वमावश्यकम्। तदिदं सर्वमानन्दमयाधिकरणश्रीभाष्येऽभिप्रेतम्। तत्रैव निगमितञ्च, 'एवञ्च सर्वे चेतनाचेतनं प्रति ब्रह्मण आत्मत्वेन सर्वं सचेतनं जगत् तस्य शरीरं भवती'ति। अस्तु वा शरीरे जीवविशिष्टस्यानुप्रवेशो नाम शरीरे जीवानुप्रवेशः, तथाप्रविष्टे च जीवे परमात्मप्रवेश इति।

अत्रेदं सूक्ष्ममीक्षणीयम्— व्याकरणं नामरूपनिष्पत्त्यनुकूलव्यापारः। तदुत्तरक्षणे तन्निष्पत्तिः। उक्तविधानुप्रवेशश्च निष्पत्तिसमकालः। अत एव, 'सृष्ट्वाऽनुप्राविशत्' इति **उपपन्नम्।** सृष्टिर्हि उत्पत्त्यनुकूलव्यापारः। अतः, 'सृष्ट्वानुप्राविशत्' इत्यस्य उत्पत्त्यनन्तरमनुप्राविशदिति नार्थः। अत्र तु, 'अनुप्रविश्य नामरूपे व्याकरवाणी'ति सृष्टेः प्रागनुप्रवेश उक्तः। अयञ्चोत्पत्स्यमानशरीरप्रकृतिद्रव्यसंबन्धः। तत्र जीवानुप्रवेशो नाम सकरणभूतसूक्ष्मविशिष्टजीवसंश्लेषः। स्वानुप्रवेशो नाम सृष्ट्युपधायकशक्तिविशिष्टस्वसंबन्धः। अयमेव सृष्टयर्थानुप्रवेशः। सृष्ट्यनन्तरानुप्रवेशश्च स्थित्यर्थः। एवं प्रवृत्त्यादिकार्यार्थानुप्रवेशोऽपि कश्चिदस्ति। 'गामाविश्य च भूतानि धारयाम्यहमोजसा,' 'सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते' इत्यादयुक्तः। स च कार्योपधायकशक्तिविशिष्टपरमात्मसंबन्धः, शक्तिविग्रहविशेषविशिष्टपरमात्मसंबन्ध इत्येवमनेकरूप इति यथाप्रमाणं भाव्यम्। तदत्र यथा तेजश्शरीरकः परमात्मा अपः संकल्पयति, आपश्चानन्तरं भवन्ति — तथा व्यष्टिशरीरप्रकृतिद्रव्यानुप्रविष्टो नामरूपे व्याकरोति, व्यष्टिश्चानन्तरमुत्पद्यते। एवं प्रकृतिद्रव्य एवानुप्रवेशकथनं शरीरे प्रथमक्षणप्रभृति जीवविशिष्टस्वसंबन्धज्ञापनेन स्वपर्यन्तनामरूपभाक्त्वव्यञ्जनार्थमिति। एतावद्विवेचनमभिप्रेत्य च **श्रुतप्रकाशिकायाम्**, 'सृष्ट्वानुप्राविशदिति स्थित्यर्थानुप्रवेशो वा' इति पक्षः प्रादर्शीति।

एवञ्च **तेषां भूतानामिति** पूर्ववाक्ये अचिद्विशिष्टचिद्रूपभूतेषु तच्छब्दोक्ततेजोबन्नाभेद **उक्त इहोपपादितो** भवति, तेष्वनुप्रविश्योत्पादनात् तानीमानि भूतानीति।

रोहितं रूपमित्यादौ रूपं स्वरूपं द्रव्यांशः। रोहितादिपदं रूपविशिष्टद्रव्यपरम्। तदाह **रोहितो भाग** इति। **अपागादिति**। अनेन प्रक्रमप्रवृत्ततार्किकानुसारिशङ्काविशेषनिरासोऽपि

यत् कृष्णम्, तदन्नस्य। अपागादग्नेरग्नित्वम्। वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्॥ १॥

यदादित्यस्य रोहितꣳ रूपम्, तेजसस्तद्रूपम्। यच्छुक्लम्, तदपाम्। यत् कृष्णम्, तदन्नस्य। अपागादादित्यादादित्यत्वम्। वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्॥ २॥

यच्चन्द्रमसो रोहितꣳ रूपम्, तेजसस्तद्रूपम्। यच्छुक्लम्, तदपाम्। यत् कृष्णम्, तदन्नस्य। अपागाच्चन्द्राच्चन्द्रत्वम्। वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्॥ ३॥

यद्विद्युतो रोहितꣳ रूपम्, तेजसस्तद्रूपम्। यच्छुक्लम्, तदपाम्। यत् कृष्णम्, तदन्नस्य। अपागाद्विद्युतो विद्युत्त्वम्। वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्॥ ४॥

एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रियाः,

दायरूपत्वे यावत्तेजोबन्नावस्थानमग्निरूपेणोपलम्भः प्राप्नोतीत्यत्राह—**अपागादग्नेरग्नित्वम्**। तेष्वेव तेजोबन्नेषु अग्न्याद्यवस्थानाशकसामग्रीसन्निधाने अग्नित्वावस्था [अग्नेः] अपेता भवति, अवस्थान्तरं प्रादुर्भवति। **वाचा—सत्यम्**। अतस्तेजोबन्नैरेवाग्नित्वाद्यवस्थालक्षणो विकारोऽग्न्यादिनामधेयञ्च वाक्पूर्वकव्यवहारसिद्धये तेजोबन्नैरेव स्पृश्यते। अतः तेजोबन्नस्वरूपाण्येवाग्निरिति सत्यमित्यर्थः।

यदादित्यस्य — — — सत्यम्। पूर्ववदर्थः।

एतद्ध स्म —महाश्रोत्रियाः। उपादानादुपादेयं न भिद्यत इत्येतत्स्वरूपज्ञाः **महाशालाः** महागृहस्थाः पूर्वे सर्ववेदपारगाः वक्ष्यमाणप्रकारेणोक्तवन्त इत्यर्थः। 'लट् स्मे' इति स्मयोगात् भूतार्थेऽपि **आहुरिति** लडुपपत्तिः। [[1] न चात्र वर्तमानार्थत्वं युक्तम्; अग्रे, **विदाञ्चक्रुरिति** भूतार्थकस्य लिटो दर्शनात्।]

1. अयं क पाठः।

भाव्य। यदि विजातीयनानाद्रव्यजन्यः स्यादग्निः, तर्हि तत्र कथमग्नित्वजातिः सांकर्यदोषादिति शङ्का, 'संस्थानातिरिक्तनित्यजातावेव न प्रमाणम्। तच्च संस्थानं नाशार्ह' मिति ज्ञापनेन परिहियत इति।

'न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यती'ति ह्येभ्यो विदाञ्चक्रुः ॥५॥

यदु रोहितमिवाभूदिति, तेजसस्तद्रूपमिति तद्विदाञ्चक्रुः । यदु शुक्लमिवाभूदिति, अपां रूपमिति तद्विदाञ्चक्रुः । यदु कृष्णमिवाभूदिति, अन्नस्य रूपमिति तद्विदाञ्चक्रुः ॥ ६ ॥

यद्विज्ञातमिवाभूदिति, एतासामेव देवतानां समास इति तद्विदाञ्चक्रुः॥

यथा तु (1नु) खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति, तन्मे विजानाहीति ॥ ७ ॥

इति षष्ठाध्याये चतुर्थः खण्डः ।

1. यथा नु शां. मा.

न नो—विदाञ्चक्रुः । [1] तेजोबन्नान्येव ज्ञातवतां[2] **नः** अस्माकं **एभ्यः** तेजोबन्नेभ्यः अतिरिक्तमश्रुतममतमविज्ञातं कोऽपि नोदाहर्तुं शक्नोतीति । तेजोबन्नेभ्य एव सर्वं ज्ञातवन्त इत्यर्थः ।

सर्वस्यापि तत्रान्तर्भावमेव प्रदर्शयति **यदु रोहित — विदाञ्चक्रुः ।** रोहितं शुक्लं कृष्णमिति[3] भासमानं तेजोबन्नात्मकमेवेति ज्ञातवन्त इत्यर्थः ।

यद्विज्ञात—चक्रुः । उः त्वर्थे । **यदु** यत्तु उक्तेन रूपेणाज्ञायमानमभूत्, तदपि पीतमाञ्जिष्ठधूसरशोणादिरूपवत्त्वेन ज्ञायमानं रोहितशुक्लकृष्णतेजोबन्नसमुदायात्मकमेव; न तु ततोऽतिरिक्तमिति ज्ञातवन्त इत्यर्थः ।

एवं सर्वस्यापि प्रपञ्चस्य त्रिवृत्कृततेजोबन्नरूपत्वेन तदभेदं प्रसाध्य, अध्यात्मं मांसलोहितमज्जास्थिलक्षणस्य देहस्य त्रिवृत्कृततेजोबन्नाभेदम् इन्द्रियमनःप्राणानाञ्च त्रिवृत्कृततेजोबन्नाप्यायितत्वं प्रदर्शयितुं प्रस्तौति — **यथा तु खलु—विजानीहीति**—तेजोबन्नानि पुरुषेण भुज्यमानानि पुरुषं प्राप्य यथा त्रिधात्रिधा परिणमन्ते, तं परिणामप्रकारं शृण्वित्यर्थः ॥ ६—४.

1. विद्वांस इति पदमधिकमिह क. कोशे. 2. ज्ञात्वा क. ख. 3. रोहितशुक्लकृष्णत्वेन ख.

ननु त्रिवृत्कृततेजःप्रभृतिषु कतमस्यास्मच्छरीरप्रकृतित्वमित्यत्र अंशभेदेन त्रयमपि प्रकृतिरिति निरूपयितुं **यथा तु खल्वि**त्यारम्भः । अत्र **त्रिवृदि**ति पदं न पूर्ववत् तेजोबन्नत्रयवृता इत्यर्थपरम्; किंतु परिणामत्रयवृतेति । विग्रहस्तु त्रिभिर्त्रियत इत्येक एवेत्यभिप्रेत्य तदर्थमाह **त्रिधात्रिधापरिणमन्त** इति । अत्र **तिस्रोदेवताः** भूयस्त्वानुरोधेन तेजआद्येकैकपदेन व्यवह्रियमाणं **त्रिवृत् त्रिवृदेकैका**|प्रत्येकं त्रिवृद्भूतमिदं पुरुषं शरीरं प्राप्य **यथा भवति** यादृशपरिणामवद् भवति, तत् [**मे** मदभिमतं] विजानीहीत्यप्यर्थः संभवति । तदा त्रिवृत्पदं पूर्वार्थकमेव ।

६—५.

अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति; यो मध्यमस्तन्माꣳसम्; योऽणिष्ठस्तन्मनः ॥ १ ॥

आपः पीतास्त्रेधा विधीयन्ते । तासां यः स्थविष्ठो धातुस्तन्मूत्रम्; भवति यो मध्यमस्तल्लोहितम्; योऽणिष्ठः स प्राणः ॥ २ ॥

तेजोऽशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तदस्थि भवति; यो मध्यमः स मज्जा; योऽणिष्ठः सा वाक् ॥ ३ ॥

अन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति ॥

अन्नमशितं त्रेधा विधीयते । अशितं पुरुषेण भुक्तं जाठराग्निना पच्यमानमन्नं स्थविष्ठमध्यमाणिष्ठरूपेण त्रेधा विभक्तं भवति । **तस्य — मनः** । स्थूलांशः पुरीषतामापद्यते । मध्यमांशस्तु मांसताम् । अणिष्ठांशस्तु मनस आप्यायकतामापद्यते । मनसः आहङ्कारिकत्वेन अन्नविकारत्वाभावादिति भावः । **आपः—प्राणः** । अपां सूक्ष्मांशः प्राणाप्यायको भवतीत्यर्थः । शिष्टं स्पष्टम् ॥ **तेजोशितं—वाक्** । तैलघृतादिकं तेजश्शब्देनोच्यते । **मज्जा** अस्थ्यन्तर्गतः स्नेहो धातुविशेषः । घृततैलादेः पीतस्य सूक्ष्मांशो वागाप्यायक इत्यर्थः । शिष्टं पूर्ववत् ॥ **अन्नमयं हि—वागिति** । उक्तरीत्या मनःप्राणवाचां अन्नजलतेजस्सूक्ष्मांशाप्यायितत्वात् मनः अन्नमयम्, प्राणः अम्मयः, तेजोमयी वागित्यर्थः । ननु केवलान्नभक्षाणां आखुप्रभृतीनामपि वाग्मित्वप्राणवत्त्वदर्शनात्, अम्मात्रभक्षाणामपि **मत्स्यादीनां** मनस्वित्ववाग्मित्वदर्शनात्, घृततैलमात्रभक्षाणामपि मनस्वित्वप्राणवत्त्वदर्शनात् **कथम्, 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति उपपद्यत इति चेत्,** सर्वस्यापि त्रिवृत्कृतत्वेन सर्वस्यापि भक्षस्य तेजोबन्नरूपतया, **'अन्नमयं हि सोम्य**

तेजःप्रक्रमे स्थिते **अन्नमशित**मिति अत्र परं अन्नस्य प्रथममुक्तिः तस्यैवाधिकमश्यमानत्वात् । स्थविष्ठमध्यमाणिष्ठपदैः असारसारसारतरग्रहणम् । **तैलघृतेति** । तैलादिर्हि उष्णपदार्थः । तथा तेजो वै घृतमिति श्रुतिः । मज्जेति नकारान्तः पुल्लिङ्गः । ननु प्रागेव स्थितानां मनोऽन्नकप्राणानामाहारजन्यत्वं कथम् । किञ्च आहङ्कारिकयोर्मनोवाचोः वायवीयस्य च प्राणस्य कथमन्नातेजोंशत्वमित्यत्र तदिदमाप्यायनप्रयुक्तमिति बोधयितुम् **अन्नमयं हीत्यादि विशेषवाक्यम्** ।

भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ४ ॥

इति षष्ठाध्याये पञ्चमः खण्डः ।

६—६.

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत् सर्पिर्भवति ॥ १ ॥

एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति ॥ २ ॥ अपाꣳ सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति ॥ ३ ॥ तेजसः सोम्याश्यमानस्य

मन आपोमयः प्राणस्तेजोमयी वाक्' इत्युपपद्यत इति न क्षतिरिति द्रष्टव्यम्[1] ।

भूय एव मा भगवान् विज्ञापयत्विति । [[2]एवमशितानां तेजोबन्नानां सूक्ष्मांशा वागाद्याप्यायकाः सन्तीत्यत्र न मनसो विस्रम्भः । अतः] **भूयः** पुनरपि सम्यग्दृष्टान्तैरमुमर्थं दर्शये[ति[3] शिष्यः प्रार्थयामासे]त्यर्थः । **तथा सोम्येति होवाच**—आचार्योऽपि तथाऽस्त्वित्युवाचेत्यर्थः ॥ ६—५.

दध्नः—सर्पिर्भवति । [4]हे सोम्य! मथ्यमानस्य दध्नः **ऊर्ध्वं** उद्गतोऽणीयानंशो यथा सर्पिर्भवतीत्यर्थः । **एवमेव खलु—तन्मनो भवति ।** एवमेव उक्तदृष्टान्तवदेव **औदर्येणाग्निना** पच्यमानस्यान्नस्य योऽणिमा अणीयानंशः, **स ऊर्ध्वं** उद्गतो मनो भवति । मनस आप्यायको भवतीत्यर्थः । **समुदीषति ।** 'ईष गति

1. अन्नमयं सोम्येत्यायुक्तेर्विरोधाभावात् ग. 2. अयं ग. पाठः । 3. अयं ख. पाठः । 4. यथा मथ्यमानस्य दध्न ऊर्ध्वं उद्गतः **अणिमा** सूक्ष्मांशो घृतं भवति—एवमश्यमानस्यान्नस्य ऊर्ध्वं उद्गतः सूक्ष्मांशो मनो भवति । मनआप्यायको भवतीत्यर्थः ग.

विज्ञापयत्विति । **विजानीहीति** यस्मिन्नर्थे पूर्वं प्रयुक्तम्, तदनुकूलव्यापारार्थक एवायं णिच् । न तु नीचेनोच्चं प्रति निवेदनरूपं विज्ञापनमिदम् ।

ननु **भूय एवेत्येतावता** अस्यायं प्रष्टव्यांश इति कथं ज्ञायत इति चेत्—

मुखदर्शनमात्रेण शिष्यजिज्ञास्यनिश्चयः ।
प्रवक्तुर्हि भवेत् तत् स प्रश्रितः परिपृच्छति ॥

अन्नादौ ईदृशसारतरसद्भावे निदर्शनमाह **दध्न** इत्यादिना । उदर्य एव **औदर्यः** । स्वार्थे अण् ।

योऽणिमा स ऊर्ध्वः समुदीषति सा वाग् भवति ॥ ४ ॥

अन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति ॥

भूय एव मा भगवान् विज्ञापयत्विति ॥ तथा सोम्येति होवाच ॥

इति षष्ठाध्याये षष्ठः खण्डः ।

६—७.

षोडशकलः सोम्य पुरुषः । पञ्चादशाहानि माऽश्नीः ; काममपः पिब ; आपोमयः प्राणो न पिबतो विच्छेत्स्यत इति ॥ १ ॥

हिंसादर्शनेषु' इति हि धातुः । **अपां—वाग् भवति** । पूर्ववदर्थः । **अन्नमयं हि — वागिति** । स्पष्टम् ।

भूय—इति । मनसोऽन्नमयत्वं यथा बुद्ध्यारूढं भवति, तथा प्रदर्शये[ति श्वेतकेतुराहे]त्यर्थः । **तथा—होवाच** । पूर्ववदर्थः । ६–६.

षोडशकलस्सोम्य पुरुषः । षोडशांशयुक्तमनआदिकलायुक्तः पुरुषः । ततश्च मनआदेः षोडशांशाः[1] प्रत्यहं भुज्यमानैरन्नादिभिराप्यायिता भवन्ति । **पञ्चदशाहानि माशीः** । तत्र पञ्चदश[2]दिनानि मा भुङ्क्थाः । **काममपः पिब** । यथेष्टं जलं पिब । **आपोमयः — विच्छेत्स्यत इति** — जलपाने प्राणविच्छेदो[3] न भविता । जलमयत्वात् प्राणस्येत्याचार्य उवाचेत्यर्थः ।

1. षोडशांशः—अप्यायितो भवति ख. 2. अहानि ख. 3 जलपानेन प्राणविच्छेदोऽपि ग.

भवत्वणिष्ठांशः । तदाप्यायितत्वे किं प्रमाणमित्यत्रान्वयव्यतिरेकाभ्यां तद् दर्शयति **षोडशकल** इति । पुरुषस्य षोडशकलत्वं नाना । प्रश्नोपनिषदुक्तमेकम् । तदेव मुण्डकेऽप्यनूदितम् । बृहदारण्यके (३–५–१५) चन्द्रवत् षोडशकलत्वमुक्त्वा, 'तस्य वित्तमेव पञ्चदश कलाः, आत्मैवास्य षोडशी कले'त्युक्तम् । पञ्च भूतानि, एकादशेन्द्रियाणि च पुंसः षोडश कला इति च प्रसिद्धमेव । षोडशकलश्चन्द्रश्च पञ्चदशभिः अहोभिः क्षीयते । तद्वत् पुरुषेऽपि तथात्वमत्र वर्ण्यते । तत्र च एकैकदिनक्षीयमाणस्यांशस्य एकैककलात्वम्, शिष्टस्यैककलात्वमिति कल्पनया पुरुषान्तर्गतमनआदेः षोडशकलत्वेन पुरुषस्य षोडशकलत्वमध्यवसीयते । मनआदिसंबन्धिकलाः षोडश यस्य स षोडशकल इति । मनआदीनामंशं कलापदेनोपरि श्रुतिरपि निर्देक्ष्यति । अतः **षोडशांशयुक्तमनआदिकलायुक्त** इति तात्पर्यार्थः ; न शब्दार्थः ।

स ह पञ्चदशाहानि नाऽऽश । अथ हैनमुपससाद, 'किं ब्रवीमि भो' इति । ऋचः सोम्य यजूंषि सामानीति । स होवाच, 'न वै मा प्रति भान्ति भो' इति ॥ २ ॥

तँ होवाच—यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात् ; तेन ततोऽपि न बहु दहेत्—एवँ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टा स्यात् ; तयैतर्हि वेदान्नानुभवसि । अशान । अथ मे विज्ञास्यसीति ॥ ३ ॥

स ह पञ्चदशाहानि—नाश । [1]आशेति लिट् । एवं पित्रोक्तः पुत्रः पञ्चदशाहानि **नाश** न भुक्तवान् । **अथ हैनमुपससाद किं ब्रवीमि भो इति** । षोडशेऽहनि पितरमुपसन्नः शिष्यः, 'भगवन् किं ब्रवीमी'त्युक्तवानित्यर्थः । इतर आह, **ऋचस्सोम्य यजूँषि सामानीति** । अधीतान् वेदान् पठेत्युक्तवानित्यर्थः । **सः—भो इति** । मां प्रति वेदा न [2]भान्तीति इतरः प्रत्युक्तवानित्यर्थः ।

तँ होवाच । पिता प्रत्युवाचेत्यर्थः । **यथा सोम्य—विज्ञास्यसीति** । हे सोम्य ! यथा लोके महतः इन्धनैरभ्याहितस्य[3] प्रज्वलितस्याग्नेः शान्तस्य एकोऽङ्गारः खद्योतमात्रः परिशिष्टो भवेत् । **तेन** अङ्गारेण **ततोऽपि** खद्योतमात्रपरिमाणात् किञ्चिदपि बहु न दहेत्, एवमेव खलु सोम्य! ते अन्नोपचितानां षोडशानां मनसोंशानामेकोंशोऽवशिष्टः । [पञ्चदशदिनेषु पञ्चदशकलानां क्षीणत्वादिति भावः ।] अतोऽल्पीयसा तेनांशेनेदानीं वेदान् न प्रतिपद्यसे । **अशान** भुंक्ष्व । तत ऊर्ध्वं **मे** मदुक्तं ज्ञास्यसीत्यर्थः ।

1 इदं क. कोशे । 2. प्रतिभान्ति **ख.** 3. अभ्याहितस्य शान्तस्याग्नेः **ग.**

ऋच इत्यादि । सर्ववेदाध्ययनं हि तस्य निष्पन्नमस्ति । **सर्वान् वेदान् अधीत्येति** प्रागुक्तेः ।

खद्योतमात्रः खद्योतपरिमाणः । **तेन ततोपीति** । बहु दहनस्वभावोऽग्निः महांश्चेत्, महतोपि बहु दहेत् । अणुमात्रश्चेत् अणुमात्राद् बह्वपि **न दहेदिति** । **मे मदुक्तमिति** । **मदुक्तमित्यस्य** मत्पृष्टमित्यर्थः; उक्तानां ऋगादीनामन्यतोऽधीतत्वात् ।

स हाऽऽश। अथ हैनमुपससाद। तꣳ ह यत् किञ्च पप्रच्छ, सर्वꣳ ह प्रतिपेदे।

तꣳ होवाच(४)—यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय [1]प्राज्वालयेत्; तेन ततोपि बहु दहेत्—एवꣳ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टाऽभूत्; साऽन्नेनोपसमाहिता प्राज्वालीत्,[1] (प्राज्वाली); तयैतर्हि वेदाननुभवसि।

अन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति।

तद्धास्य विजज्ञाविति—विजज्ञाविति॥ ५॥

इति षष्ठाध्याये सप्तमः खण्डः।

1. प्रज्वालयेत् मा.

स हाश; अथहैनमुपससाद—एवं पित्रोक्तः सः श्वेतकेतुः आश भुक्तवान्। अथ भुक्त्वा पितरमुपसन्नः। **तं ह—प्रतिपेदे**। तं तदा पिता यद्यत् पृष्टवान्, तत्तत् सर्वं स ज्ञातवानित्यर्थः। **तं होवाच**। पितेतिशेषः। **यथा—दहेत्**। यथा महतो ज्वलितशान्तस्य वह्नेरेकमङ्गारं खद्योतमात्रं परिशिष्टं तृणादिभिरुपसमिध्य **प्राज्वालयेत्** प्रकर्षेण **आ** समन्तात् वर्धयेत्। तेन च एवमिद्धेनाङ्गारेण **ततोऽपि** पूर्वपरिमाणान् **बहु दहेदित्यर्थः। एवं सोम्य**—। **एवमेव** पूर्वोक्तदृष्टान्तवत् हे सोम्य! ते षोडशानां मनोंशानामेकोंशोऽन्नेनाप्यायितः प्रज्वलितः स्वकार्यकरणसमर्थोऽभूदित्यर्थः। [1]प्राज्वालीदिति (ली इति?) दीर्घश्छान्दसः।] अतो वेदान् इदानीं प्रतिपद्यसे इत्यर्थः।

अन्नमयं हि—वागिति। अतोऽन्नमयं मनः। अनयैव **रीत्या** आपोमयः प्राणस्तेजोमयी वागिति[2] जानीहीत्याचार्य उक्तवानित्यर्थः।

तद्धास्य विजज्ञाविति विजज्ञाविति। **तत्** मनआदीनामन्नमयत्वादिकम् **अस्य** पितुरुपदेशात् पुत्रो ज्ञातवानित्यर्थः। द्विरभ्यासस्त्रिवृत्करणप्रकारपरिसमाप्त्यर्थः।

1. अयं ख. पाठ। अत्र प्राज्वालं इति दीर्घ इति पाठः स्यात्। तथैव शाङ्करोक्तेश्च। प्राज्वालीदिति तु तत्रापि निर्दिष्टं पाठान्तरम्। 2 जानीहीत्यादि ख. कोशे।

एवं मनःकार्यप्रतिभानतदभावयोः अन्नतदभावानुविधानं प्रदर्श्य मनस आप्यायितत्वमुपपादितम्। अन्नाभावेऽपि अम्मात्रेण प्राणस्थित्या आपोमयः प्राण इत्यपि उपपादितमेव। व्यतिरेकमुखेनोपपादनं तु नासीत्। तेजोमयी वागिति तु ननराम्। अत आह **अनयैव रीत्येति**।

प्रकृतविषयाण्यधिकरणानि लिख्यन्ते ।

(१) द्वितीयाध्यायान्ते—, 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी' ति स्वांशत्वेनात्मभूतस्य जीवस्यैवानुप्रवेशव्याकरणकर्तृत्वाभिधानात्, परदेवतायाः स्वेन रूपेणानुप्रवेशानुक्तेः, हिरण्यगर्भस्य नामरूपव्याकर्तृत्वस्य पुराणादिषु प्रसिद्धत्वात् परमात्मांशभूतो हिरण्यगर्भ एव प्रवेशनामरूपव्याकरणयोः कर्ता । न चैवं 'व्याकरवाणी' ति परमात्मनोऽभिसन्धिर्नोपपद्यत इति वाच्यम्—जीवसमष्ट्याश्रयस्य प्रवेशव्याकरणकर्तुर्हिरण्यगर्भस्य परमात्मांशतयाऽत्यन्तभिन्नत्वाभावेन तद्गतनामरूपव्याकर्तृत्वस्य प्रवेशसमानाधिकरणस्य स्वनिष्ठतया परमात्मनोऽनुसन्धानोपपत्तेः । प्रयोजककर्तृतयाऽपि 'व्याकरवाणी' त्यभिसन्ध्युपपत्तेश्च । यदि पुनः परमात्मनः साक्षात्कर्तृभावो भवेत्, तर्हि 'अनेन जीवेने' त्यनर्थकम् । जीवस्य कर्तृत्वाभावेन, 'चारेणानुप्रविश्य परसैन्यं संकलयानी'तिवत् करणत्व एव तृतीया वाच्या । करणत्वञ्च तदैवोपपद्यते, यदि परमात्मा प्रयोजककर्ता, जीवश्च प्रयोज्यकर्ता स्यात् । प्रयोजककर्तुर्हि साक्षात्कर्ता करणं भवति । प्रधानक्रियोद्देशेन प्रयोजकेन प्रयोज्यकर्तुर्व्यापियमाणत्वात् । अतः 'जीवेने'ति करणत्वेन निर्दिश्यमानो जीवः साक्षात्कर्तेत्यवसीयते । अतः तेजोबन्नानि प्रविश्य हिरण्यगर्भ एव नामरूपे व्याकरोति । अतो हिरण्यगर्भकर्तृकैव नामरूपव्याक्रियेति प्राप्ते उच्यते—

"संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" । संज्ञामूर्तिक्लृप्तिः नामरूपव्याकरणम्; त्रिवृत्करणं कुर्वतः परमात्मन एव; न हिरण्यगर्भस्य । 'अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतंत्रिवृतमेकैकामकरो'दिति त्रिवृत्करणनामरूपव्याकरणयोः समानकर्तृकत्वावगमात् । न च त्रिवृत्करणं हिरण्यगर्भकर्तृकं सम्भवति, हिरण्यगर्भस्य त्रिवृत्कृततेजोबन्नोत्पादितब्रह्माण्डसृष्टत्ववेदनेन तस्य त्रिवृत्करणकर्तृत्वासम्भवात् । अतो जीवसमष्टिशरीरकस्सन् परमात्मा नामरूपे व्याकरोदिति सिद्धम् । 'अनेन जीवेनात्मनाऽनुप्रविश्ये'त्यस्योपपत्तिस्तु तद्वाक्यविवरणदशायामेवोक्ता तत्रैवानुसन्धेया ।

ननु 'यदग्ने रोहितं रूपं तेजसस्तद्रूपम्', 'अन्नमशितं त्रेधा विधीयते'

स्वांशत्वेनात्मभूतस्येति । अनेन पूर्वपक्षेऽपि आत्मनेत्यस्य स्वेनेत्येवार्थ इति ज्ञायते.

इत्युत्तरत्र चतुर्मुखसृष्टाम्न्यादिषु त्रिवृत्करणप्रकारप्रदर्शनात् त्रिवृत्करणमपि चर्तुमुख-कर्तृकमेवेत्यत्राह—" मांसादि भौमं यथाशब्दमितरयोश्च " । यदुक्तमण्डसृष्ट्यु-त्तरकालं चतुर्मुखसृष्टदेवादिविषयोऽयं 'तासां त्रिवृतं त्रिवृतमेकैकामकरो 'दिति त्रिवृत्करणोपदेश इति—तन्नोपपद्यते 'अन्नमशितं त्रेधा विधीयते' इत्यत्र मांस-मनसोः पुरीषादणुत्वेनाणीयस्त्वेन च व्यपदिष्टयोः आप्यत्वतैजसत्वप्रसङ्गात् । यत् यदपेक्षया सूक्ष्मम्, तत् तस्य कारणम् । अत एव हि पार्थिवाप्यतैजसानामुत्तरो-त्तरसूक्ष्मतयोत्तरोत्तरकारणत्वम् । ततश्च पुरीषस्य स्थविष्ठत्वात् पार्थिवत्वम्, ततः सूक्ष्मस्य मांसस्य आप्यत्वम्, ततोऽणिष्ठस्य मनसः तैजसत्वमभ्युपगन्तव्यम् । तथा 'आपः पीता' इत्यत्रापि स्थविष्ठस्य मूत्रस्य पार्थिवत्वम्, मध्यमस्य लोहितस्य आप्यत्वम्, ततोऽप्यणीयसः प्राणस्य तैजसत्वमभ्युपगन्तव्यम् । तथा 'तेजोऽित' मित्यत्रापि स्थूलस्यास्थ्नः पार्थिवत्वम्, मध्यमाया मज्जाया आप्यत्वम्, अणिष्ठाया वाचस्तैजसत्वमभ्युपगन्तव्यम् । न चैवमिष्यते । प्रथमपर्याये पुरीषवत् मांसमनसी अपि पार्थिवे एव प्रतिपाद्येते । 'अन्नमशितं त्रेधा विधीयते' इति प्रक्रमात् । तथा द्वितीये पर्याये मूत्रलोहितप्राणानामब्विकारत्वं प्रतिपाद्यते । तृतीयपर्याये अस्थिमज्जवाचां तेजोविकारत्वमेव प्रतिपाद्यते । अतः 'तासां त्रिवृतं त्रिवृतमेकैकामकरो 'दित्युक्तत्रिवृत्करणप्रकारः 'अन्नमशित 'मित्यादिना न प्रदर्श्यते । तथा सति हि मनःप्राणवाचां तिसृणामपि अणीयस्त्वेन, 'अन्नमयं हि सोम्य मन आपोमयः प्राणः तेजोमयी वाक्' इति विरुध्येत । अतः प्रागेव त्रिवृत्कृतानां पृथिव्यादीनां पुरुषं प्राप्तानां, 'अन्नमशित 'मित्यादिना एकैकस्य त्रेधा परिणाम उच्यते । अण्डसृष्टेः प्रागेव तेजोबन्नानां त्रिवृत्करणेन भवितव्यम् । अत्रिवृत्कृतानां तेषां कार्यारम्भासामर्थ्यात् । अन्योन्यसंयुक्तानामेव हि कार्यारम्भसामर्थ्यम् । तदेव च त्रिवृत्करणम् । तथा च स्मर्यते—

मांसादिभौममिति सूत्रमवतारयति **नन्वि**ति । अयं पूर्वपक्ष्याशयः — त्रिवृत्करणप्रकार-प्रदर्शनं हि त्रयमेलनप्रदर्शनम् । तत् अन्नाद्यादौ एकप्रकारेण कृतम् । अथ प्रागेव त्रिवृद्भूतेषु अन्ना-दिषु पाकवशात् त्रयाणां पृथग्भावदर्शनात्, प्राक् त्रयमेलननिश्चयः । तथाच इमास्तिस्र इति वाक्यस्यायमर्थः — त्रिवृदेकैका स्थिता पुरुषं प्राप्य तिस्रो देवताः भवतीति — । तत्रोक्तं सूत्रकारेण, 'मांसादि भौमं किल; न तु आप्यतैजसभूतमिति । मज्जाशब्दः आकारान्तोऽपि ।

"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजाः स्रष्टुमसमागत्य(म्य) कृत्स्नशः ॥

समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥"

इति । अत एव च 'अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरो'दिति पाठक्रमोऽप्यर्थक्रमेण बाध्यते । अण्डान्तर्वर्तिष्वग्न्यादिषु त्रिवृत्करणप्रदर्शनं तु श्वेतकेतोः शुश्रूषोरण्डान्तर्वर्तित्वेन तस्य बहिःष्ठवस्तुषु त्रिवृत्करणप्रदर्शनायोगात् त्रिवृत्कृतानां कार्येष्वग्न्यादिषु त्रिवृत्करणप्रदर्शनं कृतमित्यविरोधः ।

नन्वण्डान्तर्गतानां सर्वेषां त्रिवृत्कृततेजोबन्नरूपत्वे व्यवस्थिततेजोबन्नव्यवहारः कथं स्यादित्यत्राह — "वैशेष्यात्तु तद्वादस्तद्वादः" । पृथिव्यंशानां [1]भूयस्त्वे पृथिवीव्यवहारः, जलांशानां भूयस्त्वे जलव्यवहार इति व्यवहारव्यवस्थोपपद्यत इत्यर्थः । 'तद्वादस्तद्वाद' इति सूत्रे द्विरुक्तिरध्यायपरिसमाप्तिद्योतनार्थेति स्थितम् ।

(२) तथा द्वितीयाध्याये आरम्भणाधिकरणे—

उपादेयमुपादानादन्यदेव । घटेनोदकमाह्रियते, मृत्पिण्डेन घटादि निर्मीयत इति कार्यभेदात् । तथा घटस्य दण्डचक्रादिकं कारणम्, मृत्पिण्डस्य तु जलसंयोजनमर्दनादीति कारणभेदात् । तथा घटः पृथुबुध्नोदराकारः, मृत्पिण्डस्तु अतदाकार इत्याकारभेदात् । तथा पूर्वकालं कारणम्, अपर(उत्तर)कालं कार्यमिति कालभेदात् । बहवस्तन्तवः, एकः पट इति संख्याभेदात् । सत्यामेव मृदि घटो नष्ट इति प्रतीतेः । कार्यकारणयोर्बुद्धिशब्दादिभेदस्य दर्शनाच्च उपादानादन्यदेवोपादेयम् । इतरथा कारकव्यापारवैयर्थ्यप्रसङ्गादिति काणादादिमतावलम्बनेन पूर्वपक्षे प्राप्ते उच्यते —

"तदनन्यत्वमारम्भणशब्दादिभ्यः" । तस्मात् परमकारणात् ब्रह्मणः जगतोऽनन्यत्वं वाचारम्भणशब्दादिभिरवगम्यते । 'वाचारम्भणं[2] विकारो नामधेय'-

1. पृथिव्यंशानामधांशतया भूयस्त्वेन. क. 2. वाचारम्भणमित्यादेरर्थः. क.

मित्यस्यार्थः पूर्वमेव वर्णितः । आदिशब्देन 'सदेव सोम्येदमग्र आसीत्', 'येनाश्रुतं श्रुतं भवति', 'एकमेवाद्वितीय' मित्यादिकं गृह्यते । यदि च वैशेषिकादिरीत्या उपादेयमुपादानादन्यत् स्यात्, तदा कारणगुणप्रक्रमेण कार्यगुणोत्पत्तेः उपादानसुवर्णगुरुत्वेन तदुपादेयकुण्डले गुरुत्वोत्पत्त्यभ्युपगमावश्यम्भावेन गुरुत्वद्वैगुण्यप्रसङ्गात् । बुद्धिशब्दादिभेदानामुभयसम्प्रतिपन्नावस्थयैव व्यवस्थोपपत्तौ अवस्थाश्रयद्रव्यान्तरोत्पत्तिकल्पनाया अप्रामाणिकत्वात् ।

ननु विरळतन्त्वारब्धपटे एकस्मिन्नेव कथमेकत्वानेकत्वयोर्युगपदुपलम्भः, एकस्मिन् धर्मिणि विरुद्धधर्मद्वयासम्भवादिति चेत् — न — एकस्मिन्नेव वृक्षे मूलाद्यवच्छेदकभेदेन संयोगतदभावसत्त्ववत् कुविन्दकारितसंयोगविशेषावच्छेदेन तन्तुषु पटत्वमेकत्वञ्च, तन्तुत्वावच्छेदेन तु अनेकत्वमित्युपपत्तेः । ननु कुविन्दकारितसंयोगाः तन्तुत्वसङ्कीर्णा एवेति कथं विरुद्धधर्मावच्छेदकत्वमिति चेत् — न — आर्द्रेन्धनप्रभववह्नित्वावच्छेदेन धूमव्याप्यतावच्छेदकत्ववति वह्नित्वे अविशेषितवह्नित्वत्वावच्छेदेन व्याप्यतावच्छेदकत्वाभावस्य वृत्यभ्युपगमात् । एवं कार्यकारणानन्यत्वादेऽपि एकस्मिन्नेव द्रव्ये तन्तुत्वावस्थाप्रापकांशु[2]संयोगविशेषावच्छेदेन तन्तुत्वम्, तन्तुत्वावच्छेदेनानेकत्वञ्च; पटत्वप्रापकतन्तुसंयोगविशेषावच्छेदेन पटत्वम्, पटत्वावच्छेदेनैकत्वञ्चेति पटत्वतन्तुत्वयोरेकत्वानेकत्वयोश्च समावेशोपपत्तेर्न कश्चिद्दोषः ।

ननु संस्थानस्यासत उत्पत्तौ असत्कार्यवादप्रसङ्ग इति चेत्, असत्कार्यवादिमतेऽपि — उत्पत्तेरुत्पत्तिमत्त्वे अनवस्था स्यात्; उत्पत्तिराहित्ये सत्कार्यवादप्रसङ्गः । अस्माकं तु अवस्थायाः [3]पृथक्प्रतिपत्तिकार्ययोगानर्हत्वात् पृथगुत्पत्त्यादिकं नापेक्षितम् । असन्मते घटस्योत्पत्तिर्नाम घटत्वावस्थासम्बन्ध एव; न त्वसतः सत्त्वरूपम् । अतः उपादेयमुपादानादनन्यदेव ।

1. विरुद्धधर्मावच्छेदेन व्याप्यतावच्छेदकत्वं ग. 2. प्रापकांशसंयोग ख. ग. 3. अवस्थानां ख.

आर्द्रेन्धनेति । एवं हेतुसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं वह्नेः तत्तद्व्यक्तित्वेन, अनवच्छेदकत्वं वह्नित्वेनेति च मणिकृदुक्तं ग्राह्यम् ।

न कश्चिद्दोष इति । न चैवं सर्वत्र भेदाभेदावतारप्रसङ्गः । अवच्छेदकभेदमन्तरा विरुद्धद्वयसमावेशे हि दोष इति । अस्तु वा घटादावेकत्वव्यवहारो गौणः । तथापि अनन्तावयवितद्गुणादिकल्पनं गुरुत्वद्वैगुण्यप्रसङ्ग — उपादानोपादेयाभेदप्रतीतिभङ्गप्रसङ्गपरिहारेष्वपेक्ष्य राज्यादाविव गौणतद्व्यवहारस्वीकार एव ज्यायानिति ।

"भावे चोपलब्धेः"। हिरण्यकुण्डलादिकार्यभावेऽपि तदेवेदं हिरण्यमिति प्रत्यभिज्ञारूपोपलब्धेस्सत्त्वादभेद एवेत्यर्थः।

"सत्त्वाच्चापरस्य"। अपरस्य कार्यस्य कारणे तादात्म्येन सम्बन्धेन सत्त्वाच्च उपादानादनन्यदुपादेयम्; 'सदेव सोम्येदमग्र आसी'दिति कार्ये नष्टेऽपि कारणे कार्यतादात्म्यप्रतीतेरित्यर्थः। 'भावे चोपलब्धे'रिति सूत्रे कार्यदशायां कार्ये कारणतादात्म्यप्रतीतिः प्रमाणतयोपन्यस्ता; उत्तरसूत्रे तु कार्यनाशानन्तरमपि कारणे कार्याभेदप्रतीतिः प्रमाणतयोपन्यस्तेति विवेकः।

"असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् युक्तेः शब्दान्तराच्च"। 'असद्वा इदमग्र आसीत्', 'इदं वा अग्रे नैव किञ्चनासी'दिति जगतः सृष्टेः प्राक् असत्त्वव्यपदेशात् सृष्टेः प्रागपि सता उपादानेनोपादेयस्यैक्यं नोपपद्यत इति चेत्—न—नामरूपविभागलक्षणधर्मान्तराभावमादाय असत्त्वव्यपदेशोपपत्तेः। जगतः सत्त्वं नामरूपभाक्त्वम्। असत्त्वं नामरूपविरोधिसूक्ष्मावस्था। न तु सर्वात्मना असत्त्वम्। कुत इदमवगम्यत इति चेत्—**वाक्यशेषात्**। 'इदं वा अग्रे नैव किञ्चनासी'दित्यत्र 'तदसदेव सन्मनोऽकुरुते'ति वाक्यशेषे मनःकर्तृत्वप्रतिपादनात्। **युक्तेश्च**। घटस्य सत्त्वं हि नाम घटत्वावस्थासम्बन्धः। असत्त्वं नाम तद्विरोधिकपालत्वचूर्णत्वाद्यवस्थासम्बन्ध एव। न हि तद्व्यतिरिक्तो घटाभावो नाम कश्चिदुपलभ्यते। **शब्दान्तराच्च**। 'कुतस्तु खलु सोम्यैवं स्यादिति होवाचे'ति तुच्छत्वं प्रतिक्षिप्य, 'सत्त्वेव सोम्येदमग्र आसी'दिति स्थापितत्वात्। 'तद्धेदं तर्ह्यव्याकृतमासीत्। तन्नामरूपाभ्यां व्याक्रियते'ति सुस्पष्टमभिधानाच्च।

"पटवच्च"। यथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपकार्यादिकं भजन्ते, तद्वत् ब्रह्मापि।

"यथा च प्राणादिः"। यथा वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपकार्यान्तराणि भजते, तद्वत् एकमेव ब्रह्म विचित्रस्थिरत्रसरूपं जगद् भवतीति परमकारणात् परस्मात् ब्रह्मणोऽनन्यत्वं जगतोऽभ्युपगन्तव्यमिति स्थितम्।

1. विरोधिनी ग. 2. मनस्कृत्व. क. 3. चूर्णत्वेति न ख. कोशे।

(३) तथा प्रथमाध्याये प्रकृत्यधिकरणे —, लोके घटकर्तुः कुलालस्योपादानत्वादर्शनात् जगत्कर्तुः परमात्मनो जगदुपादानत्वं न सम्भवति । किञ्च निष्कळतया अपरिणामिनः परमात्मनः परिणामित्वलक्षणोपादानत्वासम्भवाच्च ब्रह्मणो नोपादानत्वम् । अपि तु 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर'मिति श्रुतिवशात् परिणामसमर्थप्रकृतिरेवोपादानम् । ईश्वरस्य तु तदधिष्ठातृत्वमात्रमेवेति प्राप्ते उच्यते—

"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" । **प्रकृतिश्च** उपादानञ्च ब्रह्मैव । इतरथा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मृत्पिण्डादिदृष्टान्तस्य चोपरोधप्रसङ्गात् । न ह्युपादानभूतमृत्पिण्डज्ञान इव निमित्तभूतदण्डादिज्ञाने तत्कार्यं घटशरावादिकं ज्ञातं भवति । अत एकविज्ञानेन सर्वविज्ञानप्रतिज्ञया मृत्पिण्डादिदृष्टान्तस्वारस्येन च ब्रह्मजगतोरुपादानोपादेयभाव एवावसीयते ।

न च, 'अस्य ग्रामस्य प्रधानभूते चैत्रे दृष्टे सर्वे ग्रामस्थाः दृष्टाः' इति व्यपदेशवत् ब्रह्मणः सर्वप्रधानतया, 'तस्मिन् दृष्टे सर्वं विदितप्राय' मित्युक्तिरुपपद्यत इति वाच्यम्—यदि ह्यत्र सर्वविज्ञानं प्राधान्याभिप्रायं गौणं स्यात्, तदा प्रधानज्ञानेन सर्वमन्यदप्रधानमविदितमपि फलतो विदितप्रायं भवतीत्यस्यार्थस्य लोकसिद्धत्वेनैकविज्ञानेन सर्वविज्ञानानुपपत्तिं पश्यतः श्वेतकेतोः 'कथं नु भगवः स आदेश'इति प्रश्नो न स्यात् । अभिप्रायानभिज्ञेन कृतेऽपि प्रश्ने, प्राधान्याद्वा सादृश्याद्वा सर्वं ज्ञातं स्यादित्येव प्रतिवक्तव्यं स्यात्, न तु 'यथा सोम्यैकेन मृत्पिण्डेने'ति । अतो ब्रह्म उपादानमेव ।

"अभिध्योपदेशाच्च" । 'तदैक्षत बहु स्यां प्रजायेये'ति ब्रह्मण एव बहु स्यामिति सङ्कल्पपूर्विका सृष्टिरुपदिश्यते । न हि कुलालादेरीदृशसङ्करुपपूर्विका सृष्टिः संभवति ।

"साक्षाच्चोभयाम्नानात्" । 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्' इति हि श्रूयते । यत उपादानात् द्यावापृथिवीशब्दोपलक्षितं कृत्स्नं जगद् ब्रह्म निष्ट-

तक्षुः,–निष्टतक्षुः निर्मितवानित्यर्थः । वचनव्यत्ययः छान्दसः–, तादृशवृक्षस्थानीयं[1] द्यावापृथिव्यादिजगदुपादानमपि ब्रह्मैव; तस्य उपादानभूतस्य वृक्षस्याधारभूतं वनमपि ब्रह्मैव । भुवनानि धारयन्नीश्वरो ब्रह्मशब्दवाच्यं स्वात्मानमेवाध्यतिष्ठदित्यर्थः । अ(त)तश्चाधिष्ठेयमुपकरणादिकमपि ब्रह्मैवेत्यर्थः ।

"आत्मकृतेः" । 'तदात्मानं स्वयमकुरुत'इति आत्मन एव बहुत्वकरणात् तस्यैव निमित्तत्वमुपादानत्वञ्च । न हि, 'कुलाल आत्मानं स्वयमकुरुते' ति व्यपदेशोऽस्ति ।

ननु 'निष्कलं निष्क्रिय'मिति निरवयवस्यापरिणामिनः कथं परिणामित्वलक्षणमुपादानत्वं स्यात् । तत्राह –"परिणामात्" । निर्विकारत्वाद्यविरोधिपरिणामविशेषसम्भवादित्यर्थः । अयं भावः — 'निष्कलं निष्क्रियं शान्त'मित्यादिभिः परमात्मनः निर्विकारत्वञ्च[2] प्रतीयते; पूर्वोक्तसूत्रोदाहृतश्रुतिभिः प्रपञ्चोपादानत्वञ्च प्रतीयते । उभयमपि यथोपपद्यते, तथोपपादनीयम् । परमात्मनश्च निर्विकारत्वं श्रूयते—'विकारजननीमज्ञामष्टरूपामजां ध्रुवाम्', 'अजामेकां लोहितशुक्लकृष्णाम्', 'अस्मान्मायी सृजते विश्वमेतत् तस्मिन्श्चान्यो मायया संनिरुद्धः' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर'मित्यादिवाक्येषु प्रपञ्चोपादानतया परिणामिनी प्रकृतिः प्रतीयते । तत्र परिणममानप्रकृतिरूपोपादानावरुद्धे प्रपञ्चे साक्षात्कारणत्वासम्भवात् तद्द्वारा ब्रह्म कारणमित्यवसीयते । यथा 'यदाग्नेयोऽष्टाकपाल'इति पुरोडाशावरुद्धे यागे व्रीहीणां कारणत्वं साक्षात्कारणत्वासम्भवात् पुरोडाशद्वारा पर्यवस्यति, तद्वत् ।

ननु भवत्वन्यद्वारा कारणत्वनिर्वाहः; व्यापारव्यवधानेऽपि कारणत्वाक्षतेः । उपादानत्वं तु नान्यद्वारा सम्भवति । भाव्यवस्थावतः पूर्वावस्थायोगित्वं ह्युपादानत्वम् । अवस्थाश्रयत्वशून्ये परमात्मनि कथमुपादानत्वमिति चेन्न — परमात्माश्रितायाः तच्छक्तिभूतायाः प्रकृतेरवस्थाश्रयत्वेन परमात्मनोऽप्यवस्थाश्रयत्वोपपत्तेः । ततश्च ब्रह्मणि साक्षाद्विकाराभावमादाय अपरिणामित्वनिर्विकारत्वश्रुतयश्चोपपन्नाः; शक्तिशरीरादिशब्दितायाः प्रकृतेर्ब्रह्मणश्चाभेदोपचारेण वा, प्रकृतिगतावस्थायाः परम्परया ब्रह्माश्रितत्वेन वा ब्रह्मणः परिणामो(म्यु)पादानत्ववादाः, ब्रह्मोपादानत्वावलम्बनाश्च

1. वृक्षस्थानीयद्यावा. ख. ग. 2. चकारो न ग. कोशे ।

६—८.

उद्दालको हाऽऽरुणिः श्वेतकेतुं पुत्रमुवाच — स्वप्नान्तं मे सोम्य विजानीहीति । यत्रैतत्पुरुषः स्वपिति नाम,

'न विलक्षणत्वादस्य तथात्वञ्च शब्दात्', 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इत्याद्याक्षेपपरिहाराश्चोपपन्नाः ।

"योनिश्च हि गीयते" । 'यद् भूतयोनिं परिपश्यन्ति धीराः' इति **योनिः** उपादानं[1] हि ब्रह्म गीयते । योनिशब्दस्योपादानवचनत्वम्, 'यथोर्णनाभिः सृजते गृह्णते चे'ति वाक्यशेषादवगम्यते । अतश्च ब्रह्मैव निमित्तमुपादानञ्चेति स्थितम् । प्रकृतमनुसरामः ॥ ६—७.

एकविज्ञानेन सर्वविज्ञानसिद्ध्यर्थं ब्रह्मव्यतिरिक्तस्य तदुपादेयत्वं वक्तुं प्रवृत्तः तेजोबन्नात्मकसकलाचेतनवर्गस्य तदुपादेयत्वमुक्त्वा चेतनवर्गस्यापि तदुपादेयतां प्रतिपादयितुं प्रस्तौति **उद्दालको**—**विजानीहीति । स्वप्नान्तं** सुषुप्तिं प्रतिपादयतो मम वाक्याद्विजानीहीति पिता पुत्रमाह स्मेत्यर्थः । एवं शिष्यावधानार्थं प्रतिज्ञायाह—**यत्र—नाम । यत्र** यदा, **पुरुषः स्वपितीत्येतन्नाम** भवति । पुरुषः

1. उपादानमिति पदं **ख. ग.** कोशयोः

अष्टमखण्डमवतारयति **एके**ति । पूर्वखण्डान्ते **विजज्ञाविति विजज्ञाविति** इति द्विरभ्यासो दृश्यते । स च विद्यासमाप्तावेव दृष्ट इत्येतावता सद्विद्यासमाप्तिस्तावत् इह न सुवचा । उपरि, 'सता सोम्य, 'अन्नेन — अद्भिः — तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' इत्येवं सम्यगेव सद्विद्याप्रत्यभिज्ञानात् । अतः, स त्रिवृत्करणप्रकारपरिसमाप्त्यर्थ इति प्रागेव भाषितम् । तदयमर्थः — स्वबन्धं श्वेतकेतुं प्रति, 'उत तमादेश' मिति पृष्टं पित्रा । तत्र तज्जिज्ञासाक्रमेण, यावत् वक्तव्यम्, तावदुपदिष्टम्। तावता तृप्तः श्वेतकेतुः उपरतजिज्ञास एवासीत् । तद् दर्शितं पूर्वमभ्यासकरणेन । एवं तस्य सद्रूपतत्त्वज्ञाने जातेऽपि हितपुरुषार्थज्ञाने प्रवृत्तिर्नादृश्यत । 'न हि तदज्ञाने, मतं विज्ञातमिति पूर्वोक्तविज्ञानस्यावसरोऽस्ति । न चोक्तार्थमननात् पश्चात् तत्प्रश्नकालपर्यन्तमवश्यं प्रतीक्षितव्यम्' इति तदर्थमुद्दालकः स्वयं पुत्रस्नेहात् तमनुगृह्णन् स्वाप्ययप्रभृतिसर्वमुपदेष्टुमारभत । इदं सूचयितुमत्र, **उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच** इति अपूर्ववदारम्भः । तत्र, 'तत्त्वमसी'त्युपदेश्यस्य, 'अहं ब्रह्मास्मी'ति हितपुरुषार्थोभयरूपस्य अनुभवस्य चेतनस्वरूपशोधनमन्तरा दुर्वचतया तदर्थम्, 'अनेन जीवेनात्मना' इति प्राक् संगृहीतं बहुभिः खण्डैर्विविच्यते । तेन जीवानामुपादेयत्वमुपपाद्य यथावदुपपादितं भवतीति ।

तत्र लयमुखेन सत उपादानत्वमत्र खण्डे कथ्यते । तत्र लोकप्रसिद्धानां, स्वपिति — अशनाया — उदन्याशब्दानां प्रामाणिकार्थविशेषपरत्वं चमत्कारदृष्ट्या व्युत्पत्तिविशेषकल्पनया प्रतिपाद्य अर्थवादमुखेन सन्मूलकं प्रजानां स्थाप्यते । **स्वप्नान्तम्** । स्वप्नस्यान्तः अवसानम्। सुषुप्तिं

सता सोम्य तदा सम्पन्नो भवति। तस्मादेनँ स्वपितीत्याचक्षते, स्वँ ह्यपीतो भवति ॥ १ ॥

स्वपितीतिशब्दो यदा प्रयुज्यत इत्यर्थः। पुरुषस्वापो यदेति यावत्। [1]**नामशब्दः** प्रसिद्ध्यर्थो वा। [2]**एतत्पुरुषः** एष पुरुष इत्यर्थः।] **सता—भवति।** **तदा** तस्मिन् स्वापकाले 'सदेव सोम्ये'ति प्रकृतेन सता सम्पन्नो भवति। पद्लृ गतौ। सङ्गतो भवतीत्यर्थः। तस्या एव सत्सम्पत्तेः सति लयरूपत्वं स्वपितिनामनिर्वचनानुगुणं विवृणोति—**स्वमपीतो भवति।** अत्र स्वशब्दस्तावन्न जीवमात्रपरः। 'सता सोम्य तदा सम्पन्नो भवति; स्वमपीतो भवती'ति[1] स्थानप्रमाणेन सच्छब्दस्वशब्दयोरेकविषयत्वावश्यम्भावात्। सच्छब्दस्य चास्मिन् प्रकरणे परमात्मविषयत्वात् स्वशब्दोऽपि तत्पर एव। ननु जीवभिन्नत्वात् परमात्मनः, तस्य कथं जीवं प्रति स्वत्वमिति चेत्—उच्यते — देवमनुष्यादिनामरूपाभिमानरागलोभाद्यनुगुणबहि[3]र्मुखज्ञानप्रसरवज्जागरितावस्थजीवविशिष्टः परमात्मा देवमनुष्यादिनामरूपरागद्वेषलोभमोहाद्यौपाधिकबाह्याभ्यन्तराकाराभिमानकालुष्यरहितजीवशरीरकः सन् आत्मन्यन्तर्भूत इत्यर्थ इति 'स्वाप्ययात्' इति सूत्रे **व्यासार्यैर्व्याख्यातत्वात्** नानुपपत्तिः। अत्र त्वपिपूर्वस्य एतेर्लयार्थस्य सकर्मकत्वात् **स्वमपीत** इति द्वितीया। **तस्मादेनं—भवति।** **हि** यस्मात् स्वस्मिन् लीनो भवति, तस्मात् स्वपितीति लौकिका आचक्षत इत्यर्थः। अत्र यद्यपि स्वपिधातोर्निष्पन्नः स्वपितिशब्दः; न तु स्वशब्दोपपदात् अपीतेः—तथापि अशनायादिनिर्वचनवत् अर्थवादरूपत्वमुपपद्यत इति द्रष्टव्यम्। अत्र जीवस्य परमात्मनि लयप्रतिपादनात् तेजोबन्नादिवत् जीवस्यापि तदुपादेयत्वात् तज्ज्ञानेन ज्ञातत्वमुपपादितं भवति।

1. यद्वा **नाम**शब्दः प्रसिद्धौ **क.** 2. इदमधिकं न **ग.** कोशे। 3. बहिर्मुखेति श्रु-प्र. पाठः। बहिर्दुःखेति अत्र कोशेषु।

गच्छतो हि मध्ये स्वप्नाद्यः। **नामे**त्यतः प्राक् इतिशब्दाध्याहारे, **नामशब्दस्य** वाक्यपरत्वे च क्लेशादर्थान्तरमाह **नामशब्दः प्रसिध्ध्यर्थो** वेति। **स्वशब्दोपपदादिति** कर्मधारयः। परत्वं पञ्चम्यर्थः। स्वशब्दरूपं यदुपपदम्, ततः परभूतात् अपीतिशब्दादिति।

ननु 'यत्रैतत्पुरुषः स्वपिति नाम' इति पुरुषशब्दनिर्दिष्टस्यैव स्वशब्देन पराम्रष्टव्यतया पुरुषशब्दस्य जीवमात्रविश्रान्तत्वेन स्वशब्दस्यापि 'तत्पर्यन्तत्वमेवोचितम्। न च पुरुषपदस्यापि ब्रह्मपर्यन्तत्वकल्पनं युक्तम्। 'यत्रैतत्पुरुषः स्वपिति नाम,' 'तस्मादेनं स्वपितीत्याचक्षते' इत्युपक्रमोपसंहारयोर्लौकिकप्रसिद्ध्यनुवादात्। लौकिकानां ब्रह्मणि तत्प्रसिद्धेरभावात्। 'सति सम्पद्य न विदुः', 'सत आगम्य न विदुः' इत्युत्तरखण्डयोः प्रतिपाद्यमानस्याज्ञानस्य ब्रह्मान्वयासम्भवाच्च 'पुरुषः स्वपिति नामे'ति वाक्यस्थपुरुषशब्दस्य ब्रह्मपर्यन्तत्वाभावेन स्वशब्दस्यापि न ब्रह्मपर्यन्तत्वं सम्भवति। किञ्च 'सता सोम्य तदा सम्पन्नो भवती'ति वाक्ये सच्छब्दिते ब्रह्मणि स्थूलावस्थजीवविशिष्टपरमात्मलयप्रतिपादने तत्तुल्यार्थत्वेनाभ्युपेते 'प्राज्ञेनात्मना संपरिष्वक्त' इति वाक्येऽपि परिष्वक्तत्वमपि जीवशरीरकस्य ब्रह्मण एव स्यात्। न च इष्टापत्तिः। "सुषुप्त्युत्क्रान्त्योर्भेदेने"ति सूत्रे परिष्वङ्क्तेन प्राज्ञेन परिष्वज्यमानस्याज्ञस्य जीवस्य भेदप्रतिपादनं हि विरुध्यत इति चेत्—

अत्र केचित्— शास्त्रानभिज्ञलौकिकप्रसिद्धेर्देहाद्यतिरिक्ते[1] जीवेऽप्यभावादभिज्ञप्रसिद्धिरेव, 'स्वपितीत्याचक्षत' इत्यनुरुध्यते[2]। अभिज्ञप्रसिद्धिश्च परमात्मविषयाऽपि सम्भवति। 'सम्पद्य न विदु'रित्यग्रिमखण्डे प्रतिपाद्यमानमज्ञानमपि

1. तत्परत्व क. 2 देहव्यति ख. 3. अनूद्यते क.

जीवेऽप्यभावादिति। उक्तं ह्यात्मसिद्धौ, "आनुमानिकीमप्यात्मसिद्धिमश्रद्दधानाः श्रौतीमेव तां श्रोत्रियाः संगिरन्ते" इति।

नन्विल्यादिना शङ्कितुरयमाशयः— हृदयान्तःस्थित एव जीवः सुषुप्तिकाले प्रासादखट्वापर्यङ्कायमाणनाडीपुरीतत्परमात्मसंश्लिष्टो भवतीति तावत् प्रामाणिकम्। तत्र परमात्मसंश्लेषः, स्वरूपेणावस्थितिरित्यंशद्वयं तावत् क्रमिकम्। तदुभयं क्रमेण, 'सता सोम्य तदा संपन्नो भवति, स्वमपीतो भवती'ति वाक्यद्वयेनोच्यताम्। तथाच किमिति स्वपदं विशिष्टवाचि। एवं, 'प्राज्ञेनात्मने'ति वाक्यमपि सुषुप्तिनिर्वाहकप्राज्ञशब्दवाच्यपरमात्मसंश्लेषं, 'परिष्वक्त' इति प्रतिपाद्य अहङ्काराममकारात्मकवेदनाभावविशिष्टस्वस्वरूपावस्थितिं, 'न बाह्य' मित्यादिना दर्शयति। अतः सद्वाक्यप्राज्ञवाक्ययोरैकार्थ्यमिति। अत्र केचिदित्येभिरत्र ऐकार्थ्ये आदरो न दर्शितः। प्रकृतवाक्ये सर्वत्र विशिष्टपरत्वे 'सुषुप्त्युत्क्रान्त्यो'रिति सूत्रविरोधप्रदर्शनं वस्तुतो न युज्यते। तत्र हि सूत्रे अज्ञत्वप्राज्ञत्वरूपविरुद्धधर्माश्रयधर्मिद्वयस्य युगपदभावे श्रुत्यर्थवर्णनायोगात् जीवपरभेदः स्वीकार्य इत्येवोक्तम्। प्राज्ञपदस्य जीववाचिपदस्य च विशिष्टवेषेण परमात्मपरत्ववर्णन-

जीवद्वारा ब्रह्मणि सङ्क्रम्यते । 'प्राज्ञेनात्मना सम्परिष्वक्त' इति प्रतिपाद्यमानस्य परिष्वक्तस्य सत्सम्पत्तेश्चैक्यमपि नाभ्युपगन्तव्यम्। 'सता सोम्य तदा सम्पन्नो भवति', 'प्राज्ञेनात्मना सम्परिष्वक्तः' इत्यनयोरैकार्थ्योक्तिश्चोभयोरपि सुषुप्तिविषयत्वादुपपद्यते, न तु सर्वात्मनैकार्थत्वम् । येन "सुषुप्त्युत्क्रान्त्योर्भेदेने"ति सूत्रं विरुध्येत । अतः 'पुरुषः स्वपिति नामे'त्यत्रापि पुरुषशब्दो ब्रह्मपर्यन्त एव । अतः स्वशब्दस्य ब्रह्मपर्यन्तत्वे नानुपपत्तिरिति व्यासार्योक्तिं समर्थयन्ते ।

'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति वाक्यविवरणप्रवृत्तेन भगवता भाष्यकृता महासिद्धान्ते, "तत्त्वमसीत्यत्रोद्देश्योपादेयविभागः कथमिति चेत्—नात्र किञ्चिदुद्दिश्य किमपि विधीयते, 'ऐतदात्म्यमिदं सर्व'मित्यनेनैव प्राप्तत्वात् । अप्राप्ते हि शास्त्रमर्थवत् । 'इदं सर्व' मिति सजीवं जगन्निर्दिश्य, ऐतदात्म्यमिति तस्यैष आत्मेति तत्रैव प्रतिपादितम् । तत्र च हेतुरुक्तः, 'सन्मूलाः सोम्येमाः सर्वा :प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इतिवत्" इति भाषितम् । अत्र व्यासार्यैः—

'सन्मूलास्सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति वाक्ये सर्वशब्देन प्रजानां विशेषितत्वात्, प्रजाशब्दस्य चाचित्संसृष्टचेतनविशेषपरत्वात्, 'इदं सर्वमसृजत' इत्यादिवाक्यान्तरे विज्ञानाविज्ञानशब्दवाच्यचिदचिदात्मकस्य जगतः सर्वशब्देन निर्देशाच्च प्रजाशब्देन सजीवं जगन्निर्दिश्यते ।

मात्रात् किं स भेदस्योक्तो भवति । अतः, 'संपरिष्वक्तो लय' इत्युक्तावपि न दोषः । अस्तु वा प्राज्ञवाक्ये यथाश्रुत एवार्थो विशिष्टपरत्वं विना । सद्वाक्यमपि विशिष्टपरं मा भूत् । परन्तु लोकप्रसिद्धिप्रदर्शनमनुरुध्य पुरुषपदादेः जीवमात्रपरत्वेऽपि स्वमपीत इति स्वपदं परं विशिष्टपरमात्मपरमेव । अन्यथा स्वाप्ययादिति सूत्रविरोधात् । तत्र हि, 'सत्संपत्तेः स्वाप्ययरूपत्वप्रदर्शनस्वारस्यात् सत्पदस्वपदयोः समानार्थकत्वात् नाचेतनं सच्छब्दवाच्य' मिति स्थाप्यते । अतो विशिष्टे जीवमात्रलय एवात्र, प्राज्ञवाक्ये चोच्यत इत्येवमैकार्थ्यं सुवचम् । न च विशेषणमात्रलयोक्तौ उक्तव्यासार्यसूक्तिविरोधः । तैर्विशिष्टस्य लय इति पक्षाश्रयणेन स्वाप्ययसूत्रे व्याख्यानेऽपि विशेषणमात्रलयपक्षस्याप्यन्यत्र दर्शिततया तद्वीलाऽर्थवर्णनस्यानुचितत्वाभावादित्यभिसंधाय भिन्नयोरुपादानोपादेयभावप्रतिपादकसूक्तिनिर्भरप्रदर्शनाय पीठिकामारचयति सन्मूला इत्यादिना ।

'सन्मूलास्सत्प्रतिष्ठाः' इत्यपि पदद्वयं सच्छब्दवाच्यब्रह्माधीनोत्पत्तिलयत्वपरम्। प्रतिष्ठा-निष्ठा पर्यवसानं लय इति यावत्। 'सदायतना' इति सदाधारकत्वमुच्यते। अनेन जगतश्शरीरत्वं फलितम्। तत् कथमिति चेत् — इत्थम्। उत्पत्तिलयहेतुत्ववाचि-पदद्वयमध्यगतेन स्थितिहेतुत्ववाचिना सदायतना इति पदेन स्थितिहेतुधारकत्वं सिद्ध्यति। 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः' इति तिष्ठतिधातूक्तस्थितेः प्रशासनेन धारणाधीनत्वावगमात्, तस्य च प्रशासनस्य 'अन्तः प्रविष्टश्शास्ता जनानाम्' इत्यन्तःप्रवेशपूर्वकत्वावगमात्, सर्वशाखाप्रत्ययन्यायेन अन्तः-प्रवेशशासनधारणानामन्यतमोक्तावपीतरयोः फलितत्वात्, 'सदायतना' इत्यनेन धारकत्वोक्तौ[1] अन्तः प्रविश्य शासनेन धारकत्वलक्षणात्मत्वस्य फलितत्वाज्जगतः शरीरत्वं फलितम्। 'सन्मूलास्सोम्येमास्सर्वाः प्रजास्सत्प्रतिष्ठाः' इति द्वाभ्यां सदु-पादानकत्वम्। सदायतना इत्यनेन सदन्तर्यामिकत्वम्।

उपादानोपादेयभावस्याभिन्ननिष्ठत्वात् प्रजाशब्देनाचित्संसृष्टजीवमात्रपरामर्शे तस्य सदुपादानकत्वासम्भवात् प्रजाशब्देनापि प्रजाशरीरकं ब्रह्मैवोच्यते। सदायतना इत्यत्र सदन्तर्यामिकत्वस्य शरीरभूतचिदचिन्मात्रनिष्ठत्वेन चिदचिच्छरीरकब्रह्मनिष्ठत्वा-भावात् सदायतना इति वाक्यानुषक्तप्रजाशब्देन शरीरभूतचेतनाचेतनमात्रमेवाभिधीयते। तथा — 'सन्मूलास्सत्प्रतिष्ठा' इत्युपादानत्वप्रतिपादकवाक्ये विशिष्टस्यैवोपादानत्वात् सच्छब्देन सूक्ष्मचिदचिद्विशिष्टमेवोच्यते। सदायतना इत्यन्तर्यामित्वप्रतिपादकवाक्ये विशिष्टस्यान्तर्यामित्वासम्भवात् सच्छब्देन विशेष्यमात्रमेवाभिधीयते। 'तज्जत्वात्तल्लत्वा-त्तदनत्वात् सर्वं खल्विदं ब्रह्मे'त्यत्रापि तज्जत्वात्तल्लत्वादित्युपादानत्वप्रतिपादकांशे विशि-ष्टयोरेवोपादानोपादेयत्वात् सर्वशब्दोऽपि विशिष्टपरः। तच्छब्दोऽपि विशिष्टपरः। 'सर्वमिदं तदनत्वात् ब्रह्मे'ति तदन्तर्यामित्वप्रतिपादकांशे तु विशिष्टयोः शरीरशरीरि-भावासम्भवात सर्वमिदमितिशब्देन शरीरभूतं जगदेव परामृश्यते; तदितिशब्देन केवलविशेष्यभूतं ब्रह्मैवोच्यते। 'ऐतदात्म्यमिदं सर्वम्' इत्यत्र, एष आत्मा यस्य, तत् ऐतदात्म्यमित्यर्थस्य वर्णनीयतया विशिष्टस्यात्मत्वाभावादेतच्छब्देन विशेष्यमात्रं परामृश्यते—इति। व्यासार्यैरुक्तमेतत् सर्वं गत्यभावादङ्गीकार्यम्।

1. कावपि ख. ग.

" कृत्स्नस्य जगतो ब्रह्मकार्यत्वेन तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात् तत्प्रत्यनीकनानात्वं निषिध्यत " इति महासिद्धान्तभाष्यव्याख्यानावसरे च व्यासार्यैः— यस्य ब्रह्मकार्यत्वं विशिष्टस्य, न तस्य तदन्तर्यामिकत्वम् ; यस्य ब्रह्मान्तर्यामिकत्वं विशेषणस्य, न तस्य ब्रह्मोपादेयत्वम् ; ब्रह्मान्तर्यामिकत्वस्य विशेषणमात्रनिष्ठत्वादिति परिचोद्य, 'जगतो ब्रह्मकार्यत्वा'दिति श्रूयमाणो जगच्छब्दो विशिष्टपरः, तदन्तर्यामिकत्वेनेत्यत्र विशेषणमात्रवाची निष्कर्षकः जगत इति शब्दोऽध्याहर्तव्य इत्युक्त्वा, अस्मिन् पक्षे बहुवैरूप्याश्रयणक्लेशं पर्यालोच्य—, 'ब्रह्मकायत्वेन' 'ब्रह्मान्तर्यामिकत्वेन' त्युभयत्रापि 'जगत' इति निष्कर्षक एव शब्दः। न च निष्कृष्टस्य विशेषणमात्रस्य, जगतस्तदन्तर्यामिकत्वोपपत्तावपि तदुपादानकत्वं न सम्भवतीति वाच्यम् — भाव्यवस्थाश्रयस्यैवोपादेयतया तच्छरीरभूतस्य जगतोऽपि भाव्यवस्थाश्रयत्वेन ब्रह्मोपादेयत्वं सम्भवतीति प्रतिपादितम्। अस्मिन् पक्षे वैरूप्यादिक्लेशाश्रयणाभावादयमपि पक्षो युक्त इत्यस्माभिर्मुण्डकोपनिषत्प्रकाशिकायां प्रतिपादितम्[1]।

अस्मिन् पक्षे 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति सदुपादानकत्वसदात्मकत्वप्रतिपादकवाक्ये प्रजाशब्दः केवलचिदचिन्मात्रपरः, न तु ब्रह्मपरः। सच्छब्दोऽपि केवलब्रह्ममात्रपरः। ततश्च केवलस्य ब्रह्मणः केवलचिदचित्प्रपञ्चस्य च पूर्वोत्तरावस्थाश्रयहेतुहेतुमद्रूपतया उपादानोपादेयभावोऽप्यस्ति। तदपृथक्सिद्धकारणत्वस्यैव तदुपादानत्वरूपत्वात्। विशेष्यस्य ब्रह्मणो विशेषणापृथक्सिद्धकारणत्वेनोपादानत्वस्यैव युक्तत्वात्।

'ऐतदात्म्यमिदं सर्वं' मिति वाक्येऽपि इदं सर्वमिति केवलचिदचिदात्मकः प्रपञ्चः परामृश्यते ; एतच्छब्देनापि केवलं विशेष्यमिति न पूर्ववाक्यवैरूप्यम्।

1. प्रतिपादितः ख. ग.

अभिन्नयोरेवोपादानोपादेयभावे वाक्यार्थनिर्वाहे क्लेशमगत्या स्वीकार्यमेतावता प्रदर्श्य, तावतैव भिन्नयोरुपादानोपादेयभावस्य युक्तत्वमासूच्य, तत्र भाष्यस्वारस्यं व्यासार्यवचनञ्च प्रमाणयति कृत्स्नस्येत्यादिना। मुण्डकोपनिषत्प्रकाशिकायामिति। उपादानत्वनिर्वचनादिकमपि तत्र विस्तरेण द्रष्टव्यम्।

अत्र पक्षे स्थितं वाक्यार्थवर्णनादौ अक्लेशमेव प्रपञ्चयति अस्मिन् पक्षे इति।

ननु ऐतदात्म्यमिदमित्यत्रात्मशब्देन किं स्वरूपमुच्यते, उत नियन्तृत्वम्। नाद्यः ; चिदचित्प्रपञ्चस्य ब्रह्मस्वरूपत्वाभावात् । न द्वितीयः ; शरीरात्मभावे 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति पूर्ववाक्योक्तसदुपादानकत्वसदन्तर्यामिकत्वयोर्हेतूकरणं विरुध्येत। न चेष्टापत्तिः। "तत्र च हेतुरुक्तः, 'सन्मूलाः सोम्येमास्सर्वाः प्रजाः सदायतनाः" इति भाष्यविरोधप्रसङ्गात। 'सर्वं खल्विदं ब्रह्म तज्जलानिति' इति श्रुतावव च सदुपादानकत्वसदन्तर्यामिकत्वयोः सर्वस्य ब्रह्मात्मकत्वे हेतूकरणादिति चेत्—न। विशिष्टयोरेवोपादानोपादेयभाव इति पक्षेऽप्यस्य दोषस्य समानत्वात् ।

कथं तर्ह्यस्य दोषस्य निस्तार इति चेत्—उच्यते ।

आत्म्यशब्दो व्याप्यवचनः 'अदृश्येऽनात्म्येऽनिरुक्ते' इत्यत्र आत्म्यशब्दस्य व्याप्यार्थकत्वाश्रयणात् । **ऐतदात्म्यम्** उपादानभूतेनान्तर्यामिभूतेन च ब्रह्मणा व्याप्यमित्यर्थः । 'मृदा कुम्भादिकं यथे'त्युपादानस्यापि व्यापकत्वप्रसिद्धेः। एतदात्म्यमेव ऐतदात्म्यम् । स्वार्थे अण्[1] । एष आत्मा यस्येति पक्षेपि स्वार्थे ष्यञ आश्रयणीयत्वात् । अस्मिंश्च पक्षे 'ऐतदात्म्यमिदं सर्वं', 'स आत्मा' इत्यनयोर्न पौनरुक्त्यशङ्का। अत एव, 'रामानुजं लक्ष्मणपूर्वजात'मितिवत् आदरातिशयादुपपद्यत इति परिहाराश्रयणक्लेशोऽपि नाश्रयणीयः। **तत् सत्यम्** । एतदात्मकत्वमेव **सत्यं** प्रपञ्चस्य प्रामाणिकमित्यर्थः । **ऐतदात्म्यमिदं सर्वं** तत् **सत्य**मिति वाक्यस्यैवं वाऽर्थः—**सत्यं** प्रमाणप्रतिपन्नं **तदिदं सर्वं** जगत् **ऐतदात्म्यम्** अनेन ब्रह्मणा व्याप्तमित्यर्थः(?) । अत्रासत्यस्य शशशृङ्गादेस्तुच्छस्य व्याप्तत्वाभावेऽपि प्रमाणप्रतिपन्नस्य सर्वस्यापि ब्रह्मव्याप्तत्वमस्तीति भावः । **सः आत्मा** नियन्तेत्यर्थः ।

1. ष्यञ् ख. ग.

हेतूकरणम् हेतुत्वाभिसंधिना श्रुत्या सदुपादनकत्वादिवचनम्। **न चेष्टापत्तिरिति** । श्रुतेः सोऽभिसंधिर्नेष्यत इति नेत्यर्थः ।

तत्सत्यमित्यत्र तत्पदस्य शुद्धब्रह्ममात्रपरत्वे प्रपञ्चस्यासत्यत्वापत्तिरिति एतदात्मकत्वपरत्वमुक्तम्। तथा धर्ममात्रपरत्वे क्लेशाद् वाक्यमन्यथा योजयति **ऐतदात्म्यमित्यादिना** । एतद्विचारो यथास्थानं टिप्पणे द्रष्टव्यः ।

विशेष्यस्य विशेषणांशं प्रत्युपादानत्वमस्तीत्यस्मिन् पक्षे 'सदेव सोम्येदमग्र आसीत्' इत्यत्रेदंशब्दस्य कथमश्रुतवेदान्तं श्वेतकेतुं प्रति ब्रह्मपर्यन्तप्रतीतिजनकत्वमिति शङ्काया अपि नावकाशः।

ननु उक्तरीत्या भिन्नयोरुपादानोपादेयभावसमर्थनेऽपि—, 'सदेव सोम्येदमग्र आसीत्', 'सर्वं खल्विदं ब्रह्मे'ति परस्परभिन्नविशेषणविशेष्यवाचिनोर्जगद्ब्रह्मवाचिशब्दयोः कथं सामानाधिकरण्यमिति चेत्—न; अपृथक्सिद्धवाचित्वस्यैव सामानाधिकरण्यप्रयोजकतया लोकवेदयोर्दृष्टत्वात् चिदचित्प्रपञ्चस्य तच्छक्तित्वेन तच्छरीरत्वेन[1] च तयोरभेदोपचारेणाभेदनिर्देशानां सदेवेदमित्यादिरूपाणामुपपत्तेः। शक्तिशक्तिमतोर्दण्डघटादिवदत्यन्तभेदाभावात्। विशेषणभूतप्रपञ्चांशे ब्रह्मण उपादानत्वाभावे 'न विलक्षणत्वा'दित्यधिकरणस्य वा, 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इत्यधिकरणस्य वा निरालम्बनत्वप्रसङ्गात्। ब्रह्मणो ब्रह्म प्रत्युपादानत्वे विलक्षणत्वशङ्काया वा, ब्रह्मणो जगद्रूपेण परिणामाभावे कृत्स्नप्रसक्तिनिरवयवत्वशब्दकोपाशङ्कयोर्वा अप्रसक्तेः।

1. तच्छरीरकत्वेन ख. ग

कथं सामानाधिकरण्यमिति चेन्नेति। अत्र अनिचर्चायां क्रियमाणायामेवं सुवचम्—

विशिष्टस्येव विशेषणस्यापि विशेष्यं प्रति उपादेयत्वं काममस्तु। अत एव उपादानत्वनिर्वचनमप्युभयानुगतं मुण्डकोपनिषत्प्रकाशिकोक्तमप्यस्तु। संभवति व्यवहारानुगमे तदुपेक्षणायोगात्। अथापि समानाधिकरणवाक्यानामपृथक्सिद्धिरूपाभेदस्य विभक्तिविवक्षितत्वं न युक्तम्; तस्यामुख्यत्वात्। उक्तं ह्यत्रैव. "अभेदोपचारेणाभेदनिर्देशानां सदेवेदमित्यादीनामुपपत्तेः" इति। प्रपञ्चितश्चेदमस्माभिः आचार्यभाष्यतात्पर्ये (ई. उ-१६.)। अत्रापि, भाष्य एव तत्त्वमसिघट्टे इदमाविष्करिष्यते। एवमपृथक्सिद्धिरूपाभेदतात्पर्ये च आरम्भणवाक्यैस्तार्किकखण्डनस्य नैव प्रसक्तिः। अवयवावयविभेदेपि अपृथक्सिद्धयैव मृदयं घटइत्यादिव्यवहारस्य, एकविज्ञानेन सर्वविज्ञानस्य चोपपन्नत्वात्। एतदन्यथानुपपत्त्या कार्यकारणैक्यमवस्थाभेदमात्रञ्च नोपपादयितुं शक्यत इति एवं तार्किकखण्डनं हि न स्यात्। अवश्यमेव च, 'तत् तेज ऐक्षत', 'ता आप ऐक्षन्ते'त्यत्र तेजआदिपदे विशिष्टपरत्वं वक्तव्यम् ईक्षणकर्तृत्वान्वयायेति, 'तत् तेजोऽसृजते'त्येवं तेजश्शब्दाद्यपि तत्समानार्थमिति, सिद्धमेव, 'बहु स्या'मिति बहुपदम्, इदमितिपदञ्च विशिष्टवाच्येवेति क्व विशेषणमात्रपरता।

विशिष्टस्यैवोपादानोपादेयभावे विलक्षणत्वाधिकरणविरोधोऽपि न। तत्र हि—स्थूलावस्था ब्रह्मोपादेयतावच्छेदिका न भवति, तद्विलक्षणनिष्ठत्वात्। यत् यद्विलक्षणनिष्ठम्, न तत्

नन्वेवम्, 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यधिकरणे प्रपञ्चस्योपादानभूतब्रह्मणा अभेदासम्भवादुपादानोपादेयाभेदसमर्थनं विरुद्धयेतेति चेत्—

[भवन्मतेऽपि ब्रह्मणो ब्रह्माभेदस्य सिद्धतया अधिकरणवैयर्थ्यप्रसङ्गात्। तर्हि जगतोऽनन्यत्वं कथमुपपादनीयमिति चेत्– न हि तस्मिन्नधिकरणे उपादानोपादेयस्वरूपाभेदः समर्थ्यते। तयोरभेदे कारकव्यापारवैयर्थ्यप्रसङ्गात्। अपितु तदभिन्नसत्ताकत्वम्। तत्सत्तातिरिक्तसत्तानपेक्षित्वमिति यावत्। न च तत्सत्तातिरिक्तसत्ताशून्यत्वमात्रेण प्रपञ्चस्य मिथ्यात्वं शक्यशङ्कम्, गुणगतजात्यनभ्युपगन्तृमते रूपादिगतसत्ताजात्यनभ्युपगमेपि द्रव्यगतसत्तयैव रूपादिषु सदितिव्यवहाराभ्युपगमेपि तन्मिथ्यात्वाप्रसक्तिवत् उपादानसत्तयैव उपादेये सदितिप्रतीत्युपपत्तौ सत्तान्तरकल्पने मानाभावादिति युक्त्या सत्तान्तरानभ्युपगममात्रेण मिथ्यात्वशङ्कायाः बुद्धिदौर्बल्यकारितत्वात्। 'नैकस्मिन्नसम्भवात्'इतिसूत्रे, "कालस्य पदार्थविशेषणतयैव प्रतीतिः। तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्याः। कालोऽस्तीति व्यवहारो जात्याद्यस्तित्वव्यवहारतुल्यः" इति

तदुपादेयतावच्छेदकमिति पूर्वपक्षः। तत्र व्यभिचारप्रदर्शनम्, 'दृश्यते तु' इति सूत्रेण। अथ स्थूलावस्था ब्रह्मोपादेयतावच्छेदिका न भवति, ब्रह्मनिष्ठत्वाभावादिति साधनार्थम्, सा न ब्रह्मनिष्ठा तद्विलक्षणनिष्ठत्वादित्याक्षेपे, कार्यकारणयोर्वैलक्षण्येऽपि अभेदस्याक्षतत्वादत्रापि व्याप्तिभङ्गः असदिति सूत्रेऽभिप्रेतः। तर्हि तादृशावस्थानां ब्रह्मनिष्ठत्वे ब्रह्मजगदभेदादसामञ्जस्यशङ्कायाम्, 'न साक्षात् तन्निष्ठत्वम्, किंतु प्रकृतिरूपतानुद्वारा, आत्मनि बालत्वादिवत्' इति, 'न तु दृष्टान्तभावा'दित्यनेन दर्शितम्। तावता विशेष्यं प्रति विशेषणस्योपादेयत्वमेष्टव्यमिति न सिध्यति। तथाचोपादेयतावच्छेदकीभूतस्थूलावस्थाश्रयत्वं सद्वारकं ब्रह्मणोऽपि भवतीत्यस्याज्ञानात् पूर्वपक्षः; तत्प्रतिबोधनञ्च सिद्धान्ते इति सुवचम्। एवञ्च विलक्षणत्वाधिकरणे प्रपञ्चगतावस्थामादायैव ब्रह्मण उपादानत्वं समर्थ्यते; प्रकृत्यधिकरणे च परिणामसूत्रे स्वगतावस्थामादायापि तदिति विवेक्तव्यम्।

कृत्स्नप्रसक्त्यादिशङ्का तु विशिष्टोपादानत्वपक्षेऽपि भवतीति श्रीभाष्य एव दर्शितमस्ति। आरम्भणाधिकरणे च, 'असदिति चेन्न प्रतिषेधमात्रत्वात्' इति सूत्रे यत् अनन्यत्वमुक्तम्, तदेवानन्यत्वमाक्षिप्य स्थाप्यत इति भाषितमेव। न हि अपृथक्सिद्धिरूपाभेदः तत्र सूत्रे उक्तः। सर्वमिदमिह सप्तमखण्डभाष्येऽन्तेऽभिप्रेतमित्यपि द्रष्टव्यम्।

एवमपि यदि गुणगुणिनयेनापृथक्सिद्धविशेषणं प्रति ब्रह्मण उपादानत्वमिष्यते, तदन्यत्। परंतु, 'सर्वं खल्विदं ब्रह्मे'त्यत्र सर्वपदस्य विशिष्टपरत्वाभावे मुख्याभेदपरसामानाधिकर-

स्पष्टमेव भगवता भाष्यकृता भाषितत्वात् । व्यासार्यैरपि, 'पृथक्प्रतिपत्तिकार्याणामेव पृथगुत्पत्त्यादिकमपेक्षितम् । अवस्थायास्तु पृथक्स्थितिप्रतिपत्तिकार्यानर्हत्वात् न पृथगुत्पत्यादिकमपेक्षितम्' इति निर्णीतम् । अतोऽपृथक्सिद्धानां पृथक्सत्ताऽनपेक्षितेति सिद्धम् । अपृथक्सिद्धत्वे च पृथगुत्पत्त्याद्यनपेक्षा तज्ज्ञाततयैव ज्ञातत्वमुपपद्यत इति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाऽपि सिद्ध्यति । ततश्च आरम्भणशब्दादिभ्यः उप(?)साध्यमानमनन्यत्वम्, 'अनन्या राघवेणाहं भास्करेण प्रभा यथा' इतिवत् अपृथक्सिद्धत्वलक्षणमेव; न तु स्वरूपाभेदः । अपृथक्सिद्धकारणत्वमेव च उपादानत्वम् —। अयं चार्थो विस्तरेण मुण्डकोपनिषत्प्रकाशिकायां प्रपञ्चितः । पक्षान्तरञ्च उपन्यस्तम् । तयोर्मध्ये यत् उक्तम् (युक्तम्?), तद् विद्वद्भिः स्वीक्रियताम्[1] ।]

('अनन्या राघवेणाहं भास्करेण प्रभा यथा' इतिवत् अपृथक्सिद्धत्वलक्षणाभेदस्यैव समर्थितत्वात् । तावतैव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेश्च । अपृथक्सिद्धकारणत्वस्यैवोपादानशब्दार्थत्वात्)।

(न तस्मिन्नधिकरणे उपादानोपादेययोः स्वरूपाभेदः समर्थ्यते । तयोरभेदे कारकव्यापारवैयर्थ्यप्रसङ्गात् । अपितु तदपृथक्सिद्धत्वम् । तच्च तत्सत्ताधीनसत्ताकत्वम् । एतादृशस्यापृथक्सिद्धत्वस्याभेदव्यवहारप्रयोजकत्वम्, 'यदधीना

]. [ ] एवं कुण्डलितोऽयं क. पाठः । घ. पाठस्तु (, एवं कुण्डलितः ख. ग. कोशयोस्तु ( ) एवं पुनः कुण्डलितः । अत्र किञ्चिद्विचार्यम् । यथा—

ण्यायोगात् सर्वत्रप्रसिद्धयधिकरणभाष्याद्यनुरोधात् विशिष्टपरत्वमेवेति तत्र कथं तदनत्वान्वय इत्येतदवशिष्यते ।

तत्रेदमुपक्षिप्यते । जीववाचिपदस्य जीवविशिष्टपरत्वेऽपि अनन्यथासिद्धजीवलिङ्गान्वयो यथेष्यते, यथा च व्यासार्यैः, 'ब्राह्मणो यजेतेत्यादौ ब्राह्मणादिशब्दानां ब्रह्मपर्यन्तत्वेऽपि ब्राह्मणः शुक्ल इतिवत् विशेषणभूतजीवमात्रे कर्मवश्यत्वान्वयः' (३-२-१४) इति, 'ब्रह्माध्यतिष्ठद् भुवनानि धारयन्निति भुवनानि धारयन् ईश्वरो ब्रह्मशब्दवाच्यंस्वात्मानमेवाध्यतिष्ठत्' (१-४-२५) इति चोक्तम्, तथा भविष्यति । विशेष्ये बाधितं विशेषणमुपसंक्रामतीति न्यायस्य सर्वसंप्रतिपन्नत्वादिति ।

तथाचातिचर्चायामेवमुक्तावपि, 'स्वमपीतो भवति पुरुष' इत्यत्रेह समानाधिकरणनिर्देशाभावात् पुरुषपदेन जीवमात्रस्य लोकप्रसिद्धिप्रदर्शनबलविवक्षणीयस्य ग्रहणेऽपि स्वपदेन विशिष्टब्रह्मग्रहणेन तत्रास्य संभावितस्य लयप्रकारस्य अपीतपदेन कथनसंभवात् किमत्र विशिष्टपरत्वे विशेषास्थया । सन्मूला इति वाक्ये च प्रजाशब्दो विशेषणमात्रपर एव, तावतैवान्वयसामञ्जस्यादिति भाष्यस्यान्तर आशय इति ।

यस्य सत्ता तत् तदित्येव भण्यते'इति प्रमाणसिद्धम । अतो न तदधिकरणविरोधः।

यद्वा अस्मन्मते स्थूलचिदचिदात्मकप्रपञ्चस्येव तद्विशिष्टस्यापि ब्रह्मण उपादेयत्वादुपादानभूतसूक्ष्मचिदचिच्छरीरकस्य ब्रह्मण उपादेयभूतस्थूलचिदचिद्विशिष्टब्रह्माभेदसमर्थनपरतया आरम्भणाधिकरणस्योपपत्तेर्न चोद्यावकाशः। वस्तुतस्तु यथा को भवानिति सौवीरराजप्रश्नस्य प्रकृतिसंसृष्टात्मविषयत्वेऽपि वस्तुगत्या भवच्छब्दमुख्यार्थत्वं परिशुद्धात्मस्वरूपस्यैवोचितमिति मत्वा तस्यैव भवच्छब्दमुख्यार्थत्वं प्रदर्शयन् आदिभरतः, ' यदा समस्तभूतेषु पुमानेको व्यवस्थितः ' इति प्रत्यवोचत्— यथा वा अथर्वशिरसि रुद्रं प्रति देवैः प्रयुक्तस्य, 'को भवान्' इति प्रश्नस्य पुरोवर्तिरुद्रमात्रपरत्वेऽपि भवच्छब्दस्य परमात्मपर्यन्तत्वशिक्षणाय, ' अहमेकः प्रथममासम् ' इत्यादिप्रतिवचनप्रवृत्तिः,— एवमेव, ' इदमग्र आसीत् ' इतीदंशब्दस्य विशेषणमात्रपरत्वे प्राप्ते विशेष्यपर्यन्तत्वशिक्षणाय स्थूलचिदचिच्छरीरं ब्रह्म प्रति सूक्ष्मचिदचिच्छरीरकं ब्रह्म उपादानमित्येतदर्थप्रतिपादकस्योत्तरसन्दर्भस्य प्रवृत्तौ दोषाभावादिति द्रष्टव्यम्। अयं चार्थः 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत' इति श्रुतिव्याख्यानावसरे बृहदारण्यकप्रकाशिकायां प्रतिपादितः तत्रानुसन्धेयः ।

अतश्च आरम्भणाधिकरणे तदनन्यत्वमित्यनेन 'अनन्या राघवेणाहं भास्करेण प्रभा यथा' इतिवदपृथक्सिद्धत्वलक्षणाभेदस्यैव समर्थितत्वात्। तावतैवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेश्च। अपृथक्सिद्धकारणत्वस्यैवोपादानशब्दार्थत्वात्।

इह च ' यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति ' इत्यत्र पुरुषशब्दितस्य कार्यावस्थजीवस्य कारणावस्थस्वशब्दितजीवविशिष्टतया स्वशब्दवाच्येन परम्परया स्वावस्थाश्रयतयोपादानभूतेन सता सम्पत्तेरपि सूपपादतया ' प्राज्ञेनात्मना संपरिष्वक्तः ' इति श्रुत्यैकार्थ्यमपि स्वरसत एव सिद्धयतीत्यलमतिचर्चया)।

यद्वेति, वस्तुतस्तु इति च पक्षद्वयात् पश्चात् अतश्चेत्यादिना पूर्वोक्तापृथक्सिद्धयुपसंहारस्यायोगः। तथा अतश्चेत्यादिवाक्यं केवलपञ्चम्यन्तमात्रेण समाप्तं न शोभनम्। अतश्चेत्यधनन्तरं तु इहचेत्यतः पूर्वं यद्वेत्यादि स्यात्। अन्यथा वा। अत्र ' बृहदारण्यकप्रकाशिकायां प्रतिपादित ' इत्युक्तञ्च इदंशब्दस्य विशिष्टपरत्वोपपादनशेषभूतम्। क. कोशपठो मुण्डकप्रकाशिकानुसारी। एवमपि उपरि, ' यत्र नान्यत् पश्यति ' (७-२४) इति वाक्यभाष्ये तत्सत्ताधीनसत्ताकत्वरूपार्थस्यैवादरणात् मुण्डकप्रकाशिकावैलक्षण्यस्य किञ्चित्प्रतीतेः ख. ग. पाठस्वीकार इह वक्ष्यमाणैकरूप्याय युक्त इव। इहच इत्यादिकञ्च प्रकृतोपयुक्तं पाठान्तरे अदृश्यमानं ख, ग. कोशत एव ग्राह्यमस्ति।

स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा बन्धनमेवोपश्रयते, एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा प्राणमेवोपश्रयते। प्राणबन्धनँ हि सोम्य मन इति ॥ २ ॥

प्रकृतमनुसरामः ॥ **स यथा**— । यथा पक्षी शकुनिघातकस्य हस्तगतेन सूत्रेण बद्धः प्रतिदिशं पतित्वा आश्रयान्तरमलब्ध्वा बन्धनं हस्तमेवाश्रयते, एवमेव हे सोम्य! सुषुप्तिकाले **तत्** 'अन्नमयं हि सोम्य मन' इति प्राङ्निर्दिष्टं मनः दिशंदिशं पतित्वा जाग्रत्स्वप्नयोर्नानाविधविषयग्रहणव्यापृतं भूत्वाऽपि तत्रतत्रायतनं विश्रममलब्ध्वा विश्रमाय मुख्यप्राणेन संश्लेषविशेषमापद्यत इत्यर्थः । अत्र हेतुमाह— **प्राणबन्धनं हि सोम्य मन इति**— यतः प्राणे हि मनः निबध्यते इत्यर्थः । [1]यतः प्राणे हि मनः निबध्यते, अत एव हि प्राणे उत्क्रान्ते मनआदीनामप्युत्क्रमः[2] । अतश्च[3] सुषुप्तिदशायां वागादीन्द्रियसहितं मनः, 'वाङ् मनसि सम्पद्यते, मनः प्राणे' इति मरणकालोक्तन्यायेन प्राणे संश्लेषविशेषमापन्नं सत् उपरतव्यापारं भवति । सुषुप्तिदशायां प्राणमात्रमनुपरतव्यापारमास्ते; 'स यदा स्वपिति प्राणमेव वागप्येति, प्राणं चक्षुः, प्राणं श्रोत्रम्, प्राणं मनः' इति श्रुतेः ।

1. यतः— निबध्यत इतीदं न **ख.** कोशे। 2. उत्क्रामः **ख. ग.** 3, अतः **ख.**

मुख्यप्राणेनेति । नात्र प्राणशब्दः शाङ्करे सद्विद्याविजये चोक्तरीत्या परमात्मपरो जीवात्मपरो वा। किंतु स्वरसप्रतीतमुख्यप्राणपर एवेति भावः। अयमर्थः श्रुत्यैव दर्शितोऽपीत्याह **स यदा स्वपितीत्यादिना**। **स यथा शकुनिरित्यादिवाक्यं** किमर्थं प्रवृत्तमिति चेत्—विषयप्रवणत्वान्मनसः, सुषुप्तिरेव कथमित्याशङ्काशमनार्थम् ।

एवं प्राणे मनःप्रभृतिनिरोधेन क्रियमाणसुषुप्तिमुखेन प्रजाशब्दार्थभूताचेतनविशिष्टचेतनांशभूतस्य चेतनस्य सदुपादानकत्वमुपपाद्य अचेतनांशेऽपि सदुपादानकत्वं सुषुप्तिकालिकप्राणसहकृताग्निकार्यमुखेनोपरि कथ्यते । अशनायापिपासे हि गृहीत्वा तत् उपरि कथ्यते । ते च, 'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' इत्युक्तरीत्या तस्यामेव सुषुप्तौ उक्तप्राणेन स्वसहकृतजाठराग्निना अशितपीतजरणं विधाय आपाद्यमाने इति । अतोऽपि पूर्वं मुख्यप्राण एव प्रस्तुत इति ध्येयम् ।

अशनाया[1]पिपासे मे सोम्य विजानीहीति । यत्रैतत्पुरुषोऽशिशिषति नाम, आप एव तदशितं नयन्ते । तद् यथा गोनायोऽश्वनायः पुरुषनाय इति, एवं तदप आचक्षतेऽशनायेति । तत्रैतच्छुङ्गमुत्पतितँ सोम्य विजानीहि, नेदममूलं भविष्यतीति ॥ ३ ॥

तस्य क्व मूलँ स्यादन्यत्रान्नात् ।

1. अशनापिपासे शां. मा.

एवं जीवस्य परमात्मोपादेयत्वसिद्ध्यर्थं सुषुप्तिकाले परमात्मसम्पत्तिं तत्प्रसङ्गात् वागादीन्द्रियाणां प्राणे संश्लेषविशेषञ्च प्रतिपाद्य अशनायादिनामनिर्वचनमुखेन च (मुखेनापि) परमात्मनो जगन्मूलतामुपपादयति — **अशनायापिपासे मे सोम्य विजनीहीति** । स्पष्टोऽर्थः । **यत्र — नयन्ते—** । **यत्र** यदा पुरुषोऽशिशिषतीत्येतन्नाम । पुरुषोऽशिशिषतीति शब्दं यदा लोकाः प्रयुञ्जत इत्यर्थः । [1]यदा पुरुषस्याशिशिषा भवतीति यावत् । **नाम**शब्दः प्रसिद्ध्यर्थो वा । तदा आपः तदशितं **नयन्ते** । जीर्णतां प्रापय्य रसरूपेण शरीरं नयन्ते । तेन अशिते जीर्णे पुनरशिशिषा जायते इत्यर्थः । **तद्यथा — अशनायेति** । गां नयतीति **गोनायः** । यथा गोनेतारं गोनाय इत्याचक्षते, यथा वा अश्वनेतारं पुरुषनेतारञ्च अश्वनायः पुरुषनाय इत्याचक्षते लौकिकाः, एवमशितनेत्रीरपः अशनायेत्याचक्षत इत्यर्थः । **तत्र— विजानीहि** । अद्भिः रसभावं नीतेऽन्ने उत्पन्नमेतद् शरीरास्यं शुङ्गसदृशं [2]कार्यं विजानीहीत्यर्थः । नन्वमूलमेवेदं भवतु इत्यत्राह — **नेदममूलं भविष्यतीति**— [[3]कार्यमात्रस्य सकारणकत्वादित्यर्थः ।

तर्हि तस्यान्नातिरिक्तं मूलान्तरं कल्प्यतामित्यत्राह —] **तस्य — अन्नात्** । [4]कार्यस्य शरीरस्य [5]समूलकत्वात्, मूलान्तरस्य चानुपलम्भात्, [6]उप-

1. यद्वा नाम प्रसिद्धौ । एतत्पुरुषः एष पुरुषः । यदा पुरुषस्याशिशिषा भवतीति यावत् क. 2. वटशुङ्गसदृशं शुङ्गं विजा – क. 3. नेदं क. कोशे । 4. कार्यशरीरस्य ख. ग. 5. सन्मूल ग. 6. उपलब्धमिति न क.

एवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छ, अद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ ।

सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ ४ ॥

अथ यत्रैतत्पुरुषः पिपासति नाम, तेज एव तत् पीतं नयते । तद् यथा गोनायोऽश्वनायः पुरुषनाय इति, एवं एतत् तेज आचष्ट उदन्येति । तत्रैतदेव शुङ्गमुत्पतितँ सोम्य विजानीहि । नेदममूलं भविष्यतीति ॥ ५ ॥

तस्य क्व मूलँ स्यादन्यत्राद्भ्यः । अद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ ।

सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ।

यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति, तदुक्तं पुरस्तादेव भवति ।

लब्धमन्नमेव मूलमित्यर्थः । **एवमेव खलु—अन्विच्छ** । यथा शरीरेण कार्यभूतेनोपचीयमानेन तत्कारणमन्नमनुमीयते, एवमेव अन्नेन कार्येण अपः कारणमनुमिनु[1] जानीहीति यावत् । एवमुत्तरत्रापि । ततः किमित्यत्राह । **सन्मूलाः—सत्प्रतिष्ठाः** । एतस्य वाक्यस्यार्थः पूर्वमुक्त एव ।

अथ — उदन्येति । उदकनेतृत्वात् तेजः उदन्येत्युच्यत इत्यर्थः । **तत्रैतदेव शुङ्गमुत्पतितं सोम्य विजानीहि** । तत्र तेजसा शोष्यमाणास्वप्सु उत्पन्नं देहाख्यं शुङ्ग[2]मित्यर्थः । शिष्टं पूर्ववत् ॥ **तस्य—सत्प्रतिष्ठाः** । पूर्ववदर्थः ।

ननु तेजोबन्नमूलकत्वे शरीरस्य लोहितमांसादिरूपेण परिणामः कथं स्यादित्याशङ्क्य पूर्वोक्तं स्मारयति । **यथा तु खलु—भवति** । ' अन्नमशितं त्रेधा विधीयत ' इत्यादिना पूर्वमुक्तं भवतीत्यर्थः ।

1. अनुमिनुहीति यावत् । एवमुत्तरत्रापि सत्पर्यन्तं कारणपरम्परामनुमिनुहीत्यर्थः **ख. ग.** 2. अब्विकारलोहितादिप्रचुरत्वादित्यर्थः **क.**

क्व मूलमिति । शुङ्गः अङ्कुरः । न च मूलं विना अङ्कुरोऽस्तीति । अद्भिः पीताभिः अशितस्य कठिनस्य द्रवीभावः प्रथमं जठरे । तेनान्नस्य अप्सु लयः सिध्यति । द्रवीभूतानाञ्च जाठराग्निना पाचनं रसादिपरिणामौपयिकं शोषणम् । तत्र शोषणवशादपां न्यूनत्वम् अबंशानामग्नौ लयादेवेति लयमुखेनोपादानमत्र खण्डे निरूपितं भवति ।

अशितादेः शरीररूपेण परिणामः कथा विधयेत्यत्र पूर्वोक्तं स्मारयति **यथा त्विति** ।

अस्य सोम्य पुरुषस्य प्रयतो वाङ् मनसि संपद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायाम्।

एव सुषुप्तौ सत्सम्पत्तिं जीवस्य प्रदर्श्य प्रयाणकालेऽपि सत्सम्पत्तिं प्रदर्शयति। **अस्य—देवतायाम्। प्रयतः** म्रियमाणस्येत्यर्थः। अत्र वाचो मनः-प्रकृतिकत्वासम्भवात् व्यापारोपरमहेतुभूतसंश्लेषविशेष एव वाचो मनसि लयः। मनसः प्राणे लयोऽपि तादृश एव।

"मनसि करणग्रामं प्राणे मनः पुरुषे च तं
झडिति घटयन् भूतेष्वेनं परे च तमात्मनि।"

इत्युक्तरीत्या प्राणो जीवे सम्पन्नस्सन् जीवेन सह तेजश्शब्दोपलक्षितेषु सर्वेषु भूतेषु सम्पन्नो भवति। ततः परं सुखदुःखोपभोगायासविश्रमाय तेजश्शब्दि-तानां सजीवानां भूतसूक्ष्माणां **परस्यां देवतायां** परमात्मनि सम्पत्तिर्भवतीत्यर्थः।

एवमशनायोदन्यानिर्वचनेन अन्नस्याप्सु, अपां तेजसि च लयो दर्शितः। न तेजसः सति लयः। तदर्थं प्रायणरीतिं प्रदर्शयति **अस्य सोम्येत्यादिना**। एवम्परमिदं वाक्यं सुषुप्ताविव प्रायणेऽपि पुरुषस्य सत्संपत्तिपरमपि भवितुमर्हति, चिदंशस्योपादेयत्वोपपादनाय खण्डारम्भात् इत्यभिसंधायावतारयति **एवं सुषुप्ता**विति।

तेजसीति। सत्सु भूतान्तरेषु तेजोमात्रकथनं तस्यैव सति लयस्य संप्रति वक्तव्यत्वात्। तेजोंशाधिक्याच्च। अत एव मरणानन्तरमौष्ण्यानुपलम्भः। ऊर्ध्वगतिश्च तेजसस्सुकरा। अत एवावरोहत्सु जीवेषु पतनौचित्याय अबंशस्यैवाधिक्यं सोमराजभावापगमे पर्जन्यपरिष्वङ्गानुगुणं संपद्यमानम्; न तेजोंशस्येति। अत्र तेजश्शब्दस्य भूतान्तरोपलक्षणत्ववत् वाक्छब्दस्य इन्द्रियान्तरोपलक्षणत्वमपि द्रष्टव्यम्। विशिष्य तत्कथनञ्च उपकरणमध्ये वाक्छक्षुश्श्रोत्रमनः-प्राणानां पञ्चानामेव प्राधान्यस्य केनादिसर्वोपनिषदादृतत्वात्, तत्रापि वाङ्मनःप्राणानां प्राधान्यस्य बृहदारण्यके स्पष्टत्वात्; अत एव **अन्नमशितं त्रेधे**ति समनन्तरस्मारिते वाक्ये एषां त्रयणामेवा-शितसंबन्ध्यणिष्ठांशत्वावेदनेन मनःप्राणवत् वाच एवोपस्थित्यतिशयाच्चेति भाव्यम्।

अमुख्य एवायं लयः, मुख्यलयोऽप्येवंरीत्या भाव्य इत्याशयेन दर्शितः। चितः परमात्मनि तु लय इहापि मुख्य एव। अत एव भाष्ये तन्मात्रग्रहणेन प्रायणवाक्यावतारणम्। **परस्यामिति** पदविशेषेण, तस्याः कुत्र लय इति शङ्का निरुद्धा।

स य एषोऽणिमा (1६) **ऐतदात्म्यमिदँ सर्वम्। तत् सत्यम्। स आत्मा। तत् त्वमसि श्वेतकेतो इति।**

1. उत्तरखण्डेष्विवात्रापि **स य** इत्यतः पूर्वमेव वाक्यसमाप्तिः शाङ्करादौ। अत्रापि क्वचित् कोशे।

स य एषोऽणिमा। एतादृशः सच्छब्दितः स एषः अणिमा अणुवद्दुर्विज्ञेयः। मानान्तरागोचर इत्यर्थः। **ऐतदात्म्यं — आत्मा।** अस्यार्थः पूर्वमेवोक्तः। एवं सर्वत्र सिद्धं सदात्मकत्वं श्वेतकेतावुपसंहरति **तत्त्वमसि श्वेतकेतो** इति। [1]**त्वं**-शब्दोऽन्तर्यामिपर्यन्तः।

1. वाक्यमिदं क. कोशे।

स य एषोऽणिमेत्यादिकं नवस्वपि खण्डेषु अभ्यस्यते इति इदमेव प्रतिपिपादयिषितम्। प्रष्टुराशयं विज्ञाय तज्जिज्ञासाशमनाय अस्यैव भङ्गीभेदेन सर्वत्रोपपादनम्। इदं श्रुत्वा च श्वेतकेतुः, 'य एषोणिमा, ऐतदात्म्यमिदं सर्वम्, तत् सत्यम्, स आत्मा, तदहमस्मी'त्यनुसंदध्यात्। तदनेनोपास्यसमर्पणं क्रियते। तत्र **सयएषोऽणिमे**त्यस्य यः स उक्तः उत्पत्तिलयस्थानत्वादिना, **एषोऽणिमा** सूक्ष्म इत्यर्थे अणिमत्वमप्यत्र विधेयम्। यदि तु, "सैव हि सत्यादयः" इति **सूत्रे** अणिमादय इत्यनिर्देशात् **भाष्ये**ऽपि सत्यत्वाद्युपपादनभाषणाच्च सत्यत्वादिकमेव प्रकृतवाक्यविधेयमिति मन्यते, तर्हि 'य एषोऽणिमे'ति उत्पत्तिलयहेतुतौपयिकसूक्ष्मताविशिष्टतया पूर्वखण्डसिद्धार्थानुवादमात्रमिति, य एषोऽणिमा ऐतदात्म्यमिदं सर्वमित्येकं वाक्यम्। **स य** इति तच्छब्दस्तु अत्रैव २-१-४, ३-१९-४. इत्यादिस्थलेष्विव यच्छब्देनैकतामापन्नः। अणिमांशस्याविधेयत्वादेवान्तिमखण्डे एतदनुक्तिः। एवञ्च इदं सर्वं सजीवं जगत् ऐतदात्म्यम्, एषोऽणिमा आत्मा यस्य तत्। 'सैव हि सत्यादयः' इति सूत्रबलादेव **सत्यपदं न इदं सर्व**मित्यस्य विशेषणम्। किंतु सतः सत्यत्वविधायकम्। **तत्** अणिमरूपं सूक्ष्मं विशिष्टं सत् सत्यम्। विधेयप्राधान्यात् **तत्, स** इति लिङ्गभेदः। **तत् सत्य**मित्यनेन, मृदादिवदुपादानभूतमपि यस्मादात्मभूतम्, तस्मात् निर्विकारम्; कुलालादिविलक्षणस्वतन्त्राधिष्ठातृत्वात् कर्तृत्वप्रयुक्तविकाररहितमपीत्युच्यते। **स आत्मे**त्यनेन, न केवलं कार्यकारणभावप्रयोजकावस्थाविशेषापन्नस्य, किन्तु तदनापन्नस्य द्रव्यस्याद्रव्यस्य सर्वस्यायमपृथक्सिद्धधर्मी साक्षाद्वा परम्परया वेति सर्वात्मत्वमुच्यते। **तत् त्वमसि** स्थूल एवम्भूतस्त्वं सर्वदा सूक्ष्मं तादृशं सदेवासीत्यर्थः।

तथाच पूर्वखण्डसिद्धजगदुत्पत्तिलयहेतुत्वापादकाणिमत्वेन सह सत्यत्वात्मत्वस्वान्तर्यामित्वानि उपास्यगुणाः सर्वैः खण्डैरथोपपाद्य कथिता भवन्ति। तत्त्वमसिविचारावसरे **भाष्ये ऐतदात्म्यमिति** पदस्य, 'तस्यैष आत्मे'ति विवरणात्, एष आत्मा यस्येति विग्रहो ज्ञायते।

ननु तत्त्वमसीत्यत्र मानान्तरसिद्धत्वेन उद्देश्योपादेयविभागाभावस्य भाष्यकृतोक्तत्वात् तच्छब्दानुरोधेन [1]प्रथमपुरुषो वा किं न स्यादिति चेत् — उच्यते। मानान्तरसिद्धत्वेऽपि त्वंशब्दार्थस्य तच्छब्दार्थापेक्षया प्रकृतित्वस्य विवक्षितत्वात्; प्रकृतेरेवास्तिक्रियाकर्तृत्वात् मध्यमपुरुषो भवति। अत एव 'यदग्ने स्यामहं त्वं त्वं वा स्या अहम्' इत्यत्र, अहं त्वं स्याम्, त्वं वा [2]अहं स्याः इति प्रकृत्याश्रयः पुरुषो भवतीति, 'युष्मद्युपपद' इति सूत्रे प्रतिपादितम्। ततश्च त्वंशब्दार्थस्य प्रकृतित्वस्य विवक्षितत्वात्, मानान्तरसदसद्भावयोरप्रयोजकत्वात्, त्वंशब्दार्थप्रकृतित्वाश्रयः असीति मध्यमपुरुष एव भवति। अत एव व्यासार्यैः — "आत्मेति तूपग-

1. प्रथमपुरुषोऽत्र स्यात् ग. 2. अहं वा त्वं ख. ग.

आत्मशब्दः शरीरप्रतिसंबन्धिपरः, न तु स्वरूपपरः। वैयर्थ्यात्। अत एव भाष्यम् "ऐतदात्म्यमिदं सर्वमिति प्रतिज्ञातार्थस्य तत्त्वमसीति सामानाधिकरण्येन विशेषे उपसंहारः" इति। अत्र सामानाधिकरण्यपदविशेषपदाभ्यां विवक्षितं विशदीकृतं व्यासार्यैः, "वैयधिकरण्येन प्रतिज्ञातस्य सामानाधिकरण्येनोपसंहारः; सामान्येन प्रतिज्ञातस्य विशेषे उपसंहार इत्यर्थः" इति। तेन सर्वमिति विशेषणमात्रपरम्, आत्मशब्दश्च शरीरप्रतिसंबन्धिपर इति सिध्यति। नन्वेतद्वाक्योक्तशरीरात्मभावे सन्मूला इत्यादिना हेतुकथनमिति कथमिति चेत्— उच्यते। केवलोपादानोपादेयभावे शरीरात्मभावो न सिध्यति; मृद्घटयोः तदभावात्। केवलधारणनियमनबलादपि न सः, शरीरादन्यस्यापि धार्यत्वात्, नियम्यत्वाच्च। उपादानत्वविशिष्टधारकत्वादि तु शरीरात्मभावसाधकम्, अव्यभिचरितत्वात्। एवम्, जगद्ब्रह्मणोर्यदि शरीरात्मभावो न स्यात्, तर्हि विशिष्टवेषेणोपपादनीय उपादानोपादेयभावः सार्वकालिकधार्यधारकभावादिश्च न स्यादिति तदन्यथानुपपत्त्या शरीरात्मभावसिद्धिरिति च सन्मूलत्वादेर्हेतुत्वम्। हेतुत्वमिदं ज्ञापकत्वरूपम्। शरीरं नाम चेतनापृथक्सिद्धद्रव्यम्, अपृथक्सिद्धिनिरूपकश्चेतन आत्मेति। इदमात्मत्वं धारकत्वोपादानत्वयोः प्रयोजकम्। अतोऽग्निधूमयोरिवेह यथार्हं कारकज्ञापकहेतुभाव इति।

तदेवं प्रकृतवाक्यस्य संभवन् अर्थो दर्शितः। न चैतावता ऐतदात्म्यमित्यादेः पूर्वं भाष्यदर्शितं विवरणममूलं मन्तव्यम्, वेदार्थसंग्रहे तथार्थस्योक्तत्वात्। आत्म्यमिति पदरीतिरपि तत्र टीकायां द्रष्टव्येति।

अत एव व्यासार्यैरिति। महासिद्धान्ते तथाऽनुक्तावपि आत्मत्वाधिकरणे तदुक्तेरेवमेवाशयः स्यादिति भावः। ईशावास्यश्रीदेशिकभाष्ये तु स्पष्टमिदम्। ततोऽधिकं न्यायपरि-

च्छन्ती "त्यधिकरणे तथैवोपपादितम्। 'न किञ्चिदुद्दिश्य किञ्चिद्विधीयत' इति भाष्यस्यानुवाद्यत्वविधेयत्वप्रतिषेधपरत्वेऽपि प्रकृतिविकृतिलक्षणोद्देश्यविधेयभावप्रतिषेधपरत्वाभावात्। **न्यायपरिशुद्धौ** — 'सुवर्णं खदिराङ्गारसदृशे कुण्डले भवतः' इति महाभाष्यवाक्यमुदाहृत्य [1]पुरुषस्योद्देश्यानुसारित्वनियमाभावः समर्थितः।

ननु तत्त्वमसिश्वेतकेतो इत्यत्र[2], "संबुद्धिस्तावत् आत्मविद्योपदेशेन श्वेतकेतुमात्रपर्यवसितेति नासंबोध्यसंबोधन" मिति **न्यायपरिशुद्ध्युक्तरीत्या** श्वेतकेतो इति संबोध्यत्वस्य परमात्मन्यसम्भवेन त्वंशब्दनिर्दिष्टत्वमपि परमात्मनो न सम्भवति त्वंशब्दस्य संबोध्यातिरिक्तविषयत्वस्य क्वाप्यदर्शनादिति चेत्—

अत्रोच्यते—'ऐतदात्म्यमिदं सर्वमित्युक्तस्य तत्त्वमसीति विशेषे उपसंहार' इति भाष्ये भाषितत्वात् तत्त्वमसीत्यत्रापि सर्वशब्दस्थानापन्नस्य त्वंशब्दस्य संबोध्यविषयभूतजीवमात्रपरत्वमेव। ऐतदात्म्यपदस्थानापन्नस्य तदित्यस्य तदात्मकत्वमेवार्थः। ततश्च सर्वं तदात्मकमितिवत् त्वं तदात्मक इत्यर्थः। न चैवं सति तच्छब्दस्य तदात्मकत्वे लक्षणा स्यादिति वाच्यम्—अपर्यवसानवृत्त्या त्वंशब्दस्य तदन्तर्यामिपरत्वपक्षस्यापि लक्षणापेक्षया जघन्यत्वात्। 'साक्षादप्यविरोधं जैमिनि'रित्यत्र व्यासार्यैरपर्यवसानलब्धार्थस्य यौगिकार्थतुल्यत्वाश्रयणात्, यौगिकार्थस्य च रूढिपूर्वकलक्षणापेक्षया जघन्यत्वस्य प्रोद्गात्राधिकरणे मीमांसकैराश्रितत्वात्। त्वंशब्दस्य संबोध्यातिरिक्तविषयत्वस्य क्वाप्यदर्शनात् 'श्वेतकेतो तत् त्वमसी'ति त्रयाणां पदानां प्रतीयमानसामानाधिकरण्यभङ्गप्रसङ्गाच्च अपर्यवसानलब्धार्थस्याऽऽश्रयणासम्भवात्। अपृथक्सिद्धवाचिनां सामानाधिकरण्यस्य लोकवेदयोर्बहुशो दृष्टचरत्वेनापृथक्सिद्धजीवपरवाचिनोः त्वंतच्छब्दयोः सामानाधिकरण्येन प्रयोगस्याप्युपपत्तेः न त्वंशब्दस्य परमात्म-

1 उदाहृत्य मध्यमपुरुषादेरुद्देश्यानुसारित्वनियमाभावस्य समर्थितत्वात् तदित्यनूद्य त्वमसीति मध्यमपुरुषः। क. 2. अयं क. पाठः। अन्यत्र, 'इति संबोध्यस्य' इति।

शुद्ध्युक्तमप्याह **न्याये**ति। अत्र ऋक्षे **तदित्ये**वोद्देश्यम्। श्रीभाष्ये उद्देश्योपादेयविभागस्योपेक्षितत्वात् तदित्यस्य प्राधान्यमेव काममस्त्विति भावः। **पुरुषस्ये**ति तिङ्भक्तेरित्यर्थः। पूर्वपक्षिमत एव स्थित्वा श्रुतिनिर्वाहप्रकारं कञ्चिदाह **अत्रोच्यत** इति। एतन्निरसनगर्भं सांप्रदायिकमतञ्च समनन्तरं प्रपञ्चयिष्यते। लक्षणाऽपीयं न साम्प्रतिकी, भूरिप्रयोगादतत्वादित्याह **अपृथक्सिद्धवाचिना**मिति।

पर्यन्तत्वमाश्रयणीयम् । वस्तुतस्तु 'ऐतदात्म्य'मिति शब्दनिर्दिष्टं तदात्मकत्वमेव बुद्धिस्थत्वात् तच्छब्देन परामृश्यते । न तु सच्छब्दितं ब्रह्म । येन तदात्मकत्व-लक्षणा दोषः स्यात् । ततश्च त्वं **तदसि** ऐतदात्म्यमसीत्यर्थः । अस्मिंश्च पक्षे न कस्यांपि पदस्य लक्षणा ।

साम्प्रदायिकास्तु—'स आत्मे'ति पूर्वनिर्दिष्टस्यैव 'तत्त्वमसी'त्यत्र तच्छब्देन परामर्शस्योचितत्वात् तच्छब्देन सच्छब्दितात्मैवाभिधीयते । जघन्यं त्वंपदं तु अपर्यवसानवृत्त्या अन्तर्यामिपर्यन्तमभिदधाति । न च श्वेतकेतो इति संबोध्यस्य जीवस्यैव त्वंपदेन परामर्शो युक्त इति वाच्यम् । हे देवदत्तेति देवदत्तं संबोध्य तत्पुत्राभिप्रायेण, 'त्वमेवं कृतवानसी'ति प्रयोगदर्शनात् । इयांस्तु विशेषः—तत्र मुख्यानुपपत्त्या त्वंपदस्य पुत्रे लक्षणा । इह तु तदनुपपत्त्या अन्तर्यामिण्यपर्यव-सानवृत्तिराश्रीयते ।

ननु 'साक्षादप्यविरोधं जैमिनि'रिति सूत्रे व्यासार्यैरपर्यवसानवृत्तेर्योग-तुल्यत्वसमर्थनात् योगस्य च रूढिपूर्वकलक्षणापेक्षया दौर्बल्यस्य प्रोद्गात्रधिकरणे मीमां-सकैः समर्थितत्वात् लक्षणापेक्षया जघन्यैवापर्यवसानवृत्तिरिति [1]पर्यवसितमिति चेत्—

उच्यते । सत्यमुक्तं व्यासार्यैरपर्यवसानवृत्तेर्योगतौल्यम् । तथाऽपि न तस्याः लक्षणापेक्षयाऽपि दौर्बल्यम्, प्रमाणाभावात् । प्रोद्गातृशब्दरूढ्यर्थस्य बहुत्वासम्भवात् पाशमन्त्र इव वचनमविवक्षितार्थमिति पूर्वपक्षे—'अदितिः पाशान् प्रमुमोक्तु' इति पाशमन्त्रे बन्धनसाधनस्य पाशशब्दरूढ्यर्थस्य वा यौगिकार्थस्य वा [2]लक्ष्यार्थस्य वा बहुत्वासम्भवात् पाशानिति बहुवचनस्याविवक्षितत्वेऽपि प्रोद्गातृपदयोगार्थस्य वा लक्ष्यार्थस्य वा बहुत्वसम्भवान्न बहुवचनस्याविवक्षा युक्तेत्येतावन्मात्रमेव प्रोद्गातृनय-सिद्धम् । न तु योगार्थस्य लक्षणापेक्षया दौर्बल्यमपि । ततश्च योगस्य लक्षणा-पेक्षया दौर्बल्याभावात् तत्तुल्याया अपर्यवसानवृत्तेर्न लक्षणापेक्षया दौर्बल्यम् । ततश्च योगार्थप्रतिबन्धिकाया रूढेरपगमे योगार्थोन्मज्जनस्यानिवार्यतया लक्षणापेक्षया योगस्य प्राबल्यमेव युक्तम् ।

1. पर्यवसितमिति इत्याधिकं क. कोशे । 2. रूढ्यर्थस्य यौगिकार्थस्य वा असम्भवात् ख. । ग. कोशे क. कोशवत् पाठे बहुत्वेति पदं परं न ।

अत एवाजामन्त्रे **भगवता भाष्यकृता**, न जायत इत्यजेति[1] योग एवाश्रितः; न तु पररीत्या छागत्वकल्पनम्। अत एव 'जगद्व्याचित्वा'दित्यत्र 'यो वै बालाके एतेषां पुरुषाणां कर्ता यस्य वा एतत्कर्मे'त्यत्र कर्मशब्दस्य चलनादृष्टयोः रूढस्य 'रूढ्योः कलहायमानयोः योगो लब्धात्मे'ति न्यायमनुसृत्य कर्मशब्दस्य क्रियते इति कर्मेति जगद्व्याचित्वमेवाश्रितम्। तथा अपशूद्राधिकरणेऽपि रूढ्यर्थानुपपत्तौ शूद्रशब्दस्य योग एवाश्रितः। ततश्च लक्षणापेक्षया योगस्य बलवत्त्वात् तत्तुल्याया अप्यपर्यवसानवृत्तेर्लक्षणापेक्षया च बलवत्त्वमेव।

ननु 'साक्षादप्यविरोधं जैमिनि'रित्यत्रैव व्यासार्यैः, 'तात्पर्यलिङ्गैः परमात्मपरतया निर्णीते प्रकरणे, तत्र चिदचिच्छब्दानां ब्रह्मपरत्वे चावश्यंभाविनि योगार्थ एवोचितः। यथा आकाशप्राणशब्दादौ। यत्र तु चिदचिल्लिङ्गान्यपि सन्ति, तत्रापर्यवसानवृत्त्या तच्छरीरकपरत्वम्' इति व्यवस्थायाः कृतत्वात् चिदचिल्लिङ्गाभावस्थले योगाश्रयणस्योक्ततया अपर्यवसानवृत्त्यपेक्षया योगप्राबल्यमेवाविष्कृतमिति चेत्— अस्तु योगापेक्षया दौर्बल्यमपर्यवसानवृत्तेः। तथाऽपि लक्षणापेक्षया अपर्यवसानवृत्तिः प्रबलैव।

ननु 'छन्दोभिधानात्--'इति सूत्रे—'गायत्रीशब्दस्य भूतादिपादव्यपदेशादिब्रह्मलिङ्गैः ब्रह्मपरत्वेऽश्यंभाविनि सति मासाग्निहोत्रे सादृश्यविधित्सयाऽग्निहोत्रशब्दस्येव चतुष्पात्त्वलक्षणगायत्रीसादृश्यविधित्सया ब्रह्मणि गायत्रीशब्दप्रयोगः। न च वैदिकशब्दस्य एतादृशगौणवृत्त्याश्रयणमयुक्तमिति शङ्क्यम्; संवर्गविद्यायाम्, 'ते वा एते पञ्चान्ये पञ्चान्ये' इति निर्दिष्टेषु वाय्वग्निसूर्यचन्द्रसलिल-प्राणवाक्चक्षुश्शोत्रमनस्सु दशसु दशत्वसंख्यासाम्यात्, 'सैषा विराडन्नादी' इति छन्दोवाचिविराट्छब्दो गौण्या प्रयुज्यमानो दृष्टः। एवं छन्दोभिधायिगायत्रीशब्दस्य चतुष्पात्त्वसादृश्यात् ब्रह्मणि प्रयोग उपपन्नः—इत्युक्तत्वात् गौणीरूपलक्षितलक्षणापेक्षया अपर्यवसानवृत्तेर्दौर्बल्यमेव सूत्र-भाष्यकृदभिमतमिति प्रतीयते। यदि च अपर्यवसानवृत्तिः गौणीतः प्रबला, तर्हि तया गायत्र्यवस्थब्रह्मपरत्वस्य वक्तुं सुशकतया गौणी वृत्तिर्नादर्तव्या स्यादिति चेत्—

1, अजेत्याश्रितम्। क.

न—अपर्यवसानवृत्त्या गायत्र्यवस्थब्रह्मपरत्वे तस्य सर्वभूतात्मत्वासंभवेन केवलब्रह्मणि गौण्याश्रयणस्य युक्तत्वात् ।

न च—गायत्र्यवस्थत्ववेषेण सर्वभूतात्मत्वाद्यसंभवेऽपि ब्रह्मस्वरूपे सर्वभूतात्मत्वं संभवत्येव । अत एव दहरविद्यायां हृदयावच्छिन्नस्य ब्रह्मणः तादृप्येण बाह्याकाशवैपुल्यासंभवेऽपि स्वरूपेण बाह्याकाशवैपुल्यम्, 'यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' इति संदर्भे प्रतिपादितं संभवतीत्यभ्युपेतम् । तथा शाण्डिल्यविद्यायाम्, 'एष म आत्माऽन्तर्हृदयेऽणीयान्' इति अल्पत्वेन निर्दिष्टस्य ब्रह्मणः स्वरूपाभिप्रायेण, 'एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षात्' इति पृथिव्यादिभ्योऽपि ज्यायस्त्वमुक्तम् । किं बहुना । सर्वासु अल्पायतनविद्यासु, 'आनन्दादयः प्रधानस्य' इत्यधिकरणन्यायेन सत्यत्वज्ञानत्वानन्तत्वादीनामुपसंहर्तव्यत्वात् तत्र च अल्पायतनस्यापि ब्रह्मणः स्वरूपेणाऽऽनन्त्यमपि संभवतीति आनन्त्योपासनस्याऽऽश्रितत्वाच्च तन्न्यायेन गायत्र्यवच्छिन्नत्ववेषेण सर्वभूतात्मत्वासंभवेऽपि स्वरूपेण सर्वभूतात्मत्वसंभवाच्च अपर्यवसानवृत्तौ अनुपपत्त्यभावात् गायत्रीशब्दस्यापर्यवसानवृत्त्यनाश्रयणं तद्दौर्बल्यकारितमेव—इति वाच्यम्—

गायत्र्यवच्छिन्नस्य ब्रह्मणः स्वरूपेण सर्वभूतात्मत्वोपपादनं क्लेशसाध्यमित्यभिप्रायेणापर्यवसानवृत्त्यनाश्रयणसंभवात् । अत एव 'आकाशादेव —[1]' इत्यादौ आकाशशब्दे अपर्यवसानवृत्त्यनाश्रयणस्येदमेव बीजम् । 'यदि हि आकाशशब्दः तच्छरीरकब्रह्मपरः, तदा तच्छरीरकस्य जगत्कारणत्वासंभवात् स्वरूपाभिप्रायेण जगत्कारणत्ववादोऽभ्युपेयः । स च क्लिष्टः' इत्येवापर्यवसानवृत्त्यनाश्रयणम्; न तु योगप्राबल्यादित्येव रहस्यम् । किञ्च गायत्रीशब्देन, चतुष्पात्त्वादिधर्मकीर्तनस्य, सादृश्यानुसंधानार्थत्वाभावे वैयर्थ्यप्रसङ्गाच्च तत्र गौण्याश्रयणम् [गायत्रीशब्दे] । न तु गौण्याः प्राबल्यात् । अतो न गौण्यपेक्षया दौर्बल्यमपर्यवसानवृत्तेः ।

1. आकाशादेवेति क. पाठः । 'आकाशाद्धैव' ख. आकाशाध्येव ग. एतदुपरि, 'खल्विमानि भूतानि जायन्त' इतिश्रुतिवाक्योद्धारः सर्वत्र । तदादरणे, 'आकाशादेव समुत्पद्यन्ते' (छा. १–९.) इति वाक्यस्यायमर्थानुवाद इति ग्राह्यम् । श्रुत्यन्तरं वा तादृशमन्वेष्यम् ।

नन्वपर्यवसानवृत्तेर्लक्षणापेक्षया प्राबल्ये, 'क्षेत्रज्ञश्चापि मां विद्धि' इत्यत्र, 'मां मदात्मकं विद्धीत्यर्थः' इति, तथा, 'ब्रह्मजज्ञं देवमीड्यं विदित्वा' इत्यत्र, 'देवं देवात्मकमित्यर्थः' इत्येवं बहुषु स्थलेषु क्षेत्रज्ञादिशब्दानामपर्यवसानवृत्तिमनाश्रित्य, 'मां', 'देव'मित्यादिशब्दानां लक्षणाश्रयणं नोपपद्यते। अतोऽवसीयते लक्षणाऽपर्यवसानवृत्त्योर्वैषम्याभावो भाष्यकृदभिमत इति, इति चेत्—

तस्यान्वारुह्योक्तिरूपतयाप्युपपत्तेः।

ननु मुख्यार्थसंबन्धेन तदपृथक्सिद्धविशेष्यस्य लक्षणया प्रतीत्युपपत्तौ न शक्तिः कल्प्या; अनन्यलभ्यस्यैव शब्दार्थत्वादिति चेत्—

अन्वारुह्योक्तीति। न हि वेदान्तव्युत्पत्तिसिद्धार्थस्य वेदान्तव्याहारे लक्षणातुल्यत्वम्। तस्यैव तत्र ग्राह्यत्वादिति अपर्यवसानवृत्तिः प्रबला। ईदृशभाष्यं तु फल्गितार्थकथनमात्रमिति व्यक्तं **तात्पर्यचन्द्रिकादौ**। न चात्र क्षेत्रज्ञपदस्य ब्रह्मजज्ञपदस्य च विशिष्टपरत्वे काचिदनुपपत्तिरस्ति। क्षेत्रज्ञश्चापि मां विद्धि = त्वं क्षेत्रज्ञान्तर्यामित्वविशिष्टमद्विषयकज्ञानवान् भव। ब्रह्मजज्ञं देवमीड्यं विदित्वा = ब्रह्मजज्ञजीवान्तर्यामित्वविशिष्टेड्यदेववेदनानन्तरम् इत्यर्थवर्णनस्य निर्बाधत्वात्। शरीरात्मभावः कथं ज्ञात इति चेत्—तदज्ञानाभावे **मां** मदात्मकमित्यर्थोपि दुर्ग्रह एव। वस्तुतः जगत्कारणत्वस्य सर्वविद्यावेद्यत्वाभावेऽपि सर्वविद्यानिष्ठवेद्यत्वमावश्यकम्। अत एव, 'कारणं तु ध्येय' इति श्रुतिः। अत एव जगत्कारणत्वमुपलक्षणमपीति **भाष्यादौ**। एवमवश्यज्ञेये कारणत्वे ज्ञाते तदनन्तरमेव तत्तद्विद्योपदेशः। यत्र तथोपदेशो न लक्ष्यते, तत्रापि कारणत्वोपदेशोऽर्थसिद्धः निष्पन्न इति मन्तव्यम्। कारणत्वोपदेशश्चायं नामरूपव्याकरणप्रकारज्ञापनमुखेन वेदान्तव्युत्पत्तिसंपादनार्थोऽपि। अतः **सदेवेत्यादिकारणवाक्यं** सर्वविद्यासाधारणम्। अत एवाविदितवेदान्तार्थोऽयं श्वेतकेतुः पूर्वं कारणत्वादिवादेन व्युत्पादितः। अत एव एवमौपाद्धातिके सर्वसाधारणेऽर्थे विज्ञाते विज्ञातमिति विजज्ञाविति(त्य)भ्यासं कृत्वा श्रुतिः **उद्दालको हारुणिरित्यनया** भङ्ग्या विशेषविद्योपदेशमारभत—इति साधु विमृश्यम्। एवञ्च सर्वस्यापि विद्योपदेशस्य वेदान्तव्युत्पत्तिमन्तं प्रत्येव प्रवृत्तेर्ज्ञापनायैव अनभिज्ञश्वेतकेतूपाख्यानेन कारणवादात्, क्लृप्तत्यागे मानाभावात् सर्वत्र विशिष्टपरत्वं संभवत्येवेति अन्यथाऽर्थवर्णनमन्वारुह्योक्तिरेवेति भावः।

ननु विशिष्टे शक्तेः प्रामाणिकत्वे अन्वारुह्योक्तिरियमिति वक्तव्यम्। तत्रैव न प्रमाणम्। प्रत्युत बाधक एव न्यायोऽस्ति इति, लोकवेदव्युत्पत्तिगतिमजानन् अर्धमीमांसकवासनावासितस्वान्तः पृच्छति **ननु मुख्येति**। **तत् त्वमसीत्यस्य नानुपपत्तिरिति**। **यद्यत्र तत् इत्यस्य** तदात्मक इत्यर्थः। तर्हि तदात्मकोहमित्येव तेन यथोपदेशं भावनीयम्। तथाच न केवलं **तत्त्वमस्यर्थवर्णनभाष्यविरोधः**, पञ्चाग्निविद्यातिरिक्ता सद्विद्यादिः सर्वा विद्या ब्रह्मविशेष्यकोपासनरूपेति भाष्यविरोधोऽपि। उपदेशक्रमत्यागे मानाभावेन इहापि जीवविशेष्यकविद्यात्वापत्तेरित्यादि इह निगूढम्।

मैवम् । कल्पनायां परमुपालम्भः; न तु कल्पस्थले । प्रकृते च जातिगुणवाचिगोनीलादिशब्देषु अपृथक्सिद्धविशेषणवाचित्वावच्छेदेन विशेष्यवाचित्वस्य कृप्तत्वात् सर्वशब्दप्रवृत्तिनिमित्ताश्रये ब्रह्मणि सर्वशब्दवाच्यत्वस्य प्रत्याख्यातुमशक्यतया, 'वचसां वाच्यमुत्तमम्', 'नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती', 'तन्नामरूपाभ्यां व्याक्रियत', 'चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्' इत्यादिभिर्ब्रह्मणः सर्वशब्दवाच्यत्वस्य [1]सिद्धतया च तत्त्वमसीत्यस्य नानुपपत्तिरिति वदन्ति ।

अत्र **तत् त्वमसि** इति तत्त्वंपदाभ्यां सर्वज्ञत्वकिञ्चिज्ज्ञत्वोपलक्षितं चिन्मात्रं

1. श्रुतिस्मृतिसूत्रप्रतिपन्नतया च क.

इति वदन्तीति । **अत्रेदमपि बोद्धव्यम्**—यद्यपि पदानामपर्यवसानवृत्त्या विशिष्टवाचित्वं प्रामाणिकम्; आवश्यकञ्च, 'अहं मनुरभवम्' इत्यादौ—तथापि, 'तत् त्वमसी'त्यादौ संबोध्यमात्रस्य त्वंपदार्थत्वेऽपि न लक्षणादिदोषः । अपृथक्सिद्धिसंबन्धस्य समानाधिकरणप्रयोगे संबन्धत्वाभावेऽपि अभेदसंबन्धेनैव सर्वसंमतेन निर्वाहात् । अभेदो हि तादात्म्यम् । तद्वृत्तिधर्मविशेषवत्त्वं तदित्युक्तं **व्युत्पत्तिवादे** । शरीरगतावस्थादेश्च परम्परया शरीरिवृत्तित्वं पूर्वमेव दर्शितम् । तथाच **तत् त्वमसि** त्वं परमात्मवृत्तित्वदीयधर्मविशेषवानसीत्यर्थ इति विनैव क्लेशं निर्वाहः । न च तावता, रूपं घटः, शरीरं चैत्रः इत्यादिव्यवहारापत्तिः; रूपत्वादिकं प्रति घटादेराधारताया अत्र एवास्वीकारात् । 'रसोऽहमप्सु', 'काठिन्यवान् यो बिभर्ति' इत्यादिप्रयोगबलेन सर्वस्यापि धर्मस्य परमात्मा परमाधार इति स्वीकारादिति । **अत्रेदं वक्तव्यम्**—स्वपर्यन्तनामरूपव्याकरणं परमात्मकृतं प्रागुक्त्वा क्रियमाणं निगमनं विशिष्टवाचित्व एव स्वरसम् । 'ऐतदात्म्यमिदं सर्वं'मित्यत्र एतदन्तर्यामिकमित्युक्तत्वात् तदभेदान्वयाय कामं विशेषणमात्रपरता । कामञ्च 'सन्मूलाः सोम्येमा' इत्यत्रापि प्रजाशब्दो विशेषणमात्रपर एव; सदायतनत्वस्य तत्रैव भावात् । सन्मूलत्वादेश्च विशेष्यं प्रति विशेषणस्याप्युपादेयत्वस्य प्रागुक्ततया तत्रान्वयसंभवात् । एवं शरीरात्मभावं प्रतिपाद्य प्रवृत्तमिदं निगमनवाक्यं तु विशिष्टपरं युक्तम् । 'अहं मनुरभव'मित्याद्यविशेषात् । अभेदसंबन्धविषयेऽपि किञ्चिद् विमृश्यम्—तद्वृत्त्यसाधारणधर्मवत्त्वरूपः संबन्धः कश्चित् भासत इत्येतद्धि नानुभविकम् । अभेदेनान्वय इत्यस्य च, 'भेदसंबन्धोऽत्र कश्चिन्न भासते; किञ्चित्संबन्धनिरपेक्षो विशेष्यविशेषणभाव' इत्येवार्थः । समानाधिकरणवाक्यस्थले धर्मिणः पदद्वयतो द्विर्भानमेवास्माभिर्नेष्यते इति कयोरभेदः संबन्धः । किंतु नीलमुत्पलमित्युक्तौ नीलत्वोत्पलत्वविशिष्टतया धर्मिणः सकृद्ग्रहणमेव, यथा प्रत्यक्षे अनेकधर्मविशिष्टतया धर्मिणः सकृद्ग्रहणम् । उक्तञ्च **श्रुतप्रकाशिकायाम्**, 'यथा द्वे चक्षुषी अर्थं पुरोवर्तिनं सकृद् भासयतः, तथा समानाधिकरणपदे' इति । अत एकं धर्मिपदद्वयोपस्थाप्यम् । तत्र धर्मद्वयान्वयः समानाधिकरणपदकृत्यमिति अपृथक्सिद्धसंबन्धेन वा अभेदेन वा भिन्नयोर्नान्वय इति साम्प्रदायिकानामाशय इत्यलमधिकेन ।

भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ७ ॥

इति षष्ठाध्याये अष्टमः खण्डः ।

लक्ष्यते । अतः चिन्मात्र एवास्य श्रुतिसंदर्भस्य तात्पर्यमिति वदन्तः परे प्रत्युक्ताः ।

"सर्वज्ञं सर्वकर्तारं नारायणमनामयम् ।
सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि ॥
सर्वेषामपि वेदानामितिहासपुराणयोः ।
प्रमाणानाञ्च सर्वेषां तदर्थश्चान्यदुच्यते ॥"

इति नारदीयपुराण[1] वचनविरोधात् । तन्मते श्रुतेः प्रत्यक्षविरोधभयाभावेन **तत्त्वं**-पदमुख्यार्थयोरेवाभेदबोधनसंभवे तत्त्वंपदलक्ष्यचिन्मात्राभेदप्रतिपादकत्वाश्रयणस्य निर्मूलत्वात् । व्याधकुलसंवर्धितराजकुमारस्य व्याधभावभ्रान्त्यपनयनाय प्रवृत्ते, 'त्वं राजकुमारोऽसी' ति वाक्ये राजकुमारपदे लक्षणाश्रयणाभावेन इहापि जगत्कर्तृत्व-सर्वज्ञत्वविशिष्टवाचके तत्पदे लक्षणाश्रयणस्यान्याय्यत्वात् । त्वं राजकुमारोऽसीति वाक्येऽपि विधेयराजकुमारत्वे तात्पर्याभावे व्याधभावानुपमर्दवत् विधेयभूततच्छ-ब्दार्थभूत जगत्कर्तृत्वसर्वज्ञत्वादितात्पर्याभावे तद्विरोधिजीवभावोपमर्दासंभवाच्चेत्यास्तां तावत् । प्रकृतमनुसरामः ।

एवमुक्तः श्वेतकेतुः, सुषुप्तिकाले प्रजानां सत्संपत्तौ सत्याम्, 'एवं सति संपन्नाः' इति प्रतीतिः स्यात्; समुद्रे तरङ्गादीनामिव परमात्मनि सुषुप्तौ लीनानां पुनरुत्थितिश्च न स्यात् । अतः सुषुप्तौ प्रजानां सत्संपत्तिः न श्रद्धेयेति मन्वान आह **भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ।** विशिष्य ज्ञापयत्विति [पिता] श्वेतकेतुना प्रार्थितः तथेत्यङ्गीकृतवानित्यर्थः ॥

एतत्खण्डविषयाणि अधिकरणानि लिख्यन्ते । उत्क्रान्तिपादे —

(१) 'वाङ् मनसि संपद्यते' ति श्रूयमाणा वाचो मनस्संपत्तिः वाग्वृत्तिवि-षया, न तु वाग्विषया । वाचो मनःप्रकृतिकत्वाभावेन अप्रकृतिभूते मनसि वाचः साक्षाल्लयासंभवात् । न च वाग्वृत्तेरपि अप्रकृतिभूते मनसि संपत्तिशब्दितो लयो न संभवतीति वाच्यम् — मनसि स्थितेऽपि वाग्व्यापाराभावमात्रेण **संपद्यत**

1, पुराणेति क,

इत्युपपत्तेः। विद्यमानायास्तु वाचः तादात्विकाभावस्याप्यभावेन संपत्तिश्रुतेरत्यन्तासंभवात् इति पूर्वपक्षे प्राप्ते – उच्यते —

"वाङ् मनसि दर्शनात् शब्दाच्च"। वाक्स्वरूपमेव मनसि संपद्यते। वागिन्द्रिये उपरतेऽपि मनःप्रवृत्तिदर्शनात्। 'वाङ् मनसि संपद्यत' इति शब्दाच्च वागेव मनसि संपद्यते। यद्यपि मनसो वाक्प्रकृतित्वं नास्ति— तथापि अनुपरतव्यापारेऽपि मनसि वाच उपरतव्यापारत्वदर्शनात् वाक् मनसि संपद्यत इवेत्युच्यते। वृत्तिपक्षेऽपि संपद्यत इत्यस्य गौणत्वावश्यम्भावात्। ततश्च वाचो निर्व्यापारताहेतुभूतो मनसा संयोगविशेषः संपत्तिशब्दार्थ इति द्रष्टव्यम्।

"अत एव सर्वाण्यनु"। यतो वाचो मनसा संयोगमात्रं संपत्तिः, अत एव, 'तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः' इति वाचमनु सर्वेषामिन्द्रियाणां संपत्तिश्रुतिरपि तदर्थिकैवेत्यर्थ इति स्थितम्।

(२) तथा — 'मनः प्राणे' इत्यत्र मनोवृत्तेरेव प्राणे अप्यय उच्यते। मनश्शब्दस्य मनोवृत्तिष्वपि प्रचुरप्रयोगसत्त्वात्। न तु पूर्वोक्तरीत्या संयोगविशेषः संपत्तिशब्दार्थः इति प्राप्ते – उच्यते — "तन्मनः प्राण उत्तरात्"। मनसो निर्व्यापारताहेतुभूतः प्राणेन संयोगविशेष एव इहापि संपत्तिशब्दार्थः। ततश्च मन एव प्राणे संपद्यते; 'मनः प्राणे' इत्युत्तरवाक्यादित्यर्थः। मनश्शब्दस्य मनोवृत्तिपरत्वेऽपि संपत्तिश्रुतेर्गौणत्वावश्यम्भावेन मनश्शब्दस्य गौणत्वाश्रयणस्यान्याय्यत्वादिति सिद्धान्तितम्।

(३) तथा — 'प्राणस्तेजसी'ति श्रुतेः प्राणः तेजसि संपद्यते इति प्राप्ते — उच्यते— "सोऽध्यक्षे तदुपगमादिभ्यः"। सः इन्द्रियसहितः प्राणः अध्यक्षे जीवे संपद्यते। 'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती'ति अन्तकाले प्राणानां जीवोपगमस्य, तेन सहोत्क्रान्तेश्च श्रवणात् जीवे एव संपद्यते। गङ्गया संयुज्य सागरं गच्छन्त्यां यमुनायाम्, 'यमुना सागरं गच्छती'ति प्रयोगवत् जीवद्वारा प्राणस्य सत्संपत्तावपि 'प्राणस्तेजसी'त्युक्तिरुपपद्यते। न च प्राणस्य तेजोद्वारेणैव जीवोपगमोऽस्तु इति वाच्यम् — निरध्यक्षस्य प्राणस्य तेजसि स्थितेरसंभवादिति स्थितम्।

(४) तथा प्राणस्तेजसीति जीवयुक्तस्य प्राणस्य तेजोमात्र एव संपत्तिश्रवणात् न सर्वभूतसंपत्तिरिति प्राप्ते – उच्यते — " भूतेषु तच्छ्रुतेः " । सजीवः प्राणः संहतेषु सर्वेषु भूतेषु संपद्यते । 'पृथिवीमय अपोमयस्तेजोमय' इति संचरतो जीवस्य सर्वभूतमयत्वश्रवणेन सर्वभूतसंपत्तेर्वक्तव्यत्वात् ।

" नैकस्मिन् दर्शयतो हि " । एकस्मिन् तेजोमात्रे न संपद्यते । एकैकस्य कार्याक्षमत्वम् ,

'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी' ति,

'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥'

इति श्रुतिस्मृती दर्शयत इत्यर्थ इति स्थितम् ।

(५) तथा — 'तेजः परस्यां देवताया' मित्यत्र जीवपरिष्वक्ततेजश्शब्दित-भूतसूक्ष्माणां परदेवतासंपत्तौ प्रयोजनाभावात् , 'तेजः परस्यां देवतायाम्' इति श्रुतिः स्तुतिमात्रपरेति पूर्वपक्षे प्राप्ते – उच्यते — " तानि परे तथा ह्याह " । तानि भूतसूक्ष्माणि परे परमात्मनि संपद्यन्ते । कुतः ? तथा ह्याह श्रुतिः, 'तेजः परस्यां देवताया' मिति । श्रुतिवशाच्च सुषुप्तिप्रलययोरिव परमात्मसंपत्तेः सुखदुःखोपभोगायासविश्रमः प्रयोजनत्वेन परिकल्प्यत इति स्थितम् ।

(६) तथा सेयं परमात्मनि जीवस्य संपत्तिः प्राकृतलयवत् कारणापत्तिरूपैव, [1]परमात्मनः (सर्वात्मनः) सर्वोपादानत्वात् । न तु वागादेर्मनआदिष्विव अविभागमात्रमिति पूर्वपक्षे प्राप्ते–उच्यते––" अविभागो वचनात् " । अत्रापि पृथग्भावानर्हसंसर्गविशेषलक्षणाविभाग एव संपत्तिशब्दार्थः । 'वाङ् मनसि संपद्यत' इत्यत्र सतः 'संपद्यत' इति शब्दस्यैवेहाप्यनुषज्यमानतया अभिधानवैरूप्याश्रयणस्यान्याय्यत्वादिति स्थितम् ॥ प्रकृतमनुसरामः । ६–८.

1. परमात्मन इति क· कोश पाठः । अत्र घट्टे तत्र कोशे किञ्चित् किञ्चिदन्यथा ।

६—९.

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाँ रसान् समवहारमेकताँ रसं गमयन्ति ॥ १ ॥ ते यथा तत्र न विवेकं लभन्ते, अमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोस्मीति —

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति ॥ २ ॥

यथा सोम्य मधु—गमयन्ति । यथा लोके **मधुकृतः** मधुमक्षिकाः मधु **निस्तिष्ठन्ति** निष्पादयन्ति, **नानात्ययानां** नानागतीनां [नानादिक्कालादीनां] वृक्षाणां रसान् समाहृत्य मधुत्वेनैक्यं गमयन्तीत्यर्थः । **ते यथा — इति** । ते च रसाः मधुत्वेन एकतां गताः **अमुष्य** वृक्षस्य वकुलस्य [वा] कुटजस्य [वा] रसोऽस्मीति यथा विवेकं न लभन्ते, एवमेवेमाः सर्वाः प्रजाः सति संपन्नास्सत्यः, अहं देवदत्तः, अय (अह) ममुष्य पुत्रः, अधुना सति संपन्ना इति वा, सति संपत्स्यामह इति वा न जानन्तीत्यर्थः ।

ते यथेति । मूले **संपद्यामहे** इति वर्तमानकालनिर्देशे स्थिते भाष्ये **संपन्ना** इति, संपत्स्यामहे इति च भूतभविष्यन्निर्देशः, ' संपत्तिकाले संपत्तेरज्ञातत्वात् पश्चात् तत्स्मरणप्रसक्तिरेव नास्ति । तत्संपत्तेः केवलशास्त्रगम्यत्वात् पूर्वं पश्चाद्वा तदनुमानमपि दुर्लभम् । एवञ्च संपद्येति मूले ल्यपो निर्देशात् संपन्नाः स्मः इत्येव निर्देष्टव्ये मूले संपद्यामह इति वर्तमाननिर्देशः सर्वकालोपलक्षक ' इति ज्ञापनार्थः । **संपद्यामह** इति बहुत्वं यद्यपि अविवक्षितं सुवचम् — अथापि, 'वयं सर्वे संपद्यामहे' इत्यर्थक एवं निर्देशः अन्यचेतनसंपत्त्यवेदनतुल्यं स्वसंपत्त्यवेदनमेकैकस्यापीति ज्ञापनार्थ इत्याशयेन भाष्ये बहुत्वानुपेक्षा स्यात् । शाङ्करभाष्ये खण्डोऽयं सुषुप्तिमरणप्रलयरूपसर्वविषय एव योजितः । ' त इह व्याघ्रो वे 'त्यादिकञ्च पूर्वमेकस्मिन् जन्मनि व्याघ्रभूत एव पश्वादापि व्याघ्रो भवतीत्यर्थपरमपीति । अनादौ संसारे अनन्तसजातीयजन्मसंभवात्, तत्तज्जात्युचितकार्यार्थसंस्कारोद्बोधस्य तत्रतत्रावश्यकतया तादृशपूर्वजन्मप्रौव्यात्, ' यं यं वाऽपि स्मरन् भाव 'मिति स्मृतेश्च तदप्यविरुद्धम् । अथापि प्रसक्तसुषुप्तिविषयतया सुप्रसिद्धलोकानुभवप्रदर्शकतयैव ' त इह व्याघ्र ' इत्यादेरुपपत्तौ अपूर्वतादृशार्थपरत्वनिर्बन्धाभावात् सुषुप्तिमात्रपरं भाष्ये योजितम् । पश्चात् पूर्वजातसत्संपत्तिप्रतिसंधानं कुतो नेति शङ्कयोत्तरखण्डारम्भश्चेत्, इह सुषुप्तिमात्रविवक्षैव युक्ता, मरणप्रलययोः प्रतिसंधानशङ्काप्रसक्त्यभावादिति । अचेतनस्य रसस्य यथा स्वयं विवेकाभावः, तथा चेतनस्यापि सद्विषये; तत्साक्षात्काराभावात् । विशिष्य च सुषुप्तौ

त इह व्याघ्रो वा सिँहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ ३ ॥

स य एषोऽणिमा । ऐतदात्म्यमिदँ सर्वम् । तत् सत्यम् । स आत्मा । तत् त्वमसि श्वेतकेतो इति ।

भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥

इति षष्ठाध्याये नवमः खण्डः ।

त इह—आभवन्ति । अथ सुषुप्तेरुत्थिताश्च प्रजाः स्वापात् पूर्वं यत् यत् भवन्ति येये अभवन्, तेते आभवन्ति आगत्य भवन्ति । [1]सुप्तेः प्राक् व्याघ्राभिमानी स्थितः, सुप्त्यनन्तरमपि 'व्याघ्रोऽह'मित्यभिमन्यमान एव भवतीत्यर्थः । [2]पूर्ववासनावासित एवोत्तिष्ठतीति यावत् । ततश्च दर्शनानुसारात् सुप्तौ लयो न पुनरुत्थितिविरोधीति भावः । स य एषोणिमा । [सः परमात्मा अणिमा] अणुः सूक्ष्म इत्यर्थः । ऐतदात्म्यं—श्वेतकेतो । स्पष्टोऽर्थः ।

एवमुक्तः श्वेतकेतुः, 'सुषुप्तिदशायां परमात्मनि संपन्नः स्वापानन्तरं तत उत्थाय आगतश्चेत्, प्रातर्गृहादुत्थायाऽऽगतस्य 'गृहादागतोऽस्मी'ति प्रतिसंधानवत्, सत आगतोऽस्मीति प्रतिसन्धानप्रसङ्गात् नैतद् विस्रम्भणीयमिति मन्यमान आह—भूय एव मा भगवान् विज्ञापयत्विति । तथा—होवाच । स्पष्टोऽर्थः । ६–९.

1 सुप्तिपदस्थाने सुषुप्तिपदमत्र सर्वत्र ख. कोशे । 2. पूर्ववासनावासिता एवोत्तिष्ठन्तीति यावत् क.

बाह्यान्तरवेदनाभावे कथं तत्संपत्तिविप्तिः । उत्थाने च न तत्साक्षात्कारः, असत्त्वात् तदा संपत्तेरिति अनन्तरखण्डे वक्ष्यते । अतो रसानां स्वयमज्ञत्वेऽपि यथा तत्समाहारो न प्रतिषेध्यः, तथा सत्संपत्तिरपीति भावः । नायं पुनस्तद्भावापत्तिविरोधी परिपूर्णलय इति बोधयितुं प्रवृत्तं त इह व्याघ्रो वेत्यादि । तदाभवन्तीत्यत्र तदिति पदं ते इत्यर्थकम् । आङ् उपसर्गः ।

अत्र खण्डे जीवनानात्वं दर्शितम् ।

६—१०.

इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते । पश्चात् प्रतीच्यः । ताः समुद्रात् समुद्रमेवापियन्ति । समुद्र एव भवन्ति । ता यथा तत्र न विदुः, इयमहमस्मि, इयमहमस्मीति (१)—,

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति ।

त इह व्याघ्रो वा सिँहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ २ ॥

स य एषोऽणिमा, ऐतदात्म्यमिदँ सर्वम् । तत् सत्यम् । स आत्मा । तत् त्वमसि श्वेतकेतो इति ।

भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ।

इति षष्ठाध्याये दशमः खण्डः

इमाः — होवाच । यथा गङ्गाद्या नद्यः **प्राच्यः** पूर्वदिक्प्रस्थिताः प्राङ्मुखतया समुद्रं यान्ति; **प्रतीच्यः** पश्चाद्देशप्रवृत्ता सिन्ध्वाद्याः नद्यः [1]प्रत्यङ्मुखतया समुद्रं यान्ति । पुनश्च [ताः] समुद्रात् समुद्रं गच्छन्ति । समुद्रपर्यन्तदेशात् समुद्रमध्यं गत्वा समुद्रेणैकीभूताः सत्यः 'इयं गङ्गाऽहमस्मि', 'इयं यमुनाऽहमस्मि' इत्येवं प्रत्यभिज्ञातुमसमर्था भवन्ति[2], तथा सुप्तोत्थिता अपि, सत उत्थिताः आगता इति न प्रत्यभिज्ञातुं समर्था भवन्ति[3] । अपितु व्याघ्रादिभावमात्रमनुसंदधते इत्येवं बोधितेन श्वेतकेतुना, 'ननु सुप्तोत्थितस्य, 'सोऽहमित्यनुसंधानबलात् नाशाभावस्याभ्युपगन्तव्यत्वे मरणानन्तरं कदापि पूर्वजन्मस्मरणाभावात् जीवस्य देहवियोग-

1. प्रत्यङ् क. अन्यत्र पश्चात् इति. 2. भवन्तीत्यर्थः । ख. 3. अपितु इति वाक्यं क. कोशे । भवन्तीत्यर्थः । शिष्टं स्पष्टम् । इत्येवं बोधितेन ख. 4. व्याघ्रोहम् ख.

इमाः सोम्येति । नन्वष्टमखण्डोक्तसुषुप्तिमरणविवरणरूपत्वमुपरितनखण्डानामिति कृत्वा

समये नाशः कस्मान्न स्यादिति मन्यमानेन 'भूयो विज्ञापयतु' इति प्रार्थितः, 'तथाऽस्तु' इत्यवोचदित्यर्थः। एतत्खण्डाधिकरणं लिख्यते —

सुप्तस्य मुक्तविशिष्टतया ब्रह्मणि लीनस्य पुनर्देहसंबन्धासंभवात् अन्य एवोत्तिष्ठति। सुप्तिरहितपुरुषेषु वैदिककर्मणां साफल्यञ्च भविष्यतीति प्राप्ते – उच्यते— **"स एव तु कर्मानुस्मृतिशब्दविधिभ्यः"**। **स एव** सुप्त एव तु उत्तिष्ठति। कुतः? कर्मानुस्मृतिशब्दविधिभ्यः। सुप्तेः प्राक् कृतं कर्म तेनैव भोक्तव्यम्। अन्यथा कृतहानादिप्रसङ्गात्। योऽहं सुप्तः, सोहं जागर्मीत्यनुस्मृतेः। 'त इह व्याघ्रो वा सिंहो वा इत्यादिशब्दात्। मोक्षार्थविधिवैयर्थ्यप्रसङ्गाच्च न सुप्तिर्मुक्तितुल्या। अत एव प्रजापतिविद्यायाम् — 'नाह खल्वयमेवं संप्रत्यात्मानं जानाति' ति अज्ञत्वेन सुप्तिर्निन्द्यते। 'मनसैतान् कामान् पश्यन् रमते' इति मुक्तिः तद्विलक्षणतया प्रतिपाद्यते। अतो न सुप्तिर्मुक्तिरिति स एवोत्तिष्ठतीति स्थितम्। ६–१०.

किमत्रापि सति लयस्यैवोपपादनम्। आहो तत उत्पत्तेः। आद्ये, **सत आगम्ये**त्यादि कथम्? अन्त्ये **समुद्रमेवापियन्ती**त्यादि कथम्? न च **सत आगम्य, सत आगच्छामहे** इत्युभयत्र सते इति चतुर्थी ग्राह्या। तेन तत्राप्यय एवोक्तो भवतीति वाच्यम्; भाष्यविरोधात्—उच्यते –सत इति पञ्चम्येव। मूले **स्यन्दन्ते** इत्यत्र समुद्रादिति शेषः। समुद्रे स्थिता एव हि नद्यो जलधरैराकृष्टाः वृष्टिरूपेण पतिताः स्यन्दन्ते। अनेन सत आगमनस्य दृष्टान्त उक्तो भवति। भाष्ये **समुद्रमि**त्यध्याहारः स्यन्दनस्यापि समुद्रैकसंगमसंपादकत्वात्। तथाच समुद्रादुद्गत्य समुद्रं प्रति स्यन्दन्त इत्युक्तं भवति। अस्यैवार्थस्य **ताः समुद्रादिति** वाक्येन पुनरुक्तौ वैयर्थ्यात् उपर्युपरि सम्यग्लयप्रतिपादनमित्याशयेनार्थान्तरमुक्तं **पुनश्च ता** इत्यादिना। यद्वा मास्तु समुद्रादित्यध्याहारः। स्यन्दनं पूर्ववाक्यार्थः। लय उत्तरवाक्यार्थः। **समुद्रेणैकीभूताः सत्य** इत्यस्य वस्तुतः समुद्रेणैकीभूय पश्चाज्जाता अपीत्यर्थः। मूले **तत्र नविदुरि**त्यादेरयमर्थः। तत्रेत्यस्य स्यन्दनाप्ययोः प्रतिवत्सरं क्रमभाविनोः सतोरित्यर्थः। तथाच स्यन्दनपूर्वकाप्यये जाते पश्चाद् भवत् स्यन्दनं पूर्वजाताप्ययपूर्वकमेव। अथापि नदी न जानाति, अहं समुद्रे प्राक् लीना समुद्रादागतास्मीति, तथा सुषुप्तोत्थितोऽपीत्युक्तं भवति।

अत्र खण्डे जीवातिरिक्तः परमात्मा दर्शितः। पूर्वदृष्टान्तमालोच्य रससमुदायातिरिक्तमध्वभाववत् प्रजारूपजीवातिरिक्तस्य सतोऽभावशङ्कायाः नदीसमुदायातिरिक्तस्य समुद्रस्येव तस्य स्थितिप्रदर्शनेन परिहारात्।

कस्मान्न स्यादिति। न हि सुषुप्तौ व्याघ्रादेस्तदाभाव इव इहापि सोऽस्ति। किञ्च मरणं नाम नाशः। अतो जीवनाश एवेति भावः।

६—११.

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्यात् जीवन् स्रवेत्; यो मध्येऽभ्याहन्यात्, जीवन् स्रवेत्; योऽग्रेऽभ्याहन्यात्, जीवन् स्रवेत्। स एष जीवेनाऽऽत्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥

तस्य यदेकाँ शाखां जीवो जहाति, अथ सा शुष्यति; द्वितीयां जहाति, अथ सा शुष्यति; तृतीयां जहाति अथ सा शुष्यति; सर्वं जहाति, सर्वः शुष्यति—, एवमेव खलु सोम्य विद्धीति होवाच (२) जीवापेतं वाव किलेदं म्रियते; न जीवो म्रियते इति।

स य एषोऽणिमा, ऐतदात्म्यमिदँ सर्वम्। तत् सत्यम्। स आत्मा। तत् त्वमसि श्वेतकेतो इति।

भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठाध्याये एकादशः खण्डः।

अस्य सोम्य — होवाच। अनेकशाखायुक्ते वृक्षे [1]यदि कश्चित् मूले मध्ये अग्रे वा परश्वादिना अभ्याहन्यात्, तदा जीवयुक्त एव वृक्षः रसं स्रवति। अतो रससृति[2]रूपकार्यात् जीवात्मा आमूलाग्रं व्याप्य मूलैरुदकं पिबन् तत्प्रयुक्तसुखादिकञ्चानुभवन् आस्ते[3]। एवं आमूलाग्रं व्याप्य वर्तमानो जीवो यदि (यदा?) कालधर्म[4]वशात् यं यं प्रदेशं त्यजति, स स प्रदेशः शुष्यति। एवमेव सर्वं जहाति यदि, तत् सर्वं शुष्यति। ततश्च, यथा — एकैकशाखाशोषो न जीवनाशकृतः; अपितु जीवसंकोचकृतः। प्रदेशान्तरे जीवस्य सत्त्वेन नाशासंभवात् — एवमेव सर्वशोषोऽपि तत्त्यागकृत एव, न तु जीवनाशकृतः[5]—। अतो मनुष्यादिष्वपि जीवत्यागकृतं देहस्य मरणम्, न जीवस्य मरणम्। तथासति कृतहानाकृताभ्यागमप्रसङ्गात्। अतः सुषुप्तिमरणदशायां सत्संपत्तावपि न जीवविनाश इति सिद्धमिति भावः। एवं बोधितेन श्वेतकेतुना, 'अणिम्नः सच्छब्दितस्य रूपस्पर्शादिहीनस्य विविधस्थावरजङ्गमादियुतानेकब्रह्माण्डहेतुत्वं न श्रद्धेय'मिति मन्यमानेन, 'भूय एव मा भगवान् विज्ञापयतु'इति प्रार्थितः तथाऽस्त्वित्युवाचेत्यर्थः। व्यासार्यैस्तु, 'ज्ञोऽत एवे'त्यधिकरणे, 'अस्य सोम्य महतो वृक्षस्ये'ति वृक्षशब्देन शरीरं निर्दिश्यते इत्युक्तम्। ६—११.

1. यत् किञ्चित् ग. यः कश्चित् क. 2. रससृति ख. 3. आस्त इत्यर्थः ख. 4. कालकर्मवशात् ख. 5. कृत इत्यर्थः ख.

जीवापेतमिति। मरणस्य ध्वंसपर्यायत्वे तत् देह एव संमन्तव्यम्; न जीवे इति भावः। **स य एष** इति। एवं निष्क्रान्तजीवलयस्थानभूत इत्यर्थः।

६—१२.

न्यग्रोधफलमद(त) आहरेति। इदं भगव इति। भिन्धीति। भिन्नं भगव इति। किमत्र पश्यसीति। अण्व्य इवेमा धाना भगव इति। आसामङ्गैकां भिन्धीति। भिन्ना भगव इति। किमत्र पश्यसीति। न किं चन भगव इति ॥ १ ॥ तँ होवाच—यं वै सोम्यैतमणिमानं न निभालयसे, एतस्य वै किल सोम्यैषोऽणिम्न एवं महान् न्यग्रोधस्तिष्ठति ॥ २ ॥ श्रद्धत्स्व सोम्येति। स य एषोऽणिमा, ऐतदात्म्यमिदँ सर्वम्। तत् सत्यम्। स आत्मा। तत् त्वमसि श्वेतकेतो इति।

भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठाध्याये द्वादशः खण्डः।

न्यग्रोधफलमद (त) आहरेति। इदं भगव इति। न्यग्रोधफलमिदमाहरेत्याचार्येणोक्तः श्वेतकेतुः, 'इदं भगव' इत्यानीतवानित्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्[1]। **भिन्धीति—भगव इति।** [[2]किमत्र फले पश्यसीति पित्रोक्तः पुत्रः अण्व्य इवेमा धाना भगव इत्याह] इमानि बीजानि अणून्येव पश्यामीत्यर्थः। इवशब्द एवार्थः।

आसा—तं होवाच। [3]स्पष्टोऽर्थः। **यं—निभालयसे।** हे सोम्य एवं यमेतं वटबीजाणिमानं **न निभालयसे** न पश्यसी[4]त्यर्थः। **एतस्य—तिष्ठति।** एष महान् न्यग्रोधः [5]एतस्यैव किलाणिम्नः कार्यतया तिष्ठतीत्यर्थः। **श्रद्धत्स्व—इति।** अतः अणोरपि सच्छब्दितात् परिदृश्यमानस्य स्थूलस्य प्रपञ्चस्योत्पत्तिरुपपद्यत इत्यस्मिन्नर्थे श्रद्धा कर्तव्येत्यर्थः। शिष्टं स्पष्टम्।

भूय—होवाच। [6]यदि परमात्मा कारणानुगतः, कथं तर्हि तदनुपलम्भः। अनुपलम्भे च तस्य तत्रानुगतत्वे किं मानमित्यभिप्रायेण प्रार्थितः तथेत्युक्तवानित्यर्थः। ६—१२.

1 द्रष्टव्यमिति न **ख.** कोशे। 2. [ ] एवं कुण्डलितं **ख.** कोशे। 3. एवमुक्तवन्तं पितोवाचेत्यर्थः **ख.** 4. 'न पश्यसि किमित्यर्थः इति **ख. ग.** 5. एतस्येवैषोऽणिम्नः **ख.** 6. यदीत्यादि—प्रार्थित इत्यन्तस्य स्थाने, 'अनुपलम्भान्न सच्छब्दितं श्रद्धेयमिति मन्यमानेन भूय एव मा भगवान् विज्ञापयत्विति प्रार्थितः इति **ख.**

अत्यन्तसूक्ष्मादत्यन्तविचित्रस्थूलमुत्पत्तुमर्हतीति निदर्श्यते **न्यग्रोधे**त्यादिना। **एतमणिमानम्** धानान्तर्वर्तिनं महान्यग्रोधात्मना परिणामिनं सूक्ष्मांशम्। **न पश्यसीति।** त्वं निभालयसे किम्। तथाप्यणिष्ठस्य स्थविष्ठहेतुत्वमानुभविकमिति भावः।

६—१३.

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति। स ह तथा चकार। तँ होवाच यद् दोषा लवणमुदकेऽवाधाः, अङ्ग! तदाहरेति। तद्धावमृश्य न विवेद।

यथा विलीनमेवाङ्ग। (१) अथास्याऽऽदावाचामेति; कथमिति। लवणमिति। मध्यादाचामेति; कथमिति। लवणमिति। अन्तादाचामेति; कथमिति। लवणमिति। अभिप्रास्यैतत् अथ मोपसीदथा इति। तद्ध तथा

लवण — चकार। रात्रौ लवणं जले प्रक्षिप्य प्रातर्मत्समीपमागच्छेति गुरुणोक्तः श्वेतकेतुः तथा चकारेत्यर्थः। **तं—विवेद। दोषा** रात्रौ यत् लवणमुदके **अवाधाः** प्रक्षिप्तवानसि, तत् अङ्ग! अधुना आहरेत्युक्तो वि (क्तोऽव?)मृश्य न ज्ञातवान्। **यथा विलीनमेवाङ्ग।** [1]यथा लवणं विद्यमानमपि विलीनं सत् चक्षुषा त्वचा वा नोपलभ्यते, एवं [2]सदात्मस्वरूपमपीति भावः। एवं चक्षुषा त्वचाऽप्यग्राह्यस्य लवणस्योपायान्तरेणावगतिप्रकारं दर्शयति **अथ — लवणमिति। अस्य** जलस्य **आदौ** मूलप्रदेशे उद्धृत्य आचामेति [अथ] पित्रोक्तः पुत्र आचम्य, अनन्तरं कथमिति पृष्टो लवणमित्युक्तवानित्यर्थः। **मध्यात् — लवणमिति।** उक्तोऽर्थः। **अभि — चकार।** एतत् परित्यज्य मत्समीपमागच्छे-

1. यथा लवणमपि विलीनं सत् **ख.** 2. सर्वात्म. **ख.**

नन्विदं सत् न केवलं जगत्पूर्वावस्थापन्नम्। किंतु, 'अनुप्रविश्य नामरूपे व्याकरवाणी'-त्युक्तया जगदन्तर्वर्तमानमपि। न च सर्वथेदमगोचरम्, एतद्विज्ञाने सर्वविज्ञानस्योक्तत्वात्। तत् कुतोऽनुपलम्भः। तत्राह **लवणमिति। एतत्** चक्षुषा त्वचा च गृह्यमाणम्। उदकान्तर्वर्ति तु न ताभ्यां गृह्यते। किं तु जिह्वेन्द्रियेण तद्रसमात्रम्। तथेदमिदानीमनुपलभ्यमानमपि उपायान्तरेण अस्तीति निश्चयोपयोगितया ग्राह्यमेवेति भावः। **आचामेति कथमितीति।** अत्र **आचामे**त्यनन्तरम् **इति**करणात्, 'मध्ये आचमनं तेन कृतम्। अथ पृष्टं कथमिति' इति ज्ञायते। **अभिप्रास्य** इति लोण्मध्यमपुरुषैकवचनमिति **युक्तम्**। ल्यबन्तत्वे अथशब्दवैयर्थ्यात्। भाष्यं तु निष्कृष्टार्थपरमिति।

चकार। तच्छश्वत् संवर्तते। तँ होवाच — अत्र वाव किल सत् सोम्य न निभालयसे अत्रैव किलेति ॥ २ ॥

स य एषोऽणिमा ऐतदात्म्यमिदँ सर्वम्। तत् सत्यम्। स आत्मा। तत् त्वमसि श्वेतकेतो इति।

भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच॥ ३ ॥

इति षष्ठाध्याये त्रयोदशः खण्डः

६--१४.

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने

त्युक्तः पुत्रः तथा चकार। **तत् शश्वत् संवर्तते। तत्** लवणं जले **शश्वत्** सर्वदा सम्यक् वर्तत इत्युक्तवन्तं शिष्यं प्रति पितोवाच। किमिति। **अत्र वाव—किलेति।** रसनेन्द्रियेणोपलभ्यमानतया वस्तुतस्सदेव लवणं यथा चक्षुषा त्वचा वा नोपलभसे, एवमेव **अत्रैव** [जगति अन्तरात्मतया] आगमाचार्योपदेशादिनाऽवगन्तुं योग्यमेव सच्छब्दितं ब्रह्म अत्रैव किल वर्तत इति **न निभालयसे**=द्रष्टुं न शक्तोऽसि, न पश्यसीत्यर्थः।

स — इति। उक्तोऽर्थः। **भूय—होवाच।** तर्हि सर्वव्यापिनः सच्छब्दितस्यावगत्युपायं दृष्टान्तेन प्रदर्शयेति प्रार्थित आचार्यः तथाऽस्त्वित्युक्तवानित्यर्थः। ६–१३.

यथा सोम्य पुरुषं — विसृष्टः। हे सोम्य! यथा लोके गन्धारेभ्यो जनपदेभ्यः **अभिनद्धाक्षं** पिनद्धचक्षुषं कञ्चित् पुरुषं चोरो गृहीत्वा **अतिजने**

खरससिद्धेति भावः। **तत् शश्वत् संवर्तते** इत्येतत् **तं होवाचेत्येतदनन्तरं** वा योज्यम्। अन्यथा तत्र उवाचेत्यादेरध्याहारस्यानुषङ्गस्य वाऽऽपत्तेः। 'विद्यमानमेव किलात्र त्वं न पश्यसि। एवं त्वया अदृष्टत्वेऽपि अत्रैव किल तत् शश्वत् संमिश्रं वर्तत' इति तदाऽर्थः। वाक्यमिदं दार्ष्टान्तिकविषयेऽप्यावर्त्य योज्यम्। तथाच दृश्यमप्यदृश्यं भवति कदाचित्। अथापि स्वीकार्यमेवेति।

अत्र न्यग्रोधपरिणामार्हाकारानुपलम्भेऽपि बीजाणिमा धर्मी दृश्यत एव; सत्तु न दृश्यत इत्यत्र लवणधर्म्यदर्शननिदर्शनेन स प्रत्यायित इति ध्येयम्। एवं लवणदृष्टान्तेन व्यापित्वमपि दर्शितं भवति।

यद्यप्येवं न संदृशे तिष्ठति रूपमस्य, न चक्षुषा पश्यति कश्चनैनम् — अथापि हृदा मनीषा मनसाऽभिक्लृप्तो भवति, यद्याचार्यवान् पुरुषः स्यादित्याह **यथा सोम्येति। अभिनद्धाक्ष**

विसृजेत्। स यथा तत्र प्राङ् वोदङ् वाऽधाराङ् वा प्रत्यङ् वा [1]प्रध्मायीत-अभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः (१); तस्य यथाऽभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति; स ग्रामाद् ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसंपद्येत —

एवमेवेहाऽऽचार्यवान् पुरुषो वेद। तस्य तावदेव चिरं यावन्न

1. प्राध्मा **मा**.

विजने विसृजेत् यदि, सः दिग्भ्रमोपेतः प्राङ्मुख उदङ्मुखो वा अधोमुखो वा, 'अभिनद्धाक्ष एव चेरैरानीतोऽभिनद्धाक्ष एव विसृष्टोऽहम्' इति **प्रध्मायीत** विक्रोशेदि[1]त्यर्थः।

तस्य — संपद्येत। यथा — कश्चित् कारुणिकः तस्याभिनहनं बन्धनं मुक्त्वा, 'उत्तरतो गन्धाराः सन्ति। अत एतां दिशमुत्तरां व्रजे'ति प्रब्रूयात् यदि, स तेन एवमुक्तो ग्रामाद् ग्रामान्तरं पृच्छन् तैरुपदिष्टमार्गो मेधावी उक्तार्थाविस्मरणशीलः[2] पण्डितः ऊहापोहक्षमधीयुक्तो यथा गन्धारानेव पुनरभिसंपद्येत [[3]प्राप्य निर्दुःखो भवेत्] इत्यर्थः।

एवमेवेहाचार्यवान्—इति। एवमाचार्योपदेशेन, 'ब्रह्मात्मकस्त्वमसि। अतः तदात्मकतया स्वात्मानमनुसंधत्स्व' इति उपदिष्टः तदात्मकत्वमनुसंधत्ते। तस्यैतादृशानुसंधाननिष्ठस्य **तावदेव चिरम्** तावानेव विलम्बः, यावत् प्रारब्ध-

1 विक्रोशेतेत्यर्थः **ख**. 2. **मेधावी** स्मरणशीलः **क** 3. नेदं **क** कोशे।

आनीतः अभिनद्धाक्षो विसृष्टः। समष्टौ, व्यष्टौ च यावदाचार्योपदेशम् अयमभिनद्धाक्ष एवेति अत्र पदद्वयद्योत्यम्। **ग्रामात् ग्रामान्तरं पृच्छन्** अनुष्ठितकर्मयोगज्ञानयोगः। **पण्डितः** भक्तियोगरूपविद्याविशेषानुष्ठानौपयिकौपदेशिकज्ञानसंपन्नः। यथा, 'पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इति। **मेधावी** निध्यानसंपन्नः इति च भाव्यम्। ईदृशो **वेद** साक्षात्करोति।

वदन्तीति। इदमुपलक्षणम्—**यावन्न विमोक्ष्य इति**, 'मोक्षयिष्यामि', 'मुच्ल्-मोक्षण' इत्येव प्रयोगात् मोक्ष्ये इत्यस्य मुच्ये इत्यर्थः। **याव**दितिपदं **इती**त्यनेनान्वेति। तथाच नाहमिदानीं मुच्यमानोऽस्मि, अथ मुक्तौ सिद्धायां संपन्नो भविष्यामीत्यभिसंधिर्यावद् भवति, तावत्कालं विलम्ब इत्यर्थः। नायमभिसंधिः विलम्बहेतुः। किंतु विलम्बकालपरिच्छेदकः। एतदभिसंधिसहकृतकर्मवासनास्थितिपर्यन्तं विलम्ब इत्युक्तं भवति। यद्वा **तस्ये**त्यस्य **इती**त्यनेनान्वयः। यावन्न विमोक्ष्ये, तावदेव चिरम्, अथ संपत्स्ये इति सुदृढनिश्चयः तस्य भवतीत्यर्थ इति।

विमोक्ष्ये अथ संपत्स्य[1] इति ॥ २ ॥

1. संपत्स्यते **मा.**

कर्मारब्धशरीरात् न विमोक्ष्यते । **अथ** तदनन्तरं तु सद्रूपं ब्रह्म संपद्यत इत्यर्थः । **न विमोक्ष्ये, संपत्स्ये** इति पुरुषव्यत्ययः छान्दसः ।

केचित्तु — **तस्य तावदेव चिरमित्यत्र** मे इत्यध्याहारः । 'तस्य मे तावानेव विलम्बः, यावत् कर्मभिर्न विमोक्ष्ये । अतः परं ब्रह्म संपत्स्ये' इति उपासकस्यानुसंधानप्रकारोऽनेन वाक्येनोच्यते — इति वदन्ति ।

ननु **यावन्न विमोक्ष्ये** इत्युक्तौ कथं शरीरात् मोक्षसिद्धिः ? उच्यते । मोक्ष इत्युक्ते कस्मान्मोक्ष इत्याकाङ्क्षायाम , अस्यामेव विद्यायाम्, 'अथ यदाऽस्य वाङ् मनसि संपद्यते' (६-८) इत्यादिना देहादुत्क्रमणश्रवणात्, अन्यत्र च, 'शरीरात् समुत्थाय परं ज्योतिरुपसंपद्य', धूत्वा शरीरम्', 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति श्रवणात्, 'त्यक्त्वा देहं पुनर्जन्म नैती'ति स्मरणाच्च शरीरान्मोक्ष इत्येवावगम्यते । **अथ संपत्स्य** इत्यत्रापि संपत्तेः कर्मापेक्षायाम्, 'सता सोम्य तदा संपन्नो भवति' इति वाक्यान्तरप्रतिपन्नं ब्रह्मैव कर्मतया संबध्यत इत्यवगम्यते । उत्तरखण्डिकायामेतद्विवरणप्रवृत्तायां देहमोक्ष—ब्रह्मसंपत्त्योः कथनाच्च एवमेवार्थः । एवमेव व्यासार्यैः, "तन्निष्ठस्य मोक्षोपदेशात्" इत्यत्रोक्तम् ।

न च, 'आचार्यवान् पुरुषो वेद' इत्यत्र वेदेत्यस्य [1]न (?) शब्दज्ञानमात्रार्थकत्वं शङ्क्यम् — वेदान्तेषु विद्युपास्योर्व्यतिकरेण प्रयोगात् । शाब्दज्ञानमात्रेण मोक्षस्य, 'बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम्' इत्यादिप्रमाणप्रतिषिद्धत्वाच्च विदिधातुरुपासनावाची एव । एवमस्यामपि विद्यायाम्, 'येनाश्रुतं श्रुतं भवति

1. अयं नञ् न स्यात् ।

एवमेव व्यासार्यैरिति । अयं भावः— 'भोगेन तु—' इति सूत्रभाष्यानुसारात् वक्ष्यमाणरीत्या कर्मणो मोक्षो वक्तव्यः, न शरीरात् । अथापि चरमशरीरवियोगानन्तरभावि सर्वं संपत्तिकक्ष्यानिविष्टं कृत्वा एवं व्यवहारः । शरीरपदं वा, 'सूक्ष्मं प्रमाणतश्च' इति सूत्रोक्तसूक्ष्मदेहपरम् । अन्ततः पुनर्जननौपयिकाकारविरहकथने नैर्भर्यात् सर्वं समानतात्पर्यमिति । मूले **अथ**शब्दः कर्मभिरिह मुक्तस्यापि अर्चिरादिगत्या पर्यङ्कारोहणपर्यन्तमीषद्विलम्बं दर्शयत्येव । श्रुतेः तदभिसंध्यभावे **अथे**त्यस्य स्थाने तदेति रीत्या शब्दः श्रूयेतेति ध्येयम् ।

स य एषोऽणिमा, ऐतदात्म्यमिदं सर्वम् । तत् सत्यम् । स आत्मा । तत् त्वमसि श्वेतकेतो इति ।

अमतं मतमविज्ञातं विज्ञात' मिति विज्ञानशब्दश्रवणात्, तस्य च, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यनेनैकार्थ्याच्च उपासनापरत्वमेवाश्रयणीयम्। व्यासार्यैस्तु, 'आचार्यवान् पुरुषो वेदे' ति आचार्यवत्ताफलत्वेन प्रतिपादितार्थविशेषवेदनवचनं तदर्थस्यानुसंधेयत्वे लिङ्ग' मिति वाक्यार्थज्ञानवाचिन एव वेदेत्यस्यानुसंधानाक्षेपकत्वमुक्तम्।

चतुर्थाध्याये—

(१) 'सर्वे पाप्मानः प्रदूयन्ते' इति सर्वकर्मप्रदाहश्रवणात् ब्रह्मविद्योत्पत्त्यनन्तरमेव सर्वकर्मणां नाशः। देहस्थितिस्तु चक्रभ्रमणादिवत् संस्कारवशादप्युपपद्यत इति प्राप्ते— उच्यते — "अनारब्धकार्ये एव तु पूर्वे तदवधेः"। विद्योत्पत्तेः प्राचीने अनारब्धकार्ये एव सुकृतदुष्कृते नश्यतः; न तु आरब्धकार्ये; 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति शरीरपातविलम्बावधिश्रवणात् यावच्छरीरधारणं प्रारब्धकर्मानुवृत्तेरवश्यम्भावात्। कर्मव्यतिरिक्तस्य देहधारकसंस्कारस्य सद्भावे प्रमाणाभावादित्युक्तम्।

(२) तथा, "भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते" इत्यत्र, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति विद्यायोनिशरीरपातमात्रस्यैवान्तरायत्वश्रवणात् प्रारब्धयोः पुण्यपापकर्मणोः सत्त्वेऽपि विद्यायोनिशरीरावसाने भवत्येव मोक्ष इति प्राप्ते - उच्यते — "भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते"। तुशब्दः पक्षव्यावृत्त्यर्थः। इतरे आरब्धकार्ये पुण्यपापे फलभोगेन क्षपयित्वैव ब्रह्म संपद्यते। अनेकशरीरभोग्यफले चेत्, तदवसाने संपद्यते; भोगेनैव क्षपयितव्यत्वात् प्रारब्धकर्मणोः। 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति न तद्देहविमोक्षे इत्युच्यते। अपितु देहारम्भककर्मविमोक्षे एवेति प्रतिपादितम्।

प्रकृतमनुसरामः। स — इति। उक्तोऽर्थः।

भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच॥ ३॥

इति षष्ठाध्याये चतुर्दशः खण्डः।

६—१५.

पुरुषं सोम्योपतापिनं ज्ञातयः पर्युपासते, जानासि मां जानासि मामिति। तस्य यावन्न वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्, तावज्जानाति॥ १॥

अथ यदाऽस्य वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्, अथ न जानाति॥ २॥

भूय — होवाच। ननु देहविमोक्षानन्तरं ब्रह्मसंपत्तिरित्ययुक्तम्—देवोऽहम्, मनुष्योऽहमित्यभिमानस्य कदाप्यनुपरततया यावदात्मभावित्वेन देवादिशरीरसंबन्धस्यापि यावदात्मभावित्वात्। अतो देहराहित्योपजीविनी ब्रह्मसंपत्तिरपि न श्रद्धेयेति मन्वानेन श्वेतकेतुना, भूय एव मा भगवान् विज्ञापयत्विति प्रार्थितः, तथेत्युवाचेत्यर्थः। ६—१४.

पुरुषं—जानाति। हे सोम्य! **उपतापिनं** मरणवेदनाक्रान्तं पुरुषं बन्धवः, मां जानासि किम्, मां जानासि किम् इति असकृद् वदन्तः परितस्तिष्ठन्ति। स तु मुमूर्षुः पूर्वोक्तसत्संपत्तिपर्यन्तं तान् जानातीत्यर्थः। **अथ — न जानाति।** सत्संपत्त्यनन्तरं तु तान् न जानातीत्यर्थः। ततश्च सर्वेषामपि[1] मरणदशायां सत्संपत्तौ देहाभिमाननुवृत्तेः तत्प्रयुक्तदेहसंबन्धनित्यताशंकाया असंभवात्, 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति देहसंबन्धात्यन्तनिवृत्तिप्रतिपादकश्रुतेर्नानुपपत्तिरिति

1. अपिशब्दः क. कोशे।

ननु संसृतिनिमग्नस्य तदभिमानोच्छेद एव दुर्लभ इत्यत्राह **पुरुषमित्यादि। यावदात्मभावित्वादिति।** अनादिः संसार इति हि स्वीकृतम्। अन्यथा पूर्वं मुक्तस्यैव स्वयं वा ईश्वरमुखेन वा कारणान्तरेण वा पुनःसंसारस्वीकारे मुक्त्यर्थप्रयत्नदर्शोपदेशादेरनावश्यकत्वात्। एवञ्च एतावत्पर्यन्तमनुच्छिन्नदेहात्माभिमानस्येतः परं तदुच्छेदोऽपि असंभावनीय इति भावः।

ततश्चेति। एवं शरीरवियोगमात्रस्य अन्यथाज्ञाननिरोधकत्वे तत्त्वसाक्षात्कारसहितशरीरवियोगस्य तत् कैमुत्यसिद्धम्। यथा खल्वेकेन प्रबलेन कर्मणा प्रतिबन्धात् अन्येषामनेकविध-

स य एषोऽणिमा, ऐतदात्म्यमिदँ सर्वम्। तत् सत्यम्। स आत्मा। तत् त्वमसि श्वेतकेतो इति।

भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच॥ ३॥

इति षष्ठाध्याये पञ्चदशः खण्डः।

६—१६.

पुरुषँ सोम्योत हस्तगृहीतमानयन्ति, अपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति। स यदि तस्य कर्ता भवति, तत एवानृतमात्मानं कुरुते,

---

भावः। **स य एषोणिमा** — प्रारब्धविमोक्षानन्तरभाविसंपत्तिकर्मत्वेन पूर्वखण्डकानिर्दिष्टः सच्छब्दितः स एषोऽणुरित्यर्थः। शिष्टं स्पष्टम्।

भूय — होवाच। ननु देवमनुष्यादिप्रकृत्यात्मकत्वाभिसंधौ अनर्थो भवति। सदात्मकत्वाभिसंधौ तु नानर्थप्राप्तिरिति न श्रद्धेयम्। न ह्यभिसंधिभेदमात्रेण महापुरुषार्थापुरुषार्थौ दृष्टचरौ इति मन्यमानेन श्वेतकेतुना भूय एव मा भगवान् विज्ञापयत्विति प्रार्थितः तथास्त्वित्युवाचेत्यर्थः। ६—१५.

'ऐतदात्म्यमिदं सर्वं तत् सत्यम्' इति सत्यभूतं सदात्मत्वमनुसंदधानस्यैवानर्थनिवृत्तिः, न तु प्रकृत्यात्मत्वलक्षणासत्यानुसंधाननिष्ठस्यानर्थपरिहार इत्याह **पुरुषं—तपतेति**। हे सोम्य! लोके राजपुरुषाः हस्ते पुरुषं गृहीत्वा आनयन्ति। कोऽपराधोऽनेन कृत इति परैः पृष्टास्सन्तः, 'अपहारं कृतवान्=चौर्यरूपेणापहारं कृत-

---

जन्मादिनुभावकानां कर्मणां कार्यजननशक्तिः कुण्ठयते, तथा सत्स्वपि सञ्चितेषु सर्वेषु कर्मसु तत्त्वसाक्षात्कारेण प्रतिबन्धात् दावाग्निदग्धबीजप्रायाणि तानि स्थितान्यपि न कार्यायालमिति स्थिते मुधैव तेषां कर्मणामनुवृत्तिकल्पनेति सर्वकर्मसमुच्छेद एवाऽनुमन्तुमुचितः, एतावत् अभूतस्य तत्त्वज्ञानादेरधुनोत्पत्तिवत् तस्यापि संभवात् श्रुतिसंमतार्थेऽनुपपत्त्यभावादिति।

अत्र खण्डे इदमप्युक्तं भवति — आचार्यसंबन्धरहितस्य तदज्ञतामात्रेण न तद्भूस्त्वभावः। स्वस्य तदज्ञत्वमात्रेण तदभावे इष्यमाणे अदर्शनावस्थायां ज्ञातयोऽपि न सन्तीति स्यात्। तथा चाऽऽभाणकः, 'बिडालो मीलयेन्नेत्रम्, भूलोकोऽस्तमियात् कथम्' इति।

एवं तावत्, अष्टमे खण्डे या परदेव संपत्तिरुक्ता सा न सूक्ष्मदेहमात्रस्य, किंतु जीवविशिष्टदेहस्येति च **अथ न जानाती**त्यन्तेन दर्शितम्। नन्वियं परदेवतासंपत्तिः सर्वम्रियमाणसाधारणी। तत् बन्धनस्वभावः प्रपञ्चो मुक्तौ कथं न बध्नीयादित्यत्र कर्माभावान्न बन्ध इति सनिदर्शनमाहान्तिमखण्डे। **अनृतमात्मानं कुरुते**। प्रागेवाभ्युपगतस्तेयश्चेत्, कुत परीक्षा?

सोऽनृताभिसंधोऽनृतेनाऽऽत्मानमन्तर्धाय पशुं तप्तं प्रतिगृह्णाति, स दह्यते अथ हन्यते ॥ १ ॥

अथ यदि तस्याकर्ता भवति, तत एव सत्यमात्मानं कुरुते । स सत्याभिसन्धः सत्येनाऽऽत्मानमन्तर्धाय पशुं तप्तं प्रतिगृह्णाति, स न दह्यते ; अथ मुच्यते ॥ २ ॥

स यथा तत्र नादाह्येत ऐतदात्म्यमिदँ सर्वम् । तत् सत्यम् । स आत्मा । तत् त्वमसि श्वेतकेतो इति ।

1. नादाह्यत शां.

वान् । अपह्नुत्य च अपनिह्नुते । अत एतस्य शोधनार्थं **परशुं** अयःपिण्डमस्मै तपत' इति वदन्तः आनयन्तीत्यर्थः । **स — हन्यते** । **सः** हस्तगृहीतः पुरुषः, 'न मया द्रव्यमपहृतम्' इति द्रव्यापहारमपह्नुवानः, यद्यपहारस्य कर्ता स्यात्, तदा असत्यप्रतिज्ञत्वात् स्वात्मानमनृतं करोति । अनृताभिसंध्यन्तर्हितः स ततः तप्तं परशुं राजपुरुषार्पितं हस्तेन प्रतिगृह्णाति । ततः स दह्यते । राजपुरुषैर्हन्यते चेत्यर्थः । **अथ यदि—मुच्यते** । स यदि तस्य चौर्यस्य अकर्तैव सन्, नाहमपाहार्षमिति प्रतिजानीयात्, तदा सत्याभिसंधिवशेनैवात्मानं सत्यं कृत्वा सत्येनात्मानमन्तर्धाय परशुं तप्तं गृह्णाति । सत्याभिसंधिवशादेव प्रतिबद्धदाहो राजपुरुषैर्मुच्यते ।

स यथा तत्र न दाह्येत—सः सत्याभिसंधः पुमान् तत्र परशुग्रहणे यथा **न दाह्येत**, न दह्यते इत्यर्थः । एवं सदात्मकत्वलक्षणसत्याभिसंधिः पुमान् सांसारिकैरनर्थैः न स्पृश्यत इत्यर्थः । **ऐतदात्म्यमिदं — तत् त्वमसि श्वेतकेतो इति । अतः**

कुतस्तरां परशुतापः ? त्वं मे इति ईश्वरेणोक्ते, 'अहं ते' इत्येवायमनुमन्यते चेत्, कथमयं संसारतापः । अतः स इवायमपि चोरः, अनृताभिसंधश्चेति । ननु स्तेयविस्मरणे कथमनृतम् ? अहमकार्षमिति स्वीकारायोगादिति चेन्न—तेनापि, नाहं स्मरामीति वक्तव्यम्, न तु नाहं स्तेयमकार्षमिति । वस्तुतः स्तेये प्रवृत्तस्यानृताभिसंधत्वमपि सहजमिति, एवमुक्तम् । स्तेयकर्मतदभावावेव दाहादाहप्रयोजकावभिमतौ । मूले **अपहार्षीदिति** अडभावः छान्दसः ।

ऐतदात्म्यमिति । अत्र खण्डे स य एषोऽणिमेत्यनुक्त्या सत्यत्वाद्युपपादनार्था एव सर्व इमे खण्डा इति ज्ञायत इति प्रागेवाभिहितम् । अत्र तद्वाक्योपेक्षाकारणं तु, यथा तत्र दृष्टान्ते सत्याभिसंधः तप्तपरशुना न दाह्यते, एवमिदं सर्वमैतदात्म्यं जगदपि न दाह्येत, यदि सत्याभिसंधं स्यात् इत्यन्वयस्य स्फुटप्रतिपत्तये । दार्ष्टान्तिकान्वयानुगुण्याच्च **दाह्येत** इति लिङन्तमेव श्रूयते, न तु दाह्यत इति । एवमिह प्रपञ्चान्तर्गतः सर्वोऽपि जीवो मोक्षार्ह इति ज्ञापितं भवति । **तत् सत्यमिति** । अनृतेन प्रत्यूढाः अनृताभिसंधस्तेनवत् तप्ता भवेयुः । अतापाय स यथा सत्याभिसंधः, तथा त्वमपि सत्याभिसंधो भव । तद्धि सत् सत्यम् इत्युपदेशः कृतो भवति ।

तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

॥ इति षष्ठाध्याये षोडशः खण्डः ॥

इति छान्दोग्योपनिषदि षष्ठोऽध्यायः (षष्ठः प्रपाठकः)

सर्वस्य सदात्मकत्वानुसंधानमेव सत्याभिसंधिरिति सर्वान्तर्गतः त्वमपि सदात्मक इति सदात्मकत्वरूपसत्याभिसंधिमान् भव । तेन संसारदाहानभिभूतो मुच्यस इत्यर्थः ।

तद्धास्य विजज्ञाविति विजज्ञाविति । सच्छब्दितं तत् परं ब्रह्म **अस्य** गुरोर्वचनात् **विजज्ञौ** ज्ञातवान् श्वेतकेतुरित्यर्थः । द्विरुक्तिरध्यायसमाप्त्यर्था ।

अत्र व्यासार्यैः, तद्धास्य विजज्ञावित्यत्र विजज्ञाविति पदम्, 'अविज्ञातं विज्ञात'मिति प्रक्रमश्रुतविज्ञानशब्दसमानार्थकम्, अत एवोपासनवचनमित्युक्तम्। तत्तु संभवाभिप्रायेण । पूर्वत्र अष्टकृत्वोऽभ्यस्तेन, 'भूय एव मा भगवान् विज्ञापयतु' इति वाक्येन, 'तन्मे विजानीही' ति वाक्येन च प्रस्तुतविज्ञानविषयत्वादस्य **विजज्ञा**-वितिपदस्य। तत्र च वाक्ये उपासनप्रसक्तेरेवाभावात् । न हि, विज्ञापयत्वित्यत्र उपासनं कारयतु इत्यर्थो युक्तः । 'त्रिवृत् त्रिवृदेकैका भवति, तन्मे विजानीही' ति, 'भूय एव मा भगवान् विज्ञापयतु' इति वाक्ये, 'तद्धास्य विजज्ञाविति विजज्ञा'विति वाक्ये च पूर्वत्र त्रिवृत्करणे श्रुतस्य विजानातेरुपासनार्थत्वाभावेन इहापि तथात्वस्यैव युक्तत्वादिति द्रष्टव्यम्। केचित्तु, त्रिवृत्करणप्रकरणे च अत्र च श्रुतानां विज्ञानशब्दानामुपासनार्थत्वे दोषाभावादेतेषां विज्ञानशब्दानामुपासनार्थत्वमेव । अथवा मध्ये

---

(१) 'कार्यात्म सज्जगद्धेतुः (२) तेजोबन्नसमष्टिकृत् ।
(३) त्रिवृत्कृत्य व्यष्टिकृच्च (४) त्रिवृत्ता चाक्षगोचरः ॥ १ ॥
(५) तेजोबन्नैः कायपोषः (६) तत्राणिष्ठांशसंभवः ।
(७) तदभावे मनोहानि 'रिति व्याहृतिभिर्वदन् ॥ २ ॥
(१) 'चिदचिल्लयभूमिर्यो (२) नानाजीवलयास्पदम् ।
(३) चिन्नदीनिर्गमाम्भोधिः (४) अविनाशिचिदाश्रयः ॥ ३ ॥
(५) सूक्ष्मोऽप्यतिस्थूलहेतुः (६) व्यापी चाब्लवणं यथा ।
(७) आचार्यवद्भिर्वेद्यश्च (८) स्वसंपत्त्याऽभिमानहा ॥ ४ ॥
(९) यदासौ न पुनर्बन्धः स सत्यात्माऽन्तरोऽणिमा ।'
इति खण्डे ऋषेः श्वेतकेतुमुद्दालकोऽब्रवीत् ॥ ५ ॥

विज्ञानशब्दानामतथात्वेऽपि उपक्रमोपसंहारैकरूप्यार्थमुपक्रमस्थविज्ञानशब्दवत् उपसंहारस्थं विजज्ञाविति पदमुपासनार्थमेवेति वदन्ति ॥

एतद्विषयमधिकरणं लिख्यते— समन्वयाध्याये प्रथमपादे—

सर्वं हि जगत् सुखदुःखमोहात्मकं दृष्टम् । लोके हि एकस्यैव रूपयौवनशालिनो योषित्पिण्डस्य भर्तारं प्रति सुखरूपत्वम्, सपत्नीजनं प्रति दुःखरूपत्वम्, कामुकपुरुषान्तरं प्रति मोहरूपत्वञ्च दृष्टम् । अतः सुखदुःखमोहात्मकतया सत्त्वरजस्तमोमयस्य जगतः तदनुरूपमेव कारणं वक्तव्यमिति युक्तिसिद्धं त्रिगुणात्मकं प्रधानं सर्वज्ञकपिलस्मृतिसिद्धं सद्विद्याप्रतिपाद्यमिति पूर्वपक्षे प्राप्ते – उच्यते —

" ईक्षतेर्नाशब्दम् " । शब्दः प्रमाणमेव न भवति यस्य, तत् अशब्दम् । आनुमानिकमिति यावत् । आनुमानिकं प्रधानं, ' सदेव सोम्येदमग्र आसी'दिति न सच्छब्दितम् । अपितु परं ब्रह्मैव । कुतः? **ईक्षतेः** । ईक्षणादित्यर्थः । यद्यपि, ' इक्ष्तिपौ धातुनिर्देशे वक्तव्यौ ' इति ईक्षतिशब्दो धातुवाची—तथापि इह धातुवाचिना ईक्षतिशब्देनार्थो लक्ष्यते । ' तदैक्षत बहु स्यां प्रजायेयेती ' ति सच्छब्दितस्येक्षणकथनात् । अचेतने ईक्षणासंभवात् । न च एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृत्पिण्डादिदृष्टान्तस्य चोपन्यासेन अनुमानवेषत्वप्रतीतेः आनुमानिकमेव प्रधानमिह प्रतिपाद्यत इति शङ्क्यम्—प्रतिज्ञादृष्टान्तोपन्यासेऽपि प्रधानभूतहेत्ववयवानुपदेशेन अनुमानोपन्यासरूपत्वाभावात् । न च, ' तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ ' इति कार्यलिङ्गोपन्यासात् अनुमानविवक्षा प्रतीयत एवेति वाच्यम्—उपक्रमोपसंहाराद्यन्तर्गतोपपत्तिरूपतात्पर्यलिङ्गतया कार्यलिङ्गोपन्यासेऽपि सांख्याभिमतसुखदुःखमोहान्वितत्वरूपहेतूपन्यासादर्शनात् ।

" गौणश्चेन्नात्मशब्दात् " । ननु ' तत्तेज ऐक्षते ' ति अचेतने तेजआदौ श्रुतस्य ईक्षणस्य मुख्यस्यासंभवेन कार्यौन्मुख्यलक्षणगौणार्थस्यैव[1] समाश्रयणीयतया

1. लक्षणगौणधर्मस्यैव क. गौणपदं ख. कोशे न ।

न सच्छब्दितमिति । सच्छब्दितमिति पक्षनिर्देशः । **उपसंहाराद्यन्तर्गतेति** । 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ' इत्युक्तान्तर्गतेत्यर्थः ।

सच्छब्दितेऽपि श्रूयमाणमीक्षणं गौणमेवास्तु इति चेन्न—'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मे'ति सत आत्मत्वप्रतिपादकश्रुति[1]व्याकोपप्रसङ्गेन गौणेक्षणप्रायपाठस्यानादर्तव्यत्वात्। तेजःप्रभृतिशब्दानामपि परमात्मपर्यन्त[2]तया तत्रापीक्षणस्य मुख्यत्वसंभवाच्च।

"तन्निष्ठस्य मोक्षोपदेशात्"। तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति सदात्मकत्वविद्यानिष्ठस्य शरीरपातमात्रान्तरायब्रह्मसंपत्तिलक्षणमोक्षश्रवणात। न हि प्रकृत्यात्मत्वानुसंधाननिष्ठस्य मोक्षः सांख्यमतेऽपि संप्रतिपन्नः।

"हेयत्वावचनाच्च"। यदि सच्छब्दितं प्रधानं स्यात्, तर्हि सदात्मकत्वं मुमुक्षोः हेयतयोपदेश्यं स्यात्; न तु अनुसंधेयत्वेनेत्यर्थः।

"प्रतिज्ञाविरोधात्"। प्रधानविज्ञाने तत्कार्याचेतनमात्रविज्ञानेऽपि चिदचिदात्मकसर्वप्रपञ्चविज्ञानाभावेन एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा पीड्येत।

"स्वाप्ययात्"। 'सता सोम्य तदा संपन्नो भवती'ति श्रुतिः, सत्संपत्तिम् 'स्वमपीतो भवती'ति स्वाप्ययत्वेन बोधयति। सच्छब्दितस्य प्रधानत्वे स्वशब्दार्थभूतमात्मत्वं नोपपद्यते। ब्रह्मत्वे तु स्वशब्दार्थभूतमात्मत्वमुपपद्यते। तथा अचेतने अकारणे जीवस्याप्ययशब्दितो लयश्च नोपपद्यते।

"गतिसामान्यात्"। सर्वेषु वेदान्तेषु, 'आत्मा वा इदमेक एवाग्र आसीत्', 'एको ह वै नारायण आसीत्', 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिषु चेतनकारणत्वावगतेः तत्साम्यमेवेहापि वक्तव्यम्। अतस्तदैकार्थ्याय इहापि सच्छब्दितं ब्रह्मैव कारणत्वेन निर्दिश्यते।

"श्रुतत्वाच्च"। अस्यामेवोपनिषदि सच्छब्दवाच्यस्य अद्वितीयत्व—नामरूपव्याकर्तृत्व — सर्वज्ञत्व — सर्वशक्तित्व — सर्वाधारत्वापहतपाप्मत्वादीनां श्रवणात् नाचेतनं प्रधानं सच्छब्दितमिति स्थितम्॥ ६—१६.

इति छान्दोग्योपनिषत्प्रकाशिकायां षष्ठोऽध्यायः (षष्ठः प्रपाठकः)

1. श्रुतिकोप. ख. 2. परमात्मपरतया ख.

इति स्थितमिति। एवमन्तराभूतग्रामाधिकरणेऽपि सद्विद्याविचारोऽस्ति। प्रधानविषयवाक्यमन्यदधिकृत्य प्रवृत्तत्वात्तु तदधिकरणमत्र भाष्ये न निरदेशि। आद्यसूत्रद्वयेऽपि 'उपदेशवत्', 'इतरवत्' इति एतद्ग्रन्थीकरणात्, तृतीयसूत्रस्य, 'सैव हि सत्यादयः' इत्यस्य सर्वात्मना एतद्विषयकत्वाच्च तदप्यनुसंधेयम्॥

अथ सप्तमोऽध्यायः (सप्तमः प्रपाठकः) ७—१.

अधीहि भगव इति होपससाद सनत्कुमारं नारदः। तँ होवाच—

भूमविद्या प्रस्तूयते — **अधीहि—नारदः**। सनत्कुमारं योगीन्द्रं नारद ऋषिः, 'अधीहि भगव' इति मन्त्रोच्चारणपूर्वकं विधिवदुपसन्न इत्यर्थः। **अधीहि** अधीष्वेत्यर्थः। **तं होवाच**। तमुपसन्नं नारदं सनत्कुमार उवाचेत्यर्थः। तदे-

---

अणिम्न उपासनरूपा सद्विद्या प्रागुक्ता; अथ भूम्न उपासनरूपा भूमविद्या। सा, 'तत् सत्य'मिति सत्यविषयिणी; इयमपि, 'यः सत्येनातिवदती'ति वचनात् तथा। तत्र, 'स आत्मे'ति, अत्र, 'अथात आत्मादेशः', 'आत्मतः प्राणः' इति चोभयोरात्मविषयता। तत्र, 'तत्त्वमसी'त्यनेन अहं ब्रह्मास्मीत्युपासनमुक्तम्, 'अहमेवेदं सर्वम्' इति चात्र। तत्र, 'यावन्न विमोक्ष्ये, अथ संपत्स्ये' इति संगृहीतं मोक्षस्वरूपमत्र विवियते, 'स स्वराड् भवति, तस्य सर्वेषु लोकेषु कामचारो भवति, स एकधा भवति त्रिधा भवती'त्यादिना। न केवलं मनुष्याधिकारं ब्रह्मविद्यानुष्ठानम्, किन्तु तदुपर्यपीत्येतदुपाख्यानमुखेनात्र सूच्यते। पूर्वं स्तब्धस्य निःशोकस्यानुपसन्नस्य पुत्रस्य पित्रा कृपया कृतो विद्योपदेशः, अत्र च अकृत्स्नज्ञत्वखेदिनः शोकार्तस्योपसन्नस्य भ्रातुः भ्रात्रा कृपया कृत्स्नोपदेश इत्येवं संगतिर्भाव्या। अणिमेति सौक्ष्म्यं सर्ववस्त्वन्तःप्रवेशार्हत्वातिदुर्ग्रहत्वरूपम्; भूमेति वैपुल्यञ्चात्यन्तापरिच्छिन्नत्वरूपमेकस्मिन्नविरुद्धमिति उभयत्रापि ब्रह्मविद्या। यथावस्थितभूमब्रह्मविद्यायां पुरुषमवतारयितुमादौ अर्वाञ्च चतुर्दशोपासनान्युच्यन्ते।

क्रमादिमेऽत्र विषयाः नाम वाक् च मनस्तथा।
संकल्पश्चित्तमाध्यानं विज्ञानं बलमन्नकम् ॥ १ ॥

आपस्तेजस्तथाऽऽकाशः स्मर आशा चतुर्दश।
प्राणः पञ्चदशस्त्वीक्ष्यो भूमविद्यारतैरपि ॥ २ ॥

अधीहि भगव इति। 'अधीहि भगवो ब्रह्मे'ति मन्त्रो भृगुणा वरुणाय पित्रे निवेदितो भृगुवल्ल्यां श्रूयते। अयमपि नारदो नूनं तथैवार्थयितुं प्रवृत्तः शोकवेगविवश एवं कर्मकारकमत्यक्षत्। अत एव सनत्कुमारः, 'अध्यापनीयोंशः कः' इत्यनिर्धार्य, 'यद्वेत्थे'त्यादि वक्ष्यति। यद्वा अधीतबहुविद्य एवायं नारदः आत्मवेदनविरहमात्रेण सर्वमनधीतमेव मन्वानः आत्मवेदनसिद्ध्यौपयिकं पूर्णाध्ययनमेव चिकीर्षुरिव प्रत्यग्रोपनीतवटुवत्, 'अधीहि भगव' इत्याकारकमेव मन्त्रं प्रायुङ्क्त। सनत्कुमारस्तु, 'अलमधीताध्यपनेन। युक्तमनधीतमात्राध्यापनम्' इति सूचयन्, 'यद्वेत्थे'त्यादिकमवादीदिति। **अधीष्वेत्यर्थ** इति। भृगुवल्ल्याम्, 'अधीहि उपदेशाय स्मर, अधीष्व, अध्यापय' इत्युक्तः सर्वोऽर्थ इहापि भाव्यः। इङ् स्मरणे इत्ययं धातुः परस्मैपदी। अयमपि इङ् अध्ययन इति धातुवत् अधिपूर्वक एव।

यद्वेत्थ, तेन मोपसीद । ततस्त ऊर्ध्वं वक्ष्यामीति ॥ १ ॥

स होवाच—ऋग्वेदं भगवोऽध्येमि यजुर्वेदँ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यँ राशिं दैवं निधिं वाकोवाक्यमेकायनम्, देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याँ

वाह **यद्—उपसीद** । यत् त्वं ज्ञातवान् असि, 'तत् इदमहं जाने' इति तत्प्रख्यापनेन मामुपसीद । **ततस्त ऊर्ध्वं वक्ष्यामीति** । **तत ऊर्ध्वं**=ज्ञातांशातिरिक्तम् । ज्ञातांशस्यैवोपदेशो व्यर्थ इति भावः ।

स— । **सः** नारदः । हे भगवः! **अध्येमि** स्मरामि । वेद्मीति यावत् । 'यद् वेत्थे' ति वेदनस्योक्तत्वात् ।—**इतिहासपुराणं पञ्चमम्** । 'वेदानध्यापयामास महाभारतपञ्चमान्' इतिवत् ऋगादिभिरितिहासस्यात्र पञ्चमत्वोक्तिः । **वेदानां वेदम्** । **वेदानां** ऋग्वेदादीनां **वेदं** प्रकृतिप्रत्ययाऽऽवेदकम् । व्याकरणमित्यर्थः । **पित्र्यं** श्राद्धकल्पम । **राशिं** गणितम् । **दैवम्** उत्पातज्ञानम् । **निधिं** निधिदर्शनोपायप्रतिपादकशास्त्रम् । **वाकोवाक्यं** तर्कशास्त्रम् । **एकायनम्** एकायनशाखाम् । **देव—विद्याम्** । **देवविद्या** देवतोपासनप्रकारविद्या । **ब्रह्मविद्या** वेदाङ्गभूतशिक्षादिविद्या । **भूतविद्या** वशीकरणविद्या । **क्षत्रविद्या** धनुर्वेदः । **नक्षत्रविद्या** ज्यौतिषम् ।

इतिहासपुराणं पञ्चमममिति । नूनमयं वेदभागो वेदव्यासेन महर्षिणा चतुर्विधार्तिज्योपयोगितया ऋग्वेदादीन् चतुरोऽध्यापितवता साक्षान्नाध्यापितः, स्वकृतेतिहासपुराणमुखेन तु फलतः संगृहीत इति । यद्यपि **वेदानां वेदमित्येतत्** एतद्विशेष्यं भवितुमर्हति, 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इत्युक्तरीत्या वेदार्थवेदकत्वात् वेदानां वेद इति । एवं **पित्र्यमित्यस्य राशिमिति, दैवमित्यस्य निधिमिति** च विशेष्यं प्रतीयते । अत एवोपरि 'पित्र्यो राशिः । दैवो निधिः' इति पित्र्यदैवपदयोः पुल्लिङ्गत्वौचित्यम् । अन्यथा सामान्ये नपुंसकमेव स्यात् — अथापि तथा राशिनिधिपदनिर्दिष्टग्रन्थविशेषाप्रसिद्धेः, विशेष्यविशेषणभावोपेक्षया पृथक्करणे नारदस्याधिकामिज्ञत्वसिद्धया च यथाशाङ्करमर्थो वर्णितः । **व्याकरण**मिति अनुक्ताङ्गान्तरोपलक्षकम् । पित्र्यादिः सर्वोऽप्ययं वेदानां वेद एव । **तर्कशास्त्र**मिति । **वाकोवाक्य**मिति उक्तिप्रत्युक्तिरूपवाक्यं पूर्वपक्षसिद्धान्त-प्रश्नसमाधानादिरूपमुच्यते । तर्कश्च, 'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहस्तर्कः' इति लक्षितः तादृश इति । **एकायनं** नीतिशास्त्रमिति शाङ्करम् । **सर्पदेवजने**ति क्रमेण पातालस्वर्गधरणिगतप्राणिकथनात् तत्तल्लोके तत्तदुत्पत्तिस्थित्यादिविषयिणी विद्येत्यपि स्यात् । यः कश्चिदर्थोऽस्तु ; नूनमनिर्धार इदृशे विषये भाष्यकृतां

सर्पदेवजनविद्याम्। एतद्भगवोऽध्येमि ॥ २ ॥

सोऽहं भगवो मन्त्रविदेवाऽस्मि नाऽऽत्मवित्। श्रुतँ ह्येव मे भगवद्दृशेभ्यः, तरति शोकमात्मविदिति। सोऽहं भगवः शोचामि; त मा भगवाञ्छोकस्य पारं तारयत्विति।

तँ होवाच। यद्वै किंचैतदध्यगीष्ठाः, नामैवैतत् ॥ ३ ॥

सर्पविद्या गारुडविद्या। **देवविद्या** गान्धर्वशास्त्रम्। **जनविद्या** आयुर्वेदः। **एतद् भगवोऽध्येमि** अहमेतत् सर्वं जानामीत्यर्थः। **सोऽहं**—। [हे **भगवः** पूजावन्!] अहमेतत् सर्वं [1]जानन्नपि **मन्त्रविदेवास्मि** शब्दब्रह्मनिष्ठ एवास्मि। यद्वा मन्त्रप्रधानकर्मनिष्ठ इति वा (?) अर्थः। **नात्मविदस्मि** न परब्रह्मवित्। आत्मशब्दस्य तस्मिन्नेव मुख्यत्वात्। जीवस्य [2]आपेक्षिकात्मत्वेन निरङ्कुशात्मत्वाभावाच्च। मन्त्रवित्त्वात् आत्मवित्त्वे किमधिकं स्यादित्यत्राह **श्रुतं**—**इति**। **भगवद्दृशेभ्यः** भवादृशेभ्यः महद्भ्यः, 'आत्मवित् **शोकं** संसारं तरति' इति मे श्रुतमेव हि। **म** इति संबन्धसामान्ये षष्ठी! मया श्रुतमित्यर्थः। **सोऽहं**—**तारयत्विति**। एतादृशविद्यासंपन्नोऽप्यहं आत्मज्ञानराहित्यात् शोकार्णवे पतितोऽस्मि। **तं** तादृशं मां भगवान् आत्मज्ञानेन शोकार्णवस्य पारं तारयतु—**इत्युवाचेत्यर्थः**।

तं होवाच। सनत्कुमार इति शेषः। **यद्वै**—**एतत्**। **अध्यगीष्ठाः** अधीतवान् असीत्यर्थः। अत्र तेषां [3]नामैवात्मेति प्रतिवचने दातव्ये नामैवैतदिति अधीतग्वेदादिसमानाधिकरण्येन प्रतिवक्तुः सामानाधिकरण्यनिर्देशार्हत्वमेवात्मत्व[4]-

1. जानामि। जानन्नपि क. 2. जीवस्य तु क. 3. अत्र तेषामित्यस्य स्थाने 'आत्मात्मनि पृष्टे इति क. 4. आत्मत्वौपयिकं क.

सर्वेषाम्। सर्वार्थोक्तौ विस्तरापत्तेः एकमात्रे वक्तव्ये कस्यापि कथनसंभवादिति। **मन्त्रविदेवास्मीति**। मन्त्रार्थमपि जानामि; अथापि, 'वचसां वाच्यमुत्तमम्' इति सर्वपदसर्वविद्यापर्यवसानभूमेरज्ञानात् सर्वत्राहमकृत्स्नविदेव। अतो नाममात्रज्ञतुल्योऽहमिति भावः। **किमधिकं स्यादिति**। आत्मज्ञानाभावे का हानिरित्यर्थः।

अधीते ऋग्वेदादौ तस्याश्रद्धा मा भूदिति प्रथमतस्तस्य नामत्वं ब्रह्मदृष्टयर्हत्वञ्च प्रदर्श्याथ प्रश्नप्रतिवचनक्रमेण मुख्यब्रह्मभूमसुखमवतारयितुमनाः सनत्कुमार आह **यद्वै किञ्चैतदध्यगीष्ठा** इति। **सामानाधिकरण्येन प्रतिवक्तुरिति**। नाम्नि ब्रह्मदृष्टेर्विधास्यमानतया ब्रह्मवत् नाम्नोऽप्यात्मत्वप्रयुक्तसामानाधिकरण्यनिर्देशार्हत्वं मनसि निधाय नामैवैतदिति समानाधिकरणं प्रयुक्तमित्याशयः स्यात्। **इदञ्च ऋग्वेदाद्यपेक्षया नाम्नो भिन्नत्वमनुमत्य**। अभिन्नत्वं सहजमस्तीति

नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या। नामैवैतत्। नामोपास्स्वेति ॥ ४ ॥

स यो नाम ब्रह्मेत्युपास्ते, यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति, यो नाम ब्रह्मेत्युपास्ते।

अस्ति भगवो नाम्नो भूय इति। नाम्नो वाव भूयोस्तीति।

मिति भावः। तदेव प्रपञ्चयति **नाम वै**—**विद्या**। स्पष्टोऽर्थः। उपसंहरति **नामैवैतत्**। नामरूपमयत्वात् प्रपञ्चस्य, विशिष्य[1] ऋग्वेदादिलक्षणशब्दराशेः नाम-[2]रूपत्वाच्च सर्व नामैवेत्यर्थः। ततः किमित्यत्राह **नामोपास्वेति**। अत्र ब्रह्मेति शेषः। नाम ब्रह्मोपास्वेत्यर्थः। तस्य फलमाह **स यो**—**भवति**। नामप्रवृत्तिर्यावति देशे भवति, तावति देशे अस्य नामब्रह्मोपासकस्य यथेष्टं सञ्चरणं भवतीत्यर्थः। उक्तमेव पुनरुपसंहरति **यो नाम ब्रह्मेत्युपास्ते**। आत्मानं जिज्ञासमानं प्रति ब्रह्मत्वेन नामोपदिशतः[3] आत्मत्वब्रह्मत्वे अन्यूनानतिरिक्तवृत्तिधर्माविति भावः।

ब्रह्मशब्दप्रवृत्तिनिमित्तं बृहत्त्वं नाम्नि न पुष्कलमिति मत्वा नामोपदेशेन अपरितुष्टस्सन् नारदः पृच्छति **अस्ति भगवो नाम्नो भूय इति**। वैपुल्यार्थाद् बहुशब्दात् अतिशायनिके ईयसुन्प्रत्यये **भूय** इति रूपम्। किं नाम्नोऽपि विपुलतरं किञ्चिदस्तीति प्रश्नार्थः। वैपुल्यं तु गुणोत्कर्षकृतम्; न तु परिमाणकृतम्। तथैवोत्तरत्र प्रपञ्चनादिति द्रष्टव्यम्। अत्र नाम्नो बृहत्त्वलक्षणब्रह्मत्वे कथिते ततोऽपि किं बृहदस्तीति प्रष्टव्ये ततोऽपि किं भूयोऽस्तीति प्रश्नात् भूयस्त्वं बृहत्त्वञ्चैकमिति ज्ञाप्यते। **गुरुराह नाम्नो वाव भूयोऽस्ती**ति।

1. विशिष्ट क. 2. नामात्मकत्वाच्च क. 3. नामोपदर्शनस्य ख.

च दर्शयिष्यति, 'विशिष्य ऋग्वेदादिलक्षणशब्दराशेर्नामरूपत्वाच्चे'ति। **नामैवैतदित्येवकारेण** वस्तुतः ऋग्वेदादेर्न ब्रह्मत्वम्। किन्तु आरोप एवेति वक्ष्यमाणदृष्टिविध्युपयुक्तसूचनमपि।

स यो नाम ब्रह्मेत्युपास्ते इति आद्यन्तयोः कथनं व्यर्थमिति शङ्कां परिहरति **उक्तमेव पुनरुपसंहरती**ति। एवं वाऽस्तु—उपासनमुपदिष्टम्; तत्राधिकारी कथ्यते **स** इति। अत्र वर्ण्यत इति शेषः। पृथग्वाक्यमिदम्। यो नाम ब्रह्मेत्युपास्ते, सोऽथ वर्ण्यते फलमुखेनेति। अथ वर्णनम्, यावन्नाम्न इत्यादिना। एवञ्च **स** इत्यस्योत्तरवाक्ये **अस्ये**ति पदघटितेऽन्वयासंभवेऽपि न क्षतिः। एवं ४–११–२. इत्यादावपि सर्वत्र द्रष्टव्यम्।

नाम्नो वाव भूयोऽस्तीति। नन्वत्र नारदो नाम्नि ब्रह्मदृष्टिरिहोक्तेति किं मन्यते, उत

तन्मे भगवान् ब्रवीत्विति ॥ ५ ॥

इति सप्तमाध्याये प्रथमः खण्डः ।

७—२.

वाग् वाव नाम्नो भूयसी । वाग् वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्याम्, दिवञ्च पृथिवीञ्च वायुञ्चाकाशञ्चाऽऽपश्च तेजश्च देवाँश्च मनुष्याँश्च पशूँश्च वयाँसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलिकं धर्मञ्चाधर्मञ्च सत्यञ्चानृतञ्च साधु चासाधु च हृदयज्ञञ्चाहृदयज्ञञ्च । यद्वै वाङ् नाभविष्यत्— न धर्मो नाधर्मो व्यज्ञापयिष्यत्; न सत्यम्, नानृतम्, न साधु, नासाधु, न हृदयज्ञो नाहृदयज्ञो वागेवैतत् सर्वं विज्ञापयति । वाचमुपास्स्वेति ॥ १ ॥

शिष्य आह **तन्मे भगवान् ब्रवीत्विति** । स्पष्टोऽर्थः । ७–१.

गुरुराह **वाग्वाव नाम्नो भूयसी** । वाग्शब्दः प्रसिद्धौ । तदेव प्रपञ्चयति **वाग्वा ऋग्वेदं विज्ञापयति** । वैशब्दोऽवधारणे । **यजुर्वेदं — अहृदयज्ञं च** । **हृदयज्ञो** मनोज्ञः, हृदयप्रिय इत्यर्थः । शिष्टं स्पष्टम् । एतत् सर्वं वागेव विज्ञापयतीति पूर्वेणान्वयः । वागभावे एतज्ज्ञानं नास्तीत्यपि दर्शयति **यद्वै—व्यज्ञापयिष्यत्** । वागिन्द्रियाभावे वेदाध्ययनाद्यभावात् धर्मादिकं विज्ञातं च नाभविष्यदित्यर्थः । वागेव — **उपास्स्वेति** । स्पष्टम् ।

वास्तवब्रह्मोपास्तिरिति । नाद्यः, तथासति उत्कृष्टदृष्टेरेव निकृष्टे कर्तव्यतया नामापेक्षया ब्रह्म भूयोऽस्तीति तेन ज्ञातमेवेति कथमयं प्रश्नः । अन्त्ये, नामशब्दस्य नामान्तर्याम्यर्थकत्वात् तादृशनामपदवाच्यात् भूयो नास्त्येवेति प्रश्नः समाधिरीदृशश्च न युज्यत एवेति चेन्न — ब्रह्मदृष्टेरेव तेनापि बुद्धत्वात् । प्रश्नार्थस्तु नामापेक्षया विपुलतरं किञ्चिद् ब्रह्मदृष्ट्यर्हमस्ति किमिति । वास्तवब्रह्मत्वाभावात् औपचारिकं किञ्चिद्रूपं बृहत्त्वमादाय नाम्नि ब्रह्मदृष्टिरेव क्रियते । सा च ततो विपुलतरसत्त्वे तत्रोचितेति प्रश्नतात्पर्यम् । अत एव प्राणशब्दवाच्यजीवात्मातिशयितस्य ब्रह्मन्यूनस्य ब्रह्मदृष्ट्यर्हस्य कस्यचिदभावात् 'अस्ति भगवः प्राणाद् भूय' इति न पृष्टं नारदेनेत्यलमिदानीम् ।

श्वापदानि व्याघ्रादीनि हिंस्राणि सत्त्वानि । पतङ्गाः शलभाः ।

स यो वाचं ब्रह्मेत्युपास्ते, यावद् वाचो गतम्, तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्ते।

अस्ति भगवो वाचो भूय इति। वाचो वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति॥ २॥

इति सप्तमाध्याये द्वितीयः खण्डः।

७—३.

मनो वाव वाचो भूयः। यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवति, एवं वाचश्च नाम च मनोऽनुभवति। स यदा मनसा मनस्यति—मन्त्रानधीयेयेति, अथाधीते; कर्माणि कुर्वीयेति, अथ कुरुते; पुत्रांश्च पशूँश्चेच्छेयेति, अथेच्छते; इमञ्च लोकममुञ्चेच्छेयेति, अथेच्छते। मनो ह्यात्मा। मनो हि लोको मनो हि ब्रह्म। मन उपास्स्वेति॥ १॥

स यो—ब्रवीत्विति। सर्वं पूर्ववत्।

गुरुराह **मनो—भवति।** यथा आमलकफलद्वयं वा [1]कोलफलद्वयं वा विभीतकफलद्वयं वा मुष्टावन्तर्गतं भवति, एवं वाङ्नामनी मनस्यन्तर्गते इत्यर्थः। तदेवोपपादयति **स यदा—अथेच्छते।** स पुरुषो यदा मनसा, **'मन्त्रान् अधीयीय'** 'मन्त्रान् उच्चारयेयम्' इति **मनस्यति** मनुते, तदनन्तरमेवाधीते। कर्माणि करवाणीति मननानन्तरमेव कर्माणि कुरुते। पुत्रांश्च पशूंश्च इच्छेयम्, इमं लोकममुञ्च इच्छेयमिति मत्वेच्छति। अतश्च मननलक्षणमनोव्यापाराधीनत्वाद् वागादिप्रवृत्तेर्मनसो भूयस्त्वमिति भावः। **मनो—ब्रह्म।** मनोधीनत्वात् आत्मधर्मभूतकर्तृत्वादेः, मन एवाऽऽत्मा। लोकस्यापि मनोव्यापाराधीनत्वात् मन एव लोकः। वागाद्यपेक्षया बृहत्त्वात् मनो हि ब्रह्म। **मन उपास्स्वेति।** अतस्त्वं मन उपास्स्वे-

1. नाङ्कोल ग.

कोलफलं पूगफलमिति माध्वोक्तम्। बदरफलमिति शाङ्करे।

स यदा मनसा मनस्यतीत्येतत् अधीयेयेति इत्यत्रैव कुर्वीयेति, इच्छेयेति इत्युभयत्राप्यन्वेति। अत एव तस्य प्राङ्निर्देशः। इच्छेयमिति मनस्यनं नाम, किमियमिच्छा अस्थानपतिता, स्थाने वेति विमर्शपूर्वकावधारणम्, 'असंशयं क्षत्रपरिग्रहक्षमे' त्यादिवत्। अध्ययनानुष्ठानपुत्रपश्वादैहिकामुष्मिकफलानि मनोधीनानीत्युक्तं भवति।

स यो मनो ब्रह्मेत्युपास्ते, यावन्मनसो गतम्, तत्रास्य यथाकामचारो भवति, यो मनो ब्रह्मेत्युपास्ते ।

अस्ति भगवो मनसो भूय इति । मनसो वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ।

इति सप्तमाध्याये तृतीयः खण्डः ।

—०४४०—

७—४.

संकल्पो वाव मनसो भूयान् । यदा वै संकल्पयते, अथ मनस्यति, अथ वाचमीरयति, तामु नाम्नीरयति । नाम्नि मन्त्रा एकं भवन्ति । मन्त्रेषु कर्माणि ॥ १ ॥

तानि ह वा एतानि संकल्पैकायनानि संकल्पात्मकानि संकल्पे प्रतिष्ठितानि । समकल्पतां द्यावापृथिवी, समकल्पेतां वायुश्चाकाशश्च,

---

त्यर्थः । [1]स — ब्रवीत्विति । स्पष्टोऽर्थः ।

गुरुराह **संकल्पो वाव मनसो भूयान् । यदा — कर्माणि ।** यदा इदं कर्तुं युक्तमिति संकल्पयति, **अथ** तदा **मनस्यति** इदं कर्तव्यमिति मन्यते । ततश्च वागिन्द्रियं प्रेरयति । तच्च वागिन्द्रियं **नाम्नि ईरयति** शब्दोच्चारणविषये नियुङ्क्ते इत्यर्थः । शिष्टं स्पष्टम् । **तानि — प्रतिष्ठितानि । तान्येतानि** नामादीनि । संकल्प एकमयनं मार्गो येषाम्, तानि **संकल्पैकायनानि** संकल्पानुसारीणीति यावत् । संकल्प आत्मा कर्ता येषाम्, तानि **संकल्पात्मकानि** संकल्पकर्तृकाणीत्यर्थः । यद्वा संकल्प **आत्मा** व्यापको येषां तानि संकल्पव्याप्तानीति यावत् । **संकल्पे प्रतिष्ठितानि** असति संकल्पे एषां न सत्ता । अतः संकल्पाधीनसत्ताकानीति यावत् । **समकल्पतां—तेजश्च** । द्यौश्च पृथिवी च, 'निश्चलतया वर्तावहे

1. तस्य फलमाह **स—। क.**

नामादिषु संकल्पान्तेषु पूर्वपूर्वहेतुत्वादुत्तरोत्तरस्य भूयस्त्वमिति श्रुतिरेव दर्शयति **यदा वै संकल्पयत** इत्यादिना । **एकं भवन्ति** अन्तर्भवन्ति । **मन्त्रेषु कर्माण्येकं भवन्ति** मन्त्राणां कर्मतत्समवेतार्थप्रकाशकत्वात् । **समकल्पतामिति** लुङि द्विवचनम् । कल्पृ सामर्थ्य इति धातोः आत्मनेपदिनः **लुङादौ परस्मैपदिवदपि** रूपसत्त्वात् । संकल्परूपमानसव्यापार-

समकल्पन्तामापश्च तेजश्च । तेषाँ संकॢप्त्यै वर्ष संकल्पते । वर्षस्य संकॢप्त्या अन्नँ संकल्पते । अन्नस्य संकॢप्त्यै प्राणाः संकल्पन्ते । प्राणानाँ संकॢप्त्यै मन्त्राः संकल्पन्ते । मन्त्राणाँ संकॢप्त्यै कर्माणि संकल्पन्ते । कर्मणाँ संकॢप्त्यै लोकः[1] संकल्पते । लोकस्य संकॢप्त्यै सर्वँ संकल्पते ।

1. लोकाः संकल्पन्ते । लोकानां मा.

इति संकल्पं कृतवत्यावित्यर्थः । तथा वाय्वाकाशादयोऽपि स्वेन रूपेण वर्तामहे इति वा,[1] स्वस्वकार्यञ्च करवामहै इति वा संकल्पं कृतवन्त इत्यर्थः । तथा संकल्पाभावे तथा प्रवृत्त्यसंभवादिति भावः । **तेषां संकॢप्त्यै वर्ष संकल्पते** । अग्नेजोधीनत्वात् वर्षणस्य, आपः तेजांसि च सम्यक् कल्पन्ताम् = स्वस्वकार्यसमर्थानि भवन्तु इत्येवं तत्सिध्यै वर्षं संकल्पते इत्यर्थः । **वर्षस्य संकॢप्त्या अन्नं संकल्पते** । अन्नस्य वर्षाधीनत्वात् अन्नं वर्षसिध्यै[2] संकल्पत इत्यर्थः । **अन्नस्य—संकल्पते** । अन्नसमृद्धिं (?) प्राणाः संकल्पन्त इत्यर्थः । **प्राणानां—कल्पन्ते** । मन्त्रोच्चारणस्य प्राणायत्तत्वात् मन्त्राः तत्सिद्धिमाशंसन्ते । **मन्त्राणां—कल्पन्ते** । अग्निहोत्रादीनां कर्मणां मन्त्रजन्यस्मृत्यधीनानुष्ठानत्वादिति भावः । **कर्मणां—कल्पते** । स्वर्गादिलोकस्य कर्माधीनसिद्धिकत्वादिति भावः । **लोकस्य — कल्पते** । सर्वस्यापि भूतजातस्य लोककामत्वादिति भावः । अत्राचेतनेषु संकल्पकथनं स्तुत्यर्थ-

1. वाकारद्वयं क. कोशे. 2. वर्षसिद्धिं संकल्पयत इत्यर्थः क.

प्रकरणात् **समकल्पतामि**त्यादावपि संकल्पं कृतवत्यौ इत्येवंरूप एवार्थो भाष्यते यथाशाङ्करम् । परन्तु संकल्पशब्दो णिजन्तात् निष्पन्नः । प्रयुज्यते चात्रापि **संकल्पयते** इति । कॢप्तिः सामर्थ्यम् अर्थक्रियाकारित्वं सत्त्वम् । तदर्थमनोव्यापारः संकल्पः । इह तु समकल्पतामित्यादेरणिजन्तत्वात् सामर्थ्यमेव वाच्यार्थः । तत्र पूर्वसंकल्पघटनेनार्थविवक्षायां **समकल्पतां** संकल्पसिद्धौ अभूतामित्यर्थः स्यात् । एवमपि णिजर्थव्यापारजन्यफलाश्रयत्वमेवोक्तं भवतीति द्यावापृथिवी भोगादिकर्यसमर्थे अभूतामिति रीत्यार्थ एव भवति । वक्ष्यते चेदृशोऽर्थः **तेषां संकॢप्त्यै** इत्यादिवाक्येषु । तेजोवर्षान्नादिषु पूर्वपूर्वस्य उत्तरोत्तरद्वारा भोगसाधनसामर्थ्यात् उत्तरोत्तरस्य तत्सामर्थ्याभावे पूर्वपूर्वस्य तत्सत्त्वासिद्धेः **संकॢप्त्यै** इति चतुर्थीनिर्देशः । तेजस्समर्थत्वाय वर्ष समर्थं भवतीत्येवमर्थ इति । अतः णिजन्तस्थले सर्वत्र धातोर्मुख्यार्थपरतयैव काश्चिदर्थश्चिन्त्यः ।

स एष संकल्पः । संकल्पमुपास्स्वेति ॥ २ ॥

स यः संकल्पं ब्रह्मेत्युपास्ते, संक्लृप्तान् वै स लोकान् ध्रुवान् ध्रुवः, प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानान् अव्यथमानोऽभिसिद्ध्यति — यावत् संकल्पस्य गतम्, तत्रास्य यथाकामचारो भवति, यः संकल्पं ब्रह्मेत्युपास्ते ।

अस्ति भगवः संकल्पाद् भूय इति । संकल्पाद्वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ ३ ॥

इति सप्तमाध्याये चतुर्थः खण्डः ।

७—५.

चित्तं वाव संकल्पाद् भूयः । यदा वै चेतयते, अथ संकल्पयते; अथ मनस्यति; अथ वाचमीरयति; तामु नाम्नीरयति, नाम्नि मन्त्रा एकं भवन्ति, मन्त्रेषु कर्माणि ।

तया [वा] चेतनत्वारोपेण वा तदभिमानिदेवतापरतया वोपपन्नमिति द्रष्टव्यम् । **स एष संकल्पः** । एतादृशमहिमशाली संकल्प इत्यर्थः । **संकल्पमुपास्स्वेति** । स्पष्टोऽर्थः । **स — सिद्ध्यति** । **संक्लृप्तान्** संकल्पसिद्धान्, **ध्रुवान्** नित्यान्, भोगोपकरणैः प्रतिष्ठितान्, **अव्यथमानान्** शत्रुपीडादिरहितान् [एतादृशान्] लोकान् स्वयमपि ध्रुवत्वप्रतिष्ठितत्वाव्यथमानत्वयुक्तस्सन् **अभिसिद्ध्यति** प्राप्नोतीत्यर्थः । **यावत् — ब्रवीत्विति** । स्पष्टोऽर्थः । (७—४.)

चित्तं वाव — कर्माणि । " अध्यवसायाभिमानचिन्तावृत्तिभेदात् मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते " इति, " हस्तादयस्तु स्थितेऽतो नैवम् " इति सूत्रे भाषितत्वात् प्राप्तकालानुरूपातीतानागतविषयप्रयोजनचिन्तारूपवृत्तिविशिष्टं [1]मनः चित्तमित्युच्यते । [2]चेतयतिधात्वर्थोऽपि स एव । शिष्टं स्पष्टम् ।

---

1. चिन्तानुरूपप्रवृत्तिविशिष्टं **ख.** 2. **चेतयत** इत्यस्यापि स एवार्थः. **क.**

तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि[1] चित्ते प्रतिष्ठितानि। तस्माद् यद्यपि बहुविदचित्तो भवति, नायमस्तीत्येवैनमाहुः, यदयं वेद। यद्वा अयं विद्वान्, नेत्थमचित्तः स्यादिति। अथ यद्यल्पविच्चित्तवान् भवति, [2]तस्मा एवोत शुश्रूषन्ते। चित्तं ह्येवैषा[3]मेकायनम्, चित्तमात्मा, चित्तं प्रतिष्ठा। चित्तमुपास्स्वेति ॥ २ ॥

स यश्चित्तं ब्रह्मेत्युपास्ते, चित्तान् वै स लोकान् ध्रुवान् ध्रुवः, प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानान् अव्यथमानोऽभिसिद्ध्यति— यावच्चित्तस्य गतम्, तत्रास्य यथाकामचारो भवति, यश्चित्तं ब्रह्मेत्युपास्ते।

अस्ति भगवश्चित्ताद् भूय इति। चित्ताद्वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति।

इति सप्तमाध्याये पञ्चमः खण्डः।

---

1. पा चित्तात्मकानि। मान्ये च। 2. तस्मादेतच्छुश्रूषन्ते मा. 3. एषामिति पदं न मा.

तानि—प्रतिष्ठितानि। उक्तोऽर्थः। तस्मात्—वेद। बहुशास्त्रज्ञोऽपि पुमान् विषयप्रयोजननिरूपणलक्षणचित्तहीनो यदा भवेत्, तदा लौकिकाः, 'अयं नास्ति, अयं वेदेति यत् तदपि नास्ति' इत्येवं ज्ञातारं तदीयं शास्त्रज्ञानञ्चापलपन्तीत्यर्थः। [किञ्च] तत्र युक्तिञ्च वदन्ति [। का युक्तिः?] **यद्वा अयं विद्वान्, नेत्थमचित्तः स्यादिति। यत्** यदि **अयं** पुमान् **विद्वान् वै** विद्वानेव स्यात्, तर्हीत्थमचित्तो न स्यात्। तस्मादेतस्य शास्त्रज्ञानमेव नास्तीत्याहुरित्यर्थः। **अथ यदि—शुश्रूषन्ते।** यदि अल्पशास्त्रविदपि चित्तवान् भवति, **तस्मै शुश्रूषन्ते** तद्वाक्यं श्रोतुमिच्छन्ति [जना] इत्यर्थः। **चित्तं हि—उपास्स्वेति।** पूर्ववदर्थः। **स यः—ब्रवीत्विति।** **चित्तान्** उपचितानित्यर्थः। इतरत् पूर्ववत्। (७—५.)

यद्यपि बहुविदिति। बहुविदपीत्यन्वयः।

७—६.

ध्यानं वाव चित्ताद् भूयः। ध्यायतीव पृथिवी, ध्यायतीवान्तरिक्षम्, ध्यायतीव [1]द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्याः।

1. ध्यायतीवद्यौः ध्ययातीवान्तरिक्षं मा.

ध्यानं वाव — देवमनुष्याः। "ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितमेकचिन्तनम्" इति "ध्यानाच्चे" ति सूत्रे भाषितम्। यथा योगी ध्यायन् निश्चलो भवति, एवं पृथिव्यादयोऽपि ध्यानलक्षणस्वमाहात्म्यप्रख्यापनाय[1] निश्चलाः सन्तो ध्यानमभिनयन्ति। अतो ध्यानं माहात्म्यहेतुरित्यर्थः। सूत्रितञ्च, "अचलत्वञ्चापेक्ष्य" इति। तत्र हि —

तिष्ठन् आसीनः शयानो वा ध्यानमनुतिष्ठेत्, विशेषाभावादिति प्राप्ते— अभिधीयते— "आसीनः संभवात्"। आसीनः उपासनमनुतिष्ठेत्। कुतः? संभवात्। असीनस्यैव हि एकाग्रचित्तता संभवति। स्थितिगत्योः प्रयत्नसापेक्षत्वात्, शयने च निद्रासंभवात्।

"ध्यानाच्च"। विजातीयप्रत्ययान्तराव्यवहितचिन्तालक्षणध्यानलक्षणत्वादुपासनस्य, तत्र च चित्तैकाग्र्यावश्यम्भावेन, तत्सिद्धये आसीनत्वस्यापेक्षितत्वाच्च[2]।

"अचलत्वञ्चापेक्ष्य"। निश्चलत्वरूपं सादृश्यमपेक्ष्य 'ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षम्' इत्यादौ ध्यायतिशब्दप्रयोगदर्शनात् ध्यातुर्निश्चलत्वस्यापेक्षितत्वात, आसीनस्यैव च निश्चलत्वसंभवात् आसीनस्यैवोपासनम्[3]।

"स्मरन्ति च"। 'उपविश्याऽऽसने युञ्ज्याद् योगमात्मविशुद्धये' इति ध्यानाङ्गतया आसीनता स्मर्यते। अतो ध्याने चित्तैकाग्र्यस्यात्यावश्यकत्वात तदर्थमासीनत्वमपेक्षितम्[3]।

1. प्रख्यापनायैव ख. 2. चकारः क. कोशे। 3. उपासनमित्यर्थः. ख.

ध्यानमभिनयन्तीति। ध्यायतीत्यस्य ध्यानं करोतीति मुख्यार्थस्वीकारे पृथिव्यादीनां ध्यानकर्तृत्वमात्रे कथिते तावता ध्यानस्य भूयस्त्वं न सिध्यतीति ध्यानमभिनयतीति लक्ष्यार्थः स्वीकृतः। अभिनेयार्थे स्वस्मिन्नविद्यमाने अभिनयकरणं हि तत्राभिनेतुर्गौरवबुद्धौ सत्यामिति। यद्वा **ध्यानमभिनयन्ती**त्यस्य स्वस्मिन् ध्यातृत्वबुद्धिं जनयन्तीत्यर्थः। ध्यायतीवेत्यादिप्रकृतवाक्यविषयकोक्तैकसूत्रघटितत्वात् आसीनाधिकरणमारचयति **तत्र हीत्यादिना**।

तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति, ध्यानापादाँशा [1]इवैव ते भवन्ति । अथ येऽल्पाः, कलहिनः पिशुना उपवादिनस्ते । अथ ये प्रभवो ध्यानापादाँशा[1] इवैव ते भवन्ति । ध्यानमुपास्स्वेति ॥ १ ॥

स यो ध्यानं ब्रह्मेत्युपास्ते, यावद् ध्यानस्य गतम्, तत्रास्य यथाकामचारो भवति, यो ध्यानं ब्रह्मेत्युपास्ते ।

अस्ति भगवो ध्यानाद् भूय इति । ध्यानाद्वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये षष्ठः खण्डः ।

---

1. ध्यानापादं शाः **मा.**

"यत्रैकाग्रता तत्राविशेषात्" । यत एव चित्तैकाग्र्यं प्रधानहेतुः, अत एव यस्मिन् देशे चित्तैकाग्र्यं भवति, स एव देशोऽपेक्षितः । 'समे शुचौ शर्करावह्निवालुकाविवर्जिते' इत्यादिदेशविशेषनियमस्यापि चित्तैकाग्र्यसिध्यर्थत्वात् चित्तैकाग्र्यविरोधे सोऽपि नादर्तव्य इत्यर्थ इति स्थितम् ।

प्रकृतमनुसरामः । **तस्मात्—भवति** । ध्यानमापन्नाः **ध्यानापादाः** । ये मनुष्याणां मध्ये धनादिभिर्महान्तः, ते ध्यानापादानां ध्यातृणां**मंशा इव** सदृशा इव भवन्ति । यथा ध्यातारोऽवचनाः, एवं महान्तोऽप्यवचनतया ध्यातृसादृश्यं प्रतिपद्यन्त इत्यर्थः । तन्न्यूनत्वे सति तत्सदृशत्वं तदंशत्वम् । महान्तोऽपि मनुष्याः यतो ध्यातृणामंशाः, अतो ध्यानं श्रेष्ठमित्यर्थः । **अथ ये—ते** । ये **अल्पाः** क्षुद्राः, ते **कलहिनः** कलहशीलाः, **पिशुनाः** परदोषोद्भावकाः, **उपवादिनः** परेषां समीपे तद्दोषवदनशीलाः वाचाटा भवन्ति; न तु ध्यातृसादृश्यलेशमपि प्रतिपद्यन्त इत्यर्थः । **अथ ये प्रभवो — ध्यानमुपास्स्वेति** । ये तु **प्रभवः** महान्तः, ते अजल्पकाः सन्तः ध्यातृसदृशा भवन्ति । अतो ध्यानमुपास्स्वेत्यर्थः ।

स यो ध्यानं — ब्रवीत्विति । सर्वं पूर्ववत् । ७—६.

ध्यानापादशब्दे आपादशब्दस्य आपाद्यफलपरत्वापेक्षया आपादनकर्तृपरत्वे तदंशत्वं महत्तामाक्षु सुगममित्यभिप्रेत्याह **ध्यानमापन्ना** इति, **ध्यातृणा**मिति च अर्थ उक्तः ।

७—७.

विज्ञानं वाव ध्यानाद् भूयः । विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदँ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यँ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याँ सर्पदेवजनविद्याम्; दिवञ्च पृथिवीञ्च वायुञ्चाकाशञ्चाऽऽपञ्च तेजञ्च देवाँश्च मनुष्याँश्च वयाँसि च तृणवनस्पतीन् श्वापदान्याकीटपतङ्गपिपीलिकं धर्मञ्चाधर्मञ्च सत्यञ्चानृतञ्च साधु चासाधु च हृदयञ्ञञ्चाहृदयञ्ञञ्चान्नञ्च रसञ्चेमञ्च लोकममुञ्च विज्ञानेनैव विजानाति । विज्ञानमुपास्स्वेति ॥ १ ॥

स यो विज्ञानं ब्रह्मेत्युपास्ते, विज्ञानवतो वै स लोकान् ज्ञानवतोऽभिसिद्ध्यति—यावद् विज्ञानस्य गतम्, तत्रास्य यथाकामचारो भवति, यो विज्ञानं ब्रह्मेत्युपास्ते ।

अस्ति भगवो विज्ञानाद् भूय इति । विज्ञानाद्वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये सप्तमः खण्डः ।

विज्ञानं वाव—उपास्स्वेति । प्रमाणजन्यज्ञानरूपस्य[1] विज्ञानस्य स्मृतिसंततिलक्षणं ध्यानं प्रति हेतुत्वात् ततो भूयस्त्वं द्रष्टव्यम् । शिष्टं पूर्ववत् ।

स यो विज्ञानं—ब्रवीत्विति । ज्ञानविज्ञानशब्दयोः सामान्यविशेषरूपत्वात् विज्ञानवतो ज्ञानवतो लोकानित्युपपत्तिः । शिष्टं स्पष्टम् । ७—७.

१, प्रमाणज्ञानजन्यस्य ज्ञानरूपस्य क,

७—८.

बलं वाव विज्ञानाद् भूयः। [1]अपि ह शतं विज्ञानवतामेको बलवानाकम्पयते। स यदा बली भवति, अथोत्थाता भवति, उत्तिष्ठन् परिचरिता भवति, परिचरन्नुपसत्ता भवति; उपसीदन् द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति। बलेन वै पृथिवी तिष्ठति, बलेनान्तरिक्षम्, बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयाँसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकं बलेन लोकस्तिष्ठति। बलमुपास्स्वेति ॥ १ ॥

स यो बलं ब्रह्मेत्युपास्ते, यावद् बलस्य गतम् तत्रास्य यथाकामचारो भवति, यो बलं ब्रह्मेत्युपास्ते।

अस्ति भगवो बलाद् भूय इति। बलाद् वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये अष्टमः खण्डः।

---

1. अपीह. मा.

बलं वाव — भवति। एको हि बलवान् हस्ती विज्ञानवतां मनुष्याणां शतमप्याकम्पयते। [किञ्च] सति बले गुर्वादिषु दृष्टेषु अभ्युत्थानम्। [1]परिचर्या उपसदनम् श्रवण-मनन-निदिध्यासन-साक्षात्काराः कर्मविषयकर्तृत्वं कृतविषयकज्ञानमित्येतत् सर्वं बले सत्येव भवति। अतो विज्ञानापेक्षया बलमेव भूय इत्यर्थः। बलेन वै — उपास्स्वेति। स्पष्टम्।

स यो बलं — ब्रवीत्विति। स्पष्टोऽर्थः। ७—८.

1. उपचर्या ख.

७—९.

अन्नं वाव बलाद् भूयः । तस्माद् यद्यपि दश रात्रीर्नाश्नीयात्, यद्युह जीवेत् अथवा, अद्रष्टाऽश्रोताऽमन्ताऽबोद्धाऽकर्ताऽविज्ञाता भवति । अथान्नस्याऽऽये[1] द्रष्टा भवति, श्रोता भवति, मन्ता भवति, बोद्धा भवति, कर्ता भवति, विज्ञाता भवति । अन्नमुपास्स्वेति ॥ १ ॥

स योऽन्नं ब्रह्मेत्युपास्ते, अन्नवतो वै स लोकान् पानवतोऽभिसिद्ध्यति, यावदन्नस्य गतम् तत्रास्य यथाकामचारो भवति, योऽन्नं ब्रह्मेत्युपास्ते ।

अस्ति भगवोऽन्नाद् भूय इति । अन्नाद्धाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये नवमः खण्डः

---

1. अन्नस्याशी मा.

अन्नं वाव — **भवति** । बलसंपादकत्वादन्नमेव बलाद् भूयः । अत एव यदि कश्चित् पुमान् दश रात्रीः नाश्नीयात्, तर्हि बलहान्या म्रियत एव । अथवा यदि कथञ्चित्[1] जीवेत्, तर्हि द्रष्टृत्वश्रोतृत्वादिरहित एव भवेत् । **अद्रष्टा** अश्रोता इतिच्छेदः । **अथान्नस्याये—उपास्स्वेति** । अन्नस्य **आये** लाभे सति । [2]**अन्नस्यायै** इति पाठे छान्दस एकारस्य ऐकारः । **अन्नस्यायी** इति पाठेऽपि **आयो** लाभः । **अन्नस्यायी** [3]अन्नलाभवानित्यर्थः । अतश्चान्वयव्यतिरेकाभ्यामन्नस्यैव बल[4]-हेतुत्वदर्शनादिति भावः । शिष्टं स्पष्टम् । **स योऽन्नं—ब्रवीत्विति** । **पानवतः** पेयप्रचुरानित्यर्थः । शिष्टं स्पष्टम् । ७-९.

1. कचित् ख. 2. 'अन्नस्यायै इति पाठे' इति न क. कोशे । 3. आयी लब्धवानित्यर्थः ख. 4. बलादि ख, बलदर्शनादिहेतुत्वम् क.

७—१०.

आपो वा[1] अन्नाद् भूयस्यः, तस्माद् यदा सुवृष्टिर्न भवति, व्याधीयन्ते प्राणाः, अन्नं कनीयो भविष्यतीति । अथ यदा सुवृष्टिर्भवति, आनन्दिनः प्राणा भवन्ति, अन्नं बहु भविष्यतीति । आप एवेमा मूर्ता येयं पृथिवी, यदन्तरिक्षम्, यद् द्यौः, यत् पर्वताः, यद्देवमनुष्याः, यत् पशवश्च वयाँसि च; तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकमाप एवेमा मूर्ताः । अप उपास्स्वेति ॥ १ ॥

स योऽपो ब्रह्मेत्युपास्ते, आप्नोति सर्वान् कामाँस्तृप्तिमान् भवति, यावदपां गतम् तत्रास्य यथाकामचरो भवति, योऽपो ब्रह्मेत्युपास्ते ।

अस्ति भगवोऽद्भ्यो भूय इति । अद्भ्यो वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये दशमः खण्डः ।

७—११.

तेजो वा अद्भ्यो भूयः । तद्वा एतद्वायुमागृह्याकाशमभितपति ।

1. वावान्नात् मा.

आपो वा अन्नाद् — भविष्यतीति । यस्मिन् काले शोभना वृष्टिर्न भवति, तदा अन्नं **कनीयः** अल्पं भविष्यतीति **प्राणाः** प्राणिनः **व्याधीयन्ते** दुःखिनो भवन्ति । यदा शोभना वृष्टिर्भवति, तदा अन्नं बहु भविष्यतीति **आनन्दिनः** हृष्टा भवन्ति । **आप एवेमा मूर्ताः** । **इमाः** वक्ष्यमाणाः **मूर्ताः** मूर्तिभेदाकारपरिणताः पृथिव्यन्तरिक्षादि – कीटपतङ्गपिपीलिकान्ताः आप एवेत्यर्थः । शिष्टं स्पष्टम् । **स योऽपो — ब्रवीत्विति** । अपामुपासकस्य कामानामाप्तिर्युक्तैवेति भावः । शिष्टं पूर्ववत् । ७–१०.

तेजो वा — सृजते । तेजसोऽप्कारणत्वात् तेज एवाद्भ्यो भूयः । **तत्** तस्मात् अप्कारणत्वादेव हेतोः **एतत्** तेजः यदा वायुं स्वात्मना **आगृह्य** निश्च-

तदाहुः – निशोचति, नितपति, वर्षिष्यति वा इति। तेज एव तत् पूर्वं दर्शयित्वाऽथापः सृजते। तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिर्ह्रादा[1]श्चरन्ति। तस्मादाहुः – विद्योतते, स्तनयति, वर्षिष्यति वा इति। तेज एव तत् पूर्वं दर्शयित्वाऽथापः सृजते। तेज उपास्स्वेति ॥ १ ॥

स यस्तेजो ब्रह्मेत्युपास्ते; तेजस्वी वै स तेजस्वतो लोकान् भास्वतोऽपहततमस्कान् अभिसिद्ध्यति, यावत् तेजसो गतम्, तत्रास्य यथाकामचारो भवति, यस्तेजो ब्रह्मेत्युपास्ते।

अस्ति भगवस्तेजसो भूय इति। तेजसो वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये एकादशः खण्डः।

1. आह्लादाः मा.

लीकृत्य आकाशमभिव्याप्य तपति, तदा लौकिकाः, 'तेजः कर्तृ, जगत् **निशोचति** नितरां शोचय[1]ति, **नितपति** नितरां तपति च; तस्मादवश्यं वर्षिष्यति' इत्याहुः। तेजसोऽप्कारणत्वादेव **तत्** तेजः प्रथमतः स्वात्मानं दर्शयित्वा पश्चादपः सृजते इत्यर्थः। **तदेतत् — उपास्स्वेति**। **तत्** तस्मादेव तेजसोऽप्कारणत्वात् **एतत्** एतस्मिन्नपि काले ऊर्ध्वगताभिः तिर्यग्गताभिश्च विद्युद्भिः सह[2] ह्रादाः=स्तनयित्नुशब्दाः चरन्ति। तद्दर्शनादेव लौकिकाः, 'विद्योतते, स्तनयति, वर्षिष्यति वा' इति वदन्तीत्यर्थः। अत एव कारणभूतं तत् तेजः स्वात्मानं प्रथमतो दर्शयित्वाऽथापः **सृजते**। अतः [पूर्वोक्तानां भूयसीनामपामपि करणं] तेज उपास्स्वेत्यर्थः।

स यस्तेजः— अभिसिद्ध्यति —। तेजस्वित्वादेव लोकानां तत्कार्यं प्रकाशवत्त्वलक्षणं भास्वत्त्वं बाह्यान्तरान्धकारशून्यत्वरूपमपहततमस्कत्वञ्च। तादृशो लोकान् स्वयमपि तेजस्वी सन् आप्नोतीत्यर्थः। शिष्टं स्पष्टम्। ७–११.

1. अयं क. पाठः। अन्यत्र, 'शोचति'। 2. सहेत्यधिकं क. कोशे।

७—१२.

आकाशो वाव तेजसो भूयान्। आकाशो वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निः। आकाशेनाह्वयति, आकाशेन शृणोति, आकाशेन प्रतिशृणोति, आकाशे रमते, आकाशे न रमते, आकाशे जायते, आकाशमभिजायते। आकाशमुपास्स्वेति ॥ १ ॥

स य आकाशं ब्रह्मेत्युपास्ते, आकाशवतो वै स लोकान् प्रकाशवतोऽसंबाधान् उरुगायवतोऽभिसिद्ध्यति। यावदाकाशस्य गतम् तत्रास्य यथाकामचरो भवति, य आकाशं ब्रह्मेत्युपास्ते।

अस्ति भगव आकाशाद् भूय इति। आकाशाद्वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये द्वादशः खण्डः।

आकाशो वाव — उपास्स्वेति। पूर्वखण्डोक्तयोस्तेजोवाय्वोर्हि आकाशः कारणम्। अत आकाशस्य तेजोवाय्वपेक्षया भूयस्त्वम्। अत एवादित्यादिज्योतिर्मण्डलमाकाशाश्रितमाकाशान्तर्वर्ति। आह्वानश्रवणप्रतिश्रवणान्यपि आकाशसाध्यानि। रममाणोऽपि जन आकाशे। शोचन्नपि जन आकाशे। जायमानोऽप्यङ्कुरादिः आकाशादिलक्षणमवकाशमभिलक्ष्य प्रतीक्ष्यैव जायते। अत आकाशमुपास्स्वेत्यर्थः। स य आकाशं —अभिसिद्ध्यति —। आकाशवतः विस्तारयुक्तान् अत एव असंबाधान् अन्योन्यपीडालक्षणसंबाधशून्यान् प्रकाशवतः तेजस्विनः उरुगायवतः कीर्तिमतो लोकान् प्राप्नोतीत्यर्थः। शिष्टं स्पष्टम्। ७—१२.

अत्राप्तेजआकाशानां कार्यकारणभावः श्रुतिप्रसिद्ध एव लोकानुभवेनोपपादितः तत्पर्यायेषु। तेजःपर्याये, वायुमागृह्णाति तेजसो वायुनिरोधकत्वेनोक्तत्वादत्र वायोर्भूयस्त्वेन कथनं न युक्तमिति तदुपेक्षया तेजोनन्तरमाकाशस्यादरणम्। आह्वयतीत्यादि। आह्वयितुराह्वयमानस्य च मध्ये आकाशाभावे कथमाह्वानम्। श्रोत्राकाशाभावे कथं श्रवणम्। मुखाकाशाभावे कथं प्रतिश्रवणम्, अथमहमायामि, करोमीत्यादिरूपमिति।

७—१३.

स्मरो वा आकाशाद् भूयः[1]। तस्माद् यद्यपि बहव आसीरन् अस्मरन्तः, नैव ते कञ्चन शृणुयुः, न मन्वीरन्, न विजानीरन्, यदा वाव ते स्मरेयुः, अथ शृणुयुः, अथ मन्वीरन्, अथ विजानीरन्। स्मरेण वै पुत्रान् विजानाति; स्मरेण पशून्। स्मरमुपास्स्वेति ॥ १ ॥

स यः स्मरं ब्रह्मेत्युपास्ते, यावत् स्मरस्य गतम् तत्रास्य यथाकामचारो भवति, यः स्मरं ब्रह्मेत्युपास्ते।

अस्ति भगवः स्माद् भूय इति। स्माद्वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये त्रयोदशः खण्डः

७—१४.

आशा वाव स्माद् भूयसी। आशेद्धो वै स्मरो मन्त्रानधीते, कर्माणि कुरुते, पुत्राँश्च पशूँश्चेच्छते, इमञ्च लोकममुञ्चेच्छते। आशामुपास्स्वेति ॥ १ ॥

1. भूयान् मा.

स्मरो वा आकाशाद्भूयः — भूय इति लिङ्गव्यत्ययश्छान्दसः। तस्माद्यद्यपि — उपास्स्वेति। स्मरणशून्या एकत्र बहव आसीना अपि न श्रवणादिकार्यसमर्थाः। सति तु शक्त्यादिस्मरणे श्रवणादिकार्यसमर्था भवन्ति। अत आकाशकार्यस्य श्रवणादेः स्मरणाधीनत्वात्तस्या आकाशाद् भूयस्त्वमिति भावः। किञ्च, स्मरेण वै — उपास्स्वेति। स्मरणशून्यस्य न पुत्रपश्वादिज्ञानमित्यतः स्मरणमुपास्स्वेत्यर्थः। स यः स्मरं — ब्रवीत्विति। सर्वं पूर्ववत्। ७—१३.

आशा वाव — उपास्स्वेति। आशया फलेच्छया इद्धः दीपितः उत्पादितः स्मरः इष्टसाधनत्वादिविषयकं स्मरणमध्ययनकर्मानुष्ठानादिहेतुर्भवतीत्यर्थः। किञ्च फलाशायत्तैव पुत्रपश्वादीहलोकपरलोकवाञ्छा। अतः आशाया भूयस्त्वमित्यर्थः।

. आशया — फलेच्छयेत्यर्थः तया — इद्धः ख.

शृणुयुरिति। श्रवणं श्रुतशब्दार्थज्ञानम्। श्रवणमननविज्ञानानि अत्रापि क्रमेणोक्तानि।

स्मरादिति। इह स्मरशब्दस्य पूर्वत्र स्मरपर्याय इव स्मरणमात्रार्थकत्वेऽपि स्मरः इत्यस्य अर्थे आद्यन्ति स्मरणवानित्यर्थे अधीते इत्यादिसर्वक्रियान्वयसामञ्जस्यात् भाष्यं पर्यवसितार्थपरं युक्तम्।

स य आशां ब्रह्मेत्युपास्ते, आशयाऽस्य सर्वे कामाः समृद्ध्यन्ति; अमोघा ह्यस्याशिषो भवन्ति, यावदाशाया गतम् तत्रास्य यथाकामचारो भवति, य आशां ब्रह्मेत्युपास्ते ।

अस्ति भगव आशाया भूय इति । आशाया वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

इति सप्तमाध्याये चतुर्दशः खण्डः ।

७—१५.

प्राणो वाव[1] आशाया भूयान् । यथा वा अरा नाभौ समर्पिताः, एवमस्मिन् प्राणे सर्वं समर्पितम् । प्राणः प्राणेन याति । प्राणः प्राणं ददाति; प्राणाय ददाति । प्राणो ह पिता, प्राणो माता, प्राणो भ्राता, प्राणः स्वसा, प्राण आचार्यः, प्राणो ब्राह्मणः ॥ १ ॥

1. प्राणो वा आशायाः मा.

स य आशां—ब्रवीत्विति । आशया उपासितया सर्वे कामाः समृद्धा-भवन्ति । आशाश्चास्य सर्वाः **अमोघाः** सफला भवन्तीत्यर्थः । **यावदाशाया गतम्—ब्रवीत्विति** । स्पष्टोऽर्थः । ७—१४.

प्राणो वा आशाया भूयान् । अत्र **प्राण**शब्देन प्राणसहचरितो जीवो लक्ष्यते । तत्र च हेतुरुत्तरत्र वक्ष्यते । **यथा वा — समर्पितम्** । यथा रथचक्रस्य अराः रथनाभ्याश्रिताः, एवं समस्तमचेतनं भूतजातमेतच्चेतनाश्रितमित्यर्थः । 'भूतमात्राः प्रज्ञामात्रास्वर्पिताः' इति श्रुत्यन्तरात् । **प्राणः प्राणेन** — । गन्ता देवदत्तादिरपि जीव एव । गमनकरणमश्वादिरपि जीव एव । दातापि जीव एव । देयो गवादिरपि जीव एव । सम्प्रदानभूतो ब्राह्मणादिरपि जीव एवेत्यर्थः । **प्राणो ह पिता — ब्राह्मणः** । पित्रादिरपि जीव इति प्रसिद्ध एवेत्यर्थः ॥

जीवो लक्ष्यत इति । प्राणशब्दस्य प्राणिपरत्वमेवेह संदर्भे श्रुत्यभिमतमिति, दशमखण्डे, 'व्याधीयन्ते प्राणाः,' 'आनन्दिनः प्राणा भवन्ति' इति पूर्वप्रयोगादपि सुग्रहम् । आशां प्रति प्राणस्याधारत्वमभिसंधाय हि, 'एवमस्मिन् प्राणे' इति इहोक्तम् । ततोऽपि प्राणो जीवः । उपरि, 'स वा एष एवं पश्यन्' इति चेतनस्यास्य चामेद-कथनादपि अयं जीवः । प्राणस्य बहुप्रकारतया बहुत्वं बोध्यते प्राणः प्राणेनेत्यादिना ।

स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाऽऽचार्यं वा ब्राह्मणं वा किञ्चिद् भृशमिव प्रत्याह, धिक् त्वाऽस्त्वित्येवैनमाहुः, पितृहा वै त्वमसि, मातृहा वै त्वमसि, भ्रातृहा वै त्वमसि, स्वसृहा वै त्वमसि, आचार्यहा वै त्वमसि, ब्राह्मणहा वै त्वमसीति ॥ २ ॥

अथ यद्यप्येनान् उत्क्रान्तप्राणान् शूलेन समासं व्यतिसंदहेत्[1], नैवैनं ब्रूयुः पितृहाऽसीति, न मातृहाऽसीति, न भ्रातृहाऽसीति, न स्वसृहाऽसीति, नाचार्यहाऽसीति, न ब्राह्मणहाऽसीति ॥ ३ ॥

प्राणो ह्येवैतानि सर्वाणि भवति ।

1. व्यतिषंदहेत् मा.

ननु परिदृश्यमानमांसपिण्डविशेषा एव पित्रादिशब्दवाच्याः; न तु जीव इति मन्वानं प्रत्याह **स यदि पितरं — त्वमसीति** । सजीवेषु पित्रादिशरीरेषु धिक् त्वामित्येव किञ्चित् भृशमधिक्षिपति पुरुषे पितृहेत्यादिशब्दान् प्रयुञ्जते इत्यर्थः ।

अथ यद्यपि — असीति । अथ तेष्वेव शरीरेषूत्क्रान्तजीवेषु सत्सु तान् **शूलेन समासं**— सम्पूर्वात् क्षेपार्थात् अस्यतेर्णमुलन्तोऽयं शब्दः—शूलेन सम्यक् प्रक्षिप्य व्यत्यस्य सम्यक् दहत्यपि पुरुषे पितृहेत्यदिशब्दा न प्रयुज्यन्ते इत्यर्थः ।

प्राणो — भवति । अतः सजीवेषु पित्रादिषु हिंसितेषु पितृहेत्यादिशब्दप्रयोगात् निर्जीवेष्वप्रयोगच्च निर्जीवस्य शरीरस्य पित्रादित्वाभावस्य सिद्धत्वात् जीव एव पित्रादिर्भवतीत्यर्थः । **भगवता भाष्यकृता** — " प्राणशब्दनिर्दिष्टः प्राणसहचारी प्रत्यगात्मैव;[1] न वायुविशेषमात्रम् । ' प्राणो ह पिता प्राणो माते ' त्यादयः प्राणस्य चेतनतामवगमयन्ति । पितृहा मातृहेत्यादिना सप्राणेषु पितृप्रभृतिषूपमर्दकारिणि हिंसकत्वादिनिमित्तोपक्रोशवचनात् , तेष्वेव विगतप्राणेष्वत्यन्तोपमर्दकारिण्युपक्रोशाभावाच्च[2] हिंसायोग्यश्चेतन एव प्राणशब्दनिर्दिष्टः । अप्राणेषु स्थावरेष्वपि चेतनेषूप-

1. एवकारो न ख. कोशे । 2. 'अत्यन्तोपमर्दकारिण्यप्युपक्रोशाभावदचनाच्च' इति श्रीभाष्यपाठः ।

हिंसितेषु वर्चिकायिकक्रूरकर्मादिषयीकृतेषु । सत्स्विति शेषः । एवं निर्जीवेष्वित्यत्रापि । हिंसायोग्यः हिंसाव्यापारजन्यसंवेदनरूपफलाश्रयः । अयमर्थो **वेदनाजनकेत्यादिना** उपरि दर्शयिष्यते ।

मर्दभावाभावयोः हिंसातदभावदर्शनात् हिंसायोग्यतया निर्दिष्टः प्राणः प्रत्यगात्मैवेति निश्चीयते । अत एव च अरनाभिदृष्टान्ताद्युपन्यासेन प्राणशब्दनिर्दिष्टः पर इति न भ्रमितव्यम; परस्य हिंसाप्रसङ्गाभावात्। जीवादितरस्य भोग्यभोगोपकरणस्य कृत्स्नस्याचिद्वस्तुनो जीवायत्तस्थितित्वेन प्रत्यगात्मन्येवारनाभिदृष्टान्तोपपत्तेश्च " इति भाषितम् ।

यद्यपि, 'नायं हन्ति न हन्यत' इति निर्दिष्टस्य जीवस्य स्वतो हिंसायोग्यत्वाभावेपि[1] देहादिसाहित्यप्रयुक्तहिंस्यत्ववत् मुख्यस्य प्राणस्यापि हिंस्यत्वं सुवचम् । स्थावरहिंसास्थलेऽपि[2] ' भेदश्रुतेर्वैलक्षण्याच्चे ' ति सूत्रभाष्योक्तरीत्या स्थावरेषु प्राणस्य पञ्चधाऽवस्थाय शरीरधारणाभावेपि प्राणसद्भावोऽस्तीति, ' न तु दृष्टान्तभावा ' दिति सूत्रे भाषितत्वेन प्राणस्य सद्भावात् हिंसादिवचनमुपपद्यत एव—तथापि ' प्राणो ह पिते ' त्यादिवाक्यनिर्दिष्टानां जीववाचितया लोके प्रसिद्धानां बहूनां पित्रादिशब्दानां गौणत्वकल्पनापेक्षयैकस्य प्राणशब्दस्यैव जीव (जीवपर?) त्वमाश्रयणीयमिति भाष्यकाराभिप्रायः । अत एव वृत्तिकृता भगवता बोधायनेनापि ' भूमा सम्प्रसादादध्युपदेशा ' दिति सूत्रव्याख्याने ' प्रत्यमात्मन ऊर्ध्वमुपदेशा ' दित्येवोक्तम; न तु मुख्यप्राणादूर्ध्वमिति ॥ वेदनाजनकव्यापारलक्षणहिंसायाः वेदनाशून्ये अचेतने असम्भवाच्च ॥

1. योग्यत्वाभावेन क. 2. अपिशब्दः क. कोशे न ।

एवं तावत् नारदेन नाम्नां प्रस्तुतत्वात् नामैवारभ्य, प्राणपर्यन्तमुत्तरोत्तरं यद् भूयः, तत् प्रदर्शितम् । एवं कारणत्वेन तस्यतस्य भूयस्त्वकथनञ्च सर्वकारणब्रह्मप्रतिपादनौचित्यात् । नामापेक्षया तदुच्चारणहेतुत्वात् वाग् भूयसी । वाक्प्रवृत्तिः कुर्वीयेति मनोव्यापाराधीना । स च वागादिव्यापाराव्यवहितपूर्वक्षणोत्पन्नः ततः प्राक् विमर्शानन्तरजातात् कृत्यध्यवसायरूपसंकल्पात् । तदुक्तं न्यायकुसुमाञ्जलौ (५-६८) ' व्यवहितार्थसंकल्पः कर्तव्यो मये ' ति । स च संकल्पः सुदीर्घविमर्शात् चित्तस्यैर्यकृतात् ऐकाग्र्यरूपात् ध्यानात् । तच्च तद्वस्तुग्रहणात् । तच्च बलात् । अन्नाधीनबलाभावे हि गृहीतमपि न प्रतिभाति ; किमुत ग्रहणम् । तद् बलमन्नात् । तत्र क्रमेण कारणानि अप्तेजआकाशाः । सर्वमिदं नामव्याहारपर्यन्तमाकाशकार्यं पुंसः स्मरणशक्तत्वे । स्मरणमपि बुभुत्सारूपाशावशात् । तद्बलाधीनो ह्यनुभवः स्मरणहेतुं संस्कारमादध्यात् । अत्र स्मरपदम् माकाशान्तकारणभूतपुरुषगतकर्मवासनानुभववासनोपलक्षकम्, आशापदञ्च बुभुत्साबुभुक्षारूपसर्वफलाशापरं भवितुमर्हति । तथा च सृष्टिः सर्वा कर्मिजीवगुणाधीनेति दर्शितं भवति । ततो भूयान् प्राणः, तदाधारत्वात् । तदभिप्रेत्य ह्युक्तम्, ' यथा वा अरा नाभौ समर्पिताः, एवमस्मिन् प्राणे सर्वं समर्पित ' मिति । प्राय आत्मगुणा एव ह्यत्र प्रागुक्ता इति । एवं विलक्षणं जीवं प्रति-

स वा एष एवं पश्यन् एवं मन्वान एवं विजानन् अतिवादी भवति, तञ्चेद् ब्रूयुः अतिवाद्यसीति, अतिवाद्यस्मीति ब्रूयात्, नापह्नुवीत ॥ ४ ॥

इति सप्तमाध्याये पञ्चदशः खण्डः ।

स वा — भवति । पूर्ववाक्ये प्राणशब्दनिर्दिष्टः **स वा एषः** जीवः स्वात्मानम् उक्तेन प्रकारेण मननविषयीकुर्वन् **विजानन्** उपासीनश्च सन् तेन प्रकारेण **पश्यन्** साक्षात्कुर्वन्, **अतिवादी भवति** अतिक्रान्तस्वोपास्यवस्तुवादी भवति । स्वोपास्यवस्तुनः सर्वोत्कृष्टत्ववादी भवतीत्यर्थः । बृहस्पतिसमप्रत्यर्थिजनाप्रतिभाधायक[1]स्वोपास्यदेवतापारम्यवादशीलत्वं अतिवादित्वम् । तच्चोपास्यदेवतातिशये पर्यवस्यति । 'एवं पश्यन्नेवं मन्वान' इत्यादौ 'लक्षणहेत्वोः क्रियायाः' इति हेत्वर्थे शतृप्रत्ययः । ततश्च स्वोपास्यदेवतासाक्षात्कारोऽतिवादित्वे हेतुरित्यर्थः । साक्षात्कारप्रीतस्वोपास्यदेवतानुग्रहादीदृशमतिवादित्वं भवतीति भावः । अत्र 'स वा एष एवं पश्यन्नेवं मन्वान' इति वाक्येन पूर्वसन्दर्भनिर्दिष्टप्राणस्य द्रष्टृत्वमन्तृत्वादिकथनादपि प्राणशब्दनिर्दिष्टो जीव इत्यवसीयते । प्राणशब्दनिर्दिष्टस्य जीवत्वज्ञापनायैव **स वा एष** इति पदयोः प्रवृत्तेरिति द्रष्टव्यम् । **तं चेत् — नापह्नुवीत** । प्राणशब्दितस्य जीवस्य पूर्वोक्तनामाद्याशान्तसर्वातिशायित्वादेवातिवादित्वं नापह्नोतव्यमिति भावः । ७—१५.

1. धायकं स्वोपास्यदेवतापारम्यशीलत्वं क.

पाद्य आह **एवं पश्यन्नित्यादि** । आशादिगुण – आकाशादिप्रपञ्चोभयविधाधिकतया प्राणं पश्यन् इत्यर्थः । **अतिवादी भवती**त्यादेः संभवत् अर्थान्तरमुपरि वेदयिष्यते ।

एवं पञ्चदशभिः खण्डैः पञ्चदशोपक्षिप्य प्रवृत्तं षोडशं खण्डं पञ्चदशाधिकपरमात्मपरं गमयितुमवतारयति **अत्रेति** । **अत्रेदं बोध्यम्**—पूर्वं तत्रतत्र भूयः प्रश्नवत्, अत्र, 'अस्ति भगवः प्राणाद्भूय'इति न पृष्टम् । तत् कस्मात्? जीवादधिकस्य ब्रह्मदृष्टिविषयस्य कस्यचिदभावात्; पूर्वरीतिमुपेक्ष्य रीत्यन्तरेण प्राणोपन्यासाच्च । अत्रैवं नारदो मेने—यथा हि पूर्वं, 'नामोपास्स्वे'ति, 'स यो नाम ब्रह्मेत्युपास्ते'इति चोपासनं तत्फलञ्च क्रमेण दर्शितम्, तथेहापि, 'प्राणो ह्येवैतानि सर्वाणि भवती'त्येतदनन्तरम्, 'प्राणमुपास्स्वेति, स यः प्राणं ब्रह्मेत्युपास्ते' इति एतदुपासनं फलञ्चोपदेष्टव्यम् । तदकृत्वा उपासनं सिद्धं कृत्वा, 'स वा एष एवं पश्यन्' इति भङ्ग्यन्तरमादृतम् । यद्यपि मया आशावद् ब्रह्मदृष्ट्योपास्यं ततो भूयः किमस्तीत्याशयेन पृष्टत्वात्

७—१६.

एष तु वा अतिवदति, यः सत्येनातिवदति ।

अत्र पूर्वपर्यायेष्वनुक्तस्यातिवादित्वस्य कथनात् प्रक्रान्त आत्मोपदेशः प्राणशब्दिते प्रत्यगात्मनि पर्यवसन्न इति प्राणाद्धाव भूयोस्ती(?)'ति पुनरपृच्छत्येव नारदे सनत्कुमारः स्वयमेव ततोप्यतिशयितं परमात्मानमुपक्षिपति — **एष तु — वदति** । तुशब्दो विशेषप्रदर्शकः। 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिती'ति दहरविद्यायां वक्ष्यमाणत्वात् 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति[2] सत्यशब्दस्य ब्रह्मणि प्रसिद्धेः सत्यशब्दो ब्रह्मपरः । तस्य सततैकरूपत्वेन निर्विकारत्वात् सत्यत्वम् । तेन ब्रह्मणा निमित्तेन योऽतिवदति एषोतिवादी पूर्वस्मात् प्राणातिवादिनो विशिष्ट इत्यर्थः । अत्र **भाष्यकृता** "सत्येनेतीत्थम्भूतलक्षणे तृतीया । सत्येन परेण ब्रह्मणा उपास्येन उपलक्षितो योऽतिवादतीत्यर्थ" इति इत्थम्भूतलक्षणे तृतीया कण्ठतः प्रतिपादिता । "अतिवाद्यन्तरत्वनिमित्तं सत्यशब्दाभिधेयश्च परं ब्रह्म प्रतीयत" इति भाष्यवाक्यात् निमित्तार्थकत्वमपि तृतीयायाः सूचितम् । ततश्च निमित्तस्य करणत्वविवक्षया

1. अत्र, 'अस्ति भगवः प्राणाद् भूय' इति यथावक्ष्यमाणं पाठः स्यात्।
2. सत्यमित्यादि वाक्यं क. कोशोद्धृतम्।

तत्र प्राणं प्रतिब्रुवता गुरुणा, प्राणो ब्रह्मदृष्ट्योपासितुमर्ह इति दर्श्यत एव — एवमपि तथोपासनस्य उपरि अनुक्त्या, 'प्राणस्यास्य ब्रह्मदृष्ट्योपासनं विहाय एवं विजानन् भवेः = आशान्ताचेतनाधिकत्वेन परमुपासीनः स्याः' इति **स वा एष** इति वाक्येन बोधयति । अत्र फलञ्च न दर्शयति । तेन, 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मवित्' इति मयैव विज्ञापितत्वात् ईदृशात्मवेदनमेतस्मै फलायेति मयैव ज्ञातमिति मन्यते । अतो यदर्थमुपसदनं कृतम्, तस्य संपन्नत्वात् प्राणेऽपि ब्रह्मदृष्टेर्गुरुणोपेक्षिततया तदुपरि ब्रह्मदृष्ट्या उपास्यमस्ति किमिति प्रश्नस्यानुचितत्वाच्च नास्ति प्रश्नस्यावसर इति ।

एषत्वित्यादि वदतो गुरोरयमाशयः — जिज्ञासितमात्मोपासनं प्राणोपासने विश्रान्तमिति मा मन्वीथाः; अस्य उक्तरीत्या नानात्वात् हिंसायोग्यतया दुःखमिश्रत्वाच्च मुख्यात्मत्वायोगात् । परमात्मोपासनस्य प्राणोपासनगर्भत्वात्तु स प्राणो ब्रह्मदृष्टिं विना यथावदुपास्य उपदिष्टः । एवं तर्हि नामाद्युपासनवत् उत्कृष्टब्रह्मविषयकत्वावरहादिदमुपासनं निकृष्टमिति मतिनिवारणार्थम्, 'एवं पश्यन्नतिवादी भवती'ति, अतिक्रान्तस्वोपास्यवस्तुवादित्वरूपमतिवादित्वं भवितुमर्हति, शुद्धज्ञानानन्दरूपात्मविषयकत्वादुपासनस्येति उपरि दर्शितम् । तावता शोकतरणरूपपरमफलाधायकप्रकृष्टस्वोपास्यवस्तुवादित्वरूपमतिवादित्वं न सेत्स्यति । तादृशवस्त्वतिवादी तु अन्य इति । कोऽसौ? तमाह यः **सत्येनातिवदती**ति । एवंरीत्या प्रवृत्तत्वादिदं वाक्यं न सत्यवदनरूपाङ्गविधायकमिति ।

कारकविभक्तित्वमपि भाष्यकृदभिमतमेवेति द्रष्टव्यम्। अत्र[1] सत्यातिवादिनः प्राणातिवाद्यपेक्षया अतिशयकथनात् सत्यशब्दनिदिष्टस्य परस्य ब्रह्मणः प्राणशब्दनिर्दिष्टजीवापेक्षया भूयस्त्वमुक्तं भवति।

न च पूर्वप्रस्तुतप्राणातिवादिनः 'एष तु वा अग्निहोत्री, यः सत्यं वदति' इत्यादाविव सत्यवदनमङ्गतया विधीयतामिति वाच्यम् — 'एष तु वा अग्निहोत्री' इति वाक्ये द्रव्यदेवतान्तराभावेन अग्निहोत्रान्तराप्रतीतेः तुशब्दस्वारस्यभङ्गः; इह तु प्रकृतातिवादनिमित्तप्राणव्यतिरिक्तस्य सत्यशब्दितस्य ब्रह्मणो निमित्तान्तरस्य प्रतीतेः न तत्स्वारस्यभङ्गो युक्तः। किञ्च सत्यवदनस्याङ्गतया विधाने, 'सत्यं वदती'ति निर्देशस्य युक्तया सत्येनेति तृतीयायाः अतीत्युपसर्गस्य चायोगादिति द्रष्टव्यम्।

1. अत्र इति क. कोशे।

अत्रेदं विमृश्यम् — वाक्यमिदमुपपादितरीत्या मा भूत् प्राणविद्याङ्गतया सत्यवादविधायकम्। अत्र वाक्ये उपासनरूपोद्देश्यसमर्पकपदाभावाच्च। न च प्राणोपासनाङ्गभूतातिवादोद्देशेन सत्यस्याङ्गत्वविधिरिति संभवति। अतिवादस्यार्थप्राप्ततया विहितत्वाभावात्। अविहितस्य कर्मणोऽनङ्गत्वेनानुद्देश्यत्वात्। अथापि सत्यवादरूपातिवादकर्तैव वस्तुतोऽतिवादीति इहोच्यते। न च—पूर्वं प्राणोपासनस्य ब्रह्मदृष्टिरूपत्वे आरोपरूपत्वात् तन्मूलकवादः सत्यवादो न स्यात्। शुद्धप्राणोपासनरूपत्वात्तु तद्वादोपि सत्यवाद एव—इति वाच्यम् — अतिवादित्वं हि सर्वातिशयितस्वोपास्यवस्तुवादित्वम्। तत् कथं ब्रह्मापेक्षया निकृष्टजीवोपासके इति तद्वादो न सत्यवादः। ब्रह्मोपासककर्तृकोऽतिवाद एव सत्यवाद इत्याशयात्। अतः, 'यदा वै विजानाति, अथ सत्यं वदति' इति वक्ष्यमाणः सत्यवाद एव सत्येनेति तृतीयान्तार्थः। न तु सत्यपदस्य ब्रह्मार्थकत्वम्, इत्थम्भूतलक्षणतृतीयाग्रहणञ्च। यदि सूत्रकृत् सत्यपदमिह ब्रह्मवाचीत्यमंस्यत, तर्हि, "भूमा संप्रसादात्" इति सूत्रे, 'सत्यं संप्रसादात्' इति निरदेक्ष्यत्। तस्मात् एषतीति तुशब्देन अतिवाद्यन्तरोक्तेरुपक्रान्तत्वेऽपि तदुपास्यवस्तु भूमपदेनैव निर्देक्ष्यते; न त्विहेति युक्तमिति—

अत्रोच्यते — सत्यं परमात्मोपासकेन कृतोऽतिवाद एव सत्यवादः। सर्वत्र वाक्यस्य सत्यत्वमर्थसत्यत्वनिबन्धनम्। अतो ब्रह्मोपासकक्रियमाणस्यातिवादस्य सत्यत्वं वस्तुतस्सर्वातिशायिवस्तुविषयकत्वात्। एवञ्च सत्यं वदतीत्यस्य सत्यवाक्यमुच्चारयतीत्यर्थापेक्षया सत्यमर्थं वक्तीत्यर्थो वक्तुमुचितः। तथाच अस्यातिवादत्वमतिशयितवस्तुविषयकत्वात्; वस्तुनोऽतिशयितत्वं ब्रह्मत्वादिति ब्रह्मविषयकत्वेनातिवादत्वे वक्तव्ये सति सत्यपदेन ब्रह्मग्रहणं ह्युपपन्नम्। प्राणोपासकादन्य एवातिवादीत्युक्तौ च कस्योपासनात् अन्योऽतिवादीत्युपास्याकाङ्क्षायाः स्वरसभावितया तच्छाभकत्वं सत्यपदस्य संभवन्न युक्तमुपेक्षितुम्। तत् सत्यत्वरूपसामान्यमुखेनापि ब्रह्मैव ग्राह्यम्। प्रसिद्धश्चायं विशिष्यैव ब्रह्मणि सत्यशब्दः, 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति। चेतनाचेतननियन्तृत्वं सत्यत्वमिति तन्निर्वचनञ्च बृहदारण्यके, अत्र चाष्टमे स्पष्टमिति तथाविधवस्तुविषयकत्वादयमतिवाद इति कथनमतीवोचितम्। न चेदं सूत्रेऽनुक्तम्; अध्युपदेशा-

सोऽहं भगवः सत्येनातिवदानीति ।
सत्यं त्वेव विजिज्ञासितव्यमिति । सत्यं भगवो विजिज्ञास इति ॥

इति सप्तमाध्याये षोडशः खण्डः ।

सोऽहं भगवः सत्येनातिवदानीति । ब्रह्मणाऽतिवदानीति शिष्यः प्रार्थयामासेत्यर्थः । इतर आह **सत्यं त्वेव विजिज्ञासितव्यमिति** । यदि सत्यशब्दितब्रह्मनिमित्तकातिवादितामभिलषसि, तर्हि ब्रह्मोपास्यमित्यर्थः । ब्रह्मोपासनमतिवादित्वहेतुरिति यावत् । शिष्यः तदभ्युपगच्छति **सत्यं भगवो विजिज्ञास इति । विजिज्ञासे** उपासितं करोमीत्यर्थः । ७—१६.

दित्यस्य अधिकतया सत्यपदेनोपदिष्टत्वादित्यर्थादेतदुक्तिसिद्धेः । यथा च भूमेति सूत्रे निर्देशेऽपि ततः प्राक्तनं, 'सुखं त्वेव विजिज्ञासितव्यमिति सुखपदमपि ब्रह्मपरम्, तथा ततोऽपि प्राक्तनं सत्यपदमपीति नानुपपत्तिः । अतः सुष्ठूक्तं सत्यशब्दो ब्रह्मपर इति ।

इदं तु स्यात्—**अतिवाद्यस्मीति ब्रूयादित्यादेः** विधिपरत्वं विना संभावनापरतयाऽपि योजना युज्यते, प्राणोपासकेऽतिवादित्वस्य वस्तुतोऽयथार्थत्वात् । तदयमर्थ — ज्ञानानन्दप्रत्यगात्मयाथात्म्यवेदी स्वयमतिवादी भवति । तदयुक्तमित्यभिप्रायेण यदि केचित् महान्तो ब्रूयुः, किमतिवाद्यसीति—तदापि अतिवादित्वमस्मत्कृतमतीव युक्तमिति मन्वानस्य, धैर्येण तदपह्नवमकृत्वा अतिवाद्यस्मीति स्वीकरणमेव संभावितम् । अपह्नवो न भवेत्; यतः, 'यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः'इति प्रत्यगात्मनिष्ठस्य स्थितिर्गीयते । अत एव, 'अयुक्तमिदमतिवादित्वम् । अतोऽपह्नोतव्यमिद'मिति न स परामृशेत् । एवमस्यासंकोचेन स्वयमतिवदनकर्तृत्वेऽपि नायं वास्तवातिवादी भवति । किंतु यः सत्येन परब्रह्मणाऽतिवदति, स एवेति ।

सत्यम्—पूर्वयोजनायामपि नातिवदनं प्राणविदो विधीयते, कर्तव्यमिति । किंतु अनुमन्यते, अनात्मविदपेक्षयाऽस्योत्कर्षादिति ध्येयम् ।

ब्रह्मोपास्यमित्यर्थ इति । ननु **विजिज्ञासितव्य**मित्यस्येह उपास्यमित्यर्थः; उपरितनवाक्येषु संपाद्यमित्यर्थः; सुखभूमवाक्ययोस्तु ज्ञातव्यमित्यर्थ इत्यव्यवस्था न युक्ता । न चैकार्थासंभवः; विशेषेण ज्ञातुमेष्टव्यम्, विशेषेण ज्ञातव्यमिति वाऽर्थस्यानुगतत्वात् । एवं ज्ञातव्यत्वे गुरुणोक्ते, तत् तत् ज्ञातुमिच्छामीति शिष्य आह, 'विजिज्ञासे' इति । ज्ञापयति च गुरुस्तत्तत् ऊर्ध्ववाक्येन । तत्र सत्यं विज्ञातव्यमित्युक्ते शिष्य आह, 'सत्यं कि'मिति ज्ञातुमिच्छामीति । अथ गुरुराह — न तज्ज्ञानमात्रादतिवादसंभवः; उपासनरूपविज्ञानमावश्यकमिति । विज्ञानज्ञानमिच्छामीति शिष्योक्ते, विज्ञानं मननाद् भवतीत्युक्तम् । अथ क्रमेण — मतिः कथम्, श्रद्धा कथम्, निष्ठा कथम्, कृतिश्च कथं भवतीति जिज्ञासायां तत्तदुत्पत्तिरीतिरुपदिष्टा । तत्र श्रवणं मननोपाय इति नारदस्य तदाऽनुभूयमानत्वात् तन्नोक्तम् । अथ सुखं कथम्भूतमित्यत्र भूमोपदिष्टः । **को भूमे**त्यत्र तदुपपादनम्, **यत्र नान्यदि**त्यादिना । अतः सर्वत्रैकार्थवर्णनं

७—१७.

यदा वै विजानाति, अथ सत्यं वदति । नाविजानन् सत्यं वदति । विजानन्नेव सत्यं वदति । विज्ञानं त्वेव विजिज्ञासितव्यमिति । विज्ञानं

ब्रह्मोपासनस्यातिवादहेतुत्वं ब्रह्मसाक्षात्कारद्वारेत्याह **त्यदा — वदति** । अत्र **विजानाति**शब्दः साक्षात्कारपरः । यदा वै साक्षात्करोति, तदा **सत्यं वदति** सत्येनातिवदतीत्यर्थः । पूर्वत्र सत्येनातिवदानीति निर्दिष्टत्वात् सत्यशब्दितस्य ब्रह्मणोऽतिवदनं प्रति निमित्तत्वेन करणत्वविवक्षया तृतीयावत्[1], वदनं प्रति कर्मतया द्वितीयाया अप्युपपत्तेः । 'स वा एष एवं पश्यन् एवं मन्वान एवं विजानन्नतिवादी भवती' ति साक्षात्कारमननोपासनानामतिवादित्वनिमित्ततया पूर्वोक्तत्वात्, 'सत्यं त्वेव विजिज्ञासितव्य' मिति उपासनस्योक्तत्वात् 'मतिस्त्वेव विजिज्ञासितव्ये' ति मननस्य वक्ष्यमाणत्वात् अत्र **विजानाती**त्यनेन साक्षात्कार एवोच्यते । उक्तञ्च **व्यासार्यैः** "विजानातिशब्दः साक्षात्कारपरः, न तु शास्त्रजन्यज्ञानपरः । 'यदा वै मनुतेऽथ विजानाती' ति विजानात्यर्थस्य मननसाध्यत्वावगमात् । "**सत्यं वदति** सत्यमतिवदतीत्यर्थः" इति । **नाविजानन्—इति** । साक्षात्काराभावे नातिवादित्वम् । अतः साक्षात्काररूपं विज्ञानं **विजिज्ञासितव्यम्** संपाद्यमित्यर्थः । पाकं पचतीतिवत् **विज्ञानं विजिज्ञासितव्य**मिति निर्देशः । उत्तरत्रापि विजिज्ञासितव्यपदस्य संपाद्यत्वमेवार्थः । उक्तञ्च व्यासार्यैः, "सत्यव्यतिरिक्तविषयाणि विजिज्ञासितव्यपदानि संपाद्यवाचीनि" इति । शिष्यः तदभ्युपगच्छति **विज्ञानं**

1. तृतीयायाः **ख**.

युक्तमिति चेत् — सत्यम् — एवमपि विजानाति, विजानन् इति पदयोः उपासनपरत्वमेव वाच्यम्, श्रुत्यन्तरप्रसिद्धिम्, 'एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती' ति पूर्ववाक्यञ्चानुसृत्यं । एवञ्च तन्मध्यगते, उपासनपर्यन्तज्ञाननैवातिवादस्य कार्यतामध्यवस्यता गुरुणा प्रयुक्ते विजिज्ञासितव्यमिति पदे उपासनरूपार्थपरत्वाभिसंधिर्न मनागपि न घटते । उपरि पुनः एतदर्थबाधादर्थान्तरस्वीकार इति । अस्तु वा सर्वत्र विशदज्ञानमेव विज्ञानपदवाच्यार्थः । तत् यथायथमुपासनमभ्यद्येति ।

भगवो विजिज्ञास इति ॥ १ ॥

इति सप्तमाध्याये सप्तदशः खण्डः ।

७—१८.

यदा वै मनुतेऽथ विजानाति । नामत्वा विजानाति । मत्वैव विजानाति । मतिस्त्वेव विजिज्ञासितव्येति । मतिं भगवो विजिज्ञास इति ॥ १ ॥

इति सप्तमाध्याये अष्टादशः खण्डः ।

७—१९.

यदा वै श्रद्दधाति, अथ मनुते । नाश्रद्दधन्मनुते । श्रद्दधदेव

भगवो विजिज्ञासे इति । हे भगवन् अतिवादित्वनिमित्तं साक्षात्कारं संपादयामीत्यर्थः । पूर्वखण्डे, 'सत्यं त्वेव विजिज्ञासितव्यम्' इति ब्रह्मोपासनस्यातिवादित्वहेतुत्वकथनात् अत्र च वाक्ये साक्षात्कारस्यातिवदनहेतुत्वकथनात् ब्रह्मोपासनतत्साक्षात्कारयोः द्वारद्वारिभावापन्नयोरेवातिवादहेतुत्वं सिद्ध्यति । एतत् सर्वमभिप्रेत्य **भगवता भाष्यकृता,** "ब्रह्मसाक्षात्कारनिमित्तातिवादित्वसिद्धये परब्रह्मसाक्षात्कारोपायभूतं ब्रह्मोपासनं, 'सत्यं त्वेव विजिज्ञासितव्यम्' इत्युपदिश्ये" भाषितम् ।

[1]केचित्तु — 'सत्यं त्वेव विजिज्ञासितव्यम्' इति विहितं साक्षात्कारहेतुभूतं विज्ञानमेव, 'यदा वै विजानात्यथ सत्यं वदती'ति खण्डेनापि निर्दिश्यते; न तु साक्षात्कारः। एवञ्च सति, "सत्यं त्वेव विजिज्ञासितव्यमिति ब्रह्मोपासनमुपदिश्य, तदुपायभूतं ब्रह्ममननं, 'मतिस्त्वेव विजिज्ञासितव्ये'त्युपदिश्ये" ति भाष्यमपि स्वरसमिति वदन्ति । ७—१७.

यदा वै मनुते — विजिज्ञासितव्येति । ब्रह्मोपासनोपायभूतं मननं संपाद्यमित्यर्थः । शिष्य आह **मतिं — इति** । ७—१८.

यदा वै श्रद्दधाति — इति । अत्र [च भगवता] भाष्यकृता,

1. केचित्तु इत्यादि न क. कोशे ।

मनुते। श्रद्धा त्वेव विजिज्ञासितव्येति। श्रद्धां भगवो विजिज्ञास इति ॥ १ ॥

इति सप्तमाध्याये एकोनविंशः खण्डः।

७—२०.

यदा वै निस्तिष्ठति, अथ श्रद्दधाति। नानिस्तिष्ठन् श्रद्दधाति। निस्तिष्ठन्नेव श्रद्दधाति। नि(निः?)ष्ठा त्वेव विजिज्ञासितव्येति। नि(निः?)ष्ठां भगवो विजिज्ञास इति। इति सप्तमाध्याये विंशः खण्डः।

"श्रवणप्रतिष्ठार्थत्वान्मननस्य, मननोपदेशेन श्रवणमप्यर्थसिद्धं मत्वा श्रवणोपायभूतां ब्रह्मणि श्रद्धां श्रद्धा त्वेव विजिज्ञासितव्येत्युपदिश्ये" ति भाषितम्। अत्र, 'श्रवणोपायभूतां ब्रह्मणि श्रद्धा'मित्यनेन ब्रह्मश्रवणविषयिणी श्रद्धा विवक्षिता। श्रद्धा च त्वरेति व्यासार्थैर्व्याख्यातम्। शिष्टं स्पष्टम्। ७–१९.

यदा वै निस्तिष्ठति — इति। ब्रह्मैव श्रोतव्यम्, नान्यदिति व्यवसायरूपा निष्ठा श्रोतुः त्वरालक्षणश्रद्धोपायतया संपाद्येत्यर्थः। शिष्टं पूर्ववत्। ७–२०.

श्रवणप्रतिष्ठार्थत्वादित्यादि। ननु मननमेवार्थसिद्धं मत्वा श्रवणमेव कस्मान्नोपदिशति श्रुतिरिति चेत् — पूर्वं 'एवं मन्वान एवं विजानन्' इति मननस्य प्रस्तुतत्वात् मननमेवेहाप्युपदिष्टमिति। किञ्च भाष्ये श्रवणोपायभूतां श्रद्धामित्येतावता मननोपायत्वं श्रद्धाया न भवतीति नाभिप्रेतम्। किं तु व्यवहितोपायभूते श्रवणेऽपि श्रद्धावश्यकत्वे कथिते, मननेऽपि तदावश्यकता कैमुत्यात् सेत्स्यतीत्येतदेव। अत्र श्रवणप्रस्तावादर्शनात्, 'द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्युक्तं मननमेव विवक्षितमित्यत्र नियामकाभावात्, 'बाल्यं पण्डित्यञ्च निर्विद्याथ मुनि' रिति श्रुत्यभिमतं सहकार्यन्तरविधध्यधिकरणदर्शितमुपासनोपायभूतमालम्बनसंशीलनमेव मननमस्तु गृह्यमाणम्। तत्रापि श्रद्धादीनामपेक्षाऽस्त्येवेति तदुक्तिरपि इति शङ्का स्यात्। इदमपि भाष्यकृतां नैवानभिमतम्। व्यवहितोपाये श्रवणेऽपि श्रद्धादेरावश्यकत्वज्ञापने तु तथा भाषितमिति। वस्तुतो विज्ञानसामान्ये हेतुभूतं श्रवणानन्तरमननमेवेदमित्येव युक्तम्। मननकाले श्रद्धानुवृत्त्यभावे प्रतितर्कोपप्लुतः स्यादिति तदानीमपि श्रद्धावश्यकत्वज्ञापने श्रुतिर्मननानन्तरमेव श्रद्धामाह। सर्वथा श्रवणविषयकत्वकथनमुपलक्षणं मननादिविषयकत्वस्यापि। एवं निष्ठापि न केवलम्, 'ब्रह्मैव श्रोतव्यम्, नान्यदित्येतावन्मात्राकारा; किंतु ब्रह्मैव मन्तव्यं विजिज्ञासितव्यमित्याद्याकाराऽपि। एवं यदुक्तम् — श्रोतव्यान्तरेषु हेयत्वानुसंधाने मनसो नियमनरूपा कृतिरिति, तत्रापि ब्रह्मेतरस्मिन् हेयत्वानुसंधानविषयिणीव रजस्तमोनिबर्हणेन सत्त्वाभिवर्धनेन पूर्वोक्तनिष्ठारूपाध्यवसायसंपादक सात्त्विकत्यागपूर्वकविशुद्धकर्मानुष्ठानरूपकृतिरप्यभिमतैवेति ध्येयम्। ईदृशी स्थितिश्च श्रवणात् प्रागपि यथार्हं पुरुषस्यापेक्षितेत्यादरातिशयात् भाष्ये श्रवणप्रस्ताव इति।

७—२१.

यदा वै करोति, अथ निस्तिष्ठति। नाकृत्वा निस्तिष्ठति। कृत्वैव निस्तिष्ठति। कृतिस्त्वेव विजिज्ञासितव्येति। कृतिं भगवो विजिज्ञास इति ॥ १ ॥ इति सप्तमाध्याये एकविंशः खण्डः।

७—२२.

यदा वै सुखं लभते, अथ करोति। नासुखं लब्ध्वा करोति। सुखमेव लब्ध्वा करोति। सुखं त्वेव विजिज्ञासितव्यमिति। सुखं भगवो विजिज्ञास इति ॥ १ ॥

इति सप्तमाध्याये द्वाविंशः खण्डः।

यदा वै करोति — इति। उद्योगप्रयत्नापरपर्याया श्रोतव्यान्तरेषु हेयत्वानुसंधाने(धानेन) मनसो नियमनरूपा कृतिः, ब्रह्मैव श्रोतव्यमिति व्यवसायलक्षण-निष्ठाहेतुत्वात् संपाद्येत्यर्थः। अन्यत् पूर्ववत्। ७—२१.

यदा वै सुखं—इति। उक्तलक्षणायाः कृतेः ब्रह्मणि निरतिशयानुकूलत्वावगममन्तरेणासंभवात् श्रोतव्यान्तरेषु हेयत्वानुसंधानाहित मनोनियमनरूपकृति-हेतुतया अत्यन्तानुकूलत्वलक्षणं सुखत्वं [ब्रह्मणि] ज्ञातव्यमित्यर्थः। अत्र च श्रवणमननश्रद्धाद्धेः प्रागेव, सुखप्राप्त्यसंभवात् प्राप्त्यर्थस्यापि **लभतेः** ज्ञानमेवार्थः। ज्ञानस्यापि प्राप्तिरूपत्वात्। श्रोतव्येऽत्यन्तानुकूलत्व[1]ज्ञानाभावेन श्रोतव्यान्तरेषु हेयत्वानुसंधानाहितमनोनियमनरूपकृतेरसंभवात् अत्यन्तानुकूलत्वं श्रोतव्ये ब्रह्मणि ज्ञातव्यमितिभावः। अत्रत्यविजिज्ञासितव्यशब्दस्य ज्ञातव्यत्वमर्थः, नोपासितव्यत्वं संपादनीयत्वं वेति द्रष्टव्यम्। ७—२२.

1. अयं क पाठः। अन्यत्र अनुकूलज्ञान इति।

उद्योगप्रयत्नेति। उद्योगरूपः प्रयत्न इति व्यासार्थैरुक्तम्। कर्मयोगादिरूपोद्योगविषय-प्रयत्नेति विवक्षितं स्यात्।

येयं विषयेषु हेयत्वानुसंधाने विशुद्धकर्मानुष्ठाने च पुंसः कृतिः, एषा अतिशयितसुखरूप-पुरुषार्थं लम्भनीयं स्थितमनाकलयतो न भवितुमर्हतीति तत् सुखं ज्ञातव्यमिति दर्शयति **यदे**ति। **असुख**मित्यत्र **अ** इति पृथक्पदम् **असुखं लब्ध्वा** सुखमलब्ध्वा। नन्विदं सुखं विषयसुखविलक्षणमतिशयितं ज्ञानानन्दस्वात्मरूपमेवास्तु इत्यत्राह **यो वै भूमे**ति। सर्वाति-

७—२३.

यो वै भूमा तत् सुखम् । नाल्पे सुखमस्ति । भूमैव सुखम् । भूमा त्वेव विजिज्ञासितव्य इति । भूमानं भगवो विजिज्ञास इति ।

इति सप्तमाध्याये त्रयोविंशः खण्डः ।

यो वै भूमा—इति । भूमशब्दो [हि] बहुत्ववाची । बहुशब्दात् पृथ्वादित्वात् इमनिचि, 'बहोर्लोपो भू च बहो' रिति प्रकृतिप्रत्यययोर्विकारे च सति तन्निष्पत्तेः । बहुत्वञ्चात्र वैपुल्यम्, न संख्याविशेषः । बहुशब्दस्य, 'बहुषु बहुवचन' मित्यादौ संख्यायामिव, 'अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः' इत्यादौ अल्पत्वप्रतियोगिनि वैपुल्येऽपि प्रयोगदर्शनात्, इहापि, 'नाल्पे सुखमस्ती' ति अल्पत्वप्रतिद्वन्द्वितयैव भूमशब्दप्रयोगाच्च वैपुल्यमेवार्थः । वैपुल्यञ्च [1]गुणोत्कर्षरूपम् । न तु परिमाणरूपम् । सुखशब्दसामानाधिकरण्यात् । न हि सुखे उत्कर्षवत् परिमाणं प्रसिद्धं स्यात् । अत उत्कर्षकृतवैपुल्यमेवेह[2] भूमशब्देन विवक्षितम् । अत एव न वैपुल्यरूपधर्मपरो भूमशब्दः; सुखस्य वैपुल्यरूपत्वाभावात् । अल्पप्रतियोगितया निर्देशाच्च । न ह्यत्र वा उत्तरत्र वा अल्पत्वं भूमप्रतियोगितया निर्दिश्यते; अपितु अल्पमेव । अतोऽल्पशब्दप्रतियोगितया प्रयुज्यमानो भूमशब्दो वैपुल्याश्रयधर्मिपर एव ।

ततश्चायमर्थः — यत् उत्कृष्टं विपुलम्, तदेव **सुखम्** अत्यन्तानुकूलमित्यर्थः । **नाल्पे सुखमस्ति । सुखं** सुखत्वम् । अत्यन्तानुकूलत्वमित्यर्थः । 'अपशवो वा अन्ये गोअश्वेभ्यः' इत्यत्र गवाश्वव्यतिरिक्ते अजादौ पशुत्वनिषेधस्य प्रशस्तपशुत्वनिषेधपरत्ववत् अल्पे प्रत्यगात्मनि[3] सुखे सुखत्वनिषेधस्य प्रशस्तसुखत्वनिषेधपरत्वात् । पूर्वखण्ड एव सुखशब्दस्यात्यन्तानुकूलार्थतया व्याख्यातत्वात् । ततश्च भूमभिन्नस्य सुखत्वाभावात् सुखत्वादेव हेतोर्भूमत्वमप्यस्तीति ज्ञातव्यमित्यर्थः । एतत् सर्वं भाष्येऽपि द्रष्टव्यम् । शिष्टं स्पष्टम् । ७—२३.

1. गुणकृतोत्कर्ष क. 2. इहेति क. कोशे । 3. प्रत्यगात्मसुखे ख ।

शयितपुरुषार्थभूतस्वोपास्यवस्तुवादरूपातिवादित्वनिमित्तभूतविज्ञानमननश्रद्धानिष्ठाकृतिप्रयोजकं हि सुखज्ञानं निरतिशयसुखज्ञानमेव भवितुमर्हति । तादृशसुखत्वञ्च सर्वप्रकारोत्कृष्टस्यैव स्यात्; नाल्पस्य । प्राणश्चाल्पः, न भूमा । 'प्राणः प्राणेने'त्यादिना प्रागेव प्राणानामनेकत्वस्य, हिंसायोग्यतया नानाविधदुःखास्पदत्वस्य चोक्ततया सर्वोत्कृष्टत्वासिद्धेरिति भावः ।

७—२४.

यत्र नान्यत् पश्यति, नान्यच्छृणोति, नान्यद् विजानाति, स भूमा।

एतद्वाक्यप्रस्तुतयोः भूमाल्पशब्दयोरर्थजिज्ञासुं प्रत्याह **यत्र नान्यत्—स भूमा**। यत्रेति 'अनुभूयमाने' इत्यध्याहारः। यत्र वस्तुनि अनुभूयमाने ततोऽन्यन्न दृश्यते, न श्रूयते, न विज्ञायते च, स भूमेत्यर्थः। यस्मिन् दृश्यमाने ततोऽन्यन्न दृश्यते, यस्मिन् श्रूयमाणे ततोऽन्यन्न श्रूयते, यस्मिन् विज्ञायमाने ततोऽन्यन्न विज्ञायते, स भूमेत्यर्थः। यद्वा सप्तम्याः विषयत्वमर्थः। पश्यन्नित्यध्याहारः। [1]यं पश्यन् यतोऽन्यन्न पश्यतीत्यर्थः। अत्र तदितरस्य दर्शनाद्यभावो विषयाभावकृतः। ततश्च यतोऽन्यन्नास्ति, स भूमेत्यर्थः पर्यवसितः।

ननु चेतनाचेतनवर्गस्य तद्भिन्नत्वात् कथं भूम्नोऽन्यन्नास्तीत्युच्यते। न च चिदचिद्विशिष्टस्यैव भूमब्रह्मशब्दार्थत्वात् चिदचितोरपि तत्रान्तर्भावात् तदन्यन्नेति निषेधः शक्यते कर्तुमिति वाच्यम्—विशेषणभूतयोः चिदचितोः भूमब्रह्मशब्दार्थभूतात् विशिष्टादन्यत्वेन ततोऽन्यन्नास्तीति निषेधस्यायुक्तत्वात्। किञ्च, 'अथात आत्मादेश' इति भूम्न एवात्मत्वस्योपदेक्ष्यमाणत्वात्। 'तरति शोकमात्मवित्' प्रति प्रस्तुतस्यात्मोपदेशस्य भूम्नि पर्यवसानाच्च भूम्न आत्मत्वमवर्जनीयम्। न हि चिदचिद्विशिष्टस्यात्मत्वमस्ति, विशेष्यस्यैवान्तः प्रविश्य नियन्तृत्वेनात्मत्वात्। ततश्च तस्यैव भूमत्वं वक्तव्यम्। न चेदं लक्षणं तस्य संभवति। तद्व्यतिरिक्तस्य वस्तुनः सत्त्वादिति चेत्—

उच्यते — ब्रह्मशब्दवत् भूमशब्दस्यापि वस्तुपरिच्छेदशून्यत्वमेवार्थः। वस्तुपरिच्छेदो नाम इदमिदं नेति निर्देशार्हत्वम्। तद्राहित्यं स्वरूपाभेदाद्वा भवेत्,

1. अध्याहारः। ततोन्यन्न पश्यतीत्यर्थः **ख.**

प्राणोऽपि धर्मभूतज्ञानविभवदशायां भूमा भवतीति न मन्तव्यमिति व्युत्पादनाय, यादृशस्य भूमशब्दविवक्षितत्वे सर्वातिशयितसुखरूपत्वं सिद्ध्येत्, तादृशमर्थमाह **यत्र नान्यदिति**। प्रपञ्चान्तर्गतं सर्वं गुणरूपेण विभूतिरूपेण वा यस्यैकस्य प्रकारभूतम्, स भूमशब्दार्थ इति विवक्षितम्। अत्र, 'स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते' इति न्यायेन ब्रह्मदर्शनश्रवणादौ प्रवृत्तो नान्यत् पश्यति न शृणोतीत्यर्थस्वीकारे प्रपञ्चोऽननुभूयमान इति प्रतीयेत। अतः प्रपञ्चस्यापि सुखत्वमनुभूयमानत्वञ्च स्थितमिह दर्शयितुं **भगवता भाष्यकृता** "विभूतिगुणविशिष्टं निरतिशयसुखरूपं ब्रह्मानुभवन् तद्व्यतिरिक्तस्य वस्तुनोऽभावादेव किमप्यन्यन्न पश्यती" त्येतदर्थो दर्शितः। तमर्थं मनसिकृत्याह **अत्र तदितरस्येत्यादि**।

तदपृथक्सिद्धत्वाद्वा भवेत्। तत्र जीवजडयोरीश्वराभेदाभावात् तदपृथक्सिद्धसत्ताकत्वमिति फलति। तच्च द्वेधा घटते। तत्सत्ताव्यतिरिक्तसत्ताशून्यत्वाद्वा, 'यदधीना यस्य सत्ता तत् तदित्येव फण्यते' इति स्मृत्यनुसारेण तदधीनसत्ताकत्वाद्वा भवेत्। तत्र तत्सत्ताव्यतिरिक्तसत्ताशून्यत्वमपि सत्तारूपविशेष्याभावेन मिथ्यात्वाद्वा भवेत्, तत्सत्ताऽभिन्नसत्ताकत्वेन सत्ताव्यतिरिक्तत्वरूपविशेषणाभावाद्वा भवेत्। तत्र सत्ताशून्यत्वं सकलप्रमाणविरुद्धं [1]नाभ्युपगमार्हम्। तथैव तत्सत्ताभिन्नसत्ताकत्वमपि नाभ्युपगमार्हम्।

अपितु तत्सत्ताधीनसत्ताकत्वमेव। एवंविधस्यापृक्सिद्धत्वस्य सिद्धान्तेऽभ्युपगतत्वान्नानुपपत्तिः।

ततश्च **यत्र नान्यदित्यस्यापि** यत्सत्तानधीनसत्ताकं नास्ति, यदनात्मकं नास्ति इत्यर्थपर्यवसानात् नानुपपत्तिः।

'यद्वा, 'समानेषु पूर्वत्वात्—' इति सप्तमिकाधिकरणे इतरादिसर्वनामशब्दानां पूर्वनिर्दिष्टसदृशवाचित्वस्य व्यवस्थापिततया, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिवाक्येष्विव, 'यत्र नान्यत् पश्यती'ति वाक्येऽपि समानान्यनिषेधपरत्वाश्रयणान्नानुपपत्तिः।

1. अनभ्युपगमार्हम् स्व.

तत्सत्ताभिन्नसत्तेति। मुण्डकप्रकाशिकास्वीकृतस्याप्यस्य पक्षस्यात्रानादरः परमात्मानं विहाय पृथक् संप्रति प्रतीयमाने प्रपञ्चे अप्रतीतपरमात्मसत्तामादाय सत्ताव्यवहारेऽनौचित्यात्। तार्किकैरपि द्रव्यवत् गुणकर्मणोरपि पृथक् प्रतीत्या सत्ता स्वीकृता। सामान्यादावेव स्वतन्त्रप्रतीत्यनर्हे सा नेष्टा। श्रीभाष्येऽपि पृथगप्रतीयमानस्य कात्स्न्यैव पृथगस्तित्वं नेष्टमिति। ननु **यत्र नान्यदिति** यत्पदस्य विशेष्यमात्रपरत्वे, अत एव **भूमेत्यस्य** च तथात्वे, विशेष्यमात्रे सुखत्वप्रतीतिः स्यात्। तथाच श्रीभाष्यविरोधः। तत्र, यो वै भूमा तत् सुखमिति वाक्येन विशेष्यवत् विशेषणे प्रपञ्चेऽपि सुखत्वप्रतीतिमुपजीव्यैव विस्तरेण तदुपपादनात्। किञ्च सर्ववस्तुसामानाधिकरण्यानर्हत्वरूपवस्तुपरिच्छेदशून्यत्वञ्च शोध्यमानं सर्वात्मत्वरूपमेव भवति इत्यतः भूमपदस्य विशेष्यमात्रपरत्वेऽपि विशिष्टपरत्वेऽपि च संभवन्तं निर्वाहमाह **यद्वेति**। **समानेष्विति**। 'समानमितरच्छ्येनेने'ति, इषुनामनि एकाहे ज्योतिष्टोमविकारे श्येनयागप्रकृतित्वसिद्धये पठ्यते। तदर्थश्च, **इतरत्** इषौ पठिताङ्गसदृशं = अप्राकृतत्वेन, प्रकृताङ्गानुवादेन विहितत्वेन वा रूपेण यत् पठिताङ्गसदृशम्, तत् श्येनसमानं कुर्यादिति। (प्रत्यक्षवचनातिदेशोऽयम्) (मी.७-१-२)

'अनन्यचेताः सततम्,' 'राममेवानुपश्यति' 'इत्यादौ तदन्यत्वं तदनन्तर्गतत्वं तद्विषयकप्रतीत्यविषयत्वरूपमानुभविकम्। तथाच यत्रानुभूयमाने यदन्यत् न पश्यतीत्युक्तौ यदनन्तर्गतं न पश्यतीत्येवार्थः। ईदृशार्थलाभश्च अन्यादिपदस्य सदृशरूपान्यपरत्वस्वारस्यसिद्धः इति।

अथ यत्रान्यत् पश्यति, अन्यच्छृणोति, अन्यद् विजानाति, तदल्पम्। यो वै भूमा तदमृतम्। अथ यदल्पम्, तन्मर्त्यम्।

स भगवः कस्मिन् प्रतिष्ठित इति। स्वे महिम्नि,

अथ यत्रान्यत्—तदल्पम्। उक्तलक्षणभूमविपरीतलक्षणमल्पमित्यर्थः। **यो वै —मर्त्यम्।** उक्तलक्षणो भूमैवामृतम् जननमरणादिशून्यम् नित्याविर्भूतानन्याधीनापहतपाप्मत्वादिगुणाष्टकमिति यावत्। इतरत्तु अनीदृशम्। नित्यमुक्तादीनामपि अनन्याधीनतादृक्त्वाभावात् न वाक्यार्थानुपपत्तिरिति द्रष्टव्यम्।

सर्ववस्तूनामाधारसापेक्षत्वं दृष्ट्वा शिष्यः पृच्छति **स भगवः कस्मिन् प्रतिष्ठित इति।** उत्तरमाह **स्वे महिम्नीति।** सः [1]स्वीयमहिमाधारक इत्यर्थः।

1. स्वस्वरूपमहिम. क.

यदल्पं तन्मर्त्यमिति। ननु प्राणस्य जीवस्याल्पस्यापि अमृतत्वात् कथमिदं घटत इति चेत्—न। मर्त्यत्वं मृत्यर्हत्वम्। तद् वस्तुतो विमृत्योः जीवस्यापि घटते। जीवानां परमात्मपरतन्त्रतया मृतिस्वरूपयोग्यतायाः स्वीकृतत्वादिति। अत्र 'विशेषितत्वाच्चे'ति सूत्रे श्रीभाष्ये नामादिप्राणपर्यन्तोपासिनां परिमितफलविशेषः भूमविद्याप्रकरणे दर्शित इत्युक्तत्वात् प्राणोपासनफलस्यैतत्पूर्वमन्त्राकथनात्, यदल्पं तन्मर्त्यमिति वाक्यमेव तत्परं भाष्यकृदभिमतमिति प्राणस्य मर्त्यत्वाभावेऽपि प्राणात्मकसुखानुभवरूपकैवल्यस्यानित्यत्वादेवं मर्त्यत्वनिर्देशः; भगवदनुभवानन्तर्गतं हि सर्वं भङ्गुरमिति कैवल्यस्यानित्यत्वमातिष्ठमानानामिह संभवति वर्णनसरणिः।

तदयं प्रघट्टार्थः—निरतिशयपुरुषार्थभूतभूमसुखं ब्रह्म प्राप्यमविदुषा विषयेषु परं हेयत्वानुसंधानेन कर्मजन्यतया प्रमिततत्तदैश्वर्यफलाभिसंधिरहितकर्मानुष्ठानेन च कृतिमता पुरुषेण किञ्चिद्रूपनिष्ठाश्रद्धामननपूर्वकं क्रियमाणमुपासनं प्राणमात्रविषयकं मर्त्यकैवल्यरूपाल्पफलपर्यवसितमिति तन्मूलातिवादो न वस्तुतोऽतिवादः। न च तावता उपक्रमोक्तं शोकसंतरणम्, उपसंहारोक्तं तमसः पारदर्शनञ्च। तदवश्यं तत्क्षुद्रपुरुषार्थरूपाकर्षकानाकृष्टत्वमात्मनि वाञ्छता स्थिरपुरुषार्थलिप्सया भगवत्समाराधनभूतभगवत्कर्मकर्मयोगादिकृत्या भगवान् आश्रयितव्यः। तदा च विलक्षणनिष्ठाश्रद्धामननादिनिष्पत्त्या सत्यमुक्तिसिद्धिरिति। संगृहीतश्चायमर्थः **श्रीमद्वकुलभूषणदिव्यसूरिश्रीमुखसूक्ते** (१-२-५); यस्यायं संस्कृतानुवादः ईशोपनिषदाचार्यभाष्यतात्पर्येऽस्मत्कृतः,

अपेतो बाह्यसङ्गश्चेत्, आप्तं कैवल्यमात्मना।
त्यक्त्वा तत् स्थिरलिप्सायां निश्चित्येश्वरमाश्रय ॥ इति।

पूर्वं, 'यथा वा अरा नाभौ समर्पिताः, एवमस्मिन् प्राणे सर्वं समर्पितम्' इति प्राणस्य सर्वाधारत्वमुपवर्ण्य तादृशप्राणविदपेक्षयापि भूमविद एवातिवादित्वे दर्शिते, अस्यापि भूम्न आधारान्तराश्रितत्वे तत्राप्यतिवादित्वकथन्तावकाशमुत्पश्यन् निराधारवस्त्वभावमत्या पृच्छति **स भगव इति।**

यदि वा न महिम्नीति। गोअश्वमिह महिमेत्याचक्षते, हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति। नाहमेवं ब्रवीमीति होवाच, अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति ॥ २ ॥

इति सप्तमाध्याये चतुर्विंशः खण्डः।

'स्वयंदासास्तपस्विनः' इतिवत् अनाधार इत्यभिप्रायः। [1]उक्ताभिप्रायेणाचार्यः स्वयमुक्त्वा, 'स्वशब्दस्यात्मात्मीयवचनत्वात् आत्मीये नियाम्यतया महिमभूते गवाश्वहस्तिहिरण्यदासभार्यादिलक्षणे प्रतिष्ठित इत्यभिप्रायं शिष्यो गृह्णीयात्। अथवा स्वशब्दस्य [2]स्वात्मपरतया आत्माधार इत्यभिप्राय इति वा(?) वाक्यभिप्रायं बुद्ध्येत। न च तदुभयमपि संभवति। परमात्मन उभयविभूतिलक्षणात्मीयमहिमसद्भावेऽपि अनाधारस्य परमात्मनः तत्प्रतिष्ठितत्वासंभवात्। न ह्यतिशिक्षितोऽपि नटवटुः स्वस्कन्धमारुह्य नरीनर्तीति न्यायेन स्वस्य स्वाश्रितत्वासंभवाच्च। अतो न द्वयमपि युज्यते। अतः शिष्यस्य सा बुद्धिर्निवर्तनीया'इति मत्वा पुनराह **यदि वा न महिम्नीति**। **यदि वा** [3]स्वविवक्षितानाधारत्वाभिप्रायातिरिक्ते पूर्वोक्तपक्षद्वये त्वया आशङ्क्यते, न स्वे महिम्नि प्रतिष्ठित इति ब्रूम इत्यर्थः। तद् विवृणोति **गो — इति**। **गो अश्वमित्यादौ** द्वन्द्वैकवद्भावः। **आयतनानीति इति** इतिशब्दः प्रकारवचनः। एवञ्जातीयकानीत्यर्थः। **नाहमेवं ब्रवीमीति होवाच**। तत्र प्रतिष्ठितत्वं न ब्रवीमीत्यर्थः। उक्तञ्च व्यासार्यैः, 'अस्य महिमानमिति वीतशोकः,' 'एतां विभूतिं योगञ्च' इत्यादिश्रुतिस्मृतिषु परमात्मनो महिमवत्त्वावगमात्, 'यदि वा न महिम्नी'ति न महिमनिषेधः। अपि तु विभूतिरूपमहिमप्रतिष्ठितत्वनिषेधोऽवगम्यते' इति। अथ स्वरूपमहिमप्रतिष्ठितत्वं निषेधति **अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति**। [न स्वस्य स्वप्रतिष्ठितत्वं संभवतीति भावः।] ७–२४.

1. अनेनाभिप्रायेण. क. 2. आत्म. क. 3. यदि वाऽन्यथा पश्यसि, तदा न महिम्नीति ब्रूम इत्यर्थः क.

७—२५.

स एवाधस्तात्, स उपरिष्टात्, स पश्चात्, स पुरस्तात्, स दक्षिणतः, स उत्तरतः, स एवेदँ सर्वमिति ।

अथातोऽहङ्कारादेश एव—अहमेवाधस्तात्, अहमुपरिष्टात्, अहं पश्चात्, अहं पुरस्तात्, अहं दक्षिणतः, अहमुत्तरतः, अहमेवेदँ सर्वमिति ॥ १ ॥

ननु, 'यत्र नान्यत् पश्यती' त्यनुपपन्नम्, नानादिग्वर्तिनां चेतनाचेतनपदार्थानां भिन्नानामुपलम्भादित्यत्राह **स एवाधस्तात्—सर्वमिति** । अत्र **स एवेदं सर्वमिति** सामानाधिकरण्यात् स इति निर्दिष्टस्य भूम्नः, इदं सर्वमिति निर्दिष्टस्य चिदचिद्वर्गस्य च शरीरात्मभावः फलितो भवति । ततश्च, 'यत्र नान्यत् पश्यती'ति तदनात्मकान्यनिषेधे नानुपपत्तिरिति भावः ।

एवं सर्वात्मभूतस्य भूम्न उपासने स्वशरीरकतयोपासनं कर्तव्य[1]मुपदिशति **अथातोऽहङ्कारादेशः** । क्रियत इति शेषः । **अथ**शब्दः प्रकृतविषयत्व[2]द्योतनार्थः । **अहङ्कारः** अहंबुद्धिः = अहङ्ग्रहेण भूम्न उपासनप्रकारः अतःपरमुपदिश्यत इत्यर्थः । न तु जीवस्वरूपोपदेश इति मन्तव्यम् । तथासति 'अहमादेश' इति निर्देशस्यैव युक्ततया **कार**पदवैयर्थ्यात् । परमात्मनोऽहङ्ग्रहेणोपासनप्रकारमेव दर्शयति **अहमेव — सर्वमिति** । सर्वदिग्वर्ती सर्वात्मा भूमाऽहमेवेति ज्ञातव्यमित्यर्थः । न तु जीवस्य सर्वात्मकत्वमुपदिश्यत इति भ्रमितव्यम्; जीवस्यासर्वाधारत्वेनासर्वात्मकत्वात्[3] । तथात्वे **कार**शब्दवैयर्थ्यस्योक्तत्वाच्च । **उक्तञ्च भगवता भाष्यकृता,** "यत्तु अहमेवाधस्तादित्यादिना सर्वात्मत्वमुपदिष्टम्, तद् भूमविशिष्टस्य ब्रह्मणोऽहङ्ग्रहेणोपासनमुपदिश्यते, 'अथातोहङ्कारादेश' इति अहङ्ग्रहणोपदेशोपक्रमात्" इति, "परमात्मनः प्रत्यगात्मशरीरकत्वज्ञानप्रतिष्ठार्थमहङ्ग्रहेणोपासनं कर्तव्यम्" इति च ।

1. इत्युपदिशति. क. 2. स्वकोशे 'त्व' इति न । 3. जीवस्या सर्वाधारत्वात् क.

अथ सर्वस्यापि प्रपञ्चस्य तदन्तर्भावात् तदन्यस्याभावो य उक्तः, 'यत्र नान्यत् पश्यती'ति, तदुपपादनं **स एवाधस्तादित्यादिना** । एवम्भूतभूमोपासनं स्वात्मगर्भमेव कार्यम् । अतः स वा एष एवं पश्यन्निति पूर्वं प्राणोपासनकथनमेतदर्थमिति दर्शयति **अथातोहङ्कारादेश इति** ।

अथात आत्मादेश एव–आत्मैवाधस्तात्, आत्मोपरिष्टात्, आत्मा-पश्चात्, आत्मा पुरस्तात्, आत्मा दक्षिणतः, आत्मोत्तरतः, आत्मैवेदँ सर्वमिति ।

ननु अहंबुद्धिशब्दयोर्जीवात्मविषययाः कथं भूमपर्यन्तत्वम् ? अनहमर्थे च परमात्मनि अहंग्रहोपासनस्य यथार्थत्वमेव स्यादित्याशंक्य, भूम्नः प्रत्यगात्मानं प्रति आत्मत्वेन तद्विषयबुद्धिशब्दानां परमात्मपर्यन्तत्वमुपपद्यत इति दर्शयन् 'तरति शोक-मात्मवित्'इति प्रक्रान्तमात्मत्वोपदेशं भूम्नि समापयति–**अथात आत्मादेशः**। अत्रापि, 'क्रियत'इति शेषः ; **अथशब्दः** प्रकृतविषयत्वद्योतनार्थः। **आत्मादेशः** आत्मत्वोपदेशः क्रियत इत्यर्थः। **आत्मैवाधस्तात्–आत्मैवेदँ सर्वमिति**। सर्वात्मतया उपदिश्यमानो भूमा [1]उपासकस्यात्मैवेत्यर्थः । ततश्च तत्राहंबुद्धिशब्दयोर्याथार्थ्यमेवेति भावः ।

ननु 'अथात आत्मादेश' इत्यात्मत्वोपदेशः प्रकृतभूमविषय इति कथ-मवसीयत इति चेन्न — भिन्नयोर्द्वयोः सार्वात्म्यायोगेन एकविषयत्वस्यैव सिद्धत्वात् ।

ननु च, स एवाधस्तादित्यनेनैव सार्वात्म्यस्य सिद्धतया उपासकात्मत्वमपि सिद्धमेवेति, 'अथात आत्मादेश' इत्युपदेशो व्यर्थ इति चेत्–सत्यम्, स एवेदँ सर्वमिति सामानाधिकरण्येनात्मत्वं फलति । अथापि कण्ठोक्त्योपासकात्मत्वसिध्यर्थं[2] विशिष्य कण्ठोक्त्योपदेशः । न च 'अथात आत्मादेश' इति [3]सामान्योक्तिरुपासकं प्रति अत्मत्वोपदेश इति विशेषे किं नियामकमिति वाच्यम् — 'एवं विजानत आत्मतः प्राणः' इति विद्वदात्मनः प्राणाद्युपादानत्वेन सार्वात्म्यस्योत्तरत्र प्रतिपादयिष्यमाणत्वात् ।

यत्तु — अत्र परैरहङ्कारस्यात्मैकत्वेन प्रत्यक्षसिद्धस्य 'अथातोऽहङ्कारा-देशः,' 'अथात आत्मादेशः' इति पृथगुपदेशो भेदार्थः, भूमात्मनोर्भिन्नत्वेन प्रत्यक्षसिद्धयोः पृथगुपदेश ऐक्यार्थः । द्वयोः सार्वात्म्यायोगादिति — तदसारम् । अहमर्थादन्यस्यात्मनो भूमाख्यब्रह्मभिन्नत्वेन प्रत्यक्षासिद्धत्वात्[4] तयोः पृथगुपदेशो भेदार्थः । अहमर्थस्य तु ब्रह्मभिन्नत्वेन प्रत्यक्षसिद्धत्वात् तयोरुपदेश ऐक्यार्थ इति वैपरीत्यस्यापि सुवचत्वादित्यास्तां तावत् ।

1. स्वोपासकस्य. ख. 2. उपासकात्मसिध्यर्थञ्च. क. 3. इत्युक्तिः क. 4. भूमाख्य ब्रह्माभिन्नत्वेन प्रत्यक्षसिद्धत्वात्. ख.

स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन् आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः; स स्वराड् भवति। तस्य सर्वेषु लोकेषु कामचारो भवति। अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति। तेषाँ सर्वेषु लोकेष्वकामचारो भवति ॥ २ ॥

इति सप्तमाध्याये पञ्चविंशः खण्डः।

स वा एष — आत्मानन्दः। रतिः स्रक्चन्दनादिजन्या प्रीतिः। **क्रीडा** उद्यानादिजन्या। स्त्रीसम्भवा प्रीतिः **मिथुनम्**। विभूतिजन्या प्रीतिरानन्दः। [1]आत्मन्येव रतिर्यस्य स तथोक्तः। एवमुत्तरत्रापि। श्रवणमननिदिध्यासनैरुक्तभूमात्मसाक्षात्कारनिष्ठस्य सर्वविधसुखानुभवोऽप्यात्मसुखानुभवान्तर्गत इत्यर्थः। **स स्वराड् भवति। स्वराट्** स्वयमेव राजा; अकर्मवश्यः; विधिनिषेधकिङ्करो न भवतीति यावत्। "अत एव चानन्याधपति" रिति सूत्रे "अत एव सत्यसङ्कल्पत्वादेव **अनन्याधिपतित्वं** विधिनिषेधायोग्यत्वम्। विधिनिषेधयोग्यत्वे हि प्रतिहतसङ्कल्पत्वं भवेत्। अतः सत्यसङ्कल्पत्वश्रुत्यैवानन्याधिपतित्वञ्च सिद्धम्। अत एव स स्वराड् भवतीत्युच्यते" इति भाषितम्। **तस्य सर्वेषु लोकेषु कामचारो भवति**। "प्रत्यक्षोपदेशान्नेति चेत्" इति सूत्रे, "अकर्मप्रतिहतज्ञानो मुक्तो विकारलोकान् ब्रह्मविभूतिभूतान् अनुभूय यथाकामं तृप्यतीति, 'सर्वेषु लोकेषु कामचारो भवती'त्यस्य वाक्यस्यार्थ" इति भाषितम्। **अथ येऽन्यथा — भवति**। ये उक्तप्रकारादन्येन प्रकारेणोपासते, तेऽन्यराजानो भवन्ति = विधिनिषेधकिंकरा भवन्ति। कर्मवश्या भवन्तीत्यर्थः। स्वराडित्यस्य प्रतिद्वन्द्वित्वात्। किञ्च ते क्षय्यलोकाश्च भवन्तीत्यर्थः। अत्र क्षय्यलोका भवन्तीत्यनेन यथोक्तप्रकारेण परमात्मोपासकानामक्षय्यभगवल्लोकत्वमस्तीत्युक्तं भवति। ७–२५.

1, आत्मैव रतिः ख,

७—२६.

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशाऽऽत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मतः संकल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मन्त्रा आत्मतः कर्माण्यात्मत एवेदँ सर्वमिति ॥ १ ॥

तदेष श्लोकः—

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् ।
सर्वँ ह पश्यः पश्यति सर्वमाप्नोति सर्वशः ॥ इति ॥

अथात आत्मादेश इत्यनेनोक्तमुपासकान्तर्यामिणः चेतनाचेतनसकलप्रपञ्चोपादानत्वलक्षणसर्वात्मकत्वं स्पष्टयति — **तस्य ह — सर्वमिति**। उपासकस्यान्तर्याम्येव प्राङ्निर्दिष्टप्राणशब्दितजीवपर्यन्तसकलप्रपञ्चोपादानम् । अतः **अहमेवेदं सर्वमिति** विहितोऽहंग्रहः तात्त्विकविषय एवेति भावः ।

तदेष श्लोकः। **तत्** तस्मिन् विषये **एषः** वक्ष्यमाणः **श्लोकः** प्रवृत्त इत्यर्थः। **न पश्यो मृत्युं—सर्वमाप्नोति सर्वश इति**। **पश्यः** ब्रह्मदर्शी **मृत्युं** मरणं **रोगं** दुःखसाधनं **दुःखतां** जगति प्रतिकूलताञ्च न पश्यति। सर्वसाक्षात्कर्ता सन् सङ्कल्पमात्रेण सङ्कल्पितान् अर्थान् सर्वस्मिन् काले प्राप्नोतीत्यर्थः। अपहतपाप्मत्वादिगुणाष्टकाविर्भावो भवतीत्यर्थः । अत्र, जगति दुःखतां न पश्यतीत्युक्त्या जगतो मुक्तं प्रति प्रतिकूलत्वं नास्ति, पित्तोपहतस्य पयःप्रतिकूलत्ववत् जगतः प्रतिकूलत्वं [1]कर्मनिबन्धनमित्युक्तं भवति।

1. कर्तृकर्म. ग.

पूर्वं नामवागादीनामुत्तरोत्तरस्य पूर्वपूर्वकारणत्वमुक्तम्। तत्र प्राणं प्रति भूम्नः कारणत्वं नोक्तमिति तद् दर्शयति **विजानत आत्मतः प्राण** इति। **विजानत** इति षष्ठी। एषश्च प्राणो भूमजन्यः; आशादिकं नामान्तं तु न साक्षात् भूमजन्यम्, किन्तु सन्तानक्रमेणेति सिध्येत्। न तथा मन्तव्यम्, किन्तु सद्विद्योक्तरीत्या, 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे'त्युक्तरीत्या च पूर्वपूर्वकारणान्तर्वर्ती परमात्मैव सर्वकारणम्; न केवलं नामान्तस्य, किन्तु सर्वस्यापि प्रपञ्चस्येति दर्शयितुम् **आत्मत आशे**त्यादि।

एवं, 'स वा एष एवं पश्यन्—आत्मरति'रिति आत्मदर्शनं नारदप्रार्थितमुपदिश्य, इतस्तरति शोकमात्मविदिति प्रत्याययति **तदेष** इति। ननु विज्ञानानन्तरभाविनि दर्शने मोक्षहेतौ सति, **स वा एष एवं मन्वान एवं विजानन् एवं पश्यन्**इति क्रमेण निर्देष्टव्यम्। तत् कथं प्रागन्यक्रमा-

स एकधा भवति त्रिधा भवति पञ्चधा ।
सप्तधा नवधा चैव पुनश्चैकादश(शः) स्मृतः ॥
शतञ्च दश चैकञ्च सहस्राणि च विंशतिः ।
आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः ॥

स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ।

स एकधा — विंशतिः । आत्मनः निरवयवस्य त्रेधा **पञ्चधा सप्तधे**-त्यादिविभागायोगात् सङ्कल्पपरिगृहीतानेकविधशरीरो भवतीत्यर्थः । एवं मोक्षसाधनभूतोपासनप्रकारमुपदिश्य, 'तादृशोपासननिष्पत्तौ अन्तःकरणस्योपासनोत्पत्तिप्रतिबन्धकपापराहित्यमपेक्षितम् । तच्च राजसतामसाहारसेविनां न सम्भवति । अपितु तद्विविक्तसात्त्विकाहारसेविनां भवेदिति उपासकः सात्त्विकाहारसेवी भवे'दित्युपदिशति **आहारशुद्धौ — विप्रमोक्षः** । **आहारशुद्धौ** सात्त्विकाहारसेवने सति **सत्त्वस्यान्तः**करणस्य **शुद्धिः** नैर्मल्यं भवति । तन्नैर्मल्ये सति **ध्रुवा स्मृतिः** अविच्छिन्नस्मृतिसन्तानरूपात्मध्यानं सिद्ध्यति । **ध्रुवस्मृतिलम्भे** तल्लाभे सति दुर्मोचतया **ग्रन्थि**शब्दवाच्यानामविद्यारागादीनां मोक्षो भवतीत्यर्थः । अत्र, 'स्मृतिलम्भ एव सर्व**ग्रन्थीनां विप्रमोक्षः**' इत्युक्त्या 'स्मृत्यनन्तरभाविना स्मृतिविलक्षणेन दर्शनेन न मोक्षः, अपितु दर्शनसमानाकारस्मृतिसन्तानेनैव ! ततश्च 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्' इत्यत्र पश्यन्नित्यादिशब्दाः दर्शनसमानकारोपासनपराः; प्रकरणान्तरस्थाः, 'आत्मा वा अरे द्रष्टव्यः' इत्यादिशब्दाश्च दर्शनसमानाकारध्यानपराः' इति सूचितं भवति ।

दरणमित्यत्राह **आहारशुद्धा**वित्यादि । स्मृतिसंततिरूपा परभक्तिरेव मोक्षहेतुः । तस्या एवाऽऽहारशुद्धिप्रभृतिपुरुषप्रयत्नसाध्यतया विधेयत्वात् । **पश्यन्नि**ति तु तस्या एव क्रमभवत् **दर्शनसमाना**कारत्वमभिप्रेतम् । न मुख्यः साक्षात्कारः । यद्वाऽत्र प्रकरणे श्रवणस्य पृथक्कीर्तनाभावात् स्थानप्रमाणात् **पश्यन्** इत्यस्य 'शब्दतो विद'न्नित्यर्थोऽस्तु । अत एवोपदेष्टा सनत्कुमारः, **तमसः पारं दर्शयती**ति दर्शकत्वेनोच्यते । उपदेशरूपश्रुतेश्च दर्शनपदेन प्रत्यक्षपदेन च सूत्रे व्यवहारो बहुत्र । अत उपदेशतः, 'चिरनिर्वृत्तमप्येतत् प्रत्यक्षमिव दर्शितम्' इति रीत्या शास्त्रचक्षुषा पश्यन्, अथ मन्वानः, अथ विजानन् इत्यर्थोऽपि नायुक्तः इति । अत एव श्रीभाष्ये, प्रस्तुतं श्रवणं क्रमवक्तव्यं कथं नोक्त'मिति विमृश्य, "श्रवणमर्थसिद्धं मत्वे"त्युक्तमित्यपि स्यादिति ।

तस्मै मृदितकषायाय[1] तमसः पारं दर्शयति भगवान् सनत्कुमारः । तँ स्कन्द इत्याचक्षते तँ स्कन्द इत्याचक्षते ॥

इति सप्तमाध्याये षड्विँशः खण्डः ।

इति छान्दोग्योपनिषदि सप्तमोऽध्यायः (सप्तनः प्रपाठकः) ।

1. देवर्षये नारदाय इत्यधिकं **मा.**

शास्त्रार्थमशेषत उक्त्वा आख्यायिकामुपसंहरति श्रुतिः **तस्मै — सनत्कुमारः** । एवं शुद्धान्तःकरणाय नारदाय भगवान् सनत्कुमारः संसारसंतमसचण्डभानुभूतोपासनगोचरं परमात्मानं स्पष्टमुपादिक्षदित्यर्थः । अत्र नामादिषु ब्रह्मत्वेनोपदिष्टेष्वपि तत्र ब्रह्मवस्यानभ्युपगमात् तस्य मृदितकषायत्वम् । शिष्यस्य परिशुद्धान्तःकरणतया उपदेशयोग्यतां परीक्ष्यैवोपदिष्टवानित्यर्थः । **तं स्कन्द इत्याचक्षते** —। [सनत्कुमारं स्कन्द इत्यपि वदन्तीत्यर्थः]। स्पष्टोऽर्थः । द्विरुक्तिरध्यायसमाप्त्यर्था ॥

एतद्विषयमधिकरणमुपन्यस्यते—

(१) अत्र मुक्तस्य देहेन्द्रियाणि सन्ति, न सन्तीति विचारे — " अभावं बादरिराह ह्येवम् " । शरीरेन्द्रियाणामभावं बादरिराचार्यो मन्यते । ' न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति ' इत्येवं श्रुतिराहेत्यर्थः ।

" भावं जैमिनिर्विकल्पामननात् " । मुक्तस्य देहेन्द्रियादिसद्भावं जैमिनिराचार्यो मन्यते । कुतः ? **विकल्पामननात्** । विविधः कल्पो **विकल्पः**, वैविध्यमित्यर्थः । ' स एकधा भवति, त्रिधा भवति पञ्चधा । सप्तधे ' त्यादिश्रुतेः । आत्मन एकस्याच्छेद्यस्यानेकधाभावासंभवात् त्रिधाभावादयः [1]शरीरनिबन्धना इत्यवगम्यते । अशरीरत्ववचनं तु कर्मकृतशरीराभावपरम् ।

" द्वादशाहवदुभयविधं बादरायणोऽतः " । ' संकल्पादेवे ' ति पूर्वनिर्दिष्टः संकल्पः **अतश्शब्देन** परामृश्यते । **अतः** संकल्पवशादेव मुक्तस्य सशरीरत्वाशरीरत्वलक्षणविधाद्वयमप्यस्ति । संकल्पवशात् सशरीरोऽशरीरश्च भवतीति भगवान् बाद-

1. शरीरेन्द्रिय. ग.

रायणो मन्यत इत्यर्थः । **द्वादशाहवत्** । यथा, 'द्वादशाहमृद्धिकामा उपेयुः,' 'द्वादशाहेन प्रजाकामं याजयेत्' इति उपैतियजतिचोदनाभ्यां द्वादशाहस्य सत्रत्वाहीनत्वरूपविधाद्वयवत्त्वम् (पू. मी. ८-२-५; १०-६-१६.), एवमित्यर्थः ।

"तन्वभावे सन्ध्यवदुपपत्तेः" । मुक्तस्य स्वतनुभवनादि[1] भोगोपकरणसृष्टिसंकल्पाभावे, स्वप्ने परमात्मसृष्टैः भोगोपकरणैः यथा भोगान् भुङ्क्ते, एवं मुक्तः सत्यसंकल्पोऽपि परमात्मसृष्टैर्भोगोपकरणैः भोगान् अनुभवति ।

"भावे जाग्रद्वत्" । मुक्तस्य स्वभोगोपकरणतनुभवनादिसृष्टिसंकल्पसत्त्वे, यथा जाग्रत्पुरुषः स्वार्जितैः भोगोपकरणैः भोगान् अनुभवति, एवं मुक्तोऽपि स्वसंकल्पसृष्टैः भोगोपकरणैः भोगान् अनुभवति ।

ननु अणुपरिमाणस्य जीवस्य कथमनेकशरीरेष्वात्माभिमानसंभवः ? तत्राऽऽह, "प्रदीपवदावेशस्तथा हि दर्शयति" । यथा प्रदीपस्यैकदेशस्थितस्य स्वप्रभया देशान्तरव्याप्तिः, एवमेकदेशस्थितस्याप्यात्मनः धर्मभूतज्ञानात् अहमित्यात्माभिमानानुगुणा सर्वदेशेषु व्याप्तिरुपपद्यते । तथा हि दर्शयति श्रुतिः—

"वालाग्रशतभागस्य शतधाकल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥"

इति । **आनन्त्याय** धर्मभूतज्ञानकृतानन्त्यायेत्यर्थः । इयांस्तु विशेषः—बद्धस्य कर्माधीनः शरीरपरिग्रहः, मुक्तस्य स्वेच्छायत्तः' इति । ननु, 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद, नान्तरम्' इति मुक्तस्य ज्ञानाभावप्रतिपादनात् कथमनेकशरीरेष्वात्माभिमानानुगुणज्ञानव्याप्तिः ? तत्राऽऽह "स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि" । 'न बाह्यं किञ्चन वेदे' ति ज्ञानाभावश्रुतेः सुषुप्तिमरणान्यतरविषयत्वात् । सुषुप्तिमरणयोः निःसंबोधत्वस्य, 'नाह खल्वयमेवं संप्रत्यात्मानं जानाति', विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' इति श्रुतिभ्यामाविष्कृतत्वात् । **अनु विनश्यति** न पश्यतीत्यर्थः । मुक्तस्य, 'मनसैतान् कामान् पश्यन् रमते' इति सार्वज्ञ्यस्याविष्कृतत्वाच्चेति स्थितम् ।

1. तनुप्रभृतिभोगोपकरण. ग.

अथ अष्टमोऽध्यायः । ८—१.

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म

(२) तथा समन्वयाध्याये—, 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा' इति निर्दिश्यमानो भूमा प्राणशब्दनिर्दिष्ट[1]जीव एव । प्राणादूर्ध्वम्, 'अस्ति भगवः प्राणाद् भूय' इति प्रश्नस्य, 'अदो वाव प्राणाद् भूयः' इति प्रतिवचनस्य वाऽदर्शनेन प्रकान्तात्मोपदेशस्य तत्रैव पर्यवसानात् । अतश्च सन्त्यपि ब्रह्मलिङ्गानि तत्रैव यथाकथञ्चिद् योजयितव्यानीति पूर्वपक्षे प्राप्ते—उच्यते—

"भूमा संप्रसादादध्युपदेशात्" । **भूमा** परमात्मा, **संप्रसादात्** जीवात् अधिकत्वेन तस्योपदेशात् । 'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य' इत्यत्र संप्रसादशब्दस्य जीवे प्रयुक्तत्वात् संप्रसादो जीवः । 'एष तु वा अतिवदति, यः सत्येनातिवदति' इति सत्यातिवादिनः[2] प्राणशब्दनिर्दिष्टजीवातिवाद्यपेक्षया तुशब्देनाधिकत्वेनोपदिश्यमानतया अतिवदननिमित्तस्य सत्यशब्दनिर्दिष्टस्य प्राणशब्दितात् जीवादधिकत्वप्रतीतेः न प्राणशब्दनिर्दिष्टो जीवो भूमा ।

"धर्मोपपत्तेश्च" । 'स्वे महिम्नि प्रतिष्ठितः', 'स एवेदं सर्वम्' इत्यादिभिः प्रतिपादितस्वमहिमप्रतिष्ठत्वसर्वात्मकत्वादिधर्माणाम्, 'आत्मतः प्राणः आत्मत आशा' इत्यादिवाक्यसंदर्भप्रतिपादित—प्राणशब्दितजीवप्रभृतिसकलप्रपञ्चोपादानत्वस्य प्राणशब्दिते जीवेऽसंभवाच्च भूमा परमात्मेति स्थितम् ॥ ७—२६.

इति छान्दोग्योपनिषत्प्रकाशिकायां सप्तमोऽध्यायः
(सप्तमः प्रपाठकः)

दहरविद्या प्रस्तूयते—अथ—वेश्म । विद्यान्तरारम्भप्रदर्शनार्थोऽयमथ-

1. निर्दिष्टः ख. . सत्यनिमित्तकातिवादिनः ग.

अणिमोपासनरूपायां सद्विद्यायां विभुत्वाविरोधि किञ्चिद्रूपं स्वरूपगतमणुत्वमुक्तम् । अथ भूमविद्यायां वैपुल्यमुपपादितम् । अथ दहरविद्यायां तस्य दहरहृदयपरिच्छिन्नत्वप्रयुक्तं दहरत्वमुपवर्ण्यते । एवमुक्तोपासनद्वयमिव इदमपि सत्यविषयकम् । स्वरूपसत्यत्वमात्रं प्रागुक्तम् । इह तदगुणानां सत्यत्वमप्युच्यते, 'एतांश्च सत्यान् कामान्' इति । सद्विद्योक्ता मोक्षसंपत्तिः भूमविद्यायां मनआद्युपास्त्यर्थकृतलोककामचारप्रस्तावानुरोधेन सर्वलोककामचारादिरूपेण किञ्चिद् विकृता, इहैव लोकविशेष-विहारविशेषादिवर्णनेन सम्यग् विशदीक्रियते सत्यकामत्वविवरणमिश्रा-

दहरोऽस्मिन्नन्तराकाशः तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ।

शब्दः । उपास्यतया संनिहितस्य परब्रह्मणः स्थानतया नवद्वारादिमत्त्वादिना च पुरशब्दिते अस्मिन् शरीरे पुण्डरीकाकारमल्पं हृदयाख्यं परस्य ब्रह्मणो वेश्मेत्यर्थः । **दहरो—विजिज्ञासितव्यमिति ।** अस्मिन् वेश्मन्यन्तः **दहरः** सूक्ष्मः आकाशः । अत्र य इति पुंलिंगयच्छब्दोऽध्याहर्तव्यः । अस्मिन् यो दहर आकाश इत्यर्थः । **तस्मिन् यदन्तरित्यत्रान्तश्शब्दोऽन्तर्वर्तिपरः** । चशब्दश्चाध्याहर्तव्यः । ततश्चायमर्थः — **अस्मिन्** दहरपुण्डरीके यो दहर आकाशः तदन्तर्वर्ति च यत्, तदुभयं श्रवणमननाभ्यामवगन्तव्यं ध्यातव्यञ्चेति । **तदन्वेष्टव्यमित्यत्र तदि**ति नपुंसकलिङ्गनिर्देशो[1] लिङ्गसामान्यविवक्षया द्रष्टव्यः । यद्वा दहरोस्मिन्नन्तराकाश इति न पुंलिंगयच्छब्दोऽध्याहर्तव्यः । अस्मिन् दहराकाशस्तदन्तर्वर्ति च यदिति यच्छब्दे-

1. लिङ्गैकवचननिर्देशः क.

येण । पूर्वाध्यायेषु गुरूपदेशानुवादरूपेण श्रुतिः प्रवृत्ता । इह, 'तञ्चेद् ब्रूयुः,' 'स ब्रूयात्' इति भङ्ग्या गुरुं प्रति उपदेशकटाक्षिक्षणमुखेन प्रवृत्तेति वैलक्षण्यम् ।

परब्रह्मणः स्थानतयेति । लोके सार्वभौमस्य स्थानं पुरं भवति । उभयविभूतीश्वरात् ब्रह्मणः कोऽन्यः सार्वभौमो नाम । सर्वासु भूमिषु गुणत इव स्वरूपतोऽपि सर्वात्मना संबन्धी अयमेव सार्वभौमः । उक्तञ्च **तात्पर्यचन्द्रिकायाम्**, 'शरीरं पुरम्, इन्द्रियाणि गौरान्, ब्रह्म सार्वभौमम्, आत्मानञ्च भृत्यं भावयेत्' इति । **नवद्वारे**ति । चक्षुश्श्रोत्रघ्राणमुखद्वाराणि सप्त; गुदोपस्थाभ्यां द्वारनवकम् । 'सर्वकर्माणि मनसा संन्यस्याऽऽस्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन् न कारयन्' इति हि गीतम् । आदिना, 'पुरमेकादशद्वारम्' इति कठोक्तं नाभिब्रह्मरन्ध्रमेलनेन एकादशकं ग्राह्यम् ।

दहरोऽस्मिन्नन्तर आकाश इति । यः **आ** समन्तात् काशत इति आकाशः, स एवास्मिन् अन्तर्वर्तमानत्वात् दहर इत्युच्यत इति ज्ञापनाय आकाशपदप्रयोगः । अत्र य इति यच्छब्दाध्याहारः, तदन्वेष्टव्यमित्यत्र तच्छब्देन गुणवत् अस्यापि ग्रहणाय । अध्याहारं विनाऽपि निर्वहति **यद्वे**ति । अनध्याहारपक्षोऽपि द्विप्रकारः, **तत्** इति तच्छब्देनाऽपि आकाशश्च तच्च तत् इति, 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषेण आकाशतदन्तर्वर्त्युभयग्रहणमित्येकः; **यदि**ति यच्छब्देनापि यच्च यश्च यदिति उभयग्रहणमित्यन्यः । अयं पक्ष उच्यते **अस्मिन्—दहराकाशः तदन्तर्वर्ति च यदि**ति । दहरहृदयनिष्ठदहराकाशतदन्तर्वर्त्युभयरूपं यदित्यर्थः । अस्मिन् पक्षे मौलं **तस्मिन्** इति पदमपि एकशेषैकवद्भावेन वेश्मदहराकाशोभयपरं ग्राह्यम् । ननु उपरि,

नैव 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या' मिति कृतनपुंसकैकशेषैकवद्भावेनैकेनैव नपुंसकलिङ्ग[1]यच्छब्देन द्वयोरपि परामर्शसम्भवात् । तदन्वेष्टव्यमिति वाक्ये तच्छब्देऽपि नपुंसकैकशेषसम्भवादेकेनैव तच्छब्देन द्वयोरपि परामर्शः । ततश्चानेन वाक्येन दहराकाशस्तदन्तर्वर्ति चान्वेष्टव्यमित्युक्तं भवति । उक्तं च भगवता भाष्यकृता— "यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म इत्यनूद्य तस्मिन् दहरपुण्डरीकवेश्मनि यो दहर आकाशः, यच्च तदन्तर्वर्ति, तदुभयमन्वेष्टव्यमिति विधीयत" इति । अत्र आकाशशब्द आ समन्तात् काशते प्रकाशत इति व्युत्पत्त्या परमात्मपरः । तत्र च हेतुरुत्तरत्र वक्ष्यते ।

न च तदन्तर्वर्तिन एवान्वेष्टव्यत्वे प्रतीयमाने दहराकाशशब्दितस्याप्यन्वेष्टव्यतासिद्ध्यर्थमेतावान् क्लेशः किमर्थमाश्रीयते । किञ्च "विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति" इत्यत्र पृष्ठगतसर्वतां विध्याक्षिप्तपृष्ठविधिवत् दहराकाशान्तर्वर्तित्वेन गुणजातोपासनस्य दहराकाशोपासनमन्तरेणासम्भवेनाक्षेपादेव दहराकाशोपासनस्यापि सिद्धतया यत्तच्छब्दयोर्नपुंसकैकशेषैकवद्भावचशब्दाध्याहारक्लेशानुभवो व्यर्थ इति वाच्यम् । 'अथ य इहात्मानमनुविद्य व्रजन्त्येतॉंश्च सत्यान् कामान्' इत्यौपसंहारिकोभयोपासनवचनानुसारेणास्य क्लेशस्यानुभोक्तव्यत्वात् । न च तदेव वाक्यं दहराकाशतदन्तर्वर्तिलक्षणोभयोपासनविधिपरमस्त्विति वाच्यम् । प्रक्रमस्थं विस्पष्टतव्यप्रत्ययशून्यं वाक्यं विहायौपसंहारिकस्य विस्पष्टविधिप्रत्ययशून्यस्य यच्छब्दयुक्तस्य विधित्वकल्पनानौचित्यात्, तस्य विधित्वकल्पनायामप्यनुवादरूपस्याप्यस्य वाक्यस्य तदनुसारेणार्थद्वयोपासनपरत्वस्याश्रयणीयतया नपुंसकैकशेषादिक्लेशस्याश्रयणीयत्वादिति ।

इतिशब्दो वाक्यसमाप्तौ । अथवा इतीत्यस्यानन्तरमाचार्यो ब्रूयादित्यध्याहारः ।

1. लिङ्गेन. ख.

'किं तदत्र विद्यते यदन्वेष्टव्यम्' इति प्रश्नवाक्ये यत्तत्पदाभ्यामाकाशान्तर्वर्तिन एव परामृष्टव्यतया अत्रापि तदैकरूप्यमेव युक्तमिति चेन्न — अत्र एवमर्थविवक्षणौचित्यस्य भाष्य इह विशदमेवोपपादितत्वात् । अत्र द्वयोर्ग्रहणेऽपि तत्र आकाशान्तर्वर्तिमात्रेऽसंभावितत्वशङ्कया तथा प्रश्नोपपत्तेः ।

तञ्चेद् ब्रूयुः — यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति,

---

तञ्चेत् — विजिज्ञासितव्यमिति । एवमुक्तवन्तमाचार्यम्, स्वल्पहृदयमध्यवर्तितयाऽतिस्वल्पे आकाशे किं वा वर्तितुमर्हति, यदन्वेष्टव्यं स्यादिति दहराकाशशब्दितस्य ब्रह्मत्वं तदन्तर्वर्तितया निर्दिष्टस्य तद्गुणजातत्वञ्चाजानाना अन्तेवासिनो यदि ब्रूयुरित्यर्थः । 'किं तदत्र विद्यत' इति वाक्यं सर्वान्तरस्य परमात्मनः अन्तर्वर्त्यन्तरासम्भवलक्षणानुपपत्तिगर्भान्तर्वर्तिविशेषप्रश्नपरमिति **व्यासार्याणा**मभिप्राय इति यद्यपि प्रतीयते–तथाऽपि 'यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश' इत्येतावन्मात्रं श्रुतवतां शिष्याणां परमात्मत्वविरोधिन्याकाशशब्दे जागरूके, दहरत्वान्वेष्टव्यान्तराधारत्वादिविरोधिलिङ्गे च जाग्रति, ब्रह्मलिङ्गेषु चानुपन्यस्तेषु, परमात्मत्वनिश्चयस्य वा तदुपजीव्याक्षेपप्रवृत्तेर्वा असम्भवात्, सर्वान्तरस्य परमात्मनोऽन्तर्वर्त्य [न्तरा] सम्भवलक्षणानुपपत्तेरेव शिष्याणां हृदि विपरिवर्तमानत्वे–प्रश्नवाक्ये 'दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश' इति दहरपुण्डरीकान्तर्वर्तित्वेनाकाशस्य दहरत्वोपन्यासस्य वा, प्रतिवचने 'यावान्वा अयमाकाश' इति वैपुल्योपन्यासस्य वा असङ्गतत्वापातात् व्यासार्याणामप्युक्त एवार्थोऽभिप्रेतः ।

केचित्तु शरीरस्य ब्रह्मपुरत्वेनोपक्रमादेव तदन्तर्वर्त्याकाशशब्दनिर्दिष्टं ब्रह्मेत्यवगत्यैव तदन्तर्वर्तिवस्त्वन्तरासम्भवलक्षणानुपपत्तिमभिप्रयन्त एवान्तर्वर्तिविशेषं पप्रच्छुरित्यपि सम्भवान्नानुपपत्तिरिति वदन्ति ।

इति वदन्तीति । अत्रायं भाष्यकाराशयः — यदि ब्रह्मान्तर्वस्त्वन्तरासंभवं मन्यन्ते, तर्हि 'तस्यान्ते सुषिरं सूक्ष्मम्' इति तैत्तिरीये सुषिरपदेनैव आकाशपदेन हृदयाकाशं गृहीत्वा तदन्तरन्वेष्टव्यमेव ब्रह्मेति ब्रह्मपुरपदबलान्निर्धारयितुमर्हन्तीति प्रश्नायोगस्तदवस्थ एव । अतः तद्वदप्रार्थो न ग्राह्य इति ज्ञापनायैव प्रश्नप्रतिवचनभङ्ग्या आकाशान्तर्वर्तिपदार्थजातप्रदर्शनमुखेन आकाशं ब्रह्मेति दर्शयतीति वक्तव्यम् । तत्र दहरत्वात् किञ्चिदनाधारत्वशङ्कायामेव उपरि, हृदयपरिच्छिन्नत्वेऽपि अच्छिन्नत्वात् अच्छेद्येऽनवयवे तस्मिन् वैपुल्यस्याभङ्गात् आधारत्वमित्युपपादनं संगच्छते । व्यासार्यसूक्तिस्तु परोक्तार्थपरिष्कारपरा नेह वास्तवार्थकथनप्रवृत्तेति ।

स ब्रूयात्—यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः। उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि। यच्चास्येहास्ति यच्च नास्ति सर्वं

स ब्रूयात्—एवमुक्तः स आचार्यः प्रतिब्रूयात्। किमिति? **यावान्**—**नक्षत्राणि** हृदयपुण्डरीकमध्यवर्ती आकाशशब्दनिर्दिष्टः भूताकाशवद्विपुलः। **द्यावापृथिव्यादि**शब्दलक्षितं भोग्यभोगस्थानभोगोपकरणं अग्निसूर्यादिशब्दलक्षितो भोक्तृवर्गश्च तदाश्रित इत्यर्थः। **यच्च — मिति**। अस्य उपासकस्येह लोके यत् भोग्यजातमस्ति, यच्च मनोरथमात्रगोचरमिह नास्ति, सर्वं तत् भोग्यजातमस्मिन् दहराकाशे समाहितमित्यर्थः। दहराकाशो निरतिशयभोग्य इति यावत्।

इह लोक इति। बाह्याकाशसाम्यं ब्रह्मण्याकाशे उक्त्वा, अत एव बाह्याकाशवत् द्यावापृथिव्यादिसर्वाधारत्वं दर्शयितुम् **उभे अस्मिन्** इत्यादि। नायं बाह्याकाशवत् तावन्मात्राधारः, किंतु सर्वाधार इत्यतिशयकथनाय **यच्चास्येह**इति। एवञ्च **इह**इतिपदं बाह्याकाशार्थकमपि भवितुमर्हति — अथापि **अस्ये**तिपदावैयर्थ्याय **सर्वे च कामा** इति वक्ष्यमाणानुसारेण उपासकभोग्यमित्यर्थस्य ग्रहणे इहेत्यस्य इहलोके इत्यर्थ एव स्वरसः। तथाच इहेत्यस्य प्राकृतलोके इत्यर्थः। तथासत्येव विवक्षितस्य बाह्याकाशाद् वैषम्यस्यात्यन्तं सिद्धिरिति भावः।

नन्वत्र द्यावापृथिव्यादीनां तदन्तर्वर्तित्वेन कथनात्, 'तद्वाव विजिज्ञासितव्य'मिति तेषामुपास्यत्वमिति चेन्न — पदार्थविशेषाधारत्वमुक्त्वा **यच्चास्ये**ति उपासकभोग्यत्वेन रूपेण सर्वक्रोडीकारात् तेन रूपेण द्यावापृथिव्यादेरपि क्रोडीकृततया भोग्यत्वेन रूपेण सर्वस्यैवोपास्यताया इष्टत्वात्। पदार्थविशेषाधारत्वनिर्देशश्च बाह्याकाशसाम्यस्य प्रसक्तस्य विशदमुपपादनाय। एवमुक्तानुक्तसर्वग्रहणप्रकारप्रदर्शनायैव, **'सर्वे च कामा'** इत्युक्तम्; **अस्मिन् कामाः समाहिताः**' इति च। नन्वेवं भाष्यविरोधः; कामा इति अपहतपाप्मत्वादिगुणाष्टकस्यैव तत्रोक्तेरिति चेत् — उच्यते। **सत्यकामः सत्यसंकल्प** इत्यत्र सत्यकामपदम्, नित्यं यद् भोग्यभोगोपकरणभोगस्थानरूपम् तत्परम्। अनित्यं तादृशं सर्वं तु सत्यसंकल्पपदत एव गृहीतम्। सत्यसंकल्पत्वं हि स्वसंकल्पमात्राधीनस्वाभिमतसिद्धिकत्वम्। नित्यानामेतदधीनस्थितिप्रवृत्तिकत्वमपि सत्यसंकल्पपदसंगृहीतम्। व्यक्तमिदं **वेदार्थसंग्रहान्ते**। अतः, 'स यदि पितृलोककाम' इत्यादिना वक्ष्यमाणानामन्येषाञ्च कामानामुत्पाद्यानाम् आप्यानाञ्च सत्यसंकल्पत्वगुणान्तर्गतत्वमस्त्येवेति। एवञ्च कामपदेन काम्यमानत्वाविशेषात् अपहतपाप्मत्वादिकमपि संगृहीतं भवति; तद्विषयकपदान्तराभावाच्चैवमिति गुणाष्टकमत्र भाष्ये दर्शितम्। एतेन — स यदि पितृलोककाम इति विशदवक्ष्यमाणकामविशेषाः सत्याः कामा इत्युच्यन्तां। तेषां सत्यत्वञ्च यथासंकल्पभावित्वमेव-इति निरस्तम्। सत्यकामपदोक्तनित्यकामोपेक्षणायोगात्। पितृलोकादिकामानामिहान्तर्भावस्य ज्ञापिततया उपरि तद्वर्णनस्यासंगतत्वाभावात्।

तदस्मिन् समाहितमिति ।

उक्तञ्च भगवता भाष्यकृता — " यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति दहराकाशस्या[1]तिमहत्तामभिधाय, ' उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि ' इति प्रकृतमेव दहराकाशमस्मिन्निति निर्दिश्य तस्य [सर्व] जगदाधारत्वमभिधाय, ' यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहित ' मिति पुनरप्यस्मिन्निति तमेव दहराकाशं परामृश्य तस्मिन् अस्य उपासकस्येह लोके यत् भोग्यजातमस्ति यच्च मनोरथमात्रगोचरमिह नास्ति, सर्वं तत् भोग्यजातमस्मिन् दहराकाशे समाहितमिति निरतिशयभोग्यत्वं दहराकाशस्याभिधाये " ति ।

न च ' यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहित ' मित्यनेन उपासकभोग्यवस्त्वाधारत्वमात्रमुपास्यस्य प्रतीयते; न तु दहराकाशस्य निरतिशयभोग्यत्वम् । ततश्च " यच्चास्येहास्तीति वाक्येन दहराकाशस्य निरतिशयभोग्यत्वमभिधाये " ति भाष्यं कथमुपपद्यतामिति वाच्यम्—उपासकस्य ब्रह्मप्राप्त्येकफलकस्य स्वर्गपश्वादीनां भोग्यत्वाभावात् , ' यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहित'मित्यनेन दहराकाशस्य निरतिशयभोग्यत्वमेव प्रतिपादितमिति भाष्याभिप्राय इति व्यासार्यैरुक्तत्वान्नास्याः शङ्काया अवकाश इति द्रष्टव्यम् ।

केचित्तु ' स यदि पितृलोककामो भवती ' त्यादिना प्राचीनानेकजन्मसम्बन्धिपित्रादिवर्गादिदृक्षायाः, सङ्कल्पमात्रेण तत्सृष्टत्वस्य च प्रतिपादयिष्यमाणत्वात् , सूत्रकृताऽपि " सङ्कल्पादेव तच्छ्रुते " रिति सूत्रेण तद्वाक्यस्य विवक्षितार्थत्वाविष्करणात्, ' यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभतेऽथ ये चास्येह जीवाः ये च प्रेताः यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दते ' इति नष्टानां पित्रादीनां मुक्तकामनाविषयत्वप्रतिपादनात्, " प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्ते " रिति सूत्रोक्तन्यायेन ब्रह्मविभूतितया नष्टपित्राद्यनुभवस्य कामनाविषयत्वसम्भवाच्च,—अन्यथा ' अस्मिन् कामाः समाहिताः' , ' एतांश्च सत्यान् कामान् ' इत्यादावपि कामशब्दस्य निरतिशयभोग्यार्थकत्वं को वारयेत् । ततश्च ' जक्षत्क्रीड '

[1], अतीव· ख,

तञ्चेद् ब्रूयुः — अस्मिँश्चेदिदं ब्रह्मपुरे सर्वं समाहितँ सर्वाणि च भूतानि सर्वे च कामाः, यदैन (त) जरामा (वा) मोति प्रध्वँसते वा किं ततोऽतिशिष्यत इति (४),

---

न्नित्यत्वापि भोग्यत्वार्थकत्वं स्यादिति परो विजयेत। अतः — अस्य वाक्यस्य यथाश्रुतार्थत्वेऽपि न दोषः। भाष्यमपि भोग्याधारत्वफलितभोग्यत्वपरमेवास्त्विति वदन्ति।

अत्र भूताकाशसदृशवैपुल्यप्रतिपादनेन द्यावापृथिव्यादिजगदाश्रयत्वप्रतिपादनेन उपासकं प्रति निरतिशयभोग्यत्वप्रतिपादनेन च दहराकाशस्य प्रसिद्धाकाशवैलक्षण्यप्रतिपादनात्, 'स्वल्पे दहराकाशे किमपि मातुं न शक्नोती'त्याक्षेपबीजं परिहृतं भवति।

तञ्चेत् — अतिशिष्यत इति। अल्पत्वरूपमाक्षेपबीजं परिहृत्य 'किं तदत्र विद्यत' इति प्रश्नं प्रतिविवक्षत्येवाचार्ये, उक्तेऽर्थेऽनुपपत्तिं पश्यन्तः शिष्याः यद्याचार्यं ब्रूयुः,—किमिति ? ब्रह्मपुरशब्दितं शरीरं द्यावापृथिव्यादिशब्दनिर्दिष्टभोग्यभोगोपकरणभोगस्थानानि[1] अग्निवाय्वादिशब्दनिर्दिष्टो भोक्तृवर्गश्च यद्याश्रयेयुः, तदा शरीरस्य, जरानाशादौ सति द्यावापृथिव्यादिकं किमपि नावशिष्येत। तदपि नश्येदि (दिति—इ ?) त्यर्थः। [[2] **सर्वे च कामा** इत्यस्य 'यचास्येहास्ती'ति वाक्यनिर्दिष्टनिरतिशयभोग्यत्वानुवादित्वात्, 'सर्वे च कामाः' इत्यस्य निरतिशयभोग्यत्वमर्थ इति व्यासार्यैरुक्तम्।]

ननु दहराकाशाश्रितं द्यावापृथिव्यादिकमिति वदन्तं प्रति अस्याः शङ्कायाः कथमुत्थानम्। दहराकाशाश्रितत्वस्यैवोक्तत्वात्[3] ब्रह्मपुरशब्दितशरीराश्रितत्वस्येहानुक्तत्वया तज्जरानाशानुविधायिजरानाशत्वस्य दहराकाशाश्रिते द्यावापृथिव्यादौ कथं प्रसक्तिरिति चेत् — उच्यते। यथा घटाद्यन्तराकाशे निहितस्य दध्यादेर्वस्तुतो घटादिरेव धारकः, आकाशः परमवकाशात्मनोपकरोति, एवं देहान्तर्वर्तिनि दहराकाशे विद्यमानस्य द्यावापृथिव्यादेर्देह एव धारकः, दहराकाशस्तु केवलमवकाशात्मनोपकरोति। अस्तु वा दहराकाशस्य घटाद्याकाशवैलक्षण्येन स्वतो धारकत्वं, तथाऽपि तस्य देहजराप्रध्वंसानुपदभाविजराप्रध्वंसत्वात्, यावद्देहस्य भारधारणानुकूलं बलम् तावत्पर्यन्तमेव दहराकाशस्य तद्धारकत्वमिति फलतो देह एव तस्य सर्वस्य धारकः पर्यवस्यतीति आक्षिपतां शिष्याणामभिप्रायः।

1. अयं ग. पाठः। स्थानं ख. 2. कुण्डलितं न क. कोशे। 3. उक्तया क.

एतज्जरावाप्नोतीति पाठे अत्र कर्माध्याहारः, ध्वंसत इत्यत्र कर्त्रध्याहारश्चेत्यस्ति क्लेशः।

स ब्रूयात् — नास्य जरयैतज्जीर्यति, न वधेनास्य हन्यते; एतत् सत्यं ब्रह्मपुरम् ।

अस्मिन् कामाः समाहिताः । एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः ।

स ब्रूयात् आचार्यस्तत् प्रतिवक्ति —, **नास्य — पुरम्** । भोग्यभोगस्थानभोगोपकरणभोक्तृवर्गादिशालितया पुरमिव वर्तमानमेतद् दहराकाशाख्यं ब्रह्म; न तु घटादिवत् केवलमवकाशात्मनोपकारकम् । यथा पुरं भोग्यभोगोपकरणभोगस्थानादीनां स्वत एवाधारभूतम्; न तु दध्यादीनां घटाकाशादिवदाकाशात्मनोपकारकम्— तथेत्यर्थः । ननु स्वतो धारकत्वेपि तद्देहान्तर्वर्तितया तदन्तर्गतहृदयवत् तज्जरानाशानुविधायिजरानाशत्वं स्यादिति शङ्काबीजं परिहरति — **एतत्सत्यमिति** । **सत्यं** निर्विकारमित्यर्थः । अत एव न देहजरामरणानुविधायिजरामरणकमित्यर्थः । यद्वा 'अथ यत्सत्यदमृत' मित्यस्मिन् प्रकरणे वक्ष्यमाणसत्यशब्दनिर्वचनरीत्या चेतनाचेतननियामकत्वं वा सत्यत्वम् । यथा कथञ्चित् घटाकाशादिविलक्षणाधार इत्यर्थः ।

[केचित्तु 'अस्मिंश्चेदिदं ब्रह्मपुरे' इति प्रश्नवाक्ये **ब्रह्मपुर**शब्देन ब्रह्मरूपपुरत्वाद्दहराकाश एवोच्यते । 'यदैतज्जरावाप्नोतीत्येव पाठः । तत्र च पाठे-- **एतस्य** शरीरस्य जरा **एतज्जरा** यदा दहराकाशं प्राप्नोति, तद्ध्वंसेन ध्वंसते वा, तदा द्यावापृथिव्यादिकं नावशिष्येतेत्येवार्थः । न तु ब्रह्मपुरशब्देन शरीरपरामर्शमभ्युपेत्य तदनुगुणैतादृशाभिप्रायकल्पनपरिक्लेशोऽनुसर्तव्य इति वदन्ति ।]

एवं मध्ये प्रसक्तमाक्षेपं परिहृत्य 'किं तदत्र विद्यत' इति अन्तर्वर्तिविशेषजिज्ञासां शमयति — **अस्मिन् कामाः समाहिताः** । काम्यन्त इति **कामाः** कल्याणगुणाः । को दहराकाशः ? स च कैः कामैर्विशिष्ट इत्याकाङ्क्षायामाह — **एष आत्मा — सङ्कल्पः** । उक्तञ्च भगवता भाष्यकृता — "दहराकाशस्य

ब्रह्म पुरमिवेत्युपमितसमास इति ज्ञापयति **पुरमिवे**ति ।

'जरामाप्नोति प्रध्वंसते वे' ति कृतशङ्कापरिहराय **विजरो विमृत्यु**रित्युक्तम् । नन्वेवं प्राप्तं नित्यत्वं प्रतिकूलमेव, 'वियोगो बान्धवैरायुः' इति रीत्या शोकाद्यावहत्वात् । तत्राह **विशोक** इत्यादि । अत्र सर्वत्रापहतपाप्मत्वं प्रयोजकम् । एवं शरीरान्तःस्थस्यैव, 'अनश्नन्योऽभिचाकशीति' इत्युक्तमनश्नत्वमुपपादितम् । अथाभिचाकशीतीत्युक्तार्थविवरणमिह **सत्यकामः सत्यसंकल्प** इति । एवमस्मिन् संदर्भे सशरीरत्वावस्थायामेवापहतपाप्मत्वायुपपादनात्

काम्यमूतकल्याणगुणविशिष्टत्वं[1] तस्यात्मत्वञ्च 'एष आत्माऽपहतपाप्मे' त्यादिना सत्यसङ्कल्प इत्यन्तेन स्पष्टीकृत्ये" ति । पापजरामरणशोकक्षुत्पिपासावर्जितः सत्यकामः सत्यसङ्कल्पश्चेत्यर्थः ।

परमात्मप्रकरणेषु पापशब्दः सुकृत [2]दुष्कृत साधारणः । 'न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्त' इति सुकृतेपि पापशब्दप्रयोगात्, 'एते वै निरयास्तात स्थानस्य परमात्मनः' इति स्वर्गादीनामपि मुमुक्षवनिष्टत्वेन स्वर्गादिसाधनकर्मणः मुमुक्षून् प्रत्यनिष्टसाधनत्वेन अलौकिकत्वे सत्यनिष्टसाधनत्वलक्षणपापशब्दप्रवृत्तिनिमित्तक्रोडीकृतत्वेन पापशब्दवाच्यत्वावश्यम्भावात् । अपहतपाप्मत्वञ्च [3]न ध्वस्तपाप्मत्वम् । 'नैनं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृत'मिति सुकृतदुष्कृत प्राप्त्यभाव श्रवणात् । तरतेः प्राप्तिवचनत्वात् । तस्मादपहतपाप्मत्वं अश्लिष्टपाप्मत्वमित्यर्थः । अकृतकर्माश्लेषस्य सर्वसाधारणत्वात् कृतेऽपि कर्मणि तत्फलाश्लेष उच्यते । अत ईश्वरेण कृतानि पुण्यपापसजातीयानि कर्माणि न शुभाशुभफलजननशक्तानीत्यर्थः । कृतेऽपि पापे तत्फलजननशक्तिप्रतिभटत्वलक्षणः कश्चिदीश्वरस्य स्वभावविशेषः अपहतपाप्मत्वम् । परिशुद्धात्मविषयस्यापहतपाप्मत्वस्याप्ययमेवार्थः । स तु तस्य तिरोधानार्हैः प्रतिबन्धनिवृत्तावाविर्भवति, ईश्वरस्य तु तिरोधानानर्हो नित्याविर्भूत इति विशेष इति व्यासार्यैः "अन्तस्तद्धर्मोपदेशा" दित्यत्र वर्णितः (?) ।

अत्र सत्यकामशब्दो न कामनायाः सत्यत्वपरः; अमोघाशत्वस्य सत्यसङ्कल्पशब्देनैव सिद्धत्वात् । नापि काम्यत इति व्युत्पत्या गुणमात्रपरः; कतिपयगुणान्तराणां पृथगुक्तेः । अतो भोग्यभोगोपकरणभोग्यस्थानरूपाः नित्याः कामा अस्य[4]

1. तस्यात्मत्वञ्चेति क. पाठ । 2 दुष्कृतेत्यधिकं क. कोशे । 3. अनध्यस्तपाप्मत्वं. ख. 4. अस्येत्यधिकं क. कोशे.

जीवे तेषामाविर्भूतस्वरूपत्वदशानन्तरभावितया प्रकृतशरीरान्तर्वर्तित्वदशायामुपवर्णनायोगात् परमात्मैवेहोक्तः न जीव इति स्थितं दहराधिकरणे । अतः शरीरस्थितस्यैवेदृशाकारकथनात् न जीव इह विवक्षितुमर्हः । प्रजापतिविद्यायां तु जीवस्वरूपं तात्त्विकमीदृशम्; परंज्योतिरुपसंपद्याविर्भवतीत्युक्तम् । तेन अपहतपाप्मत्वादिविपरीतेन पाप्माद्यहतत्वादिना आकारेणेह युक्तोऽयं मुक्तश्चेत् — तदाऽस्य, तस्य परस्यानुकृतेः कामरूपिणोऽनेकधाभावे इदमपहतपाप्मत्वादिकं सम्यक् कार्यकरं भविष्यतीति निरूपितं भवति ।

यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति । ५ ॥ तद्यथेह कर्म-

---

सन्तीत्युच्यते । 'तदक्षरे परमे व्योमन्' इत्युक्तनित्यविभूतिविशिष्टत्वं सत्यकाम-शब्दार्थ इति **व्यासार्यैरुक्तम्** । **वेदार्थसङ्ग्रहे भाष्यकृताऽप्युक्तम्** — सत्य-सङ्कल्पः अप्रतिहतसङ्कल्प इति ।

यथा —जीवन्ति—इह अस्मिन् लोके प्रजाः यथानुशासनं राजशासना-नुल्लङ्घनेन राजानमन्वाविशन्ति अनुसरन्तीत्यर्थः । अनुसृत्य किं कुर्वन्तीत्यत्राह **यं यमन्तमभिकामा भवन्ति**— । कर्मणः फलापवर्ग(र्गि)त्वात् फलमेव कर्मणोऽन्तः । [1]'यं यमन्तं यद्यत् फलमभिकामा अभ्यर्थिनो भवन्ति, जनपदक्षेत्रादिकं वा कामयन्ते तत्तत् फलं यथाशासनमेवोपजीवन्ति । राजशासनानुरोधेनैवेह लोके यथोपजी-वन्ति, तथा परलोकेऽपि परतन्त्रा एव भवन्तीति भावः । यद्वा यं यमन्तमभि-कामा भवन्ति, तं तमिह लोके यथा प्रजा अन्वाविशन्ति = राजानमनुसृत्य लभन्ते, तथा परलोकेऽप्युपजीवन्तीत्यर्थः । [अयमेवार्थो **व्यासार्यैर्वर्णितः** ।]

1. यं यमित्यादि यद्वेत्यन्तस्थाने **क.** कोशे, 'यज्जनपदादिफलं कामयन्ते, त् यथा-राजशासनमिह लोके यथोपजीवन्ति, तथा परलोकेपि परतन्त्रा एव भवन्तीत्यर्थः । यद्वा' इति ।

कर्मणः फलापवर्गित्वादिति । नन्वस्मिन् व्यासार्याभिमतार्थे, यंयमन्तमभिकामो भवति,' 'यं कामं कामयते' इति वक्ष्यमाणवाक्ये पौनरुक्त्यं स्यात् । अतः **अन्तपदं** देशपर-मिति चेन्न — तदापि कामपदेनैव सर्वग्रहणसंभवात् पौनरुक्त्यानपायात् । **यंयमिति** वीप्सया अतिमहत् अल्पं वेति विवक्षितमिति ज्ञापनाय **यं जनपदं यं क्षेत्रभागमिति** तद्विवरणम् । अन्तशब्दप्रयोगः फलस्येदृशस्य अन्तवत्त्वमशाश्वतत्वं दर्शयितुम् । (मुक्तानुबुभूषितपितृलोका-देरप्यन्तवत्त्वात् ।) "अन्तवत्फलावाप्तिम्" इति च श्रीभाष्यम् ।

व्यासार्यैरिति । **यंयमिति** वाक्यस्य **उपजीवन्ति**ति वाक्येनैकवाक्यता प्राक् स्वयमुक्ता; **अन्वाविशन्ति**त्यनेनैकवाक्यता व्यासार्योक्तित्येष एव विशेषः । **तथा परलोकेऽप्युप-जीवन्ति**ति स्वयमर्थसिद्धकथनम् । श्रुतौ तु, यथा प्रजाः अन्वाविशन्ति, तथा ताः राजदत्तं फलं लभन्ते इत्यर्थो व्यासार्यविवक्षितो **भावप्रकाशिकोक्तः** । **एवमेव व्यासार्यैरि**त्यादेरय-मान्तराशयः स्यात् — 'मूले **इह प्रजा अन्वाविशन्ती**त्युक्तस्य श्रुत्यैव विवरणम् **यथानु-शासनमि**त्यादिना **लभन्त** इत्यन्तेन । **अन्वाविशन्ती**त्यत्र अनुसन्दार्थविवरणं यथानुशासन मिति पदेन । तेन वक्ष्यमाणसत्यसंकल्पत्वोपयोगि परसंकल्पाधीनत्वकथनम् । **यथा ह्येवेह,**

चितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते । तद्य इहात्मानमननुविद्य व्रजन्त्येताँश्च सत्यान् कामान्, तेषां सर्वेषु लोकेष्वकामचारो भवति ।

अथ य इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामान्, तेषाँ सर्वेषु लोकेषु कामचारो भवति ॥ ६ ॥

इति अष्टमाध्याये प्रथमः खण्डः ।

एवं कर्मसाध्ये परलोके पारतन्त्र्यमुक्त्वा क्षयिष्णुत्वमप्याह **तद्यथेह — क्षीयते** — राजसेवादिकर्मणा **चितः** [1]अर्जितो लोको यथा क्षीयते, एवमेव **अमुत्र** परलोकेऽपि **पुण्यचितः** पुण्यसम्पादितो लोकः क्षीयत इत्यर्थः । **तद्य इह — भवति** । यस्मात् सुकृतसाध्येषु परलोकेषु पारतन्त्र्यक्षयिष्णुत्वादिकम्, तस्माद्य उक्तमात्मानमेतम्, अपहतपाप्मत्वादीनेताँश्च **सत्यान्** नित्यान् काम्यमानान् कल्याणगुणाँश्चानुपास्य परलोकं व्रजन्ति तेषां सर्वलोककामचाराभावः । पारतन्त्र्यमिति यावत् ।

अथ—भवति । ये तु आत्मानमपहतपाप्मत्वादींश्च काम्यमानान् कल्याणगुणान् उपास्य परलोकं व्रजन्ति, ते ब्रह्मविभूतिभूतान् विकारलोकान् अनुभूय यथाकामं तृप्ताः न पारतन्त्र्यमनुभवन्तीत्यर्थः ।

नन्वपहतपाप्मेत्यादिवाक्ये[2] अपहतपाप्मत्वादिधर्माणां स्वातन्त्र्येणानुपस्थितानां कथम् **एतानित्यनेन** परामर्शः । न च गत्यभावात्तेषामेव परामर्श इति वाच्यम् — 'यच्चास्येहास्ति' इति वाक्ये निर्दिष्टस्य 'सर्वाणि च भूतानि सर्वे च कामाः' इति बहुवचनान्तकामशब्देनानूदितस्य निरतिशयभोग्यत्वस्यैव "अस्मिन् कामाः समाहिताः"; 'एतांश्च सत्यान् कामान्' इत्यत्रापि निर्देशोऽस्त्विति चेन्न — तथासति 'अपहतपाप्मा विजर' इत्याद्युपन्यासस्य वैयर्थ्यप्रसङ्गात् । कामानित्यस्य भोग्यत्व-

1. आर्जितः. क 2. वाक्येषु. क.

तद्यथेह इति यथाशब्दद्वयप्रतिनिर्देशः **एवमेवामुत्रेति** । **अमुत्रेत्येतदनन्तरम्, इह प्रजा अन्वाविशन्ती**ति वाक्यात् प्रजा अन्वाविशन्तीत्यस्यानुषङ्गोऽर्थसिद्धः । **कर्मचित** इत्यादेर्दार्ष्टान्तिकांशः पुण्यचित इत्यादिः' इति योजनाऽपि भवितुमर्हतीति ।

अत्र, 'तंतंलोकं जयते तांश्च कामान्' इति रीत्या जिधातुप्रयोग एव बहुलं श्रुताविति '**कर्मजितः**,' 'पुण्यजित' इति श्रुतिपाठं रोचयन्ते ।

आत्मानुवेदनं कामान्तररूपक्षुद्रफलकामचारकारणमपीति, **एतांश्च सत्यान् कामान्** इत्यधिकमुक्तम् । अकामचार इति असत्यसंकल्पत्वमुक्तं भवति । स्वसंकल्पाधीनस्वाभिमतसिद्धिमत्त्वरूप सत्यसंकल्पत्वं परमात्मनि कैमुत्येन ज्ञाप्यते मुक्तविषयेण **स यदि पितृलोककाम** इत्यादिना ।

परत्वे बहुवचनासङ्गतेश्च अपहतपाप्मत्वादय एव 'एतांश्च सत्यान् कामा' निति कामशब्देन निर्देश्याः । भोग्यत्वहेतुपितृलोकादिविषयपरत्वे 'सत्या' इति कामानां नित्यत्वकथना (नस्या) सम्भवादिति सिद्धम् ।

ततश्च 'दहरोस्मिन्नन्तराकाश' इति आकाशशब्दनिर्दिष्टः परमात्मा न भूताकाशः; 'तस्मिन् यदन्त' रिति निर्दिष्टमपहतपाप्मत्वादिगुणजातमितीयता सन्दर्भेणोपदिष्टं भवति ।

(१) एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते । अत्र दहराकाशो भूताकाशः । आकाशशब्दस्य तत्रैव प्रसिद्धेः । व्यापके परमात्मनि दहरत्वस्याभावाच्च, 'तस्मिन्यदन्त' रित्यन्वेष्टव्यान्तराधारतया[1] निर्देशाच्च । न हि परमात्मनः स्वयमेवान्वेष्टव्यस्यान्वेष्टव्यान्तराधारत्वं सम्भवति । 'यावान्वा अय' मित्यादिना निर्दिश्यमानभूताकाशोपमेयत्वस्य 'गगनं गगनाकार' मित्यादिवदभेदेऽप्युपपत्तेः, निरतिशयविपुले परमात्मन्यपि परिच्छिन्नभूताकाशोपमेयत्वस्यास्वरसत्वाच्च भूताकाशो दहराकाश इति पूर्वपक्षे प्राप्ते – उच्यते —

"दहर उत्तरेभ्यः" । [उत्तरेभ्यो हेतुभ्यः] दहराकाशः परमात्मा, वाक्यशेषगतभूताकाशोपमेयत्व - सर्वाधारत्व - निरतिशयभोग्यत्व - निरुपाधिकापहतपाप्मत्वादिगुणानां परमात्मव्यतिरिक्ते भूताकाशे असम्भवात्, परमात्मनोऽप्यपहतपाप्मत्वादिलक्षणान्वेष्टव्यान्तराधारत्वसम्भवाच्च । न च गगनं गगनाकारमितिवदभेदेऽप्युपमानोपमेयभावोऽस्विति वाच्यम् — गगनं गगनाकारमित्यादावभेदे सादृश्यं निबध्यमानमनन्वितत्वादनुपमकत्वफलकं सत् अनन्वयालङ्काररूपम् । न चेह तथा सम्भवति । 'यावान्वा अयमाकाशः' इति वाक्ये बाह्याकाशत्वहार्दाकाशतारूपोपमानोपमेयतावच्छेदकधर्मभेदसत्त्वेन अनन्वयस्यासंभवात् । उपमानोपमेयतावच्छेदकधर्मैक्ये ह्यनन्वयालङ्कारः, यथा, गगनं गगनाकारमित्यादौ । यच्चोक्तम् — अतिविपुलस्य ब्रह्मणः परिच्छिन्नभूताकाशोपमेयत्वं न सम्भवतीति—तन्न—अधिकजवेऽपि सवितरि इषुवद्गच्छति सवितेति गतिमान्द्यनिवृत्तिपरवचनवत् स्वल्पत्वनिवृत्त्यर्थतया भूताकाशसादृश्यकथनस्योपपत्तेः ।

यदुक्तमाकाशशब्दस्य भूताकाशे प्रसिद्धत्वादिति, तत्राह — "प्रसिद्धेश्च" । 'यदेष आकाश आनन्दो न स्यात्' इत्यादौ परमात्मन्यप्याकाशशब्दस्य प्रसिद्धत्वात् ।

1. धारत्वनिर्देशाच्च, ख.

यदुक्तम्— परमात्मनोऽल्पपरिमाणत्वं नोपपद्यत इति, तत्राह, "अल्पश्रुतेरिति चेत्—तदुक्तम्"। शाण्डिल्यविद्यायाम्, "निचाय्यत्वादेवं व्योमवच्च" इति सूत्रखण्डेनोपासनार्थं विपुलस्याल्पत्वोपदेश उपपद्यत इति पूर्वमेवोक्तमित्यर्थः।

(२) तथा "प्रदानवदेव तदुक्त"मित्यत्र, 'इहात्मानमनुविद्य व्रजन्ति'इति दहराकाशोपासनमुक्त्वा, एतांश्च सत्यान् कामानित्यपहतपाप्मत्वादिगुणानामुपासनस्य पृथगाम्नानात् अपहतपाप्मत्वादिगुणोपासनदशायां न धर्मिस्वरूपं चिन्तनीयम्। ततश्च प्रथमं दहराकाशाख्यं धर्मिस्वरूपमनुसन्धाय तस्यापहतपाप्मत्वविजरत्वविमृत्युत्वविशोकत्वविजिघत्सत्वापिपासत्व सत्यकामत्वसत्यसङ्कल्पत्वरूपाः कामा इत्येव चिन्तनीयम्। न तु अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इति गुणाश्रयस्य गुणिनोऽपि चिन्तनमिति पूर्वपक्षे प्राप्ते—उच्यते—"प्रदानवदेव तदुक्तम्"। यद्यपि दहराकाश एवापहतपाप्मत्वादिगुणानां गुणी। स च प्रथमं चिन्तितः—तथाऽपि स्वरूपमात्राद्गुणविशिष्टाकारस्य भिन्नत्वात्, प्रकृते च 'अस्मिन् कामाः समाहिता'इति ब्रह्मणि कामसमाधानाधारत्वमुक्त्वा, के ते कामा इत्याकाङ्क्षायां निष्कृष्यापहतपाप्मत्वं विजरत्वमित्यनुक्त्वा अपहतपाप्मा विजरो विमृत्युरिति तद्विशिष्टविशेष्यपर्यन्ततया निर्देशात् अनेनैवाकारेणानुसन्धानं कर्तव्यमिति श्रुतेराशय उन्नीयते। अतो वैशिष्ट्यानुसन्धानार्थं विशेष्यचिन्तनमप्यावर्तनीयम्। प्रदानवत्। तदुक्तं सङ्कर्षे—"नाना वा देवतापृथक्त्वा"दिति। तत् नानाप्रदानाधिकरणमित्थम्—

अस्ति त्रैधातवीयेष्टिः, 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायाधिराजायेन्द्राय स्वराज्ञे' इति त्रिपुरोडाशा। तत्र तेषां पुरोडाशानां [पाकानन्तरं पात्रे निधानदशायां] उपर्युपर्यधिश्रयणं सर्वेषां युगपदवदानञ्च विहितम्। तेषां पूर्वार्धावदानं प्रकृतिवत् कर्तुं शक्यम्। तथापि मध्यादवदानं कर्तुमशक्यम्। पुरोडाशानां मध्ये नलकप्रवेशाद्युपायेन मध्यादपि युगपदवदानं ग्राह्यम्। एवं स्थिते, 'प्रदानमपि युगपत् कर्तव्यम् क्रमेण वे'ति संशये "तेषामपृथक्प्रदानमवदानैकत्वा" दिति सूत्रेण, 'अवदानवत् प्रदानमपि युगपदेव कर्तव्य'मिति पूर्वपक्षः। तत्रेदं सिद्धान्तसूत्रम्, "नाना वा देवतापृथक्त्वात्" इति। त्रयाणां यागद्रव्याणां भेदाद्विशिष्टरूपाणां देवतानाञ्च भेदात् त्रिभिर्द्रव्यदेवतासम्बन्धैः कल्प्यानाञ्च यागानां तत्तद्देवतोद्देशेन क्रमिकाणि प्रदानानि कर्तव्यानीति सूत्रार्थ इति स्थितम्। प्रकृतमनुसरामः। ८-१.

1, कार्यमिति. ख.

८—२

स यदि पितृलोककामो भवति, सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति । तेन पितृलोकेन संपन्नो महीयते ॥ १ ॥

अथ यदि मातृलोककामो भवति, सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति । तेन मातृलोकेन संपन्नो महीयते ॥ २ ॥

अथ यदि भ्रातृलोककामो भवति, सङ्कल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति । तेन भ्रातृलोकेन संपन्नो महीयते ॥ ३ ॥

अथ यदि स्वसृलोककामो भवति, सङ्कल्पादेवास्य स्वसारः समुत्तिष्ठन्ति । तेन स्वसृलोकेन संपन्नो महीयते ॥ ४ ॥

अथ यदि सखिलोककामो भवति, सङ्कल्पादेवास्य सखायः समुत्तिष्ठन्ति । तेन सखिलोकेन संपन्नो महीयते ॥ ५ ॥

स यदि — महीयते । सः मुक्तस्सन् यदि प्रचीनानेकजन्मसम्बन्धिपितृवर्गं दिदृक्षेत, तदा पितृवर्गः एतस्य सङ्कल्पमात्रात् समुत्थितो भवति । तेन सहितः पूज्यते इत्यर्थः ।

सः मुक्त इति । ननु **तेषा**मिति मुक्तानां बहुवचनेन निर्देशात् इह **स** इत्येकवचनायोगात् परमात्मैव गृह्यताम् । पितृलोककाम इत्यस्य च दशरथवसुदेवाद्यपूर्वं पितृकाम इत्यर्थः । न तु प्राचीनस्वपितृलोकेति रीत्यैव । तथाच परमात्मनिष्ठं सत्यसंकल्पत्वं प्रकृतमेवेह वर्ण्यतामिति चेन्न — **सर्वेषु लोकेषु कामचारो भवती**त्येतद्विवरणरूपत्वौचित्याय मुक्तपरत्वस्वीकारात् । बहुत्वेन प्रक्रमेऽपि पित्रादिरूपबन्धुवर्गस्य तत्तन्मुक्तं प्रति भिन्नतया तु प्रत्येकजिघृक्षया **स** इति निर्देशः । अतः, 'भावे जाग्रद्वत्' इति सूत्रोक्तरीत्या मुक्तविषयमेवेदमिति । **दिदृक्षेते**ति । नेयं प्राचीनपित्रादिदिदृक्षा भूतानां तेषां भूतत्वेन रूपेण । मुक्तस्याविर्भूतस्वरूपस्य स्वतः सर्वदर्शनसत्त्वेन दिदृक्षाया अयोगात्; तस्य तदधीनत्वाभावाच्च । अतो दर्शनं वर्तमानार्थसाक्षात्काररूपं लोकप्रसिद्धमिति अतीतपित्रादीनां सृष्ट्वा स्वपितृत्वादिरूपेण वर्तमानतया दर्शनेच्छारूपा दिदृक्षा विवक्षिता । तथाचाभिमतपित्रादिव्यक्तीनां सद्भावे, मुक्तः तत्पुत्रत्वादिरूपेण स्वसृष्टिं संकल्पयते । तासामतीतत्वे, तत्सृष्टिपूर्वकं तत्पुत्रादिरूपेण स्वस्य भवनं संकल्पयते इत्युक्तं भवति । अत्र पितृवर्गं दिदृक्षेतेत्येतावदनुक्त्वा **प्राचीनानेके**त्यादिकथनं, 'ये चास्येह जीवाः ये च प्रेताः' इति वक्ष्यमाणैकरूप्याय । प्राचीनानां नष्टानामुत्थानं नाम तेषां चेतनानां तज्जातीयशरीरपरिग्रहेण प्रादुर्भावः । लोक्यत इति **लोकः** अनुभाव्यपदार्थः । एतद्वात्वर्थज्ञापनायैव **दिदृक्षा**पदप्रयोगो भाष्ये ।

अथ यदि गन्धमाल्यलोककामो भवति, सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतः । तेन गन्धमाल्यलोकेन संपन्नो महीयते ॥ ६ ॥

अथ यद्यन्नपानलोककामो भवति, सङ्कल्पादेवास्य अन्नपाने समुत्तिष्ठतः । तेनान्नपानलोकेन संपन्नो महीयते ॥ ७ ॥

अथ यदि गीतवादित्रलोककामो भवति, सङ्कल्पादेवास्य गीतवादित्रे समुत्तिष्ठतः । तेन गीतवादित्रलोकेन संपन्नो महीयते ॥ ८ ॥

अथ यदि स्त्रीलोककामो भवति, सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति । तेन स्त्रीलोकेन संपन्नो महीयते ॥ ९ ॥

यं यमन्तमभिकामो भवति, यं कामं कामयते, सोऽस्य सङ्कल्पादेव समुत्तिष्ठति । तेन संपन्नो महीयते ॥ १० ॥

इति अष्टमाध्याये द्वितीयः खण्डः ।

अथ — .... महीयते । सर्वं पूर्ववत् ।

यं यमन्तं–महीयते । यं यमन्तं फलम् । यं यं **कामं** इष्टं कामयते स सर्वोऽस्य सङ्कल्पादेव समुत्तिष्ठतीत्यादि पूर्ववत् ।

एतत्खण्डान्तर्गतवाक्यविषयकमधिकरणमुपन्यस्यते । अत्र सत्यसङ्कल्पत्वेन व्यवह्रियमाणानामपि राजादीनामभिलषितसृष्टेः प्रयत्नान्तरापेक्षत्वदर्शनात् मुक्तस्यापि सिसृक्षितपितृलोकादिसृष्टिः सङ्कल्पव्यतिरिक्तप्रयत्नान्तरसापेक्षैवेति प्राप्ते — उच्यते — "**सङ्कल्पादेव तच्छ्रुतेः**" । सङ्कल्पमात्रादेव सृष्टिः, न प्रयत्नान्तरसापेक्षा कुतः ? '**सङ्कल्पादेव पितरः समुत्तिष्ठन्ती**'त्येवकारश्रुतेः । न चैवकारस्यायोगव्यवच्छेदकत्वमत्यन्तायोगव्यवच्छेदकत्वं वाऽर्थः । विशेषणक्रियासङ्गतैवकारयोरेव अयोगात्यन्तायोगव्यवच्छेदकत्वेन एतस्य चातथात्वेन अन्ययोगव्यवच्छेदकत्वस्यैव युक्तत्वात् । "**अत एव चानन्याधिपतिः**" । एतच्च सूत्रं पूर्वमेव व्याकृतम् । अतः पित्रादीनां सङ्कल्पमात्रसाध्यत्वं स्थितम् । प्रकृतमनुसरामः ॥ ८–२.

ननु स यदि पितृलोककाम इत्यादिकमैहिकफलं स्यात् परमात्मानुवेदनस्य; '**अहरहर्वा एवंवित् स्वर्गमेति**' इति कृत्स्नोपासनफलस्य पश्चाद् वक्ष्यमाणत्वादिति चेन्न — '**आत्मानमनुविद्य व्रजन्ती**'ति, '**तदत्र गत्वा विन्दते**' इति च गत्यनन्तरभावित्वोक्त्या तदयोगात् । **अहरहः**रिति वाक्यं तु प्रकृतस्योपासनस्यैवाहरहरनुष्ठेयत्वविधायकमिति ।

८—३

त इमे सत्याः कामा अनृतापिधानाः। तेषाँ सत्यानाँ सतामनृतमपिधानम्। यो यो ह्यस्येतः प्रैति, न तमिह दर्शनाय लभते।

अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते, सर्वं तदत्र गत्वा विन्दते। अत्र ह्यस्यैते सत्याः कामा अनृतापिधानाः।

त इमे — अपिधानम्। परमात्मनिष्ठा इमे सत्या अपहतपाप्मत्वादयः कामाः। अनृतापिधानाः अनृतमपिधानं येषां ते **अनृतापिधानाः** अनृताच्छादिताः। " ऋतेतरविषयो ह्यनृतशब्दः। ऋतमिति कर्मवाचि। ऋतं = कर्मफलाभिसन्धिरहितं परमपुरुषाराधनवेषं तत्प्राप्तिफलम्। अत्र तद्व्यतिरिक्तफलं सांसारिकफलं कर्म **अनृतं** ब्रह्मप्राप्तिविरोधी " ति **महासिद्धान्ते भाषितम्।** तेषां सत्यानां **सतां** विद्यमानानामेव कर्म आच्छादकम्। ततश्च स्वात्मभूतपरमात्मगता अपहतपाप्मत्वादयो धर्माः कर्मरूपाविद्यातिरोहितत्वान्न भासन्त इत्यर्थः। **योयो — लभते।** अस्य उपासकस्य योयो बन्धुवर्गः इतः प्रैति, न स इह द्रष्टुं शक्य इत्यर्थः।

अथ–विन्दते–अस्य(थ?) तु ये जीवन्तो नष्टाश्च बन्धवः, अलभ्याश्च मनोरथाः, तत् सर्वं दहराकाशं परमात्मानं प्राप्य लभते। अत्र ' यच्चास्येहास्ति यच्च नास्ती'ति वाक्यसमानार्थत्वादस्य वाक्यस्य, मुक्तस्य [सर्वतोविरक्तस्य] प्राप्यान्तरासम्भवात्, निरतिशयभोग्यत्वमेवार्थः। **अत्र—अनृतापिधानाः।** यत उपासकस्य काम्यमानाः भोग्यभूताः अपहतपाप्मत्वादय एतन्निष्ठाः पूर्वमनृतशब्दितकर्माच्छादिताः इदानीं दहराकाशं प्राप्तस्याविर्भवन्ति, अतो निरतिशयभोग्यत्वमित्यर्थः।

ऋतं कर्मफलाभिसंधिरहितमिति। अत्र ऋतशब्दार्थविचारः **परमार्थप्रकाशिकायां** कृत एव। अत्रापि किञ्चिदुच्यते—**ऋतं** सत्यं तात्त्विकाकारविशिष्टम्। ' प्रत्ययार्थश्च मोक्षस्य सिद्धयः संप्रकीर्तिताः ' इति न्यायेन वस्तुतो भगवत्प्रीत्यर्थमेव कर्तव्यानां कर्मणां क्षुद्रफलार्थमन्यदेवताराधनत्वमौपाधिकमिति फलाभिसंधिरहितत्ववेषेणैव कर्म सत्यम्, काम्यत्ववेषेण चानृतमिति। न केवलं सत्याः कामाः, तदाधारः परमात्मापि अनृतप्रत्यूढैरस्माभिरप्राप्य एवेत्याह **तद्यथे**ति।

तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति; अनृतेन हि प्रत्यूढाः ॥

हिशब्दो हेतुपरः । **तद्यथा—न विन्दन्ति** । यथा अधस्तान्निक्षिप्तं हिरण्यनिधिं **अक्षेत्रज्ञाः** निधिमत्क्षेत्रस्वभावविज्ञानहीनाः निधेरुपर्युपरि सञ्चरन्तोपि निधिं न लभन्ते, एवमेवेमाः सर्वाः प्रजाः सुषुप्तिकाले अहरहर्गच्छन्त्यः सुषुप्तौ, 'सति संपद्य न विदु' रित्युक्तरीत्या अविभागं गच्छन्त्यः **एतं** दहराकाशाख्यं ब्रह्मलोकं **न विन्दन्ति न** लभन्ते = न जानन्तीत्यर्थः । ब्रह्मलोकशब्दौ निषादस्थपतिन्यायेन समानाधिकरणौ । तत्र हेतुमाह — **अनृतेन हि प्रत्यूढाः** । **प्रत्यूढाः** प्रतीपं नीताः । स्वभावान्तरं प्रापिताः । आच्छादिता इति यावत् । यद्वा **अहरहर्गच्छन्त्य** इति न सुषुप्तिकालीनं गमनमुच्यते, अपित्वन्तरात्मत्वेन सर्वदा वर्तमानस्य दहराकाशस्य हिरण्यनिधिवत् परमपुरुषार्थभूतस्य उपर्युपर्यहरहर्गच्छन्त्यः सर्वस्मिन् काले वर्तमानाः तमजानत्यः तं न विन्दन्ति=न लभन्त इत्यर्थः । अर्थद्वयमपि **भाष्यकृता** वर्णितम् "गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्चे" ति सूत्रे ।

सूत्रस्य चायमर्थः—'तद्यथा हिरण्यनिधिं निहित'मिति अहरहः सर्वेषां क्षेत्रज्ञानां गमनात्, ब्रह्मलोकशब्दाच्च दहराकाशो ब्रह्मेत्यवसीयते । तथा ह्यन्यत्र सुषुप्तिकालीनगमनब्रह्मलोकशब्दौ ब्रह्मविषयावेव दृष्टौ, 'एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः', 'एष ब्रह्मलोकः सम्राडिति होवाचे' ति । मा भूदन्यत्र सुषुप्तिकाले ब्रह्मणि गमनदर्शनम्; एतदेव तु दहराकाशे सर्वेषां क्षेत्रज्ञानां प्रलयकाल इव निरस्तनिखिलदुःखानां सुषुप्तिकालेऽवस्थानं ब्रह्मव्यतिरिक्तेष्वसम्भावितं दहराकाशस्य परब्रह्मत्वे लिङ्गम् । **भाष्ये** एवमेकां व्याख्यां कृत्वा, "अथवा अहरहर्गच्छन्त्य इति न सुषुप्तिविषयं गमनमुच्यते । अपित्वन्तरात्मत्वेन सदा वर्तमानस्य दहराकाशस्य परमपुरुषार्थभूतस्य उपर्युपर्यहरहर्गच्छन्त्यः सर्वस्मिन् काले वर्तमानाः तमजानत्यः तं न विन्दन्ति=न लभन्ते । यथा हिरण्यनिधिं निहितं तत्स्थानमजानानाः तदुपरि सर्वदा वर्तमाना अपि न लभन्ते, तद्वदित्यर्थः । सेयमेवान्तरात्मत्वेनावस्थितस्य दहराकाशस्योपरि तन्नियमितानां सर्वासां प्रजानां सर्वदा गतिरस्य दहरा-

स वा एष आत्मा हृदि । तस्यैतदेव निरुक्तँ हृद्ययमिति । तस्माद्धृदयम् । अहरहर्वा एवंवित् स्वर्गं लोकमेति ।

काशस्य परब्रह्मतां गमयति । तथा ह्यन्यत्र परब्रह्मणोऽन्तरात्मतयाऽवस्थितस्य स्वनियाम्याभिः स्वस्मिन् वर्तमानाभिः प्रजाभिरवेदनं दृष्टम् । यथा अन्तर्यामिब्राह्मणे, 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेदे' ति, 'अदृष्टो द्रष्टा अश्रुतः श्रोते' ति च । मा भूदन्यत्र दर्शनम् । स्वयमेव स्विय निधिदृष्टान्तावगतपरमपुरुषार्थभावस्यास्य हृदयस्थस्योपरि तदाधारतया अहरहः सर्वासां प्रजानामजानतीनां गतिरस्य परब्रह्मत्वे पर्याप्तं लिङ्गम्'इति व्याख्यातम् । सुषुप्तिकालीनगमनविषयपूर्वव्याख्यायां 'उपर्युपरी' त्यस्य दृष्टान्त एवान्वयः, न दार्ष्टान्तिके; सुषुप्तिकाले एकीभावसद्भावेऽपि उपरिगमनाभावात् । अन्तर्यामिविषयद्वितीयव्याख्यायां तु अन्तर्यामिण उपरि सर्वदा गतिसत्त्वात् उपर्यपरीत्यस्य दार्ष्टान्तिकेऽप्यन्वयो द्रष्टव्यः ।

[अत्र **व्यासार्यैः**, "अन्तर्यामिविषयतया व्याख्याने अन्तर्यामिण्यहरहर्गमनस्य दहराकाशपरब्रह्मत्वसाधकत्वमयुक्तम् । उपासकानुग्रहावस्थितो हि दहराकाशः; अन्तरात्मतया स्थितो ह्यस्याधारः, तयोः रूपभेदात्" इत्याशङ्क्य धर्म्यैक्याभिप्रायेणैवमुक्तमिति परिहृतम् ।]

पूर्वोक्तं हृदयान्तर्वर्तित्वं स्मारयति—**स वा—हृदि** । अन्तर्वर्तत इति शेषः । हृदयनामनिर्वचनादपि आत्मनो हृद्वत्तत्वं सिध्यतीत्याह—**तस्य—हृदयम्** । **तस्य** एतस्य हृदयस्य । हृदि अयमात्मा वर्तत इति हि हृदयशब्दनिरुक्तमिति भावः । **अहरह—मेति** । **अहरहः** प्रत्यहमाप्रयाणं **एवंवित्** एतादृशदहराकाशोपासननिष्ठः **स्वर्गं** सुखरूपं **लोकं** लोक्यमानं ब्रह्म प्राप्नोतीत्यर्थः । ब्रह्मोपासननिष्ठस्य तत्क्रतुन्यायेन ब्रह्मप्राप्तेरेव वक्तव्यतया प्रसिद्धस्वर्गलोकप्राप्त्यसम्भवादिति द्रष्टव्यम् ॥

हृदयस्येति । यद्यप्यत्र यथा दहराकाशशब्दः हृदयाकाशवाचकत्वार्होऽपि इह परमात्मपर एव, तथा हृदयशब्दो हृन्मात्रवाच्यपि 'हृदि अयम्' इति हृदयमिति व्युत्पत्त्या परमात्मपरः । नन्वेवं हच्छब्दस्य इदंशब्दस्य चायं समास इति प्राप्नोति । तथाचानेन किं हृदिदन्त्वरूपधर्म उच्यते, उत हृदयत्वरूपधर्म इति चेत् + न – हृदयमिति पदवाच्यत्वस्यैवानुसंधेयाकारतया अन्यविचारवैयर्थ्यात् । अस्तु वा 'अय गतौ' इत्यतः अयमिति निष्पत्तिरित्यलम् । स्वर्गं लोकमेतीत्येतच्च उपरि सत्यशब्दनिर्वचन इव अङ्गिफलनिर्देशरूपम् । तथाचापहतपाप्मत्वसत्यत्वादिवत् उक्तरीत्या हृदयशब्दवाच्यत्वमप्युपास्याकार इति प्रतीयते—अथापि परमात्मनि हृदयशब्दप्रयोगस्य क्वाप्यदर्शनात् हृत्परतयैव निर्वचनमिदं व्याख्यातमिव ।

अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति ।

कथं ब्रह्मप्राप्तिः, प्राप्तस्य वा ततः किं भवतीत्यत्राह—**अथ**—**निष्पद्यते**। **अथ**शब्दः प्रकृतापेक्षत्वद्योतकः । संप्रसादशब्दः सुषुप्तिस्थानवचनस्सन् तत्सम्बन्धात् जीवं लक्षयति । एष सम्प्रसादः 'अहरहर्वा एवंवि' दिति पूर्ववाक्ये निर्दिष्ट उपासको जीवः **अस्मात्** हेयतया परिदृश्यमानाच्छरीरादुत्क्रम्य देशविशेषनिष्ठं परमात्मानं प्राप्य स्वेन रूपेणाभिनिष्पद्यते इत्यर्थः । अस्य वाक्यस्यार्थः प्रजापतिविद्यायां विशिष्य वक्ष्यते । **एष — ब्रह्मेति** । एष आत्मा एतदमृतमभयमेतदित्यत्रैतच्छब्दाः पूर्ववाक्ये 'परंज्योतिरुपसम्पद्ये' ति प्राप्यतया निर्दिष्टपरज्योतिश्शब्दितब्रह्मपराः, प्राप्यतया प्राधान्यादव्यवहितत्वाच्च ।

ननु 'प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत्" इत्यत्र विभक्त्यैकरूप्यात् व्यवहितस्यापि प्रजापतेः स इत्यनेन ग्रहणं दृष्टम्, न त्वव्यवहितस्य सम्प्रदानत्वेन प्रधानस्य वरुणस्य ग्रहणमित्युक्तं मीमांसकैः । 'आकाशाच्चन्द्रमसमेष सोमो राजे' त्यत्र एतच्छब्दस्य नाव्यवहिताभिसम्भाव्यचन्द्रमःपरामर्शित्वं दृष्टम्; अपित्वभिसम्भवितृपरत्वम् । ततश्चेहापि व्यवहितस्य सम्प्रसादशब्दितस्य जीवस्यैव 'एष आत्मे' त्येतच्छब्देन ग्रहणमुचितम्, विभक्त्यैकरूप्यादिति चेन्न—प्रजापतिर्वरुणाये' ति वाक्ये स इत्यनेन प्रजापतिपरामर्शे अश्वदानसंप्रदानरूपत्वेन स्वीयां वरुणदेवतामार्च्छत् = प्राप्नोदित्यर्थो युज्यते । वरुणपरामर्शे तु वरुणस्यात्मीयाया देवतायाः प्रागप्रस्तुतत्वादर्थासङ्गत्या व्यवहितोऽपि प्रजापतिः परामृष्टः; न तु विभक्त्यैकरूप्यमात्रेण । 'एष सोमो राजे' ति पितृयाणवाक्ये एतच्छब्देन चन्द्रपरा-

---

अथ य एष इति । नन्वेतद्वाक्यस्वारस्यादेवमाशङ्का भवति — 'एतत् सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः' इत्येतावत्पर्यन्तं ब्रह्मणो दहराकाशस्य निरूपणम् । ततः, 'एष आत्माऽपहतपाप्मे'त्यारभ्य, एष आत्मेति होवाचेत्यन्तेन जीवनिरूपणमेव । अयमेवेत्थं प्रजापतिवाक्येप्युच्यते । अयं च जीवात्मा परमात्मनि समाहिताः कामा इव तदुत । तथाच परमात्मन इह नापहतपाप्मत्वादिसिद्धिरिति । उच्यते— मध्ये, 'अत्र गत्वा विन्दते,' 'एतं ब्रह्मलोकं न विन्दन्ति, इति एतत्पदाभ्यां ब्रह्मपराभ्यां प्रकान्तपरामर्शात्, पूर्वं, एष आत्मापहतपाप्मेत्युक्तः परमात्मैवेति । उपरि, 'य आत्मा स सेतुर्विधरण' इति ब्रह्मण एवात्मपदेन निर्देशाच्च । अस्तु

मर्शी तस्य सोमराजभावविधानवैयर्थ्यात् व्यवहिताभिसम्भवितृपरामर्शित्वम्, न विभक्त्यैकरूप्यात् । प्रकृते अव्यवहितप्रधानभूत परंज्योतिश्शब्दितपरमात्मपरित्यागे कारणाभावात् । प्रत्युत तेन व्यवहितसम्प्रसादशब्दितजीवपरिग्रहे तस्य निरुपाधिकात्मत्व-निरतिशयसुखरूपत्वलक्षणामृतत्व-दुःखासंभिन्नत्वरूपाभयत्व-ब्रह्मत्व विधानासम्भवाच्च, 'एष आत्मेति होवाचे' त्येतच्छब्देन प्राप्यभूतः परमात्मैव परामृश्यते ।

यद्यपि, 'स्वेन रूपेणाभिनिष्पद्यत' इति स्वरूपाविर्भावे कथिते आविर्भवत् स्वरूपं किमित्याकाङ्क्षायां प्रजापतिवाक्ये — 'एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मे' ति निर्दिष्टममृताभयब्रह्मात्मशब्दनिर्दिष्टं मुक्तरूपमित्येवमर्थकत्वेऽपि नानुपपत्तिः — तथाऽपि 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति' इत्युत्तरवाक्यनिर्देक्ष्यमाणचेतनाचेतननियन्तृत्वार्थक सत्यनामत्वस्य मुक्तात्मन्यसम्भवात् पूर्ववाक्यनिर्दिष्टोऽपि न जीवः परामृश्यते, अपितु प्राप्यं ब्रह्मैव ।

एष आत्मेति होवाचेत्येतावन्मात्रस्याविर्भवत्स्वरूपपरत्वम् । एतदमृतमभयमेतद्ब्रह्मेत्यत्र त्वेतच्छब्दस्य परज्योतिश्शब्दित ब्रह्मपरत्व' मित्याश्रयणेऽपि नानुपपत्तिः ।

अनेन च वाक्यसन्दर्भेण परमात्मनो मुक्तप्राप्यत्वतत्स्वरूपाविर्भावयितृत्वलक्षणो महिमा प्रतिपादितो भवति । अत एव सूत्रकृतापि, 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति

तावदेवम् — अथाप्यत्र वाक्ये **य एष संप्रसाद** इति यच्छब्दनिर्दिष्टस्यैव **एष आत्मेति** एतच्छब्देन ग्राह्यतया जीवपरैक्यमेव संमन्तव्यमिति चेन्न — अन्यथासिद्धत्वात् । तदाह **एतावन्मात्रस्याविर्भूतस्वरूपपरत्वमिति** । तथाच पुल्लिङ्गनिर्दिष्टं पुल्लिङ्गेन परामृष्टम्; पश्चात् परंज्योतिरिति नपुंसकनिर्दिष्टं नपुंसकेन परामृष्टम् **एतदमृतमित्यादिनेति** भावः । **आश्रयणेऽपीत्यपिना** पक्षान्तरं सूचितम् । तच्च यच्छब्दप्रतिसंबन्धितच्छब्दाध्याहारेण तस्यैष आत्मेति वा वक्तव्यम् । **एष** इति अपर्यवसानवृत्त्या एतत्संप्रसादान्तर्याम्यर्थकमिति वेति । न च एतद् ब्रह्मेत्येतद् विहाय सर्वं जीवपरमेवास्त्विति वाच्यम् — उक्तोत्तरत्वात्, 'य आत्मा स सेतु' रिति सेतोरात्मत्वोक्तेः । तदुपरि, न जरा न मृत्युरित्यादिना सेतोरेवापहतपाप्मत्वविजरत्वविमृत्युत्वविशोकत्ववर्णनाच्च । 'य आत्माऽपहतपाप्मे' त्यादेः, 'एष आत्मेति होवाचैतदमृतमभय' मित्यादेश्च वाक्यस्यैकाकारत्वं तुनप्रजापतिविद्यायामत्र च वस्त्वैक्यसाधकम्; साधर्म्यादुपपत्तेरिति, "उत्तराच्चेदाविर्भूत स्वरूपस्तु" इति सूत्रोक्तमेव ।

तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति । तानि ह वा एतानि त्रीण्यक्षराणि सत् ति यमिति । तद् यत् सत्, तदमृतम्; अथ यत् ति, तन्मर्त्यम्; अथ यद् यम्, तेनोभे यच्छति । यदनेनोभे यच्छति, तस्माद्यम् । अहरहर्वा एवंवित् स्वर्गं लोकमेति ॥

इति अष्टमाध्याये तृतीयः खण्डः ।

होवाच' इति दहरविद्यामध्यस्थवाक्ये जीवप्रतिपादनदर्शनात् दहराकाशोऽपि जीव एवास्तु । तस्य यावान् वा अयमित्यादिवाक्यसन्दर्भप्रतिपादितभूताकाशोपमेयत्वस्य भूताकाशेऽनन्वयेन दहराकाशस्य भूताकाशत्वाभावेऽपि जीवे कथञ्चिन्निर्लेपत्वादिना भूताकाशोपमेयत्वसम्भवात् अणुपरिमाणे जीवे दहरशब्दितालपपरिमाणत्वस्यापि सम्भवाद्दहराकाशो जीव एवास्त्विति, "इतरपरामर्शात् स इति चेत्"इति सूत्रखण्डेनाक्षिप्य "दहर उत्तरेभ्यः", "गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च", "धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः" इति सूत्रत्रयोक्तानां परमात्मधर्माणां जीवेऽसम्भवान्न जीवो दहराकाश इति, "नासम्भवात्" इति सूत्रखण्डेन परिहृत्य, तर्हि ब्रह्मप्रकरणे 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाये' ति जीवपरामर्शः किमर्थमित्याशङ्क्य मुक्ते तत्स्वरूपाविर्भावयितृत्वलक्षणपरमात्ममहिमप्रकाशनार्थो जीवपरामर्श इति, "अन्यार्थश्च परामर्शः" इति सूत्रेण प्रतिपादितम् ।

तस्य — सत्यमिति । स्पष्टोऽर्थः । **तानि — सत्तियमिति** — सत् ति यमिति सत्यनाम व्यक्षरात्मकमित्यर्थः । **तद्यत्सत्तदमृतम्; अथ यत्ति तन्मर्त्यम्** । अत्रामृतमर्त्यशब्दाभ्यां चेतनाचेतने निर्दिश्येते । **अथ — यच्छति** । अमृतत्वमर्त्यत्वरूपेणोपलक्षिते उभे यच्छतीति यमित्यर्थः । तदेवोपसंहरति — **यदनेनोभे यच्छति तस्माद्यम्** । — अनेन चेतनाचेतनत्वरूपेण उपलक्षिते उभे यतो यच्छति, तस्मात् यमित्यर्थः । नामनिर्वचनाभिज्ञं स्तौति — **अह — मेति** । पूर्ववत् स्पष्टोर्थः ॥ ८—३.

८—४

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय। नैतँ सेतुमहोरात्रे तरतो न जरा न मृत्युः न शोको न सुकृतँ न दुष्कृतँ सर्वे पाप्मानोऽतो निवर्तन्ते। अपहतपाप्मा ह्येष ब्रह्मलोकः॥

तस्माद्वा एतँ सेतुं तीर्त्वाऽन्धस्सन् अनन्धो भवति; विद्धस्सन्

अथ — विधृतिः। उक्तलक्षण आत्मा सेतुरिव **विधृतिः** विधारक इत्यर्थः। किमर्थं सेतुर्विधृतिरित्यत्राह-**एषां लोकानामसम्भेदायेति। असंभेदः**[1] असङ्करः। यद्ययं परमात्मा स्वशासनेन जगन्न धारयेत्, सर्वधर्माणां साङ्कर्यमेव स्यात्। पृथिव्या गन्धवत्त्वम्, जलस्य शैत्यं, तेजस औष्ण्यमित्यादयो हि धर्माः परमात्माज्ञया व्यवस्थिता भवन्ति। सिनोति बध्नाति स्वस्मिन् चिदचिद्वस्तुजातमसङ्कीर्णमिति सेतुरुच्यत इति "सामान्यात्तु" इति सूत्रे भाषितम्। **नैतं — दुष्कृतम् — "तरतिः** प्राप्तिवचनः। वेदान्तं तरतीतिव" दिति तत्रैव भाषितत्वात् एतं परमात्मसेतुमहोरात्रे परिच्छेदकत्वेन न प्राप्नुतः। जरादिकमपि न प्राप्नोतीत्यर्थः। उक्तमर्थं निगमयति— **सर्वे — निवर्तन्ते।** शोकादिषु पाप्मशब्दस्यामुख्यत्वेऽपि सुकृतदुष्कृतयोरलौकिकमुमुक्ष्वनिष्टसाधनत्वलक्षणपापशब्दप्रवृत्तिनिमित्तसद्भा[2]वात् पाप्मशब्दो मुख्य इति **व्यासार्यैर्लघुसिद्धान्ते** वर्णितम्। तत्र हेतुमाह — **अपहत — इति।** ब्रह्मरूपो लोक एषः अपहतपाप्मा। **हि**र्हेतौ। यस्मादयमपहतपाप्मा, तस्मात् सर्वे पाप्मानोऽतो निवर्तन्त इत्यर्थः। पापहेतुकर्माचरणेऽपि तदुत्पत्तिप्रतिबन्धकशक्तियोगित्वमेव हि **अपहतपाप्मत्वम्**। तस्मान्न पाप्मशब्दमुख्यार्थसुकृतदुष्कृतयोस्तत्फलभूतजरारोगादीनाञ्च प्रसक्तिरित्यर्थः॥

तस्मात् — भवति। यस्मादयमपहतपाप्मा, तस्मादेव **एतं** परमात्मलक्षणं सेतुं प्राप्य पूर्वमान्ध्यायुधवेधज्वरादियुक्तदेहोऽपि सन् तद्दोषरहितदिव्यदेह-

1. **असंभेदाय** असंकराय **क.** 2. संभवात् **ख.**

अन्धः सन् इत्यादिना क्रमेण आधिदैविकाधिभौतिकाध्यात्मिकतापनिवृत्तिरुक्ता। **सकृद् विभात** इति। विभानविच्छेदेन पुनर्विभाने असकृत् = अनेकवारं विभातः स्यात्। तद्विलक्षण इत्यर्थः।

अविद्धो भवति; उपतापी सन् अनुपतापी भवति। तस्माद्वा एतँ सेतुं तीर्त्वा अपि नक्तमहरेवाभिनिष्पद्यते। [1]सकृद्विभातो ह्येवैष ब्रह्मलोकः॥

तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति, तेषामेवैष ब्रह्मलोकः, तेषाँ सर्वेषु लोकेषु कामचारो भवति॥

इति अष्टमाध्याये चतुर्थः खण्डः।

---

1. असकृत् **मा.**

युक्तो भवतीत्यर्थः। **तस्मात् — निष्पद्यते**। परमात्मानं प्रातस्य तमिस्रा रात्रिरपि दिवैव। तस्याज्ञानप्रसक्तेरभावादहस्सदृशी सा रात्रिः। अहोरात्रयोर्न विशेष इत्यर्थः। तत्र हेतुः **सकृद् — लोकः**। **एषः** पूर्वोक्तो ब्रह्मलोकः **हि** यस्मात् [1]**सकृद्विभातः** सर्वदा ब्रह्मस्वरूपप्रकाशस्यानावृततया भासमानत्वादित्यर्थः।

तद्य एव — भवति। [**तत्** तत्र एवंसति] ये **एतं** परमात्मानं स्त्रीविषयतृष्णात्यागरूपब्रह्मचर्यपूर्वकशास्त्राचार्योपदेशादिना **अनुविन्दन्ति** जानन्ति, तेषामेवेदृशब्रह्मप्राप्तिः सर्वलोकानुभवश्च; न ब्रह्मचर्यहीनानामित्यर्थः। सूत्रितञ्च "धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धे" रिति। 'एष सेतुर्विधरण एषां लोकानामसंभेदाये' ति परब्रह्ममहिमत्वेन प्रसिद्धस्य जगद्विधरणमहिम्नो दहराकाशे उपलभ्यमानत्वाद्दहराकाशः परं ब्रह्मेत्यर्थः। ८—४.

यज्ञेष्टसत्त्रायणमौनानाशकायनारण्यायनाख्यानि कर्माणि ब्रह्मचर्यसाध्यत्वात्

1. एकदा। मध्ये तिरोध्यभावात् **क.**

ननु ब्रह्मचर्येण ब्रह्म जानतामेव ब्रह्मलोक इति कथम्, यज्ञादेरपि तद्वत् साधनत्वादित्याशङ्कायां यज्ञाद्यपि ब्रह्मचर्यमेवेति तत्परिहारं कुर्वन्, यज्ञादेः कथं ब्रह्मचर्यत्वमित्यत्र ब्रह्मचर्यसाध्यत्वात् साध्यसाधनयोरभेदादिति प्रतिविधक्षन्, साध्यत्वमेव कथमित्यत्र ब्रह्मचर्यसाध्याय आत्मादिप्राप्तेर्यज्ञादिप्राप्तिरूपत्वादिति समाधानमाशयानः तदुपपत्तये यागाद्यर्थप्रसिद्धयज्ञादिशब्दस्य आत्माद्यर्थमुपवर्ण्य एवमेकशब्दरूपितत्वात् यागात्माद्यैक्यं दर्शयति **अथ यद्यज्ञ** इत्यादिः खण्डः। यद्यपि ब्रह्मार्थं चर्या ब्रह्मचर्यमिति यज्ञादेरपि सुखं तथात्वं सुवचम् — अथापि स्त्रीसंगत्यागरूपब्रह्मचर्यमेवेह विवक्षित्वा श्रुतिरिह समचत्कारमेवं वर्णयन्ती तत् ब्रह्मचर्यमादरेण स्तौति। तदाह **यज्ञेष्टे**त्यादिना। यज्ञेष्टसत्त्रायणमौनानाशकायनारण्यायनशब्दानां प्रकृतब्रह्मचर्यसाध्यार्थ-

८—५

अथ यत् यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत्। ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दते।

अथ यदिष्टमित्याचक्षते, ब्रह्मचर्यमेव तत्। ब्रह्मचर्येण ह्येवेष्ट्वाऽऽत्मानमनुविन्दते।

ब्रह्मलोकसाधनत्वेन प्रस्तुतं प्राङ्निर्दिष्टं ब्रह्मचर्यमेवेति स्तौति—**अथ — तत्।** लोके यत् पाकयज्ञहविर्यज्ञादिकं कर्म वैदिकाः यज्ञ इत्याचक्षते, तत् ब्रह्मचर्यसाध्यत्वात् ब्रह्मचर्यमेवेत्यर्थः। ननु यज्ञस्य कथं ब्रह्मलोकसाधनब्रह्मचर्यसाध्यत्वं, न हि ब्रह्मप्राप्तिसाधनस्य ब्रह्मचर्यस्य यज्ञो द्वारमित्याशङ्क्य ब्रह्मचर्यसाध्यस्य ब्रह्मप्राप्तिसाधनस्य ज्ञानस्य यज्ञरूपत्वात् ज्ञानसाधनस्य ब्रह्मचर्यस्य यज्ञसाधनत्वमप्यस्तीति प्रतिपादयितुमेकशब्दरूषितत्वेन तयोरैक्यं सम्पादयति **ब्रह्मचर्येण — विन्दते।** ब्रह्मचर्यपुरस्सरब्रह्मज्ञानवान् हि तं ब्रह्मलोकं विन्दते इत्यर्थः। [1]अत्र, '**यो ज्ञाता ब्रह्मचर्येणे**' त्युक्त्या योज्ञातेत्यस्य ब्रह्मचर्यसाध्यत्वं प्रतीयते। **यो ज्ञाते**ति शब्दैकदेशस्य **योज्ञ**शब्दस्य यज्ञशब्दस्य च साम्यकृताभेदाध्यवसायेन तदर्थाभेदाध्यवसायमूला यज्ञस्यापि ब्रह्मचर्यसाध्यतेति भावः। एवमुत्तरत्रापि द्रष्टव्यम्।

अथ — विन्दते। अत्रापि ब्रह्मप्राप्तिसाधनस्य ब्रह्मचर्यसाध्यस्य परमात्मपूजनस्य दर्शपूर्णमासादीनाञ्च **इष्ट्येत्येकशब्दरूषितत्वेनाभेदाध्यवसायः।**

1. अत्र वाक्ये क.

विशेषयागाद्युभयपरत्वञ्चैवम् — प्रसिद्धार्थस्तावत्—यज्ञः ज्योतिष्टोमादिः; इष्टम् इष्टिः, सत्रायणं सत्रयागाख्य उपायः, अनाशकायनं अनशनकर्तुः तपः, मौनं वाङ्नियमः, अरण्यायनं विपिनवासः इति। अन्यश्चैवं विमृश्यताम् — **यो ज्ञाता तं विन्दते** इत्यत्र योज्ञशब्दयज्ञशब्दयोः साम्यकृताभेदाध्यवसाय इति भाष्यम्। 'ब्रह्मचर्यपुरस्सरब्रह्मज्ञानवा'नित्यादि च। इदमप्यत्र ग्राह्यम्। आत्मप्राप्तिरिह विवक्षिता। आत्मा च परमात्मा, 'य आत्मापहतपाप्मे'त्युक्तो ब्रह्मलोक एव। यो ज्ञातेत्यत्र ज्ञातृपदं तमेव सर्वज्ञमाह। य इत्यस्य च तमित्येव प्रतिसंबन्धि। यज्ञशब्दस्य यथासौ ज्ञश्च यज्ञ इति विग्रहः। यज्ञ इति जकारद्वयं ग्राह्यम्। यच्छब्दः श्रुतिप्रसिद्धपरः।

अथ यत् सत्त्रायणमित्याचक्षते, ब्रह्मचर्यमेव तत्। ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दते।

अथ यन्मौनमित्याचक्षते, ब्रह्मचर्यमेव तत्। ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते॥

अथ यदनाशकायनमित्याचक्षते, ब्रह्मचर्यमेव तत्। एष ह्यात्मा न नश्यति, यं ब्रह्मचर्येणानुविन्दते।

अथ यदरण्यायनमित्याचक्षते, ब्रह्मचर्यमेव तत्। अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि।

अथ — त्राणं विन्दते। अत्रापि ब्रह्मप्राप्तिसाधनस्य ब्रह्मचर्यसाध्यस्य विषयान्तरविमुखीकरणलक्षणस्य[1] सच्छब्दितात्मत्राणस्य गवामयनादिसत्रस्य च सत्त्रायणरूपैकशब्दरूढितत्वेनाभेदाध्यवसायः।

अथ यन्मौनं — मनुते। वाङ्नियमनलक्षणमौनस्य ब्रह्मचर्यसाध्यात्मश्रवणाधीनमननस्य च मौनरूपैकशब्दरूढितत्वेनाभेदाध्यवसायः।

अथ यदनाशकायनं — विन्दते। ब्रह्मचर्यसाध्यनाशाभावरूपफलस्य च अनशनलक्षणमार्गस्य च अनाशकायनशब्दैक्यकृतोऽभेदः। [[2]आशः=अशनम्। न आशः नाशः। नाशो न भवतीत्यनाशः' इत्येकशब्दरूढितत्वम्]

अथ — दिवि। इतो भूलोकापेक्षया तृतीये द्युशब्दिते ब्रह्मलोके अर–ण्यसंज्ञकावर्णवौ स्तः। अतश्चारण्यायनस्य ब्रह्मलोकस्य च अरण्यवासस्य च **अरण्यायन**शब्दकृतोऽभेदः। भुवं चतुर्मुखलोकान्तान्तरिक्षलोकञ्चापेक्ष्य भगवल्लोकस्य तृतीयत्वम्। न तु चतुर्मुखलोकस्य तृतीयत्वमिति मन्तव्यम्। प्रश्नोपनिषदि चतुर्मुखलोकस्याप्यन्तरिक्षलोककोटौ निवेशितत्वात्।

1. विमुखीकरणस्य ख. 2. संज्ञाकार्णवौ ख.

तथाच ब्रह्मचर्येण प्रसिद्धं परमात्मानं विन्दते इति यज्ञप्राप्तिर्ब्रह्मचर्याधीनेति। इध्मिति पदं पूजनार्थकमुक्तं भाष्ये। इच्छेत्यर्थान्तरमप्युक्तं शाङ्करे। विषयविरक्तस्य हि परमात्मनि तृष्णा वर्धत इति। सत्त्राणं सच्छब्दवाच्यस्य ब्रह्मणः अविच्छिन्नमनुभाव्यत्वरूपरक्षासाधनम्। मौनं तु मननम्। अनाशकायनञ्च, न विद्यते नाशो यस्य तस्यानाशकस्य, 'न वधेनास्य हन्यत' इति प्रागु-

तदैरम्मदीयँ सरः; तदश्वत्थः सोमसवनः; तदपराजिता पूर्ब्रह्मणः; प्रभुविमितँ हिरण्मयम् ।

तद्य एवैतावरश्च ण्यश्चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति, तेषामेवैष ब्रह्मलोकः । तेषाँ सर्वेषु लोकेषु कामचारो भवति ॥

इति अष्टमाध्याये पञ्चमः खण्डः ।

प्रसङ्गात् भगवल्लोकचिह्नानि कानिचिदाह — **तदैरम्मदीयं — सवनः ।** **तत्** तत्र ऐरम्मदीयनामकं सरः । [अस्तीति शेषः ।] इरया अमृतेन माद्यन्ते यस्मिन् तदैरम्मदीयं अमृतमयं सर इत्यर्थः । सोमसवननामा अश्वत्थश्चास्तीत्यर्थः[1] । चन्द्रवदाह्लादकत्वात् सोमसवनत्वम् । **तदपराजिता पूर्ब्रह्मणः — तत्** तत्र अब्रह्मविद्भिः प्राप्तुमशक्यत्वेनापराजिता नाम परब्रह्मणः पुरी चास्तीत्यर्थः । **प्रभुविमितं हिरण्मयम्** । मण्टपमिति शेषः । **प्रभुणा** भगवता विशेषेण मितं स्वभोगभूमित्वेन विशेषतः परिगृहीतमित्यर्थः । भगवतो व्याप्तत्वेपि नित्यविग्रहविशिष्टतया सन्निधानाद्विमितत्वम् । अतश्च तद्देशविशिष्टब्रह्मप्राप्तिरेव ब्रह्मप्राप्तिरिति भावः । प्रसङ्गादाह — **तद्य — भवति** । ब्रह्मप्राप्तिसाधनीभूतारण्यशब्दितार्णवद्वयप्राप्तेर्ब्रह्मचर्याधीनत्वात् ब्रह्मचर्यमेव सर्वसाधनोत्कृष्टमिति भावः । ८—५.

1. क. कोशे. अस्तीति अत्र सर्वत्र न ।

स्य ब्रह्मणः प्राप्तिः । इयञ्च प्राप्तिः लोकविशेषप्राप्तिपूर्विकेति तदुक्तिररण्यायनपदेन । अरशब्दण्यशब्दवाच्यार्णवप्राप्तिररण्यायनम् । एतदर्णवप्राप्तेर्भगवत्प्राप्तिशेषतया पुरुषार्थत्वं वक्तुं **तदैरम्मदीयं** सर इत्यादि । नित्यविभूतिसंबन्धी इतोऽधिको विस्तरः **कौषीतक्यां** पर्यङ्कविद्यायां द्रष्टव्यः । तत्र अरो ह्रदः, विरजा नदीति द्वयमुक्तम्; अत्र अरो ण्यश्चेति द्वयम् । ऐरम्मदीयं सरश्च तत्रानुक्तमिह । अत्राश्वत्थः सोमसवनः तत्र तिल्यो वृक्षश्चैकः स्यात् । ऐरमिति **मदीय**मिति च पृथक्पदं कृतं शाङ्करे । अत्र श्रीमद्रहस्यत्रयसारसारस्यात् ऐकपद्यमाश्रितम् । इरम्मदशब्दश्च नानाश्रुतिगतो दर्शितो **वाचस्पत्ये** ।

८—६.

अथ या एता हृदयस्य नाड्यः, ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गलः; एष शुक्ल एष नील एष पीत एष लोहितः।

तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमञ्चामुञ्च, एवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छतीमञ्चामुञ्च। अमुष्मादादित्यात् प्रतायन्ते; ता आसु नाडीषु सृप्ताः। आभ्यो नाडीभ्यः प्रतायन्ते; तेऽमुष्मिन्नादित्ये सृप्ताः॥

उक्तब्रह्मलोकप्राप्तिसाधनतया मूर्धन्यनाडीगमनं प्रस्तौति-**अथ-लोहितस्येति**। हृदयसंबन्धिन्यो नाड्यः पिङ्गलशुक्लनीलादिनानारूपसूक्ष्मान्नरस[सं]पूर्णाः तिष्ठन्तीत्यर्थः। **असौ वा — लोहितः**। आदित्यस्य पिङ्गलशुक्लनीलपीतादिनानारूपाश्रयत्वञ्च मधुविद्याप्रसिद्धम्; प्रत्यक्षसिद्धञ्च। ततश्चैतद्रश्मिसम्बन्धादेवान्नरसस्य नानारूपत्वञ्चेति भावः।

तद्यथा — अमुञ्च। यथा विस्तीर्णो **महान्** पन्थाः ग्रामद्वयप्रविष्टो भवति, तथा आदित्यरश्मयो लोकद्वयानुप्रविष्टा इत्यर्थः। लोकद्वयप्रवेशक्रममाह **अमुष्मात् — सृप्ताः**। **प्रतायन्ते** सन्ततताः। **सृप्ताः** प्रविष्टाः। रश्मीनामुभयलिङ्गत्वात् **ते ताः** इति च निर्देशः। शिष्टं स्पष्टम्।

पूर्वम्, 'अनुविद्य व्रजन्ती'त्यादिना गमनमुक्तम्। गन्तव्यो देशश्चानन्तरमेव दर्शितः। अथ मार्गमुपलक्षयितुं हृदयान्तर्वर्तिदहरोपासकस्य हृदयनाडीविशेषेण मूर्धव्याप्तेन आदित्यद्वारा मुक्तिवर्णनायाथ नाडीखण्डः। तत्र प्रथमं सुषुप्त्याधारभूताः नाडीराह **अथ या एता** इति। अन्नरसस्य पिङ्गलाद्यनेकवर्णता पित्ताख्येन तेजसा कफवातयोः तरतमभावेन संश्लेषवशादित्युक्ता, 'वैद्यकं वा द्रष्टव्य'मित्युक्तं शाङ्करे। तत्र नानावर्णादित्यरश्मिसंबन्धो मोक्षमार्गव्यक्तये इह श्रुत्योच्यते। तत्र नाडीसंगतस्य सुषुप्तिः; निष्क्रम्य रश्मीन् प्रविष्टस्याऽऽदित्यप्राप्तिरित्याह **तद्यत्रेति**। **समस्तः**। अस् क्षेपे। अस्तः = जाग्रद्दशातोऽन्यत्र क्षिप्तः। सम्यगस्तः स्वप्नदशातोऽपि क्षिप्तः **समस्तः**। **संप्रसन्न** इति। अनेन **संप्रसाद**शब्दोऽपि करणायत्तकालुष्यरहितं जीवमाहेति ज्ञातम्। **तेजसा** हीति। न हि लोके तेजस्संसृष्टं कश्चित् स्पृशेत्; दाहप्रसक्तेरिति भावः।

तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति, आसु तदा नाडीषु सृप्तो भवति । तं न कश्चन पाप्मा स्पृशति । तेजसा हि तदा संपन्नो भवति ॥

अथ यत्रैतदबलिमानं नीतो भवति, तमभित आसीना आहुः, जानासि मां जानासि मामिति । स यावदस्माच्छरीरादनुत्क्रान्तो भवति, तावज्जानाति ॥

तद्यत्र — सृप्तो भवति । तत् तस्मादित्यर्थः । **यत्र** यदा **समस्तः** उपसंहृतकरणमण्डलः अतएव **सम्प्रसन्नः** बाह्यविषयसंपर्कजनितकालुष्यशून्यः **स्वप्नं न विजानाति** न पश्यतीत्येतत् स्वप्नादर्शनं [1]सुषुप्तिरिति यावत् । तदा **आसु** नाडीषु **सृप्तः** प्रविष्टो भवति । पुरीत[2]द्गतब्रह्मगमनाय नाडीषु प्रविष्टो भवतीत्यर्थः । 'नाड्यो द्वासप्ततिःसहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते । आभिः प्रत्यवसृप्य पुरीतति शेते' इति श्रुत्यन्तरात् । नाडीपुरीतद्ब्रह्मणां समुच्चयेन सुषुप्तिस्थानत्वस्य "तदभावो नाडीषु तच्छ्रुतेरात्मनि चे"त्यत्र स्थितत्वात् नाडीनामपि सुषुप्तिस्थानत्वमस्तीति द्रष्टव्यम् । **तन्न — स्पृशति ।** सुषुप्तौ सतोऽपि कर्मणः फलजननसामर्थ्यं नास्तीत्यर्थः । 'न कश्चन पाप्मा स्पृशती' त्यस्मिन् वाक्ये अनुष्ठानाशक्तिर्विवक्षितेति **व्यासार्य**वचनस्याप्ययमेवार्थः । तत्र हेतुमाह—**तेजसा — भवति ।** 'सता सौम्य तदा संपन्नो भवती' ति श्रुतेः तेजश्शब्दः प्रकाशत्वगुणयोगात् ब्रह्मपरः । ब्रह्मणि सम्पत्तिर्नाम देहेन्द्रियाधिष्ठातृत्वराहित्येन ब्रह्मण्यवस्थानम् । सम्पत्त्यधिकरणस्य करणत्वविवक्षया तृतीयानिर्देशः ॥

अथ — भवति । अथशब्दोऽर्थान्तरप्रस्तावार्थः । अबलस्य भावः **अबलिमा ।** अबलत्वम् । रोगादिकृतदौर्बल्यं नीतो भवतीत्येतत् । **यत्र** यदेत्यर्थः । यदा दौर्बल्यं प्राप्तवानित्यर्थः । **तमभित — मिति ।** तं तादृशदशाविष्टं परितो वर्तमाना बान्धवाः मां जानासि किं, मां जानासि किमित्याहुः । यद्वा **एतत्** एतासु नाडीषु स्थित इत्यर्थः । **स यावत् — जानाति ।** स्पष्टोऽर्थः ।

1. संसृप्तिः क, 2. पुरीतद्ब्रह्म ख.

अथ यत्रैतदस्माच्छरीरादुत्क्रामति, अथैतैरेव रश्मिभिरूर्ध्व आ(मा)क्रमते। स ओमिति वाहोद्वा मीयते। स यावत् क्षिप्येन्मनः, तावदादित्यं गच्छति।

अथ — आक्रमते। एतैरेव रश्मिभिः पूर्वोक्तैरादित्यरश्मिभिरित्यर्थः।

इदञ्च वाक्यमुत्क्रान्तिपादे चिन्तितम्—निशि मृतस्य विदुषो रश्म्यनुसारेण गमनासम्भवात् रश्मिभिरेव गमनमिति न नियमः। 'अथैतैरेव रश्मिभिरूर्ध्वमाक्रमत' इति वचनं तु पक्षप्राप्तविषयम्। एवकारोऽत्यन्तायोगव्यवच्छेदार्थ इति पूर्वपक्षे प्राप्ते — उच्यते — "रश्म्यनुसारी"। विद्वान् नियमेन रश्मीन् अनुसृत्यैव गच्छति। 'एतैरेव रश्मिभि' रित्येवकारस्य क्रियासङ्गतैवकारत्वाभावेनात्यन्तायोगव्यवच्छेदक[1]त्वासंभवेनान्ययोगव्यवच्छेदकत्वस्यैव वक्तव्यत्वात्। यदुक्तम् — निशि मृतस्य रश्म्यसम्भवात् रश्मीन् अनुसृत्य गमनं नोपपद्यत इति — तन्न। निदाघसमये हि रात्रावप्यूष्मोपलम्भात् रश्मिसम्भवः। हेमन्तादौ तु हिमाभिभवात् दुर्दिन इवोष्मानुपलम्भः। श्रूयते च नाडीरश्मीनां सर्वदाऽन्योन्यान्वयः। 'तद्यथा महापथ आतते उभौ ग्रामौ गच्छतीमञ्चामुञ्च, एवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमञ्चामुञ्च। अमुष्मादादित्यात् प्रतायन्ते, ता आसु नाडीषु सृप्ताः। आभ्यो नाडीभ्यः प्रतायन्ते, तेऽमुष्मिन्नादित्ये सृप्ताः' इति — इति।

स ओमिति वाहोद्वा मीयते। सः विद्वान् 'ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः', 'तस्योदिति नामे'ति च प्रमाणप्रसिद्धं परमात्मनाम[2] **आह** कीर्तयति, कीर्तयन्नेव च **मीयते** प्रमीयते च। मरणकाले तस्य भगवन्नामस्मरणं सम्भवति। यद्वा—स एतैः रश्मिभिरुन्मीयते [उन्नीयते च। एको] **वा**शब्दोऽवधारणार्थः। **स यावत्—गच्छति।** मनोवेगेनादित्यं स गच्छतीत्यर्थः। न च 'स यावत्क्षि-

1. त्वाभावेन विशेष्यान्य **क.** 2. परमात्मानम् **ख.**

स ओमिति वाहोद्वा मीयत इति। अत्र शाङ्करे, '**वा** हेति निपातद्वयमवधारणार्थम्। **उदिति** ऊर्ध्वमित्यर्थकम्। **मीयते** गच्छति। तथाच ओमित्यनेनैव करणेन ऊर्ध्वं वा गच्छतीत्यर्थः। **वा**कारः, 'अविद्वांश्चेत् — तिर्यग्गच्छति प्रकारान्तरेणे'ति ज्ञापनार्थः' इति व्याख्यातम्। इह तु योजनाद्वयम्; **आह**ेति च छेदः। ओमिति वा उदिति वा भगवन्नाम्ना तं भगवन्तमाह अथ **मीयते** म्रियत इत्येका। ओमित्येव परमात्मानमाह; **उन्मीयते** उन्नीयते च

एतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् ॥

तदेष श्लोकः —

शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ।

उत्क्रमणे भवन्ति ।

इति अष्टमाध्यायें षष्ठः खण्डः ।

प्येन्मनस्तावदादित्यं गच्छती' ति त्वरावचनेन रश्म्यनुसारिमार्गस्य मार्गान्तरवैलक्षण्यप्रतीतेर्मार्गभेदः शङ्क्यः; "अर्चिरादिना तत्प्रथिते" रित्यधिकरणे नानाशाखासु तस्यैव मार्गस्य **प्रथितेः** प्रत्यभिज्ञानादर्चिरादिरेक एव मार्गः। अतोऽर्चिरादिनैव मार्गेण विद्वान् गच्छतीति समर्थितत्वात्। 'स यावत्क्षिप्येन्मन'इति त्वरावचनस्य, काश्मीरापेक्षया मगधान् क्षिप्रं गच्छतीतिवत् गन्तव्यस्वर्गाद्यपेक्षया आदित्यगमनस्य शैघ्र्येणाप्युपपत्तेर्न दोषः।

एतद्वै--- अविदुषाम् । **विदुषां** ब्रह्मलोकस्य द्वारं **प्रपदनं** प्रपद्यतेऽनेनेति **प्रपदनं** प्राप्तिसाधनम् (मार्गः) य आदित्यः। द्वारापेक्षया नपुंसकनिर्देशः **एत**दिति। अविदुषाञ्च **निरोधो** रोधकः। अविद्वांसो हि सूर्यमण्डलभेदासामर्थ्यान्न गन्तुं शक्नुवन्तीत्यर्थः।

तदेष श्लोकः । **तत्** तस्मिन् विषये **एषः** वक्ष्यमाणः श्लोकः प्रवृत्त इत्यर्थः। **शतञ्च — भवन्ति** । मूर्धन्यनाड्या गच्छन् मुक्तिं प्राप्नोति। विष्वङ्गतयः नानागतय इतरनाड्यस्तु उत्क्रमणमात्रे [प्र] भवन्ति; न त्वमृतत्वसाधनीभूतोर्ध्वगतावित्यर्थः। यद्वा विष्वगुत्क्रमणे अन्या नाड्य उपयुज्यन्त इत्यर्थः। शिष्टं स्पष्टम्। ८-६.

रश्मिभिरित्यन्या। अस्मिन् पक्षे पूर्वो **वा**शब्दोऽवधारणे; उत्तरः चार्थे। विकल्पार्थकत्वमपि संभवति — ओमित्याह वा; वागिन्द्रियवैकल्ये साधननिष्पत्तिं पश्यता भगवता तन्निरपेक्षमनुगृह्यते वेति। सर्वमिदमर्थक्रमात् शरीरादुत्क्रान्तेः प्राक् द्रष्टव्यम्। प्रकृतदहरविद्यानिष्ठस्य मन्त्रः प्रणव इति तावन्मात्रोक्तिः। तैत्तिरीयेऽपि दहरविद्यां, 'तस्मिन् यदन्तस्तदुपासितव्य' मित्युक्त्वा, 'यद्वेदादौ स्वरः प्रोक्त' इति प्रणव उक्तः।

८—७.

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः । स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥

एवं दहरविद्यां समाप्य तदङ्गभूतां प्रत्यगात्मविद्यां प्रस्तौति – **य आत्मा— — । यस्तं — उवाच** । [अत्र] "अनुविद्येति वाक्यार्थज्ञानमुच्यते । विजानातीति ध्यान" मिति लघुसिद्धान्ते **भाषितम्** । शिष्टं स्पष्टम् ।

अपहतपाप्मत्वसत्यकामत्वसत्यसंकल्पत्वविशिष्टतया परमात्मा प्रागुक्तः । तदुपासनेन जीवस्य सर्वलोककामसिद्धिः संकल्पमात्रेणेत्युक्तम् । तदर्थतया चायं परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्युक्तम् । तत् स्वं रूपमपहतपाप्मत्वाद्येवेति दर्शयितुं प्रजापतिविद्या प्रस्तूयते ।

नन्वियं प्रजापतिविद्या जीवमात्रपरेति कथं ज्ञायते । यावता प्राक् परमात्मगततया प्रस्तुतानामपहतपाप्मत्वादीनामेवोक्तया परमात्मपरत्वमेवोपक्रमे प्रतीयते । न च निरुपाधिकापहतपाप्मत्वादिविशिष्टपरमात्मग्रहणसंभवेऽन्यादृशजीवपरतया योजनं युक्तम् । अवश्यग्राह्यश्च परमात्मैव । जीवग्रहणे, 'सर्वांश्च लोकानाप्नोति, सर्वांश्च कामान्' इति अत्र फलनिर्देशस्यानुपपन्नत्वात् । न हि शुद्धजीवोपासिन इदं फलं प्रामाणिकमन्यत्र कैवल्यात् । उपरि देहादिविलक्षणत्वजाग्रदाद्यवस्थाभाक्त्वादिना एतन्निरूपणात् अयं जीव एवेति चेत् — उपक्रमानुरोधेनोपसंहारोऽन्यथा नीयताम् । कथमिति चेत् — इत्थम् । प्रजापतिना तावत् परमात्मैव, 'य आत्माऽपहतपाप्मे' त्यनेन विवक्षितः । तद्वाक्यार्थबुभुत्सया समुपसन्नौ इन्द्रविरोचनौ । 'य एषोऽक्षिणि पुरुष' इति च ताभ्यां परमात्मैवोपदिष्टः । यथा उपकोसलविद्यायामधस्तात्, यथा च बृहदारण्यके (६ - २, ७-५) । अत एव, 'एतदमृतमभयमेतद् ब्रह्मे' ति ब्रह्मत्वमपि अत्रोक्तं घटते । एवं तद्वाक्यार्थानवबोधेन अक्षिगतप्रतिबिम्बपरत्वभ्रान्त्या ताभ्यामुदकादर्शगतप्रतिबिम्बसाम्येन प्रश्ने कृते, 'किमेतौ एतावतैव तृप्यतः' इति परीचिक्षिषया विवेकोत्पिपादयिषया च उदशरावे आत्मावलोकनं कारितं प्रजापतिना । अतो देहात्मभ्रान्तिनिवारणस्य कर्तव्यत्वे प्राप्ते पुनः पुनरुपसन्नमिन्द्रं प्रति जाग्रदाद्यवस्थापन्नतन्निर्मुक्तजीवस्वरूपं प्रसङ्गादुपदेष्टव्यं प्राप्तम । एवमपि स्वविवक्षितं परमात्मानमेव, उपर्यपि, 'स उत्तमः पुरुष' इति मध्ये स्वयमाह । 'तं वा एतं देवा आत्मानमुपासते' इति उपसंहारवाक्यमपि परमात्मपरमेव । तं प्रक्रान्तापहतपाप्मत्वादिविशिष्टम्, एतं देहादिविलक्षणजीवोपसंपदनीयमात्मानमिति तदर्थः । अतः प्रजापतिविद्याऽपि 'अपहतपाप्मा दिव्यो देव एको नारायण' इति प्रसिद्धपरविषयविद्यैवेति ।

अत्रोच्यते। एवमपि जीवस्यापहतपाप्मत्वादिकं नैवासिद्धम्। 'सर्वे पाप्मानः प्रदूयन्ते,' 'एतं ह वाव न तपति — किमहं पापमकरवमिति,' इति श्रुत्यन्तरप्रतिपन्नत्वात्। इहापि, 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति अपहतपाप्मत्वाद्यपिपासत्वान्तस्थितिर्दर्शितैव। सत्यकामत्वसत्यसंकल्पत्वे तु, 'स यदि पितृलोककामो भवती'त्यादिना प्रागेवोक्ते। 'निरञ्जनः परमं साम्यमुपैती'ति च परमसाम्यमापन्नस्य जगद्व्यापारवर्जं सर्वसद्भावात् अपहतापाप्मत्वादिकमुत्सर्गसिद्धमिति।

सिद्धयतु जीवस्यापि तत्। तथापि प्रजापतिविद्यायाः जीवविद्यात्वं किमिति वर्णितमिति चेत्—स्वारस्यदृष्टयैव। तथाहि—

किमिति तावत् प्रजापतिः, 'य आत्माऽपहतपाप्मे'त्यादिवाक्यमैतिह्यरूपेण सुरासुरान् श्रावयामास? न खलु गोपनीयं परमात्मतत्त्वं सर्वेभ्यः समुपदेष्टुमुद्रिक्तकरुणस्य प्रजापतेरियमुद्घोषणेति साम्प्रतम्। किं तर्हि? पितामहोऽसौ स्वसन्तानभूतानां सुरासुराणां देहात्माभिमानातिरेकसमुज्जृम्भितं मिथोवैरमालक्ष्य तमभिमानमपनेतुमनाः आत्मतत्त्वशुश्रूषाजननाय तदौन्मुख्यं संपादयितुं **य आत्मे**त्यादिवाक्यं सर्वतः प्रचारयामास। यथाप्रतीक्षञ्च सर्वे तदबुभुत्सन्त। अथ स्वप्रधानभूतेन्द्रविरोचनमुखेन तेषु सुरासुरेषु पश्चात् तदधिजिगमिषितवत्सु, तावुभौ असंविदानौ अत्यक्तवैरौ च समाजग्मतुः। अथ देहप्रतिबिम्बे आत्मत्वबुद्धौ तयोर्जातायाम्, तावतैव च विरोचने तृप्ते प्रतिबिम्बस्य च बिम्बसमृद्ध्यधीनसमृद्धिकतया बिम्बभूतदेहपोषणप्रवणे, इन्द्रः परं प्रतिबिम्बस्य शरीरदोषानुविधायिदोषवत्त्वमुत्प्रेक्ष्य पुनराजगाम। अनेनात्मगुणतयोक्तं विजरत्वविमृत्युत्वादि अत्र प्रतिबिम्बे बिम्बे च न भवतीति न स आत्मेति दर्शितं भवति। अथ स्वप्नावस्थे उपदिष्टे, तत्रापि 'अपि रोदितीव' इति दोषविमर्शो विहितः। तेन तत्र विशोकत्वाद्यभावो वेदितो भवति। अथ सुषुप्त्यवस्थे उपदिष्टे, 'नायं जानाति; विनाशमेवापीतो भवती'ति सत्यकामत्वसत्यसंकल्पत्वयोः सर्वार्थवाप्तिशक्तिस्तत्र ज्ञापिता। अथैवंमननसमर्थमिन्द्रं प्रति, शरीरं विहाय स्थित आत्मैव स्वरूपतोऽपहतपाप्मत्वादिविशिष्टो भवतीति, 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इत्यन्तेनोपपाद्य, ततः तस्य सत्यकामत्वसत्यसंकल्पत्वव्युत्पिपादयिषया परज्योतिरुपसंपत्तिपूर्वकतत्परिचरणरूपक्षणक्रीडनादिकं दर्शितम्। अथ मुक्तिकालिकात्मीयस्थितेः ऐहिकतत्स्थितेश्च वैषम्यं वेदयता अस्मिन् शरीरे इन्द्रियव्यापारानुविधायिज्ञानक्रियः शकटे युक्तोऽश्व इव स्थितोऽयं ब्रह्मलोके धर्मभूतज्ञानात्मकदिव्यचक्षुर्मात्रसहायः सर्वं निराबाधमनुभवतीत्युक्तम्। एवमामूलाग्रं जीवं निरूप्य क्रियमाणः, 'त एते वा एते देवा' इत्युपसंहारः न जीवविषयत्वमतिक्रामति।

किञ्च यदि परमात्मविषयेयं विद्या स्यात् – तर्हि किं दहरविद्या स्यात्, अन्या वा? नाद्यः, प्रजापतिविद्यातः प्रागेव, 'उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति' इति द्विरभ्यासेन दहरविद्योपासनप्रकारोपदेशसमाप्त्यवसायात्। इदमपि भाषितमत्र, **एवं दहरविद्यां समाप्येति**। नान्त्यः; दहरविद्याविहितापहतपाप्मत्वसेतुत्वविधृतित्वाद्यनेकगुणान्तर्गतापहतपाप्मत्वादिमात्रविषयक विद्यान्तरकल्पनस्याहृद्यत्वात्। सर्वलोककामावाप्तिस्तु परज्योतिरुपसंपत्तावेवेति उपरितन-

तद्धोभये देवासुरा अनुबुबुधिरे । ते होचुः—हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति ।

इन्द्रो हैव देवानामभिप्रवव्राज; विरोचनोऽसुराणाम् । तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥

तद्धोभये देवासुरा अनुबुबुधिरे । तत् प्रजापतिवचनमैतिह्यरूपेण देवा असुराश्च उभयेऽपि अनुबुबुधिरे श्रुतवन्त इत्यर्थः । **ते होचुः — कामानिति ।** अन्विच्छामः अवगच्छाम इत्यर्थः । शिष्टं स्पष्टम् । **इन्द्रो हैव—असुराणाम् ।** देवानां मध्ये इन्द्रश्च, असुराणां मध्ये विरोचनश्च प्रजापतिसमीपं गन्तुं प्रस्थितावित्यर्थः । **तौ हासंविदानौ— आजग्मतुः ।** असंविदानौ परस्परासूयया परस्परसम्मन्त्रणमकुर्वन्तावित्यर्थः । शिष्टं स्पष्टम् ।

वाक्यत एव ज्ञायते । कथं जीवात्ममात्रवेदिनः परज्योतिरुपसंपत्तिरिति चेत् — अत एव तदुपासनरूपं द्वारमर्थादाक्षेप्यम् । अत्र प्रजापतिविद्यातः प्रागेव दहरविद्यासमाप्तिर्द्विरभ्यासबलादवगम्यत इति अविशेषात् सर्वा परविद्या द्वारतामासादयति । एवंसति अत्र **अमृतमभयमेतद्ब्रह्मेति** प्रजापतिवाक्यं तु उदशरावप्रतिबिम्बविषयेऽपि तथैव तदुक्त्या केवलं प्रशंसार्थं प्रवृत्तं न परविद्यात्वस्थापनक्षमम् ।

किं बहुना । **कामं य आत्मेति** प्रजापतिवाक्यं **प्रथमं** द्व्यर्थकं परमात्मपरतयाऽपि तदभिमतं स्यात् । तथा **य एषोक्षिणीति** वाक्यमपि । अथापि तयोरिन्द्रविरोचनयोर्विशिष्टोत्कृष्टशरीरप्राप्तिप्रसक्तदेहात्मविभ्रमातिशययोः देहात्मविवेकस्याप्यभावे तदुक्तिवशादेव ज्ञाते ततः पुनःपुनरुपसन्नायेन्द्राय देहातिरिक्त आत्मैव प्रतिबिम्बादिवैलक्षण्येनापहतपाप्मत्वादिगुणाष्टकविशिष्टतयोक्तक्रमेण तेन व्युत्पादनीय आसीत् । तन्मध्ये परज्योतिरुपसंपत्तिश्च सर्वकामाप्तिनिरूपणाय ज्ञापयामास । एवमपि यस्मादिन्द्रः तदुपरि परज्योतिःस्वरूपं न पप्रच्छ, कदाचित् तद्विषयेऽपि प्रश्नप्रतिवचनयोः प्रवृत्तत्वेऽपि प्रागेव तस्य ज्ञापितत्वादिना श्रुतिरत्र यस्मात् जीवात्मोपदेशांशमात्रं न्यबध्नात्, तस्मात् विद्येयं यावच्छ्रुतं जीवयाथात्म्यशोधिकैवेति । वक्ष्यति च भाष्ये, "इन्द्रस्यापि पश्चाद् दहरविद्योपदिष्टेत्येवावगन्तव्यत्वेने" ति । एवं प्रतर्दनविद्यापि काचिदिन्द्रेणादृता परविद्या कौषीतक्यां प्रसिद्धेति नेन्द्रस्य परविद्यालोपः । तत् सिद्धं प्रजापतिविद्या जीवविद्येति । उपर्यपि दहरविद्याशेषदर्शनात् प्रधानविद्यान्तरस्य मध्ये निवेशायोगाच्चैवमिति ।

तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः। तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति। तौ होचतुर्य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते। तमिच्छन्तावावास्तमिति।

तौ ह प्रजपतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यते, एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति।

तौ— ऊषतुः। द्वात्रिंशद्वर्षाणि शुश्रूषापरौ भूत्वा ब्रह्मचर्यं चेरतुरित्यर्थः। **तौ ह** — **अवास्तमिति**। किं प्रयोजनमुद्दिश्य उषितवन्ताविति पृष्टवानित्यर्थः। **तौ होचतुः** —। य आत्माऽपहतपाप्मेत्यादि हि भगवतः पूज्यस्य तव वचो वेदयन्ते ऐतिह्यरूपेण जनाः। **तमिच्छन्तावावास्तम्** = तज्ज्ञानमिच्छन्तावावां ब्रह्मचर्यमुषितवन्ताविति तौ प्रजापतिं प्रत्यूचतुरित्यर्थः। **अवास्तमिति** पुरुषव्यत्ययः छान्दसः।

तौ ह — **ब्रह्मेति**। अत्र, "य एषोऽक्षिणि पुरुषो दृश्यत इति नेहाक्षिपुरुषः परमात्मा। 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इत्युपक्रम्य स्वप्नाद्यवस्थानामभिधानात्। न चायं छायादिपुरुषः प्रजापतिनोपदिश्यते, आत्मजिज्ञासयोपसन्नयोस्तयोस्तदुपदेशायोगात्। आत्मत्वामृतत्वाभयत्वब्रह्मत्वाद्ययोगाच्च। अतोऽत्र प्रजापतिना प्रत्यगात्मैवोपदिश्यते। न चेहाक्षिणि जीवस्थितिरुपदिश्यते, अपितु अक्षिप्रसादविकाराभ्यां जीवस्य स्थितिगती निश्चीयेते। अतोऽक्ष्णो जीवस्थितिगतिसूचकत्वादक्षिणि दृश्यत इत्युक्तम्। कर्मणः सामर्थ्यसूचकत्वाभिप्रायेण, अस्मिन् कर्मणि अस्य सामर्थ्यं दृष्टमितिवत्। ततश्च गृहे स्थित्वा निर्गच्छन् पुरुषो यथा गृहादन्यः, एवं शरीरे स्थितिगतिमान् आत्माऽपि शरीरादन्य इत्युक्तं भवति। **अमृतमिति** निरतिशयसुखरूपत्वम्, **अभयमिति** दुःखासम्भिन्नत्वम्, **ब्रह्मेत्यसङ्कुचितविज्ञानतया बृहत्त्वं चोक्तम्**" इति **व्यासार्यैरुक्तम्**।

अथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इति एष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति स होवाच ॥

इति अष्टमाध्याये सप्तमः खण्डः ।

अथ — इति । एवं प्रत्यगात्मनि प्रजापतिनोपदिष्टे, छायापुरुषः आत्मेत्युपदिष्ट इति भ्रान्त्या स्वगृहीतच्छायापुरुषात्मत्वदृढीकरणाय जलादर्शादिप्रतिबिम्बोऽप्यक्षिप्रतिबिम्बाभिन्नात्मैव उत तद्भिन्नोऽनात्मेत्यभिप्रायेण पप्रच्छतुरित्यर्थः । एवं ताभ्यां पृष्टः प्रजापतिः तयोर्भ्रान्तिमनिराकुर्वन्नेवाह — **एष — होवाच** । यश्चक्षुषि दृश्यत्वेन मयोक्तः, स आत्मा सर्वान्तरो जलादिष्वपि न भिद्यत इत्युत्तरं ददावित्यर्थः । शिष्यभ्रान्तिमनिराकृत्य तद्भ्रान्तिदृढीकरणायेत्थमुत्तरं ददत आचार्यस्यायमभिप्रायः—सुरासुरेन्द्राविन्द्रविरोचनौ स्वात्मनि अध्यारोपितपाण्डित्यमहत्त्वातिशयौ ; तथैव जगति प्रसिद्धौ च । तद्यदि, 'युवां भ्रान्ता' विति ब्रूयाम्, तदा चित्तावसादात् पुनः प्रश्नग्रहणधारणेषु भग्नोत्साहौ स्याताम् । अतो यथाश्रुतप्रश्नमात्रस्योत्तरमिदानीं वक्तव्यमिति । अनेन चोत्तरेण पूर्वोत्पन्नप्रतिबिम्बात्मभ्रमो दृढीभवति चेत् — भवतु । दृढीभूतोऽपि स भ्रम उदशरावनिरीक्षणनियोजनोपायेनापनेष्यत इति [च] । अत एव तद्भ्रमापनयनार्थमेव[1] 'उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथः तन्मे प्रब्रूत' मिति उदशरावावेक्षणे तौ नियुयोज । अत्र **व्यासार्यैः** 'एतादृशाभिप्रायपरिकल्पनस्यातिक्लिष्टत्वात्, 'योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इति एष उ एवैषु सर्वेष्वन्तेषु परिख्यायत' इत्येतावान् सर्वोऽशोऽपि प्रश्न एव । प्रश्नवाक्यमध्यगत **इति**शब्दः प्रश्नान्ते निवेशयितव्यः । **इति स होवाचे**त्येतत् उत्तरस्योदशरावब्राह्मणस्य शेषभूतम् । 'उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथः, तन्मे प्रब्रूतमितीति होवाचेत्युत्तरेणान्वयः । तत्र च एक इतिशब्दः समाप्तिद्योतकः । अन्यस्तु प्रकारवचनः । अथवा कतम-

1. पनयनार्थमाह क.

८—८

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति। तौ होदशरावेऽवेक्षाञ्चक्राते। तौ ह प्रजापतिरुवाच—किं पश्यथ इति। तौ होचतुः, सर्वमेवेदमावां भगव आत्मानं पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति।

तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदश-

एष इती'त्यत्र **इति**शब्दो वक्ष्यमाणवचनः। अन्यत्र तूक्तवचनः[1]। यद्वा प्रश्नवाक्ये प्रथम **इति**शब्दः प्रकारवचनः, द्वितीयस्तु प्रश्नसमाप्तिद्योतकः। **स होवाचेति** तूत्तरशेषभूतम्। **प्रब्रूतमिति** सहोवाचेत्यन्वय इत्येवं नेतिशब्दद्वयवैयर्थ्य'मित्यभिप्रेत्य, "प्रजापतिहृदयानभिज्ञानेन छायापुरुष उपदिष्ट इति मत्वा पुनः पप्रच्छतुः—योऽयं भगवोऽप्सु परिख्यायत इत्यादिना। सर्वेष्वन्तेषु नेत्रादिस्थानेषु परिख्यायते कतम एष इत्यर्थ" इत्युक्तम्। चक्षुरादिप्रतिबिम्ब एवात्मेति स्वग्रहणदार्ढ्यर्थं पुनरपि पप्रच्छतुरिति भावः। अप्सु परिख्यायते, आदर्शे परिख्यायते इत्येवंप्रकारेण जलादिष्वन्तेषु स्थानेषु यो दृश्यते, स नेत्रे दृश्यमान एष भवदुक्त एव किम्, उतान्यः, कतम एष इत्यर्थ इति **व्यासार्या**णामभिप्रायः॥ ८—७.

उदशरावे—प्रब्रूतमिति। उदकपूर्णे [2]शरावे आत्मानं दृष्ट्वा आत्मसम्बन्धिनमनुपपन्नतया भासमानं सम्यगनवगतमंशं युवां वदतमितीत्युक्तवानित्यर्थः। **तौ होदशरावेऽवेक्षाञ्चक्राते**। तौ प्रतिबिम्बमवलोकितवन्तौ। अवलोक्यापि दोषास्फुरणात् तूष्णीमुषितवन्तौ। तयोरनुपपत्त्यस्फुर्तिं ज्ञात्वा, किं पश्यथ इति स्वयमेव प्रजापतिरुवाचेत्याह—**तौ ह प्रजापतिरुवाच किं पश्यथ इति—तौ होचतुः—प्रतिरूपमिति**। इदं प्रतिरूपमात्मानं पश्याव इति प्रतिबिम्बात्मभ्रममेवोद्घाटितवन्तावित्यर्थः।

तौ ह—अवेक्षेथामिति। **तौ ह—अवेक्षाञ्चक्राते। तौ ह—पश्यथ इति**। स्पष्टोऽर्थः। **तौ होचतुः — परिष्कृताविति**। आवां साध्वलङ्कृतौ भवाव इतीदं यथैव तथैव इमावपि प्रतिबिम्बौ साध्वलङ्कारादियुक्ताविति प्रत्यूचतुरित्यर्थः।

1 'वचन इत्येवमितिशब्दद्वयं सुयोजनमित्यभिप्रेत्य'इतीदं अभिप्रेत्येत्यन्तस्थाने **क. कोशे**। 2. उदकपूर्णे उदशरावे **ख.**

यदात्मनो न विजानीथ इति। अपहतपाप्मत्वादिगुणाष्टके यदि कोऽप्यंशोऽत्र नास्ति, तर्हि पुनरागन्तव्यमिति गुरोर्गूढ आशयः।

रावेऽवेक्षेथा[1]मिति । तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षाञ्चक्राते । तौ ह प्रजापतिरुवाच किं पश्यथ इति । (२).

तौ होचतुः—यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्वः, एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृताविति। एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति । तौ ह शान्तहृदयौ प्रवव्रजतुः । (३).

तौ हान्वीक्ष्य प्रजापतिरुवाच—अनुपलभ्यात्मानमननुविद्य व्रजतः ।

1. अवेक्ष्येथां. मा.

अत्र उदशरावावेक्षणालङ्कृतदेहप्रतिबिम्बनिरीक्षणयोर्नियुञ्जानस्य प्रजापतेरयमभिसन्धिः— आगमापायशालि—द्वात्रिंशद्वर्षब्रह्मचर्यदीर्घीभूतकेशनखवस्त्रालङ्कारादिलक्षणदोषगुणयुक्ताव्यवस्थितदेहानुकारिदोषगुणवत्त्वात् देहवत्(हतत्त)त्प्रतिबिम्बोऽप्यनात्मा निरतिशयसुखत्वदुःखासम्भिन्नत्वलक्षणामृतत्वाभयत्वशून्य इति जानीतमिति । एवं द्विविधनियोजनेऽपि तयोरप्रक्षीणकल्मषतया दोषादर्शनेन प्रतिबिम्बात्मभ्रमो नापनीतः । ततः प्रजापतिः, 'भ्रान्तिनिवारणार्थं मया कृतस्य द्विविधप्रतिबिम्बदर्शनस्याभिप्रायमिमौ अप्रक्षीणकल्मषत्वान्नावगच्छतः । प्रत्यक्षं, 'युवां भ्रान्ता'विति वक्तुमप्यनर्हौ । तदिदानीमेतदीयहृदयानुरोधेन प्रतिबिम्बमेव निर्दिश्य सर्वान्तरं परमात्मानं मनसि निधाय एष एवात्मेत्युपदेशेन तयोराकाङ्क्षां निवर्तयिष्यामि । कालेन कल्मषे प्रक्षीणे मद्वचनसन्दर्भस्य सर्वस्याप्यभिप्रायं स्वयमेवावगमिष्यतः इति, विचिकित्समानौ वा[1] मत्समीपमागमिष्यत इति मत्वाऽऽह—**एष**—**ब्रह्मेति** । स्पष्टोऽर्थः । **तौ** — **प्रवव्रजतुः** । **शान्तहृदयौ** निवृत्ताकाङ्क्षावित्यर्थः ।

तौ हान्वीक्ष्य प्रजापतिरुवाच । एवं तयोः प्रतिनिवृत्तयोस्ततोः प्रजापतिः भ्रान्तिगृहीतार्थश्रद्धया इमौ विनष्टौ मा भूतम्, इदमपि मद्वचनम्, 'य आत्मे'ति वचनवत् कर्णाकर्णिकया शृणुतामित्यभिप्रेत्योवाचेत्यर्थः । उक्तिमेवाह — **अनुपलभ्य** — **भविष्यन्तीति** । एताविन्द्रविरोचनौ आत्मस्वरूपं श्रवणमननाभ्यामज्ञात्वा

1. 'वा' इति क. कोशे. 'पुन'रिति ख. कोशे ।

कर्णाकर्णिकयेति । तथाच नेयं तौ प्रति साक्षादुक्तिः । व्रजत इति प्रथमपुरुषविरोधात् । विरोचनस्याप्येतच्छ्रवणे निवृत्त्यसंभवाच्च । अतो वचनमिदमात्मगतं वा, अन्तिकस्थ-

यतर एतदुपनिषदो भविष्यन्ति देवा वा असुरा वा, ते पराभविष्यन्तीति।

स ह शान्तहृदय एव विरोचनोऽसुरान् जगाम। तेभ्यो हैतामुपनिषदं प्रोवाच—आत्मैवेह महय्य आत्मा परिचर्यः। आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकावाप्नोतीमञ्चामुञ्चेति। (४).

तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुः, आसुरो बतेति।

व्रजतः गच्छतः। **यतरे** देवा वा असुरा वा एतदुपनिषदो भविष्यन्ति, **उपनिषच्छब्दः** उपदेशपरः। अनयोरुपदेशाद् भ्रान्तिगृहीतार्थनिश्चया ये भविष्यन्ति, ते पराभविष्यन्ति नित्यसंसारिणो भविष्यन्तीत्यर्थः।

स ह—प्रोवाच। विरोचनस्तु प्राजापत्यस्य द्विविधदेहच्छायादर्शननियोगस्य, देहानुकारित्वाच्छायायाः देह एवात्मेति सूचने तात्पर्यम्—अलङ्कृतदेहच्छायां निर्दिश्य 'एष आत्मे'त्युपदेशस्य, 'नीलानीलयोरादर्शे दृश्यमानयोर्वाससोर्यन्नीलं तत् महार्घम्' इति वचनस्य छायानिमित्ते वाससीव, अलङ्कृतदेहे तात्पर्यमिति मन्वानः, 'देह एवात्मा अलङ्कारादिभिः परिचरणीय' इति निश्चित्य राज्यं प्राप्य असुरेभ्यस्तथोपादिक्षदित्यर्थः। **आत्मैवेह महय्य—अमुञ्चेति**। **आत्मैव** देह एव **महय्यः** पूज्य इत्यर्थः। **उभौ लोकाविति**। सर्वलोकसुखानुभवोऽपि शरीरगत एवेति भावः। शिष्टं स्पष्टम्।

स सम्प्रदायोऽद्याप्यनुवर्तत इत्याह **तस्मात्—उपनिषत्**। यस्मादसुरेभ्य एवेयमुपनिषत् प्रवृत्ता, तस्मात् [1]इह लोकेऽद्यापि शिष्टा यागदानश्रद्धाविधुरं पुरुषम-

1. तस्मादित्येतदनन्तरम्—'यागदानश्रद्धावैमुख्यहेतुभूता नास्तिक्यबुद्धिरसुराणामेव हि। अत एव तादृशं पुरुषं जना असुरमाहुरित्यर्थः।' इति **ख.**

यत्किञ्चित्पुरुषं प्रति वेत्याशयः। **उपदेशपर** इति देहात्मभ्रमकरवाक्यजातस्य रहस्यत्वरूपोपनिषत्त्वायोगादेवमर्थ इति भावः। अस्यैव वाक्यजातस्य रहस्यत्वं भ्रान्तशिष्यबुद्ध्या स्थितं कृत्वा एवं प्रयोग इत्यपि सुवचम्। **एतदुपनिषदो भविष्यन्ति** उक्तं वाक्यमुपनिषत्त्वेन ग्रहीष्यन्तीति यावत्।

इमञ्चामुञ्चेति। देवासुराणां मनुष्याधिकशक्तिसंपत्त्या तेनैव देहेन सर्वलोकसञ्चारात् मनुष्यवत् देहान्तरापेक्षणाप्रसक्तेः देहात्मभ्रमो निरूढो विरोचनस्य।

असुराणाँ ह्येषोपनिषत् । प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति सँस्कुर्वन्ति । एतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते । (५).

इति अष्टमाध्याये अष्टमः खण्डः ।

८—९.

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श । यथैव खल्वयमस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति, सुवसने सुवसनः, परिष्कृते परिष्कृतः, एवमेवायमस्मिन्नन्धेऽन्धो भवति, स्रामे स्रामः, परिवृक्णे परिवृक्णः; अस्यैव शरीरस्य नाशमन्वेष नश्यति । नाहमत्र भोग्यं पश्यामीति । (१).

स समित्पाणिः पुनरेयाय । तँ ह प्रजापतिरुवाच—मघवन् यच्छान्त-

सुरस्वभाव इत्याहुः । अत्र हेतुः **असुराणां ह्येषोपनिषत्** । यागदानश्रद्धावैमुख्यहेतुभूता नास्तिक्यबुद्धिरसुराणामेव हीत्यर्थः । **प्रेतस्य शरीरं—मन्यन्ते** । यत एवं देहस्यैवात्मतया परिचरणीयत्वम्, अत एव **प्रेतस्य** मृतस्य शरीरं भिक्षित्वा वस्त्रालङ्कारादिभिः पूजयन्ति, कुणपसंस्कारेणैव परलोकजयं मन्यमाना इत्यर्थः ॥ ८—८.

अथ—ददर्श । इन्द्रस्य शुद्धान्तःकरणत्वात् देहात्मभ्रमोऽपि नाभूत्, सः स्वराज्यं प्राप्य देवेभ्यः तदुपदेशात् प्रागेव मध्येमार्गं प्रतिबिम्बात्मन्यपीमं वक्ष्यमाणं दोषमपश्यदित्यर्थः । **यथैव—परिष्कृतः** । अयं देहप्रतिबिम्ब इत्यर्थः । **परिष्कृते** अपाकृतनखलोमादिके इत्यर्थः । **एवमेव—पश्यामीति** । नासिका यस्य सदा स्रवति, स **स्रामः** । छिन्नपाणिपादः **परिवृक्णः** । प्रतिबिम्बस्य बिम्बभूतशरीरगतसाध्वलङ्कृतत्वसुवसनत्वपरिष्कृतत्वानुविधायित्ववत् तद्वदान्ध्य—स्राम्य—परिवृक्णत्व—नाशानुविधायित्वावश्यम्भावेनामृतत्वाभयत्वात्मत्वादिकं न भवतीत्यमन्यतेत्यर्थः ।

स समित्पाणिः—उवाच । सः इन्द्रः एयाय । प्रजापतिमिति शेषः । **मघवन्—पुनरागम** इति । हे मघवन् शान्तहृदयः शान्तदोषशङ्को विरोचनेन सार्धं

भिक्षित्वेति । मृतस्य भिक्षाभोक्तृत्वायोगात् **भिक्षयेत्यस्य** भिक्षित्वेत्यर्थ उक्तः ।

हृदयः प्राव्राजीः, सार्धं विरोचनेन, किमिच्छन् पुनरागम इति । स होवाच यथैव खल्वयं भगवोऽस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति, सुवसने सुवसनः, परिष्कृते परिष्कृतः, एवमेवायमस्मिन्नन्धेऽन्धो भवति, स्रामे स्रामः, परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति । नाहमत्र भोग्यं पश्यामीति । (२) । एवमेवैष मघवन्निति होवाच, एतं त्वेव ते भूयोऽनुव्याख्यास्यामि । वसापराणि द्वात्रिँशतं वर्षाणीति । स हापराणि द्वात्रिँशतं वर्षाण्युवास । तस्मै[1] होवाच । (३).

इति अष्टमाध्याये नवमः खण्डः ।

८—१०

य एष स्वप्ने महीयमानश्चरति, एष आत्मेति होवाचैतदमृतमभयमेतत् ब्रह्मेति । स ह शान्तहृदयः प्रव्रव्राज । स हाप्राप्यैव देवानेतद्भयं ददर्श । तद्यद्यपीदँ शरीरमन्धं भवति अनन्धः स भवति; यदि स्राम

1. तस्मै. स ह **मा.**

यत् यः[1] त्वं **प्राव्राजीः** गतवान्, सः किं प्रयोजनमभिलषन् पुनरागतोऽसीत्यर्थः । **आगम** इति गमेर्लुङि लृदि[2]त्वादङ् । **स होवाच—पश्यामीति** । उक्तोऽर्थः ।

एवं—उवास । हे मघवन्! त्वदुक्तं सत्यमेव । उक्तमिममेवात्मानं पुनरपि त्वदुक्तदोषशून्यतया प्रतिपादयिष्यामि । अन्तःकरणशुद्ध्यर्थमितोऽपि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यं वसेति प्रजापत्याज्ञप्तो मघवांस्तथैव कृतवानित्यर्थः । **तस्मै होवाच** । एवमुषितवते इन्द्राय प्रजापतिर्वक्ष्यमाणमुवाचेत्यर्थः ॥ ८—९.

य एष—ब्रह्मेति । यः स्वप्ने स्त्र्यादिभिः **महीयमानः** पूज्यमानश्चरति, एषः स्वप्नद्रष्टा निरतिशयसुखत्वादिलक्षणामृतत्वादियुक्त आत्मेत्युक्तवानित्यर्थः । नायं पूर्वोक्तदेहगतान्ध्यस्राम्याद्यनुविधायित्वलक्षणदोषदुष्ट इति भावः । **स ह शान्त—ददर्श** । उक्तोऽर्थः । तदेवाह—**तद्यद्यपि—स्रामः** । तदिदं शरीरं यद्यप्यन्धं भवति, तथाऽपि सोऽनन्धो भवतीति योजना । **सः** स्वप्नात्मा ।

1. यः **ग.** यस्मात्. **ख.** 2. लङि. ङित्त्वात्. **ख.**

प्राव्राजीः । सुनिश्चितार्थस्य पुनरनिवर्तमानस्येव ते प्रकृष्टं व्रजनमासीदित्यर्थः । एवं प्रागपि ।

मस्रामः; नैवैषोऽस्य दोषेण दुष्यति (१), न वधेनास्य हन्यते, नास्य स्राम्येण स्रामः। घ्नन्ति त्वेवैनं विच्छाद(य)यन्तीव; अप्रियवेत्तेव भवति; अपि रोदितीव। नाहमत्र भोग्यं पश्यामीति। (२).

स समित्पाणिः पुनरेयाय। तँ ह प्रजापतिरुवाच–मघवन् यच्छान्तहृदयः प्राव्राजीः, किमिच्छन् पुनरागम इति। स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति, यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति। (३). न वधेनास्यहन्यते नास्य स्राम्येण[1] स्रामः। घ्नन्ति त्वेवैनं विच्छादयन्तीव। अप्रियवेत्तेव भवति। अपि रोदितीव। नाहमत्र भोग्यं पश्यामीति। एवमेवैष मघवन्निति होवाच। एतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिँशतं वर्षाणीति। स हापराणि द्वात्रिँशतं वर्षाण्युवास। तस्मै होवाच ॥ (४).

इति अष्टमाध्याये दशमः खण्डः।

८—११.

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति, एष आत्मेति

1. स्रामेण. मा.

शिष्टं स्पष्टम्। [न वधेन—स्रामः। स्वप्नात्मेति शेषः। स्पष्टोऽर्थः] **घ्नन्ति त्वेवैनं विच्छादयन्तीव**। एवशब्द इवार्थः। **एनं** स्वप्नात्मानं केचन **घ्नन्तीव**, केचन **विच्छादयन्ति** द्रावयन्तीव भान्तीत्यर्थः। **अप्रिय—पश्यामीति**। हन्यमानत्वद्राव्यमाणत्वबन्धुजनमरणाद्यप्रियवेत्तृत्वरोदितृत्वादिदर्शनात् स्वप्नावस्थस्य न भोग्यत्वमित्यर्थः ॥

स—होवाच। उक्तोऽर्थः। ८—१०.

तद्यत्र—ब्रह्मेति। **यत्र** यदा **तदेतत्** स एष पुरुषः। 'सुपां सु लुक्'इति सोर्लुक्। **समस्तः** उपसंहृतकरणग्रामः। **संप्रसन्नः** बाह्यविषयसंपर्कजनितकालुष्य-

---

यदि स्राममस्राम इत्यस्य, यद्यपीदं शरीरं स्रामं भवति, तथाप्यस्रामः स भवतीत्युनघ्नसिद्धोऽर्थः।

न वधेनेत्यादौ पूर्ववाक्यात् **एष** इति कर्तुरनुभङ्गः। **अप्रियवेत्ता। वेत्ता** प्राप्ता।

होवाच—एतदमृतमभयमेतद्ब्रह्मेति। स ह शान्तहृदयः प्रवव्राज। स हाप्राप्यैव देवानेतद्भयं ददर्श—नाह[1] खल्वयमेवँ संप्रत्यात्मानं जानात्य, यमहमस्मीति; नो एवेमानि भूतानि। विनाशमेवापीतो भवति। नाहमत्र भोग्यं पश्यामीति। (१).

स समित्पाणिः पुनरेयाय। तँ ह प्रजापतिरुवाच—मघवन् यच्छान्तहृदयः प्राव्राजीः किमिवेच्छन् पुनरागम इति। स होवाच नाह[2] खल्वयं भगव एवँ संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि। विनाशमेवापीतो भवति। नाहमत्र भोग्यं पश्यामीति।

एवमेवैष मघवन्निति होवाच, एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात्। वसापराणि पञ्च वर्षाणीति। स हापराणि पञ्च वर्षाण्युवास। तान्येकशतँ संपेदुः।

1-2. नाहं. मा.

रहितः। शिष्टं स्पष्टम्। स ह—ददर्श उक्तोऽर्थः। दोषदर्शनमेवाह—नाह खलु—पश्यामीति। अह इत्याश्चर्ये। [अयं सुषुप्तः संप्रति सुषुप्तिकाले] अयमहमस्मीति विशेषज्ञानाभावेन स्वेतरभूतविषयकज्ञानाभावेन च सुषुप्तो विनष्टप्राय इत्यर्थः। विनाशमेव विनाशमिव। अपीतः [1]अपि इत इतिच्छेदः। विनष्टप्राय इत्यर्थः।

स—पश्यामीति। उक्तोऽर्थः। एवं —। एतस्मात् पूर्वोक्तात् अन्यत्र इतरत् नो व्याख्यास्यामि। किन्तु एतमेव पूर्वोक्तमेव निर्दोषतया व्याख्यास्यामीत्यर्थः। तान्येकशतं संपेदुः। तानि वर्षाण्याहत्य एकशतं संपन्नानीत्यर्थः। एतत्—

1 अपीतः अपिगतः ख.

संप्रति इत्यस्य ऋजु इत्यप्यर्थ आगुक्तो भाष्यः। अर्थद्वयमप्युक्तं शाङ्करे, 'सम्यक् इदानीञ्च' इति। अपीतः अपि इत इतिच्छेद इति पाठे अयमाशयः। विनाशमित्यनेनैवा व्ययस्योक्तत्वात् विनाशं गत इत्यर्थवर्णनाय इत इति पृथक्कार्यम्। अपिशब्दस्तु चार्थे इति।

एतत् तत्, यदाहुः, एकशतँ ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास। तस्मै होवाच।

इति अष्टमाध्याये एकादशः खण्डः।

८—१२.

मघवन् मर्त्यं वा इदँ शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्। आत्तो वै सशरीरः प्रियाप्रियाभ्याम्। न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः।

उवास। एकशतसंवत्सरान् इन्द्रः प्रजापतेः सन्निधौ ब्रह्मचर्यं चरन् उवासेति लोके प्रसिद्धतया यदाहुः, तत् **एतत्** एवंविधम्=अनेन प्रकारेणेति यावत्। **तस्मै होवाच।** एकशतवर्षब्रह्मचर्यनिर्मलीकृतान्तःकरणाय मघवते शुद्धात्मस्वरूपयोग्यतां परीक्ष्योपादिक्षदित्यर्थः। अनया चाख्यायिकया बहुकालब्रह्मचर्यनिर्मलीकृतान्तःकरणतया संपन्नोपदेशयोग्यत्वाय उपदेष्टव्यमित्यर्थः सूच्यते। ८—११.

मघवन्—अधिष्ठानम्। [वाशब्द (वैशब्द?) एवार्थे।] हे मघवन्! इदं शरीरमेव हि। **मर्त्यं** मरणधर्मि। न केवलं मरणधर्मित्वमात्रम्, अपितु मृत्युना **आत्तं** [1]तद्व्याप्तञ्च। सततविनाशशीलमिति यावत्। इदञ्च शरीरे हेयत्वानुसन्धानार्थमुक्तम्। एवंभूतं **तदिदं** शरीरं कर्मकृतशरीरराहित्यलक्षणामृतत्वस्वरूपस्यात्मनो भोगाधिष्ठानम्। कर्मवशेन जीवेन भोगार्थं परिगृहीतमित्यर्थः। ततश्चाशरीरत्वमेव स्वरूपम्। सैवामृतत्वलक्षणा मुक्तिः; [2]सशरीरत्वमेव तदभाव इत्युक्तं भवति। ननु पुरुषार्थस्य हि मुक्तिरूपत्वं वक्तव्यं, न ह्यशरीरत्वं पुरुषार्थः। अपितु दुःखाभावः। ततश्च तस्यैवामृतत्वरूपत्वमुचितम्; न त्वशरीरत्वस्येत्यत्राह—**आत्तो वै—प्रियाप्रियाभ्याम्।** स्पष्टोऽर्थः। तदेवोपपादयति—**न ह—अस्ति।** कर्मारब्धशरीरयोगिनः तदनुगुणसुखदुखयोगस्यावश्यम्भावित्वात् कर्मणाऽऽरब्धदेहसम्बन्धाभावस्य पुरुषार्थतया मुक्तिरूपत्वमुपपद्यत इति भावः। व्यतिरेकं दर्शयति—**अशरीरं—स्पृशतः। वाव**शब्दः प्रसिद्धौ; अवधारणे वा। शिष्टं स्पष्टम्॥

1. आक्रान्तञ्च. क. 2. कर्मकृतशरीरत्व. क.

अशरीरो वायुः ; अभ्रं विद्युत् स्तनयित्नुः अशरीराण्येतानि । तद्यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते, एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ।

अशरीरो वायुः—शिरःपाण्यादिलक्षणशरीरशून्यो वायुरित्यर्थः । **अभ्रं—एतानि** । अभ्रादीनि चाशरीराणीत्यर्थः । 'अभ्रं भूत्वा मेघो भवती'त्यादिवत् अभ्रस्तनयित्न्वोरवस्थामेदेन भेदो द्रष्टव्यः । अशरीराणाञ्च प्रियाप्रियानन्वयो दृष्ट इति भावः । **तद्यथा-निष्पद्यते** । अत्र व्यासार्यैः,

"वाय्वादीनामाकाशात् समुत्थानं नाम स्वकार्यकरणायोर्ध्वदेशे अभिवृद्धिः । **परशब्दो** वाय्वादीनां कारणावस्थावाची । **ज्योतिश्शब्दस्तु** कारणानां कार्योत्पादनद्वारेण तदभि(व्यञ्जक)व्यक्तिहेतुतया प्रयुक्तः । वाय्वादीनि च कारणद्रव्यमुपगम्य कार्यावस्थां हित्वा कारणसदृशेन रूपेण विशिष्टानि भवन्ति । वायुर्हि आवहप्रवहादिरूपेण सप्तविधत्वं हित्वा वायुत्वमात्रेणावतिष्ठते । विद्युत्तु विद्युत्त्वं हित्वा तेजस्त्वेन । अभ्रस्तनयित्नू चाभ्रत्वादिप्रहाणेन स्वकारणभूतरूपेण । एवं जीवोऽपि मार्गविशेषेण देशविशेषविशिष्टं परं ब्रह्म प्राप्य संसार्यवस्थाप्रहाणेन परमात्मतुल्यरूपेणाविर्भवतीत्येवमर्थे सत्येव दृष्टान्तदार्ष्टान्तिकवाक्यसामञ्जस्यं भवती"ति वर्णितम् ।

करणायेति । स्थितिकाल इति शेषः । **अमुष्मादाकाशात्समुत्थाये**त्यस्य अभ्रादिकं अभ्रत्वादिरूपेण यत्राकाशे कार्यकरमासीत्, **ततः समुत्थाय** तत्र तेन रूपेण कार्यकरणं विहायेत्यप्यर्थः सुवचः । महाभूतान्यवान्तरपरिणामात्मना स्थित्वा आकाशे कार्यं कृत्वा समुत्थाय अवान्तरपरिणामात्मतां परित्यज्य स्वं महाभूतरूपं लभन्ते, तद्वदित्यर्थ इति । **अमुष्मा**दिति निर्देशः अस्माच्छरीरादिति वक्ष्यमाणशरीरापेक्षया आत्मानं प्रति आकाशस्य विप्रकृष्टत्वात् । **एष संप्रसाद** इति सुषुप्तिवाचकस्य सुषुप्तविषयकस्य संप्रसादशब्दस्य प्रयोगः, यस्य संप्रसन्नस्यानात्मत्वमपुरुषार्थतया त्वया चिन्तितम्, स एव सुषुप्तौ स्वरूपाविर्भावाभावादपुरुषार्थवत् स्थितोऽपि, यदा शरीरात् समुत्थाय परंज्योतिरुपसंपद्यते, न तु शरीर एव स्थित्वा तदन्तर्यामिभूतमवतीर्णं ज्योतिः, तदा स्वरूपाविर्भावाद् भोगभाग् भवतीति ज्ञापनाय । केवलं शरीरात् समुत्थानं वा, वैकुण्ठं प्रति वासुदेवनीतधनञ्जयादेरिव केवलं परज्योतिरूपसंपत्तिर्वा न स्वरूपाभिनिष्पत्तिहेतुरिति ल्यबन्तद्वयनिर्देशः ।

इदञ्च वाक्यं फलपादे चिन्तितम्। 'स्वेन रूपेणाभिनिष्पद्यत' इति देवादिरूपवत् साध्येन रूपेणाभिनिष्पत्तिरुच्यते। अभिनिष्पत्तिशब्दस्यागन्तुकधर्मोत्पत्तिपरत्वात्। स्वशब्दः स्वात्मीयवचनः। आगन्तुकस्यापि रूपस्यात्मीयत्वात् **स्वेनरूपेणे**त्युपपद्यते। न तु 'स्वेन रूपेणाभिनिष्पद्यत' इत्यत्र स्वशब्दस्यात्मार्थकत्वं वा निष्पत्तिशब्दस्याविर्भावार्थकत्वं वा युक्तम्, स्वरूपस्य नित्यत्वेन तत्प्राप्तेरपुरुषार्थत्वप्रसङ्गादिति पूर्वपक्षे प्राप्ते उच्यते—"संपद्याविर्भावः **स्वेन**शब्दात्"। परं ज्योतिरुपसंपद्य स्वस्य रूपस्यैवाविर्भावः। न त्वागन्तुकात्मीयधर्मोत्पत्तिः। तथा हि सति 'स्वेन रूपेणाभिनिष्पद्यत' इत्यत्र **स्वेन**शब्दवैयर्थ्यप्रसङ्गात्। अतः **स्व**शब्दो नात्मीयवचनः; अपित्वात्मवचन एव। आविर्भावेऽप्यभिनिष्पत्तिशब्दो दृश्यते, 'युक्त्याऽयमर्थो निष्पन्नः', 'इदमेकं सुनिष्पन्न'मित्यादिषु।

अपि त्वात्मवचन इति। ननु अभिनिष्पद्यत इत्यस्य उत्पद्यत इति पूर्वपक्ष्यभिमतोऽर्थः, आविर्भवतीति सिद्धान्त्यभिमत इत्येतावदेव वैलक्षण्यम्। तत्राभिनिष्पत्तेः प्राक् उपसंपत्तिकालेपि जीवस्य स्थितत्वात् कथं तस्योत्पत्तिरित्यत्र, धर्मिसत्त्वेऽपि तत्र रूपस्योत्पत्त्या तद्विशिष्टत्वेषणोत्पत्तिः, 'रूपेणाभिनिष्पद्यत' इत्युच्यते, यथा आत्मा देवो जायत इति। यदि तत् रूपं स्वकीयं न स्यात्, जपाकुसुमारुण्यमिव स्फटिके औपाधिकं स्यात्, निष्पत्तिवचनमयुक्तं स्यादिति तदुपपादनाय **स्वेने**ति पदम्। एवं बन्धदशायां देहगतबालत्वादिनेव न पररूपेण निष्पद्यते, किंतु स्वेनेति च वक्तुमिदमिति पूर्वपक्षी। निष्पत्तिवचनादेव स्वकीयत्वसिध्या **स्वेने**ति व्यर्थमेव स्यादिति स्वेनेति पदं स्वभावभूतेन = स्वस्मिन् सर्वदा वर्तमानेन इत्यर्थकमिति तादृशरूपस्योत्पत्त्ययोगात् अभिनिष्पद्यत इति पदमुत्पत्त्याविर्भावोभयसाधारणं प्रकृते आविर्भावपरमिति सिद्धान्ती। एवंस्थिते स्वेनेत्यस्य आत्मनेति कथमर्थः। तथा हि सति आत्माविर्भाविस्यैव कथ्यमानतया **स्वेनरूपेणे**ति पददयमपि व्यर्थम्; **अभिनिष्पद्यत** इत्येव पर्याप्तं स्यात्। स्वयम्प्रकाशत्वादात्मा प्रागेवाविर्भूत इति चेत्—तर्हि यत् प्रागनाविर्भूतं संप्रत्याविर्भवति, तत् रूपमात्मव्यतिरिक्तमात्मीयमेव स्यादिति कथं सिद्धान्ते **स्वेने**त्यस्यात्मपरता?

उच्यते। रूपशब्दस्तावत् धर्मविशिष्टधर्मिपर्यन्ते प्रयुज्यते, यथा घटस्वरूपं, जीवस्वरूपं, परमात्मस्वरूपं, स्वरूपनिरूपकधर्मः, निरूपितस्वरूपविशेषणभूतो धर्म इत्यादौ। तद्वदिह ग्रहणे, आत्मनश्चिन्मात्रं स्वरूपमित्यादाविव स्वशब्द आत्मपरो युक्त एव। यदा तु ब्राह्मं रूपमपहतपाप्मत्वादीत्यादाविव रूपशब्दो धर्ममात्रपरः, तदा स्वशब्दः स्वभावपरत्वादात्मीयवचन एव। सर्वथा रूपमिदं देवादिरूपवत् आत्मबाह्यं किञ्चिन्न भवति, किन्तु यस्य धर्मस्याभावे धर्मी शशविषाणतुल्यः, तादृशस्वरूपनिरूपकधर्मात्मकमिति आत्मान्तर्गतमेवेति एतावदेवेहाभिमतमिति।

नन्वात्मनः पूर्वसिद्धत्वात् कथं तस्य पुरुषार्थत्वम्? तत्राह—"मुक्तः प्रतिज्ञानात्"। 'स्वेन रूपेणाभिनिष्पद्यते' इत्यस्य मुक्तो भवतीत्यर्थः। निवृत्ताविद्यातिरोधानो भवतीति यावत्। कथमिदमवसीयत इति चेत्—**प्रतिज्ञानात्**। जागराद्यवस्थात्रयकलुषितं जीवं प्रस्तुत्य, 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि, नो एवान्यत्रैतस्मा' दिति तस्यैव अशरीरत्वलक्षणमुक्तत्वम्, 'मघवन् मर्त्यं वा इदं शरीर'-मित्यादिना चतुर्थेन पर्यायेण प्रतिपादयिष्यामीति प्रतिज्ञानात्। निवृत्ताविद्यातिरोधानस्य[1] स्वेन रूपेण साध्यत्वमस्त्येवेति न पुरुषार्थत्वहानिः।

ननु निवृत्ततिरोधानस्याप्यात्मस्वरूपस्य कथञ्चित् साध्यत्वसम्भवेऽपि तस्य न पुरुषार्थत्वे प्रमाणमस्तीत्यत्राह—"आत्मा प्रकरणात्"। 'य आत्माऽपहतपाप्मे'त्यादिवाक्यसन्दर्भप्रतिपाद्यापहतपाप्मत्वादिगुणाष्टकविशिष्टतयाऽत्यन्तानुकूलत्वेन परमपुरुषार्थभूतोऽयमात्मा। अपहतपाप्मत्वादीनां कथं जीवसम्बन्धित्वमित्यत्राह **प्रकरणा**दिति। अवस्थात्रयकलुषितं जीवं प्रकृत्यैवापहतपाप्मत्वादिगुणानामाम्नानादित्यर्थ इति स्थितम्।

(२) 'स्वेने रूपेणाभिनिष्पद्यत' इत्युच्यमानं स्वरूपं किमित्याकाङ्क्षायाम् अस्मिन् प्रकरणे अपहतपाप्मत्वादिगुणानामेवोपन्यासात्, सत्यसङ्कल्पत्वकार्यजक्षणादिभ्यश्च ब्रह्मसंबन्धिना अपहतपाप्मत्वादिगुणलक्षणेन[स्वेन]रूपेणाविर्भवतीति जैमिनिराचार्यो मन्यत इति "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" इति जैमिनिमतमुपन्यस्य, 'प्रज्ञानघन एव, विज्ञानघन एवे'ति ज्ञानैकरसत्वाम्नानेन निर्धर्मकत्वप्रतिपादनात्, ज्ञानमात्रस्वरूपेणाविर्भवतीति, "चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमि" रित्यौडुलोमिमतमुपन्यस्य, "एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः" इति स्वसिद्धान्तमाविष्कृतवान्। तस्य चायमर्थः। **एवमपि** विज्ञानघनत्वेपि अपहतपाप्मत्वाद्युपन्यासेन, "ब्राह्मेण जैमिनिरुपन्यासादिभ्य" इति पूर्वसूत्रोक्त[2]ब्राह्मरूपस्यापि सद्भा[3]वात्, सैन्धवघनस्य कृत्स्नस्य[4] रसनेन्द्रियावगतरसघनत्वस्य चक्षुराद्यवगतरूपकाठिन्यादेश्चाविरोधवत् मानान्तरावगतब्राह्मरूपस्य च मानान्तरावगतविज्ञानघनत्वस्य चाविरोध इति बादरायण आचार्यो मन्यते; 'विज्ञानघन एवे'त्येवकारस्य स्वप्रकाशत्वान्यासांशनिषेधमात्रपरत्वादिति स्थितम्।

1. तिरोधानत्वलक्षण. क. 2. ब्रह्म. ख. 3. संभवात्. ख. 4. कृत्स्नस्य. क

स उत्तमः पुरुषः । स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरम् ।

यत् पैरुक्तम्, 'शरीरात् समुत्थाय शरीरे आत्माभिमानं हित्वा **स्वेन रूपेण** परमात्मरूपेण साक्षात्कृत्य परं ज्योतिर्भवति=परमात्मा भवतीत्यर्थः । न तु शरीरादुत्क्रमणं देशान्तरगमनं [1]वाऽत्र विवक्षितमिति—तदसत् । अपदार्थत्वात् । न हि '**शरीरात् समुत्थाये**' त्यस्य शरीरे आत्माभिमानं हित्वेत्यर्थो भवति । स्वरूपसाक्षात्कारलक्षणस्वरूपाभिनिष्पत्त्यनन्तरभाविनः परज्योतिर्भावस्य च 'परं ज्योतिरुपसंपद्ये' ति पूर्वकालतया निर्देशो न युक्तः । न हि सर्पात् समुत्थाय रज्जुमुपसम्पद्येति च प्रयोगो दृष्टचरः । वाय्वभ्रादिदृष्टान्तवैरूप्यञ्च स्पष्टमेव । किञ्च निर्विशेषब्रह्मभावोऽत्र, परं ज्योतिरुपसंपद्येत्यनेन विवक्षितश्चेत्, सुषुप्तिदशोद्घाटितस्य विशेषविज्ञानाभावप्रयुक्तनष्टप्रायत्वदोषस्यापरिहृततया तद्दोषपरिहाराय मुक्त्यवस्थोपदेशासाङ्गत्यं स्यादित्यास्तां तावत् ॥

स उत्तमः पुरुषः । स तत्र पर्येति । सः उपसम्पदनीयः उत्तमः पुरुष इत्यर्थः । 'उत्तमः पुरुषस्त्वन्य' इति भगवत एवोत्तमपुरुषत्वेन उपसम्पदनकर्तुर्युत्तमपुरुषत्वस्य बाधितत्वात्, 'स तत्र पर्येती' त्युत्तरवाक्यस्वारस्यभङ्गप्रसङ्गाच्च । **सः** उपसत्ता (संपत्ता?) **तत्र** परमात्मनि **पर्येति** । तं परितोऽनुभवति । यद्वा अनुसञ्चरतीत्यर्थः । 'कामरूप्यनुसञ्चरन्,' 'यत्रयत्र धाता गच्छती'ति[1] हि श्रुत्यन्तरम् । **जक्षत्—ज्ञातिभिर्वा** । यथेष्टं भोगान् अवाप्नोतीत्यर्थः । **नोपजनं स्मरन्निदं शरीरम्** । स्त्रीपुंसयोरन्योन्योपगमेन जातमित्युपजनत्वं शरीरस्य । तेन चापुरुषार्थत्वमुच्यते । अथवा उपजनं जनानां बन्धुजननां समीपे शयितम् । कुणपामित्यर्थः । यद्यपि मुक्तः सर्वज्ञत्वात् त्यक्तमपि शरीरमनुभवत्येव—तथाऽप्यब्रह्मात्मकया दुःखरूप-

1. तिश्रुत्यन्तरात्. क.

पर्येति । इण् गतौ । गत्यर्थस्य ज्ञानार्थत्वात् अनुभवतीत्यर्थः । **अनुसंचरतीत्यनेन** साक्षाद् गत्यर्थादरणमेव दर्शितम् । एवञ्च **पर्येति** परिचरतीत्यर्थश्च सुवचः । तेन जक्षणक्रीडनादिकं सर्वं पुरुषोत्तमपरिचर्यारूपमिति सिध्या ब्रह्मानुभवात्मकत्वं सर्वस्य भगवद्भागवतपरिचरणरूपानुभवस्य दर्शितं भवति । परितो गच्छति प्रदक्षिणं करोतीत्यर्थस्तु परिचर्यैकदेशत्वात् पृथङ् न वाच्यः ।

स यथा प्रयोग्य आचरणे युक्तः, एवमेवायमस्मिन् शरीरे प्राणो युक्तः। (३)

अथ यत्रैतदाकाशमनुविषण्णं चक्षुः, स चाक्षुषः पुरुषः; दर्शनाय चक्षुः। अथ यो वेदेदं जिघ्राणीति, स आत्मा; गन्धाय घ्राणम्। अथ यो वेदेदमभिव्याहराणीति, स आत्मा; अभिव्याहाराय वाक्। यो वेदेदँ शृणवानीति (शृण्वानीति), स आत्मा; श्रवणाय श्रोत्रम्। (४)

त्वेनानुभूतं शरीरं न मुक्तिदशायां तथाऽनुभवतीत्यर्थः। आत्मनोऽशरीरस्वभावत्वे प्राक्छरीरसम्बन्धः किन्निबन्धन इत्यत्राह—**स यथा—युक्तः**। यथा **आचरणे** शकटे **प्रयोग्यः** युग्यः अश्वो बलीवर्दो वा पाशेन युक्तो भवति, एवमेवायं **प्राणः** प्राणसहचरः (चारी) प्रत्यगात्मा संसारदशायां कर्मपाशेन युक्तो भवतीत्यर्थः। अनेन युग्यशकटदृष्टान्तेन देहात्मनोर्व्यतिरेको दृढीकृतो भवति॥

[1] अथेन्द्रियव्यतिरेकं प्रपञ्चयति। **अथ—चक्षुः**। **आकाशं** प्रकाशम्। आलोकादि। अथवा प्रकाश्यमानत्वादाकाशं रूपम्। ततश्चायमर्थः—यस्मिन्नुपकरणत्वेनानुविषण्णं निबद्धं चक्षुः आकाशं आलोकं रूपं वा प्रकाशयतीति शेषः। यद्वा **आकाशं** रूपादिप्रकाशकमित्यर्थः। सः **चाक्षुषः** चक्षुरुपकरणकः पुरुषः आत्मेत्यर्थः। चक्षुरुपकरणकमुद्दिश्य पुरुषशब्देनात्मत्वं विधीयते। चक्षुस्तु तद्दर्शनाय करणमात्रमित्यर्थः। ततश्च चक्षुरादीनां रूपादीनामात्मनश्च करणत्वज्ञेयत्वज्ञातृत्वप्रदर्शनमुखेन शरीरेन्द्रियेभ्यो व्यतिरेक उपपादितो भवति। **अथ—घ्राणम्**। गन्धग्रहणकरणं घ्राणम्। ज्ञाता त्वात्मेत्यर्थः। अनेन घ्राणेन्द्रियव्यतिरेक उक्तो भवति। **अथ—श्रोत्रम्**—स्पष्टम्।

1. अवतारिकेयं क. कोशे।

आलोकं रूपं वेति। आलोकमित्यर्थे, आलोकमनु = आलोकसहकारेण तमनुसृत्य विषण्णं संबद्धमित्यर्थोऽपि ग्राह्यः। रूपमित्यर्थे प्रकाशयतीति शेषपूरणमेव स्वरसम्। **आकाशं** देहच्छिद्रमिति शाङ्करम्। तन्न बाधितम्। प्रतिरूपग्राहिणि यन्त्र इव नेत्रगोले बिलस्वीकारात्। इन्द्रियमपि चक्षुरस्ति; न बिलमात्रात् कार्यमिति—अथापि उपरि, 'यो वेदेदं जिघ्राणीति' इत्यादितुल्यार्थपरत्वं **यत्रैतदाकाशमनुविषण्णमि**त्यस्य स्थानप्रमाणात् वक्तव्यमिति विमृश्य तदुपेक्षेति। **चाक्षुषः पुरुषः** चक्षुरिन्द्रियमेव प्रधानोपकरणं भजन् पुरुषः। घ्राणादीनामल्पग्राहिणामप्रधानत्वात् घ्राणः पुरुष इत्यादिकं नोक्तम्।

अथ यो वेदेदं मन्वानीति, स आत्मा ; मनोऽस्य दिव्यं चक्षुः । स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते, य एते ब्रह्मलोके । (५)

तं वा एतं देवा आत्मानमुपासते । तस्मात् तेषां सर्वे च लोका आप्ताः, सर्वे च कामाः ।

अथ--चक्षुः । सकलेन्द्रियविषयमननसाधनत्वात् मनो **दिव्यं चक्षुरुच्यते** । शिष्टं स्पष्टम् । **स —ब्रह्मलोके** । स एषः उक्तरीत्या शरीरेन्द्रियग्रामविलक्षण आत्मा विधूतकर्मनिमित्तशरीरेन्द्रियः पुरुषो मनश्शब्दाभिहितेन दिव्येन स्वाभाविकेन **चक्षुषा** ज्ञानेन पूर्वोक्तब्रह्मलोकशब्दितदहराकाशनिष्ठान् सर्वान् कामान् अनुभवन् मोदते इत्यर्थः ।

तं वा एतं -- कामाः । एतादृशात्मस्वरूपस्य प्रजापतिना **मघवते** उपदिष्टत्वात् देवाः सर्वे मघवतः एतमात्मानमुपश्रुत्य तमेवोपासते । अतस्तेषां सर्वलोकसर्वकामाप्त्युपलक्षितब्रह्मानुभवो भवति । असुराणां तु न तथेति भावः ।

पूर्ववत् मननाय मन इति कस्मान्नोक्तमित्यत्राह **सकलेन्द्रियेति** । **दिव्यं चक्षुः** अप्राकृतस्यापि वस्तुनः प्रत्यक्षवत् प्रकाशकं धर्मभूतज्ञानम् । न चाप्राकृतस्य स्वयम्प्रकाशत्वात् तत्प्रकाशाय धर्मभूतज्ञानमनपेक्षितमिति वाच्यम् — तद्द्रव्यस्य स्वयम्प्रकाशत्वेऽपि तद्गतधर्माणामस्वयम्प्रकाशानामनन्तानां प्रकाशाय धर्मभूतज्ञानस्यापेक्षणात् । **अस्य** संसारिणः इन्द्रियाधीनज्ञानप्रसरणस्य मन एव दिव्यं चक्षुः । मनसोऽभावे किमपि न ज्ञायते ; नतरां व्याहारादिरित्यर्थः । **स वा** इति । अत्र **अस्येत्येतदनुसृत्य** अयमित्यनुक्त्वा **स** इत्युक्तिः स्वेन रूपेणाभिनिष्पन्नस्य ग्रहणाय । **एतेन** पूर्वोक्तेन **दिव्येन चक्षुषा** धर्मभूतज्ञानेन **मनसा** संसारदशायां मनोधीनं विकासं भेजुषा । संसृतौ मनसः प्राधान्यात् **मनोऽस्य दिव्यं चक्षुरिति** मनसः पूर्वमुद्देशः । मुक्तौ तस्य निवृत्तत्वात् तत्कार्यस्यापि धर्मभूतज्ञानेन सिद्धिं ज्ञापयितुं **दिव्येन चक्षुषेति** पूर्वं निर्दिष्टम् ।

देवाः सर्वे । ननु देवानामिन्द्रादेतदात्माधिगमः इतः पश्चादेव भवितेति कथमिदानीं प्रजापतिना तस्य वर्तमानतया निर्देश इति चेत्—पूर्वं **य आत्मेत्यादिवाक्यस्य** प्रचारणं हि प्रजापतिना सर्वैरेतदर्थाधिगमाय कृतम् । तत्र देवासुराः प्रधानभूतौ **इन्द्रविरोचनौ** प्रेषयामासुः । निवृत्तो विरोचनः । **इन्द्रस्तु** आन्तमुपसद्य तत्त्वार्थं जग्राह । तदद्य तुष्यन् असुराणामेतदुपासनालाभं देवानां लाभञ्च सिद्धवत्कृत्य वर्तमानसामीप्ये **वर्तमाननिर्देशेनैवमुक्तम्** । यथा अत्रैव **आप्ता** इति फलस्य निष्पन्नत्वेन निर्देशः, तद्वदिति । श्रीभाष्ये, "**देवाः**

स सर्वाँश्च लोकानाप्नोति सर्वाँश्च कामान्, यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ (६)

इति अष्टमाध्याये द्वादशः खण्डः ।

स सर्वाँश्च—विजानाति। अद्यत्वेऽपि मनुष्याणामपि तमात्मानं श्रुत्वा उपासीनानां सर्वलोकसर्वकामावाप्तिर्भवतीत्यर्थः। अत्र किं प्रमाणमित्यत्राह—**इति ह—उवाचेति।** अत्र प्रत्यगात्मविद्यायाः ब्रह्मविद्याङ्गत्वेनाङ्गिभूतब्रह्मविद्याफलमेव तदङ्गभूतप्रत्यगात्मविद्यायां स्तुत्यर्थं निर्दिश्यत इति द्रष्टव्यम्। उक्तञ्च **भगवता भाष्यकृता,** "**प्रजापतिवाक्ये** च मुक्तात्मस्वरूपयाथात्म्यविज्ञानं दहरविद्योपयोगितयोक्तम्। ब्रह्मप्रेप्सोर्हि जीवात्मनः स्वस्वरूपञ्च ज्ञातव्यमेव। स्वयमपि कल्याणगुण एव सन् अनवधिकातिशयासंख्येयकल्याणगुणगणं परं ब्रह्मानुभविष्यतीति ब्रह्मोपासनफलान्तर्गतत्वात्, 'सर्वाँश्चलोकानाप्नोति सर्वाँश्च कामान्' इति प्रजापतिवाक्ये कीर्त्यमानं फलं दहरविद्याफलमेवेति।

ननु प्रजापतिविद्याया दहरविद्याङ्गत्वे दहरब्रह्मविद्याधिकृतायैवोपदेष्टव्या स्यात्, उपकोसलविद्याङ्गभूताग्निविद्यावत्। प्रकृते च दहरब्रह्मविद्याविधुरायेन्द्रायोपदिश्य-

---

ज्ञानिनः" इत्युक्तम्। तदा तु सनकसनन्दनादयो ये इन्द्रस्यापि देवाः, ते तदात्व एव तमात्मानमुपासीना इहोक्ताः स्युः। वस्तुतस्तु भाष्यगतिर्यथाशाङ्करमेवं स्यात्—**मघवन्मर्त्यं वेत्यतः** प्राक् तस्मै होवाचेत्युक्तत्वादेव प्रजापत्युपदिष्टत्वसिद्धौ **इति ह प्रजापतिरुवाचेति** वाक्यं व्यर्थम्, केवलमुपक्रान्तविद्योपसंहाररूपमिति वक्तव्यम्। तदपेक्षया **तं वा एतमित्यादि** श्रुतिवाक्यमस्तु; न प्रजापतिवाक्यम्। यद्वा **तस्मैहोवाचेत्यारब्ध** उक्तिप्रकारः, 'न प्रियाप्रिये स्पृशतः' इत्यत्र समाप्तोऽस्तु। **अशरीरो वायुरित्यादिकमुपरितनं** सर्वं वेदपुरुषवचनम्। एवञ्च, 'तं वा एतं देवा' इति अस्मान् प्रति श्रुतिराहेति समन्वितमेवेति। अत एव **इति ह प्रजापतिरिति** वाक्यमेवमवतारितं भाष्ये, **अत्र किं प्रमाणमित्यत्राहेति।** तथाचैवं प्रजापतिनोक्तत्वादस्मिन् फले श्रद्धा कार्येति श्रुतिराहेति यथाशङ्करं भाष्यगमनिकेति। वस्तुस्तु **अशरीरो** वायुरित्यादिकमपि प्रजापतिवाक्यमेव, **उत्तराच्चेदिति** सूत्रे, "एवमेवैष संप्रसादः" इत्यादि—"उपदिदेशे" त्यन्तश्रीभाष्यानुरोधात्। 'स उत्तम' इत्यादि मा भूत् प्रजापतिवाक्यमिति चेत्—'जक्षत्क्रीडन्नित्यादिकं प्राजापतिवाक्ये कीर्त्यमानं फलम्' इति अन्यार्थश्चेति सूत्रभाष्यं तदा न स्वरसम्। शरीरव्यतिरेकवच्च इन्द्रियव्यतिरेकोपि हि प्रजापतिनैवोपदेश्यः। **तंवा एतमित्यादि** कामं वेदपुरुषवचनमस्तु।

मानायाः प्रत्यगात्मविषयकप्रजापतिविद्यायाः कथं विद्यान्तरशेषत्वमिति चेत्—न—प्रजापतिवाक्यस्य 'एष संप्रसाद' इति दहरविद्यावाक्यान्तर्गतसंप्रसादशब्दार्थशोधनार्थं प्रवृत्ततया तदेकवाक्यत्वेन तादर्थ्ये सिद्धे इन्द्रस्यापि पश्चात् दहरविद्योपदिष्टेत्येवावगन्तव्यत्वेनादोषात्।

ननु प्रजापतिविद्यायाः प्रकरणाद्दहरविद्याशेषत्वे सर्वब्रह्मविद्याशेषत्वं न स्यात्; विद्यान्तरशेषत्वे प्रमाणाभावात्। न चेष्टापत्तिः। "आत्मेति तूपगच्छन्ति ग्राहयन्ति चे" त्यत्र प्रत्यगात्मनः परमात्मात्मकत्वेनानुसन्धानस्य [1]सकलब्रह्मविद्याङ्गत्वेनोक्तत्वात्। "त्रयाणामेव चैवमुपन्यासः प्रश्नश्चे" ति सूत्रे उपास्यस्वरूपवत् उपासकस्वरूपस्यापि ज्ञातव्यत्वोक्तेश्च। 'आत्मेति तूपगच्छन्ती' त्यधिकरणसिद्धं जीवोपास्यत्वमङ्गीकृत्य किं कर्तृत्वादिविशिष्टं सांसारिकस्वरूपमनुसन्धेयम्, [2]उत प्रजापतिवाक्योदितापहतपाप्मत्वादिलक्षणः सांसारिकरूपव्यतिरेको वेति विशये—कर्तृत्वादिविशिष्टमेव रूपमनुसन्धेयम् शरीरे वर्तमानस्योपासितुरात्मनस्तथाभावादित्येके मन्यन्त इति "एक आत्मनः शरीरे भावा"दिति सूत्रेण पूर्वपक्षं कृत्वा प्रजापतिवाक्योदितापहतपाप्मत्वादिलक्षणः सांसारिकरूपव्यतिरेक एवानुसन्धेयः, तथोपासने सत्येव तत्क्रतुन्यायेन तादृशात्मस्वरूपफलप्राप्तेर्भावित्वादिति "व्यतिरेकस्तद्भावभावित्वात्" इति सूत्रेण सिद्धान्तितत्वादिति चेत्—

न। यथा विद्याविशेषप्रकरणश्रुतानां सत्यत्वज्ञानत्वादिस्वरूपनिरूपकधर्माणां "आनन्दादयः प्रधानस्ये" त्यधिकरणोक्तन्यायेन सर्वब्रह्मविद्यापेक्षितब्रह्मस्वरूपप्रतिपत्त्युपयोगितया सामर्थ्यरूपालिङ्गात् प्रकरणभङ्गेन सर्वब्रह्मविद्यासाधारण्यमाश्रीयते,

1. सकलब्रह्मविद्याङ्गत्वेनेति पदं ककोशे। 2. अत्र क.

प्रकरणभङ्गेनेति। यद्यपि दहरविद्या प्रजापतिविद्यारम्भात् प्रागेव समाप्तेति वक्तुं शक्यम्, द्विरभ्यासदर्शनात्—तथाऽपि उपरि 'श्यामाच्छबलम्', 'आकाशो वै' इत्यादेर्दहराकाशपरत्वं युक्तमिति, पूर्वं दहरविद्योपास्याकारनिरूपणसमाप्तावपि तदुपयोगिमन्त्रपाठस्य पश्चाद्दर्शनात् महाप्रकरणानुवृत्तिरस्तीत्याशयः। अर्थान्तरत्वव्यपदेशाधिकरणे श्रीभाष्ये दहरविद्यानुवृत्तावौचित्यस्य भाषितत्वात्।

जाग्रदाद्यवस्थानां क्रमेणोपदेशः प्रजापतिकृतो न वञ्चनार्थः; किन्तु अभिसंधिविशेषमूलः, यमसौ न बुबुधे इति दर्शितं श्रुतप्रकाशिकायाम्। यथा—'यथा वसनाभरणादिरन्वयव्यतिरेकाभ्यामनात्मा, एवं चाक्षुषत्वात् इदङ्कारगोचरत्वाच्च देहो नात्मेति प्रजापतेरभिसंधिः। स्वाप्नदेहाभिमानिनः आत्मनः शयानदेहव्यतिरेकस्य स्वयमगमत्वात् स्वप्नावस्थामुपदिदेश। बाह्याभ्यन्तर—

यथा वा, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति विद्याविशेषप्रकरणश्रुतानां वेदानुवचनादीनां सर्वविद्यापेक्षितचित्तनैर्मल्योपयोगित्वलक्षणसामर्थ्यरूप 'लिङ्गवशेन सर्वविद्यासाधारण्यम्, एवमिहापि ब्रह्मप्राप्तिपूर्वकापहतपाप्मत्वादिगुणाष्टकविशिष्टस्वात्माविर्भावलक्षणमोक्षरूपफलस्य तत्क्रतुन्यायेन तादृशस्वात्मोपासनसाध्यत्वेन प्रजापतिवाक्योदितप्रत्यगात्मविद्यायाः सर्वब्रह्मविद्याङ्गत्वसिद्धेः।

दहरविद्यायाः परमात्मपरत्वञ्च दहराधिकरणे स्थितम्। तस्मिंश्चाधिकरणे "दहर उत्तरेभ्यः", "गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च", "धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः", "प्रसिद्धेश्च", "अल्पश्रुतेरिति चेत् तदुक्तम्", "इतरपरामर्शात् स इति चेन्नासंभवात्", "अन्यार्थश्च परामर्शः", "उत्तराच्चेदाविर्भूतस्वरूपस्तु", "अनुकृतेस्तस्य च", "अपि स्मर्यते" इति दश सूत्राणि। तत्राद्यानि सप्त सूत्राणि स्वावसर एव व्याख्यातानि। 'उत्तराच्चेदाविर्भूतस्वरूपस्तु, अनुकृतेस्तस्य च, अपिस्मर्यते' इति त्रीणि सूत्राण्यव्याख्यातानि व्याख्यास्यन्ते। उत्तरात् प्रजापतिवाक्यात् जीवस्याप्यपहतपाप्मत्वादिगुणयोगावसायात् अपहतपाप्मत्वादिगुणैर्दहराकाशः परमात्मेति न शक्यं निर्णेतुमिति चेत्—तत्राह आविर्भूतस्वरूपस्त्विति। पूर्वमनृततिरोहितापहतपाप्मत्वादिगुणकस्वस्वरूपः पश्चात् विमुक्तकर्मबन्धः शरीरात् समुत्थितः परंज्योतिरुपसम्पन्नः आविर्भूतस्वरूपः सन् अपहतपाप्मत्वादिगुणविशिष्टः तत्र प्रजापतिवाक्येऽभिधीयते। दहरवाक्ये तु अतिरोहितस्वभावापहतपाप्मत्वादिविशिष्ट एव दहराकाशः प्रतीयते। अविर्भूतस्वरूपस्यापि जीवस्यासंभावनीयाः सेतुत्वविधरणत्वादयः, सत्यशब्दनिर्वचनावगतं चेतनाचेतनयोर्नियन्तृत्वम्, दहराकाशस्य परब्रह्मतां साधयन्ति। सेतुत्वसर्वलोकविधरणत्वादयो न मुक्तानां नित्यमुक्तानां वा सम्भवन्तीति 'जगद्व्यापारवर्ज'मित्यत्र स्थितम्। अत एव नित्यानां नित्याविर्भूतापहतपाप्मत्वादि-

1. रूपपदं कक्कोशे।

कालुष्यविरहेण स्वयंप्रकाशमात्मानं दर्शयितुं सुषुप्त्यवस्थामुपादिशत्। एवमनतिस्फुटं गहनमुपदेशञ्च शुश्रूषुयोग्यतापरीक्षिषये'ति। इन्द्रस्तु तमभिसंधिमजानन् तदातदा तत्तदेव आत्मत्वेनोपदिष्टमित्यभिमत्य गत्वा पयोलोच्य पुनःपुनर्निववृते।

इति दश सूत्राणीति। तदधिकरणे सूत्रपाठक्रमस्यान्यादृशत्वेपि इह 'उत्तराच्चे'दित्यादिसूत्रं पूर्वमव्याख्यातं व्याख्यास्यमानत्वादन्ते क्रमेण निर्दिष्टम्। ततःप्राक् सूत्रपाठक्रमस्त्वत्रादृतोऽविवक्षितः सर्वसूत्रपठनमात्रे तात्पर्यात्।

गुणाष्टकत्वात् तेष्वतिप्रसक्तस्य नित्याविर्भूतापहतपाप्मत्वादिमत्त्वस्य कथं ब्रह्मलिङ्ग-त्वमिति शङ्काऽपि निरस्ता । सेतुत्वादीनां तदसंभावितधर्माणामत्र (मपि) श्रवणात् ।

ननु 'य एषोऽक्षिणि पुरुषो दृश्यत' इति प्रजापतिविद्यागतवाक्यान्यपि ब्रह्मपराण्येव भवन्तु । वाक्यत्रयेपि, 'एतदमृतमभयमेतत् ब्रह्मे'ति श्रवणात्, अक्षिवाक्ये उपकोसलविद्योपास्यप्रत्यभिज्ञानात्, य एष स्वप्ने महीयमानश्चरती' वाक्येऽपि स्वाप्नपदार्थस्रष्टृत्वेन महीयमानस्य परमात्मन एव प्रतिपादनसंभवात्, सुषुप्तिपर्यायेऽपि, यत्र यस्मिन्नाधारे समस्तः सुप्तो भवतीति सुषुप्त्याधारब्रह्मपरत्वोपपत्तेरिति चेत्—उच्यते । स्वप्नपर्याये 'घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवित्तेव भवत्यपि रोदितीवे'ति इन्द्रेण तस्य हन्यमानत्वद्राव्यमाणत्वबन्धुजनमरणाद्यप्रियद्रष्टृत्वरोदितृत्वादिप्रतिभासतो दुष्टत्वस्योपन्यासात्, सुषुप्तिसम्बन्ध्यात्मोपदेशानन्तरं 'नाह स्वल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि, विनाशमेवापीतो भवती'ति तस्य विशेषज्ञानरहिततया विनष्टप्रायत्वस्योक्तत्वात्, अभयत्वामृतत्वादीनाञ्च मुक्त्यवस्थाभाविरूपापेक्षयाऽप्युपपत्तेः जीवविषयत्वमेव द्वितीयतृतीयपर्याययोः । एवं तयोः स्वप्नसुषुप्त्यवस्थावज्जीवपरत्वे स्थिते प्रथमपर्यायस्य जागरावस्थावज्जीवविषयत्वमेवोपपद्यते । 'य एषोऽक्षिणि पुरुषो दृश्यत' इत्यस्य दर्शनलिङ्गादक्षिणि सन्निहितोऽनुमीयत इत्यर्थकत्वेन जागरावस्थाविषयत्वस्यैवोपपन्नत्वात् [1] उपकोसलविद्यावैषम्यम् । ततश्च प्रजापतिवाक्ये जीवः संसारदशायामनृततिरोहितापहतपाप्मत्वादिकः सन्[2] मुक्तिदशायां साधनाधीनतदाविर्भावः प्रतिपाद्यते । दहराकाशे श्रूयमाणं त्वपहतपाप्मत्वादिकं नित्याविर्भूतमेव ग्राह्यम् नित्याविर्भूतस्य ग्रहणसंभवे तिरोहितत्वेनासत्प्रायस्य साधनाधीनाविर्भावस्य ग्रहणायोगात् ।

4. पदमिदं क. कोशे । 5. सन्. क. स. क ख.

वाक्यत्रयेपि । अक्षिस्वप्नसुषुप्तिवाक्येषु त्रिष्वपि । अत्र अपिशब्दसत्त्वात्, **अक्षिवाक्ये उपकोसलविद्योपास्यप्रत्यभिज्ञानात्**' इत्यंश एतत्पूर्वं स्यादिति तर्क्यते। **द्रष्टृत्वेति**। वेत्तृत्वं लब्धृत्वम् । फलितं तु इदं तत्र ।

अभयत्वेति । वाक्यत्रयेऽपि **एतदभयमेतद् ब्रह्मेति** श्रवणवत् मघवन् मर्त्यंवेत्यारभ्यान्ततः क्रियमाणतत्त्वोपदेशसंदर्भेऽपि तच्छ्रवणं यदि स्यात्, तदा ब्रह्मनिरूपणपरत्वं मन्येत; तथा जीवब्रह्मभेदोऽपि शङ्केत । न त्वेवम् । प्रत्युत तत्त्वोपदेशकाले परंज्योतिरुपसंपद्येत्यादिना भेदमेव तात्त्विकं दर्शयति । तेन तत्र प्राक् अभयामृतब्रह्मोक्तिः स्तुतिमात्रमिति ज्ञायत इत्यपि भाव्यम् ।

८—१३

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये ।
अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य ।

ननु [स्यादेवम्—यदि] ब्रह्मणो नित्याविर्भूतापहतपाप्मत्वादिमत्त्वं जीवस्यातथात्वञ्च यदि प्रमाणसिद्धं स्यात्; तदा दहराकाशे श्रूयमाणमपहतपाप्मत्वादिकं ब्रह्मगतं नित्याविर्भूतमेव ग्राह्यमिति शक्यते वक्तुम्, न च तदस्तीति शङ्कमानं प्रत्याह—"अनुकृतेस्तस्य च"। **अनुकृतिः** अनुकारः=साम्यम्। **तस्य** परब्रह्मण उपासनया तदनुकारो हि जीवस्य श्रूयते—'तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'ति। "अपि स्मर्यते"। 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः' इति च स्मर्यते इत्यर्थः। ततश्च तदुपासनासिद्धमेतस्यैश्वर्यम्। तस्य तु नान्योपासनसिद्धम्; अपितु नित्याविर्भूतम्। ततश्च दहरवाक्ये, श्रूयमाणमपहतपाप्मत्वादिकं ब्राह्ममेवेति स्थितम्। प्रकृतमनुसरामः ॥ ८—१२.

श्यामात्—प्रपद्ये। एते च मन्त्राः विद्याङ्गभूताः विद्वद्भिर्जप्याः। परमात्मनो हि त्रिविधमुपासनमुक्तम्, "उपासात्रैविध्या'दित्यत्र, **चिच्छबलतया अचिच्छबलतया** स्वरूपेण च। तत्र स्वरूपेणानुसन्धाने ज्ञानादिगुणवत् दिव्यविग्रहयोगिताऽप्यनुसन्धेया। तत्सिद्ध्यर्थमेव हि पुण्डरीकाक्षमप्राकृतं वपुरतिदिश्यते—'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति। तत्र 'स यश्चायं पुरुष' इत्यानन्दमयमनूद्य 'यश्चासावादित्ये' इति विग्रहातिदेश इति **व्यासार्यैः** उपासात्रैविध्यादित्यत्रोक्तम्। **वेदार्थसंग्रहे** च भगवता **भाष्यकृता**, "य एषोऽन्तरादित्ये **हिरण्मयः** पुरुषः', 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि',—विद्युद्वर्णात्पुरुषादित्यर्थः—'नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा'—मध्यस्थनीलतोयदा

ननु प्रजापतिविद्योक्तजीवस्वरूपोपासकस्य तत्कतुन्यायेन जीवस्वरूपानुभवमात्रं संभाव्यते, न सर्वलोकसर्वकामप्राप्तिरपीति शङ्का मा भूदिति **श्यामादि**त्यादिमन्त्रपाठस्तदनन्तरम्। तेन जीवस्वरूपाविर्भावस्य परज्योतिरुपसंपत्तिमूलकत्वस्योक्तया तदुपसत्त्युपायभूतं तदुपासनमपि कार्यमेव। तत्रैवं मन्त्र इति ज्ञापितं भवति। दहरः परमात्मा द्विप्रकारः **हृदयपरिच्छिन्नदिव्यमङ्गलविग्रहविशिष्टः**, दहरहृदयान्तर्वर्तिजीवान्तर्वर्ती चेति। उभयविधोऽप्युपास्य इति **श्यामादिति मन्त्रेणोच्यते**।

धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति ।
अभिसंभवामीति ॥

इति अष्टमाध्याये त्रयोदशः खण्डः ।

विद्युल्लेखेव सेयं दहरपुण्डरीकमध्यस्थाकाशवर्तिनी वह्निशिखा स्वान्तर्निहितनीलतोयदाभपरमात्मस्वरूपा स्वान्तर्निहितनीलतोयदा विद्युदिवाभातीत्यर्थः" इत्युक्तम् । अतो नीलविग्रहवैशिष्ट्यं सिद्धम् । अत एव हि 'श्यामा एकरूपा भवन्ति, एवमिव हि प्रजापतिः समृद्ध्या' इति प्रजापतिशब्दितस्य भगवतः श्यामरूपत्वमुक्तम् । तस्मात् **श्याम** इति विग्रहविशिष्टस्वरूपमुच्यते । तताश्च श्यामादिति ल्यब्लोपे पञ्चमी । श्यामविग्रहविशिष्टं स्वरूपं प्रपद्य=स्वरूपमुपास्य **शबलं** चिदचिद्विशिष्टं **प्रपद्ये** उपासे । शबलमुपास्य श्याममुपासे इत्यर्थः । ततश्च निरन्तरं त्रैविध्येनोपासे इत्यर्थः । **अश्व इव—अभिसंभवामीति** । अश्वो रोमाणीव स्वयं पापं विधूय—**विधूयेत्यनेन** पापत्याग उच्यते—राहुमुखप्रमुक्तश्चन्द्र इव शरीराद्विमुक्तः **अकृतं** नित्यं भगवल्लोकं **कृतात्मा** कृतार्थात्मा सन् **अभिसंभवामि** प्राप्नुवामीत्यर्थः । **अभिसंभामीत्यभिसंभवामीति** द्विरुक्तिः खण्डसमाप्त्यर्था ॥ ८—१३.

रोमाणीवेति । **रोमाणि विधूय**-श्रमं पांस्वादि च रोमतो विधूयेति शाङ्करम् । तथाच कम्बलविधूननमितिवत् रोमविधूननं नाम रोम्णोऽपनेयापनयः । एवञ्च पापविधूननमपि पापादिगतफलजननशक्तेः पापात् प्रच्यावनम् । प्रच्युता च सा शक्तिः द्विषदादिकर्तृकं द्वेषादि संक्रामति । विद्वत्संबन्धिपुण्यपापयोः यत् फलं विद्वदनुभाव्यम्, तत् फलं तत्र विदुषि द्वेषं स्नेहञ्च कलयतां भवतीति यावत् । वस्तुतः, विधूयेत्यनेन पापत्याग उच्यते इत्युक्तत्वात् विधूयेत्यस्य त्यक्त्वेत्येवार्थः । अस्तु **रोमाणी**तिपदं रोमगतपांस्वादीत्यर्थकं यथाश्रुतार्थस्य सर्वथा बाधे । वस्तुतस्तु **भगवता भाष्यकृता वेदान्तसारे**, वृद्धिह्रासमूत्रे दर्शनादितिपदव्याख्यावसरे "अश्वो हि रोमाणि सहजानि स्वावयवभूतानि मूर्तद्रव्याणि स्वशरीरं कम्पयन् कानि चिन्मुञ्चती"ति प्रकृतश्रुत्यर्थ उक्तः । अतो यथाश्रुतमेव निर्बाधम् । **चन्द्र इवेत्यादि** । चन्द्रकर्तृकराहुमुखावधिकस्वात्मविमोचनतुल्यं विद्वत्कर्तृकशरीरधूननम् । **शरीरं धूत्वेत्यस्य** शरीरात् प्रमुच्येत्यर्थः । **खण्डसमाप्त्यर्थेति** । द्विर्वचनं मन्त्रसमाप्त्यर्थमिति शाङ्करम् ।

८—१४

[1]**आकाशो वै नाम नामरूपयोर्निर्वहिता, ते यदन्तरा तद् ब्रह्म तदमृतँ स आत्मा।**

1. अत्र पाठभेदाः भाष्ये द्रष्टव्याः।

आकाशो वै—आत्मा। अत्र, आकाशो ह वै नामरूपयोर्निर्वहिते[ति आकाशो वै नामरूपयोर्निर्वहिते] त्यपि पाठान्तरं(पाठद्वयं)द्रष्टव्यम्। उभयत्राप्ययमर्थः। श्रुतिष्वाकाश इति प्रसिद्धः **नामरूपयोर्निर्वहिता** कर्ता। **यत्** आकाशशब्दितम्। विधेयब्रह्माभिप्रायेण नपुंसकत्वम्। **ते** नामरूपे **अन्तरा** मध्ये वर्तमानम्। ताभ्यामस्पृष्टमित्यर्थः। **ब्रह्मामृतात्मशब्दानां** पूर्ववदेवार्थः।

इदञ्च वाक्यं समन्वयाध्याये चिन्तितम्। तत्र 'आकाशो ह वै नामरूपयोर्निर्वहिते' ति नामरूपवोढृत्वश्रवणात्, नामरूपवोढृत्वस्य परमात्मनि 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'ति जीवद्वारकतयैवोपपद्यतया नामरूपवोढृत्वस्य जीव एव स्वरसत्वात्, 'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति वाक्यप्रतिपाद्यस्य, 'नामरूपयोर्निर्वहिता ते यदन्तरे' ति वाक्ये प्रत्यभिज्ञानात्, पूर्वं निरूढनामरूप एव पश्चाद्विमुक्त इह प्रतिपाद्यते। 'आकाशशब्दस्यापि यौगिक्या वृत्त्या मुक्तात्मनि संभवादित्येवं पूर्वपक्षे प्राप्ते—उच्यते—" आकाशोऽर्थान्तरत्वादिव्यपदेशात् "। आकाशः परं ब्रह्म, अर्थान्तरत्वादिव्यपदेशात्, 'नामरूपयोर्निर्वहिते' ति जीवापेक्षया,' **अर्थान्तरत्वस्य** भेदकधर्मस्य व्यपदेशात्। न हि नितरां वोढृत्वं, निर्वोढृत्वं, रूढ्या निर्वोढृशब्दस्य

ते यदन्तरेति। 'यत् **अन्तरा** विहाय नामरूपे वर्तेते।', 'ते नामरूपे **अन्तरा** विहाय यद्वर्तत' इति वेति शाङ्करम्। द्वितीययोजनाऽत्राद्रता। श्रीभाष्ये तु **यत्** यस्मात् नामरूपे **अन्तरा** = नामरूपास्पृष्ट आकाशः. तस्मान्निर्वोढेत्यर्थः स्वरसप्रतीतः। **भेदकधर्मस्ये**ति। ननु ब्रह्मत्वामृतत्वादिरपि भेदकधर्म इत्यविशेषः। उच्यते। **ब्रह्मत्वं भेदः, न तु भेदकधर्मः**। नामरूपनिर्वोढृत्वं तु **भेदकधर्मः**। तर्हि अर्थान्तरत्वपदेन भेदो ब्रह्मत्वमेव ग्राह्यम्। नैवम्। श्रुतौ प्रथमोक्तस्य निर्वोढृत्वस्य प्रथमं सूत्रेऽपि ग्राहणौचित्यात् भेदकधर्मोऽर्थान्तरत्वमित्युक्तमिति। अथवा नामरूपस्पृष्टत्वं जीवत्वम; अर्थान्तरत्वं तद्भिन्नत्वरूपमस्पृष्टत्वम्। ततश्च नामरूपास्पृष्टत्वविशिष्टतन्निर्वोढृत्वरूप एको धर्मः अर्थान्तरत्वघटितत्वादर्थान्तरत्वरूपः भेदघटितमूर्तिकत्वाद् भेदकधर्म इत्युच्यत इति।

प्रजापतेः सभां वेश्म प्रपद्ये । यशोऽहं भवामि ब्राह्मणानां

कर्तृत्वाभिधायित्वात् । 'ते यदन्तरे' ति नामरूपास्पृष्टत्वकथनाच्च । नामरूपास्पृष्टत्वे सति नामरूपकर्तृत्वस्य बद्धे मुक्ते वा असंभवात्, मुक्तस्यापि 'जगद्व्यापारवर्जमिति जगद्व्यापारराहित्यस्य प्रतिपादितत्वात् । आदिशब्देनामृतत्वाभयत्वादीनां सङ्ग्रहः ।

ननु प्रत्यगात्मनोऽर्थान्तरत्वव्यपदेशादिति न वक्तुं युक्तम्, शुद्धावस्थ एव हि प्रत्यगात्मा परमात्मा परं ब्रह्मेति च व्यपदिश्यते । तत्राह—"सुषुप्त्युत्क्रान्त्योर्भेदेन" । वाजसनेयके 'कतम आत्मा योऽयं विज्ञानमयः प्राणेषु' इति प्रकृतस्य प्रत्यगात्मनः सुषुप्तावुत्क्रान्तौ च 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद, नान्तर' मिति, 'प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याती' ति च प्राज्ञेन परिष्वङ्गान्वारोहावम्नायेते । जीवस्यैव शुद्धावस्थस्य परमात्मत्वे परिष्वङ्गान्वारोहौ नोपपद्येयाताम् । न ह्यभेदे तौ संभवतः ।

"पत्यादिशब्देभ्यः" । 'सर्वस्य वशी सर्वस्येशानः; सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्; एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाये' ति प्रत्यगात्मासंभावितानां पतित्वादिधर्माणां श्रवणात् नायं मुक्तात्मेति स्थितम् । प्रकृतमनुसरामः ।

प्रजापतेः—प्रपद्ये । प्रजापतेः परमात्मनः **सभां** स्थानं **वेश्म** प्रपद्ये । 'प्रभुविमितं हिरण्मय' मिति दहरविद्यायां निर्दिष्टं वेश्म प्रपद्ये इत्यर्थः । न चात्र प्रजापतिशब्दः कार्यहिरण्यगर्भविषयः । "न च कार्येप्रत्यभिसन्धि" रिति सूत्रकृतैव निरस्तत्वात् । भाष्यकृता च, "न चायं प्रत्यभिसन्धिः कार्यहिरण्यगर्भे, अपि तु परस्मिन्नेव ब्रह्मणि, 'यशोऽहं भवामि ब्राह्मणाना' मिति एतस्याभिसन्धातुः सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसन्धानात्, 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभावामी'ति

प्रजापतेः परमात्मन इति । 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इत्युक्त्वेह सद् ब्रह्मैव हि प्रजानां पतिः । दर्शितञ्च पूर्वखण्डे भाष्ये श्यामः प्रजापतिरिति । प्रायः श्रुतौ परमात्मन्येव प्रजापतिशब्द इति पराक्रान्तं सूरिभिः ।

यशो राज्ञां यशो विशां यशोऽहमनु प्रापत्सि । स हाहं यशसां यशः । श्वेत[1]-मदत्कमदत्कँ श्वेतं लिन्दु माऽभिगाम् लिन्दु माऽभिगाम् ॥

इति अष्टमाध्याये चतुर्दशः खण्डः ।

८—१५

तद्धैतद् ब्रह्मा प्रजापतय उवाच, प्रजापतिर्मनवे मनुः प्रजाभ्यः ।

1. श्येतं शां

अभिसंभाव्यब्रह्मलोकस्याकृतत्वश्रवणात्, सबन्धविनिर्मोकस्य च साक्षाच्छ्रवणात्" इति भाषितम्। **यशः—यशो विशाम्** । अत्र यशश्शब्देनात्मोच्यते । ब्राह्मणादीनामात्माऽस्मीत्यर्थः । **अत्राहम्**इतिशब्दः स्वान्तर्यामिपरमात्मपरः । ननु तव ब्राह्मणादीन् प्रति कथं यशश्शब्दितमात्मत्वमित्यत्राह—**यशः—यशः** । अहं **यशः** यशोरूपं परमात्मानमात्मतया अहंत्वेन प्राप्तवानस्मि, साक्षात्कृतवानस्मि । अतः सोऽहं परमात्मरूपोऽहं **यशसां** जीवात्मनां **यशः** आत्माऽस्मीत्यर्थः । **श्वेतमदत्कमदत्कंश्वेतंलिन्दुमाभिगाम्** । **श्वेतं** शुक्लधातुम् **अदत्कं** [दन्तशून्यं] **श्वेतम्** । अत्र श्वेतशब्देन लक्षणया सत्त्वगुण उच्यते। तस्यादत्कं भक्षयितृ । चरमधातोः सत्त्वगुणतत्कार्यज्ञानादिप्रमोषकत्वात् तद्भक्षकत्वम् । तादृशं चरमधातुमदत्कं भक्षयितृ । लिन्दु स्त्रीव्यञ्जनं **माभिगाम्** न प्राप्नुयाम्। चरमधात्वाधारयोनिप्रवेशो माभूदिति, जन्म मा भूदिति यावत्। **लिन्दु माभिगाम्**—**लिन्दुमाभिगामिति**द्विर्वचनं जप्यमन्त्रपरिसमाप्त्यर्थम् । ८—१४.

तद्धैतद्ब्रह्मा—प्रजाभ्यः । **एतत्** ब्रह्मविज्ञानं **ब्रह्मा** हिरण्यगर्भः **प्रजापतये** कश्यपायेत्यर्थः । शिष्टं स्पष्टम् ।

यशश्शब्देनात्मोच्यते इति । व्यापनशीलत्वरूपं साधर्म्यं यशस आत्मनश्च । "सर्वात्मभावाभिसंधानात्" इति भाष्यानुरोधेनैवम् । श्येतमदत्कमिति पठित्वा श्येतं वर्णतः पक्वबदरसमं रोहितम्, अदत्कं दन्तरहितमपि भक्षयितृ कामिनां तेजोबलवीर्यविज्ञानविनाशकमित्युक्तं शाङ्करे। द्विर्वचनमत्यन्तानर्थहेतुत्वप्रदर्शनार्थमिति च । अत्र त्वर्थभेद एव स्वीकृतः । अद भक्षण इति धातोः शत्रन्तादत्शब्दार्थे कप्रत्ययः औपचारिकमदनमिति ज्ञापनाय ।

तद्धैतदिति । यद्यपि **श्यामाच्छबलमि**त्यादिना प्रपत्तिविद्यां ततः प्रागनेकभक्तिविद्यावत् उपदिश्य तत्प्रवर्तकारम्भरा, 'मुमुक्षुर्वै शरणमहं प्रपद्ये' इति श्वेताश्वतरान्तदर्शितरीत्या भगवत्पदप्रपन्नचतुर्मुखारम्भेणात्र वर्ण्यते इति सुवचम्—अथापि **श्यामादि**त्यादेः दहरविद्यान्वयमाकलय्य, पृथक् प्रपत्तिपरत्वेनाव्याख्याय, **तद्धैतदि**त्यादेरुपनिषदवसानस्थतया छान्दोग्याष्टाध्याय्यर्थपरत्वमभिप्रेत्योक्तं **ब्रह्मविज्ञानमि**ति ।

आचार्यकुलाद् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत् आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिँसन् सर्वा भूतान्यन्यत्र तीर्थेभ्यः स

विद्याङ्गभूततया कर्मानुष्ठातव्यमित्येतत् प्रस्तौति—**आचार्य—शेषेण**। **यथाविधानं** विधिमनतिक्रम्य। गुरोः **कर्मातिशेषेण** कर्मावशिष्टकालेन। गुरुशुश्रुषानवरुद्धेन कालेन अधीत्येति योजना। **व्यासार्यैस्तु** पुरुषार्थाधिकरणे, 'अतिशेषेण निश्शेषमित्यर्थः' इति व्याख्यातम्। तेषामयमाशयः—'ब्रह्मचारी वेदमधीत्योपन्याहृत्य गुरवे, अनुज्ञातो दारान् कुर्वीत,' 'विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञातस्य वा स्नान' मित्यादिस्मृत्यनुसारात्, 'आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी' रित्यादिश्रुत्यनुसाराच्च, गुरोर्यथाविधानं आचार्यस्य नियमनमनतिलङ्घ्य कर्तव्यं कर्म अतिशेषेण—अतिमर्यादमित्यादौ अतेर्मर्यादाऽभावे वृत्तेर्दर्शनाद्**अति**रर्थाभावे वर्तते। ततश्च**अति**शेषेण—अशेषेण **अभिसमावृत्य** निर्वर्त्येत्येवान्वयः। न तु अतिशेषेणेत्यस्याधीत्येति पूर्वणान्वयः। तस्य व्यवहितत्वात् निराकांक्षत्वाच्च। न च 'गुरोः कर्मशेषेण जपेदि' ति गौतमस्मृत्यैकरूप्यात् कर्मातिशेषशब्दस्यापि कर्मातिशिष्टकालपरत्वं वक्तव्यमिति वाच्यम्, शेषातिशेषशब्दयोर्भिन्नार्थत्वेन तत्प्रत्यभिज्ञानाभावादिति। **अभिसमावृत्य—अधीयानः**। **अभिसमावृत्य** समावर्तनं कृत्वा, गुरुकुलान्निवृत्येत्यर्थः। न्यायतो दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्यविहितकर्मनिष्ठ इत्यर्थः। 'शुचौ देशे स्वाध्यायमधीयान' इत्यत्र स्वाध्यायमिति नित्यकर्मणामप्युपलक्षणम्। **धार्मिकान् विदधत्**—पुत्रशिष्यादीन् धर्मे नियुञ्जानः। **आत्मनि—तीर्थेभ्यः**। अनात्मविषयेभ्य इन्द्रियाणि निगृह्य शास्त्रीयहिंसाव्यतिरिक्तां हिंसामकुर्वाण इत्यर्थः। न च "अशुद्धमिति चेन्न शब्दात्" इति सूत्रे

अभिसमावृत्य निर्वर्त्येति। व्यासार्यपक्षे अत्र समावर्तनं न विवक्षितम्। किंतु गुरवे दक्षिणाप्रदानादि। उक्तनानावचनानुरोधात्। न चाणिजन्तात् कथं निर्वर्त्येत्यर्थलाभ इति वाच्यम्, विवक्षावशात् तल्लाभात्। अस्तु वा वृञ् वरण इति धातुरिह। स्वयं तु **कर्मातिशेषेणेत्यस्य** पूर्वान्वयं, **अभिसमावृत्येत्यस्य** समावर्तनपरत्वञ्चैवाविरुद्धत्वाद् भाष्यकृदाद्रियते। **शुचौ देश** इति अध्ययनाद्यनुकूलशुचित्वं विवक्षितम्। भगवद्भागवताधिष्ठितदिव्यक्षेत्रादिवासस्थानपरं वेदम्।

खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते । (१)

क्त्वर्थपशुहिंसाया हिंसात्वाभावस्योक्तत्वात, अन्यत्र तीर्थेभ्य इति व्यर्थमिति वाच्यम्। 'न वा उ एतन्म्रियसे न रिष्यसी' ति मन्त्रलिङ्गात् तस्य हिंसात्वाभावेऽपि गृहस्थानामवर्जनीयतुलस्याहरणादिहिंसाया हिंसाधात्वर्थत्वसंभवेन तत्पर्युदासार्थम् **अन्यत्र तीर्थेभ्य** इत्यस्यावश्यकत्वादिति द्रष्टव्यम् । **स खल्वेवं—न च पुनरावर्तते ।**

"आप्रयाणात् तत्रापि हि दृष्ट" मित्यत्र इदमपवर्गसाधनमुपासनमेकस्मिन्नेवाहनि कार्यम्, शास्त्रार्थस्य तावतैव समाप्तत्वादिति पूर्वपक्षं कृत्वा **आप्रयाणात्** आमरणादनुवर्तनीयम् । आमरणं सर्वस्मिन् काले 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते' इत्युपासनस्य दृष्टत्वात् । अत आप्रयाणं कर्तव्यमिति स्थितम् ।

"सहकार्यन्तरविधि" रित्यधिकरणे,—छान्दोग्ये 'अभिसमावृत्य कुटुम्बे शुचौ देश' इत्यारभ्य 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभि संपद्यते न च पुनरावर्तत' इति ब्रह्मविदो यावदायुषं गृहस्थधर्मेण स्थितिदर्शनादाश्रमान्तरेषु न ब्रह्मविद्यास्तीत्याशंक्य सर्वेष्वाश्रमेषु विद्यायाः प्रमाणप्रतिपन्नत्वात् गृहस्थधर्मेणोपसंहारः आश्रमान्तरधर्माणामप्युपलक्षणार्थ इति "कृत्स्नभावात्तु गृहिणोपसंहारः" इति सूत्रेण समर्थितम् ।

"अनावृत्तिश्शब्दादनावृत्तिश्शब्दा" दित्यत्र, 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते' इति शब्दात् मुक्तस्य पुनःप्रकृतिवश्यतालक्षणा आवृत्तिर्नास्तीत्युक्तम् । तत्र पुनरावृत्तौ हि न मुक्तेच्छा हेतुः; अनवधिकातिशयानन्दरूपं ब्रह्मानुभवतः प्राकृतभोगेच्छाया असंभवात्। [1]नापि परमपुरुषेच्छावशात् पुनरावृत्तिः, 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । ज्ञानी त्वात्मैव मे मत' मित्युक्तरीत्या परमप्रियं ज्ञानिनं प्राप्य आत्मानं कृतार्थं मन्यमानस्य परमपुरुषस्य तत्त्यागेच्छाया असंभवात् । नापि कर्मवशात् पुनरावृत्तिः । उच्छिन्नकर्मबन्धत्वेन कर्माधीनाया अपि पुनरावृत्तेरसंभवादिति भाष्ये प्रतिपादितम् । [**न च पुनरावर्तते न च पुनरावर्तत** इति द्विरुक्तिर्ब्रह्मविद्यायाः साङ्गायाः परिसमाप्त्यर्था ॥]

1, अत्र प्रक्रमानुगुणं पाठान्तरं तु —, 'नापि भगवदिच्छा हेतुः; एतल्लाभं महालाभं मन्वानस्य पुनरावर्तनेच्छाया असंभवात्। नापि कर्मसंबन्धो हेतुः; तस्य निःशेषविनष्टत्वादिति इति।

[1]आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौ(ह्मो) पनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत् अनिराकरणमस्तु अनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु। (२)

इति अष्टमाध्याये पञ्चदशः खण्डः

इति अष्टमोऽध्यायः (अष्टमः प्रपाठकः)

छान्दोग्योपनिषत् संपूर्णा।

श्रीरस्तु

---

1. इदमष्टमाध्यायाद् बहिष्कृतं शाङ्करे। अन्ते ओं शान्तिः शान्तिः शान्तिरिति च पठितम्।

आप्यायन्तु—सर्वाणि । अध्ययनजपादौ शान्तिपाठार्थोऽयं मन्त्रः। मदङ्गानि वागादिभिः सह आप्यायितानि भवन्त्वित्यर्थः। **सर्वं—निराकुर्याम्** । सर्वां ब्रह्मप्रतिपादिकामुपनिषदं प्रति, ब्रह्मविषये च नास्तिक्यबुद्धिं मा कार्षमित्यर्थः। **मा मा ब्रह्म निराकरोत्** । मा मां ब्रह्म निराकुर्यात्। अनुगृह्णात्वित्यर्थः। **अनिराकरणं—अस्तु** । परस्परमनिराकरणमस्त्वित्यर्थः। **तदात्मनि—मयि सन्तु** । आत्मज्ञान-निरतस्य ये धर्माः शान्तिदान्त्यादय उपनिषत्सु प्रसिद्धाः, ते सर्वे मयि सन्त्वित्यर्थः। **ते मयि सन्तु ते मयि सन्त्विति**द्विरुक्तिरुपनिषत्समाप्त्यर्था॥ ८—१५.

इति छान्दोग्योपनिषद्भाष्ये अष्टमोऽध्यायः (अष्टमः प्रपाठकः)

सर्वां ब्रह्मप्रतिपादिकामुपनिषदं प्रति इति भाष्यं, 'सर्वां ब्रह्मोपनिषद' मिति पाठाभिप्रायेण स्यात्। 'सर्वं ब्रह्मौपनिषद' मिति पाठे तु **सर्वं** प्रागुक्तमौपनिषदब्रह्मात्मकं भवतीत्यनुसंधानं कृतं भवति। **अनिराकरणं** कर्मकाण्डदर्शित तदाज्ञादिविषये मम, मदर्पित विषये तस्य चादरः। **आत्मनि निरते**। व्यधिकरणसप्तमी। आत्मविषयकरतिमतीत्यर्थः॥

यदात्माऽऽविरभूत् साक्षाद्वेदान्तव्याचिकीर्षया।
रामानुजो जयत्येष रङ्गरामानुजो मुनिः॥ १॥

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदाद्यदतूलवातो
रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

इति श्रीमत्तातार्यचरणारविन्दचञ्चरीकस्य
वात्स्यानन्तार्यपादसेवासमधिगतशारीरकमीमांसाभाष्यहृदयस्य
परकालमुनिपादसेवासमधिगतपारमहंस्यस्य

श्रीरङ्गरामानुजमुनेः

कृतिषु

छान्दोग्योपनिषत्प्रकाशिका संपूर्णा ॥

॥ शुभमस्तु ॥

अपरहयमुखश्रीवेदचूडार्यमुख्य-
प्रवरगुरुवचोर्थव्याक्रियावित्त एषः ।
सरलविशदसूक्तिः सर्वतन्त्रार्थवेदी
जयति यतिवरः श्रीरङ्गरामानुजाख्यः ॥ २ ॥

तस्यावतारः ख्यातो यो मुनिः श्रीरङ्गलक्ष्मणः ।
तत्प्रशिष्योऽपि विख्यातः परः श्रीरङ्गलक्ष्मणः ॥ ३ ॥

विज्ञानामृतवारिधिः शमनिधिर्वैराग्यवल्लीतरुः
वेतण्डाचलधामधामविषयप्रेमैकमूर्तिर्मुनिः ।
संसाराम्बुधिपोत एष जयति श्रीरङ्गरामानुजः
यद्वीक्षेधितधीविलासविभवेष्वेषोऽपि कश्चिन्मम ॥ ४ ॥

ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ।
श्रीवीरराघवेणैवं वेङ्कटाद्रीशसेविना ॥ ५ ॥

छान्दोग्यस्य सभाष्यस्य परिष्कारः क्रमात् कृतः ।
उद्गीथप्रणवाकारश्रीहयास्यमुदेऽस्त्वयम् ॥ ६ ॥

इति श्रीमद्वेदान्तरामानुजयतीन्द्रमहादेशिकचरणारविन्दचञ्चरीकस्य
श्रीमद्रङ्गरामानुजयतीन्द्रमहादेशिकपदपद्मसेवासमधिगतसर्ववेदान्तार्थस्य

वात्स्यसच्चक्रवर्तिनो वीरराघवाचार्यस्य

कृतिषु

छान्दोग्योपनिषद्भाष्यपरिष्कारः ।

श्रीरस्तु । शुभमस्तु ॥

टिप्पणपरिशिष्टम्

१३२ पुटे 'यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवती'ति वाक्यस्य, "तथोपासीनस्तथैव प्राप्नोतीत्यर्थः" इति कार्याधिकरण श्रीभाष्यानुरोधेनार्थो वर्णित एव टिप्पणे। अत्र किञ्चिदुच्यते। संभाव्यते तावदत्रान्योऽप्यर्थः—क्रतुशब्दः क्रियामात्रपरः, उपासनमात्रे संकोचस्यायुक्तत्वात्। यच्छब्दः फलपरः। अतएव शाङ्करे क्रतुशब्दस्याध्यवसायरूपार्थवचनेऽपि तथाभवतीत्यस्य कत्वनुरूपफलात्मको भवतीत्यर्थ उक्तः। थाल्प्रत्ययस्य प्रकारवाचितया, 'यत्फलावच्छिन्नकायिकवाचिकमानसक्रियावान् पुरुषो भवति, तत्फलावच्छिन्नो भवति' इति विशिष्टार्थः। प्रथममवच्छिन्नत्वं साध्यसाधनभावसंबन्धेन; द्वितीयं भोज्यभोक्तृत्वसंबन्धेन। 'तं यथायथोपासत' इति वाक्यं तु एतद्वाक्योक्तक्रियान्तर्गतोपासनमात्रविषयमस्तु इति। अत्रेदं वक्तव्यम्—लोकवेददृष्टतत्तत्क्रियाबलात् तत्तज्जन्यफलप्राप्तेः तत्तल्लोकवैदिकविधिबलतो विशिष्यैव सिद्धतया व्यर्थमिदं सामान्यवचनमिति।

ननु भक्त्पक्षे घटं पटत्वेनोपासीनः पटभूतं घटं प्राप्नोतु। अतो विध्यन्तरसिद्धार्थानुवादमात्रमिदम्। ततश्च तत्तत्प्रकारक तत्तदुपासनबलात् तत्तत्प्रकारलाभस्य तत्तदुपासनविधायकप्रतिनियतविधिभिरेव सिद्धतया वाक्यवैयर्थ्यमेव। अथ तथैव भवतीत्येवकारार्थे नैर्भर्यमिति चेत्—कस्तदर्थः? किमन्ययोगव्यवच्छेदः उतायोगव्यवच्छेदः? नाद्यः; तथासति कतिपयगुणविशिष्टब्रह्मोपासनेऽनुपासितगुणादीनामप्राप्तिरुक्ता स्यात्। तथा च परिपूर्णब्रह्मानुभवरूपत्वं मोक्षस्य न स्यादिति, 'सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः' सोश्नुते सर्वान् कामान्', 'निरञ्जनः परमं साम्यमुपैति', 'स एको ब्रह्मण आनन्दः, श्रोत्रियस्य चाकामहतस्य' इत्याद्यनेकश्रुतितदनुसारिसूत्रसंप्रदायादिबहुविरोधः स्यादिति। नान्त्यः; उपासितगुणप्राप्तिरवश्यम्भाविनीत्येतादृशस्यायोगव्यवच्छेदस्य तत्तदुपासनविधिवाक्यत एव सिद्धतया एतद्वचनवैयर्थ्यस्य प्राप्तत्वात्। तत्ततोपासनस्य कारणत्वं ह्युक्तम्। कारणत्वञ्च वेदे, यदुत्तरं कार्यस्यावश्यम्भावः तत्त्वमेवेति। अतो भवदभिमतार्थोऽपि विमृश्य इति।

अत्रोच्यते—अयोगव्यवच्छेद एव फलम्। तथैवेति विशेषणसंगतत्वादेवकारस्य। तस्य तद्व्यवच्छेदार्थकत्वस्वारस्यात्। तत्फलं तु सारप्रकाशिकायामेवं वर्णितम्—अचेतनाकाशादीनामुपासने अपुरुषार्थभूततत्प्राप्तिरेव भवेदिति तेषामनुपास्यत्वम्, तेषां कारणत्वे उपास्यत्वप्रसंगात् अकारणत्वञ्च सिध्यतीति आकाशादिकारणवाक्यानामचेतनातिरिक्तपरत्वनिर्णय इति। अयं भावः—सर्वं खल्विदं ब्रह्म तज्जलानिति

शान्त उपासीतेति पूर्वोक्तं ब्रह्म नाकाशादिकमचेतनं भवितुमर्हतीति तदनन्तरेणानेन वाक्येन ज्ञाप्यत इति। अन्यच्च श्रूयताम्! तं मामायुरमृतमित्युपास्स्वेत्येवं परविद्यायाम् इतिशब्दश्रवणेऽपि आरोपात्मकमुपासनं न कार्यम्। उपासिताकारस्य प्राप्त्यवश्यम्भावात् यथावस्थिताकारविशिष्टमेवोपास्यम्। न दृष्टिविधिर्मोक्षाय भवतीति। एवं शरीरेभावाधिकरणे यदुक्तम, जीवात्मा कर्तृत्वभोक्तृत्वरूपौपाधिकाकारविशिष्टो नोपास्य इति, तदप्यनेन सिध्यति। उपासिततत्तदौपाधिकाकारप्राप्त्यवश्यम्भावे तद्विरुद्धमोक्षानापत्तेरिति। एवं पञ्चाग्निविद्यायां भूतसूक्ष्मपरिष्वक्तस्यानुपास्यत्वसिद्धिरपि फलम्। तथाच तत्र पञ्चाग्निचिन्तनविधानं संसाराग्निविदीपनव्यपगतप्राणत्वस्य स्वात्मन्यनुसंधानार्थमिति ततस्तदनुसंधाय प्रकृतिवियुक्तयथावस्थितात्मस्वरूपमुपासीतेति। यथाक्रतुवचनमिदं सामान्यवाक्यम्। 'तं यथायथे'ति तु विशेषपरमिति।

नन्वन्ययोगव्यवच्छेदस्यात्रानभिमतत्वे शुद्धजीवस्वरूपोपासनादपि ब्रह्मप्राप्तिर्वचनबलाद् भवतीति किमिति पञ्चाग्निविद्यायां ब्रह्मात्मकत्वानुसंधानमिति चेत्—उच्यते। 'अप्रतीकालम्बनान् नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्चे'ति सूत्रे तत्क्रतुश्चेत्येतदर्थं एवं भाव्यः—ननु पञ्चाग्निविद्यायां भूतसूक्ष्मपरिष्वक्तजीवानुसंधानस्य विहिततया ततो न परब्रह्मप्राप्तिः, 'नान्यः पन्था अयनाय विद्यते' इति निषेधादित्याशङ्कायां तत्क्रतुश्चेत्युक्तम्—भूतसूक्ष्मपरिष्वक्ततयाऽनुसंधाने तत्प्राप्त्यवश्यम्भावः तत्क्रतुन्यायादिति तदाकारत्यागेन तत्क्रतुन्यायाविरोधात्य यथावस्थिताकारानुसंधानस्यावश्यकत्वे अविशेषात्, 'ज्ञानानन्दमयो ह्यात्मा शेषो हि परमात्मन' इति परब्रह्मात्मकत्वानुसंधानस्यापि प्राप्त्या ब्रह्मानुसंधानस्यात्रान्तर्भावात् न, 'नान्यः पन्था' इति वचनविरोध इति॥ अत्र तत्क्रतुश्चेत्यनेन सूत्रकृता, अशुद्धजीवोपासकः अशुद्धजीवं प्राप्नोति, कार्यमुपासीनश्च कार्यं प्राप्नोतीति कार्योपासनपक्षोऽपि निराकृतः। तेन यथाक्रतुवाक्यं ब्रह्मरुद्राद्युपासनं तत्तत्प्राप्तिफलकत्वात् मुमुक्षुणा न कार्यम्। ब्रह्माद्याः स्तम्बपर्यन्ताः जगदन्तर्व्यवस्थिताः प्राणिनः कर्मजनितसंसारवशवर्तिनो यतः, ततो न ते ध्याने ध्यानिनामुपकारकाः इत्यर्थज्ञापकं सत्, 'नान्यः पन्था' इतिवत् परविद्यावाक्येषु ब्रह्मरुद्रादिमात्रविवक्षावारकं भवतीत्यपि सिध्यति।

ननु अन्ययोगव्यच्छेदवत् अयोगव्यवच्छेदोऽपि दुरुपपादः मोक्षार्थभगवदुपासने मोक्षे उपासितभगवद्गुणानां प्राप्तावपि ऐश्वर्यकैवल्यार्थोपासने तत्प्राप्त्यभावात्। अतो वाक्यमिदं संभावितस्थलानुवादरूपं सत् अर्थवादमात्रमिति किमत्रार्थविशेषाऽऽग्रहेणेति चेत्—उच्यते। वाक्यस्यास्य केवलार्थवादत्वे सूत्रकारः तत्क्रतुश्चेति इदं न प्रमाणयेत्। तेन हि, प्राप्यविषयकमुपासनञ्च श्रूयते इत्यर्थकेन एतद्वाक्यं

प्रमाणीकृतम्। अत एव न्यायनिबन्धनात्मके ब्रह्मसूत्रे प्रमाणीकृतत्वात् तत्र तत्र तत्क्रतुन्यायेनेति व्यवहारः, न तु तत्क्रतुश्रुत्येति। सूत्रेऽत्र तत्क्रतुश्चेति निबन्धनाद् ज्ञायते, कार्याधिकरणफलफलिभाववर्णनावसरे तत्क्रतुवाक्यस्य केवलार्थवादत्वं पूर्वपक्षे, विवक्षितार्थविशेषकत्वञ्च सिद्धान्ते वर्णनीयमिति। यत्तु अयोगव्यवच्छेदेऽनुपपत्ति-वर्णनम्, तत्राहुः, अस्य वाक्यस्य मोक्षोपासनमात्रविषयकत्वान्न दोषप्रसक्तिरिति।

इदमप्यत्र बोध्यम्—श्रीभगवद्गीताष्टमाध्याये, 'अन्तकाले च मामेव स्मरन् मुक्त्वा कलेबरम्। यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः' इति ऐश्वर्यार्थिनामप्यन्तकाले भगवदनुसंधानं पश्चाद् भगवद्भावरूपं फलञ्च वर्णितम्। उपरि च 'कविं पुराण' मित्यादिनाऽन्तकाले ऐश्वर्यार्थिनोऽनुसंधानं विधास्यति। अन्तकाले तथाऽनुसंधानं प्राक् तथाऽनुसंधाने सत्येवेति तदपि तत्रोक्तमेव। तत्र कवित्वाद्यनुसंधानञ्चापेक्षितैश्वर्यप्रदत्वोपयोगितयेति कवित्वादिमहिमप्रयुक्तैश्वर्यविशेषावच्छिन्नतया कैवल्यरूपस्वानुभाव्यफलानुरूपाकारावच्छिन्नतया च परमात्मानुसंधानात् तत्तत्फलभाक् भवत्युपासक इति ज्ञायते। न केवलमुपासनस्थले, अन्यत्रापि अन्तिमस्मरणानुगुणं फलं प्राप्यत इति च तत्रैवोक्तम्, 'यंयं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेबरम्। तंतमेवैति कौन्तेय सदा तद्भावभावितः' इति। अत एव आदिभरतस्य मृगभावनया अन्तकालाऽऽपतितया मृगभावः। तथा च किञ्चिन्मृगभावनायां भावितमृगजातीयत्वापत्तिवत् ऐश्वर्याद्यवच्छिनत्वेन परमात्मभावनायां तेन रूपेण तज्जातीयस्वप्राप्तिर्भवतीति सिध्यति। एतदर्थविशेषप्रतिपादकञ्चेदं तत्क्रतुवचनमिति स्वरसतः प्रतीयते। अतएव शाङ्करे एतद्वचनव्याख्यानावसरे यंयं वापीति गीतावचनमनुसंहितम्। एवञ्च, 'श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः' इत्येतद्भाष्यानुरोधेनात्र, 'अथ खलु क्रतुमयः पुरुष' इत्यस्य अध्यवसायपरिणामात्मकः पुरुषो भवतीत्यर्थः। तदुपपादनं यथाक्रतुरित्यादिना। अध्यवसिताकारप्राप्तिर्भवति पश्चात्। अतश्चान्तिमकाले पश्चाल्लब्धव्याकारविषयाध्यवसायसंपत्तये तद्भावभावनापरः सन् आदित एव तदेकपरो भवेत्। तदुच्यते स क्रतुं कुर्वीतेति। शाङ्करे तु क्रतुमयः=अध्यवसायप्रचुरः इत्युक्तम्। तथाच यथाक्रतुवाक्यं यंयं वापीति गीतावचनमूलभूतं अन्तिमप्रत्ययानुसारि भाविफलमित्यपूर्वार्थप्रतिपादकम् यथोपासन फलप्राप्तिप्रदर्शनपरमपि; 'स क्रतुं कुर्वीत', 'तं यथायथोपासते तथैव भवती' ति श्रुत्यनुसारादित्यलमत्र विस्तरेण।

कारिका, सारावली (२३१, ३२५, ३७७) प्रभृतिविमर्शटिप्पणविवरणादि पूर्वमर्थनिर्धारणञ्च परस्तादिति।

अपूर्वपदानि

उद्गीथः १. १.
आगायति ,,
आखणम् १-२-८
अभ्याशः १-३-१२; २ १; ३-१९-४; ५-१०
छन्दः १-४-२
होतृषदनात् १-५-५
दुरुद्गीथ(त)म् ,,
परःकृष्णम् १-६-५; ३-४-३
प्रणखात् १-६-६
कप्यासम् ,,
उत् १-६-७
गोष्णौ १-७-५
परोवरीयान् १-९-२; २-७-१
मटची १-१०
आटकी (आटिकी) ,,
इभ्यः ,,
प्रद्राणकः ,,
कुल्माषः ,,
आस्तावः १-१०-८
प्रस्तावः १-१०; २-२
प्रतिहारः ,, ,,
समतिसृष्टाः १-११
शौवउद्गीथः १-१२
निहवः १-१३
अनिरुक्तः ,, २-२२
स्तोभः ,,
संचरः ,,
हाउकारादि ,,
हिङ्कारः २-२
निधनम् ,,
आदिः २-८
उपद्रवः २-८
संप्रति २-५-५; ५-११; ८-११
कक्षम् २-९-७
गायत्रम् २-११
रथन्तरम् २-१२
वामदेव्यम् २-१३
बृहत् २-१४
वैरूपम् २-१५
वैराजम् २-१६
शक्वर्यः २-१७
रेवत्यः २-१८
यज्ञायज्ञीयम् २-१९
राजनम् २-२०
सलोकता ,,
सार्ष्टिता ,,
सायुज्यम् ,,
विनर्दि २-२२
निरुक्तः ,,
श्लक्ष्णम् ,,
क्रौञ्चम् ,,
अपध्वान्तम् ,,
वारुणम् ,,
स्वराः २-२२-३
ऊष्माणः ,,
स्पर्शाः ,,

अप्रस्तः	
अनिरस्तः	२–२२–५
विवृतः	
लेशेनानभिनिहित	
धर्मस्कन्धाः	२–२३
शकुना	२–२३–३
उपाकरणम्	२–२४–२
अपूपः	३–१
अभिसंविशन्ति	३–६–३
एकलः	३–११
प्रणाय्यः	३–११–५
गायत्री	३–१२
सुषिः	३–१३
व्युष्टिः	३–१३–४
निनदम्	३–१३–७
नदथुः	,,
अपिगृह्य	,,
क्रतुमयः	३–१४
चतुर्विंशतिवर्षाणा ति समस्तम	३–१६
वास्तेयम्	३–१९
उत्लूलवः	,,
सयुग्वा	४–१
कृतम्	४–१; ४–३
अयः	४–१
शूद्रः	४–२
उद्गायति	४–३
संवृङ्क्ते	,,
बभसः	,,
अनसूरिः	,,
निराकृत्य	४–४
प्रकाशवान्	४–५
अनन्तवान्	४–६
ज्योतिष्मान्	४–७
आयतनवान्	४–८
उयोक्	४–११
संयद्वामः	४–१५
वामनीः	,,
भामनीः	,,
आपूर्यमाणपक्षः	,,
देवपथः	,,
यज्ञः	४–१६
रिष्यति	४–१७
विरिष्टम	,,
उदकप्रवणः	,,
वसिष्ठः	५–१
अहंश्रेयसि	,,
कलाः	,,
पड्डीशशङ्कून्	,,
लम्भुकः	५–२
मन्थम	,,
संपातम	५–२; ५–१०
अमा	,,
देवयान	५–३
पितृयाणः	,,
पुरुषवचसः	५–३
अर्धम	,,
श्रद्धा	५–४
कपूयां	५–१०
महाशालाः	५–११
वैश्वानरः	,,
सुतेजाः	५–१२; ५–१८
सुतम	५–१२
आसुतम	,,
विश्वरूपः	५–१३; ५–१८
पृथग्वर्त्मा	५–१४; ,,

बहुलः	५-१५	लोकः	८-१; ८-२
संदेहः	,,	संप्रसादः	८-३
वस्तिः	५-१६	सत्यम्	,,
रयिः	५-१६	इष्टम्	८-५
प्रतिष्ठा	५-१७	सत्रायणम्	,,
प्रादेशमात्रम्	५-१८	मौनम्	,,
अभिविमानम्	,,	अनाशकायनम्	,,
भक्तम्	५-१९	अरण्यायनम	,,
अनूचानः	६-१	अरः	,,
स्तब्धः	,,	ण्यः	,,
आदेशः	,,	ऐरम्मदीयम्	,,
त्रिवृत्	६-३; ६-४; ६-८	सोमसवनः	,,
धातुः	६-५	अपराजिता	,,
षोडशकलः	६-७	प्रभुविमितम्	,,
शुक्लम्	६-८	स्रामः	८-९
धानाः	६-१२	साम्येण	८-१०
वाकोवाक्यम	७-१	प्रयोगः	८-१२
संकल्पते	७-४	आचरणे	,,
चित्तम्	७-५	श्यामम्	८-१३
ध्यानापादांशः	७-६	शबलम्	,,
उरुगायव्रतः	७-१२	यशः	८-१४
स्मरः	७-१३; ७-१४	श्येतम्	,,
अतिवादी	७-१५	अदत्कम्	,,
भूमा	७-२३	लिन्दु	,,
ब्रह्मपुरम्	८-१	अतिशेष	१-१०; ८-१५
दहरम्	,,	तीर्थेभ्यः	,,

शुभमस्तु

LIST OF BOOKS PUBLISHED.

१.	...योपनिषत् श्रीमद्भिगमान्तमहादेशिक श्रीकूर- ...रनारायणस्वामिभाष्याभ्यां भूषिता ...ोपनिषत् श्रीरङ्गरामानुजस्वामिभाष्यभूषिता ...ोपनिषत् ,,	५	०	०
२.	...माण्डूक्य-माण्डूक्यार्थवशिखोपनिषदः श्रीरङ्गरामानुजस्वामिभाष्यभूषिताः	४	०	०
३.	तैत्तिरीयैतरेयोपनिषदौ तथा	६	०	०
४.	छान्दोग्योपनिषत् तथा	८	०	०
5.	...ய திருமலை ஆழ்வார் அருளிச்செய்த முதல் ஸம்புடம் உரையுடன்	2	8	0
6.	,, ,, ...து ,,	.	0	0
7.	,, ,, ...-வது ,,	2	0	0

१.	...द्धित्रयम् गूढार्थप्रकाशसहितम्	२	०	०
२.	...तार्थप्रकाशिका (अद्वैतामोदविमर्शः)	२	०	०
३.	...शावास्योपनिषद्भाष्यम् (आचार्यभाष्य तात्पर्यसहितम्)	१	८	०
	...यकुसुमाञ्जलिः सरलविशदसर्वार्थगर्भविस्तरास्यव्याख्या सहितः	६	०	०
५.	...यायप्रकाशः (मीमांसा ...स्यादर्शसमेतः	४	०	०
	...षिकरणावलिविमर्शः सानुवादः	०	१२	०
७.	...कसंग्रहः सुखप्रवेशिनीसमेतः	१	०	०
८	श्रीवेङ्कटेशकल्याणचरितकाव्यम் தமிழ் தாத்பர்யத்துடன்	०	१२	०
9.	...யாஸாதிகாரஸங்க்ரஹம் (மணிப்ரவாளம்)	1	0	0

Addresses :—

(1) Sri Uttamur T. Viraraghavacharya,
Ubhaya Vedanta Granthamala Office,
TIRUPATI.

(2) Rao Bahadur G. Rangaswami Aiyangar,
Secretary, Sri Visishtadvaita Bhashya Publishing Committee,
Veda Vilas, No. 3. Hindi Pracharak Road,
Tyagarayanagar, MADRAS.